अमारा तरफथी प्रसिद्ध थयेलां अत्यंत उपयोगी ग्रंथो.

१ **समराइच कहा भा. १** आचार्य महाराज श्रीमान् हरिभद्रसूरिजीनो बनावेलो प्रशम रसपूर्ण व्याख्यानमां वांचवा लायक ग्रंथ छे. सरळता माटे छाया साथे छपावेल छे पत्राकारे. किं. ६-०-०

२ **प्रज्ञापना सूत्र** मूळ अने टीकाना अनुवाद साथे पत्राकारे लेजर पेपरमां, निर्णयसागर टाइपमां, त्रण भागमां फरमा १५०. किं. १६-०-०

३ **उपाशक दशांग** मूळ अने टीकाना अनुवाद साथे, लेजर पेपरमां, पत्राकारे किं. २-०-०

४ **पंचसंग्रह भा. १** मूळ अने श्रीमद् आचार्य मलयगिरिजीनी टीकाना भाषांतर साथे कर्मग्रंथना अभ्यासी माटे खास उपयोगी फरमा ८० किं. ४-८-०

५ **नवतत्त्व** सुधारा वधारा साथेनी आवृत्ति बीजी चालु भाषामां समजाय तेवी रीतना विवेचन साथे. किं. ०-१२-०

६ **पंचसंग्रह भा. १*** स्वोपज्ञ तथा आ. श्री. मलयगिरिजी महाराजे करेल टीका साथे, प्रतो साथे मेळवी शुद्ध करी पत्राकारे छपावेल छे. प्रकाशक-मुक्ताबाई ज्ञानमंदिर डभोइ. किं. ४-८-०

प्रातिस्थानः-

श्री शारदा मुद्रणालय.
जैन सोसायटी नं. १५
अमदावाद.

---

* जे महाशयोए बीजो भाग मंगाव्यो होय तेओए ग्रंथ पूर्ण करवा माटे आ प्रथम भाग मंगाववा जेवो छे.

नमोत्थु णं समणस्स भगवओ महावीरस्स

याकिनीमहत्तरासूनु–परमगुणानुरागि–परमसत्यप्रिय–भगवच्छ्रीहरिभद्रसूरिविरचिता

समराइच्चकहा ।

2
Copy
7
16
52

सौराष्ट्रान्तर्गतवळाग्रामवास्तव्यपण्डितभगवानदासकृतसंस्कृतछायानुवादसहिता ।

[षड्भवात्मकः प्रथमो भागः]

वि. सं. १९९४ प्रतयः ५०० इ. स. १९३८ वीर सं. २४६४

मूल्यं षड् रूप्यकाः ।

INDIRA GANDHI
NATIONAL CENTRE
FOR THE ARTS
ACC NO. G-13854
Dated 12.12.95

इदं पुस्तकं अमदावाद—जैनसोसायटीस्थितश्रीशारदामुद्रणालये तत्स्वामिना
दोसिअकुलोत्पन्नहर्षचन्द्रात्मजपण्डितभगवानदासेन
संशोधितं मुद्रितं प्रकाशितं च ।

निवेदन.

आ 'समराइच्चकहा' छपाववानो प्रारंभ आजथी लगभग बे वरस पहेलां कर्यो हतो अने तेने जेम बने तेम जलदीथी छपावी बहार पाडवानो विचार हतो, परन्तु केटलाक अनिवार्य कारणोने लीधे तेम करवामां विलम्ब थयो छे. 'समराइच्चकहा' श्रीहरिभद्राचार्यनी प्रशमरसपूर्ण सुन्दर कृति छे, ते ग्रन्थने रोयल एशीयाटीक सोसाइटीए घणा वरस पहेलां छपावी प्रसिद्ध कर्यो हतो, परन्तु ते प्राकृत भाषामां होवाथी तेनो जेटलो जोइए तेटलो प्रचार अने उपयोग थइ शक्यो नथी, वळी ते पुस्तकाकारे होवाथी साधुओने व्याख्यानमां तेनो उपयोग करवानी मुश्केली पडती हती, माटे अमे संस्कृत छाया साथे पत्राकारे छपावी प्रकाशित कर्यो छे. आ ग्रन्थनी प्रस्तावना, विषयानुक्रम अने शुद्धिपत्रक बीजा भागमां आपवामां आवशे. आ ग्रन्थनुं संशोधन ध्यान आपीने करवामां आव्युं छे, तो पण मुद्रायंत्रना दोषथी, बीबाओ उडी जवाथी के तूटी जवाथी, दृष्टिदोषथी, अथवा भ्रान्तिथी जे कंइ अशुद्धि रही होय तेने सुधारी लेवा विद्वानोने प्रार्थना छे.

प्रकाशक

ॐ

याकिनीमहत्तरासूनु-परमगुणानुरागि-परमसत्यप्रिय-भगवत्-श्रीहरिभद्र-
सूरिवररचिता—

समराइच्चकहा।

पणमह विजिअसुदुज्जय-निज्जिअसुरमणुअ-विसमसरपसरं। तिहुअणमङ्गलनिलयं वसहगइगयं जिणं उसहं॥
परमसिरिवद्धमाणं पणट्ठमाणं विसुद्धवरनाणं। गयजोअं जोईसं सयंभुवं वद्धमाणं च॥
सेसे चिय बावीसे जाइ-जरा-मरणबन्धणविमुक्के। तेलोक्कमत्थयत्थे तित्थयरे भावओ नमह॥

प्रणमत विजितसुदुर्जय-निर्जितसुरमनुज-विषमशरप्रसरम्। त्रिभुवनमङ्गलनिलयं वृषभगतिगतं जिनम्-ऋषभम्॥
परमश्रीवर्धमानं प्रनष्टमानं विशुद्धवरज्ञानम्। गतयोगं योगीशं स्वयंभुवं वधमानं च॥
शेषांश्चैव द्वाविंशतिं जाति-जरा-मरणबन्धनविमुक्तान्। त्रैलोक्यमस्तकस्थान् तीर्थंकरान् भावतो नमत॥

उवणेउ मङ्गलं वो जिणाण मुहलालिजालसंवलिआ। तित्थपवत्तणसमए तिअसविमुक्का कुसुमवुट्ठी ॥
देउ सुहं वो सुर-सिद्ध-मणुअवन्द्रेहि सायरं नमिआ। तित्थयरवयणपङ्कयविणिग्गया मणहरा वाणी ॥

अलं पवित्थरेण। सुणह सोअव्वाइं, पसंसह पसंसणिज्जाइं, परिहरह परिहरिअव्वाइं, आयरह आयरिअव्वाइं। तत्थ—

सोअव्वाइं नरा-ऽमर-सिवसुहजणयाइ अत्थसाराइं। सव्वन्नुभासिआइं भुवणम्मि पइट्ठिअजसाइं ॥
ताइं चिय विबुहाणं पसंसणिज्जाइं तह य जाइं च। तेहिं चिय भणिआइं सम्मत्त-न्नाण-चरणाइं ॥
परिहरिअव्वाइं तहा कुगईवासस्स हेउभूआइं। मिच्छत्तमाइआइं लोगविरुद्धाइं य तहेव ॥
आयरिअव्वाइं अणिस्सिएण सम्मत्त-नाण-चरणाइं। दोगच्चविउडणाइं चिन्तामणिरयणभूआइं ॥
एत्थं पुण अहिगारो ता सोअव्वेहि पत्थुअपबन्धे। सव्वन्नुभासिआइं सोअव्वाइं ति भणियमिणं ॥

उपनयतु मङ्गलं वो जिनानां मुखराऽलिजालसंवलिता। तीर्थप्रवर्तनसमये त्रिदशविमुक्ता कुसुमवृष्टिः ॥
ददातु सुखं वः सुर-सिद्ध-मनुजवन्द्रैः सादरं नता। तीर्थंकरवदनपङ्कजविनिर्गता मनोहरा वाणी ॥
अलं प्रविस्तरेण। शृणुत श्रोतव्यानि, प्रशंसत प्रशंसनीयानि, परिहरत परिहर्तव्यानि, आचरत आचरितव्यानि। तत्र—
श्रोतव्यानि नरा-ऽमर-शिवसुखजनकानि अर्थसाराणि। सर्वज्ञभाषितानि भुवने प्रतिष्ठितयशांसि ॥
तान्येव विबुधानां प्रशंसनीयानि तथा च यानि च। तैरेव भणितानि सम्यक्त्व-ज्ञान-चरणानि।
परिहर्तव्यानि तथा कुगतिवासस्य हेतुभूतानि। मिथ्यात्वादिकानि लोकविरुद्धानि च तथैव ॥
आचरितव्यानि अनिश्रितेन सम्यक्त्व-ज्ञान-चरणानि। दौर्गत्यविकुटनानि चिन्तामणिरत्नभूतानि ॥

वोच्छं तप्पडिबद्धं भवियजणाणन्दयारिणिं परमं । संखेवओ महत्थं चरिअकहं तं निसामेह ॥

तत्थ य 'तिविहं कहावत्थुं' ति पुव्वायरियपवाओ । तं जहा-दिव्वं, दिव्वमाणुसं, माणुसं च । तत्थ दिव्वं नाम जत्थ केवलमेव देवचरिअं वण्णिज्जइ । दिव्वमाणुसं पुण जत्थ दोण्हं पि दिव्वमाणुसाणं । माणुसं तु जत्थ केवलं माणुसचरियं ति । एत्थ सामन्नओ चत्तारि कहाओ हवन्ति । तं जहा-अत्थकहा, कामकहा, धम्मकहा, संकिण्णकहा य । तत्थ अत्थकहा नाम, जा अत्थोवायाणपडिबद्धा, असि-मसि-कसि-वाणिज्ज-सिप्पसंगया, विचित्तधाउवायाइपमुहमहोवायसंपउत्ता, साम-भेय-उवप्पयाण-दण्डाइपयत्थविरइआ सा अत्थकह त्ति भण्णइ । जा उण कामोवायाणविसया, वित्त-वपु-व्वय-कला-दक्खिण्णपरिगया, अणुरायपुलइअपडिवत्तिजोअसारा, दूईवावार-रमियभावाणुवत्तणाइपयत्थसंगया सा कामकह त्ति भण्णइ । जा उण धम्मोवायाणगोयरा, खमा-मद्दव-ऽज्जव-

---

अत्र पुनरधिकारस्तावत् श्रोतव्यैः प्रस्तुतप्रवन्धे । सर्वज्ञभाषितानि श्रोतव्यानीति भणितमिदम् ॥
वक्ष्ये तत्प्रतिवद्धां भव्यजनानन्दकारिणीं परमाम् । संक्षेपतो महार्थां चरितकथां तां निशाम्यत ॥

तत्र च 'त्रिविधं कथावस्तु' इति पूर्वाचार्यप्रवादः । तद्यथा—दिव्यम् , दिव्यमानुषम् , मानुषं च । तत्र दिव्यं नाम यत्र केवलमेव देवचरितं वर्ण्यते । दिव्यमानुषं पुनः यत्र द्वयोरपि दिव्यमानुषयोः (चरितम्) । मानुषं तु यत्र केवलं मानुषचरितमिति । अत्र सामान्यतः चतस्रः कथा भवन्ति । तद्यथा-अर्थकथा, कामकथा, धर्मकथा, संकीर्णकथा च । तत्र अर्थकथा नाम या अर्थोपादानप्रतिवद्धा, असि-मषी-कृषि-वाणिज्य-शिल्पसंगता, विचित्रधातुवादादिप्रमुखमहोपायसंप्रयुक्ता, साम-भेदो-पप्रदान-दण्डादिपदार्थविरचिता सा 'अर्थकथा' इति भण्यते । या पुनः कामोपादानविषया, वित्त-वपु-र्वयः-कला-दाक्षिण्यपरिगता, अनुरागपुलकितप्रतिपत्तियोगसारा, दूतीव्यापाररतभावानुवर्तनादिपदार्थसंगता सा 'कामकथा' इति भण्यते। या पुनर्धर्मोपादानगोचरा, क्षमा-मार्दवा-ऽऽर्जव-मुक्ति-तपः-संयम-सत्य

मुत्ति-तव-संजम-सच्च-सोया-ऽऽकिंचन्न-बंभचेरपहाणा, अणुव्वय-दिसि--देसा-ऽणत्थदण्डविरई-सामाइय-पोसहोववासो-वभोग-परिभोगा-ऽतिहिसंविभागकलिया, अणुकम्पा-ऽकामनिज्जराइपयत्थसंपउत्ता सा धम्मकह त्ति। जा उण तिवग्गोवायाणसंबद्धा, कव्व-कहा-गन्थत्थवित्थरविरइया, लोइय-वेयसमयपसिद्धा,उयाहरण-हेउ-कारणोववेया सा संकिण्णकह त्ति वुच्चइ। एयाणं च कहाणं तिविहा सोयारो हवन्ति। तं जहा-अहमा, मज्झिमा, उत्तम त्ति। तत्थ जे कोह-माण-माया-लोह-समाच्छाइयमई, परलोयदंसणपरंमुहा, इहलोगपरमत्थदंसिणो, निरणुकम्पा जीवेसु, ते तहाविहा तामसा अहमपुरिसा दुग्गइगमगकन्दुज्जयाए, सुगइपडिवक्खभूयाए, परमत्थओ अणत्थबहुलाए अत्थकहाए अणुसज्जन्ति। जे उण सद्दाइविसयविसमोहियमणा, भावरिउ-इन्दियाणुकूलवत्तिणो, अभावियपरमत्थमग्गा, 'इमं सुन्दरं, इमं सुन्दयरं' ति सुन्दरासुन्दरेसु अविणिच्छियमई, ते रायसा मज्झिमपुरिसा बुहजणोवहसणिज्जाए, विडम्बगमेत्तपडि-

-शौचा-ऽऽकिञ्चन्य-ब्रह्मचर्यप्रधाना, अनुव्रत -दिग्-देशा-ऽनर्थदण्डविरति-सामायिक-पौषधो-पवासो-पभोग-परिभोगा-ऽतिथिसंविभागकलिता, अनुकम्पा-ऽकामनिर्जरादिपदार्थसंप्रयुक्ता सा 'धर्मकथा' इति (भण्यते)। या पुनस्त्रिवर्गोपादानसंबद्धा, काव्य-कथा-ग्रन्थार्थविस्तरविरचिता, लौकिक-वेदसमयप्रसिद्धा, उदाहरण-हेतु-कारणोपेता सा 'संकीर्णकथा' इति उच्यते। एतासां च कथानां त्रिविधाः श्रोतारो भवन्ति। तद्यथा-अधमाः, मध्यमाः, उत्तमा इति। तत्र ये क्रोध-मान-माया-लोभसमाच्छादितमतयः, परलोकदर्शनपराङ्मुखाः, इहलोकपरमार्थदर्शिनः, निरनुकम्पा जीवेषु, ते तथाविधाः तामसा अधमपुरुषाः दुर्गतिगमन[१]कन्दोद्यतायाम्, सुगतिप्रतिपक्षभूतायाम्, परमार्थतः अनर्थवहुलायाम्-अर्थकथायाम्-अनुषजन्ति। ये पुनः शब्दादिविषयमोहितमनसः, भावरिपु-इन्द्रियानुकूलवर्तिनः, अभावितपरमार्थमार्गाः, 'इदं सुन्दरम्' 'इदं सुन्दरतरम्' इति सुन्दराऽसुन्दरेषु अविनिश्चितमतयः, ते राजसा मध्यमपुरुषा वहुजनोपहसनीयायाम्,

---

[१] कन्दं (दे) दृढम्

बद्धाए, इह परभवे य दुक्खसंवड्ढियाए कामकहाए अणुसज्जन्ति । जे उण मणगं सुन्दरयरा, सावेक्खा उभयलोएसु, कुसला ववहारनयमएणं, परमत्थओ सारविन्नाणरहिया, खुद्दभोएसु अबहुमाणिणो, अवियण्हा उदारभोगाणं, ते किंचि सत्तिया मज्झिमपुरिसा चेव आसयविसेसओ सुगइ-दुग्गइवत्तिणीए, जीव-लोगसभावविब्भमाए, सयलरसनीसन्दसंगयाए, विविहभावपसूइनिबन्धणाए संकिण्णकहाए अणुसज्जन्ति। जे उण जाइ-जरा-मरणजणियवेरग्गा, जम्मन्तरम्मि वि कुसलभावियमई, [१]निव्विण्णा कामभोगाण, मुक्कपाया पावलेवेण, विन्नायपरमपयसरूवा, आसन्ना सिद्धिसंपत्तीए, ते सत्तिया उत्तिमपुरिसा सग्ग-निव्वाणसमारुहणवत्तिणीए, बुहजणपसंसणिज्जाए, सयलकहासुन्दराए, महापुरिससेवियाए धम्मकहाए चेव अणुसज्जन्ति ॥

तओ अहं पि इयाणिं दिव्व-माणुसवत्थुगयं धम्मकहं चेव कित्तइस्सामि । भणियं च अकयपरोवयारनिरएहिं, उवलद्धपरमपय-

विडम्बनमात्रप्रतिबद्धायाम्, इह परभवे च दुःखसंवर्धिकायां कामकथायाम्-अनुषजन्ति । ये पुनर्मनाक् सुन्दरतराः, सापेक्षा उभयलोकेषु, कुशला व्यवहारनयमतेन, परमार्थतः सारविज्ञानरहिताः, क्षुद्रभोगेषु अबहुमानिनः, अवितृष्णा उदारभोगानाम्, ते किञ्चित् सात्त्विका मध्यमपुरुषाश्चैव आशयविशेषतः सुगति-दुर्गतिवर्तिन्याम्, जीवलोकस्वभावविभ्रमायाम्, सकलरसनिःष्यन्दसंगतायाम्, विविधभावप्रसूतिनिबन्धनायां संकीर्णकथायाम्-अनुषजन्ति । ये पुनर्जाति-जरा-मरणजातवैराग्याः, जन्मान्तरेऽपि कुशलभावितमतयः, निर्विण्णाः कामभोगेभ्यः, मुक्तप्रायाः पापलेपेन, विज्ञातपरमपदस्वरूपाः, आसन्नाः सिद्धिसंप्राप्त्याः, ते सात्त्विका उत्तमपुरुषाः स्वर्ग-निर्वाणसमारोहणवर्तिन्याम्, बहुजनप्रशंसनीयायाम्, सकलकथासुन्दरायाम्, महापुरुषसेवितायां धर्मकथायामेव अनुषजन्ति ॥

ततोऽहमपि इदानीं दिव्य-मानुषवस्तुगतां धर्मकथामेव कीर्तयिष्यामि । भणित च अकृतपरोपकारनिरतैः, उपलब्धपरमपदमार्गैः, सम-

---

[१] निव्विण्णकामभोगा क

मग्गेहिं, समतिण–मणि–मुत्त–लेट्ठु–कञ्चणेहिं सासयसिवसोक्खबद्धराएहिं धम्मसत्थयारेहिं—

धम्मेण कुलपसूई धम्मेण य दिव्वरूवसंपत्ती । धम्मेण धणसमिद्धी धम्मेण सुवित्थडा कित्ती ॥
धम्मो मङ्गलमउलं ओसहमउलं च सव्वदुक्खाणं । धम्मो बलमवि विउलं धम्मो ताणं च सरणं च ॥
किं जंपिएण बहुणा ? जं जं दीसइ समत्थजियलोए । इन्दिय–मणाभिरामं तं तं धम्मप्फलं सव्वं ॥
भीमम्मि मरणकाले मोत्तूणं दुक्खसंविढत्त पि । अत्थं देहं सयणं धम्मो च्चिय होइ सुसहाओ ॥
पावेइ य सुरलोयं तत्तो वि सुमाणुसत्तणं धम्मो । तत्तो दुक्खविमोक्खं सासयसोक्खं लहुं मोक्खं ॥
तं कुणइ जाणमाणो, जाणइ य सुणेइ जो उ मज्झत्थो । कुसलो य धम्मियाओ कहाउ सव्वन्नुभणियाओ ॥
ता पढमं धम्मगुणं पडुच्च चरियं अहं पवक्खामि । आराहगे–यराणं गुणदोसविभावणं परमं ॥

तृण–मणि–मुक्ता–लेष्टु–काञ्चनैः शाश्वतशिवसौख्यबद्धरागैर्धर्मशास्त्रकारैः—

धर्मेण कुलप्रसूतिः, धर्मेण च दिव्यरूपसंप्राप्तिः । धर्मेण धनसमृद्धिः, धर्मेण सुविस्तृता कीर्तिः ॥
धर्मो मङ्गलमतुलम्, औषधमतुलं च सर्वदुःखानाम् । धर्मो बलमपि विपुलं धर्मः त्राणं च शरणं च ॥
किं जल्पितेन बहुना? यद् यद् दृश्यते समस्तजीवलोके । इन्द्रिय–मनोऽभिरामं तत् तद् धर्मफलं सर्वम् ॥
भीमे मरणकाले मुक्त्वा दुःखसमर्जितमपि । अथ देहं स्वजनं, धर्मश्चैव भवति सुसहायः ॥
प्रापयति च सुरलोकम्, ततोऽपि सुमनुष्यत्वं धर्मः । ततो दुःखविमोक्षं शाश्वतसौख्यं लघु मोक्षम् ॥
तं करोति जानन्, जानाति च शृणोति यस्तु मध्यस्थः । कुशलश्च धार्मिकीः कथाः सर्वज्ञभणिताः ॥

नवपुव्वभवनिबद्ध संवेगकरं च भव्वसत्ताणं । चरियं समराइच्चस्स ऽवन्तिरन्नो सुणह वोच्छं ॥
एत्थं वहुया उ भवा दोण्ह वि उवओगिणो न ते सव्वे । नवसु परोप्परजोगो जत्तो संखा इमा भणिया ॥
जह तेणेव भगवया गिरिसेणुवसग्गसहणपज्जन्ते । संजायकेवलेणं सिट्ठं वेलंधरसुरस्स ॥
मुणिचन्दस्स य रन्नो देवीण य नम्मयापहाणाणं । संखेवेण फुडत्थं अहमवि तं संपवक्खामि ॥ भणियं च पुव्वायरिएहिं-
"गुणसेण-अग्गिसम्मा सीहा-ऽऽणन्दा य तह पिया-उत्ता । सिहि-जालिणि माइ-सुया धण-धणसिरिमो य पइ-भज्जा ॥
जय-विजया य सहोयर धरणो लच्छी य तह पई-भज्जा । सेण-विसेणा पित्तिय-उत्ता जम्मम्मि सत्तमए ॥
गुणचन्द-वाणमंतर समराइच्च गिरिसेणपाणो उ । एक्कस्स तओ मोक्खो बीयस्स अणन्तसंसारो ॥

तस्मात् प्रथमं धर्मगुणं प्रतीत्याहं चरितं प्रवक्ष्यामि । आराधके-तराणां गुण-दोषविभावनं परमम् ॥
नवपूर्वभवनिबद्धं संवेगकरं च भव्यसत्त्वानाम् । चरितं समरादित्यस्य अवन्तीराजस्य शृणुत वक्ष्ये ॥
अत्र बहुकास्तु भवाः द्वयोरपि उपयोगिनो न ते सर्वे । नवसु परस्परयोगो यतः संख्या इयं भणिता ॥
यथा तेनैव भगवता गिरिसेनोपसर्गसहनपर्यन्ते । संजातकेवलेन शिष्टं वेलंधरसुरस्य ॥
मुनिचन्द्रस्य च राज्ञः देवीनां च नर्मदाप्रधानानाम् । संक्षेपेण स्फुटार्थम्, अहमपि तं संप्रवक्ष्यामि ॥ भणितं च पूर्वाचार्यैः—
"गुणसेन-अग्निशर्माणौ सिंहा-ऽऽनन्दौ च तथा पितृ-पुत्रौ । शिखि-जालिन्यौ मातृ-सुते धन-धनश्रियौ च पति-भार्ये ॥
जय-विजयौ च सहोदरौ धरणो लक्ष्मीश्च तथा पति-भार्ये । सेन-विसेनौ पितृव्य-पुत्रौ जन्मनि सप्तमके ॥
गुणचन्द्र-वानव्यन्तरौ समरादित्यः गिरिसेनप्राणस्तु । एकस्य ततो मोक्षः द्वितीयस्य अनन्तसंसारः ॥

नगराइ-खिईपइट्ठं जयउर-कोसंबि-सुसम्मनयरं च। कायन्दी मायन्दी चम्पा ओज्झा य उज्जेणी॥
गुणसेणस्सुववाओ सोहम्भ-सणंकुमार-बम्भेसु। सुक्का-ऽऽणया-ऽऽरणेसुं गेवेज्जा-ऽणुत्तरेसुं च॥
इयरस्स उ उववाओ विज्जुकुमारेसु होइ नायव्वो। सेसो अणन्तरो उण रयणाईसुं अहक्कमसो॥
सागरमेगं पञ्च य नव-पण्णरसेव तह य अट्ठारा। वीसं तीसं तेत्तीससेव पढमस्स देवेसु॥
देवेसु सड्ढपलियं सागरतिय सत्त दस य सत्तरस। बावीसं तेत्तीसं बीयस्स ठिई उ नरएसु"॥
एवमेयाओ चरियसंगहणिगाहाओ। संपयं एयासिं चेव गुरूवएसाणुसारेणं वित्थरेणं भावत्थो कहिज्जइ—

नगरादि-क्षितिप्रतिष्ठम्, जयपुर-कौशाम्बी-सुशर्मनगरं च। काकन्दी माकन्दी चम्पा अयोध्या च उज्जयिनी॥
गुणसेनस्योपपात:, सौधर्म-सनत्कुमार-ब्रह्मेषु। शुक्रा-ऽऽरणेषु ग्रैवेयका-ऽनुत्तरेषु च॥
इतरस्य च उपपातः विद्युत्कुमारेषु भवति ज्ञातव्यः। शेषोऽनन्तरः पुना रत्नादिषु यथाक्रमशः॥
सागरमेकं पञ्च च नव पञ्चदशैव तथा चाष्टादश। विंशतिः, त्रिंशत्, त्रयस्त्रिंशद् एव प्रथमस्य देवेषु॥
देवेषु सार्धपल्यम्, सागरत्रिकं सप्त दश च सप्तदश। द्वाविंशतिः, त्रयस्त्रिंशद् द्वितीयस्य स्थितिस्तु नरकेषु"॥
एवमेताः चरितसंग्रहणीगाथाः। सांप्रतमेतासां चैव गुरूपदेशानुसारेण विस्तरेण भावार्थः कथ्यते—

---

१ अद्धपलियं क

पढमो भवो ।

अत्थि इहेव जम्बुद्दीवे दीवे, अवरविदेहे वासे, उत्तुङ्गधवलपागारमण्डियं, नलिणिवणसंछन्नपरिहासणाहं, सुविभत्ततिय-चउक्क-चच्चरं भवणेहिं जियसुरिन्दभवणसोहं खिइपइट्ठियं नाम नयरं ।

जत्थ विलयाउ कमलाइं कोइलं कुवलयाइं कलहंसे । वयणेहि जंपिएण य नयणेहि गईहि य जिणन्ति ॥
जत्थ य नराण वसणं विज्जासु, जसम्मि निम्मले लोहो । पावेसु सया भीरुत्तणं, च धम्मम्मि धणबुद्धी ॥
तत्थ य राया संपुण्णमण्डलो मयकलङ्कपरिहीणो । जणमणनयणाणन्दो नामेणं पुण्णचन्दो त्ति ॥
अन्तेउरप्पहाणा देवी नामेण कुमुइणी तस्स । सइ वड्ढियविसयसुहा इट्ठा य रइ व्व मयणस्स ॥

अस्ति इहैव जम्बूद्वीपे द्वीपे, अपरविदेहे वर्षे, उत्तुङ्गधवलप्राकारमण्डितम् , नलिनीवनसंछन्नपरिखासनाथम् , सुविभक्तत्रिक-चतुष्क-चत्वरम् , भवनैर्जितसुरेन्द्रभवनशोभं क्षितिप्रतिष्ठितं नाम नगरम् ।

यत्र वनिताः कमलानि कोकिलां कुवलयानि कलहंसान् । वदनैः जल्पितेन च नयनैः गतिभिश्च जयन्ति ॥
यत्र च नराणां व्यसनं विद्यासु, यशसि निर्मले लोभः । पापेषु सदा भीरुत्वं च धर्मे धनवुद्धिः ॥
तत्र च राजा संपूर्णमण्डलो मृग(मद)कलङ्कपरिहीणः । जनमनो-नयनानन्दो नाम्ना पूर्णचन्द्र इति ॥
अन्तःपुरप्रधाना देवी नाम्ना कुमुदिनी तस्य । सदा वर्धितविषयसुखा इष्टा च रतिरिव मदनस्य ॥

ताण य सुओ कुमारो गुणसेणो नाम गुणगणाइण्णो। बालत्तणओ वंतरसुरो व्व केलिप्पिओ, णवरं–॥

तम्मि य नयरे अतीव सयलजणबहुमओ, धम्मसत्थसंघायपाढओ, लोगववहार–नीइकुसलो, अप्पारम्भ–परिग्गहो, जन्नदत्तो नाम पुरोहिओ त्ति। तस्स य सोमदेवागब्भसंभूओ, महल्लतिकोणुत्तिमङ्गो, आपिङ्गलवट्टलोयणो, ठाणमेत्तोवलक्खियचिविडनासो, बिलमेत्तकण्णसन्नो, विजियदन्तच्छयमहल्लदसणो, वंकसुदीहरसिरोहरो, विसमपरिहस्सबाहुजुयलो, अइमडहवच्छत्थलो, वंकविसमलम्बोयरो, एक्कपासुन्नयमहल्लवियडकडियडो, विसमपइट्ठिऊरुजुयलो, परिथूलकढिणहस्सजङ्घो, विसमवित्थिण्णचलणो, हुयवहसिहाजालपिङ्गकेसो, अग्गिसम्मो नाम पुत्तो त्ति। तं च कोउहल्लेण कुमारगुणसेणो पहयपडुपडह–मुइङ्ग–वंस–कंसा–लयप्पहाणेण महया तूरेण नयरजणमज्झे सहत्थतालं हसन्तो नच्चावेइ, रासहम्मि आरोवियं, पहट्ठबहुडिम्भविन्दपरिवारियं, छित्तरमयधरियपोण्डरीयं, मगहरुत्तालवज्जन्तडिण्डिमं, आरोवियमहारायसद्दं, बहुसो रायमग्गे सुतुरियतुरियं हिण्डावेइ। एवं च पइदिणं कयन्तेणेव तेण कयत्थि-

---

तयोश्च सुतः कुमारो गुणसेनो नाम गुणगणाकीर्णः। बालत्वतः व्यन्तरसुर इव केलिप्रियः, नवरम्— ॥

तस्मिंश्च नगरे अतीव सकलजनबहुमतः, धर्मशास्त्रसंघातपाठकः, लोकव्यवहार–नीतिकुशलः, अल्पारम्भ–परिग्रहो यज्ञदत्तो नाम पुरोहित इति। तस्य च सोमदेवागर्भसंभूतः, महात्रिकोणोत्तमाङ्गः, आपिङ्गलवृत्तलोचनः, स्थानमात्रोपलक्षितचिपिटनासः, बिलमात्रकर्णसंज्ञः, विजितदन्तच्छदमहादशनः, वक्रसुदीर्घशिरोधरः, विषमपरिह्रस्वबाहुयुगलः, अतिलघुवक्षःस्थलः, वक्रविषमलम्बोदरः, एकपार्श्वोन्नतमहाविकटकटीतटः, विषमप्रतिष्ठितोरुयुगलः, परिस्थूलकठिनह्रस्वजङ्घः, विषमविस्तीर्णचरणः, हुतवहशिखाजालपिङ्गकेशः, अग्निशर्मा नाम पुत्र इति। तं च कुतूहलेन कुमारगुणसेनः प्रहतपटुपटह–मृदङ्ग–वंश–कांस्यक–लयप्रधानेन महता तूर्येण नगरजनमध्ये सहस्ततालं हसन् नर्तयति, रासभे आरोपितम्, प्रहृष्टबहुडिम्भवृन्दपरिवारितम्, जीर्णशूर्पमयधृतपुण्डरीकम्, मनोहरोत्तालवाद्यमानडिण्डिमम्,

ज्जन्तस्स तस्स वेरग्गभावणा जाया। चिन्तियं च णेण ॥

बहुजणधिक्कारहया उवहसणिज्जा य सव्वलोयस्स । पुव्विं अकयसुपुण्णा सहन्ति परपरिभवं पुरिसा ॥
जइ ता न कओ धम्मो सप्पुरिसनिसेविओ अहन्नेणं । जम्मन्तरम्मि धणियं सुहावहो मूढहियएणं ॥
इण्हिं पि फलविवागं उग्गं दट्ठूणमकयपुण्णाणं । परलोयबन्धुभूयं करेमि मुणिसेवियं धम्मं ॥
जम्मन्तरे वि जेणं पावेमि न एरिसं महाभीमं । सयलजणोहसणिज्जं विडम्बणं दुज्जणजणाओ ॥

एवं च चिन्तिय पवन्नवेरग्गमग्गो निग्गओ नयराओ, पत्तो य मासमेत्तेण कालेण तव्विसयसन्धिसंठियं, बउल-चम्पगा-ऽसोग-पुन्नाग-नागाउलं, पसन्तमय-मयाहिवपमुहविरुद्धसावयगणं, सुरहिहविगन्धगब्भिणुद्दामधूमपडलं, विमलसलिलगिरिणईप-

आरोपितमहाराजशब्दम्, बहुशो राजमार्गे सुत्वरितत्वरितं हिण्डयति। एवं च प्रतिदिनं कृतान्तेनेव तेन कदर्थ्यमानस्य तस्य वैराग्यभावना जाता। चिन्तितं चानेन—

बहुजनधिक्कारहता उपहसनीयाश्च सर्वलोकस्य। पूर्वमकृतसुपुण्याः सहन्ते परपरिभवं पुरुषाः ॥
यदि तावद् न कृतो धर्मः सुपुरुषनिषेवितोऽधन्येन। जन्मान्तरे गाढं सुखावहो मूढहृदयेन ॥
इदानीमपि फलविपाकमुग्रं दृष्ट्वाऽकृतपुण्यानाम्। परलोकबन्धुभूतं करोमि मुनिसेवितं धर्मम् ॥
जन्मान्तरेऽपि येन प्राप्नोमि नैतादृशीं महाभीमाम्। सकलजनोपहसनीयां विडम्बनां दुर्जनजनात् ॥

एवं च चिन्तयित्वा प्रपन्नवैराग्यमार्गो निर्गतो नगरात्, प्राप्तश्च मासमात्रेण कालेन तद्विषयसंधिसंस्थितम्, बकुल-चम्पका-ऽशोक-पुन्नाग-नागाकुलम्, प्रशान्तमृग-मृगाधिपप्रमुखविरुद्धश्वापदगणम्, सुरभिहविर्गन्धगर्भितोद्दामधूमपटलम्, विमलसलिलगिरिनदीप्रसाधि-

साहियवियडपेरन्तं, तावसजणजणियहिययपरिओसं सुपरिओसं नाम तवोवणं ति ।

संपाविऊण य तओ दीहद्धाणपरिखेइयसरीरो। वीसमिऊग मुहुत्तं तवोवणं अह पविट्ठो सो ॥
दिट्ठो य तेण वक्कल–वियडजडा–ऽजिण–तिदण्डधारी य। भूइरयकयतिपुण्डो आसन्नकमण्डलू सोमो ॥
भिसियाए सुहनिसण्णो कयलीहरयन्तरम्मि झाणगओ। परिवत्तेन्तो दाहिणकरेण रुद्दक्खमालं ति ॥
मन्तक्खरजवणेण य ईसिं वियलन्तकण्ठउट्ठउडो। नासाए निमियदिट्ठी विणिवारियसेसवावारो ॥
अयसिमयजोगपट्टयपमाणसंगयकयासणविसेसो। तावसकुलप्पहाणो अज्जवकोडिण्णनामो त्ति ॥

पिच्छिऊण य हरिसवसुल्लसियरोमञ्चेणं, धरणिनिमियजाणुकरयलेणं, उत्तिमङ्गेणं पुणो पुणो पहयखिइतलेणं 'अहो ! धन्नो, अहो ! धन्नो' त्ति भणमाणेणं पणमिओ तेणं। तेण वि य तं तहा पेच्छिऊण अतिहिबहुमाणकरणलालसेण झाणजोगं पमोत्तूणं सागय-

---

तविकटपर्यन्तम्, तापसजनजनितहृदयपरितोषं सुपरितोषं नाम तपोवनमिति।

संप्राप्य च ततो दीर्घाध्वपरिखेदितशरीरः। विश्रम्य मुहूर्तं तपोवनमथ प्रविष्टः सः ॥
दृष्टश्च तेन वल्कल–विकटजटा–ऽजिन–त्रिदण्डधारी च। भूतिरजस्कृतत्रिपुण्ड्रः आसन्नकमण्डलुः सोमः ॥
वृषिकायां (कुशासने) सुखनिषण्णः कदलीगृहान्तरे ध्यानगतः। परिवर्तयन् दक्षिणकरेण रुद्राक्षमालामिति ॥
मन्त्राक्षरजपनेन च ईषद् विचलत्कण्ठौष्ठपुटः। नासायां स्थापितदृष्टिः विनिवारितशेषव्यापारः।
अतसीमययोगपट्टकप्रमाणसंगतकृतासनविशेषः। तापसकुलप्रधानः आर्जवकौण्डिन्यनामेति ॥

प्रेक्ष्य च हर्षवशोल्लसितरोमाञ्चेन, धरणीस्थापितजानुकरतलेन, उत्तमाङ्गेन पुनः पुनः प्रहतक्षितितलेन 'अहो ! धन्यः, अहो ! धन्यः'

वयणपुरस्सरं 'अहो ! आसणं आसणं' ति भणमाणेणं वहुमन्निओ । तओ उडयङ्गणनिसेवितावसकुमारोवणीए इसिणा य 'उवविससु एत्थ' त्ति भणिओ सविणयं उवविट्ठो विट्ठरे त्ति। पुच्छिओ य इसिणा–'कुओ भवं आगओ ?' त्ति । तओ तेण सवित्थरो निवेइओ से अत्तणो वुत्तन्तो । भणिओ य इसिणा–वच्छ ! पुव्वकयकम्मपरिणइवसेणं एवं परिकिलेसभाइणो जीवा हवन्ति । ता नरिन्दावमाणपीडियाणं, दारिद्दुक्खपरिभूयाणं, दोहग्ग–कलङ्कदूमियाणं, इट्ठजणविओगदहणतत्ताण य एयं परं इह–परलोयसुहावहं परमनिव्वुइट्ठाणं ति । एत्थ—

पेच्छन्ति न सङ्गकयं दुक्खं अवमाणणं च लोगाओ । दोग्गइपडणं च तहा वणवासी सव्वहा धन्ना ॥

एवमणुसासिएण भणियं अग्गिसम्मेणं–भगवं ! एवमेयं, न संदेहो त्ति । तो जइ भयवओ ममोवरि अणुकम्पा, उचिओ वा अहं एयस्स वयविसेसस्स, ता करेह मे एयवयप्पयाणेणाणुग्गहं ति । इसिणा भणियं–वच्छ ! वेरग्गमग्गाणुगओ तुमं ति करेमि अणुग्गहं,

---

इति भणता प्रणतस्तेन । तेनाऽपि च तं तथा प्रेक्ष्य अतिथिवहुमानकरणलालसेन ध्यानयोगं प्रमुच्य स्वागतवचनपुरस्सरम् 'अहो ! आसनम् आसनम्' इति भणता वहुमानितः । तत उटजाङ्गणनिषेवितापसकुमारोपनीते ऋषिणा च 'उपविश अत्र' इति भणितः सविनयम् उपविष्टो विष्टरे इति। पृष्ट ऋषिणा–'कुतो भवान् आगतः' ? इति । ततस्तेन सविस्तरो निवेदितस्तस्य आत्मनो वृत्तान्तः। भणितश्च ऋषिणा–वत्स ! पूर्वकृतकर्मपरिणतिवशेनैवं परिक्लेशभाजिनो जीवा भवन्ति । तस्माद् नरेन्द्रापमानपीडितानाम्, दारिद्र्यदुःखपरिभूतानाम् , दौभार्ग्य–कलङ्कदूनानाम् , इष्टजनवियोगदहनतप्तानां चैतत् परं इह–परलोकसुखावहं परमनिर्वृतिस्थानमिति । अत्र–

प्रेक्षन्ते न संगकृतं दुःखम् , अवमाननं च लोकात् । दुर्गतिपतनं च तथा वनवासिनः सर्वथा धन्याः ॥

एवमनुशासितेन भणितमग्निशर्मणा–भगवन् ! एवमेतत् , न संदेह इति । तस्माद् यदि भगवतो ममोपरि अनुकम्पा, उचितो वा अहं

को अन्नो एयस्स उचिओ त्ति। तओ अइक्कन्तेसु कइवयदिणेसु संसिऊण य सवित्थरं निययमायारं, पसत्थे तिहि-करण-मुहुत्त-जोग-लग्गे दिन्ना से तावसदिक्खा। महापरिभवजणियवेरग्गाइसयभाविएण याणेण तम्मि चेव दिक्खादिवसे सयलतावसलोयपरियरियगुरुसमक्खं कया महापइन्ना। जहा-जावज्जीवं मए मासाओ भासाओ चेव भोत्तव्वं, पारणगदिवसे य पढमपविट्ठेणं पढमगेहाओ चेव लाभे वा अलाभे वा नियत्तियव्वं, न गेहन्तरमभिगन्तव्वं ति। एवं च कयपइन्नस्स तस्स. जहाकयं पइन्नमणुपालिन्तस्स अइक्कन्ता बहवे पुव्वलक्खा। तवोवणासन्नवसन्तउरनिवासिणो य लोयस्स गुणराइणो जाओ तं पइ अईव भत्तिबहुमाणो। अहो ! अयं महातवस्सी इहलोयनिप्पिवासो, सरीरे वि दढमप्पडिबद्धो, एयस्स सफलं जीवियं ति। भणियं च-

जणपक्खवायबहुमाणिणा वि जत्तो गुणेसु कायव्वो। आवज्जन्ति गुणा खलु अबुहं पि जणं अमच्छरियं॥

एतस्य व्रतविशेषस्य, तस्मात् कुरु मम एतद्व्रतप्रदानेन अनुग्रहमिति। ऋषिणा भणितम्-वत्स! वैराग्यमार्गानुगतस्त्वमिति करोमि अनुग्रहम्, कोऽन्य एतस्य उचित इति। ततोऽतिक्रान्तेषु कतिपयदिनेषु शंसित्वा च सविस्तरं निजकमाचारम्, प्रशस्ते तिथि-करण-मुहूर्त-योग-लग्ने दत्ता तस्य तापसदीक्षा। महापरिभवजनितवैराग्यातिशयभावितेन चानेन तस्मिन्नेव दीक्षादिवसे सकलतापसलोकपरिकरितगुरुसमक्षं कृता महाप्रतिज्ञा। यथा— यावज्जीवं मया मासाद् मासाद् एव भोक्तव्यम्, पारणकदिवसे च प्रथमप्रविष्टेन प्रथम गेहाद् एव लाभे वाऽलाभे वा निवर्तितव्यम्, न गेहान्तरमभिगन्तव्यमिति। एवं च कृतप्रतिज्ञस्य तस्य यथाकृतां प्रतिज्ञामनुपालयतोऽतिक्रान्तानि बहूनि पूर्वलक्षाणि। तपोवनासन्नवसन्तपुरनिवासिनश्च लोकस्य गुणरागिणो जातस्तं प्रति अतीव भक्ति-बहुमानः। अहो! अयं महातपस्वी इहलोकनिप्पिपासः, शरीरेऽपि दृढमप्रतिबद्धः, एतस्य सफलं जीवितमिति। भणितं च—

जनपक्षपातबहुमानिनाऽपि यत्नो गुणेषु कर्तव्यः। आवर्जयन्ति गुणाः खलु अबुधमपि जनममात्सर्यम्॥

इओ य पुण्णचन्दो राया कुमारगुणसेणं कयदारपरिग्गहं रज्जे अभिसिञ्चिऊण सह कुमुइणीए देवीए तवोवणवासी जाओ। सो य कुमारगुणसेणो अणेयसामन्तपणिवइयचलणजुयलो, निज्जियनियमण्डलाहियाणेगमण्डलो, दसदिसि विसट्टनिम्मलविस्सुयजसो, धम्म-त्थ-कामलक्खणतिवग्गसंपायणरओ महाराया संवुत्तो त्ति। अन्नया य कालक्कमेणेव जहासुहं सयलजणसलाहणिज्जं सह वसंतसेणाए महादेवीए रज्जसोक्खं अणुहवन्तो आगओ वसन्तउरं, पविट्ठो य महामङ्गलोवयारेणं, पूजिओ य पउरेहिं, गओ समं तेहिं पाउसलीलावलम्बिसोहियं विमाणच्छन्दयं नाम पासायं। जत्थ मेहदुद्दिणच्छायाणुयारिणीओ बहलकालागरुधूमसंतईओ, सोयामणीओ विव विहायन्ति रयणावलीओ, जलधाराओ विव दीसंति मुत्तावलीओ, बलायापन्तियाओ विव विहायन्ति चमरपन्तियाओ, इन्दाउहच्छायावहारिणीओ पलम्बियाओ पट्टंसुयमालाओ, गन्धोयगावसेयसुरभिगन्धा भूमिभागा, रुण्टन्तमहुयरकुलाउलावइण्णा पुप्फोवयारा। किं बहुणा जंपिएणं ?

इतश्च पूर्णचन्द्रो राजा कुमारगुणसेनं कृतदारपरिग्रहं राज्येऽभिषिच्य सह कुमुदिन्या देव्या तपोवनवासी जातः। स च कुमारगुणसेनोऽनेकसामन्तप्रणिपतितचरणयुगलः निर्जितनिजमण्डलाधिकानेकमण्डलः दशदिशि विकसितनिर्मलविश्रुतयशाः, धर्मा ऽर्थ-कामलक्षण त्रिवर्गसंपादनरतो महाराजः संवृत्त इति। अन्यदा च कालक्रमेणैव यथासुखं सकलजनश्लाघनीयं सह वसन्तसेनया महादेव्या राज्यसौख्यमनुभवन् आगतो वसन्तपुरम्, प्रविष्टश्च महामङ्गलोपचारेण, पूजितश्च पौरैः, गतः समं तैः प्रावृड्लीलावलम्बिशोभितं विमानच्छन्दकं नाम प्रासादम्। यत्र मेघदुर्दिनच्छायानुकारिण्यो बहलकालागुरुधूमसंततयः, सौदामिन्य इव विभान्ति रत्नावल्यः, जलधारा इव दृश्यन्ते मुक्तावल्यः, बलाकापङ्क्तय इव विभान्ति चामरपङ्क्तिकाः, इन्द्रायुधच्छायापहारिण्यः प्रलम्बिताः पट्टांशुकमालाः, गन्धोदकावसेकसुरभिगन्धा भूमिभागाः, रटन्मधुकरकुलाकुलावतीर्णाः पुष्पोपचाराः। किं बहुना जल्पितेन ?

पुरिसाण मोहनिद्दासुत्ताण वि सिमिणयं पिव कहेइ । पुव्विं कयाण वियडं फलं च जो भागवेयाणं ॥

तत्थ य जहाणुरूवं पउरजणं सम्माणेऊण विसज्जिएसु तेसु, विविहणाडय–च्छन्द–नट्टियाइणा मणहरेण विणोएण विगमिऊण तं अहोरत्तं, बिइयदिवसम्मि य संपाइयसयलगोसकिच्चो उचियवेलाए चेव निग्गओ [१]वाहियालिं । परिवाहिया य तेणं बहवे वल्हीय–तुरुक्क–वज्जराइया आसा । तज्जणियखेयावणनिमित्तं च उवविट्ठो वाहियालीतडनिविट्ठे सहस्सम्बवणुज्जाणे । एत्थन्तरम्मि गहियनारङ्गकढिणया आगया दुवे तावसकुमारया । दिट्ठो य णेहि राया, अभिनन्दिओ य ससमयपसिद्धाए आसीसाए। अब्भुट्ठाणासणपयाणाइणा उवयारेण बहुमन्निया य राइणा। भणियं च णेहिं–महाराय ! सुगिहीयनामधेएण अम्हे कुलवइणा भवओ चउरासमगुरुस्स, सुक्कयधम्माधम्मववत्थस्स सरीरपउत्तिपरियाणणनिमित्तं पेसिया । एवं सोऊण संपयं तुमं पमाणं ति । राइणा भणियं––कहिं सो भयवं कुलवइ त्ति। तेहिं भणियं––इओ नाइदूरे सुपरिओसनामे तवोवणे त्ति । तओ य सो राया भत्ति–कोउगेहिं गओ तं तवोवणं ति ।

पुरुषाणां मोहनिद्रासुप्तानामपि स्वप्नमिव कथयति । पूर्वं कृतानां विकटं फलं च यो भागधेयानाम् ॥

तत्र च यथानुरूपं पौरजनं संमान्य, विसर्जितेषु तेषु विविधनाटक–च्छन्द–नर्तितादिना मनोहरेण विनोदेन विगम्य तद् अहोरात्रम्, द्वितीयदिवसे च संपादितसकलगोस (प्रभात) कृत्यः उचितवेलायां चैव निर्गतो वाह्यालिम् । परिवाहिताश्च तेन वहवो वाल्हीक–तुरुष्क–वज्जरादिका अश्वाः । तज्जनितखेदापनयननिमित्तं च उपविष्टो वाह्यालीतटनिविष्टे सहस्राम्रवनोद्याने । अत्रान्तरे गृहीतनारङ्गकठिनकौ आगतौ द्वौ तापसकुमारकौ । दृष्टश्च आभ्यां राजा, अभिनन्दितश्च स्वसमयप्रसिद्धया आशिषा । अभ्युत्थानासनप्रदानादिनोपचारेण वहुमानितौ च राज्ञा । भणितं चाभ्याम्–महाराज ! सुविहितनामधेयेन आवां कुलपतिना भवतः चतुराश्रमगुरोः सुकृतधर्माऽधर्मव्यवस्थस्य

---

[१] अश्वक्रीडनस्थानम् ।

दिट्ठा य तेणं तत्थ बहवे तावसा कुलवई य। तओ संजायसंवेगेणं जहारिहमभिवन्दिया। उवविट्ठो कुलवइसमीवे, ठिओ य तेण सह धम्मकहावावारेण कंचि कालं। तओ भणिओ य णेण सविणयं पणमिऊण भयवं कुलवई। जहा करेहि मे पसायं सयलपरिवारपरिगओ मम गेहे आहारगहणेणं। कुलवइणा भणियं—वच्छ! एवं। किं तु एगो अग्गिसम्मो नाम महातावसो, सो य न पइदियहं भुञ्जइ, किं तु मासाओ मासाओ, तत्थ वि य पारणगदिवसे पढमपविट्ठो पढमगेहाओ चेव लाभे वा अलाभे वा नियत्तइ, न गेहन्तरमुवगच्छइ। ता तं महातवस्सिं मोत्तूण पडिवन्ना ते पत्थणा। राइणा भणियं—भगवं! अणुगिहीओ म्हि। अह कहिं पुण सो महातावसो? पेच्छामि णं ताव, करेमि तस्स दरिसणेण अप्पाणं विगयपावं। कुलवइणा भणियं—वच्छ! एयाए सहयारवीहियाए हेट्ठा झाणवरगओ चिट्ठइ। तओ सो राया ससंभन्तो गओ सहयारवीहियं। दिट्ठो य तेण पउमासणोवविट्ठो, थिरधरियनयणजुयलो, पसन्तविचित्तचित्तवावारो,

---

शरीरप्रवृत्तिपरिज्ञाननिमित्तं प्रेषितौ। एवं श्रुत्वा सांप्रतं त्वं प्रमाणमिति। राज्ञा भणितम्—कुत्र स भगवान् कुलपतिः? इति। ताभ्यां भणितम्—इतो नातिदूरे सुपरितोषनाम्नि तपोवने इति। ततश्च स राजा भक्ति-कौतुकाभ्यां गतस्तत् तपोवनमिति। दृष्टाश्च तेन तत्र बहवस्तापसाः, कुलपतिश्च। ततः संजातसंवेगेन यथार्हमभिवन्दिताः। उपविष्टः कुलपतिसमीपे, स्थितश्चतेन सह धर्मकथाव्यापारेण कंचित् कालम्। ततो भणितश्चानेन सविनयं प्रणम्य भगवान् कुलपतिः। यथा कुरु मम प्रसादं सकलपरिवारपरिगतो मम गेहे आहारग्रहणेन। कुलपतिना भणितम्-वत्स! एवम्। किन्तु एकोऽग्निशर्मा नाम महातापसः, स च न प्रतिदिवसं भुङ्क्ते, किन्तु मासाद् मासात्, तत्राऽपि च पारणकदिवसे प्रथमप्रविष्टप्रथमगेहाद् एव लाभे वाऽलाभे वा निवर्तते, न गेहान्तरमुपगच्छति। तस्मात् तं महातपस्विनं मुक्त्वा प्रतिपन्ना तव प्रार्थना। राज्ञा भणितम्-भगवन्! अनुगृहीतोऽस्मि। अथ कुत्र पुनः स महातापसः? प्रेक्षे तं तावत्, करोमि तस्य दर्शनेन आत्मानं विगतपापम्। कुलपतिना भणितम्-वत्स! एतस्यां सहकारवीथिकायां अधस्ताद् ध्यानवरगतस्तिष्ठति। ततः

किंपि तहाविहं झाणं झायन्तो अग्गिसम्मतावसो त्ति। तओ राइणा हरिसवस[1]पयट्टन्तपुलएण पणमिओ। तेण वि य आसीसाए सबहुमाणमेवाहिणन्दिओ, 'सागयं ते' भणिऊण 'उवविसाहि' त्ति संलत्तो। उवविसिऊण सुहासणत्थेण भणियं राइणा—भयवं! किं ते इमस्स महादुक्करस्स तवचरणववसायस्स कारणं?। अग्गिसम्मतावसेण भणियं—भो महासत्त! दारिद्दुक्खं, परपरिहवो, विरूवया, तहा महारायपुत्तो य गुणसेणो नाम कल्लाणमित्तो त्ति। तओ संजायनियनामासंकेण भणियं राइणा—भयवं! चिट्ठउ ताव दारिद्दुक्खाइयं ववसायकारणं, अह कहं पुण महारायपुत्तो गुणसेणो नाम कल्लाणमित्तो त्ति। अग्गिसम्मतावसेण भणियं-महासत्त! एवं कल्लाणमित्तो। सुण—

जे होन्ति उत्तमनरा धम्मं सयमेव ते पवज्जन्ति। मज्झिमपयई संचोइया उ न कयाइ वि जहन्ना॥

स राजा ससंभ्रान्तो गतः सहकारवीथिकाम्, दृष्टश्च तेन पद्मासनोपविष्टः, स्थिरधृतनयनयुगलः, प्रशान्तविचित्रचित्तव्यापारः, किमपि तथाविधं ध्यानं ध्यायन् अग्निशर्मतापस इति। ततो राज्ञा हर्षवशप्रवर्तमानपुलकेन प्रणतः। तेनाऽपि च आशिषा सबहुमानमेव अभिनन्दितः, 'स्वागतं तव' भणित्वा 'उपविश' इति संलपितः। उपविश्य सुखासनस्थेन भणितं राज्ञा-भगवन्! किं तव अस्य महादुष्करस्य तपश्चरणव्यवसायस्य कारणम्?। अग्निशर्मतापसेन भणितम्—भो महासत्त्व! दारिद्र्यदुःखम्, परपरिभवः, विरूपता, तथा महाराजपुत्रश्च गुणसेनो नाम कल्याणमित्रम्—इति। ततः संजातनिजनामाऽऽशङ्केन भणितं राज्ञा—भगवन्! तिष्ठतु तावद् दारिद्र्यदुःखादिकं व्यवसायकारणम्, अथ कथं पुनर्महाराजपुत्रो गुणसेनो नाम कल्याणमित्रम्—इति। अग्निशर्मतापसेन भणितम्—महासत्त्व! एवं कल्याणमित्रम्। शृणु—

ये भवन्ति उत्तमनरा धर्मं स्वयमेव ते प्रपद्यन्ते। मध्यमप्रकृतयः संचोदितास्तु न कदाचिदपि जघन्याः॥

---

[1] पायड पु० क

चोएइ य जो धम्मे जीवं विविहेण केणइ नएण । संसारचारयगयं सो नणु कल्लाणमित्तो त्ति ॥

तओ राइणा कुमारवुत्तन्तं सुमरिऊण भणियं लज्जावणयवयणेण–भयवं ! कहं पुण तुमं तेण तेलोक्कबन्धुभूए धम्मे चोइओ ? । अग्गिसम्मतावसेण भणियं–भो महासत्त ! नानाविहाओ चोयणाओ, ता कहंचि निमित्तमेत्तणं चेव चोइओ म्हि । तओ राइणा चिन्तियं । अहो ! से महाणुभावया, परिभवो[1] वि याणेणोवयारचोयण त्ति गहिओ[2] । परपरिवायं च परिहरन्तो सुद्धसहावत्तणओ न तं पि मन्नेइ । अहो ! दारुणं अकज्जं मए पावकम्मेणाणुचिट्ठियं[3] । ता कहेमि से अकज्जायरणकलङ्कदूसियं अप्पाणं । एवं चिन्तिऊण जंपियमणेण–भयवं ! अह सो महापावकम्मयारी तुह हिययसंतावयारी अगुणसेणो त्ति । अग्गिसम्मतावसेण भणियं–भो महाराय ! सागयं ते । कहं तुमं अगुणसेणो ? जेण तए परपिण्डजीवियमेत्तविहवो अहं ईइसिं तवविभूइं पाविओ[4] त्ति । राइणा भणियं–अहो !

चोदयति च यो धर्मे जीवं विविधेन केनचिद् नयेन । संसारचारकगतं स ननु कल्याणमित्रम्–इति ॥

ततो राज्ञा कुमारवृत्तान्तं स्मृत्वा भणितं लज्जावनतवदनेन–भगवन् ! कथं पुनस्त्वं तेन त्रैलोक्यबन्धुभूते धर्मे चोदितः ? । अग्निशर्मतापसेन भणितम्–भो महासत्त्व ! नानाविधातश्चोदनानः, तस्मात् कथंचिद् निमित्तमात्रेण एव चोदितोऽस्मि । ततो राज्ञा चिन्तितम् । अहो ! अस्य महानुभावता, परिभवोऽपि चानेन उपकारचोदनेति गृहीतः । परपरिवादं च परिहरन् शुद्धस्वभावत्वाद् न तमपि मन्यते । अहो ! दारुणमकार्यं मया पापकर्मणाऽनुष्ठितम् । तस्मात् कथयामि तस्य अकार्याचरणकलङ्कदूषितमात्मानम् । एवं चिन्तयित्वा जल्पितमनेन–भगवन् ! अहं स महापापकर्मकारी तव हृदयसंतापकारी अगुणसेन इति । अग्निशर्मतापसेन भणितम्–भो महाराज ! स्वागतं तव । कथं त्वमगुणसेनः, येन त्वया परपिण्डजीवितमात्रविभवः अहं ईदृशीं तपोविभूतिं प्रापित इति । राज्ञा भणितम्–अहो !

---

[1] परिहवे वि क । [2] गहिया क । [3] णुट्ठियं क । [4] संपाविओ क

ते महाणुभावया। किं वा तवस्सिजणो पियं वज्जिय अन्नं भणिउं जाणइ ?। न[1] य मियङ्कबिम्बाओ अङ्गारवुट्ठीओ पडन्ति। ता अलं एइणा। भयवं ! कया ते पारणगं भविस्सइ ?। अग्गिसम्मेण भणियं–महाराय ! पञ्चहिं दिणेहिं। राइणा भणियं–भयवं ! जइ ते नाईव उवरोहो, ता कायव्वो मम गेहे पारणएणं पसाओ। विन्नाओ य मए कुलवइणो सयासाओ तुज्झ पइन्नाविसेसो, अओ अणागयं पत्थेमि त्ति। अग्गिसम्मेण भणियं–महाराय ! आगच्छउ ताव सो दियहो, को जाणइ अन्तरे किंपि भविस्सइ। अवि य —

एयं करेमि एण्हिं एयं काऊण पुण इमं कल्लं। काहिमि को णु मन्नइ, सुविणयतुल्लम्मि जियलोए ? ॥

अन्नं च महाराय !

धी जियलोयसहावो जहियं नेहाणुरायकलिया वि। जे पुव्वण्हे दिट्ठा, ते अवरण्हे न दीसन्ति ॥

ता महाराय ! आगच्छउ ताव सो दियहो त्ति। राइणा भणियं–भयवं ! विग्घं मोत्तूण संगच्छह। अग्गिसम्मतावसेण भणियं–

तव महानुभावता, किं वा तपस्विजनः प्रियं वर्जयित्वा अन्यद् भणितुं जानाति ?। न च मृगाङ्कबिम्बाद् अङ्गारवृष्टयः पतन्ति। तस्मात् अलमेतेन। भगवन् ! कदा तव पारणकं भविष्यति ? अग्निशर्मणा भणितम्–महाराज ! पञ्चभिर्दिनैः। राज्ञा भणितम्–भगवन् ! यदि तव नातीव उपरोधः, तस्मात् कर्तव्यो मम गेहे पारणकेन प्रसादः। विज्ञातश्च मया कुलपतेः सकाशात् तव प्रतिज्ञाविशेषः, अतोऽनागतं प्रार्थयामीति। अग्निशर्मणा भणितम्–महाराज ! आगच्छतु तावत् स दिवसः; को जानाति अन्तरे किमपि भविष्यति। अपि च–

एतत् करोमि इदानीं एतत् कृत्वा पुनरिदं कल्यम्। करिष्यामि, को नु मन्यते स्वप्नकतुल्ये जीवलोके ? ॥

अन्यच्च महाराज !

धिग् जीवलोकस्वभावम्, यत्र स्नेहानुरागकलिता अपि। ये पूर्वाह्णे दृष्टाः तेऽपराह्णे न दृश्यन्ते ॥

---

[1] न हि क

जइ एवं ते निब्बन्धो, ता एवं पडिवन्ना ते पत्थणा । तओ राया पणमिऊण हरिसवसपुलइयङ्गो कंचि वेलं गमेऊण पविट्ठो नयरं। कया कुलवइणो सपरिवारस्स भत्तिविभवाणुरूवा पूया । अइक्कन्तेसु य पञ्चसु दिणेसु पारणगदिवसे पढमं चेव पविट्ठो अग्गिसम्मतावसो पारणगनिमित्तं रायगेहं ति । तम्मि य दियहे कहंचि राइणो गुणसेणस्स अतीव सीसवेयणा समुप्पन्ना । तओ आउलीहूयं सव्वं चेव रायउलं, पविट्ठा य तत्थ वेज्जसत्थविसारया वेज्जा, उग्गाहेन्ति नाणाविहाओ चिगिच्छासंहियाओ, पीसिज्जन्ति बहुविहाइं ओसहाइं, दिज्जन्ति सिर[1]खेयावहारिणो विचित्तरयणलेवा । किंकायव्वमूढा उवहसियसुक्कविहस्सइबुद्धिविहवा वि मन्तिणो । पत्थुयं पुरोहिएहिं मन्तगब्भिगाहुइप्पयाणसारं सन्तिकम्मं । तहा मिलाणसुरहिमल्लदामसोहं, सुवण्णगड्ढ[2]वियलियङ्गरायं, बाहजलधोयकवोलपत्तलेहं, करयलपणामियपव्वायवयणपङ्कयं, उव्विग्गमन्तेउरं । तहा विरत्तकन्दुयकीलं, परिचत्तचित्तयम्मवावारं, विरयगीयनच्चगारम्भं, अवहत्थियभूसगकलावं,

तस्मात् महाराज ! आगच्छतु तावत् स दिवस इति । राज्ञा भणितम् ! विघ्नं मुक्त्वा संगच्छन्ताम् । अग्निशर्मतापसेन भणितम्–यदि एवं तव निर्बन्धः, तस्माद् एवं प्रतिपन्ना तव प्रार्थना । ततो राजा प्रणम्य हर्षवशपुलकिताङ्गः कांचिद् वेलां गमयित्वा प्रविष्टो नगरम् । कृता कुलपतेः सपरिवारस्य भक्तिविभवानुरूपा पूजा । अतिक्रान्तेषु च पञ्चसु दिनेषु पारणकदिवसे प्रथममेव प्रविष्टोऽग्निशर्मतापसः पारणकनिमित्तं राजगेहमिति । तस्मिंश्च दिवसे कथंचिद् राज्ञो गुणसेनस्य अतीव शीर्षवेदना समुत्पन्ना । तत आकुलीभूतं सर्वमेव राजकुलम् । प्रविष्टा च तत्र वैद्यशास्त्रविशारदा वैद्याः, उद्ग्राहयन्ति नानाविधाः चिकित्सासंहिताः, पिष्यन्ते बहुविधानि औषधानि, दीयन्ते शिरःखेदापहारिणो विचित्ररत्नलेपाः । किंकर्तव्यमूढा उपहसितशुक्र-बृहस्पतिबुद्धिविभवा अपि मन्त्रिणः । प्रस्तुतं पुरोहितैः मन्त्रगर्भिताऽऽहुतिप्रदानसारं शान्तिकर्म । तथा म्लानसुरभिमाल्यदामशोभम् , सुवर्णकाढ्यविचलिताऽङ्गरागम् , वाष्पजलधौत-

---

१ सिरो क २ ०गन्धड्ढ० क ।

दुम्मणविमणं कन्नयन्तेउरं। वेत्त[1]जट्ठिनिमियविच्छायमुहसोहा य पडिहारा, रन्नो वेयणाइसयसूयगा दुम्मणा मडहकञ्चुइया, परिचत्तनिययवावारा विचित्ता सूयगारप्पमुहा निओगकारिणो त्ति। तओ सो अग्गिसम्मतावसो एवंविहे रायकुले कंचि वेलं गमेऊण वयणमेत्तेणावि केणवि अकयपडिवत्ती निग्गओ रायगेहाओ त्ति। निग्गन्तूण गओ तवोवणं, दिट्ठो य तावसेहिं, भणिओ य तेहिं—भयवं! अकयपारणगो विव परिमिलाणदेहो लक्खिज्जसि, ता किं न कयं पारणयं? न पविट्ठो इयाणि तत्थ रन्नो गुणसेणस्स गेहं? ति। अग्गिसम्मतावसेण भणियं—पविट्ठो अहं नरिन्दगेहं, किंतु सो नूणं अपडुसरीरो राया, जओ उव्विग्गपरियणं सव्वं चेव तं मए गेहमवलोइयं, तओ अहं तं तहाविहं दट्ठुमसंहतो लहुं चेव निग्गओ त्ति। तावसेहिं भणियं—को संदेहो, दढमपडुसरीरो राया, अन्नहा कहं

कपोलपत्रलेखम्, करतलप्रणामितम्लानवदनपङ्कजम्, उद्विग्नम्—अन्तःपुरम्। तथा विरक्तकन्दुकक्रीडम्, परित्यक्तचित्रकर्मव्यापारम्, विरतगीत-नर्तनाऽऽरम्भम्, अपहस्तितभूषणकलापम्, दुर्मनोविमनः कन्यकान्तःपुरम्। वेत्रयष्टिस्थापित-विच्छायमुखशोभाश्च प्रतीहाराः, राज्ञो वेदनातिशयसूचकाः, दुर्मनसो लघुकञ्चुकिनः, परित्यक्तनिजकव्यापाराः, विचित्राः सूपकारप्रमुखा नियोगकारिण इति। ततः सोऽग्निशर्मतापस एवंविधे राजकुले कांचिद् वेलां गमयित्वा वचनमात्रेणाऽपि केनापि अकृतप्रतिपत्तिर्निर्गतो राजगेहादिति। निर्गत्य गतस्तपोवनम्, दृष्टश्च तापसः, भणितश्च तैः-भगवन्! अकृतपारणक इव परिम्लानदेहो लक्ष्यसे, तस्मात् किं न कृतं पारणकम्? न प्रविष्ट इदानीं तत्र राज्ञो गुणसेनस्य गेहम्? इति। अग्निशर्मतापसेन भणितम्—प्रविष्टोऽहं नरेन्द्रगेहम्, किन्तु स नूनम्—अपटुशरीरो राजा, यत उद्विग्नपरिजनं सर्वमेव तद् मया गेहमवलोकितम्, ततोऽह तत् तथाविधं द्रष्टुमसहमानः लघ्वेव निर्गत इति। तापसैर्भणितम्-कः संदेहः, दृढम्-अपटुशरीरो राजा, अन्यथा कथं तादृश्यां तपस्विजनभक्त्यां भगवतः पारणक ज्ञात्वा स्वयमेव दत्तावधानो न

---

१ जेट्ठि० क

तारिसीए तवस्सिजणभत्तीए भयवओ पारणगं मुणेऊण सयं चेव दत्तावहाणो न होइ?। अन्नं च–अईव भगवओ उवरि भत्तिबहुमाणो तस्स नरवइस्स, जेण कुलवइसमक्खं बहुयं सब्भूयगुणकित्तणं तेण कयं आसि। अग्गिसम्मतावसेण भणियं–आरोग्गं से हवउ गुरुयणपूयगस्स, किं मम आहारेणं ति। पडिवन्नो मासोववासवयं॥ इओ य राइणा गुणसेणेणं उवसन्तसीसवेयणेणं पुच्छिओ परियणो। अज्ज तस्स महातवस्सिस्स पारणगदियहो, तो सो आगओ, पूइओ वा केणइ न व त्ति?। तेहिं संलत्तं–महाराय! आगओ आसि, किंतु तुह सीसवेयणाजणिअहिययसंतावपरिचत्तनिययकज्जवावारे परियणे न केणइ संपूइओ पुच्छिओ वा। अमुणियवुत्तन्तो य विचित्तं ते परियणमवलोइऊण कंचि कालं गमेऊण उव्विग्गो विय निग्गओ रायगेहाओ त्ति। राइणा भणियं–अहो! मे अहन्नया; चुक्को मि महा[1]लाभस्स, संपत्तो य तवस्सिजणदेहपीडाकरणेण महन्तं अणत्थं ति। एवं विलविऊणं बिइयदियहे पहायसमए चेव गओ तवो-

भवति?। अन्यच्च–अतीव भगवत उपरि भक्तिबहुमानः तस्य नरपतेः, येन कुलपतिसमक्षं वहुकं सद्भूतगुणकीर्तनं तेन कृतमासीत्। अग्निशर्मतापसेन भणितम्–आरोग्यं तस्य भवतु गुरुजनपूजकस्य, किं मम आहारेण इति प्रतिपन्नो मासोपवासव्रतम्। इतश्च राज्ञा गुणसेनेन उपशान्तशीर्षवेदनेन पृष्टः परिजनः। अद्य तस्य महातपस्विनः पारणकदिवसः, ततः स आगतः, पूजितो वा केनचिद् न वा? इति। तैः संलपितम्–महाराज! आगत आसीत्, किन्तु तव शीर्षवेदनाजनितहृदयसंतापपरित्यक्तनिजककार्यव्यापारे परिजने न संपूजितः, पृष्टो वा। अज्ञातवृत्तान्तश्च विचित्रं तव परिजनमवलोक्य कंचित् कालं गमयित्वा उद्विग्न इव निर्गतो राजगेहादिति। राज्ञा भणितम्–अहो! मम अधन्यता, भ्रष्टोऽस्मि महालाभात्, संप्राप्तश्च तपस्विजनदेहपीडाकरणेन महान्तमनर्थमिति। एवं विलप्य द्वितीयदिवसे प्रभातसमये एव गतस्तपोवनम्। दृष्टाश्च तेन कुलपतिप्रमुखा वहवः तापसाः, लज्जा–विनयावनतोत्तमाङ्गेन प्रणताश्चानेन

---

[1] महालाहस्स क

वणं। दिट्ठा य तेण कुलवइप्पमुहा बहवे तावसा, लज्जा-विणओणयउत्तिमङ्गेण पणमिया य णेणं विहिणा। अहिणन्दिओ य आसीसाए कुलवइप्पमुहेहिं सव्वतावसेहिं। ‘उववि‍ससु महाराय! सागयं ते’ भणिओ य कुलवइणा। तओ राया अवणयउत्तिमङ्गो, सविसेसलज्जामन्थरो, विमुक्कदीहनीसासं उवविट्ठो कुलवइस्स पुरओ। तं च तहा विचित्तं रायाणं दट्ठूणं भणियमणेणं–वच्छ! उव्विग्गो विय लक्खीयसि, ता कहेहि मे उव्वेयकारणं, जइ अकहणीयं न होइ। राइणा भणियं–अत्थि भगवओ वि नाम अकहणीयं। अन्नं च–अकहणीयवत्थुविसउव्विग्गस्स न जुत्तं तवोवणागमणं। कुलवइणा भणियं–साहु वच्छ! साहु, उचिओ ते विवेगो, ता किं–उव्वेयकारणं ति?। राइणा भणियं–भगवओ आण त्ति करिय कहीयइ; अन्नहा कहं ईइसं निसंसचरियं कहिउं पारियइ?। कुलवइणा भणियं वच्छ! सव्वस्स जणणीभूओ खु होइ तवस्सिजणो। तओ का तं पइ लज्ज त्ति। ता कहेउ भवं, जेण सुणियवुत्तन्तो भविय केणइ उवाएणऽवणेमि तं उव्वेयं ति। राइणा भणियं–भयवं! जइ एवं, ता सुणसु। एस अग्गिसम्मतावसो पढमं चेव मम मन्दपु-

---

विधिना। अभिनन्दितश्च आशिषा कुलपतिप्रमुखैः सर्वतापसैः। ‘उपविश महाराज! स्वागतं तव’ भणितश्च कुलपतिना। ततो राजा अवनतोत्तमाङ्गः, सविशेषलज्जामन्थरः, विमुक्तदीर्घनिःश्वासम्–उपविष्टः कुलपतेः पुरतः। तं च तथा विचित्रं राजानं दृष्ट्वा भणितमनेन–वत्स! उद्विग्न इव लक्ष्यसे, ततः कथय मम उद्वेगकारणम्, यदि अकथनीयं न भवति। राज्ञा भणितम्–अस्ति भगवतोऽपि नाम अकथनीयम्?। अन्यच्च–अकथनीयवस्तुविषयोद्विग्नस्य न युक्तं तपोवनागमनम्। कुलपतिना भणितम्–साधु वत्स! साधु, उचितस्ते विवेकः, ततः किम्–उद्वेगकारणम्? इति। राज्ञा भणितम्–भगवत आज्ञा इति कृत्वा कथ्यते, अन्यथा कथम्–ईदृशं नृशंसचरितं कथयितुं पार्यते?। कुलपतिना भणितम्–वत्स! सर्वस्य जननीभूतः खलु भवति तपस्विजनः। ततः का त प्रति लज्जा इति। तस्मात् कथयतु भवान्, येन ज्ञातवृत्तान्तो भूत्वा केनचिद् उपायेन अपनयामि तम्–उद्वेगमिति। राज्ञा भणितम्–भगवन्! यद्येवम्,

ण्णस्स, असमिक्खियकारिणो, असरिसजणसरिसायरणनिरयस्स संबन्धिणा निव्वेएण तावसो संवुत्तो। एयस्स पवन्नुत्तमवयस्स वि तं मए असरिसजणायरणं न परिचत्तं ति दढमुव्विग्गो म्हि। कुलवइणा भणियं–वच्छ! जइ एवं, ता अलं संतप्पिएणं, किं कारणं। जइ तुह संबन्धिणा कारणेण तावसो संवुत्तो, ता तुमं चेव इमस्स धम्मपवत्तगो कल्लाणमित्तो त्ति; किमुव्विग्गो सि?। न यावि एण्हिं तुह परलोयभीरुणो, अहिगयधम्मसत्थस्स किंपि असज्जणायरणं संभावेमि। किं वा से कयमियाणिं निवेएहि मे। राइणा भणियं–भयवं! इयाणिं ताव एयं उवणिमन्तिऊण मासपारणयपविट्ठस्स सीसवेयणाभिभूएण पमायओ अणिउत्तपरियणेणं आहारन्तरायकरणेणं कयं से धम्मन्तरायं ति। कुलवइणा भणियं–वच्छ! जं किंचि एयं, न तुमं एत्थ अवरज्झसि। न तिव्ववेयणाभिभूया पुरिसा कज्जमकज्जं वा वियाणन्ति। न य तस्स आहारन्तरायकरणेणं धम्मन्तरायं हवइ, अवि य तवसंपया। ता अलमुव्वेगेणं ति। राइणा भणियं–भयवं! जाव तेण महाणुभावेण मम गेहे आहारगहणं न कयं, ताव कहमुव्वेवो अवेइ?। कुलवइणा भणियं–वच्छ! इयाणिं से अवि-

---

ततः शृणु। एषोऽग्निशर्मतापसः प्रथममेव मम मन्दपुण्यस्य, असमीक्षितकारिणः असदृशजनसदृशाचरणनिरतस्य संबन्धिना निर्वेदेन तापसः संवृत्तः। एतस्य प्रपन्नोत्तमव्रतस्याऽपि तद् मया असदृशजनाचरणं न परित्यक्तमिति दृढम्-उद्विग्नोऽस्मि। कुलपतिना भणितम्-वत्स! यद्येवम्, ततोऽलं संतप्तेन, किं कारणं। यदि तव संबन्धिना कारणेन तापसः संवृत्तः, ततस्त्वमेव अस्य धर्मप्रवर्तकः कल्याणमित्रम्-इति, किम्-उद्विग्नोऽसि? न चाऽपि इदानीं तव परलोकभीरोः, अधिगतधर्मशास्त्रस्य किमपि असज्जनाचरणं संभावयामि। किं वा तत् कृतमिदानीं निवेदय मे। राज्ञा भणितम्-भगवन्! इदानीं तावद् एतम्-उपनिमन्त्र्य मासपारणकप्रविष्टस्य शीर्षवेदनाऽभिभूतेन प्रमादतोऽनियुक्तपरिजनेन आहारान्तरायकरणेन कृतस्तस्य धर्मान्तराय इति। कुलपतिना भणितम्-वत्स! यत् किंचिद् एतत्, न त्वम्-अत्र अपराध्यसि। न तीव्रवेदनाभिभूताः पुरुषाः कार्यमकार्यं वा विजानन्ति। न च तस्य आहारान्तरायकरणेन धर्मान्तरायो

ग्घेण जं पारणगं भविस्सइ, तहिं ते गेहे आहारगहणं करिस्सइ त्ति । तओ कुलवइणा सद्दाविओ अग्गिसम्मतावसो । सबहुमाणं हत्थे गिण्हिऊण भणिओ य णेण–वच्छ ! जं तुमं अकयपारणगो निग्गओ नरिन्दगेहाओ, एएणं दढं संतप्पइ राया । कल्लं च एयस्स अईव सीसवेयणा आसि, अओ वेयणापरव्वसेण न तुमं पडियग्घिओ[1] त्ति; न एस अवरज्झइ । भणियं च णेण 'जाव मम गेहे अग्गिसम्मतावसेण आहारगहणं न कयं, न ताव मे उव्वेवो अवेइ' । अओ इण्हिं संपत्तपारणगकालेण भवया अविग्घेण मम वयणाओ नरिन्दबहुमाणओ य एयस्स गेहे पारणगं करियव्वं ति । अग्गिसम्मतावसेण भणियं–भयवं ! जं तुब्भे आणवेह । अकारणे संतप्पइ राया, जओ न किंचि मे परलोयविरुद्धमणुचिट्ठियमणेणं । तओ राया 'अहो ! से महाणुभावय' त्ति कलिऊण पणमिऊण तवस्सिजणं च कंचि वेलं पज्जुवासिय पविट्ठो नयरं ।

भवति, अपि च तपःसंपदा । ततोऽलम्-उद्वेगेनेति । राज्ञा भणितम्-भगवन् ! यावत् तेन महानुभावेन मम गेहे आहारग्रहणं न कृतम्, तावत् कथमुद्वेगोऽपैति ? । कुलपतिना भणितम्-वत्स ! इदानीं तस्य अविघ्नेन यत् पारणकं भविष्यति, तदा तव गेहे आहारग्रहणं करिष्यतीति । ततः कुलपतिना शब्दायितः अग्निशर्मतापसः । सबहुमानं हस्ते गृहीत्वा भणितश्चानेन-वत्स ! यत् त्वम्-अकृतपारणको निर्गतो नरेन्द्रगेहात् , एतेन दृढं संतप्यते राजा । कल्यं चैतस्य अतीव शीर्षवेदना आसीत् , अतो वेदनापरवशेन न त्वं प्रत्यर्घित इति; नैषोऽपराध्यति । भणितं चानेन 'यावद् मम गेहे अग्निशर्मतापसेन आहारग्रहणं न कृतं, न तावद् मम उद्वेगोऽपैति ' । अत इदानीं संप्राप्तपारणककालेन भवताऽविघ्नेन मम वचनाद् नरेन्द्रबहुमानतश्च एतस्य गेहे पारणकं कर्तव्यमिति । अग्निशर्मतापसेन भणितम्-भगवन् ! यद् यूयम्-आज्ञापयत । अकारणे संतप्यते राजा, यतो न किंचिद् मम परलोकविरुद्धमनुष्ठितमनेन ।

---

[1] पडियग्गिओ क

पुणो य कालक्कमेण राइणो विसयसुहमणुहवन्तस्स, अग्गिसम्मस्स य दुक्करं तवचरणविहिं करेन्तस्स समइक्कन्तो मासो त्ति। एत्थन्तरम्मि य संपत्ते पारणगदिवसे निवेइयं से रन्नो विक्खेवागएहि नियपुरिसेहिं। जहा–महाराय! अइविसमपरक्कमगव्वियं, विसमदोणीमुहप्पविट्ठं, अकयपरिरक्खणोवायं अप्पमत्तेण माणहङ्गनरवइणा, इहरहा विसयविणासमवलोइऊण, वीरचरियमवलम्बिय, वीसत्थसुत्तेसु नरिन्दपाइक्केसु, जाए अड्ढरत्तसमए, अत्थमिए रयणिवहूपिययमे तेलोक्कमङ्गलपईवे मियङ्के सयलबलसहिएणमवक्खन्दं दाऊण अइपमत्तं ते विणिज्जियं सेन्नं। संपइ देवो पमाणं ति। तओ राइणा एयं सुदूसहं वयणमायण्णिऊण कोवाणलजलियरत्तलोयणेणं, विसमफुरियाहरेणं, निद्दयकराभिहयधरणिवट्ठेणं अमरिसवसपरिक्खलन्तवयणेणं समाणत्तो परियणो। जहा–देह तुरियं पयाणयपडहं, सज्जेह दुज्जयं करिबलं, पल्लाणेह दप्पुद्धुरं आससाहणं, संजत्तेह धय-मालोवसोहियं सन्द-

---

ततो राजा ‘अहो!! तस्य महानुभावता’ इति कलयित्वा, प्रणम्य तपस्विजनं च कांचिद् वेलां पर्युपास्य प्रविष्टो नगरम्। पुनश्च कालक्रमेण राज्ञो विषयसुखमनुभवतः, अग्निशर्मणश्च दुष्करं तपश्चरणविधिं कुर्वतः समतिक्रान्तो मास इति। अत्रान्तरे च संप्राप्तेपारणकदिवसे निवेदितं तस्य राज्ञो विक्षेपागतैर्निजकपुरुषैः। यथा–महाराज! अतिविषमपराक्रमगर्वितम्, विषमद्रोणीमुखप्रविष्टम्, अकृतपरिरक्षणोपायम्–अप्रमत्तेन मानभङ्गनरपतिना, इतरथा विषयविनाशमवलोक्य, वीरचरितमवलम्ब्य, विश्वस्तसुप्तेषु नरेन्द्रपदातिषु याते अर्धरात्रसमये अस्तमिते रजनीवधूप्रियतमे त्रैलोक्यमङ्गलप्रदीपे मृगाङ्के सकलबलसहितेन अवस्कन्दं दत्त्वा अतिप्रमत्तं तव विनिर्जितं सैन्यम्। संप्रति देवः प्रमाणमिति। ततो राज्ञा एतत् सुदुःसहं वचनमाकर्ण्य कोपानलज्वलितरक्तलोचनेन, विषमस्फुरिताधरेण निर्दयकराभिहतधरणीपृष्ठेन, अमर्षवशपरिस्खलद्वचनेन समाज्ञप्तः परिजनः। यथा–दत्त त्वरितं प्रयाणकपटहम्, सज्जयत दुर्जयं करिवलम्, पर्याणयत दर्पोद्धुरं अश्वसाधनम्, संयात्रयत ध्वज–मालोपशोभितं स्यन्दननिवहम्, प्रवर्तयत नानाप्रहरणशालि पदातिसैन्यमिति।

णनिवहं, पयट्टावेह नाणापहरणसालिणं पाइक्कसेन्नं ति । तओ नरवइसमाएसाणन्तरमेवायण्णिय पयाणयपडहसद्दं, करिवरविरायन्तमेहजालं, ऊसियधय–चमर–छत्तसंघायवलायपरिययं, निसियकरवाल–कोन्तसोयामणिसणाहं, सङ्ख–काहलातूरनिग्घोसगज्जियरवपूरियदिसं, अयालदुद्दिणं पिव समन्तओ वियम्भियं नरिन्दसाहणं ति । एत्थन्तरम्मि य रहवरारूढे नरिन्दगुणसेणे, ठाविए पुरओ सलिलपुण्णे कणयकलसे, पहए जयसिरिसमुप्फालए मङ्गलतूरे, पढन्तेसु विविहमङ्गलाइं [1]वन्दिवन्द्रेसु, अग्गिसम्मतावसो पारणगनिमित्तं पविट्ठो नरिन्दगेहं ति । तओ तम्मि महाजणसमुदए आउलीहूए नरिन्दनिग्गमणनिमित्तं पहाणपरियणे न केणइ समुवलक्खिओ त्ति । तओ कंचि वेलं गमेऊण दरियकरि–तुरयसंघायचमढणभीओ निग्गओ नरवइगेहाओ । एत्थन्तरम्मि य गहियसङ्कुच्छाएहिं, मुणियजोइससत्थपरमत्थेहिं भणियं जोइसिएहिं–देव ! पसत्थं मुहुत्तं, निग्गच्छसु त्ति । राइणा भणियं–अज्ज तस्स अग्गिसम्मतावसस्स पारणगदिवसो, पडिवन्नं च तेण कुलवइवयणाओ मम गेहे आहारगहणं कायव्वं ति । ता आगच्छउ ताव सो महाणुभावो । तओ

ततो नरपतिसमादेशानन्तरमेव आकर्ण्य प्रयाणकपटहशब्दम् , करिवरविराजद्मेघजालम् , उच्छ्रितध्वज–चामर–छत्रसंघातवलाकापरिगतम् , निशितकरवाल–कुन्तसौदामिनीसनाथम् , शङ्ख–काहलतूरनिर्घोषगर्जितरवपूरितदिशम् , अकालदुर्दिनमिव समन्ततो विजृम्भितं नरेन्द्रसाधनमिति । अत्रान्तरे च रथवरारूढे नरेन्द्रगुणसेने, स्थापिते पुरतः सलिलपूर्णे कनककलशे, प्रहते जयश्रीसमुत्फालके मङ्गलतूर्ये, पठत्सु विविधमङ्गलानि वन्दिवृन्देषु, अग्निशर्मतापसः पारणकनिमित्तं प्रविष्टो नरेन्द्रगेहमिति । ततस्तस्मिन् महाजनसमुदये आकुलीभूते नरेन्द्रनिर्गमननिमित्तं प्रधानपरिजने न केनचित् समुपलक्षित इति । ततः कांचिद् वेलां गमयित्वा दृप्तकरि–तुरगसंघातावमर्दनभीतो निर्गतो नरपतिगेहात् । अत्रान्तरे च गृहीतशङ्कुच्छायैः, ज्ञातज्योतिश्शास्त्रपरमार्थैः भणितं ज्योतिषिकैः–देव ! प्रशस्तं

---

[1] वन्दिविंदेसु क

तं कयभोयणविहाण पणमिऊण गमिस्सामो । तओ आसन्नवत्तिणा भणियं कुलपुत्तएण—देव ! सो खु महाणुभावो संपय चेव पविसिऊण दरियकरि-तुरयसंघायचमढणभीओ निग्गओ रायगेहाओ । अज्ज वि य न नयराओ निग्गच्छइ त्ति तक्केमि । तओ एयमायण्णिऊण ससंभन्तो राया पयट्टो तस्स मग्गे[1], दिट्ठो य णेणं नयराओ निग्गच्छन्तो अग्गिसम्मतावसो । तओ ओयरिऊण रहवराओ, भत्तिनिब्भरं निवडिऊण चलणेसु विन्नत्तो सबहुमाणं । भयवं ! करेह पसायं, विणियत्तसु त्ति । अहमभिप्पेए वि गमणे तुह चेवागमणमणुवालेन्तो एत्तियं वेलं ठिओ म्हि, जाव तुमं पविसिऊण मम गेहं अलक्खिओ चेव मे पहाणपरियणेण निग्गओ सि, ता नियत्तसु त्ति । अग्गिसम्मतावसेण भणियं—महाराय ! विइयवुत्तन्तो चेव मे तुमं पइन्नाविसेसस्स; ता अलं ते इमिणा ववसाएणं । सच्चपइन्ना खु तवस्सिणो हवन्ति, निव्विसेसा य लाभालाभेसु । राइणा भणियं—भयवं ! लज्जिओ म्हि इमिणा पमायचरि-

---

मुहूर्तम्, निर्गच्छेति । राज्ञा भणितम्—अद्य तस्य अग्निशर्मतापसस्य पारणकदिवसः, प्रतिपन्नं च तेन कुलपतिवचनाद् मम गेहे आहारग्रहणं कर्तव्यमिति । तत आगच्छतु तावत् स महानुभावः । ततस्तं कृतभोजनविधानं प्रणम्य गमिष्यामः । तत आसन्नवर्तिना भणितं कुलपुत्रकेण—देव ! स खलु महानुभावः सांप्रतं चैव प्रविश्य दृप्तकरि-तुरगसंघातावमर्दनभीतो निर्गतो राजगेहात् । अद्यापि च न नगराद् निर्गच्छति इति तर्कयामि । तत एतद् आकर्ण्य ससंभ्रान्तो राजा प्रवृत्तस्तस्य मार्गे, दृष्टश्चानेन नगराद् निर्गच्छन् अग्निशर्मतापसः । तत अवतीर्य रथवराद् भक्तिनिर्भरं निपत्य चरणयोर्विज्ञप्तः सबहुमानम् । भगवन् ! कुरुत प्रसादम्, विनिवर्तस्व इति । अहमभिप्रेतेऽपि गमने तवैव आगमनम्—अनुपालयन् एतावतीं वेलां स्थितोऽस्मि, यावत् त्वं प्रविश्य मम गेहम्—अलक्षित एव मम प्रधानपरिजनेन निर्गतोऽसि, ततो निवर्तस्व इति । अग्निशर्मतापसेन भणितम्—महाराज ! विदितवृत्तान्त एव मम त्वं प्रतिज्ञाविशेष-

---

[1] मग्गतो क

एणं, तुह तिव्वतवजणियसरीरपीडाओ वि मे अहिया सरीरपीडा, दढं दहइ मं संतावाणलो, पणस्सइ विय मे हिययं, अक्खिप्पइ य मे वाणी, महापावकम्मकारिणं च मन्नेमि अप्पाणं; ता सयलदुहियसत्तबन्धुभूओ, अकारणवच्छलो य भवयं तुमं चेव मे इमस्स दुक्खस्स उवसमोवायं चिन्तेहि। अग्गिसम्मतावसेण चिन्तियं। अहो! से महारायस्स महाणुभावया। अकयपारणगेण मए एत्तियं खिज्जइ त्ति। अहो! से गुरुयणसुस्सूसाणुराओ। ता न जाव मए एयस्स गेहे पारणयं कयं, न ताव एस सत्थो होइ त्ति चिन्तिऊण भणियं च तेण-महाराय! अनिमित्तं ते दुक्खं। तहावि एयस्स इमो उवसमोवाओ। अविग्घेण संपत्ते पारणगदिवसे पुणो वि तुह चेव गेहे अहारगहणं करिस्सामि त्ति पडिवन्नं मए, ता मा संतप्पसु त्ति। तओ धरणिनिहियजाणु-करयलेणं भणियं राइणा-भयवं! सुट्ठु मुणिओ इमस्स दुक्खस्स उवसमोवाओ। अहवा विमलनाणनयणो चेव तवस्सिजणो होइ, किं वा न याणइ त्ति?। ता

स्य; ततोऽलं तवानेन व्यवसायेन। सत्यप्रतिज्ञाः खलु तपस्विनो भवन्ति, निर्विशेषाश्च लाभा-ऽलाभेषुः। राज्ञा भणितम्-भगवन्! लज्जितोऽस्मि अनेन प्रमादचरितेन, तव तीव्रतपोजनितशरीरपीडातोऽपि मम अधिका शरीरपीडा, दृढं दहति मां संतापाऽनलः, प्रणश्यति इव मम हृदयम्, आक्षिप्यते च मम वाणी, महापापकर्मकारिणं च मन्ये आत्मानम्; ततः सकलदुःखितसत्त्वबन्धुभूतः, अकारणवत्सलश्च भगवान् त्वमेव मम अस्य दुःखस्य उपशमोपायं चिन्तय। अग्निशर्मतापसेन चिन्तितम्। अहो! अस्य महाराजस्य महानुभावता। अकृतपारणकेन मया एतावत् खिद्यते इति। अहो! अस्य गुरुजनशुश्रूषानुरागः। ततो न यावद् मया एतस्य गेहे पारणकं कृतम्, न तावद् एष स्वस्थो भवतीति चिन्तयित्वा भणितं च तेन-महाराज! अनिमित्त एव दुःखम्। तथापि एतस्य अयम्-उपशमोपायः। अविघ्नेन संप्राप्ते पारणकदिवसे पुनरपि तवैव गेहे आहारग्रहणं करिष्यामि इति प्रतिपन्नं मया। ततः मा संतप्यस्वेति। ततो धरणीनिहितजानुकरतलेन भणितं राज्ञा-भगवन्! सुष्ठु ज्ञातः अस्य दुःखस्य उपशमोपायः। अथवा विमलज्ञाननयन एव तपस्विजनो भवति,

अणुगिहीओ म्हि । सरिसं इमं तुह अकारणवच्छलयाए । ता गच्छ तुमं तवोवणं । अहं पुण न सक्कुणोमि पच्चग्गपमायकलङ्कदूसिओ भगवन्तं कुलवइमवलोइउं ति । एवं भणिय पणमिऊण य अग्गिसम्मतावसं नियत्तो राया । 'न मए इयाणिं गन्तव्वं' ति कलिऊण विसज्जिओ य तेणं माणभङ्गस्स उवरि विक्खेवो । अग्गिसम्मो वि य गन्तूण तवोवणं, निवेइऊण कुलवइणो जहावित्तं वुत्तंतं, 'वच्छ ! साहु कयं ' ति अहिणन्दिओ य कुलवइणा पवन्नो वयविसेसं ति । अणुदियहं च पवड्ढमाणसंवेगेण राइणा सेविज्जन्तस्स तस्स समइच्छिओ मासो, पत्तो य रन्नो मणोरहसएहिं पारणयदियहो । तम्मि य पारणयदियहे राइणो गुणसेणस्स देवी वसन्तसेणा दारयं पसूय त्ति । निवेइयं च राइणो हरिसवसेण पफुल्लवयणपङ्कयाए सपरितोसं पडिहारीए–महाराय ! देवी वसन्तसेणा तुम्हाणं अब्भुदयनिमित्तं पयाणं भागधेएहिं सुहंसुहेणं दारयं पसूय त्ति । तओ राइणा पुत्तजम्मब्भुदयसंजायरोमञ्चेणं दाऊण पडिहारीए कडय–केऊर–कण्णालङ्काराइयं अङ्गाभरणं, दिन्ना समाणत्ती । वसुंधरे ! समाइससु णं मम वयणाओ जहासन्निहिये पडिहारे । जहा–मोयावेह कालघण्टापओएण

किं वा न जानाति ? इति । ततोऽनुगृहीतोऽस्मि । सदृशं इदं तव अकारणवत्सलतायाः । ततो गच्छ त्वं तपोवनम् । अहं पुनः न शक्नोमि प्रत्यग्रप्रमादकलङ्कदूषितो भगवन्तं कुलपतिमवलोकितुम्–इति । एवं भणित्वा प्रणम्य च अग्निशर्मतापसं निवृत्तो राजा । 'न मया इदानीं गन्तव्यम् ' इति कलयित्वा विसर्जितश्च तेन मानभङ्गस्य उपरि विक्षेपः । अग्निशर्माऽपि च गत्वा तपोवनम्, निवेद्य कुलपतये यथावृत्तं वृत्तान्तम्, ' वत्स ! साधु कृतम्, इति अभिनन्दितश्च कुलपतिना प्रपन्नो व्रतविशेषमिति । अनुदिवसं च प्रवर्धमानसंवेगेन राज्ञा सेव्यमानस्य तस्य समतिक्रान्तः मासः, प्राप्तश्च राज्ञो मनोरथशतैः पारणकदिवसः । तस्मिंश्च पारणकदिवसे राज्ञो गुणसेनस्य देवी वसन्तसेना दारकं प्रसूतेति । निवेदितं च राज्ञो हर्षवशेन प्रफुल्लवदनपङ्कजया सपरितोषं प्रतिहार्या–महाराज ! देवी वसन्तसेना युष्माकम्–अभ्युदयनिमित्तम्, प्रजानां भागधेयैः सुखसुखेन दारकं प्रसूतेति । ततो राज्ञा पुत्रजन्माभ्युदयसंजातरोमा-

मम रज्जे सव्वबन्धणाणि, दवावेह घोसणापुव्वयं अणवेक्खियाणुरूवं महादाणं, विसज्जावेह जियसत्तुप्पमुहाणं नरवईणं मम पुत्तजम्मपउत्तिं, निवेएह देवीपुत्तजम्मब्भुदयं पउराणं, कारावेह अयालच्छणभूयं नयरमहूसवं ति । समाइट्ठा य तीए जहाइट्ठं पडिहारा। अणुचिट्ठियं च रायसासणं पडिहारेहिं । अवि य—

कारावियं च तेहिं तूररवुप्पुण्णदसदिसाभोयं । उन्नामिएक्ककरयलनच्चन्तविलासिणिसमूहं ॥
अन्तेउरियाहीरन्त[1]पुण्णवत्तुत्तरीयवरपोत्तं । सविसेसपसाहियसंमिलन्तरामायणाइण्णं ॥
पिट्ठागयमुट्ठिपहारभीरुरामाविमुक्कसिक्कारं । मयवसविलासिणीजणनच्चाविज्जन्तकञ्चुइयं ॥
सुव्वन्तकरप्फालियतालायरमुरयमहुरनिग्घोसं । दाणपरितुट्ठबहुबन्दिवन्द्रउग्घुट्ठजयसद्दं ॥

ङ्गेन दत्त्वा प्रतिहार्यै कटक-केयूर-कर्णालङ्कारादिकम्-अङ्गाभरणम् , दत्ता समाज्ञप्तिः। वसुंधरे! समादिश मम वचनाद् यथासंनिहितान् प्रतीहारान्, यथा-मोचयत कालघण्टाप्रयोगेण मम राज्ये सर्वबन्धनानि, दापयत घोषणापूर्वकम्-अनपेक्षितानुरूपं महादानम्, विसर्जयत जितशत्रुप्रमुखानां नरपतीनां मम पुत्रजन्मप्रवृत्तिम्, निवेदयत देवीपुत्रजन्माभ्युदयं पौराणाम्, कारयत अकालक्षणभूतं नगरमहोत्सवमिति । समादिष्टाश्च तया यथादिष्ट प्रतीहाराः । अनुचेष्टितं च राजशासनं प्रतीहारैः । अपि च—

कारितं च तैः तूर्यरवउत्पन्नदशदिशाभोगम् । उन्नामितैककरतलनृत्यमानविलासिनीसमूहम् ॥
अन्तःपुरिकाह्रियमाणपूर्णपात्रोत्तरीयवरपोतम् (?)। सविशेषप्रसाधितसम्मीलद्रामाजनाकीर्णम् ॥
पृष्ठागतमुष्टिप्रहारभीरुरामाविमुक्तसीत्कारम् । मदवशविलासिनीजननर्त्यमानकञ्चुकिकम् ॥

---

[1] पुण्णवंतुत्त० ख० ग

नच्चन्तमडहवामणचेडीहासिज्जमाणनरनाहं । वद्धात्राणयनिवहं वद्धावणयं मणभिरामं ॥

पवत्तो य वसन्तउरे नयरे महामहूसवो। एवंविहे य देवीपुत्तजम्मब्भुदयाणन्दिए महापमत्ते सह राइणा रायपरियणे अग्गिसम्मतावसो पारणगनिमित्तं रायउलं पविसिऊण वयणमेत्तेणावि केणइ अकयपडिवत्ती असुहकम्मोदएणं अट्टज्झाणदूसियमणो लहुं चेव निग्गओ। चिन्तियं च णेणं-अहो! से राइणो आबालभावओ चेव असरिसो ममोवरि वेराणुबन्धो त्ति। पेच्छह से अइणिगूढायारमाचरियं, जेण तं तहा मम समक्खं मणाणुकूलं जंपिय करणेण विवरीयमायरइ त्ति चिन्तयन्तो सो निग्गओ नयराओ। एत्थन्तरम्मि य अन्नाणदोसेणं अभावियपरमत्थमग्गत्तणेण य गहिओ कसाएहिं, अवगया से परलोयवासणा, पणट्ठा धम्मसद्धा, समागया सयलदुक्खतरुबीयभूया अमेत्ती, जाया य देहपीडाकरी अतीव बुभुक्खा। आकरिसिओ बुभुक्खाए। तओ—

श्रूयमाणकरास्फालिततालादरमुरजमधुरनिर्घोषम् । दानपरितुष्टबहुबन्दिवृन्दउद्घुष्टजयशब्दम् ॥
नृत्यमानलघुवामनचेटीहास्यमाननरनाथम् । बद्धाऽऽपानकनिवहं वर्धापनकं मनोऽभिरामम् ॥

प्रवृत्तश्च वसन्तपुरे नगरे महामहोत्सवः। एवंविधे च देवीपुत्रजन्माभ्युदयानन्दिते महाप्रमत्ते सह राज्ञा राजपरिजने अग्निशर्मतापसः पारणकनिमित्तं राजकुलं प्रविश्य वचनमात्रेणाऽपि केनाऽपि अकृतप्रतिपत्तिः अशुभकर्मोदयेन आर्तध्यानदूषितमना लघ्वेव निर्गतः। चिन्तितं चानेन-अहो! तस्य राज्ञ आबालभावात् चैव असदृशो ममोपरि वैरानुबन्ध इति। प्रेक्षध्वं तस्य अतिनिगूढाचारमाचरितम्, येन तत् तथा मम समक्षं मनोऽनुकूलं कथयित्वा करणेन विपरीतमाचरतीति चिन्तयन् स निर्गतो नगरात्। अत्रान्तरे च अज्ञानदोषेण अभावितपरमार्थमार्गत्वेन च गृहीतः कषायैः, अपगता तस्य परलोकवासना, प्रनष्टा धर्मश्रद्धा, समागता सकलदुःखतरुबीजभूता अमैत्री, जाता च देहपीडाकरी अतीव बुभुक्षा। आकृष्टो बुभुक्षया। ततः—

पढमपरीसहवइएण तेण अन्नाणकोहवसएणं । घोरं नियाणमेयं पडिवन्नं मूढहियएणं ॥
जइ होज्ज इमस्स फलं मए सुचिण्णस्स वयविसेसस्स । ता एयस्स वहाए पइजम्मं होज्ज मे जम्मो ॥
न कुणइ पणईण पियं जो पुरिसो विप्पियं च सत्तूणं । किं तस्स जणणिजोव्वणविउडणमेत्तेण जम्मेणं ? ॥
सत्तू य एस राया मम सिसुभावाउ चेव पावो त्ति । अवराहमन्तरेण वि, करेमि तो विप्पियमिमस्स ॥
इय काऊण नियाणं अप्पडिकन्तेण तस्स ठाणस्स । अह भावियं सुबहुसो कोहाणलजलियचित्तेण ॥

एत्थन्तरम्मि पत्तो एसो तवोवणं। अणेयवियप्पजणियकुचिन्तासंधुक्कियपवड्ढमाणकोहाणलो य कुलवइं सेसतावसे य परिहरिऊण अलक्खिओ चेव गओ सहयारवीहियं, उवविट्ठो य विमलसिलाविणिम्मिए चाउरन्तपीढे त्ति। अणुसयवसेण पुणो वि चिन्तिउमारद्धो। अहो! से राइणो ममोवरि पडिणीयभावो। कहं सव्वतावसमज्झे अहं से ओहसणिज्जो त्ति ?। जेण मे पइन्नाविसेसं नाऊण

प्रथमपरीषहपतितेन तेन अज्ञान-क्रोधवशगेन । घोरं निदानमेतत् प्रतिपन्नं मूढहृदयेन ॥
यदि भवेद् अस्य फलं मया सुचीर्णस्य व्रतविशेषस्य । तस्माद् एतस्य वधाय प्रतिजन्म भवतु मम जन्म ॥
न करोति प्रणयिनां प्रियम्, यः पुरुषः विप्रियं च शत्रूणाम् । किं तस्य जननीयौवनविकुट्टनमात्रेण जन्मना ? ॥
शत्रुश्चैष राजा मम शिशुभावात् चैव पाप इति । अपराधमन्तरेणाऽपि करोमि ततः विप्रियमस्य ॥
इति कृत्वा निदानम्-अप्रतिकान्तेन तस्य स्थानस्य । अथ भावितं सुबहुशः क्रोधानलज्वलितचित्तेन ॥

अत्रान्तरे प्राप्त एष तपोवनम्, अनेकविकल्पजनितकुचिन्तासंदीप्तप्रवर्धमानक्रोधानलश्च कुलपतिम्, शेषतापसांश्च परिहृत्य अलक्षित एव गतः सहकारवीथिकाम्, उपविष्टश्च विमलशिलाविनिर्मिते चतुरन्तपीठे इति । अनुशयवशेन पुनरपि चिन्तयितुमारब्धः-

नियडिबहुलो तहा तहोवणिमन्तिय असंपाडणेण पारणयस्स किल मं खलीकरेइ त्ति। तं मूढो खु सो राया किं मे एयावत्थगयस्स खलीकरीयइ। तहा अणाहाणं, दुब्बलाणं, परपरिहूयाणं च सत्ताणं कयन्तेणेव विणिवाइयाणं जा खलियारणा, न सा माणिणो मागमापूरेइ त्ति, विसेसओ समसत्तु-मित्ताणं परलोयवावारनिरयाणं तवस्सीणं ति। अहवा अपरिचत्ताहारमेत्तसङ्गस्स मे एद्दहमेत्ता कयत्थण त्ति। ता अलं मे जावज्जीवं चेव परिहवनिमित्तेणं आहारेणं ति गहियं जावज्जीवियं महोववासवयं॥ एत्थन्तरम्मि य परिचत्तनिययवावारो असुहज्झाणदूसियमणो, तवपरिक्खीणदेहो, दिट्ठो तत्थ तावसेहिं। भणियं च तेहिं-भवयं! अइपरिक्खीगदेहो, असंपावियकुसुमविलेवणोवयारो लक्खिज्जसि, ता किं इयाणिं पि ते न संजायं पारणयं ति?। अग्गिसम्मतावसेण भणियं-'न संजायं' ति। तावसेहिं भणियं-'कहं न संजायं'? किं न पविट्ठो तस्स राइणो गुणसेणस्स गेहं?। अग्गिसम्मतावसेग भणियं-'पविट्ठो'। तावसेहिं

अहो! तस्य राज्ञो ममोपरि प्रत्यनीकभावः। कथं सर्वतापसमध्ये अहं तस्य उपहसनीय इति? येन मम प्रतिज्ञाविशेषं ज्ञात्वा निकृतिबहुलः, तथा तथा उपनिमन्त्र्य असंपादनेन पारणकस्य किल मां खलीकरोति इति। तद् मूढः खलु स राजा किं मम एतदवस्थागतस्य खलीकरोति। तथा अनाथानाम्, दुर्बलानाम्, परपरिभूतानां च सत्त्वानां कृतान्तेनेव विनिपातितानां या खलीकारणा, न सा मानिनो मानमापूरयति इति, विशेषतः समशत्रु-मित्राणां परलोकव्यापारनिरतानां तपस्विनामिति। अथवा अपरित्यक्ताहारमात्रसंगस्य मम एतावन्मात्रा कदर्थनेति, ततोऽलं मम यावज्जीवमेव परिभवनिमित्तेन आहारेणेति गृहीतं यावज्जीवितं महोपवासव्रतम्॥ अत्रान्तरे च परित्यक्तनिजव्यापारः, अशुभध्यानदूषितमनाः, तपःपरिक्षीणदेहः, दृष्टस्तत्र तापसैः। भणितं च तैः-भगवन्! अतिपरिक्षीणदेहः, असंप्राप्तकुसुमविलेपनोपचारो लक्ष्यसे, ततः किमिदानीमपि तव न संजातं पारणकम्-इति?। अग्निशर्मतापसेन भणितम्—'न संजातम्' इति। तापसैर्भणितम्-'कथं न संजातम्? किं न प्रविष्टस्तस्य राज्ञो गुणसेनस्य गेहम्?। अग्निशर्मतापसेन भणितम्-

भणियं-'ता कहं ते न संजायं' ति ?। तेण भणियं-बालभावाओ चेव मे सो राया अणवरद्धवेरिओ, खलियारिओ अहं तेण पुव्विं। मए पुण न जाणिओ, अवगओ से इयाणिं वेराणुबन्धो। विणीओ विव लक्खिज्जइ, जाव मिच्छाविणीयस्स न से वेराणुबन्धो अवेइ; जेणोवहासबुद्धीए मं उवणिमन्तिऊणं अणज्जविलसिएणं चेव तेहिं तेहिं मायापयारेहिं चेव किल मं परिहवइ त्ति। अज्जं च तेण वियाणिऊण मम पारणगदिवसं सहसा चेव काराविओ पमोओ। तओ अहं पविसिऊणं रायगेहं अबहुमाणिओ चेव मुणियनरिन्दपरिवाराभिप्पाओ लहुं चेव निग्गओ त्ति। तओ तावसेहिं भणियं-भयवं! न एवं तवस्सिजणवच्छले नरिन्दगुणसेणे संभावियइ, अहवा विचित्तसन्धिणो हि पुरिसा हवन्ति, किं वा न संभावियइ ? नत्थि अविसओ कसायाणं ति भणिऊण निवेइयं तेहिं अच्चुव्विग्गेहिं कुलवइणो। जहा-भयवं! न तस्स अग्गिसम्मतावसस्स इमिणा वुत्तन्तेण संपयं पि पारणयं संवुत्तं ति। तओ ससंभन्तो तुरियमागओ अग्गिसम्मसमीवं कुलवई। संपूइओ य तेण अग्गिसम्मेण जहाणुरूवेणोवयारेणं। तओ तेण भणियं-वच्छ! कहमियाणिं पि ते न संजायं पारणयं ति ?। अहो!

'प्रविष्टः'। तापसैर्भणितम्-'ततः कथं तव न संजातम्' इति ?। तेन भणितम्-बालभावादेव मम स राजा अनपराद्धवैरिकः, खलीकारितश्चाहं तेन पूर्वम्। मया पुनर्न ज्ञातः, अवगतस्तस्य इदानीं वैरानुबन्धः। विनीत इव लक्ष्यते, यावद् मिथ्याविनीतस्य न तस्य वैरानुबन्धः अपैति, येनोपहासबुद्ध्या माम्-उपनिमन्त्र्य अनार्यविलसितेनैव तैः तैः मायाप्रकारैरेव किल मां परिभवतीति। अद्य च तेन विज्ञाय मम पारणकदिवसं सहसा एव कारितः प्रमोदः। ततोऽहं प्रविश्य राजगेहम्, अबहुमानित एव ज्ञातनरेन्द्रपरिवाराभिप्रायः लघ्वेव निर्गत इति। ततस्तापसैर्भणितम्-भगवन्! नैवं तपस्विजनवत्सले नरेन्द्रगुणसेने संभाव्यते, अथवा विचित्रसंधयो हि पुरुषा भवन्ति, किं वा न संभाव्यते ?। नास्ति अविषयः कषायाणामिति भणित्वा निवेदितं तैरत्युद्विग्नैः कुलपतये। यथा-भगवन्! न तस्य अग्निशर्मतापसस्य अनेन वृत्तान्तेन सांप्रतमपि पारणकं संवृत्तमिति। ततः ससंभ्रान्तः त्वरितमागतः अग्निशर्मसमीपं कुलपतिः, संपूजितश्च

से असरिससमायरणं राइणो गुणसेणस्स। अग्गिसम्मतावसेण भणियं–भयवं! पमाइणो चेव रायाणो हवन्ति, को वा तस्स दोसो? मम चेवापरिचत्ताहारमेत्तसङ्गस्स एस दोसो, जेण तस्स वि गेहं पविसामि त्ति। परिचत्तो य मए संपयं जावज्जीवाए चेव सयलपरिहवबीयभूओ एद्दहमेत्तो वि सङ्गो। अओ विन्नवेमि भयवन्तं एयम्मि अत्थे; नाहमन्नहा आणवेयव्वो त्ति। कुलवइणा भणियं–वच्छ! जइ परिचत्तो आहारो, गओ इयाणिं कालो आणाए। सच्चपइन्ना खु तवस्सिणो हवन्ति। किं तु तुमए नरिन्दस्स उवरिं कोवो न कायव्वो। जओ—

"[1]सव्वं पुव्वकयाणं कम्माणं पावए फलविवागं। अवराहेसु गुणेसु य निमित्तमित्तं परो होइ" ॥

एवमणुसासिऊणं पडियारगे तावसे निरूविय गओ कुलवई। इओ य राइणा गुणसेणेणं तहा अयालच्छणसोक्खमणुह-

तेन अग्निशर्मणा यथानुरूपेणोपचारेण। ततस्तेन भणितम्–वत्स! कथमिदानीमपि तव न संजातं पारणकम्–इति?। अहो! तस्य असदृशसमाचरणं राज्ञो गुणसेनस्य। अग्निशर्मतापसेन भणितम्–भगवन्! प्रमादिन एव राजानो भवन्ति, को वा तस्य दोषः? मम एव अपरित्यक्ताहारमात्रसंगस्य एष दोषः, येन तस्यापि गेहं प्रविशामि इति। परित्यक्तश्च मया साम्प्रतं यावज्जीवमेव सकलपरिभववीजभूत एतावन्मात्रोऽपि संगः। अतो विज्ञपयामि भगवन्तम्–एतस्मिन्नर्थे; नाहमन्यथा आज्ञापयितव्य इति। कुलपतिना भणितम्–वत्स! यदि परित्यक्त आहारः, गत इदानीं काल आज्ञायाः। सत्यप्रतिज्ञाः खलु तपस्विनो भवन्ति। किं तु त्वया नरेन्द्रस्य उपरि कोपो न कर्तव्यः। यतः—

सर्वं पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकम्। अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥

---

[1] सव्वे क ख

वन्ते परियणे अइक्कन्ताए पारणगवेलाए सुमरियं, जहा पारणयदिवसो खु अज्ज तस्स महातवस्सिस्स । अहो ! मे अहन्नया, न संपन्नं चेव महातवस्सिस्स पारणयं ति तक्केमि । पुच्छिओ य णेण जहासन्निहिओ परियणो । किं सो महाणुभावो तावसो अज्ज इहागओ न व त्ति ? । तओ तेण निउणं गवेसिऊणं निवेइयं–देव ! आगओ आसि, किं तु देवीपुत्तजम्मब्भुययाहिणन्दिए अइपमत्ते परियणे न केणइ उवचरिओ त्ति; तओ लहुं चेव निग्गओ । राइणा भणियं–अहो ! मे पावपरिणई । तस्स महातवस्सिस्स धम्मन्तरायकरणेणं देवीपुत्तजम्मब्भुययं पि आवयं चेव समत्थेमि । सव्वहा न मन्दपुण्णाणं गेहेसु वसुहारा पडन्ति । न य पमायदोसदूसिओ अहं उदन्तनिमित्तं पि से पारेमि मुहमवलोइउं । ता गच्छ, भो सोमदेवपुरोहिय ! ममाविन्नायपरियणभावो चेव गवेसिऊग तस्स महातवस्सिस्स वुत्तन्तं ‘किं तेण ववसियं ?’ति लहुं निवेएहि; आसङ्कइ व्विय मे हिययं । एवं च समाणत्तो सोमदेवपुरोहिओ गओ तवोवणं ।

एवमनुशास्य प्रतिचारकान् तापसान् निरूप्य गतः कुलपतिः । इतश्च राज्ञा गुणसेनेन तथा अकालक्षणसौख्यमनुभवति परिजने अतिक्रान्तायां पारणकवेलायां स्मृतम् , यथा पारणकदिवसः खलु अद्य तस्य महातपस्विनः । अहो ! मम अधन्यता, न संपन्नमेव महातपस्विनः पारणकमिति तर्कयामि । पृष्टश्चानेन यथासंनिहितः परिजनः । किं स महानुभावः तापसः अद्य इह आगतो नवा इति ?। ततस्तेन निपुणं गवेषयित्वा निवेदितम्–देव ! आगत आसीत् , किं तु देवीपुत्रजन्माभ्युदयाभिनन्दिते अतिप्रमत्ते परिजने न केनचिद् उपचरित इति; ततो लघ्वेव निर्गतः । राज्ञा भणितम्–अहो ! मम पापपरिणतिः । तस्य महातपस्विनो धर्मान्तरायकरणेन देवीपुत्रजन्माभ्युदयमपि आपदं चैव समर्थयामि । सर्वथा न मन्दपुण्यानां गेहेषु वसुधाराः पतन्ति । न च प्रमाददोषदूषितः अहम्–उदन्तनिमित्तमपि तस्य पारयामि मुखमवलोकितुम् ‘ ततो गच्छ भोः सोमदेवपुरोहित ! ममाऽविज्ञातपरिजनभाव एव गवेषयित्वा तस्य महातपस्विनो वृत्तान्तम् ‘किं तेन व्यवसितम् ?’ इति लघु निवेदय; आशङ्कते इव मम हृदयम् । एवं च समाज्ञप्तः सोमदेवपुरोहितो

दिट्ठो तेण बहुतवस्सिजणपरिवारिओ, गिरिणईतडासन्ननिविट्ठमण्डवगओ, दीहरकुसरइयसत्थरोवविट्ठो, अमरिसवसाढत्तरायकहावावडो अग्गिसम्मतावसो त्ति। पणमिओ विणओणयउत्तिमङ्गेणं सोमदेवेणं। तेणं चिय आसीसापुव्वयं 'सागयं' ति भणिऊण 'उवविससु' त्ति आइट्ठो। उवविट्ठो सोमदेवपुरोहिओ। भणियं च णेण-भयवं! अइपरिक्खीणदेहो लक्खिज्जसि, ता किमेयं ति ?। अग्गिसम्मतावसेण भणियं-निरीहाणं, अन्नओ समासाइयवित्तीणं अङ्गं चेव किसं तवस्सीणं ति। सोमदेवेण भणियं-एवं एयं, निरीहा चेव तवस्सिणो हवन्ति; किं तु धण-धन्न-हिरण्ण-सुवण्ण-मणि-मोत्तिय-प्पवाल-दुप्पय-चउप्पएसु, न उण धम्म-काओवयारगे आहारमेत्ते वि। न य ईइसा एत्थ लोया, जे तुमए वि सरिसाणं मुत्तिमग्गपवन्नाणं, अविसेससत्तु-मित्ताणं, समतण-मणि-मुत्त-कञ्चगाणं, संसारजलहिपोयाणं आहारमेत्तं पि न देन्ति त्ति। अग्गिसम्मतावसेण भणियं-सच्चमेयं, न एयारिसा एत्थ लोया मोत्तूण नरिन्दगुणसेणं ति। सोमदेवेण भणियं-भयवं! किं कयं नरिन्दगुणसेणेण ?। धम्मपरो खु सो राया सुणीयइ त्ति। अग्गिसम्मतावसेण भ-

---

गतस्तपोवनम्। दृष्टस्तेन बहुतपस्विजनपरिवारितः, गिरिनदीतटाऽऽसन्ननिविष्टमण्डपगतः, दीर्घकुशरचितस्रस्तरोपविष्टः, अमर्षवशाऽऽरब्धराजकथाव्यापृतः अग्निशर्मतापस इति। प्रणतः विनयावनतोत्तमाङ्गेन सोमदेवेन। तेन एव आशीःपूर्वकम् 'स्वागतम्' इति भणित्वा 'उपविश' इति आदिष्टः। उपविष्टः सोमदेवपुरोहितः। भणितं चानेन-भगवन्!। अतिपरिक्षीणदेहो लक्ष्यसे, ततः किमेतद् इति ?। अग्निशर्मतापसेन भणितम्-निरीहाणाम्, अन्यतः समासादितवृत्तीनाम्-अङ्गमेव कृशं तपस्विनाम्-इति। सोमदेवेन भणितम्-एवमेतत्, निरीहा एव तपस्विनो भवन्ति; किं तु धन-धान्य-हिरण्य-सुवर्ण-मणि-मौक्तिक-प्रवाल-द्विपद-चतुष्पदेषु, न पुनः धर्म-कायोपकारके आहारमात्रेऽपि। न च ईदृशा अत्र लोकाः, ये युष्माकमपि सदृशानां मुक्तिमार्गप्रपन्नानाम्, अविशेषशत्रु-मित्राणाम्, समतृण-मणि-मुक्ता-काञ्चनानाम्, संसारजलधिपोतानाम्-आहारमात्रमपि न ददति इति। अग्निशर्मतापसेन भणितम्-सत्यमेतत्, न एतादृशा

णियं–को अन्नो धम्मपरो, जो विणिज्जियनियमण्डलो वि तवस्सिजणं पसज्झं वावाएइ त्ति। सोमदेवेण चिन्तियं–परिकुविओ खु एसो तावसो। जहा य दीहरकुसरइयसत्थरोवविट्ठो लक्खिज्जइ, तहा नरिन्दनिव्वेएणं चेवाणेण पडिवन्नमणसणं भवे। पुच्छिज्जन्तो य एसो असोयव्वं सामिपरिवायं गेण्हइ। ता अन्नओ चेव उवलहिय वुत्तन्तं सामिणो निवेएमि त्ति। पणमिऊण तं निग्गओ सोमदेवो। पुच्छिओ य णेणं कुसकुसुमवावडग्गहत्थो, अभिसेयकामो, गिरिनइं समोयरन्तो तावसो। भयवं! किं पडिवन्नं अग्गिसम्मतावसेण?। तेण वि य बाहजलभरियमन्थरनयणेणं सवित्थरमाइक्खियं तयणुट्ठाणं। गओ सोमदेवो, निवेइयं च णेणं जहोवलद्धं राइणो। तओ राया अहिययरजायनिव्वेओ, चिन्ताभारनिस्सहं अङ्गं धरमाणो, सयलन्तेउर–प्पहाणपरियणपरिवारिओ पाइक्को चेव अग्गिसम्मपच्चायणनिमित्तं पयट्टो तवोवणं। संपत्तो रायहंसो व्व कलहंसियपरिवारिओ तवोवणासन्नं वित्थिण्णं गिरिनइपुलिणं। एत्थन्तरम्मि य

अत्र लोका मुक्त्वा नरेन्द्रगुणसेनम्–इति। सोमदेवेन भणितम्–भगवन्! किं कृतं नरेन्द्रगुणसेनेन? धर्मपरः खलु स राजा श्रूयते इति। अग्निशर्मतापसेन भणितम्–कोऽन्यो धर्मपरः, यो विनिर्जितनिजमण्डलोऽपि तपस्विजनं प्रसह्य व्यापादयति इति। सोमदेवेन चिन्तितम्–परिकुपितः खलु एष तापसः। यथा च दीर्घकुशरचितस्रस्तरोपविष्टो लक्ष्यते, तथा नरेन्द्रनिर्वेदेन एव अनेन प्रतिपन्नम्–अनशनं भवेत्। पृच्छ्यमानश्च एष अश्रोतव्यं स्वामिपरिवादं गृह्णाति। ततोऽन्यत एव उपलभ्य वृत्तान्तं स्वामिने निवेदयामि इति। प्रणम्य तं निर्गतः सोमदेवः। पृष्टश्च अनेन कुशकुसुमव्यापृताग्रहस्तः, अभिषेककामः, गिरिणदीं समवतरन् तापसः। भगवन्! किं प्रतिपन्नम्–अग्निशर्मतापसेन?। तेनाऽपि च वाष्पजलभृतमन्थरनयनेन सविस्तरम्–आख्यातं तदनुष्ठानम्। गतः सोमदेवः, निवेदितं च तेन यथोपलब्धं राज्ञे। ततो राजा अधिकतरजातनिर्वेदः, चिन्ताभारनिस्सहम्–अङ्गं धरन्, सकलान्तःपुर–प्रधानपरिजनपरिवारितः पदातिरेव अग्निशर्मप्रत्यायननिमित्तं प्रवृत्तस्तपोवनम्। संप्राप्तो राजहंस इव कलहंसिकापरिवारितः तपोवनासन्नं विस्तीर्णं गिरिणदीपुलि-

मुणियनरिन्दागमणेणं, पफुल्लवयणपङ्कएणं राइणो आगमणमग्गिसम्मतावसस्स निवेइयं मुणिकुमारएणं। तओ अग्गिसम्मतावसेण कोहजलणपज्जलियसरीरेणं सद्दाविओ कुलवई, लङ्घिऊण जहोचियमुवयारं निट्ठुरं भणिओ–भो ! भो ! न पारेमि एयस्स अकारणवेरिणो नरिन्दाहमस्स मुहमवलोइउं, ता जं किंचि भणिय बाहिरओ चेव विसज्जेहि एयं। कुलवइणा चिन्तियं–अवहरिओ खु एसो कसाएहिं। तओ जुत्तं चेव ताव पच्चग्गकसायदूसियचित्तस्स नरिन्ददंसणं परिहरिउं ति गओ नराहिवसम्मुहं थेवं भूमिं कुलवई। दिट्ठो य णेण परिमिलाणदेहो सपरिवारो राया। पणमिओ य सविणयं सपरिवारेणं राइणा। अहिणन्दिओ य आसीसाए कुलवइणा, भणिओ य णेण–महाराय ! एहि; एयाए चम्पगवीहियाए उवविसम्ह। राइणा भणियं–‘ जं भयवं आणवेइ ’। गया चम्पगवीहियं। उवविट्ठो विमलसिलानिविट्ठे कुसासणे कुलवई, पुरओ य से धरणीए चेव सपरिवारो राया। तओ कुलवइणा भणियं–महाराय ! कीस इयाणिं सकलत्तपरिवारेणं अणुचियं एद्दहमेत्तं भूमिं चरणागमणमणुचिट्ठियं ?। राइणा भणियं–भयवं ! अणुचियकारिणो चेव अम्हे,

---

नम्। अत्रान्तरे च ज्ञातनरेन्द्राऽऽगमनेन, प्रफुल्लवदनपङ्कजेन राज्ञ आगमनम्–अग्निशर्मतापसाय निवेदितं मुनिकुमारकेण। ततोऽग्निशर्मतापसेन क्रोधज्वलनप्रज्वलितशरीरेण शब्दायितः कुलपतिः, लङ्घित्वा यथोचितम्–उपचारं निष्ठुरं भणितः–भो ! भो ! न पारयामि (शक्नोमि) एतस्य अकारणवैरिणो नरेन्द्राधमस्य मुखमवलोकितुम्। ततो यत् किञ्चिद् भणित्वा बहिष्ट एव विसर्जय एनम्। कुलपतिना चिन्तितम्–अपहृतः खलु एष कषायैः। ततो युक्तमेव तावत् प्रत्यग्रकषायदूषितचित्तस्य नरेन्द्रदर्शनं परिहर्तुमिति गतो नराधिपसम्मुखं स्तोकां भूमिं कुलपतिः। दृष्टश्च तेन परिम्लानदेहः सपरिवारो राजा। प्रणतश्च सविनयं सपरिवारेण राज्ञा। अभिनन्दितश्च आशिषा कुलपतिना, भणितश्च तेन–महाराज ! एहि; एतस्यां चम्पकवीथिकायाम्–उपविशामः। राज्ञा भणितम्–‘यद् भगवन् आज्ञापयति’। गताः चम्पकवीथिकाम्। उपविष्टः विमलशिलानिविष्टे कुशासने कुलपतिः, पुरतश्च तस्य धरण्यामेव सपरिवारो राजा। ततः कुलपतिना

अहवा मएजारिसाणं पुरिसाहमाणं इमं चेवोचियं, जं महातवस्सिजणस्स पमायओ वावायणेण धम्मन्तरायकरणं ति। ता किं एइणा अणिव्वडियहिययसब्भावेण नियडीमन्तिएण ?। भयवं ! कहिं पुण सो महाणुभावो अग्गिसम्मतावसो ? पणमामि तं, सोहेमि तस्स दंसणेण पावकम्मकारिणं अप्पाणं ति। कुलवइणा भणियं-महाराय ! मा एद्दहमेत्तं संतप्पसु त्ति। ण एएण तुह निव्वेएणमणसणं कयं ति; किं तु कप्पो चेवायं तवस्सिजणस्स, जं चरिमकालम्मि अणसणविहिणा देहपरिच्चयणं ति। राइणा भणियं-भयवं! किं बहुणा मन्तिएण ? पेच्छामि ताव तं महाणुभावं। कुलवइणा भणियं-महाराय ! अलमियाणिं ताव तस्स दंसणेणं। झाणवावडो खु सो, ता किं से अहिप्पेयकज्जन्तराएणं ?। गच्छ तुमं नयरिं, पुणो कहिंचि पेक्खेज्जसु त्ति। तओ 'जं भयवं आणवेइ, पुणो आगच्छिस्सामि' त्ति भणिऊण अच्चन्तदुम्मणो उट्ठिओ राया, पणमिऊण कुलवइं पयट्टो नयरिं। तओ एक्केणं साणुक्कोसेणं च बालतावसकुमारेणं अणु-

---

भणितम्-महाराज ! कस्माद् इदानीं सकलत्रपरिवारेण अनुचितम्-एतावन्मात्रीं भूमिं चरणागमनम्-अनुष्ठितम् ?। राज्ञा भणितम्-भगवन्! अनुचितकारिण एव वयम्, अथवा मादृशानाम् (?) पुरुषाधमानाम्-इदमेव उचितम्, यद् महातपस्विजनस्य प्रमादतो व्यापादनेन धर्मान्तरायकरणम्-इति। ततः किमेतेन अनिर्वृतहृदयसद्भावेन (स्वभावेन) निकृतिमन्त्रितेन ?। भगवन् ! कुत्र पुनः स महानुभावोऽग्निशर्मतापसः ?। प्रणमामि तम्, शोधयामि तस्य दर्शनेन पापकर्मकारिणम्-आत्मानम्-इति। कुलपतिना भणितम्-महाराज ! मा एतावन्मात्रं संतप्यस्व इति। न एतेन तव निर्वेदेन अनशनं कृतम्-इति; किं तु कल्प एव अयं तपस्विजनस्य, यत् चरमकाले अनशनविधिना देहपरित्यजनम्-इति। राज्ञा भणितम्-भगवन् ! किं बहुना मन्त्रितेन? प्रेक्षे तावत् तं महानुभावम्। कुलपतिना भणितम्-महाराज ! अलमिदानीं तावत् तस्य दर्शनेन। ध्यानव्यापृतः खलु सः, ततः किं तस्य अभिप्रेतकार्यान्तरायेण ?। गच्छ त्वं नगरीम्, पुनः कुत्रचित् प्रेक्षस्व इति। ततः 'यद् भगवान् आज्ञापयति, पुनरागमिष्यामि' इति भणित्वा अत्यन्तदुर्मना उत्थितो राजा। प्रणम्य

गच्छिऊण थेवभूमिभायं निवेइओ से अग्गिसम्माभिप्पाओ त्ति। तओ राइणा चिन्तियं—किमिह पुणागमणेणं? जइ परं कुलवई आयासे पाडिज्जइ। ता न जुत्तं ममेहं नयरे वि चिट्ठिउं, मा से महाणुभावस्स तस्स असोयव्वं पि अन्नं सुणिस्सं ति एवं चिन्तयन्तो पत्तो वसन्तउरं। पुच्छिया णेणं संवच्छरिया 'कया अम्हाण खिइपइट्ठियगमणदियहो परिसुज्झइ' त्ति?। तेहिं च निच्चं तक्कम्मवावडत्तणेणोवलद्धसोहणदिणेहिं विन्नत्तं—'महाराय! कल्लं चेव परिसुज्झइ' त्ति। तओ राइणा समाणत्तो परियणो 'पयट्टह लहुं कल्लं' ति। तओ बिइयदियहे महया चडयरेण निग्गओ राया। अणवरयपयाणएहिं च पत्तो मासमेत्तेण कालेण खिइपइट्ठियं। तओ ऊसियविचित्तकेउनिवहं, विविहकयहट्टसोहं, सोहियसपुप्फोवयाररायमग्गं, धवलियपासायमालोवसोहियं, महाविभूईए पविट्ठो नयरं, तत्थ वि य तोरणनिम्मियवन्दणमालं, सविसेससंपाइयमहोवयारं सव्वओभद्दं नाम पासायं। तत्थ य तम्मि चेव दियहे आगओ मासकप्पविहारेण अहा-

---

कुलपतिं प्रवृत्तो नगरीम्। तत एकेन सानुक्रोशेन च बालतापसकुमारेण अनुगम्य स्तोकभूमिभागं निवेदितस्तस्य अग्निशर्माऽभिप्राय इति। ततो राज्ञा चिन्तितम्—किमिह पुनरागमनेन? यदि परं कुलपतिः आयासे पात्यते। ततो न युक्तं मम इह नगरे अपि स्थातुम्, अथ मा महानुभावस्य तस्य अश्रोतव्यमपि अपरं श्रोष्यामि इति एवं चिन्तयन् प्राप्तो वसन्तपुरम्। पृष्टाश्च तेन सांवत्सरिकाः 'कदा अस्माकं क्षितिप्रतिष्ठितगमनदिवसः परिशुध्यति' इति?। तैश्च नित्यं तत्कर्मव्यापृतत्वेन उपलब्धशोभनदिनैः विज्ञप्तम्—'महाराज! कल्यमेव परिशुध्यति' इति। ततो राज्ञा समाज्ञप्तः परिजनः 'प्रवर्तध्वं लघु कल्यम्' इति। ततो द्वितीयदिवसे महता चटकरेण निर्गतो राजा। अनवरतप्रयाणैश्च प्राप्तो मासमात्रेण कालेन क्षितिप्रतिष्ठितम्। तत उच्छ्रितविचित्रकेतुनिवहम्, विविधकृतहट्टशोभम्, शोभितसपुष्पोपचारराजमार्गम्, धवलितप्रासादमालोपशोभितम्, महाविभूत्या प्रविष्टो नगरम्, तत्राऽपि च तोरणनिर्मितवन्दनमालम्, सविशेषसंपादितमहोपचारम्, सर्वतोभद्रं नाम प्रासादम्। तत्र च तस्मिंश्चैव दिवसे आगतः मासकल्पविहारेण यथासंयमं विहरन् शिष्यग-

संजमं विहरन्तो सीसगणसंपरिवुडो, संपुण्णदुवालसङ्गी, ओहि-मणनाणाइसयजुत्तो, सव्वङ्गसुन्दराहिरामो, पढमजोव्वणसिरीसमद्धासियसरीरो, मण्डणमिव वसुमईए, आणन्दो व्व सयलजणलोयणाणं, पच्चाएसो व्व धम्मनिरयाणं, निलओ व्व परमधन्नयाए, ठाणमिव आदेयभावस्स, कुलहरं पिव खन्तीए, आगरो इव गुणरयणाणं, विवागसव्वस्समिव कुसलकम्मस्स, महामहन्तनिववंससंभूओ विजयसेणो नामं आयरिओ त्ति। सो य असोयदत्तसेट्ठिपडिबद्धे, जिणाययणमण्डिए अणुन्नविय ओग्गहं ठिओ असोयवणुज्जाणे। जत्थ नीइवलिया विव नरवई दुल्लहविवरा सहयारा, परकलत्तदंसणभीया विव सप्पुरिसा अहोमुहट्ठिया वावीतडपायवा, विणिवडियसप्पुरिसचिन्ताओ विव अडालविडालाओ अइमुत्तयलयाओ, दरिद्द-कामिहिययाइं पिव समन्तओ आउलाउं लयाहराइं, विसयपसत्ता विव पासण्डिणो न सोहन्ति लिम्बपायवा, नववरगा विव कुसुम्भरत्तनिवसणा विरायन्ति रत्तासोया, किं वहुणा? जत्थ मणोरहा विव जीवलोयस्स बहुवुत्तन्ता उज्जाणपायवा। तहा हिमगिरिसिहराइं पिव उत्तुङ्गधवलाइं जिणाययणाइं। तत्थ य बहुफासुए भूमिभाए

णसंपरिवृतः, संपूर्णद्वादशाङ्गी, अवधि-मनोज्ञानातिशययुक्तः, सर्वाङ्गसुन्दराभिरामः, प्रथमयौवनश्रीसमध्यासितशरीरः, मण्डनमिव वसुमत्याः, आनन्द इव सकलजनलोचनानाम्, प्रत्यादेश इव धर्मनिरतानाम्, निलय इव परमधन्यतायाः, स्थानमिव आदेयभावस्य, कुलगृहमिव क्षान्त्याः, आकर इव गुणरत्नानाम्, विपाकसर्वस्वमिव कुशलकर्मणः, महामहान्नृपवंशसंभूतो विजयसेनो नाम आचार्य इति। स च अशोकदत्तश्रेष्ठिप्रतिवद्धे जिनायतनमण्डिते अनुज्ञाप्य अवग्रहं स्थितः अशोकवनोद्याने। यत्र नीतिवलिता इव नरपतयो दुर्लभविवराः सहकाराः, परकलत्रदर्शनभीता इव सत्पुरुषाः, अधोमुखस्थिता वापीतटपादपाः, विनिपतितसत्पुरुषचिन्ता इव अतालविताला अतिमुक्तकलताः, दरिद्र-कामिहृदयानि इव समन्तत आकुलानि लतागृहाणि, विषयप्रसक्ता इव पाखण्डिनो न शोभन्ते निम्बपादपाः, नववरका इव कुसुम्भरक्तनिवसना विराजन्ते रक्ताऽशोकाः, किं बहुना? यत्र मनोरथा इव जीवलोकस्य बहुवृत्तान्ता उद्यानपादपाः।

अहासंजमं सो भयवं चरणकरणनिरओ परिवसइ ।

इओ य राइणा गुणसेणेणं अत्थाइयागएणं पुच्छियं । केण भे अज्ज इह अच्छेरयभूयं किंचि वत्थु दिट्ठं ति ?। तओ उवलद्धविजयसेणायरिएण पणमिऊण रायाणं भणियं कल्लाणएणं–महाराय ! दिट्ठं मए अच्छेरयं । राइणा भणियं–कहेहि, किं तयं ति ?। कल्लाणएण भणियं–इह असोगदत्तसेट्ठिपडिबद्धे असोयवणुज्जाणे सयलदट्ठव्वदंसणमहूसवो, लायण्णजोण्हापवाहपम्हलियचउद्दिसाभोओ, सयलकलासंगओ विय मयलञ्छणो, पढमजोव्वणत्थो वि वियाररहिओ, विणिज्जियकुसुमबाणो वि तवसिरिनिरओ, परिचत्तसव्वसङ्गो वि सयलजणोवयारी, मुत्तिमन्तो विव भयवं धम्मो, दिट्ठो मए गन्धारजणवयाहिवस्स समरसेणस्स नत्तुओ, लच्छिसेणस्स पुत्तो पडिवन्नसमणलिङ्गो विजयसेणो नाम आयरिओ त्ति । तओ राइणा भणियं–अहो ! तुमं कयपुण्णो, पावियं तए फलं लोयणाणं ।

तथा हिमगिरिशिखराणि इव उत्तुङ्गधवलानि जिनायतनानि । तत्र च बहुप्रासुके भूमिभागे यथासंयमं स भगवान् चरणकरणनिरतः परिवसति ।

इतश्च राज्ञा गुणसेनेन आस्थानिकागतेन पृष्टम् । केन भवता अद्य इह आश्चर्यभूतं किंचिद् वस्तु दृष्टम्–इति ?। तत उपलब्धविजयसेनाचार्येण प्रणम्य राजानं भणितं कल्याणकेन–महाराज ! दृष्टं मया आश्चर्यकम् । राज्ञा भणितम्–कथय, किं तत्–इति ?। कल्याणकेन भणितम्–इह अशोकदत्तश्रेष्ठिप्रतिबद्धे अशोकवनोद्याने सकलद्रष्टव्यदर्शनमहोत्सवः, लावण्यज्योत्स्नाप्रवाहपक्ष्मलितचतुर्दिशाभोगः, सकलकलासंगत इव मृगलाञ्छनः, प्रथमयौवनस्थोऽपि विकाररहितः, विनिर्जितकुसुमबाणोऽपि तपःश्रीनिरतः, परित्यक्तसर्वसंगोऽपि सकलजनोपकारी, मूर्तिमान् इव भगवान् धर्मः, दृष्टो मया गान्धारजनपदाधिपस्य समरसेनस्य नप्तृकः, लक्ष्मीसेनस्य पुत्रः प्रतिपन्नश्रमणलिङ्गो विजयसेनो नाम आचार्य इति । ततो राज्ञा भणितम्–अहो ! त्वं कृतपुण्यः, प्राप्तं त्वया फलं लोचनानाम् । अहमपि

अहं पि णं भयवन्तं मोत्तूणमन्तरायं सुए वन्दिस्सामि त्ति। अइक्कन्ताए रयणीए कयसयलगोसकिच्चो राया गओ तमुज्जाणं। दिट्ठो य णेण अणेयसमणपरियरिओ, संपुण्णसारयससि व्व ता[1]रयणपरिवुडो विजयसेणायरिओ। तओ हरिसुब्भिन्नपुलएण, आणन्दबाहजलभरियलोयणेणं, धरणिनिहित्तजाणुकरयलेणं सविणयं पणमिओ अणेण। दिन्नो य से गुरुणा वि सारीरमाणसाणेगदुक्खविउडणो, सासयसिवसोक्खतरुबीयभूओ धम्मलाभो त्ति। तओ अट्ठारससीलङ्गसहस्सभारवहे, सिद्धिवहूनिब्भराणुरायसमागमचिन्तादुब्बले सेससाहुणो वन्दिऊण उवविट्ठो गुरुसमीवे। विम्हिओ य तस्स रूव-चरिएहिं। भणियं च णेण भयवं! किं ते सयलसंपु[2]ण्णमणोरहस्सा वि ईइसं निव्वेयकारणं? जेण इओ तओ ससम्भमनिवडन्तनरिन्दमउलिमणिप्पभाविसरविच्छुरियपायवीढं रायलच्छिं उज्झिय इमं ईइसं इहलोयनिप्पिवासं वयविसेसं पडिवन्नो सि त्ति। विजयसेणेण भणियं-महाराय! संसारम्मि वि निव्वेयकारणं पुच्छसि?। नणु सुलहमेत्थ निव्वेयकारणं। सुण —

तं भगवन्तं मुक्त्वा अन्तरायं श्वो वन्दिष्ये इति। अतिक्रान्तायां रजन्यां कृतसकलगोसकृत्यः राजा गतः तद् उद्यानम्। दृष्टश्च तेन अनेकश्रमणपरिकरितः, संपूर्णशारदशशी इव तारजन(गण)परिवृतः विजयसेनाचार्यः। ततो हर्षोद्भिन्नपुलकेन, आनन्दबाष्पजलभृतलोचनेन धरणिनिक्षिप्तजानुकरतलेन सविनयं प्रणतोऽनेन। दत्तश्च तस्मै गुरुणाऽपि शारीर-मानसाऽनेकदुःखविकुटनः. शाश्वतशिवसौख्यतरुबीजभूतः धर्मलाभ इति। ततः अष्टादशशीलाङ्गसहस्रभारवहान्, सिद्धिवधूनिर्भराऽनुरागसमागमचिन्तादुर्बलान् शेषसाधून् वन्दित्वा उपविष्टः गुरुसमीपे। विस्मितश्च तस्य रूप-चरितैः। भणितं च तेन-भगवन्! किं तव सकलसंपूर्णमनोरथस्याऽपि ईदृशं निर्वेदकारणम्? येन इतस्ततः ससंभ्रमनिपतन्नरेन्द्रमौलिमणिप्रभाविसरविच्छुरितपादपीठां राजलक्ष्मीं त्यक्त्वा इदम्-ईदृशम्-इहलोकनिष्पिपासं व्रतविशेषं

---

[1] तारा० क ख। [2] संपाडिय० क ख

नारय-तिरिय-नरा-ऽमरभवेसु हिण्डन्तयाण जीवाणं । जम्म-जरा-मरणभए मोत्तूण किमत्थि किंचि सुहं ? ॥
किं अत्थि नारगो वा तिरिओ मणुओ सुरो व संसारे । सो कोइ जस्स जम्मण-मरणाइं न होन्ति पावाइं ? ॥
तेहि गहियाण य कहं होइ रई हरिणतणयाणं व । कूडयपडियाण दढं वाहेहि विलुप्पमाणाणं ॥
सव्वेसिं सत्ताणं खणियं पि हु दुक्खमेत्तपडियारं । जा न करेइ नणु सुहं लच्छी को तीए पडिबन्धो ? ॥
केण ममेत्थुप्पत्ती कहिं इओ तह पुणो वि गन्तव्वं । जो एत्तियं पि चिन्तेइ एत्थ सो को न निव्विण्णो ? ॥

अन्नं च-एत्थ महाराय ! महासमुद्दमज्झगयं रयणमिव चिन्तामणिसंनिभं दुल्लभं माणुसत्तणं, तहा खरपवणचालियकुसग्गजलबिन्दुचञ्चलं जीवियं, कुवियभुयङ्गभीसणफणाजालसन्निहा य कामभोगा, सरयजलहर-कामिणीकडक्ख-गयकण्ण-विज्जुचञ्चला य रिद्धी,

---

प्रतिपन्नोऽसि इति । विजयसेनेन भणितम्-महाराज ! संसारेऽपि निर्वेदकारणं पृच्छसि । ननु सुलभमत्र निर्वेदकारणम् । शृणु—

नारक-तिर्यग्-नरा-ऽमरभवेषु हिण्डमानानां जीवानाम् । जन्म-जरा-मरणभयानि मुक्त्वा किमस्ति किंचित् सुखम् ? ।
किमस्ति नारको वा तिर्यङ् मनुजः सुरो वा संसारे । स कोऽपि यस्य जनन-मरणानि न भवन्ति पापानि ? ॥
तैर्गृहीतानां च कथं भवति रतिर्हरिणतनयानामिव । कूटकपतितानां दृढं व्याधैर्विलुप्यमानानाम् ॥
सर्वेषां सत्त्वानां क्षणिकमपि खलु दुःखमात्रप्रतीकारम् । या न करोति ननु सुखं लक्ष्मीः कस्तस्यां प्रतिबन्धः ? ॥
केन ममाऽत्रोत्पत्तिः कुत्र इतस्तथा पुनरपि गन्तव्यम् । य एतावद् अपि चिन्तयति अत्र स को न निर्विण्णः ? ॥

अन्यच्च—अत्र महाराज ! महासमुद्रमध्यगतं रत्नमिव चिन्तामणिसंनिभं दुर्लभं मनुष्यत्वम् , तथा खरपवनचालितकुशाग्रजलबिन्दुचञ्चलं जीवितम् , कुपितभुजङ्गभीषणफणाजालसन्निभाश्च कामभोगाः, शारदजलधर-कामिनीकटाक्ष-गजकर्ण-विद्युच्चञ्चला च ऋद्धिः,

अकयसुहतव-चरणाणं च दारुणो तिरियनारएसु विवागो त्ति। अवि य—

भय-रोग-सोग-पियविप्पओगबहुदुक्खजलणपज्जलिए। नडपेच्छणयसमाणे संसारे को धिइं कुणइ ? ॥
सइ सासयम्मि ठाणे तस्सोवाए य परममुणिभणिए। एगन्तसाहगे सुपुरिसाण जत्तो तहिं जुत्तो ॥

एवं च, महाराय ! संसारो चेव मे निव्वेयकारणं। तहवि पुण निमित्तमेत्तमेयं संजायं ति। सुण—अत्थि इहेव विजए गन्धारो नाम जणवओ, तत्थ गन्धारपुरं नाम नयरं। तन्निवासी अहं तत्थेव चिट्ठामि। मित्तो य मे बीयहिययभूओ सोमवसुपुरोहियपुत्तो विहावसू नाम। सो य कहंचि आयङ्कपीडियदेहो विणिज्जियसुरासुरेण मच्चुणा मम समक्खमेव पञ्चत्तमुवणीओ। तओ अहं तव्विओयाणलजलियमाणसो चिट्ठामि; जाव आगया अहासंजमविहारेणं विहरमाणा वासावासनिमित्तं चत्तारि साहुणो, ठिया य नयराओ नाइदूरे महामहन्ताए गिरिगुहाए। सिट्ठा य मे 'अइपिय' त्ति करिय निययपुरिसेहिं। गओ अहं सिग्घमेव ते वन्दिउं। दिट्ठा य तत्थ

अकृतशुभतप-श्चरणानां च दारुणः तिर्यग्-नारकेषु विपाक इति। अपि च—

भय-रोग-शोक-प्रियविप्रयोगवहुदुःखज्वलनप्रज्वलिते। नटप्रेक्षणकसमाने संसारे को धृतिं करोति ? ॥
सदा शाश्वते स्थाने तस्योपाये च परममुनिभणिते। एकान्तसाधके सुपुरुषाणां यत्नस्तत्र युक्तः ॥

एवं च, महाराज ! संसार एव मम निर्वेदकारणम्। तथाऽपि पुनर्निमित्तमात्रमेतत् संजातमिति। शृणु—अस्ति इहैव विजये गान्धारो नाम जनपदः, तत्र गान्धारपुरं नाम नगरम्। तन्निवासी अहं तत्रैव तिष्ठामि। मित्रं च मम द्वितीयहृदयभूतः सोमवसुपुरोहितपुत्रो विभावसुर्नाम। स च कथंचिद् आतङ्कपीडितदेहः विनिर्जितसुरासुरेण मृत्युना मम समक्षमेव पञ्चत्वमुपनीतः। ततोऽहं तद्वियोगानलज्वलितमानसस्तिष्ठामि; यावद् आगता यथासंयमविहारेण विहरन्तो वर्षाऽऽवासनिमित्तं चत्वारः साधवः, स्थिताश्च नगराद्

भयवन्तो सज्झायवावडा, वन्दिया पहट्ठवयणपङ्कएण, अहिणन्दिओ भयवन्तेहिं धम्मलाहेण। पुच्छिया मए अहाविहारं। अणुसासिओ भयवन्तेहिं। तओ ते महा मुणी कंचि वेलं पज्जुवासिय पविट्ठो नयरं। ते य भयवन्तो सव्वकालमेव वासावासे मासोववासेणं जयन्ति त्ति उवलद्धं मए सम्मत्तं। पवड्ढमाणसड्ढस्स य पइदिणं सेवमाणस्स मे अइक्कन्ता चत्तारि मासा। चरिमरयणीए जाया महं चिन्ता। कल्लं खु ते महातवस्सी गच्छिस्सन्ति। तओ अहं अद्धजामावसेसाए रयणीए निग्गओ भयवन्तदंसणनिमित्तं नयराओ। गओ य थेवं भूमिभागं; जाव पयलिया वसुमई, गज्जियं गन्धारगिरिणा, पवाइओ सुरहिमारुओ, उज्जोवियं नहङ्गणं, वित्थरिओ जयजयारवो। तओ अहं अब्भहियजायहरिसो तुरियं तुरियं पत्थिओ जाव पेच्छामि गन्धारगिरिगुहासमीवे, अवहरियं तणाइयं, समीकयं, धरणिवट्ठं, पवुट्ठं गन्धोदयं, उवइण्णा पुप्फोवयारा, निवडिया देवसंघाया, थुणन्ति भयवन्ते साहुणो। अहो! भे सुलद्धं माणुसत्तणं, खविया

नाऽतिदूरे महामहत्यां गिरिगुहायाम्। शिष्टाश्च मम 'अतिप्रियाः' इति कृत्वा निजकपुरुषैः। गतोऽहं शीघ्रमेव तान् वन्दितुम्। दृष्टाश्च तत्र भगवन्तः स्वाध्यायव्यापृताः, वन्दिताः प्रहृष्टवदनपङ्कजेन। अभिनन्दितो भगवद्भिः धर्मलाभेन। पृष्टा मया यथाविहारम्। अनुशासितो भगवद्भिः। ततस्तान् मुनीन् कांचिद् वेलां पर्युपास्य प्रविष्टो नगरम्। ते च भगवन्तः सर्वकालमेव वर्षाऽऽवासे मासोपवासेन यतन्ते इति उपलब्धं मया सम्यक्त्वम्। प्रवर्धमानश्रद्धस्य च प्रतिदिनं सेवमानस्य मम अतिक्रान्ताश्चत्वारो मासाः। चरमरजन्यां जाता मम चिन्ता। कल्यं खलु ते महातपस्विनः गमिष्यन्ति। ततोऽहं अर्धयामावशेषायां रजन्यां निर्गतो भगवद्दर्शननिमित्तं नगराद्। गतश्च स्तोकं भूमिभागम्; यावत् प्रचलिता वसुमतिः, गर्जितं गान्धारगिरिणा, प्रवायितः सुरभिमारुतः, उद्द्योतितं नभोऽङ्गनम्, विस्तरितो जयजयारवः। ततोऽहम्-अभ्यधिकजातहर्षः त्वरितं त्वरितं प्रस्थितो यावत् प्रेक्षे गान्धारगिरिगुहासमीपे, अपहृतं तृणादिकम्, समीकृतं धरणिपृष्ठम्, प्रवृष्टं गन्धोदकम्, उपकीर्णाः पुष्पोपचाराः, निपतिता देवसंघाताः, स्तुवन्ति भगवतः साधून्। अहो! भवद्भिः

रागादओ, पराजिय कम्मसेन्नं, तिण्णो भवसमुद्दो, पाविया सासयसिवसुहसिद्धि त्ति। तओ मए चिन्तियं—आविब्भूयं नूणमेएसिं केवलं, मुक्का जाइजरामरणदुक्खवासस्स । एत्थन्तरम्मि दिट्ठा मए केवलपहावओ च्चिय रयणमयसीहासणोवविट्ठा, विणियट्टभवपवञ्चा, पसन्तचित्तवावारा, केवलसिरीसमद्धासियसरीरा, मुत्तिमन्ता विव गुणगणा भयवन्तो साहुणो त्ति। तओ मए चिन्तिय -न एत्थ संदेहो, संपुण्णमेव एएसिं केवलनाणं ति। तओ आणन्दबाहजलभरियलोयणेणं, रोमञ्चपुलइयङ्गेणं, विम्हयवसुप्फुल्ललोयणेणं, धरणिनिमियजाणुकरयलेणं, तहाविहं, अच्चन्तसोहणं, अणाचिक्खणीयं अवत्थन्तरमणुहवन्तेण वन्दिया मए, वन्दिऊण य उवविट्ठो तेसिं पुरओ। पत्थुया केवलिणा कहा। पयत्ता पुच्छिउ हियइच्छियं देव—नरगणा। तओ मए चिन्तिय—किं पुणो अहमेए भयवन्ते पुच्छामि ?। जाव आवडिओ हिययसल्लभूओ चित्तम्मि मे विहावसू। तओ मए चिन्तियं—'अह कहिं पुण मे मित्तो विहावसू उप्पन्नो होउ' एय पुच्छामि त्ति चिन्तिऊण पुच्छिओ मए भगवं केवली। भयवं ! अत्थि इओ कोइ कालो पञ्चत्तमुवगयस्स मे मित्तस्स । ता कहिं सो

सुलब्धं मनुष्यत्वम् , क्षपिता रागादयः, पराजितं कर्मसैन्यम्, तीर्णः भवसमुद्रः, प्राप्ता शाश्वतशिवसुखसिद्धिरिति । ततो मया चिन्तितम्—आविर्भूतं नूनमेतेषां केवलम् , मुक्ता जाति—जरा—मरणदुःखवासस्य (वासात्) ॥ अत्रान्तरे दृष्टा मया केवलप्रभावतः एव रत्नमयसिंहासनोपविष्टाः, विनिवृत्तभवप्रपञ्चाः, प्रशान्तचित्तव्यापाराः, केवलश्रीसमृद्धातिशयशरीराः, मूर्तिमन्त इव गुणगणा भगवन्तः साधव इति । ततो मया चिन्तितम्—न अत्र संदेहः, संपूर्णमेव एतेषां केवलज्ञानमिति । तत आनन्दवाष्पजलभृतलोचनेन, रोमाञ्चपुलकिताङ्गेन, विस्मयवशोत्फुल्ललोचनेन, धरणिनिमितजानुकरतलेन, तथाविधम् अत्यन्तशोभनम् अनाख्यानीयम् अवस्थान्तरमनुभवता वन्दिता मया, वन्दित्वा च उपविष्टस्तेषां पुरतः । प्रस्तुता केवलिना कथा। प्रवृत्ताः प्रष्टुं हृदयेष्टं देव—नरगणाः । ततो मया चिन्तितम्—किं पुनरहम्—एतान् भगवतः पृच्छामि ?। यावद् आपतितो हृदयशल्यभूतश्चित्ते मम विभावसुः । ततो मया चिन्तितम्—'अथ कुत्र

उववन्नो ? किं वा संपयमवत्थन्तरमणुहवइ ? किं वा मम मुणियपरमत्थमग्गस्स वि तव्विओयाणलजणियसंतावो चित्तम्मि नोवसमं जाइ त्ति ?। केवलिणा भणियं–सुण, अत्थि इहेव गन्धारपुरे नयरे ऊसदिन्नो नाम वत्थसोहगो। तस्स महुपिङ्गा नाम गेहसुणिया। तीसे गब्भम्मि सुणओ उववन्नो त्ति। सो य अइकढिणरज्जुसंदामिओ, बुभुक्खापरिमिलाणदेहो, सोहणियाकुण्डनियडवत्ती, रासहखुरप्पहारभीओ इहेव संपयं दारुणमवत्थन्तरमणुहवइ। जम्मन्तरम्मि य पुक्खरद्धभरहकुसुमपुरनिवासिणो ते कुसुमसारसन्नियस्स सेट्ठिपुत्तस्स सिरिकन्ताभिहाणा अच्चन्तवल्लहा पत्ती आसि त्ति। तयब्भासओ य ते तव्विओयाणलजणियसंतावो चित्तम्मि णोवसमं जाइ। तओ मए एयं सोऊणं संजायनिव्वेएणं तन्नेहमोहियमणेण य तस्स पडिमोक्खणनिमित्तं पेसिया ऊसदिन्नवत्थसोहगगिहं निययपुरिसा, भणिया य 'तं लहुं मोयाविय, विइण्णपाण–भोयणं गिण्हिय इहेवागच्छह' त्ति। तओ गया ते पुरिसा, सिग्घं च संपाडियं मज्झ

पुनर्मम मित्रं विभावसुः उत्पन्नो भवेत्' एतत् पृच्छामि इति चिन्तयित्वा पृष्टो मया भगवान् केवली। भगवन् ! अस्ति इतः कश्चित् कालः पञ्चत्वमुपगतस्य मम मित्रस्य । ततः कुत्र स उपपन्नः ? किं वा सांप्रतमवस्थान्तरमनुभवति ? किं वा मम ज्ञातपरमार्थमार्गस्य अपि तद्वियोगानलजनितसंतापः चित्ते नोपशमं याति ? इति । केवलिना भणितम्–शृणु, अस्ति इहैव गान्धारपुरे नगरे पुष्यदत्तो नाम वस्त्रशोधकः । तस्य मधुपिङ्गा नाम गेहशुनी। तस्या गर्भे शुनकः उपपन्न इति। स च अतिकठिनरज्जुसंदामितः, बुभुक्षापरिम्लानदेहः, शोधनिकाकुण्डनिकटवर्ती, रासभक्षुरप्रहारभीतः इहैव सांप्रतं दारुणमवस्थान्तरमनुभवति। जन्मान्तरे च पुष्करार्धभरतकुसुमपुरनिवासिनस्तव कुसुमसारसंज्ञितस्य श्रेष्ठिपुत्रस्य श्रीकान्ताभिधाना अत्यन्तवल्लभा पत्नी आसीदिति। तदभ्यासतश्च तव तद्वियोगानलजनितसंतापः चित्ते नोपशमं याति । ततो मया एतत् श्रुत्वा संजातनिर्वेदेन तत्स्नेहमोहितमनसा च तस्य प्रतिमोक्षणनिमित्तं प्रेषिताः पुष्यदत्तवस्त्रशोधकगृहं निजकपुरुषाः, भणिताश्च 'तं लघु मोचयित्वा, वितीर्णपान–भोजनं गृहीत्वा इहैव आगच्छत इति । ततो गतास्ते

सासणं इमेहिं, आगया य तं गेण्हिउं। दिट्ठो य सो मए पिसुयासयगहियतणुरुहो, कीडानियरसंपाइयखयङ्किओ, अइखीणसरीरो, ससन्तचलिरजीहाकरालो, धवलविहाविज्जमाणदसणावली, मन्दमन्दं परिसक्कमाणो नाइदूरओ चेव सुणओ त्ति। जाओ य मे तं तहाविहं दट्ठूण महन्तो संवेगो। चिन्तियं च मए–अहो! दारुणो संसारवासो। एवंविहावसाणाणि एत्थ जीवाणं पेम्मविलसियाइं। एत्थन्तरम्मि य पत्ता मम समीवं सह तेण ते पुरिसा। निवेइओ णेहि 'देव! एस सो सुणओ' त्ति। तओ सो मं दट्ठूण पयलंतदीहलङ्गूलो, बाहजलभरियलोयणो, उग्गीवमवयालियाणणो किंपि तहाविहं अणाचिक्खणीयं अवत्थन्तरं पाविऊणमारसिउमाढत्तो। तओ मए पुच्छिओ केवली। भयवं! किमेयं ति ?। तेण भणियं–दुरन्तपुव्वभवब्भासओ पणओ त्ति। मए भणियं–भयवं! किमेस मं पच्चहियाणइ ?। भयवया भणियं–न विसेसओ, किंतु सामन्नओ त्ति। ईइसो चेव एस संसारसहावो त्ति, जम्मणन्तरभवब्भत्था भावणा अणाभोगओ वि कंचि कालं अणुवत्तइ त्ति। तओ मए भणियं–भयवं! अह कस्स कम्मस्स एस विवागो ?। भयवया भणियं–

पुरुषाः, शीघ्रं च संपादितं मम शासनम्-एभिः, आगताश्च तं गृहीत्वा। दृष्टश्च स मया पिशुका-क्षुद्रजंतु-शतगृहीततनुरुहः, कीटनिकरसंपादि तक्षताङ्कितः, अतिक्षीणशरीरः, श्वसच्चलमानजिह्वाकरालः, धवलविभाव्यमानदशनावलिः, मन्दमन्दं परिशक्नुवन् नातिदूरत एव शुनक इति। जातश्च मम तं तथाविधं दृष्ट्वा महान् संवेगः। चिन्तितं च मया-अहो! दारुणः संसारवासः। एवंविधावसानानि अत्र जीवानां प्रेमविलसितानि। अत्रान्तरे च प्राप्ता मम समीपं सह तेन ते पुरुषाः। निवेदितः तैः 'देव! एष स शुनकः' इति। ततः स मां दृष्ट्वा प्रचलद्दीर्घलाङ्गूलः, वाष्पजलभृतलोचनः, उद्ग्रीवमवचालिताननः किमपि तथाविधम्-अनाख्यानीयम्-अवस्थान्तरं प्राप्य आरसितुमारब्धः। ततो मया पृष्टः केवली। भगवन्! किमेतत्? इति। तेन भणितम्-दुरन्तपूर्वभवाऽभ्यासतः प्रणय इति। मया भणितम्-भगवन्! किमेष मां प्रत्यभिजानाति ?। भगवता भणितम्-न विशेषतः, किन्तु सामान्यत इति। ईदृश एव एष संसारस्वभाव

जाइमयमाणजणियस्स । मए भणियं-भयवं ! कोवि याणेण माणो कओ त्ति ?। भयवया भणियं-सुण, एत्थ चेवाणन्तरजम्मे पवत्ते मयणमहूसवे, निग्गयासु विचित्तवेसासु, नयरचच्चरीसु तरुणजणवन्द्रपरिगएण बहुजणपसंसणिज्जं वसन्त[1]कीलमणुहवन्तेण दिट्ठा समासन्नचारिणी वत्थसोहगचच्चरि त्ति । दट्ठूण य अन्नाणदोसेणं जाइ-[2]कुलाइगव्विएणं 'कहं नीयचच्चरी अम्हाण चच्चरीए समासन्नं परिव्वयइ' त्ति कयत्थिया वत्थसोहगा । पहाणो त्ति करिय दढयरं कयत्थिऊग संजमियसव्वगत्तो नेयाविओ चारयं उसदिन्नो । एत्थन्तरम्मि गरुयमाणपरिणामवत्तिणा बद्धं परभवाउयं । निव्वत्ते य मयणमहूसवे नगरलोएण मोयाविओ ऊसदिन्नो । एसो य तक्कम्मपरिणामवसओ मरिऊण एत्थ उववन्नो त्ति । तओ मए चिन्तियं-अहो ! अप्पसुहं नियाणं बहुदुक्खफलं, धिरत्थु संसारवासस्स । ता पुच्छामि भयवन्तं 'किंपज्जवसाणमेयं नियाणं ? किं वा एस भविओ, अभविओ वा ? सिद्धिगामी असिद्धिगामी संपत्तबीओ वा न व ?'

इति, जन्मान्तरभवाभ्यस्ता भावना अनाभोगतोऽपि कंचित् कालम्-अनुवर्तते इति । ततो मया भणितम्-भगवन् ! अथ कस्य कर्मणः एष विपाकः ? । भगवता भणितम्-जातिमदमानजनितस्य (कर्मणः)। मया भणितम्-भगवन् ! कोऽपि च अनेन मानः कृतः? इति । भगवता भणितम्-शृणु, अत्र चैव अनन्तरजन्मनि प्रवृत्ते मदनमहोत्सवे, निर्गतासु विचित्रवेश्यासु, नगरचत्वरीषु तरुणजनवृन्दपरिगतेन बहुजनप्रशंसनीयां वसन्तक्रीडाम्-अनुभवता दृष्टा समासन्नचारिणी वस्त्रशोधकचत्वरी इति । दृष्ट्वा च अज्ञानदोषेण जाति-कुलादिगर्वितेन 'कथं नीचचत्वरी अस्माकं चत्वर्यां समासन्नं परिव्रजति' इति कदर्थिता वस्त्रशोधकाः । प्रधान इति कृत्वा दृढतरं कदर्थयित्वा संयमित(बद्ध)सर्वगात्रः नायितश्चारकं पुष्यदत्तः । अत्रान्तरे गुरुकमानपरिणामवर्तिना बद्धं परभवायुष्कम् । निवृत्ते मदनमहोत्सवे नगरलोकेन मोचितः पुष्यदत्तः । एष च तत्कर्मपरिणामवशात् मृत्वा अत्र उपपन्न इति । ततो मया चिन्तितम्-अहो ! अल्पसुखं निदानं

---

१ सुह । २ कुलवलाइ (प्रत नं. १)

त्ति चिन्तिऊण पुच्छियं मए। तओ भयवया भणियं–सुण, जंपज्जवसाणमेयं नियाणं। इओ सुणयभवाओ एस अहाउयं पालिऊण उव्वट्टो समाणो इमस्स चेव ऊसदिन्नस्स गेहपसूयाए घोडघडिगाभिहाणाए रासहीए गब्भम्मि रासहत्ताए उववज्जिहि त्ति। तओ य निग्गओ समाणो ऊसदिन्नस्स अमणोरमो, किलेससंपावियसरीरवित्ती, गरुयभारुव्वहणपरिक्खेइयसरीरो, जीवियसमयं चिट्ठिऊण मओ समाणो ऊसदिन्नसंगयस्स चेव माइदिन्नसन्नियस्स चण्डालस्स अणहिगाभिहाणाए भारियाए कुच्छिंसि नपुंसगत्ताए उववज्जिहि त्ति। तओ य निक्खन्तो समाणो कुरूवदोहग्गकलङ्कदूसिओ, अपरिन्नायविसयसङ्गो, कंचि कालं नपुंसगत्ताए जीविऊण सीहविणिवाइयसरीरो देहं पमोत्तूण तीसे चेव चण्डालमहिलियाए कुच्छिंसि इत्थिगत्ताए उववज्जिहि त्ति। तओ विणिग्गयमेत्तो चेव पढमबालभाववत्ती भुयङ्गडक्को मरिऊण ऊसदिन्नस्स चेव गब्भ[1]दासीए दत्तियाभिहाणाए कुच्छिंसि नपुंसगत्ताए उववज्जिहि त्ति। तओ विणिग्गओ समा-

बहुदुःखफलम् , धिगस्तु संसारवासम् । ततः पृच्छामि भगवन्तम् 'किंपर्यवसानमेतद् निदानम् ? किं वा एष भव्यः, अभव्यो वा ? सिद्धिगामी असिद्धिगामी संप्राप्तबीजो वा न वा ?' इति चिन्तयित्वा पृष्टं मया । ततो भगवता भणितम्–शृणु. यत्पर्यवसानमेतद् निदानम् । इतः शुनकभवाद् एष यथायुष्कं पालयित्वा उद्वृत्तः सन् अस्यैव पुष्यदत्तस्स गेहप्रसूताया घोटघटिकाभिधनाया रासभ्या गर्भे रासभतया (उपपत्स्यते) उत्पत्स्यते इति । ततश्च निर्गतः सन् पुष्यदत्तस्य अमनोरम; क्लेशसंप्रापितशरीरवृत्तिः, गुरुकभारोद्वहनपरिखेदितशरीरः, जीवितसमयं स्थित्वा मृतः सन् पुष्यदत्तसंगतस्यैव मातृदत्तसंज्ञितस्य चाण्डालस्य अनधिकाभिधानाया भार्यायाः कुक्षौ नपुंसकतया उत्पत्स्यते इति । ततश्च निष्क्रान्तः सन् कुरूपदौर्भाग्यकलङ्कदूषितः, अपरिज्ञातविषयसंगः, कंचित् कालं नपुंसकतया जीवित्वा सिंहविनिपातितशरीरो देहं प्रमुच्य तस्या एव चाण्डालमहिलायाः कुक्षौ स्त्रीतया उत्पत्स्यते इति । ततो विनिर्गतमात्र एव

---

[1] गिह ख

णो जच्चन्धमडहखुज्जो सव्वलोयपरिभूओ कंचि कालं नपुंसगत्तं परिवालिऊण पयत्त नयरडाहे किसाणुणा छारीकयसरीरो पञ्चत्तमुवगच्छिऊण तीसे चेव गब्भदासीए कुच्छिंसि इत्थियत्ताए उववज्जिहि त्ति। समुप्पन्नो य पीढसप्पी भविस्सइ त्ति। तओ एत्थेव नयरे रायमग्गेण गच्छन्तो वियरिएण मत्तहत्थिणा वावाइयो समाणो इमस्स चेव ऊसदिन्नस्स कालञ्जणियाभिहाणाए भारियाए कुच्छिंसि इत्थिगत्ताए उववज्जिहि त्ति। जाया समाणी कमेण संपत्तजोव्वणा। दिन्ना य ऊसदिन्नेण ऊसरक्खियाभिहाणस्स अच्चन्तदारिद्दाभिभूयस्स। इत्थिया कयपाणिग्गहणा आवन्नसत्ता होऊण पसूइसमए चेव महावेदणाहिभूया कालं काऊण सजणणीए चेव पुत्तत्ताए उववज्जिहि त्ति। समुप्पन्नो य सो बालभावे चेव गन्धारनिन्नगातीरम्मि खेल्लमाणो ऊसदिन्नसत्तुणा चिलायनामेण 'रिउपुत्तो' त्ति गिण्हिऊण सिरोहरानिबद्धगरुयसिलायलो दहम्मि परिक्खिप्पिहिइ। एयपज्जवसाणमेयं नियाणं। भविओ य एओ सिद्धिगामी य, केवलम-

---

प्रथमबालभाववर्ती भुजंगदष्टः मृत्वा पुष्यदत्तस्य एव गर्भदास्याः (प्रसूतिकर्मकारिण्याः, गृहदास्या वा) दत्तिकाभिधानायाः कुक्षौ नपुंसकतया उपपत्स्यत इति। ततः विनिर्गतः सन् जात्यन्धलघुकुब्जः सर्वलोकपरिभूतः कंचित् कालं नपुंसकत्वं परिपाल्य प्रवृत्ते नगरदाहे कृशानुना भस्मीकृतशरीरः पञ्चत्वमुपगम्य तस्या एव गर्भदास्याः कुक्षौ स्त्रीतया उपपत्स्यत इति। समुत्पन्नश्च पीठसर्पी भविष्यति इति। ततोऽत्रैव नगरे राजमार्गे गच्छन्ती विहस्तेन मत्तहस्तिना व्यापादिता सती अस्यैव पुष्यदत्तस्य कालाञ्जनिकाभिधानाया भार्यायाः कुक्षौ स्त्रीतया उपपत्स्यते इति। जाता सती क्रमेण संप्राप्तयौवना। दत्ता च पुष्यदत्तेन पुष्यरक्षिताभिधानस्य अत्यन्तदारिद्र्याभिभूतस्य। स्त्री कृतपाणिग्रहणा आपन्नसत्त्वा भूत्वा प्रसूतिसमये एव महावेदनाऽभिभूता कालं कृत्वा स्वजनन्या एव पुत्रतया उपपत्स्यत इति। उपपन्नश्च स बालभावे एव गान्धारनिम्नगातीरे खेलन् पुष्यदत्तशत्रुणा चिलात (किरात) नाम्ना 'रिपुपुत्रः' इति गृहीत्वा शिरोधरानिबद्धगुरुकशिलातलः द्रहे परिक्षेपयिष्यते। एतत्पर्यवसानमेतद् निदानम्। भव्यश्च एव सिद्धिगामी च, केवलम्—असंप्राप्तबीजः—अस-

संपत्तबीओ त्ति। तओ मए भणियं-भयवं ! कहिं पुणो सो जलमरणाणन्तरं उववज्जिहिइ त्ति ? कया वा बीयसंपत्ती मुत्तिसंपत्ती य भविस्सइ ?। भगवया भणियं-सुण, जलमरणाणन्तरं वाणमन्तरेसु उववज्जिहि त्ति। तओ तम्मि चेव जम्मे आणन्दतित्थयरसमीवे सासयसुहकप्पपायवेक्कबीयं सम्मत्तं पाविहिइ। तओ चउगइसमावन्नो संखेज्जेसु समइच्छिएसु भवग्गहणेसु, इहेव गन्धारजणवए पाविऊण नरवइत्तणं, अमरतेयविज्जाहरसमणगणिसमीवे पवज्जिऊण पव्वज्जं, संपत्तकेवलो मुत्तिं पाविस्सइ त्ति। तओ ममेयं सोऊण जाओ संवेओ, नियत्ता भवचारगाओ मई। तओ अणुन्नविय जणणि-जणए, काऊण जहोचियं करणिज्जं, निक्खन्तो सुगहीयनामधेयस्स भगवओ इन्ददत्तगणहरस्स समीवे। ता एयं मे निव्वेयकारणं ति। गुणसेणेण भणियं-भयवं ! कयत्थो सि, सोहणं निव्वेयकारणं। जं पुण इमं भणियमासि। जहा—

सइ सासयम्मि ठाणे तस्सोवाए य परममुणिभणिए। एगन्तसाहए सुपुरिसाण जत्तो तहिं जुत्तो ॥ त्ति

स्यक्त्वः-इति। ततो मया भणितम्-भगवन् ! कुत्र पुनः स जलमरणानन्तरम्-उपपत्स्यते ? इति, कदा वा बीज-सम्यक्त्व-संप्राप्तिः, मुक्तिसंप्राप्तिश्च भविष्यति?। भगवता भणितम्-शृणु, जलमरणानन्तरं वानव्यन्तरेषु उपपत्स्यते इति। ततः तस्मिन् एव जन्मनि आनन्दतीर्थकरसमीपे शाश्वतसुखकल्पपादपैकबीजं सम्यक्त्वं प्राप्स्यति। ततः चतुर्गतिसमापन्नः संख्येयेषु समतिगतेषु भवग्रहणेषु, इहैव गान्धारजनपदे प्राप्य नरपतित्वम्, अमरतेजोविद्याधरश्रमणगणिसमीपे प्रपद्य प्रव्रज्याम्, संप्राप्तकेवलः मुक्तिं प्राप्स्यति इति। ततो मम एतत् श्रुत्वा जातः संवेगः, निवृत्ता भवचारकाद् मतिः। ततोऽनुज्ञाप्य जननी-जनकान्, कृत्वा यथोचितं करणीयम्, निष्क्रान्तः सुगृहीतनामधेयस्य भगवत इन्द्रदत्तगणधरस्य समीपे। तत एतद् मम निर्वेदकारणम् इति। गुणसेनेन भणितम्-भगवन् ! कृतार्थोऽसि, शोभनं निर्वेदकारणम्। यद् पुन ् इदं भणितमासीत्। यथा—

अह किं पुण तं सासयं ठाणं, को वा तस्स साहओ उवाओ त्ति ? । विजयसेणेण भणीयं–महाराय ! सासयं ठाणं नाम, जत्थ पाणिणो अट्ठविहकम्ममलकलङ्कविप्पमुक्का, जम्म–जरा–मरण–रोय–सोयाइउवद्दवरहिया, निरुवमनाणदंसणसुहभाइणो, अणंतं आयामिदीहमद्धं कालं चिट्ठन्ति । तं पुण सयलाइसयरयणायरेहिं, तेलोक्कबन्धवेहिं, सुरासुरपूइएहिं, सव्वन्नूहिं भणियं । इमस्स चेव चोद्दसरज्जूसियस्स खेत्तलोगस्स चूडामणीभूयं परमपयं ठाणं ति । साहओ उण उवाओ इमस्स सम्मत्त–नाण–चरणलक्खणो पडिवाइओ त्ति । एसो य गिहिधम्मसाहुधम्मेहिं ववत्थिओ । तत्थ गिहिधम्मो दुवालसविहो । तं जहा–पञ्च अणुव्वयाइं, तिण्णि गुणव्वयाइं, चत्तारि सिक्खावयाइं ति । साहुधम्मो उण दसविहो । तं जहा—

खन्ती य मद्दव–ऽज्जव–मुत्ती तव–संजमे य बोधव्वे । सच्चं सोयं आकिञ्चणं च बम्भं च जइधम्मो ॥

सति शाश्वते स्थाने तस्योपाये च परममुनिभणिते । एकान्तसाधके सुपुरुषाणां यत्नस्तत्र युक्तः ॥ इति

अथ किं पुनः तत् शाश्वतं स्थानम्, को वा तस्य साधक उपायः ? इति । विजयसेनेन भणितम्–महाराज ! शाश्वतं स्थानं नाम, यत्र प्राणिनः अष्टविधकर्ममलकलङ्कविप्रमुक्ताः, जन्म–जरा–मरण–रोग–शोकाद्युपद्रवरहिताः, निरुपमज्ञान–दर्शन–सुखभाजिनः अनन्तं आगामिदीर्घाद्धं कालं तिष्ठन्ति । तत् पुनः सकलाऽतिशयरत्नाकरैः, त्रैलोक्यबान्धवैः, सुरासुरपूजितैः सर्वज्ञैः भणितम् । अस्य एव चतुर्दशरज्जूच्छ्रितस्य क्षेत्रलोकस्य चूडामणिभूतं परमपदं स्थानम्–इति । साधकः पुनः उपायः अस्य सम्यक्त्व–ज्ञान–चरणलक्षणः प्रतिपादितः इति । एष च गृहिधर्म–साधुधर्मैः व्यवस्थितः । तत्र गृहिधर्मो द्वादशविधः । तद्यथा–पञ्च अणुव्रतानि, त्रीणि गुणव्रतानि, चत्वारि शिक्षाव्रतानि इति । साधुधर्मः पुनः दशविधः । तद्यथा—

क्षान्तिश्च मार्दवा–ऽऽर्जवे–मुक्तिः तपः–संयमौ च बोद्धव्यौ । सत्यं शौचं आकिञ्चन्यं च ब्रह्म च यतिधर्मः ॥

एयस्स उण दुविहस्स वि धम्मस्स मूलवत्थु सम्मत्तं। तं पुणो अणाइकम्मसंताणवेढियस्स जन्तुणो दुल्लहं हवइ त्ति। तं च कम्मं अट्ठहा, तं जहा–नाणावरणिज्जं, दरिसणावरणिज्जं, वेयणिज्जं, मोहणिज्जं, आउयं, नामं, गोत्तं, अन्तरायं च। एयस्स उण निमित्तं-मिच्छत्तं, अन्नाणं, अविरई, पमाओ, कसाया, जोगा य त्ति। एगपरिणामसंचियस्स एयस्स दुविहा ठिई समक्खाया। तं जहा–उक्कोसिया य जहन्निया य। तत्थ णं जा सा उक्कोसिया, सा तिव्वासुहपरिणामजणियाणं नाणावरण–दरिसणावरण–वेयणीय–अन्तरायाणं तीसं सागरोवमकोडाकोडीओ, मोहणिज्जस्स य सत्तरिं, नाम–गोयाणं वीसं, तेत्तीसं च सागरोवमाइं आउयस्स त्ति। जहन्ना उण तहाविहपरिणामसंचियस्स वेयणीयस्स बारस मुहुत्ता, नाम–गोयाणं अट्ठ, सेसाणं भिन्नमुहुत्तं ति। एवंठियस्स य इमस्स कम्मस्स अहापवत्तकरणेण जया घंसणघोलणाए कहवि एगं सागरोवमकोडाकोडिं मोत्तूण सेसाओ खवियाओ हवन्ति, तीसे वि य णं थेवमेत्ते खविए, तया घणरायदोसपरिणामलक्खणो, नाणावरण–दरिसणावरण–ऽन्तरायपडिवन्नसहायभावो, मोहणीयकम्मनिव्वत्तिओ, अच्च-

---

एतस्य पुनः द्विविधस्य अपि धर्मस्य मूलवस्तु सम्यक्त्वम्। तत् पुनः अनादिकर्मसंतानवेष्टितस्य जन्तोः दुर्लभं भवति इति। तच्च कर्म अष्टधा। तद्यथा-ज्ञानावरणीयम्, दर्शनावरणीयम्, वेदनीयम्, मोहनीयम्, आयुष्कम्, नाम, गोत्रम्, अन्तरायं च। एतस्य पुनर्निमित्तम्-मिथ्यात्वम्, अज्ञानम्, अविरतिः, प्रमादः. कषायाः, योगाश्चेति। एकपरिणामसंचितस्य एतस्य द्विविधा स्थितिः समाख्याता। तद्यथा-उत्कृष्टा च, जघन्या च। तत्र या सा उत्कृष्टा, सा तीव्राऽशुभपरिणामजनितानां ज्ञानावरण–दर्शनावरण–वेदनीय–अन्तरायाणां त्रिंशत् सागरोपमकोटाकोटिः, मोहनीयस्य सप्ततिः, नाम-गोत्रयोः विंशतिः, त्रयस्त्रिंशच्च सागरोपमाणि आयुष्कस्य इति। जघन्या पुनः तथाविधपरिणामसंचितस्य वेदनीयस्य द्वादश मुहूर्ताः, नाम-गोत्रयोः अष्ट, शेषाणां भिन्नमुहूर्तम्-इति। एवंस्थितस्य च अस्य कर्मणः यथाप्रवृत्तकरणेन यदा घर्षणघूर्णनया कथमपि एकां सागरोपमकोटाकोटिं मुक्त्वा शेषाः क्षपिता भवन्ति, तस्या अपि च स्तोकमात्रे

न्तदुब्भेओ कम्मगण्ठी हवइ। भणियं च—

“गण्ठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगण्ठि व्व। जीवस्स कम्मजणिओ घणरागदोसपरिणामो” ॥

तं च पत्ते समाणे अत्थि एगे जीवे, जे तं भिन्दइ, अत्थि एगे जीवे जे नो भिन्दइ। तत्थ णं जे से भिन्दइ से अपुव्वकरणेणं भिन्दइ। तओ तम्मि भिन्ने समाणे अणियट्टीकरणेणं कम्मवणस्स दावाणलेगदेसं, सिवसुहपायवस्स निरुवहयबीयं, संसारचारयस्स मोयावणसमत्थं, चिन्तामणिरयणस्स य लहुयभावजणयं, अणाइम्मि संसारसायरे अपत्तपुव्वं, पसत्थसम्मत्तमोहणीयकम्माणुवेयणोवसमक्खयसमुत्थं, पसम–संवेय–निव्वेया–ऽणुकम्पाइलिङ्गं, सुहायपरिणामरूवं सम्मत्तं पाउणइ, तल्लाहसमकालं च दुवे नाणाणि, तंजहा–मइनाणं च सुयनाणं च। तओ तम्मि पत्ते समाणे से जीवे बहुयकम्ममलमुक्के, आसन्ननियसरूवभावे, पसन्ने, संविग्गे, निव्विण्णे,

---

क्षपिते, तदा घनराग–दोष (द्वेष) परिणामलक्षणः, ज्ञानावरण–दर्शनावरण–अन्तरायप्रतिपन्नसहायभावः, मोहनीयकर्मनिर्वर्तितः अत्यन्तदुर्भेदः कर्मग्रन्थिर्भवति। भणितं च—

ग्रन्थिरिति सुदुर्भेदः कर्कशघनरूढगूढग्रन्थिरिव। जीवस्य कर्मजनितः घनराग–दोष(द्वेष)परिणामः ॥

तं च प्राप्ते सति अस्ति एको जीवः, यस्तं भिनत्ति, अस्ति एको जीवः, यो न भिनत्ति। अत्र यः स भिनत्ति, सोऽपूर्वकरणेन भिनत्ति। ततस्तस्मिन् भिन्ने सति अनिवृत्तिकरणेन कर्मवनस्य दावानलैकदेशम्, शिवसुखपादपस्य निरुपहतबीजम्, संसारचारकाद् मोचनसमर्थम्, चिन्तामणिरत्नस्य च लघुकभावजनकम्, अनादौ संसारसागरे अप्राप्तपूर्वम्, प्रशस्तसम्यक्त्वमोहनीयकर्मानुवेदनोपशमक्षयसमुत्थम्, प्रशम–संवेग–निर्वेदा–ऽनुकम्पादिलिङ्गम्, शुभाऽऽत्मपरिणामरूपं सम्यक्त्वं प्राप्नोति. तल्लाभसमकालं च द्वे ज्ञाने, तद्यथा–मतिज्ञानं च, श्रुतज्ञानं च। ततः तस्मिन् प्राप्ते सति स जीवः बहुकर्ममलमुक्तः, आसन्ननिजस्वरूपभावः, प्रसन्नः, संविग्नः,

अणुकम्पापरे, जिणवयणरुई आवि हवइ। भणियं च—

“सम्मत्तं उवसममाइएहि लक्खिज्जए उवाएहिं। आयपरिणामरूवं बज्झेहि पसत्थजोगेहि ॥
एत्थ य परिणामो खलु जीवस्स सुहो उ होइ विन्नेओ। किं मलकलङ्कमुक्कं कणयं भुवि सामलं होइ ? ॥
पयईइ य कम्माणं वियाणिउं वा विवागमसुहंति। अवरद्धे वि ण कुप्पइ उवसमओ सव्वकालंपि ॥
नर-विबुहेसरसोक्खं दुक्खं चिय भावओ उ मन्नन्तो। संवेगओ न मोक्खं मोत्तूणं किंचि पत्थेइ” ॥
नारय-तिरिय-नरा-ऽमरभवेसु निव्वेयओ वसइ दुक्खं। अकयपरलोयमग्गो ममत्तविसवेगरहिओ वि ॥
दट्ठूण पाणिनिवहं भीमे भवसागरम्मि दुक्खत्तं। अविसेसओऽणुकम्पं दुहा वि सामत्थओ कुणइ ॥
मन्नइ तमेव सच्चं नीसङ्कं जं जिणेहि पन्नत्तं। सुहपरिणामो सव्वं कङ्खाइविसोत्तियारहिओ ॥

निर्विण्णः, अनुकम्पापरः, जिनवचनरुचिश्चापि भवति। भणितं च—

सम्यक्त्वं उपशमादिकैर्लक्ष्यते उपायैः। आत्मपरिणामरूपं बाह्यैः प्रशस्तयोगैः ॥
अत्र च परिणामः खलु जीवस्य शुभस्तु भवति विज्ञेयः। किं मलकलङ्कमुक्तं कनकं भुवि श्यामलं भवति ? ॥
प्रकृतेश्च कर्मणां विज्ञाय वा विपाकमशुभमिति। अपराद्धेऽपि न कुप्यति उपशमतः सर्वकालमपि ॥
नर-विबुधे-श्वरसौख्यं दुःखमेव भावतस्तु मन्यमानः। संवेगतो न मोक्षं मुक्त्वा किंचित् प्रार्थयते ॥
नारक-तिर्यग्-नरा-ऽमरभवेषु निर्वेदतः वसति दुःखम्। अकृतपरलोकमार्गः ममत्वविषवेगरहितोऽपि ॥
दृष्ट्वा प्राणिनिवहं भीमे भवसागरे दुःखार्तम्। अविशेषतः अनुकम्पां द्विधाऽपि सामर्थ्यतः करोति ॥

एवंविहपरिणामो सम्मदिट्ठी जिणेहि पन्नत्तो । एसो य भवसमुद्दं लङ्घइ थेवेण कालेणं ॥

तओ य तीसे वि य णं ठिईए पलिओवमपुहुत्तमेत्ते खीणे परमत्थओ सुहयरपरिणामगब्भं देसविरइं पडिवज्जइ । तं जहा–थूलगपाणाइवायविरमणं वा, थूलगमुसावायविरमणं वा, थूलयादत्तादाणविरमणं वा, परदारगमणविरमणं वा, सदारसंतोसं वा, अपरिमियपरिग्गहविरमणं वा । से य एवं देसविरइपरिणामजुत्ते, पडिवन्नाणुव्वए, भावओ अपरिवडियपरिणामे नो खलु समायरइ इमे अइयारे। तं जहा–बन्धं वा, वहं वा, छविच्छेयं वा, अइभारारोवणं वा, भत्तपाणवोच्छेयं वा; तहा सहसब्भक्खाणं वा, रहस्सब्भक्खाणं वा, सदारमन्तभेयं वा, मोसोवएसं वा, कूडलेहकरणं वा; तहा तेणाहडं वा, तक्करपओगं वा, विरुद्धरज्जाइक्कमं वा, कूडतुल–कूडमाणे वा, तप्पडिरूवगववहारं वा; तहा इत्तरियपरिग्गहियागमणं वा, अपरिग्गहियागमणं वा, अणङ्गकीडं वा, परविवाहकरणं वा, कामभोग-

---

मन्यते तदेव सत्यं निःशङ्कं यद् जिनैः प्रज्ञप्तम् । शुभपरिणामः सर्वं काङ्क्षादिविश्रोतसिकारहितः ॥
एवंविधपरिणामः सम्यग्दृष्टिर्जिनैः प्रज्ञप्तः । एष च भवसमुद्रं लङ्घते स्तोकेन कालेन ॥

ततश्च तस्या अपि च स्थितेः पल्योपमपृथक्त्वमात्रे क्षीणे परमार्थतः शुभतरपरिणामगर्भां देशविरतिं प्रतिपद्यते । तद्यथा– स्थूलकप्राणातिपातविरमणं वा, स्थूलकमृषावादविरमणं वा, स्थूलकाऽदत्तादानविरमणं वा, परदारगमनविरमणं वा, स्वदारसंतोषं वा, अपरिमितपरिग्रहविरमणं वा । स च एवं देशविरतिपरिणामयुक्तः, प्रतिपन्नाऽणुव्रतः भावतोऽपरिपतितपरिणामः नो खलु समाचरति इमान् अतिचारान् । तद्यथा-बन्धं वा, वधं वा, छवि(शरीर)च्छेदं वा, अतिभाराऽऽरोपणं वा, भक्त-पानव्युच्छेदं वा; तथा सहसाऽभ्याख्यानं वा, रहस्याऽभ्याख्यानं वा, स्वदारमन्त्रभेदं वा, मृषोपदेशं वा, कूटलेखकरणं वा; तथा स्तेनाहृतं वा, तस्करप्रयोगं वा, विरुद्धराज्यातिक्रमं वा, कूटतुला-कूटमानं वा, तत्प्रतिरूपकव्यवहारं वा; तथा इत्वरिकपरिगृहीतागमनं वा, अपरिगृहीतागमनं वा, अन-

तिव्वाहिलासं वा; तहा खेत्तवत्थुपमाणाइक्कमं वा, हिरण्ण-सुवण्णपमाणाइक्कमं वा, धण-धन्नपमाणाइक्कमं वा, दुपय-चउप्पय-पमाणाइक्कमं वा, कुवियपमाणाइक्कमं वा; तहा अन्ने य एवंजाइए संसारसागरहिण्डणनिमित्तभूए सुहपरिणामभावओ चेव नो आयरइ त्ति। तहा इमे एयारूवे उत्तरगुणे य पडिवज्जइ। तं जहा-उड्ढदिसिगुणव्वयं वा, अहोदिसिगुणव्वयं वा, तिरियदिसिगुणव्वयं वा; तहा भोगोवभोगपरिमाणलक्खणगुणव्वयं वा, उवभोग-परिभोगहेउ-खरकम्माइपरिवज्जणं वा; तहा अवज्झाणायरिय-पमायायरिय-हिंसप्पयाण-पावकम्मोवएसलक्खणाणत्थदण्डविरइगुणव्वयं वा, तहा सावज्जजोगपरिवज्जण-निरवज्जजोगपडिसेवणालक्खणसामाइयसिक्खावयं वा, तहा दिसिवयगहियस्स दिसापरिमाणस्स पइदिणपमाणकरणदेसावगासियसिक्खावयं वा, तहा आहार-सरीरसक्कार-बम्भचेर-अव्वावारलक्खणपोसहसिक्खावयं वा, तहा नायागयाणं, कप्पणिज्जाणं, अन्न-पाणाईणं दव्वाणं देसकाल-सद्धा-सक्कारक्कमजुयं पराए भत्तीए आयाणुग्गहट्ठाए संजयाणं दाणं ति, इइलक्खणातिहिसंविभागसिक्खावयं वा। से य एवं कुसलपरिणामजुत्ते पडिवन्नगुणव्वय-

---

ङ्क्रीडां वा, परविवाहकरणं वा, कामभोगतीव्राऽभिलाषं वा; तथा क्षेत्रवस्तुप्रमाणाऽतिक्रमं वा, हिरण्य-सुवर्णप्रमाणाऽतिक्रमं वा, धन-धान्यप्रमाणातिक्रमं वा, द्विपद-चतुष्पदप्रमाणातिक्रमं वा, कुप्यप्रमाणातिक्रमं वा; तथा अन्यांश्च एवंजातिकान् संसारसागरहिण्डननिमित्तभूतान् शुभपरिणामभावत एव नो आचरति इति। तथा इमान् एतद्रूपान् उत्तरगुणांश्च प्रतिपद्यते। तद्यथा-ऊर्ध्वदिग्गुणव्रतं वा; अधोदिग्गुणव्रतं वा, तिर्यग्दिग्गुणव्रतं वा, तथा भोगोपभोगपरिमाणलक्षणगुणव्रतं वा, उपभोग-परिभोगहेतु-खरकर्मादिपरिवर्जनं वा; तथा अपध्यानाचरित-प्रमादाचरित-हिंसाप्रदान-पापकर्मोपदेशलक्षणानर्थदण्डविरतिगुणव्रतं वा, तथा सावद्ययोगपरिवर्जन-निरवद्ययोगप्रतिसेवनालक्षणसामायिकशिक्षाव्रतं वा, तथा दिग्व्रतगृहीतस्य दिक्परिमाणस्य प्रतिदिनप्रमाणकरणदेशावकाशिकशिक्षाव्रतं वा, तथा आहार-शरीरसत्कार-ब्रह्मचर्य-अव्यापारलक्षणपौषधशिक्षाव्रतं वा, तथा न्यायागतानाम्, कल्पनीयानाम्, अन्न-पानादीनां द्रव्याणां देशकाल-श्रद्धा-सत्कार-

सिक्खावए भावओ अपरिवडियपरिणामे नो खलु समायरइ इमे अइयारे। तं जहा–उड्ढदिसिपमाणाइक्कमं वा, अहोदिसिपमाणाइक्कमं वा, तिरियदिसिपमाणाइक्कमं वा, खेत्तवुड्ढिं वा, सइअन्तरद्धं वा; तहा सचित्ताहारं वा, सचितपडिबद्धाहारं वा, अप्पउलिओसहिभक्खणं वा, दुप्पउलिओसहिभक्खणं वा, तुच्छोसहिभक्खणं वा; तहा इङ्गालकम्मं वा, वणकम्मं वा, [१]सागडिकम्मं वा, भाडियकम्मं वा, फोडियकम्मं वा, दन्तवाणिज्जं वा, लक्खवाणिज्जं वा, केसवाणिज्जं वा, रसवाणिज्जं वा, विसवाणिज्जं वा, जन्तपीलगकम्मं वा, निल्लञ्छणकम्मं वा, दवग्गिदावणयं वा, असइपोसणं वा, सर–दह–तलायसोसणयं वा; तहा कन्दप्पं वा, कक्कुइयं वा, मोहरियं वा, संजुताहिगरणं वा, उवभोगपरिभोगाइरेगं वा; तहा मणदुप्पणिहाणं वा, वयदुप्पणिहाणं वा, कायदुप्पणिहाणं वा, सामाइयस्स सइअकरणं वा, सामाइयस्स अणवट्ठियस्स करणं वा; तहा आणवणपओगं वा, पेसवणपओगं वा, सद्दाणुवाइत्तं वा, रूवाणुवाइत्तं वा, बहियापोग्गलप-

क्रमयुतं परया भक्त्या आत्मानुग्रहार्थाय संयतानां दानमिति, इतिलक्षणाऽतिथिसंविभागशिक्षाव्रतं वा। स चैवं कुशलपरिणामयुक्तः प्रतिपन्नगुणव्रत–शिक्षाव्रतः भावत अपरिपतितपरिणामः नो खलु समाचरति इमान् अतिचारान्। तद्यथा–ऊर्ध्वदिक्प्रमाणातिक्रमं वा, अधोदिक्प्रमाणातिक्रमं वा, तिर्यग्दिक्प्रमाणातिक्रमं वा, क्षेत्रवृद्धिं वा, स्मृत्यन्तर्द्धिं वा; तथा सचित्ताहारं वा, सचित्तप्रतिबद्धाहारं वा, अपक्वौषधिभक्षणं वा, दुष्पक्वौषधिभक्षणं वा, तुच्छौषधिभक्षणं वा; तथा अंगारकर्म वा, वनकर्म वा, शकटकर्म, वा, भाटककर्म वा, स्फोटिकर्म वा, दन्तवाणिज्यं वा, लाक्षावाणिज्यं वा, केसवाणिज्यं वा, रसवाणिज्यं वा, विषवाणिज्यं वा, यन्त्रपीडनकर्म वा, निर्लाञ्छनकर्म वा, दवाग्निदापनं वा, असतीपोषणं वा, सरो–द्रह–तडागशोषणकं वा; तथा कन्दर्प्यं वा, कौकुच्यं वा, मौखर्यं वा, संयुक्ताधिकरणं वा, उपभोगपरिभोगाऽतिरेकं वा; तथा मनोदुष्प्रणिधानं वा, वचोदुष्प्रणिधानं वा, कायदुष्प्रणिधानं वा, सामायिकस्य स्मृत्यकरणं वा, सामा-

---

[१] साडिय०

क्खेवणं वा; तहा अप्पडिलेहियदुप्पडिलेहियसेज्जासंथारदुरूहणं वा, अप्पमज्जियदुप्पमज्जियसेज्जासंथारदुरूहणं वा, अप्पडिलेहिय-दुप्पडिलेहियउच्चार-पासवणविगिञ्चणयं वा, अप्पमज्जिय-दुप्पमज्जियउच्चार-पासवणविगिञ्चणयं वा, पोसहोववासस्स सम्मं अणणुपालणयं वा, तहा सचित्तनिक्खिवणयं वा, सचित्तपिहणयं वा, कालाइक्कमं वा, परववएसं वा, मच्छरियं वा, अन्ने य एवंजाइए गुणव्वयसिक्खावयाइयारे नायरइ। तओ णं से एमेयाणुरूवेणं कप्पेणं विहरिऊण तीसे कम्मट्ठिईए परिणामविसेसेणं तम्मि वा जम्मे, अणेगेसु वा जम्मेसु संखेज्जेसु सागरोवमेसु खविएसु सव्वविरइलक्खणं खमा-मद्दव-ऽज्जव-मुत्ती-तव-संजम-सच्च-सोया-ऽऽकिञ्चण-बम्भचेररूवं जइधम्मं पाउणइ। तओ एवं चेव उवसमसेढी, एवं चेव खवगसेढि त्ति। भणियं च—

सम्मत्तम्मि उ लद्धे पलियपुहुत्तेण सावओ होज्जा। चरणोवसमखयाणं सागरसंखन्तरा होन्ति ॥

यिकस्य अनवस्थितस्य करणं वा; तथा आनायनप्रयोगं वा, प्रेषणप्रयोगं वा, शब्दानुपातित्वं वा, रूपानुपातित्वं वा, बहिष्पुद्गलप्रक्षेपणं वा; तथा अप्रतिलिखित-दुष्प्रतिलिखितशय्यासंस्तारदूरोहणं वा, अप्रमार्जित-दुष्प्रमार्जितशय्यासंस्तारदूरोहणं वा, अप्रतिलिखित-दुष्प्रतिलिखितउच्चार-प्रस्रवणवित्यजनं वा, अप्रमार्जित-दुष्प्रमार्जितउच्चार-प्रस्रवणवित्यजनं वा, पौषधोपवासस्य सम्यग् अननुपालनकं वा, तथा सचित्तनिक्षेपणकं वा, सचित्तपिधानकं वा, कालातिक्रमं वा, परव्यपदेशं वा, मात्सर्यं वा, अन्यांश्च एवंजातिकान् गुणव्रत-शिक्षाव्रतातिचारान् नाचरति। ततः स एवमेतदनुरूपेण कल्पेन विहृत्य तस्याः कर्मस्थितेः परिणामविशेषेण तस्मिन् वा जन्मनि, अनेकेषु वा जन्मसु संख्येयेषु सागरोपमेषु क्षपितेषु सर्वविरतिलक्षणं क्षमा-मार्दवा-ऽऽर्जव-मुक्ति-तपः-संयम-सत्य-शौचा-ऽऽकिञ्चन्य-ब्रह्मचर्यरूपं यतिधम प्राप्नोति। तत एवमेव उपशमश्रेणी, एवमेव क्षपकश्रेणी इति। भणितं च—

सम्यक्त्वे तु लब्धे पल्यपृथक्त्वेन श्रावको भवेत्। चरणोपशमक्षयाणां सागरसंख्यान्तराणि भवन्ति ॥

एवं अप्पडिवडिए सम्मत्ते देव-मणुयजम्मेसु । अन्नयरसेढिवज्जं एगभवेणं च सव्वाइं ॥

तओ खवगसेढिपरिसमत्तीए सासयं, अणन्तं, केवलवरनाणदंसणं पाउणइ । तओ कमेणं खवियसेसभवोवग्गाहिकम्मंसे, सव्वकम्मविप्पमुक्के पाउणइ सासयं ठाणं ति । एत्थन्तरम्मि य गुरुवयणायण्णणजणियसुहपरिणामाणलदड्ढबहुकम्मेन्धणेणं, भावओ पवन्नसम्मत्ता-णुव्वय-गुणव्वय-सिक्खावयगुणट्ठाणेण भणियं गुणसेणेणं-भयवं ! धन्नोऽहं, जेण मए पावमलपक्खालणं, रागाइविसघायणं, पसमाइगुणकारणं, भवचारयनिस्सारणं सुयं ते वयणं ति । ता आइसह संपयं, जं मए कायव्वं ति । अहवा आइट्ठं चेव भयवया । ता देहि मे ताव गिहिधम्मसारभूए अणुव्वयाइए गुणट्ठाणे । गुरुणा भणियं-‘किं[1]चमेयं तएजारिसाणं भव्वसत्ताणं’ति विहिपुव्वयं दिन्नाणि से अणुव्वयाणि, अणुसासिओ य बहुविहं । तओ वन्दिऊण परमभत्तीए सपरिवारं गुरुं पविट्ठो नयरं । कयभो-

---

एवम्-अप्रतिपतिते सम्यक्त्वे देव-मनुजजन्मसु । अन्यतरश्रेणिवर्जम्-एकभवेन च सर्वाणि ॥

ततः क्षपकश्रेणिपरिसमाप्तौ शाश्वतम्, अनन्तम्, केवलवरज्ञानदर्शनं प्राप्नोति । ततः क्रमेण क्षपितशेषभवोपग्राहिकर्मांशः, सर्वकर्मविप्रमुक्तः प्राप्नोति शाश्वतं स्थानमिति ॥ अत्रान्तरे च गुरुवचनाऽऽकर्णनजनितशुभपरिणामानलदग्धबहुकर्मेन्धनेन, भावतः प्रपन्नसम्यक्त्वा-ऽणुव्रत-गुणव्रत-शिक्षाव्रतगुणस्थानेन भणितं गुणसेनेन-भगवन्! धन्योऽहम्, येन मया पापमलप्रक्षालनम्, रागादिविषघातनम्, प्रशमादिगुणकारणम्; भवचारकनिस्सारणं श्रुतं तव वचनम्-इति । तत आदिशत सांप्रतम्, यद् मया कर्तव्यमिति । अथवा आदिष्टमेव भगवता । ततो देहि मम तावद् गृहिधर्मसारभूतानि अणुव्रतादिकानि गुणस्थानानि । गुरुणा भणितम्-‘कृत्यमेतत् त्वादृशानां भव्यसत्त्वानाम्’ इति विधिपूर्वकं दत्तानि तस्य अणुव्रतानि, अनुशासितश्च बहुविधम् । ततो वन्दित्वा परमभक्त्या सपरिवारं गुरुं

---

१ मेयंति एयारिसाणं० ख

यणोवयारो य परिणयप्पाए दियहे पुणो वि निग्गओ त्ति। वन्दिया य णेण देवगुरवो। कालोइयमणुसासिओ य गुरुणा। तओ य कंचि वेलं पज्जुवासिऊण विहिणा पुणो नयरं पविट्ठो त्ति। एवं उभयकालं गुरुदंसण–तव्वयणसुणणसोक्खमणुहवन्तस्स अईओ मासो, परिणओ से धम्मो। कप्पसमत्तीए य गओ अन्नत्थ भयवं विजयसेणायरिओ त्ति। तओ अइक्कन्तेसु कइवयदिणेसु राइणो गुणसेणस्स पासायतलसंठियस्स कहवि सोऊण हाहारवसद्दगब्भिणं मरणनरवइणो विव पयाणढक्कं, संसाररक्खसस्स विव अट्टट्टहासं, जीवलोयस्स विव पमायचरियं मयगडिण्डिमसद्दं; पेच्छिऊण तं कयन्तवसवत्तिणं, चउपुरिसधरियकायं, कन्दन्तबन्धुजणपरिवारियं सवं; परमसंवेगभावियमइस्स, इन्दयालसरिसजीवलोयमवगच्छिऊण धम्मज्झाणजलपक्खालियपावलेवस्स समुप्पन्ना चिन्ता–अम्हे वि एवं चेव मरणधम्माणो त्ति। अहो! णु खलु एवं विरसावसाणे जीवलोए ते धन्ना, जे तेलोक्कबन्धुभूए, अचिन्तचिन्तामणिसन्निहे, परमरिसिसव्वन्नुदेसिए धम्मे कयाणुराया अगारवासाणो अणगारिअं पव्वयन्ति। तओ य पाणवह–मुसावाय–अदत्तादाण–मेहुण–परिग्गह-

---

प्रविष्टो नगरम्। कृतभोजनोपचारश्च परिणतप्राये दिवसे पुनरपि निर्गत इति। वन्दिताश्च अनेन देवगुरवः। कालोचितमनुशासितश्च गुरुणा। ततश्च कांचिद् वेलां पर्युपास्य विधिना पुनर्नगरं प्रविष्ट इति। एवम्–उभयकालं गुरुदर्शन–तद्वचनश्रवणसौख्यमनुभवतः अतीतो मासः, परिणतस्तस्य धर्मः। कल्पसमाप्तौ च गतोऽन्यत्र भगवान् विजयसेनाचार्य इति। ततोऽतिक्रान्तेषु कतिपयदिनेषु राज्ञो गुणसेनस्य प्रासादतलसंस्थितस्य कथमपि श्रुत्वा हाहारवशब्दगर्भीणं मरणनरपतेरिव प्रयाणढक्काम्, संसारराक्षसस्य इव अट्टाट्टहासम्, जीवलोकस्य इव प्रमादचरितं मृतकडिण्डिमशब्दम्; प्रेक्ष्य तत् कृतान्तवशवर्त्तिनं, चतुष्पुरुषधृतकायम्, क्रन्दद्बन्धुजनपरिवारितं शवम्; परमसंवेगभावितमतेः, इन्द्रजालसदृशजीवलोकम् अवगम्य धर्मध्यानजलप्रक्षालितपापलेपस्य समुत्पन्ना चिन्ता–वयमपि एवमेव मरणधर्माण इति। अहो! नु खलु एवं विरसावसाने जीवलोके ते धन्याः, ये त्रैलोक्यबन्धुभूते, अचिन्त्यचिन्तामणिसन्निभे, परमर्षिस-

विरया, बायालीसेसणादोसपरिसुद्धपिण्डग्गहिणो, संजोयणाइपञ्चदोसरहियमियकालभोइणो, पञ्चसमिया, तिगुत्ता, निरइयारवयपरिपालणत्थमेव इरियासमियाइपणवीसभावणोववेया, अणसण-मूणोयरियाइ-पायच्छित्त-विणयाइसबाहिरब्भिन्तरतवोगुणप्पहाणा, मासाइयाणेगपडिमाधारिणो, विचित्तदव्वाभिग्गहरया, अण्हाण-लोय-लद्धावलद्धवित्तिणो, निप्पडिकम्मसरीरा, समतण-मणिं[1]-लेट्ठु-कञ्चणा, किं बहुणा, अट्ठारससीलङ्गसहस्सधारिणो, उवमाईयविबुहजणपसंसियपसमसुहसमेया, अणेगगामा-ऽऽयर-नगर-पट्टण-मडम्ब-दोणमुह-संनिवेससयसंकुलं विहरिऊण मेइणिं, मिच्छत्त[2]पङ्कमग्गपडिबद्धे य सद्धम्मकहणदिवायरोदएणं बोहिऊण भव्वकमलायरे, महातवचरणपरिकम्मियसरीरा जिणोवइट्ठेण मग्गेण कालमासे कालं काऊण पाओवगमणेण देहं परिच्चयन्ति। तओ अहं पि इयाणिं इमेण चेव विहिणा देहं परिच्चइस्सं ति। पत्तो य भए भवसयसहस्सदुल्लहो, सयललोयालोयदिवायरो, सासयसुहप्पयाणेक्ककप्पपायवो

वैज्ञदेशिते धर्मे कृतानुरागा अगारवासाद् अनगारितां प्रव्रजन्ति। ततश्च प्राणवध-मृषावाद-अदत्ताऽऽदान-मैथुन-परिग्रहविरताः, द्विचत्वारिंशदेषणादोषपरिशुद्धपिण्डग्राहिणः संयोजनादिपञ्चदोषरहितमितकालभोजिनः, पञ्चसमिताः, त्रिगुप्ताः, निरतिचारव्रतपरिपालनार्थमेव ईर्यासमितादिपञ्चविंशतिभावनोपपेताः; अनशन-ऊनोदरिकादि-प्रायश्चित्त-विनयादिसबाह्याऽभ्यन्तरतपोगुणप्रधानाः, मासादिकानेकप्रतिमाधारिणः, विचित्रद्रव्याभिग्रहरताः, अस्नान-लोच-लब्धाऽपलब्धवृत्तयः, निष्प्रतिकर्मशरीराः, समतृण-मणि-लेष्टु-काञ्चनाः, किं बहुना, अष्टादशशीलाङ्गसहस्रधारिणः. उपमातीतविबुधजनप्रशंसितप्रशमसुखसमेताः, अनेकग्रामा-ऽऽकर-नगर-पट्टन-मडम्ब-द्रोणमुख-संनिवेशशतसंकुलां विहृत्य मेदिनीम्, मिथ्यात्वपङ्कमार्गप्रतिबद्धांश्च सद्धर्मकथनदिवाकरोदयेन बोधयित्वा भव्यकमलाकरान्, महातपश्चरणपरिकर्मितशरीराः जिनोपदिष्टेन मार्गेण कालमासे कालं कृत्वा पादपोपगमनेन देहं परित्यजन्ति। ततोऽहमपि इदानीम्-अनेन एव विधिना

---

१ मणिसुत्त० ख। २ मिच्छत्तघण० क ख

सयलतेलोक्कनिरुवमचिन्तामणी, वियडसंसारजलहिपोयभूओ, धम्मसारही, भयवं विजयसेणायरिओ त्ति । अओ पव्वज्जामो धीरपुरिससेवियं कम्मवणदावाणलं एयस्स समीवे महापवज्जं ति । चिन्तिऊण सद्दाविया णेण सुबुद्धिपमुहा मन्तिणो । कहिओ य तेसिं निययाहिप्पाओ । तओ तप्पसङ्गओ चेवोवलद्धजिणवयणसारेहिं भणियं च तेहिं—अहो ! महापुरिससहावाणुरूवं देवेण मन्तियं । खरपवणचालियनलिणजलमज्झगयचन्दबिम्बचञ्चलम्मि जीवलोए किच्चमेयं भवियायं, अहासुहं, मा करेह पडिबन्धं ति । अन्नं च—देव ! को नाम कस्सइ सुहित्तणं पवज्जिऊणं तं पलित्तजालावलीपरिगयाओ गेहाओ निसरन्तं वारेइ ? पलित्तं च सव्वदुक्खजलणेण संसारगेहं ति । ता बहुमयं नाम अम्हाणमेयं देवस्स ववसियं । असमत्था य अम्हे बुद्धिविहवेण भवओ मरणं निवारेउं ति । तओ राइणा एयमायण्णिउण 'एवमेयं' ति, 'को तुब्भे मोत्तूण मम अन्नो हिओ' अहिणन्दिउण सबहुमाणं पहट्ठमुहकमलेणं दवावियं आघोसणा-

---

देहं परित्यक्ष्यामि इति । प्राप्तश्च मया भवशतसहस्रदुर्लभः, सकललोकालोकदिवाकरः, शाश्वतसुखप्रदानैककल्पपादपः, सकलत्रैलोक्यनिरुपमचिन्तामणिः. विकटसंसारजलधिपोतभूतः, धर्मसारथिः, भगवान् विजयसेनाचार्य इति । अतः प्रव्रजामः धीरपुरुषसेवितां कर्मवनदावानलम्—एतस्य समीपे महाप्रव्रज्याम्—इति चिन्तयित्वा शब्दायिताः तेन सुबुद्धिप्रमुखा मन्त्रिणः । कथितश्च तेषां निजकाभिप्रायः । ततः तत्प्रसङ्गतः एव उपलब्धजिनवचनसारैः भणितं च तैः—अहो ! महापुरुषस्वभावानुरुपं देवेन मन्त्रितम् । खरपवनचालितनलिनजलमध्यगतचन्द्रबिम्बचञ्चले जीवलोके कृत्यमेतद् भव्यानाम्, यथासुखम्, मा कुरुत प्रतिबन्धम्—इति । अन्यच्च—देव ! को नाम कस्यचिद् सुधीत्वं प्रपद्य तं प्रदीप्तज्वालावलीपरिगताद् गेहाद् निस्सरन्तं वारयति ? प्रदीप्तं च सर्वदुःखज्वलनेन संसारगेहम्—इति । ततो बहुमत नाम अस्माकम्—एतद् देवस्य व्यवसितम् । असमर्थाश्च वयं बुद्धिविभवेन भवतो मरणं निवारयितुम्—इति । ततो राज्ञा एतद् आकर्ण्य 'एवमेतद्' इति, 'को युष्मान् मुक्त्वा मम अन्यो हितः' अभिनन्द्य सबहुमानं प्रहृष्टमुखकमलेन दापितम्—आघोषणापूर्वकं महा-

पुव्वयं महादानं, काराविया भत्तिविहवाणुरूवा जिणाययणाईसु अट्ठाहिया महिमा, सम्माणिओ य पणइवग्गो, बहुमाणिया पउरजणवया, दिन्नं चन्दसेणाभिहाणस्स जेट्ठपुत्तस्स रज्जं, पडिवन्ना भावओ पव्वज्जा। 'सुए य इओ गमिस्सामि, जत्थ भयवं विजयसेणायरिओ' त्ति चिन्तिऊण ठिओ विवित्तदेसम्मि सव्वराइयं पडिमं। इओ य सो अग्गिसम्मतावसो अपडिक्कन्तो चेव तन्नियाणाओ कालं काऊण विज्जुकुमारेसु दिवड्ढपलिओवमट्ठिई देवो जाओ त्ति। दिन्नो य तेण उवओगो 'किं मए हुयं वा, जट्ठं वा, दाणं वा दिन्नं, जेण मए एसा दिव्वा देवड्ढी पत्त' त्ति। आभोइओ य णेण पुव्वजम्मवुत्तन्तो, कुविओ य उवरिं गुगसेणस्स । विहङ्गेणाहोइऊण आगओ तस्स समीवं। दिट्ठो य णेण पडिमं ठिओ गुणसेणो। तओ य—

पडिमं ठियस्स तेणं विउव्विया कोहमूढहियएण। निरयाणलजलियसिहा (निहा) अइघोरा पंसुवुट्ठि त्ति ॥
तीए य डज्झमाणो अणाउलं गरुयसत्तसंपन्नो। चिन्तेइ भावियमणो धम्मम्मि जिणप्पणीयम्मि ॥

दानम् , कारिता भक्तिविभवानुरूपा जिनायतनादिषु अष्टाह्निका महिमा, सम्मानितश्च प्रणयिवर्गः, बहुमानिताः पौरजानपदाः, दत्तं चन्द्रसेनाभिधानस्य ज्येष्ठपुत्रस्य राज्यम्, प्रतिपन्ना भावतः प्रव्रज्या। 'श्वश्च इतो गमिष्यामि, यत्र भगवान् विजयसेनाचार्यः' इति चिन्तयित्वा स्थितो विविक्तदेशे सर्वरात्रिकीं प्रतिमाम्। इतश्च स अग्निशर्मतापसः अप्रतिक्रान्त एव तन्निदानात् कालं कृत्वा विद्युत्कुमारेषु द्व्यर्धपल्योपमस्थितिर्देवो जात इति। दत्तश्च तेन उपयोगः 'किं मया हुतं वा, इष्टं वा, दानं वा दत्तम्, येन मया एषा दिव्या देवर्धिः प्राप्ता' इति। आभोगितश्च तेन पूर्वजन्मवृत्तान्तः, कुपितश्च उपरि गुणसेनस्य। विभङ्गेन आभोग्य आगतस्तस्य समीपम्। दृष्टश्च तेन प्रतिमां स्थितः गुणसेनः। ततश्च—

प्रतिमां स्थितस्य तेन विकुर्विता क्रोधमूढहृदयेन। निरयानलज्वलितशिखा (निभा) अतिघोरा पांशुवृष्टिरिति ॥

सारीर–माणसेहिं दुक्खेहि अभिद्दुयम्मि संसारे । सुलहमिणं जं दुक्खं दुलहा सद्धम्मपडिवत्ती ॥
धन्नोऽहं जेण मए अणोरपारम्मि भवसमुद्दम्मि । भवसयसहस्सदुलहं लद्धं सद्धम्मरयणमिणं ॥
एयस्स पभावेण पालिज्जन्तस्स सइ पयत्तेणं । जम्मन्तरम्मि जीवा पावन्ति न दुक्खदोगच्चं ॥
ता एसो च्चिय सफलो मज्झमणायरणदोसपरिहीणो । सद्धम्मलाभगरुओ जम्मो णाइम्मि संसारे ॥
विलिहइ य मज्झ हिययम्मि जो कओ तस्स अग्गिसम्मस्स । परिभवकोवुप्पाओ तवइ अकज्जं कयं पच्छा ॥
एण्हिं पुण पडिवन्नो मेत्तिं सव्वेसु चेव जीवेसु । जिणवयणाओ अहयं विसेसओ अग्गिसम्मम्मि ॥
इय सो सुहपरिणामो तेणं विणिवाइओ उ पावेणं । मरिऊणं उववन्नो देवो सोहम्मकप्पम्मि ॥

तया च दह्यमानोऽनाकुलं गुरुकसत्त्वसंपन्नः । चिन्तयति भावितमना धर्मे जिनप्रणीते ॥
शारीर–मानसैर्दुःखैः अभिद्रुते संसारे । सुलभमिदं यद् दुःखं दुर्लभा सद्धर्मप्रतिपत्तिः ॥
धन्योऽहं येन मया अनवरपारे भवसमुद्रे । भवशतसहस्रदुर्लभं लब्धं सद्धर्मरत्नमिदम् ॥
एतस्य प्रभावेण पाल्यमानस्य सदा प्रयत्नेन । जन्मान्तरे जीवाः प्राप्नुवन्ति न दुःखदौर्गत्यम् ॥
तत एतद् एव सफलं मम अनाचरणदोषपरिहीनम् । सद्धर्मलाभगुरुकं जन्म अनादौ संसारे ॥
विलिखति च मम हृदये यः कृतस्तस्य अग्निशर्मणः । परिभवकोपोत्पादः 'तपति अकार्यं कृतं पश्चात्' ॥
इदानीं पुनः प्रतिपन्नो मैत्रीं सर्वेषु एव जीवेषु । जिनवचनाद् अहं विशेषतः अग्निशर्मणि ॥
इतः स शुभपरिणामः तेन विनिपातितस्तु पापेन । मृत्वा उपपन्नो देवः सौधर्मकल्पे ॥

अह सागरोवमाऊ जाओ चन्दाणणे विमाणम्मि । देवाणुप्पत्तिविहिं समासओ एत्थ वुच्छामि ॥
ओहेणं चिय जह ते हवन्ति जं च ऽच्छराइओ तेसिं । निव्वत्तन्तियरे जह परमं देवस्स करणिज्जं ॥
जह मेहा–ऽसणि–तियसिन्दचाव–विज्जूण संभवो होइ । गयणम्मि खणेण तहा देवाण वि होइ उप्पत्ती ॥
सो पुण मोत्तूण इमं देहं विमलम्मि देवसयणिज्जे । निव्वत्तेइ सरीरं दिव्वं अन्तोमुहुत्तेणं ॥
तम्मि समयम्मि तत्थ य गायन्ति मणोहराइ गेयाइं । कुसुमपयरं मुयन्ति य [1]संभमरयं तियसविलयाओ ॥
नच्चन्ति दिव्वविब्भमसंपाइयतियसकोउहल्लाओ । वज्जन्तविविहमणहरतिसरीवीणासणाहाओ ॥
देवा य हरिसियमणा करेन्ति उक्किट्ठसीहनायं च । मुणिऊण तस्स जम्मं सुदुल्लहं सयल[2]भुवणम्मि ॥

अथ सागरोपमायुः जातः चन्द्रानने विमाने । देवानाम्–उत्पत्तिविधिं समासतोऽत्र वक्ष्यामि ॥
ओघेन एव यथा ते भवन्ति यच्च अप्सरआदयस्तेषाम् । निर्वर्तयन्ति इतरे (?) यथा परमं देवस्य करणीयम् ॥
यथा मेघा–ऽशनि–त्रिदशेन्द्रचाप–विद्युतां संभवो भवति । गगने क्षणेन तथा देवानामपि भवति उत्पत्तिः ॥
स पुनः मुक्त्वा इमं देहं विमले देवशयनीये । निर्वर्तयति शरीरं दिव्यम्–अन्तर्मुहूर्तेन ॥
तस्मिन् समये तत्र च गायन्ति मनोहराणि गेयानि । कुसुमप्रकरं मुञ्चन्ति च सभ्रमरकं त्रिदशवनिताः ॥
नृत्यन्ति दिव्यविभ्रमसंपादितत्रिदशकुतूहलाः । वाद्यमानविविधमनोहरत्रिस्वरीवीणासनाथाः ॥
देवाश्च हृष्टमनसः कुर्वन्ति उत्कृष्टसिंहनादं च । ज्ञात्वा तस्य जन्म सुदुर्लभं सकलभुवने ॥

---

[1] ससंभमं ख. । [2] जम्मम्मि क.

इयरो वि य कामगुणे सद्द-प्फास-रस-रूव-गन्धे य । दिव्वे समणुहवन्तो हिट्ठो उट्ठेइ सयराहं ॥
सुरयणनयणाणन्दो दिव्वं देवंसुयं अहिखिवन्तो । भासुरवरबोन्दिधरो संपुण्णो सारयससि व्व ॥
तियसविलयाउ तत्थ य तेहि य लडहाउ महुरवयणेहिं । जय जय जय त्ति नन्दा ! थुणन्ति हिट्ठाउ एएहिं ॥
तियसा वि परमहिट्ठा गण्डयलावडियकुण्डलुज्जोया । सुरतरुकुसुमाहरणा नमन्ति जयसद्दहलबोलं ॥
अह तं दिव्वपरियणं दट्ठूणं लोयणेण संभन्तो । दिन्नं हुयं व किं मे इमं फलं जस्स दिव्वं ति ॥
काऊण य उवओगं दिव्वेणं ओहिणा विसुद्धेणं । मुणिऊण सुचरियं तो करेइ अह देवकरणिज्जं ॥
सासयजिणपडिमाणं पूयं पूयारुहो महारम्मं । पोत्थयरयणं च तहा वाएइ मुहुत्तमेत्तं तु ॥
अह तियससुन्दरीओ निज्जियमुहयन्दचन्दबिम्बाओ । पीणुन्नयसुपसाहियवरथणहरबन्धुरङ्गीओ ॥

इतरोऽपि च कामगुणान् शब्द-स्पर्श-रस-रूप-गन्धान् च । दिव्यान् समनुभवन् हृष्ट उत्तिष्ठति शीघ्रम् ॥
सुरजननयनानन्दः दिव्यं देवांशुकम्-अधिक्षिपन् । भासुरवरशरीरधरः संपूर्णः शारदशशीव ॥
त्रिदशवनितास्तत्र च तैश्च सुन्दरा मधुरवचनैः । जय जय जय इति नन्द ! स्तुवन्ति हृष्टा एतैः ॥
त्रिदशा अपि परमहृष्टा गण्डतलापतितकुण्डलोद्द्योताः । सुरतरुकुसुमाभरणा नमन्ति जयशब्दहलबोलम् ॥
अथ तं दिव्यपरिजनं दृष्ट्वा लोचनेन संभ्रान्तः । दत्तं हुतं वा किं मया इदं फलं यस्य दिव्यमिति ॥
कृत्वा च उपयोगं दिव्येन अवधिना विशुद्धेन । ज्ञात्वा सुचरितं ततः करोति अथ देवकरणीयम् ॥
शाश्वतजिनप्रतिमानां पूजां पूजार्हः महारम्याम् । पुस्तकरत्नं च तथा वाचयति मुहूर्तमात्रं तु ॥

तिवलीतरङ्गभङ्गुरमज्झविरायन्तहाररम्माओ । मुहलरसणाहिणन्दियवित्थिण्णनियम्बबिम्बाओ ॥
तत्ततवणिज्जसंन्निहमणहरथोरोरुजुयलकलियाओ । नहयन्दसमुज्जोवियकुम्मुन्नयचलणसोहाओ ॥
गाढपरिओसपसरियविलाससिङ्गारभावरम्माओ । पेच्छइ समूसियाओ वम्महसरसल्लियमणाओ ॥
किंकरगणे य धणियं अणुरत्ते दिव्वविहवसंपन्ने । तियसभवणाइ पेच्छह सामिय ! इय जंपिरे लडहे ॥ ॥७३॥
तियसविलयाहि समयं जयसद्दपणामियप्पभावाहिं । मोहणवियक्खणाहिं पेच्छइ तो तियसभवणाइं ॥
वित्थिण्णमरगयसिलासंचयसंजणियवियडपीढाइं । मणिरयणखइयमणहरफलिहामणिभित्तिजुत्ताइं ॥
वेरुलियखम्भविरइयविचित्तवरसालिभञ्जियसयाइं । तह दिव्वखग्गचामरपज्जुत्तकुडन्तरालाइं ॥

अथ त्रिदशसुन्दर्यः निर्जितमुखचन्द्रचन्द्रबिम्बाः । पीनोन्नतसुप्रसाधितवरस्तनभरबन्धुराङ्ग्यः ॥
त्रिवलीतरङ्गभङ्गुरमध्यविराजद्धाररम्याः । मुखररसना(मेखला)ऽभिनन्दितविस्तीर्णनितम्बबिम्बाः ॥
तप्ततपनीयसंनिभमनोहरस्थूलोरुयुगलकलिताः । नखचन्द्रसमुद्द्योतितकूर्मोन्नतचरणशोभाः ॥
गाढपरितोषप्रसृतविलासशृङ्गारभावरम्याः । प्रेक्षते समुच्छ्रिता मन्मथशरशल्यितमनसः ॥
किंकरगणांश्च गाढम्–अनुरक्तान् दिव्यविभवसंपन्नान् । त्रिदशभवनानि प्रेक्षध्वं स्वामिक ! इति जल्पाकान् सुन्दरान् ॥
त्रिदशवनिताभिः समकं जयशब्दप्रणामितप्रभावाभिः । मोहनविचक्षणाभिः प्रेक्षते ततः त्रिदशभवनानि ॥
विस्तीर्णमरकतशिलासंचयसंजनितविकटपीठानि । मणिरत्नखचितमनोहरस्फटिकमणिभित्तियुक्तानि ॥
वैडूर्यस्तम्भविरचितविचित्रवरशालभञ्जिकाशतानि । तथा दिव्यखड्गचामरप्रयुक्तकुटान्तरालानि ॥

वरविविहदेवच्छन्दयविरइयपल्लङ्कसयसनाहाइं । परिलम्बियपट्टंसुयमुत्तावलिजणियसोहाइं ॥
तियसतरुकुसुममण्डियकुट्टिमसंकन्तभमरवन्द्राइं । धूवघडियाउलाइं परिलम्बियरयणदामाइं ॥
अह तेसु तियससुन्दरिनिवहेण समं पुरा सुकयपुण्णो । चिट्ठइ परितुट्ठमणो भुञ्जन्तो दिव्ववरभोए ॥
भुञ्जिंसु[1] सो वि दिव्वे भोए चन्दाणणे विमाणम्मि । सुरसुन्दरीहिं सद्धिं जहिच्छिए सागरमणूणं ॥ ॥७४॥

याकिनीमहत्तरासूनु–परमगुणानुरागि–भगवत्–श्रीहरिभद्रसूरिवररचितायां 'समराइच्चकहाए' पढमो भवो सम्मत्तो ।

वरविविधदेवच्छन्दकविरचितपल्यङ्कशतसनाथानि। परिलम्बितपट्टांशुकमुक्तावलिजनितशोभानि ॥
त्रिदशतरुकुसुममण्डितकुट्टिमसंक्रान्तभ्रमरवृन्दानि। धूपघटिकाकुलानि परिलम्बितरत्नदामानि ॥
अथ तेषु त्रिदशसुन्दरीनिवहेन समं पुरा सुकृतपूर्णः(पुण्यः)। तिष्ठति परितुष्टमना भुञ्जानो दिव्यवरभोगान् ॥
अभुक्त सोऽपि दिव्यान् भोगान् चन्द्रानने विमाने। सुरसुन्दरीभिः सार्धं यथेच्छितान् सागरमनूनम् ॥

---

[1] भुञ्जितु क.

* * *

बीओ भवो ।

गुणसेण–अग्गिसम्मा जं भणियमिहासि तं गयमियाणिं । सीहा–णन्दा य तहा जं भणियं तं निसामेह ॥

अत्थि इहेव जम्बुद्दीवे दीवे अवरविदेहे खेत्ते अपरिमियगुणनिहाणं तियसपुरवराणुगारि उज्जाणारामभूसियं समत्थमेइणितिलयभूयं जयउरं नाम नयरं ति । जत्थ सुरूवो उज्जलनेवत्थो कलावियक्खणो लज्जालुओ महिलायणो, जत्थ य परदारपरिभोयम्मि किलीवो, परच्छिद्दावलोयणम्मि अन्धो, परावयायभासणम्मि मूओ, परदव्वावहरणम्मि संकुचियहत्थो, परोवयारकरणेक्कतल्लिच्छो पुरिसवग्गो । तत्थ य निसियनिक्कड्ढियासिनिद्दलियदरियरिउहत्थिमत्थउच्छलियबहलरुहिरारत्तमुत्ताहलकुसुमपयरच्चियसमरभूमिभाओ राया नामेण पुरिसदत्तो त्ति । देवी य से सयलन्तेउरप्पहाणा सिरिकन्ता नाम । सो इमाए सह निरुवमे भोए भुञ्जिसु । इओ य सो चन्दाणवि-

---

गुणसेना-ऽग्निशर्माणौ यद् भणितमिहासीत् तद् गतमिदानीम् । सिंहा-ऽऽनन्दौ च तथा यद् भणितं यद् निशम्यताम् ।

अस्ति इहैव जंबुद्वीपे द्वीपे अपरविदेहे क्षेत्रे अपरिमितगुणनिधानं त्रिदशपुरवरानुकारि उद्यानारामभूषितं समस्तमेदिनीतिलकभूतं जयपुरं नाम नगरमिति। यत्र सुरूप उज्ज्वलनेपथ्यः कलाविचक्षणो लज्जालुर्महिलाजनः, यत्र च परदारपरिभोगे क्लीबः, परच्छिद्रावलोकने अन्धः, परापवादभाषणे मूकः, परद्रव्यापहरणे संकुचितहस्तः, परोपकारकरणैकतल्लिप्सः पुरुषवर्गः। तत्र च निशीतनिष्कासितासिनिर्दलितदृप्तरिपुहस्तिमस्तकोच्छलितबहलरुधिरारक्तमुक्ताफलकुसुमप्रकरार्चितसमरभूमिभागो राजा नाम्ना पुरुषदत्त इति। देवी च तस्य सकलान्तःपुरप्रधाना श्रीकान्ता नाम। सोऽनया सह निरुपमान् भोगानभुङ्क्त। इतश्च स चन्द्राननविमानाधिपतिर्देवो यथायुः पालयित्वा ततश्च्युतः

माणाहिवई देवो अहाउयं पालिऊण तओ चुओ सिरिकन्ताए गब्भे उववन्नो त्ति। दिट्ठो य णाए सुविणयम्मि तीए चेव रयणीए निद्धूमसिहिसिहाजालसरिसकेसरसडाभारभासुरो विमलफलिह-मणिसिला-निहस-हंस-हारधवलो आपिङ्गलवट्टसुपसन्तलोयणो मियङ्कलेहासरिसनिग्गयदाढो पिहुलमणहरवच्छत्थलो अइतणुयमज्झभाओ सुवट्टियकढिणकडियडो आवलियदीहलङ्गूलो सुपइट्ठिओरुसंठाणो किं बहुणा, सव्वङ्गसुन्दराहिरामो सीहकिसोरगो वयणेणमुयरं पविसमाणो त्ति। पासिऊण य तं सुहविउद्धाए जहाविहिणा सिट्ठो दइयस्स। तेण भणियं–अणेयसामन्तपणिवइयचलणजुयलो महारायसद्दस्स निवासट्ठाणं पुत्तो ते भविस्सइ। तो सा तं पडिसुणेऊण जहासुहं चिट्ठइ। पत्ते य उचियकाले महापुरिसगब्भाणुभावेण जाओ से दोहलो। जहा–देमि सव्वसत्ताणमभयदाणं, दीणाणाहकिवणाणं च इस्सरियसंपयं, जइजणाणं च उवट्ठम्भदाणं, सव्वाययणाणं च करेमि पूयं ति। निवेइओ य इमो तीए भत्तारस्स। अब्भहियजायहरिसेणं संपाडिओ य तेणं। तस्स संपायणेण जाओ महापमोओ जणवयाणं। अवि य–

श्रीकान्ताया गर्भे उत्पन्न इति। दृष्टश्चानया (तया) स्वप्ने तस्यामेव रजन्यां निर्धूमशिखिशिखाजालसदृशकेसरसटाभारभासुरो विमलस्फटिक-मणिशिला-निकष-हंस-हारधवल आपिङ्गलसुप्रशान्तलोचनो मृगाङ्कलेखासदृशनिर्गतदाढः पृथुलमनोहरवक्षःस्थलो अतितनुकमध्यभागः सुवर्तितकठिनकटितट आवलितदीर्घलाङ्गूलः सुप्रतिष्ठितोरुसंस्थानः, किं बहुना, सर्वाङ्गसुन्दराभिरामः सिंहकिशोरको वदनेनोदरं प्रविशन्निति। दृष्ट्वा च तं सुखविबुद्धया यथाविधिना शिष्टो दयितस्य। तेन भणितम्–अनेकसामन्तप्रणिपतितचरणयुगलो महाराजशब्दस्य निवासस्थानं पुत्रस्ते भविष्यति। ततः सा तं प्रतिश्रुत्य यथासुखं तिष्ठति। प्राप्ते चोचितकाले महापुरुषगर्भानुभावेन जातः तस्या दोहदः। यथा–ददामि सर्वसत्त्वानामभयदानम्, दीनानाथकृपणानां च ऐश्वर्यसंपदम्, यतिजनानां च उपष्टम्भदानम्, सर्वायतनानां च करोमि पूजामिति। निवेदितश्चायं तया भर्त्रे। अभ्यधिकजातहर्षेण संपादितस्तेन। तस्य संपादनेन जातो महाप्रमोदो जनपदा-

सव्व च्चिय धन्नाणं होइ अवत्था परोवयाराए। बालससिस्स व उदओ जणस्स भुवणं पयासेइ ॥

तओ जहासुहेण धम्मनिरयाए पयोवयारसंपायणेणं सुलद्धजम्माए अइक्कन्ता नव मासा अद्धट्ठमराइन्दिया। तओ पसत्थे तिहि-करण-मुहुत्त-जोए सुकुमालपाणि-पायं सयलजणमणोरहेहिं देवी सिरिकन्ता दारयं पसूय त्ति। निवेइओ रन्नो सुहंकरियाभिहाणाए दासियाए पुत्तजम्मो। परितुट्ठो राया, दिन्नं च तीए पारिओसियं। काराविय़ं च बन्धणमोयणाइयं करणिज्जं, पवत्तो य नयरे महाणन्दो, सोहाविया नयरिमग्गा, पसमाविओ रयो कुङ्कुमजलेणं, विप्पइण्णाइं रुण्टन्तमहुयरसणाहाइं विचित्तकुसुमाइं, कयाओ हट्टभवणसोहाओ, पहभवणेसु समाहयाइं मङ्गलतूराइं, सहरिसं च नच्चियं रायजणनागरेहिं ति। एवं च पइदिणं महामहन्तमाणन्दसोक्खमणुहवन्ताणं अइक्कन्तो पढममासो। पइट्ठावियं च से नामं बालस्स सुविणयदंसणनिमित्तेणं सीहो त्ति। सो य विसिट्ठं पुण्णफलमणुहवन्तो अभग्ग(ज्ज)माणपसरं पणईणं मणोरहेहिं पयाण पुण्णेण—

नाम्। अपि च—

सर्वा एव धन्यानां भवति अवस्था परोपकाराय। बालशशिन इवोदयो जनस्य भुवनं प्रकाशयति ॥

ततो यथासुखं धर्मनिरतया परोपकारसंपादनेन सुलब्धजन्मकया अतिक्रान्ता नव मासा अर्द्धाष्टमरात्रिदिवाः। ततः प्रशस्ते तिथि-करण-मुहूर्त-योगे सुकुमारपाणि-पादं सकलजनमनोरथैः देवी श्रीकान्ता दारकं प्रसूतेति। निवेदितं राज्ञः शुभंकरीकाभिधानया दास्या पुत्रजन्म। परितुष्टो राजा, दत्तं च तस्यै पारितोषिकम्। कारितं च बन्धनमोचनादिकं करणीयम्, प्रवृत्तश्च नगरे महानन्दः, शोभिता नगरीमार्गाः, प्रशमितं रजः कुङ्कुमजलेन, विप्रकीर्णानि रवन्मधुकरसनाथानि विचित्रकुसुमानि, कृताः हट्टभवनशोभाः, पथभवनेषु समाहतानि मङ्गलतूर्याणि, सहर्षं च नर्तितं राजजननागरैरिति। एवं च प्रतिदिनं महामहद् आनन्दसौख्यमनुभवतोरतिक्रान्तः प्रथममासः।

जोव्वणमणुवमसोहं कलाकलावपरिवड्ढियच्छायं । जणमणनयणाणन्दं चन्दो व्व कमेण संपत्तो ॥

अन्नया य संपत्तजोव्वणस्स कुसुमचावस्स वि हिययाणुकूलो तरुणजणहिययाणन्दयारी आगओ वसन्तसमओ । जत्थ सविसेसं कुसममयकोदण्डमण्डलीसंधियसिलीमुहो रइं दंसिऊण जणहिययाइं विंधिउं पयत्तो मयणो । अणन्तरं च तस्स चेव जयजयसद्दो व्व कोइलाहिं कओ कोलाहलो, विरहग्गिडज्झन्तपहियसंघायधूमपडलं व वियम्भियं सहयारेसु भमरजालं, गयवइयामसाणजलणेहि विव पलित्तं दिसामण्डलं किंसुयकुसुमेहिं ति । तओ एवंविहे वसन्तससए सो सीहकुमारो अणेयतरुणजणवेढिओ महाविभूईए केलिनिमित्तं गओ पमुइयपरहुयासद्दजणियतरुणीजणचित्तविब्भमुल्लोलं सुरहिमलयपवणपणच्चावियकुसुमभरभज्जमाणलयाविडविजालं मयमुइयमुहलमहुयरकुलोवगीयमाणग्गसोहं वासहरं पिव वसन्तलच्छीए कीलासुन्दरं नाम उज्जाणं, पवत्तो य कीलिउं विचित्तकीलाहिं ति । दिट्ठा

प्रतिष्ठापितं च तस्य नाम बालस्य स्वप्नकदर्शननिमित्तेन सिंह इति । स च विशिष्टं पुण्यफलमनुभवन् अभग्न(ज्य)मानप्रसरं प्रणयिनां मनोरथैः प्रजानां पुण्येन—

यौवनमनुपमशोभं कलाकलापपरिवर्धितजनमनोनयनानन्दं चन्द्र इव क्रमेण संप्राप्तः ॥

अन्यदा च संप्राप्तयौवनस्य कुसुमचापस्यापि हृदयानुकूलः तरुणजनहृदयानन्दकारी आगतो वसन्तसमयः । यत्र सविवेशं कुसुममयकोदण्डमण्डलीसंधितशिलीमुखो रतिं दर्शयित्वा जनहृदयानि व्यद्धुं प्रवृत्तो मदनः । अनन्तरं च तस्यैव जयजयशब्द इव कोकिलाभिः कृतः कोलाहलः, विरहाग्निदह्यमानपथिकसंघातधूमपटलमिव विजृम्भितं सहकारेषु भ्रमरजालम् , गतपतिकाश्मशानज्वलनैरिव प्रदीप्तं दिग्मण्डलं किंशुककुसुमैरिति । तत एवंविधे वसन्तसमये स सिंहकुमारोऽनेकतरुणजनवेष्टितो महाविभूत्या केलिनिमित्तं गतः प्रमुदितपरभृताशब्दजनिततरुणीजनचित्तविभ्रमोल्लोलं सुरभिमलयपवनप्रनर्तितकुसुमभरभज्यमानलताविटपिजालं मदमुदितमुखरमधुकरकुलोपगी-

य तेण तत्थ उज्जाणे नाइदूरदेससंठिया कुसुमपरिमलसुयन्धवेणिमहुयरावली विद्दुमलयायम्बहत्थपल्लवा उव्वेल्लन्तकोमलतणुबाहुलया रम्भाखम्भमणहरोरुजुयला थलकमलारत्तकोमलचलणजुयला उज्जाणदेवय व्व उउलच्छिपरियरिया नियमाउलगस्स चेव महासामन्तस्स लच्छिकन्ताभिहाणस्स धूया सहियणसहिया वसन्तकीलमणुहवन्ती कुसुमावली नाम कन्नगा । तओ तं दट्ठूणमणन्तभवब्भत्थरागदोसेण साहिलासं पुलोइया । दिट्ठो य एसो वि तीए तओ विभागाओ तस्स भमेण चेव तुरियतुरियमोसरन्तीए कुसुमावलीए । चिन्तियमिमीए—कहं कीलासुन्दरुज्जाणस्स रम्मयाए भयवं मयरद्धओ वि एत्थेव कीलासुहमणुहवइ त्ति । एत्थन्तरम्मि भणिया पियंकराभिहाणाए चेडीए । सामिणि ! अलं अलमोसक्कणेण; एसो खु राइणो पुरिसदत्तस्स पुत्तो तुह चेव पिउच्छागब्भसंभवो सीहो नाम कुमारो त्ति । पढमागमणकयपरिग्गहं च सामिणिं एवमोसक्कमाणिं पेच्छिय मा अदक्खिण्णं ति संभाविस्सइ । ता चिट्ठियउ इहं, कीरउ

यमानाग्रशोभं वासगृहमिव वसन्तलक्ष्म्याः क्रीडासुन्दरं नामोद्यानम्, प्रवृत्तश्च क्रीडितुं विचित्रक्रीड़ाभिरिति । दृष्टा च तेन तत्रोद्याने नातिदूरदेशसंस्थिता कुसुमपरिमलसुगन्धवेणीमधुकरावली विद्रुमलताताम्रहस्तपल्लवा उद्वेल्लत्कोमलतनुबाहुलता रम्भास्तम्भमनोहरोरुयुगला स्थलकमलारक्तकोमलचरणयुगला उद्यानदेवता इव ऋतुलक्ष्मीपरिचरिता निजमातुलकस्यैव महासामन्तस्य लक्ष्मोकान्ताभिधानस्य दुहिता सखीजनसहिता वसन्तक्रीडामनुभवन्ती कुसुमावली नाम कन्यका । ततस्तां दृष्ट्वा अनन्तभवाभ्यस्तरागदोषेण साभिलाषं दृष्टा । दृष्टश्च एषोऽपि तया ततो विभागात् तस्य भ्रमेणैव त्वरितत्वरितमपसरन्त्या कुसुमावल्या । चिन्तितमनया—कथं क्रीडासुन्दरोद्यानस्य रम्यतया भगवान् मकरध्वजोऽपि अत्रैव क्रीडासुखमनुभवतीति । अत्रान्तरे भणिता प्रियङ्कराभिधानया चेट्या । स्वामिनि ! अलं अलमवष्वस्कनेन (अपसरणेन); एषः खलु राज्ञः पुरुषदत्तस्य पुत्रः तवैव पितृष्वसृगर्भसंभवः सिंहो नाम कुमार इति । प्रथमागमनकृतपरिग्रहां च स्वामिनीं एवमवष्वस्कन्तीं (अपसरन्तीं) दृष्ट्वा मा अदाक्षिण्यमिति संभावयिष्यति । तावत् तिष्ठतु इह, क्रियतामस्य महा-

इमस्स महाणुभावस्स रायकन्नोचिओ उवयारो। तओ हरिसवसपुलइयङ्गीए सविब्भमं साहिलासं च अवलोइऊण कुमारं भणियं इमीए। हला! पियंकरिए! तुमं चेवऽत्थ कुसला; ता निवेएहि, किं मए एयस्स कायव्वं ति। तीए भणियं–सामिणि! पढमागयाओ अम्हे; ता अलंकरावीयउ आसणपरिग्गहेणं इमं पएसं एसो, कीरउ से सज्जणजणाण सम्बन्धपायवबीयभूयं सागयं, दिज्जउ से सहत्थेण कालोचियं वसन्तकुसुमाभरणसणाहं तम्बोलं ति। कुसुमावलीए भणियं–हला! न सक्कुणोमि अइसज्झसेण इमं एयस्स काउं; ता तुमं चेव एत्थ कालोचियं करेहि त्ति। एत्थन्तरम्मि य पत्तो तमुद्देसं कुमारो। तओ सज्जिऊणासणं भणिओ पियंकरीए–'सागयं रइविरहियस्स कुसुमचावस्स, इह उवविसउ महाणुभावो'। तओ सो सपरिओसं ईसि विहसिऊण 'आसि य अहं एत्तियं कालं रइविरहिओ, न उण संपयं' ति भणिऊणमुवविट्ठो। उवणीयं च पियंकरियाए माहवीकुसुममालासणाहं कलधोयमयतलियाए तम्बोलं, गहियं च तेण। एत्थन्तरम्मि य आगओ कुसुमावलीजणणीए आहवणनिमित्तं पेसिओ संभरायणो नाम कन्नन्तेउरमहल्लगो। दिट्ठा य

नुभावस्य राजकन्योचितोपचारः। ततो हर्षवशपुलकिताङ्ग्या सविभ्रमं साभिलाषं च अवलोक्य कुमारं भणितमनया। सखि! प्रियङ्करिके! त्वमेवात्र कुशला; तावत् निवेदय, किं मया एतस्य कर्तव्यमिति। तया भणितम्–स्वामिनि! प्रथमागता वयं; तस्माद् अलंकार्यतामासनपरिग्रहेण इमं प्रदेशं एषः, क्रियतां तस्य सज्जनजनानां संवन्धपादपबीजभूतं स्वागतम्, दीयतां तस्य स्वहस्तेन कालोचितं वसन्तकुसुमाभरणसनाथं ताम्बूलमिति। कुसुमावल्या भणितम्–सखि! न शक्नोमि अतिसाध्वसेनेदमेतस्य कर्त्तुम्; तस्मात् त्वमेवात्र कालोचितं कुरु इति। अत्रान्तरे च प्राप्तस्तमुद्देशं कुमारः। ततः सज्जित्वाऽऽसनं भणितः प्रियङ्कर्या–'स्वागतं रतिविरहितस्य कुसुमचापस्य, इह उपविशतु महानुभावः'। ततः स सपरितोषं ईषद् विहस्य 'आसं चाहं एतावन्तं कालं रतिविरहितो, न पुनः साम्प्रतम्' इति भणित्वोपविष्टः। उपनीतं च प्रियङ्कर्या माधवीकुसुममालासनाथं कलधौतमयतलिकायां (सुवर्णमयभाजनविशेषे) ताम्बूलम्, गृहीतं

तेण साणुरायं अपेच्छन्तमद्धच्छिपेच्छिएहिं कुमारमवलोएन्ती कुसुमावली। चिन्तियं च णेण। समागओ मयणो रईए, जइ विही अणुवत्तिस्सइ। तओ पच्चासन्नमागन्तूण कुमारमहिणन्दिय भणियं संभरायणेणं। वच्छे! कुसुमावलि! देवी मुत्तावली आणवेइ 'अइचिरं कीलियं, मा सरीरखेदो ते भविस्सइ; ता लहुं आगन्तव्वं' ति। तओ सा 'जं अम्मा आणवेइ' त्ति भणिऊण ससंभमं कुमारमवलोएन्ती निग्गया उज्जाणाओ, पत्ता य कुमारं चेव चिन्तयन्ती निययगेहं। तओ देविं पणमिऊणमारूढा दन्तवलहियं। तओ कुमारं चेव अणुसरन्ती विमुक्कदीहनीसासा समुवविट्ठा पल्लङ्कसयणिज्जे; विसज्जिओ य तीए संमाणिउं सहीसत्थो।

अह सेविउं पयत्ता सेज्जं अणवरयमुक्कनीसासा। मयणसरसल्लियमणा नियकज्जनियत्तवावारा॥
नालिहइ चित्तयम्मं न यऽङ्गरायं करेइ करणिज्जं। नाहिलसइ आहारं अहिणन्दइ नेय नियभवणं॥

च तेन। अत्रान्तरे च आगतः कुसुमावलीजनन्या आह्वाननिमित्तं प्रेषितः संभरायणो नाम कन्यान्तःपुरमहत्तकः (कञ्चुकी)। दृष्टा च तेन सानुरागमपश्यन्तमर्द्धाक्षिप्रेक्षितैः कुमारमवलोकयन्ती कुसुमावली। चिन्तितं च तेन। समागतो मदनो रत्या, यदि विधिरनुवर्तिष्यते। ततः प्रत्यासन्नमागत्य कुमारमभिनन्द्य भणितं संभरायणेन। वत्से! कुसुमावलि! देवी मुक्तावली आज्ञापयति 'अतिचिरं क्रीडितं, मा शरीरखेदो ते भविष्यति; तस्माद् लघु आगन्तव्यम्' इति। ततः सा 'यदम्बा आज्ञापयति' इति भणित्वा ससंभ्रमं कुमारमवलोकयन्ती निर्गता उद्यानात्, प्राप्ता च कुमारमेव चिन्तयन्ती निजकगेहम्। ततो देवीं प्रणम्यारूढा दन्तवलभिकाम्। ततः कुमारमेवानुसरन्ती विमुक्तदीर्घनिःश्वासा समुपविष्टा पल्यङ्कशयनीये; विसर्ज्जितश्च तया संमान्य सखीसार्थः।

अथ सेवितुं प्रवृत्ता शय्यां अनवरतमुक्तनिःश्वासा। मदनशरशल्यितमनाः निजकार्यनिवृत्तव्यापारा॥
नालिखति चित्रकर्म न चाङ्गरागं करोति करणीयम्। नाभिलषति आहारम् अभिनन्दति नैव निजभवनम्॥

चिरपरिचियं पि पाढेइ नेय सुय-सारियाण संघायं । कीलावेइ मणहरे चडुले न य भवणकलहंसे ॥
विहरइ न हम्मियतले मज्जइ न य गेहदीहियाए उ । सारेइ नेय वीणं पत्तच्छेज्जं पि न करेइ ॥
न य कन्दुएण कीलइ बहु मन्नइ नेय भूसणकलावं । हरिणि व्व जूहभट्ठा अणुसरमाणी तयं चेव ॥
खणरुद्धनयणपसरा अवसा खणधरियदीहनीसासा । खणरुद्धदेहचेट्ठा खणजंपिरवाय(मिलाग)मुहकमला ॥
एत्थन्तरम्मि तीसे धावीए नियसुया समाणत्ता । नामेण मयणलेहा बीयं हिययं व जा तीए ॥

जहा-कीलासुन्दरुज्जाणगमणकीलाए दढं परिस्सन्ता कुसुमावली, लहुं च तीए अज्ज विसज्जियाओ सहीओ; ता गिण्हिऊण पविरलजलसित्तं तालियण्टं बन्धेऊण कइवयकप्पूरवीडगाणि उवसप्पाहि एयं ति । समाएसाणन्तरं च संपाइयजणणिवयणा रसन्तमणिनेउरा पत्ता कुसुमावलीसमीवं सहरिसा मयणलेहा । दिट्ठा य तीए वरसयणीयमज्झगया गुरुचिन्ताभरनीसहं अङ्गं वहन्ती कुसुमावलि

चिरपरिचितमपि पाठयति नैव शुक-सारिकानां संघातम् । क्रीडयति मनोहरान् चटुलान् न च भवनकलहंसान् ॥
विहरति न हर्म्यतले मज्जति न च गेहदीर्घिकायां तु । सारयति नैव वीणां पत्रच्छेद्यमपि न करोति ॥
न च कन्दुकेन क्रीडति वहु मन्यते नव भूषणकलापम् । हरिणीव यूथभ्रष्टा अनुस्मरन्ती तं चैव ॥
क्षणरुद्धनयनप्रसरा अवशा क्षणधृतदीर्घनिःश्वासा । क्षणरुद्धदेहचेष्टा क्षणकथयितृम्लानमुखकमला ॥
अत्रान्तरे तस्या धात्र्या निजसुता समाज्ञप्ता । नाम्ना मदनलेखा द्वितीयं हृदयं वा या तस्याः ॥

यथा—क्रीडासुन्दरोद्यानगमनक्रीडया दृढं परिश्रान्ता कुसुमावली, लघु च तयाऽद्य विसर्जिताः सख्यः; तस्मात् गृहीत्वा प्रविरलजलसिक्तं तालवृन्तं वद्ध्वा कतिपयकर्पूरवीटकानि उपसर्प एतामिति । समादेशानन्तरं च संपादितजननीवचना रसन्मणिनूपुरा प्राप्ता

त्ति। तओ अणालवणमुणियसुन्नभावाए विन्नत्ता मयणलेहाए। सामिणि ! किमेवमुव्विग्गा विय लक्खीयसि, किन्न संपन्ना ते गुरुदेवयाणं पूया ? किन्न सम्माणियाओ सहीओ ? किन्न कया अत्थिजणपडिवत्ती ? किन्न गहिओ कलाकलावो ? किन्न परितुट्ठो ते गुरुयणो ? किन्न विणीओ ते परिवारो ? किन्नाणुरत्तो सहीसत्थो ? किन्न संजायइ ते समीहियं ति ? आणवेउ सामिणी, जइ अकहणीयं न होइ। तओ कुसुमावलीए ससंभमं[1] सहत्थेण अलए संजमेऊण भणियं। अत्थि पियसहीए वि नाम अकहणीयं। ता सुण–कुसुमावचयपरिस्समेण मे जरकला विय संवुत्ता, तज्जणिओ य परिपीडेइ मं परियावाणलो, तन्निमित्ता य वियम्भइ अङ्गेसु अरई, न उण किंचि अन्नं उव्वेयकारणं लक्खेमि त्ति। मयणलेहाए भणियं–जइ एवं, ता गेण्ह कप्पूरवीडगाणि, परिवीएमि ते कीलाखेयनीसहं अङ्गं। कुसुमावलीए भणियं–किं मे एयावत्थं गयाए कप्पूरवीडएहिं, अलं च परिवीइएण। एहि गच्छामो बालकयलीहरयं।

कुसुमावलीसमीपं सहर्षा मदनलेखा। दृष्टा च तया वरशयनीयमध्यगता गुरुचिन्ताभरनिःसहमङ्गं वहन्ती कुसुमावली इति। ततोऽनालपनज्ञातशून्यभावया विज्ञप्ता मदनलेखया। स्वामिनि ! किमेवं उद्विग्ना इव लक्ष्यसे, किं न संपन्ना ते गुरुजनदेवतानां पूजा ? किं न संमानिताः सख्यः ? किं न कृता अर्थिजनप्रतिपत्तिः ? किं न गृहीतः कलाकलापः ? किं न परितुष्टस्ते गुरुजनः ? किं न विनीतस्ते परिवारः ? किं नानुरक्तः सखीसार्थः ? किं न संजायते ते समीहितम्–इति। आज्ञापयतु स्वामिनी, यद्यकथनीयं न भवति। ततः कुसुमावल्या ससंभ्रमं स्वहस्तेनालकान् संयम्य भणितम्। अस्ति प्रियसख्या अपि नाम अकथनीयम्। तावत् श्रृणु–कुसुमावचायपरिश्रमेण मे ज्वरकला इव संवृत्ता, तज्जनितश्च परिपीडयति मां परितापानलः, तन्निमित्ता च विजृम्भते अङ्गेषु अरतिः, न पुनः किञ्चिद् अन्यद् उद्वेगकारणं लक्षयामि इति। मदनलेखया भणितम्–यद्येवं, तस्माद् गृहाण तावत् कर्पूरवीटकानि, परिवीजयामि ते

---

[1] ससंभमं से क.

तत्थ सज्जीकरेहि मे अत्थुरणं, जेण तहिं गयाए अवेइ एसो परियावाणलो त्ति । तओ मयणलेहाए भणियं । जं सामिणी आणवेइ । गयाओ य सभवणुज्जाणतिलयभूयं बालकयलीहरयं । सज्जीकयं च से मयणलेहाए सुन्दरमत्थुरणं । निवन्ना य तत्थ कुसुमावली । समप्पियाणि से कप्पूरवीडयाणि । वीसम्भकहालावजणियपरिओसं च तालियण्टेण वीइउमारद्धा मयणलेहा । कुसुमावली पुण अयण्डदिन्नसुन्नहुंकारा निहुयमुक्कनीसासं तं चेव हिययसल्लभूयं पुणो पुणो अणुसरन्ती चिट्ठइ । तओ मयणलेहाए चिन्तियं—किं पुण इमीए इमस्स अन्नहावियारभावस्स कारणं ति । पुच्छिया य तीए । सामिणि ! पत्ते इमम्मि तरुणजणविब्भमुल्लोलसागरे वसन्तसमए किं तुमए अज्ज कीलासुन्दरं गच्छन्तीए गयाए वा तत्थ अच्छरियं दिट्ठं ति । तओ मयणावत्थासहावओ चेव वामत्तणेणं मयणस्स अणभिप्पेयं पि भणियं कुसुमावलीए—सहि ! दिट्ठो मए कीलासुन्दरुज्जाणम्मि रइविरहिओ विव कुसुमाउहो, रोहिणीविओइओ विव

क्रीडाखेदनिःसहमङ्गम् । कुसुमावल्या भणितम्—किं मे एतदवस्थां गतायाः कर्पूरवीटकैः, अलं च परिवीजितेन । एहि गच्छामो बालकदलीगृहकम् । तत्र सज्जीकुरु मे आस्तरणम्, येन तस्मिन् गताया अपैति एष परितापानल इति । ततो मदनलेखया भणितम्—यत् स्वामिनी आज्ञापयति । गताश्च स्वभवनोद्यानतिलकभूतं बालकदलीगृहकम् । सज्जीकृतं च तस्या मदनलेखया सुन्दरमास्तरणम् । निपन्ना (सुप्ता) च तत्र कुसुमावली । समर्पितानि च तस्याः कर्पूरवीटकानि । विश्रम्भकथाऽऽलापजनितपरितोषां च तालवृन्तेन वीजितुमारब्धा मदनलेखा । कुसुमावली पुनरकाण्डदत्तशून्यहुंकारा निभृतमुक्तनिःश्वासं च तमेव हृदयशल्यभूतं पुनः पुनरनुस्मरन्ती तिष्ठति । ततो मदनलेखया चिन्तितम्—किं पुनरस्या अस्य अन्यथाविकारभावस्य कारणम्—इति । पृष्टा च तया । स्वामिनि ! प्राप्तेऽस्मिन् तरुणजनविभ्रमोल्लोलसागरे वसन्तसमये किं त्वया अद्य क्रीडासुन्दरं गच्छन्त्या गतया वा तत्राश्चर्यं दृष्टम्—इति । ततो मदनावस्थास्वभावत एव वामत्वेन मदनस्य अनभिप्रेतमपि भणितं कुसुमावल्या—सखि ! दृष्टो मया क्रीडासुन्दरोद्याने रतिविरहित इव कुसुमायुधः, रोहिणी-

मयलञ्छणो, परिचत्तमइरो विव कामपालो, सचीविउत्तो विव पुरन्दरो, तवियतवणिज्जसरिसवण्णो नहमऊहमञ्जरियचलणङ्गुलिविभाओ, सुनिगूढसिरासंधाणो अणुबद्धपिण्डियाभाओ, मणहरमऊरजङ्घो, अन्तोनिगूढजाणुसंधाणो, मयरवयणागारजाणुमत्थओ, अइसुन्दरसुसंगयोरुजुयलो, विउलकडियडाभोओ, मणहरतणुमज्झभाओ, पीणवित्थिण्णवच्छत्थलो, उन्नयसिहर[1]परिवट्टुलबाहुजुयलो, अणुव्वणकोप्परविभाओ, पीणपकोट्ठदेसो, आजाणुलम्बियपसत्थलेहाविभूसियकरयलो, आयम्बतलिणकररुहो, सुसमाउत्ताहरपुडो, समसुसंगयधवलदसणो, आरत्ततिभागदीहविसाललोयणो, उत्तुङ्गनासियावंसो, विउलनिडालवट्टो, सुसमाउत्तकण्णपासो, कसिणसुसिणिद्धकुडिलकुन्तलभारो, चन्दणकयङ्गराओ, विमलदुगुल्लनियंसणो, महल्लमुत्ताहलमालाविहूसियसिरोहरो, विमलचूडारयणपसाहियउत्तिमङ्गो, किं बहुणा जंपिएण—रूवं पिव रूवस्स, लावण्णं पिव लायण्णस्स, सुन्देरं पिव सुन्देरस्स, जोव्वणं पिव जोव्वणस्स, मणोरहो विय

वियोगित इव मृगलाञ्छनः, परित्यक्तमदिर इव कामपालः, शचीवियुक्त इव पुरन्दरः, तप्ततपनीयसदृशवर्णो नखमयूखमञ्जरितचरणाङ्गुलीविभागः, सुनिगूढशिरासन्धानः अनुबद्धपिण्डिकाभागः, मनोहरमुकुरजङ्घः, अन्तर्निगूढजानुसन्धानः, मकरवदनाकारजानुमस्तकः, अतिसुन्दरसुसङ्गतोरुयुगलः, विपुलकटीतटाभोगः, मनोहरतनुमध्यभागः, पीनविस्तीर्णवक्षःस्थलः, उन्नतशिखरपरिवर्तुलबाहुयुगलः, अनुल्बणकूर्परविभागः, पीनप्रकोष्ठदेशः, आजानुलम्बितप्रशस्तलेखाविभूषितकरतलः, आताम्रतलिनकररुहः, सुसमायुक्ताधरपुटः, समसुसंगतधवलदशनः, आरक्तत्रिभागदीर्घविशाललोचनः, उत्तुङ्गनासिकावंशः, विपुलललाटपट्टः, सुसमायुक्तकर्णपाशः, कृष्णसुस्निग्धकुटिलकुन्तलभारः, चन्दनकृताङ्गरागः, विमलदुकूलनिवसनः, महामुक्ताफलमालाविभूषितशिरोधरः, विमलचूडारत्नप्रसाधित(भूषित)उत्तमाङ्गः, किं बहुना कथितेन--रूपमिव रूपस्य, लावण्यमिव लावण्यस्य, सौन्दर्यमिव सौन्दर्यस्य, यौवनमिव यौवनस्य, मनोरथ इव मनोरथानां महाराजस्य

---

[1] रायामपरि° क

मणोरहाणं महारायस्स पुत्तो सीहकुमारो त्ति। तओ मुणियअन्नहावियारभावनिबन्धणाए चिन्तियं मयणलेहए। ठाणे खु सामिणीए अणुराओ। अहवा न कमलायरं वज्जिय लच्छी अन्नत्थ अहिरमइ। तस्स वि य भगवओ अणङ्गस्स विय रई न एयं वज्जिय अन्ना उचिय त्ति। चिन्तिऊण जंपियमिमीए। सामिणि! सुन्दरो खु सो कुमारो नियगुणेहिं। जहा उण अज्जसुबुद्धी मए देवीपेसणगयाए राइणा सह मन्तयन्तो सुओ, जइ तं तहा भविस्सइ, तओ रइसणाहो विय पञ्चबाणो सयलसुन्दरो भविस्सइ त्ति। कुसुमावलीए भणियं– 'किं सुओ?' त्ति। तीए भणियं–एवं सुओ। अज्जसुबुद्धिणा भणियं–देव! महारायपुरिसदत्तस्स सीहकुमारस्स कए कुसुमावलिं मग्गमाणस्स गरुओ अणुबन्धो। दढं च तेण एत्थ वुत्तन्ते अहं भणिओ म्हि 'तहा तुमए कायव्वं, जहा एसा कुसुमावली सरिसगुणेणं कुमारसीहेणं संजुज्जइ' त्ति। अन्नं च, देव! न तं वज्जिय कुसुमावलीए अन्नो उचिओ त्ति। एत्थन्तरम्मि लज्जा–हरिसनिब्भराए किंपि अभणणीयं अवत्थन्तरं पाविऊण अलियकोवकलङ्कसंपायणेण चन्दसरिसवयणाए भणियं कुसुमावलीए। हला! असंबद्धपलाविणि!

पुत्रः सिंहकुमार इति। ततो ज्ञातान्यथाविकारभावनिबन्धनया चिन्तितं मदनलेखया। स्थाने खलु स्वामिन्या अनुरागः। अथवा न कमलाकरं वर्जित्वा लक्ष्मी अन्यत्राभिरमते॥ तस्यापि च भगवतोऽनङ्गस्येव रतिः नैतां वर्जित्वाऽन्या उचितेति। चिन्तित्वा कथितमनया। स्वामिनि! सुन्दरः खलु स कुमारो निजगुणैः। यथा पुनरार्यसुबुद्धिर्मया देवीप्रेषणगतया राज्ञा सह मन्त्रयन् श्रुतः, यदि तत् तथा भविष्यति, ततो रतिसनाथ इव पञ्चबाणः सकलसुन्दरो भविष्यति इति। कुसुमावल्या भणितं–'किं श्रुतः' इति। तया भणितम्–एवं श्रुतः–आर्यसुबुद्धिना भणितम्–देव! महाराजपुरुषदत्तस्य सिंहकुमारस्य कृते कुसुमावलीं मार्गयतो गुरुकोऽनुबन्धः। दृढं च तेन अत्र वृत्तान्तेऽहं भणितोऽस्मि 'तथा त्वया कर्तव्यं, यथा एषा कुसुमावली सदृशगुणेन सिंहकुमारेण संयुज्यते' इति। अन्यच्च, देव! न तं वर्जित्वा कुसुमावल्या अन्य उचित इति। अत्रान्तरे लज्जा–हर्षनिर्भरया किमप्यभणनीयमवस्थान्तरं प्राप्य अलिककोपकलङ्कसंपा-

किमेयमेवं पलवसि ? । मयणलेहाए भणियं–सामिणि ! किं वा एत्थ असंवद्धं ति । किं अणुचिया माणससरनिवासिणो रायहंसी वरहंसस्स । तओ देवेण भणियं–भो सुबुद्धि ! पहवइ महाराओ मम पाणाणं पि । तओ सुबुद्धिणा भणियं–देव ! जुत्तमेयं ति । एवं च जाव वीसत्थमन्तिएणं चिट्ठन्ति, ताव आगया उज्जाणवाली पल्लविया नाम चेडी । विन्नत्ता य तीए कुसुमावली । सामिणि ! देवी आणवेइ । गच्छ तुमं दन्तवलहियं, जओ आणत्तं देवेण 'अज्ज सविसेससोहासंपायणाभिरामं सज्जेयव्वं भवणुज्जाणं, एत्थ किल महारायपुत्तेण सीहकुमारेण आगन्तव्वं' ति । तओ एयमायण्णिय 'जं देवी आणवेइ' त्ति सहरिसं गया दन्तवलहियं । इओ य सज्जियं भवणुज्जाणं । तओ य सायरं उवणिमन्तिऊण कुसुमावलीदंसणूसुययाए अभिप्पेयागमणो चेव आणीओ सीहकुमारो । कओ से भोयणसंपायणाइओ उवयारो । पच्छा पविट्ठो भवणुज्जाणं । दिट्ठो य तेण गिहसारियारावमुहलो दक्खालयामण्डवो नववरो विव

दनेन चन्द्रसदृशवदनया भणितं कुसुमावल्या । सखि ! असंवद्धप्रलापिनि ! किमेतदेवं प्रलपसि ? । मदनलेखया भणितम्–स्वामिनि ! किं वाऽत्रासंवद्धमिति । किमनुचिता मानससरोनिवासिनो राजहंसी वरहंसस्य । ततो देवेन भणितम्–भो सुबुद्धे ! प्रभवति महाराजो मम प्राणानामपि । ततः सुबुद्धिना भणितम्–देव ! युक्तमेतद् इति । एवं-च यावद् विश्वस्तमन्त्रितेन तिष्ठतः, तावदागता उद्यानपाली पल्लविका नाम चेटी । विज्ञप्ता च तया कुसुमावली । स्वामिनि ! देवी आज्ञापयति । गच्छ त्वं दन्तवलभिकां, यतः आज्ञप्तं देवेन 'अद्य सविशेषशोभासंपादनाभिरामं सज्जितव्यं भवनोद्यानम्, अत्र किल महाराजपुत्रेण सिंहकुमारेण आगन्तव्यम्' इति । तत एतमाकर्ण्य 'यद् देवी आज्ञापयति' इति सहर्षं गता दन्तवलभिकाम् । इतश्च सज्जितं भवनोद्यानम् । ततः सादरमुपनिमन्त्र्य कुसुमावलीदर्शनोत्सुकतयाऽभिप्रेतागमन एव आनीतः सिंहकुमारः । कृतः तस्य भोजनसंपादनादिक उपचारः । पश्चात् प्रविष्टो भवनोद्यानम् । दृष्टश्च तेन गृहसारिकारावमुखरो द्राक्षालतामण्डपो नववर इव आरक्तपल्लवनिवसनोपशोभितोऽशोकनिवहः, चटुलकलहंसचालितकमलश्च

आरत्तपल्लवनिवसणोवसोहिओ असोयनिवहो, चडुलकलहंसचालिय[1]कमलो य भवणदीहियानलिणिवणसण्डो, [2]महुयरपरहुयारावमुहलो य सहयारनिकुरुम्बो, कुसुममहुपाणमुइयभमिरभमरालिपरियरिओ य माहवीलयामण्डवो, नागवल्लीनिवहसमालिङ्गिओ य पूगफलीपयरो सुयन्धपरिमलावासियदिसामण्डलो य कुङ्कुमगोच्छनियरो, महुरमारुयन्दोलिरो य लोयणसुहओ कयलीहरओ त्ति । ठिओ य ॥८८॥ माहवीलयामण्डवम्मि ।

एत्थन्तरम्मि य मयणलेहाए भणिया कुसुमावली । सामिणि ! महाणुभावाणं सुयणभावाओ पुव्वनिव्वत्तिओ चेव सम्बन्धो होइ । सो चेव उचियसंभासण–फुल्ल–तम्बोलप्पयाणाइणा पयासिज्जइ त्ति । ता पेसेहि से सरीरपउत्तिपुच्छणापुव्वयं एयम्मि काले असंभावणिज्जभावं सहत्थारोवियपियङ्गुमञ्जरीकण्णावयंसं कोमलनागवल्लीदलसणाहं च तम्बोलं अहिणवुप्पन्नाणि य कक्कोलयफलाइं नियकलाकोसल्लपिसुणगं च किंचि तहारूवं अच्छेरयभूयं ति । तओ कुसुमावलीए भणियं–जं पियसहि ! ते पडिहायइ, तं सयं चेव अणु-

भवनदीर्घिकानलिनीवनखण्डः, मधुतरपरभृतारावमुखरश्च सहकारनिकुरम्बः, कुसुममधुपानमुदितभ्रमितभ्रमरालिपरिचरितश्च माधवीलतामण्डपः, नागवल्लीनिवहसमालिङ्गितश्च पूगफलीप्रकरः, सुगन्धपरिमलावासितदिग्मण्डलश्च कुङ्कुमगुच्छनिकरः, मधुरमारुतान्दोलितं च लोचनसुभगं कदलीगृहकम्–इति । स्थितश्च माधवीलतामण्डपे ॥

अत्रान्तरे च मदनलेखया भणिता कुसुमावली । स्वामिनि ! महानुभावानां सुजनभावात् पूर्वनिर्वर्तित एव संबन्धो भवति । स एव उचितसंभाषण–पुष्प–ताम्बूलप्रदानादिना प्रकाश्यते इति । तस्मात् प्रेषय तस्य शरीरप्रवृत्तिपृच्छनापूर्वकमेतस्मिन् कालेऽसंभावनीयभाव स्वहस्तारोपितप्रियङ्गुमञ्जरीकर्णावतंसं कोमलनागवल्लीदलसनाथं च ताम्बूलमभिनवोत्पन्नानि च कक्कोलकफलानि निजकलाकौशल्यपि-

---

[1] कमलोयरभ० ख. । [2] महुर ख.

चिट्ठउ पियसही । तओ मयणलेहाए वण्णियासमुग्गयं चित्तवट्टियं च उवणेऊण भणिया कुसुमावली । सामिणि ! चित्ताणुराई खु सो जणो; ता आलिहउ एत्थ सामिणी समाणवरहंसयविउत्तं तद्दंसणूसुयं च रायहंसियं ति । तओ मुणियमयणलेहाभिप्पायाए ईसि विहसिऊण आलिहिया तीए जहोवइट्ठा रायहंसिया । मयणलेहाए वि य अन्नत्थासूयगं से लिहियं इमं उवरि दुवईखण्डं । जहा–

अहिणवनेहनिब्भरुक्कण्ठियनिरुपच्छायं[1]वयणिया । सरसमुणालवलयं[2]गासम्मि वि सइ मन्दाहिलासिया ॥
दाहिणपवणविहुयकमलायरए वि अदिन्नदिट्ठिया । पियसंगमकए न उत्तम्मइ कह वररायहंसिया ॥

तओ घेत्तूण एयं चित्तवट्टियं पुव्ववण्णियं च पाहुडं गया माहवीलयामण्डवं मयणलेहा । 'कुसुमावलीपियसहि' त्ति परियणाओ मुणिऊण सायरमभिणन्दिया कुमारेणं । तओ ससंभमं तस्स चलणजुयलं पणमिऊण भणियं मयणलेहाए–महारायपुत्त ! 'चित्ताणुराई

शुनकं किञ्चित् तथारूपमाश्चर्यभूतमिति। ततः कुसुमावल्या भणितम्–यत् प्रियसखि ! तव प्रतिभाति, तत् स्वयमेवानुतिष्ठतु प्रियसखी। ततो मदनलेखया वर्णिकासमुद्गकं चित्रवर्तिकां चोपनीय भणिता कुसुमावली। स्वामिनि ! चित्रानुरागी खलु स जनः; तत आलिखतु अत्र स्वामिनी समानवरहंसवियुक्तां तद्दर्शनोत्सुकां च राजहंसिकामिति। ततो ज्ञातमदनलेखाभिप्रायया ईषद् विहस्य आलिखिता तया यथोपदिष्टा राजहंसिका। मदनलेखयाऽपि चावस्थासूचकं तस्य लिखितमिदमुपरि द्विपदीखण्डम्। यथा—

अभिनवस्नेहनिर्भरोत्कण्ठितनिरुपच्छायवदनीया। सरसमृणालवलयग्रासेऽपि सदा मन्दाभिलाषिका।
दक्षिणपवनविधूतकमलाकरेऽपि अदत्तदृष्टिका। प्रियसङ्गमकृते नोत्ताम्यति कथं वरराजहंसिका ? ॥

ततो गृहीत्वा एतां चित्रवर्तिकां पूर्ववर्णितं च प्राभृतं गता माधवीलतामण्डपं मदनलेखा। 'कुसुमावलीप्रियसखी' इति परिजनात्

---

[1] पव्वाय क० ख० । [2] दलय क०

तुमं' ति तओ चित्ताणुराइणीए अहं तुह पउत्तिनिमित्तं पेसिया रायधूयाए कुसुमावलीए, तहा सहत्थारोवियाणुराएण य एसा अहिणवुप्पन्ना पियङ्गुमञ्जरी नियनागवल्लीसमुप्पन्नदलमहग्घं च तम्बोलं अहिणवुप्पन्नाणि य कक्कोलयफलाइं 'एयाइं च किल इट्ठविसिट्ठाणं दिज्जन्ति, ता तुमं चेवं जोग्गो' त्ति कलिऊण पेसियाइं सामिणीए, एसा वि चित्तगया रायहंसिया पावउ ते दंसणसुहेल्लिं ति, भणिउमुवणीयाइं च तीए। तओ कुमारेण सहरिसयं गिण्हिऊण कया कण्णे पियङ्गुमञ्जरी आवीलं मोत्तूण, समाणियं च तम्बोलं, अब्भहियजायहरिसेण पलोइया रायहंसिया, वाइयं च से अवत्थासूयगं उवरि लिहियं दुवईखण्डं। तओ तम्बोलसमाणणपज्जाउल[1]वयणयाए मयणवियारओ य परिखलन्तविसयमहुरक्खरं भणियं च णेण—अहो! से चित्तकोसल्लं। अह किं पुण दंसणाओ चेव मुणिज्जमाणा वि अवत्था इमेण पुणरुत्तोवन्नासमेत्तेण दुवईखण्डेण सूइया। मयणलेहाए भणियं—महारायउत्त! न एसा सामिणीए सूइया, किं तु

ज्ञात्वा सादरमभिनन्दिता कुमारेण। ततः ससंभ्रमं तस्य चरणयुगलं प्रणम्य भणितं मदनलेखया—महाराजपुत्र! 'चित्रानुरागी त्वम्' इति ततः चित्रानुरागिण्याऽहं तव प्रवृत्तिनिमित्तं प्रेषिता राजदुहित्रा कुसुमावल्या, तथा स्वहस्तारोपितानुरागेण च एषाऽभिनवोत्पन्ना प्रियङ्गुमञ्जरी निजनागवल्लीसमुत्पन्नदलमहार्घं च ताम्बूलमभिनवोत्पन्नानि च कल्लोलकफलानि 'एतानि च किल इष्टविशिष्टेभ्यो दीयन्ते, ततस्त्वमेव योग्यः' इति कलयित्वा प्रेषितानि स्वामिन्या, एषाऽपि चित्रगता राजहंसिका प्राप्नोतु ते दर्शनसुखकेलिमिति भणित्वोपनीतानि च तया। ततः कुमारेण सहर्षं गृहीत्वा कृता कर्णे प्रियङ्गुमञ्जरी आव्रीडां (ईषद्व्रीडां) मुक्त्वा, समानीतं च ताम्बूलम्, अभ्यधिकजातहर्षेण प्रलोकिता राजहंसिका, वाचितं च तस्या अवस्थासूचकमुपरि लिखितं द्विपदीखण्डम्। ततः ताम्बूलसमानयनपर्याकुलवदनाया मदनविकारतश्च परिस्खलद्विषममधुराक्षरं भणितं चानेन—अहो! तस्याश्चित्रकौशल्यम्। अथ किं पुनर्दर्शनादेव ज्ञायमानापि अवस्था

---

[1] वयणेन क.

एयमालिहियं पेच्छिऊण मए कयं इमं दुवईखण्डं ति। कुमारेण भणियं–जुज्जइ पढमलिहियं दट्ठूण सहियाणं अवत्थाणुवायकरणं ति। मग्गिया णेण पत्तछेज्जकत्तरी। कप्पिओ य नागवल्लीदले रायहंसियावत्थाणुरूवो वररायहंसओ, फुडक्खरा य एसा हिययसंवायणनिमित्तं गाह त्ति जहा–

मरिऊग न संपत्ती पियाए कलिऊण एस वरहंसो। धारेइ कह वि पाणे अणुकूलनिमित्तजोएण ॥

तओ नियसिरोहराओ ओसारिऊण दिन्ना इमीए तिसमुद्दसारभूया पारिओसियं मुत्तावली, समप्पियं च नागवल्लीदलं। ईसि विहसिऊण भणिया य एसा, वत्तव्वा तुमए कुसुमावली। जहा–अत्थि अम्हाणं दढं चित्ताणुराओ, मुणियं तुमए इमं, विन्नायं च अम्हेहिं पि ते चित्तकोसल्लं; ता पुणो एवं चेव चित्ताणुराइणो जणस्स नियचित्तकोसल्लाइसएणं आणन्दं करिज्जासि त्ति। तओ 'जं

अनेन पुनरुक्तोपन्यासमात्रेण द्विपदीखण्डेन सूचिता। मदनलेखया भणितम्–महाराजपुत्र! न एषा स्वामिन्या सूचिता, किं तु एतदालिखितं दृष्ट्वा मया कृतमिदं द्विपदीखण्डमिति। कुमारेण भणितम्–युज्यते प्रथमलिखितं दृष्ट्वा सहृदयानामवस्थानुवादकरणमिति। मार्गिता तेन पत्रच्छेद्यकर्तरी। कल्पितश्च नागवल्लीदले राजहंसिकाऽवस्थानुरूपो वरराजहंसः, स्फुटाक्षरा चैषा हृदयसंवादननिमित्तं गाथेति। यथा—

मृत्वा न संप्राप्तिः प्रियायाः कलयित्वा एष वरहंसः। धारयति कथमपि प्राणान् अनुकूलनिमित्तयोगेन ॥

ततो निजशिरोधराद् अपसार्य दत्ताऽस्यास्त्रिसमुद्रसारभूता पारितोषिकं मुक्तावली, समर्पितं च नागवल्लीदलम्। ईषद् विहस्य भणिता चैषा, वक्तव्या त्वया कुसुमावली। यथा–अस्ति अस्माकं दृढं चित्रानुरागः ज्ञातं त्वयेदम्, विज्ञातं चास्माभिरपि ते चित्रकौश-

---

१ संठावण क.

महारायउत्तो आणवेइ' त्ति भणिऊण पणामपुव्वयं निग्गया मयणलेहा, पत्ता य कुसुमावलीसमीवं। आइक्खिओ तीए जहावत्तो वुत्तन्तो, समप्पियं नागवल्लीदलं, दिट्ठो य कुसुमावलीए वरहंसओ, वाइया य गाहा, परितुट्ठा हियएणं ॥

एवं च पइदिणं मयणसरगोयरावडियजणमणाणन्दयारेहिं विज्जाहरी–चक्कवाय–महुयर[1]मुहचित्तपओयपेसणेहिं पवड्ढमाणाणुरायाणं जाव वोलेन्ति थेवदियहा, ताव राइणो पुरिसदत्तस्स पत्थणामहग्घं दिन्ना लच्छिकन्तनरवइणा कुमारसीहस्स कुसुमावलि त्ति। निवेइयं च एयं पियंकरियाए कुसुमावलीए। जहा—

दिन्ना सीहकुमारस्स सुयणु सिट्ठे य बहलपुलयाए। अङ्गेसु परिओसो मयणो व्व वियम्भिओ तिस्सा ॥

एत्थन्तरंमि य अत्थिनिवहसमीहियब्भहियदिन्नदविणजायं वज्जन्तमङ्गलतूररवापूरियदिसामण्डलं नच्चन्तवेसविलयायणुप्पंकबद्ध-

---

ल्यम्। तस्मात् पुनः पुनरेवमेव चित्रानुरागिणो जनस्य निजचित्रकौशल्यातिशयेन आनन्दं करिष्यसीति। ततो 'यद् महाराणपुत्र आज्ञापयति' इति भणित्वा प्रणामपूर्वकं निर्गता मदनलेखा, प्राप्ता च कुसुमावलीसमीपम्। आख्यातस्तया यथावृत्तो वृत्तान्तः, समर्पितं नागवल्लीदलम्। दृष्टश्च कुसुमावल्या वरहंसः, वाचिता च गाथा, परितुष्टा हृदयेन ॥

एवं च प्रतिदिनं मदनशरगोचरापतितजनमनआनन्दकारैर्विद्याधरी–चक्रवाक–मधुकरप्रमुखचित्रप्रयोगप्रेषणैः प्रवर्धमानानुरागयोर्यावदतिक्रामन्ति स्तोकदिवसाः, तावद् राज्ञः पुरुषदत्तस्य प्रार्थनामहार्घं दत्ता लक्ष्मीकान्तनरपतिना कुमारसिंहस्य कुसुमावलीति। निवेदितं चैतत् प्रियङ्कर्या कुसुमावल्याः। यथा—

दत्ता सिंहकुमारस्य सुतनो! शिष्टे च बहलपुलकायाः। अङ्गेषु परितोषो मदन इव विजृम्भितस्तस्याः ॥

अत्रान्तरे च अर्थिनिवहसमीहिताभ्यधिकदत्तद्रविणजातं वाद्यमानमङ्गलतूर्यरवापूरितदिग्मण्डलं नृत्यद्वेश्यावनिताजनोत्पङ्क(समूहः)

सोह सयलजणमणाणन्दयारयं दोहिं च नरिन्देहिं कयं वद्धावणयं ति।

काऊण य तेहि तओ [1]वारिज्जसुहो गणाविओ दियहो। घोसावियं पुणो वि य जहिच्छियादाणमच्चत्थं ॥
पत्तंमि य तंमि दिणे तत्तो कुसुमावली पसत्थंमि। बन्धुजुवईहि सहिया पमक्खणकए मुहुत्तंमि ॥
आसन्दियाए मणहरधवलदुगुल्लोत्थयाए रम्माए। ठविया पुव्वाभिमुही रङ्गावलि[2]चाउरन्तंमि ॥
मणिपट्टयम्मि निमिया चलणा संकन्तरायसोहिल्ले। तप्फंससुहासायणरसपल्लविए व्व विमलम्मि ॥
[3]वच्छीउत्तेण य नहमऊहपडिवन्नसलिलसङ्केण। पक्खालिउमणवज्जं निम्मवियं तीए नहयम्मं ॥
रत्तंसुयपरिहाणा अहियं वियसन्तवयणसयवत्ता। आसन्नरविसमागमपुव्वदिसिवहु व्व आरत्ता ॥

बद्धशोभं सकलजनमनआनन्दकारकं द्वाभ्यां च नरेन्द्राभ्यां कृतं वर्द्धापनकमिति।

कृत्वा च ताभ्यां ततो विवाहशुभो गणितो दिवसः। घोषितं पुनरपि च यथेप्सितदानमत्यर्थम् ॥
प्राप्ते च तस्मिन् दिने ततः कुसुमावली प्रशस्ते। बन्धुयुवतिभिः सहिता प्रम्रक्षणकृते मुहूर्ते ॥
आसन्दिकायां मनोहरधवलदुकूलावस्तृतायां रम्यायाम्। स्थापिता पूर्वाभिमुखी रङ्गावलीचातुरन्ते ॥
मणिपट्टके स्थापितौ चरणौ संक्रान्तरागशोभावति। तत्स्पर्शसुखास्वादनरसपल्लविते इव विमले ॥
वात्सीपुत्रेण च नखमयूखप्रतिपन्नसलिलशङ्केन। प्रक्षाल्यानवद्यं निर्मितं तस्या नखकर्म ॥
रक्तांशुकपरिधाना अधिकं विकसद्वदनशतपत्रा। आसन्नरविसमागमपूर्वदिग्वधूरिवारक्ता ॥

---

१ वारिज्जयं विवाहः (पाइ. ना.) २ रंगावलिविभूषितचत्वारिंकायाम्। ३ नापितेन वात्सीपुत्रो नापितः (पाइ. ना.)

दुव्वङ्कुर-दहि-अक्खयवावडहत्थाहिं रत्तवसणाहिं। जुवईहि अविहवाहिं विहिणा य पमक्खिया ताहिं ॥
पुप्फ-फलोदयभरिएहि कणयकलसेहि ण्हाविया नवरं। ऊमिणिया सुपसत्थं सव्वङ्गं पुण्ण[1]वत्तेणं ॥
दिन्ना य अक्खया से गुरूहि परिओसवहलपुलएहिं। सव्वोसहिगन्धड्ढे घणकेसे उत्तिमङ्गम्मि ॥
तत्तो वि य ससिवयणा नवर पसाहिज्जिउं समाढत्ता। जावयरसेण पढमं मणहरचलणा कया तीसे ॥ ॥९४॥
नियकन्तिसच्छहेण य कुङ्कुमराएण जङ्घियाओ से। पीणे थणकलसजुए अभिलिहिया पत्तलेहाओ ॥
कालेयमीसचन्दणरसेण निम्मज्जियं च मुहकमलं। दइओ व्व साणुराओ कओ य से समयणो अहरो ॥
नवसरयकालवियसियकुवलयदलकन्तिरायसोहिल्लं। कयमुज्जलं पि कज्जलयरञ्जियं लोयणाण जुयं ॥

दूर्वाङ्कुर-दध्य-क्षतव्यापृतहस्ताभी रक्तवसनाभिः। युवतिभिरविधवाभिर्विधिना च प्रम्रक्षिता ताभिः ॥
पुष्प-फलोदयभृतैः कनककलशैः स्नपिता नवरम्। प्रोञ्छिता सुप्रशस्तं सर्वाङ्गं पुण्यवस्त्रेण ॥
दत्ता चाक्षतास्तस्या गुरुभिः परितोषवहलपुलकैः। सर्वौषधिगन्धाढ्ये घनकेशे उत्तमाङ्गे ॥
ततोऽपि च शशिवदना नवरं प्रसाधयितुं समारब्धा। यावकरसेन प्रथमं मनोहरचरणौ कृतौ तस्याः ॥ ॥९४॥
निजकान्तिसच्छायेन च कुङ्कुमरागेण जङ्घिके तस्याः। पीने स्तनकलशयुगेऽभिलिखिताः पत्रलेखाः ॥
कालेयमिश्रचन्दनरसेन निर्माजितं च मुखकमलम्। दयित इव सानुरागः कृतश्च तस्याः समदनोऽधरः ॥
नवशरत्कालविकसितकुवलयदलकान्तिरागशोभावत्। कृतमुज्ज्वलमपि कज्जलरञ्जितं लोचनयोर्युगम् ॥

---

१ ०यत्तेण ख.

महुमासलच्छिया इव उम्मिल्लो से मुहम्मि वरतिलओ। उवरिरइयालयावलिअलिउलवलएहि परियरिओ ॥
अह कलसद्दायड्ढियसभवणवाविरयरायहंसाइं। चलणेसु पिणद्धाइं मणहरमणिनेउराइं से ॥
नहससिमऊहसंवलियरयणसंजणियविउणसोहाहिं। पडिवन्नाओ मणिविंढियाहि तह अङ्गुलीओ त्ति ॥
बद्धं च दइयहियंयं व तीए वियडे नियम्बविम्बम्मि। सुरऊसववरतूरं निम्मलमणिमेहलादामं ॥
बाहुलयामूलेसुं रइयाओ जणमणेक्कणाओ[1] उ। बाहुसरियाउ तीसे मयरद्धयवागुराओ व्व ॥
बद्धो य थणहरोवरि मणहरवरपउमरायदलघडिओ। पवरो पवंगबन्धो नियम्बसंसत्तओ तह य ॥
मुत्ताहारो थणबद्धसंगसंजायकामराओ व्व। कण्ठमवलम्बिऊणं नीविं से फुसिउमाढत्तो ॥

मधुमासलक्ष्मीरिवोन्मिलितस्तस्या मुखे वरतिलकः। उपरिरचितालकावल्यलिकुलवलयैः परिचरितः ॥
अथ कलशब्दाकर्षितस्वभवनवापीरतराजहंसे। चरणयोः पिनद्धे मनोहरमणिनूपुरे तस्याः ॥
नखशशिमयूखसंवलितरत्नसंजनितद्विगुणशोभाभिः। प्रतिपन्ना मणिवेष्टिकाभिस्तथाऽङ्गुल्य इति ॥
बद्धं च दयितहृदयमिव तया विकटे नितम्बविम्बे। सुरतोत्सववरतूर्यं निर्मलमणिमेखलादाम ॥
बाहुलतामूलयो रचिता जनमनश्चोरास्तु। बाहुसरिकाः (बाहुमालाः) तस्या मकरध्वजवागुरा इव ॥
बद्धश्च स्तनभरोपरि मनोहरवरपद्मरागदलघटितः। प्रवरः प्लवङ्गबन्धो नितम्बसंसक्तः तथा च ॥
मुक्ताहारः स्तनबद्धसङ्गसंजातकामराग इव। कण्ठमवलम्ब्य नीवीं तस्या स्प्रष्टुमारब्धः ॥

---

[1] इक्कणाओ चोराः (दे. ना.)

कण्ठम्मि विमलमणहरमोत्तियदुसुरुल्लयं पिणद्धं से। कुङ्कुमकयराएसु य सवणेसुं रयणचक्कलयाओ॥
उज्जोइयं च धणियं तिस्सा वयणं मियङ्कलेहाए। धवलकुडिलाए पवरं पओसलच्छीए व सुहाए॥
घणकसिणकुडिलमणहरसिरोरुहुग्घायकलियसोहिल्ले। विमलं चूडारयणं निमियं से उत्तिमङ्गम्मि॥
।९६।। पढमं दीसिहिइ इमा मोत्तूण ममं ति रयणछायाए। पडिवन्नमच्छराए व्व ओत्थयं तीए सव्वङ्गं॥ ।।९६।।

एवं च जाव कुसुमावली पसाहिज्जइ, ताव पसाहणनिउणवारविलयाहिं पसाहियम्मि सीहकुमारे निवेइयं राइणो पुरिसदत्तस्स गहियसंकुच्छाएहिं मुणियजोइससत्थसारेहिं जोइसिएहिं 'आसन्नं पसत्थं हत्थग्गहणमुहुत्तं' ति। तओ य सीहकुमारो नरवइसमाणत्तपरियणपवत्तिओ वज्जन्तमङ्गलतूररवावूरियसयलदिसामण्डलो पवणपणच्चन्तधयवडुग्घायसुन्दररहवरारूढरायलोयपरियरिओ मणहरनट्टोवयार-

---

कण्ठे विमलमनोहरमौक्तिकदुसुरुल्लकं पिनद्धं तस्याः। कुङ्कुमकृतरागयोः श्रवणयोः रत्नचक्रलते।
उद्द्योतितं च घनं तस्या वदनं मृगाङ्कलेखया। धवलकुटिलया प्रवरं प्रदोषलक्ष्म्या इव शुभया॥
घनकृष्णकुटिलमनोहरशिरोरुहसमूहकलितशोभावति। विमलं चूडारत्नं स्थापितं तस्या उत्तमाङ्गे॥
प्रथमं द्रक्ष्यते इयं मुक्त्वा मामिति रत्नच्छायया। प्रतिपन्नमत्सरया इव अवस्तृतं तया सर्वाङ्गम्॥

एवं च यावत् कुसुमावली प्रसाध्यते, तावत् प्रसाधननिपुणवारवनिताभिः प्रसाधिते सिंहकुमारे निवेदितं राज्ञः पुरुषदत्तस्य गृहीतशङ्कच्छायैः ज्ञातज्योतिःशास्त्रसारैः ज्योतिषिकैः 'आसन्नं प्रशस्तं हस्तग्रहणमुहूर्तम्' इति। ततश्च सिंहकुमारो नरपतिसमाज्ञप्तपरिजनप्रवर्तितो वाद्यमानमङ्गलतूर्यरवापूरितसकलदिग्मण्डलः पवनप्रनृत्यमानध्वजपटसमूहसुन्दररथवरारूढराजलोकपरिचरितो मनोहरनाट्योप-

गतो धनदेवो हट्टमार्गम्। कारितं च तेन भोजनम्, प्रक्षिप्तं चैकस्मिन् लड्डुके विषम्। चिन्तितं च तेन–'एतं तस्य दास्यामि' इति। आगच्छतोऽनेकविकल्पापहृतचित्तस्य संजातो विपर्ययः। भोजनवेलायां तेन गृहीतो विषलड्डुकः, दत्तश्च मह्यमितर इति। प्रभुक्तावावां यावत्स्तोकवेलायामेव स्तारितो धनदेवः। ततः 'किमेतद्' इति आकुलीभूतोऽहं यावत्किंकर्तव्यमूढः स्तोककालं तिष्ठामि, तावदत्युग्रतया विषस्य विचित्रतया कर्मपरिणामस्योपरतो धनदेवः। जाता मे चिन्ता–हा! केन पुनरेतद् व्यवसितम्'इति। ततोऽज्ञातवृत्तान्तो महाशोकाभिभूतमानस आगतः स्वनगरम्। शिष्टो वृत्तान्तस्तस्य मानुषाणाम्। वितीर्णं च तेभ्योऽधिकतरं रत्नजातम्। शेषरत्नजातमपि च यथानुरूपं कुशलपक्षे नियुज्य तन्निर्वेदेनैव तत्प्रभृति अज्ञातविषयसङ्गः प्रपन्नो देवसेनाचार्यसमीपे प्रव्रज्यामिति। परिपाल्य यथाऽऽयुर्विधिना च मुक्त्वा देहं प्राणते कल्पे उपपन्न एकोनविंशतिसागरोपमायुर्देव इति, इतरोऽपि विषमरणानन्तरं पङ्कप्रभायां पृथिव्यां नवसागरोपमायुर्नारक इति। ततोऽहं यथाऽऽयुरनुपाल्य च्युतः सन् इहैव जम्बूद्वीपे द्वीपे ऐरवते क्षेत्रे हस्तिनापुरे नगरे हरिनन्देर्गाथापते-

पुत्तत्ताए उववन्नो । इयरो वि तओ नरगाओ उव्वट्टिय उरगत्तणं पाविऊणमणेगसत्तवावायणपरो दावाणलदड्ढदेहो मरिऊग तीए चेव पङ्कप्पभाए पुढवीए किंचूणदससागरोवमाऊ नारगो होऊण तओ उव्वट्टो, तिरिएसु आहिण्डिय तम्मि चेव हत्थिणाउरे इन्दनामस्स वुड्ढसेट्ठिस्स नन्दिमईए भारियाए कुच्छिसि पुत्तत्ताए उववन्नो त्ति । उचियसमयम्मि जाया अम्हे । पइट्ठावियाइं नामाइं–मज्झं वीरदेवो, इयरस्स दोणगो त्ति । पत्ता य कुमारभावं, समप्पिया य लेहायरियस्स । जाया य अम्हाणं पुव्ववण्णिया चेव पिई । तओ गहियकलाकलावेणं मए पडिवन्नो माणभङ्गगुरुसमीवे जिणदेसिओ धम्मो, ममोवयारवञ्चणकुसलेण दव्वओ दोणएणावि । तओ य मे धम्माणुराएण तप्पभिइं तं पइ समुप्पन्ना थिरयरा पिई । समप्पियं से पभूयं दविणजायं । भणिओ य एसो–'ववहरह अणिन्दिएण मग्गेण'। तओ सो ववहरिउमारद्धो । विढत्तं च तेण पभूयं दविणजायं । एत्थन्तरम्मि पुव्वकयकम्मवासणादोसेण जाओ से ममोवरि अहिगो वञ्चणापरिणामो । चिन्तियं च तेणं–अज्जियं पभूयं दविणजायं, भागिओ य वीरदेवो एयस्स, ता केण उण उवाएण वञ्चियव्वो

लक्ष्मीमत्या भार्यायाः कुक्षौ पुत्रतयोपपन्नः । इतरोऽपि ततो नरकादुद्वृत्त्य उरगत्वं प्राप्यानेकसत्त्वव्यापादनपरो दावानलदग्धदेहो मृत्वा तस्यामेव पंकप्रभायां पृथिव्यां किञ्चिदूनदशसागरोपमायुर्नारको भूत्वा तत उद्वृत्तः, तिर्यक्षु आहिण्ड्य तस्मिन्नेव हस्तिनापुरे इन्द्रनाम्नो वृद्धश्रेष्ठिनो नन्दिमत्या भार्यायाः कुक्षौ पुत्रतयोपपन्न इति । उचितसमये जातावावाम् । प्रतिष्ठापिते नाम्नी–मम वीरदेवः, इतरस्य द्रोणक इति । प्राप्तौ च कुमारभावम् , समर्पितौ च लेखाचार्यस्य । जाता चावयोः पूर्ववर्णिता एव प्रीतिः । ततो गृहीतकलाकलापेन मया प्रतिपन्नो मानभङ्गगुरुसमीपे जिनदेशितो धर्मः, ममोपचारवञ्चनाकुशलेन द्रव्यतो द्रोणकेनापि । ततश्च मे धर्मानुरागेण तत्प्रभृति तं प्रति समुत्पन्ना स्थिरतरा प्रीतिः । समर्पितं तस्य प्रभूतं द्रविणजातम् । भणितश्च एषः–व्यवहरत अनिन्दितेन मार्गेण । ततः स व्यवहर्तुमारब्धः । अर्जितं च तेन प्रभूतं द्रविणजातम् । अत्रान्तरे पूर्वकृतकर्मवासनादोषेण जातस्तस्य ममोपरि अधिको वञ्चनापरिणामः । चिन्तितं

एसो, न य मुणइ जहट्ठियं णे कोइ ववहारं । ता किं अवलम्बामि ? । अहवा एयम्मि परिपन्थगे न मे अलियवयणं निव्वहइ । ता वावाएमि एयं । तओ 'जमहं भणिस्सामि, तं चेव अग्घिस्सइ' त्ति संपहारिऊण पारद्धो तेण समुवयारो । काराविओ महन्तो पासाओ, उवरिभूमिभाए य तस्स अणियमियखीलजालो निज्जूहगो। चिन्तियं च तेणं । वीरदेवं पासायपवेसनिमित्तं निमन्तिऊण दंसेमि से निज्जूहगं । तओ सो रम्मदंसणीययाए निज्जूहगस्स सहसा आरोहइस्सइ । तओ य तन्निवडणेण निवडिओ समाणो न भविस्सइ त्ति । एवं च कए समाणे लोयवाओ वि परिहरिओ होइ । संपाइयं तेण जहासमीहियं । भुत्तुत्तरकालंमि य आरूढा दुवे वि अम्हे सपरिवारा पासायं । एत्थन्तरंमि य पणट्ठा से मई । मम दंसणनिमित्तं केवलो चेवारूढो निज्जूहगं । जाव य नारोहामि अहयं, ताव निवडिओ। हाहारवं करेमाणो समोइण्णो अहयं जाव दिट्ठो पञ्चत्तमुवगओ दोणगो त्ति । समुप्पन्नो मे निव्वेओ । चिन्तियं मए । धिरत्थु जीवलोयस्स, एवमवसाणं संसारचेट्ठियं । तओ अहं तस्स मयकिच्चं काऊण तन्निवेएण चेव पडिवन्नो माणभङ्गगुरुसमीवे

तेन-अर्जितं प्रभूतं द्रविणजातम्, भागिकश्च वीरदेव एतस्य, ततः केन पुनरुपायेन वञ्चयितव्य एषः, न च जानाति यथास्थितमावयोः कोऽपि व्यवहारम् । ततः किमवलम्बे ? । अथवा एतस्मिन् परिपन्थिनि न मेऽलीकवचनं निर्वहति, ततो व्यापादयाम्येतम् । ततो 'यदहं भणिष्यामि, तदेव अर्हिष्यति' इति संप्रधार्य प्रारब्धस्तेन समुपचारः। कारितो महान् प्रासादः, उपरि भूमिभागे च तस्य अनियमितकीलजालो निर्यूहकः। चिन्तितं च तेन-वीरदेवं प्रासादप्रवेशनिमित्तं निमन्त्र्य दर्शयामि तस्य निर्यूहकम्। ततः स रम्यदर्शनीयतया निर्यूहकस्य सहसा आरोक्ष्यति। ततश्च तन्निपतनेन निपतितः सन् न भविष्यति (जीविष्यति) इति । एवं च कृते सति लोकवादोऽपि परिहृतो भवति। संपादितं च तेन यथासमीहितम्। भुक्तोत्तरकाले चारूढौ द्वावपि आवां सपरिवारौ प्रासादम्। अत्रान्तरे च प्रनष्टा तस्य मतिः। मम दर्शननिमित्तं केवल एवारूढो निर्यूहकम्। यावच्च नारोहाम्यहं तावन्निपतितः। हाहारवं कुर्वन् समवतीर्णोऽहं यावद्-

समणलिङ्गं । परिवालिऊण अहाउयं उववन्नो हेट्ठिमोवरिमगेवेज्जए किंचूणपणुवीससागरोवमाऊ देवो; इयरो वि दोणओ तहाविहरुद्ज्झाणोवगओ धूमप्पभाए पुढवीए दुवालससागरोवमाऊ नारगो त्ति ॥ तओ अहं सुराउयमणुभुञ्जिऊण चुओ समाणो इहेव जम्बुद्दीवे दीवे एत्थ चेव विजए चम्पावासे नयरे माणिभद्दस्स सेट्ठिस्स धारिणीए भारियाए कुच्छिंसि पुत्तत्ताए उववन्नो, जाओ य उचियसमएणं । पइट्ठावियं मे नामं पुण्णभद्दो त्ति । पढमं च किल मए घोसमुच्चारयन्तेण 'अमर' त्ति संलत्तं । अओ दुइयं पि मे नामं अमरगुत्तो त्ति । सावयगिहुप्पत्तीए य आ बालभावाओ चेव पवन्नो मए जिणदेसिओ धम्मो । एत्थन्तरंमि य इयरो वि तओ नरगाओ उव्वट्टिऊण सयंभुरमणे समुद्दे महामच्छो भविय अच्चन्तपावदिट्ठी मओ समाणो तीए चेव धूमप्पभाए दुवालससागरोवमाऊ चेव नारगो होऊण उव्वट्टो समाणो नाणातिरिएसु आहिण्डिय तंमि चेव नयरे नन्दावत्तस्स सेट्ठिस्स सिरिनन्दाए भारियाए कुच्छिंसि धूयत्ताए उववन्नो

दृष्टो पञ्चत्वमुपगतो द्रोणक इति। समुत्पन्नो मे निर्वेदः। चिन्तितं मया–धिगस्तु जीवलोकस्य, एवमवसानं संसारचेष्टितम्। ततोऽहं तस्य मृतकृत्यं कृत्वा तन्निर्वेदेनैव प्रतिपन्नो मानभङ्गगुरुसमीपे श्रमगलिङ्गम्। परिपाल्य यथाऽऽयुरुपपन्नोऽधस्तनोपरितनग्रैवेयके किञ्चिदूनपञ्चविंशतिसागरोपमायुर्देवः, इतरोऽपि द्रोणकस्तथाविधरौद्रध्यानोपगतो धूमप्रभायां पृथिव्यां द्वादशसागरोपमायुर्नारक इति। ततोऽहं सुरायुरनुभुज्य च्युतः सन् इहैव जम्बूद्वीपे द्वीपे अत्रैव विजये चम्पावर्षे नगरे माणिभद्रस्य श्रेष्ठिनो धारिण्या भार्यायाः कुक्षौ पुत्रतयोपपन्नः, जातश्चोचितसमयेन। प्रतिष्ठापितं मे नाम पूर्णभद्र इति। प्रथमं च किल मया घोषमुच्चारयता 'अमर' इति संलपितम्, अतो द्वितीयमपि मे नाम अमरगुप्त इति। श्रावकगृहोत्पत्त्या च आ बालभावादेव प्रपन्नो मया जिनदेशितो धर्मः। अत्रान्तरे च इतरोऽपि ततो नरकादुद्वृत्त्य स्वयंभूरमणे समुद्रे महामत्स्यो भूत्वा अत्यन्तपापदृष्टिर्मृतः सन् तस्यामेव धूमप्रभायां द्वादशसागरोपमायुरेव नारको भूत्वा उद्वृत्तः सन् नानातिर्यक्षु आहिण्ड्य तस्मिन्नेव नगरे नन्दावर्तस्य श्रेष्ठिनः श्रीनन्दाया भार्यायाः कुक्षौ दुहितृतयोपपन्नः, जाता

जाया य उचियसमएणं । पइट्ठावियं च से नामं नन्दयन्ति त्ति । पत्ता य जोव्वणं, विइण्णा य मज्झं । निव्वत्तियं पाणिग्गहणं । समुप्पन्नो य मे तं पइ सिणेहो, तीए वि य तहेव । एवं च विसयसुहमणुहवन्ताणं गओ कोइ कालो । पुव्वकयकम्मदोसेण य से ममोवरि वञ्चणापरिणामो नावेइ, जेण समप्पियसव्वघरसारा वि मायाए ववहरइ । साहियं च मे परियणेणं, न उण पत्तियामि त्ति । अन्नया य साहियं मे तीए । जहा पणट्ठं सव्वसारं कुण्डलजुयलं । तं पुण सयं चेव अवहरिऊण समाउलीभूया । भणिया य तओ मए । सुन्दरि, थेवमेयं ति, किमेद्दहमेत्तेणं संरम्भेण । अन्नं ते कुण्डलजुयलं कारावेमि । कारावियं कुण्डलजुयलं । अइक्कन्तेसु कइवयदिणेसु अब्भङ्गणवेलाए समप्पियं से नामङ्कियमुद्दारयणं, संगोवियं च तीए निययाभरणकरण्डए । वत्ते य ण्हाणभोयणसमए काऊणमङ्गरायं परिगेण्हिऊण तम्बोलं असंजायासंकेण चेव तओ करण्डगाओ सइं चेव गहियं मए मुद्दारयणं । दिट्ठं च पुव्वनट्ठं सव्वसारं कुण्डलजुयलं । जाया य मे चिन्ता 'किमेयं पुणो लद्धं' ति । एत्थन्तरंमि ससज्झसा व्विय आगया नन्दयन्ती । दिट्ठं च तीए मज्झ हत्थंमि

चोचितसमयेन । प्रतिष्ठापितं च तस्या नाम नन्दयन्ती इति । प्राप्ता च यौवनम्, वितीर्णा च मह्यम् । निर्वर्तितं पाणिग्रहणम् । समुत्पन्नश्च मे तां प्रति स्नेहः, तस्या अपि च तथैव । एवं च विषयसुखमनुभवतोर्गतः कोऽपि कालः । पूर्वकृतकर्मदोषेण च तस्या ममोपरि वञ्चनापरिणाणो नापैति, येन समर्पितसर्वगृहसाराऽपि मायया व्यवहरति । कथितं च मम परिजनेन, न पुनः प्रत्येमीति । अन्यदा च कथितं मे तया, यथा–प्रनष्टं सर्वसारं कुण्डलयुगलम्, तत्पुनः स्वयमेवापहृत्य समाकुलीभूता । भणिता च ततो मया–सुन्दरि ! स्तोकमेतदिति, किमेतावन्मात्रेण संरम्भेण ? । अन्यत्ते कुण्डलयुगलं कारयामि । कारितं च कुण्डलयुगलम् । अतिक्रान्तेषु कतिपयदिनेषु अभ्यङ्गनवेलायां समर्पितं तस्य नामाङ्कितं मुद्रारत्नम्, संगोपितं च तया निजकाभरणकरण्डके । वृत्ते च स्नानभोजनसमये कृत्वाऽङ्गरागं परिगृह्य ताम्बूलमसंजाताशङ्केणैव ततः करण्डकात् स्वयमेव गृहीतं मया मुद्रारत्नम् । दृष्टं च पूर्वनष्टं सर्वसारं कुण्डलयुगलम् । जाता

मुद्दारयणं। विलिया सा। लक्खिओ से भावो। तओ अहं सिग्घमेव निग्गओ गेहाओ। चिन्तियं च तीए–दिट्ठं इमेण कुण्डलजुयलं ता किमेत्थ कायव्वं। जायं मे लहुत्तं, पणट्ठो एसो वि। ता जाव सयणवग्गे वि मे लाघवं न उप्पज्जइ, ताव वावाएमि एयं ति। एसो य एत्थ उवाओ, सज्जघायणं से कम्मणजोगं पउञ्जामि। कओ तीए केवलाए चेव अणेयमरणावहदव्वसंजोएणं जोगो। संठवन्ती य तमेगदेसे डक्का भुयङ्गमेणं। साहियं च मे पुरोहिएणं रुद्ददेवेणं। गओ अहं ससम्भन्तो गिंहं। दिट्ठा य कसिणमण्डलविसवावियसरीरा जीवियमेत्तसेसा नन्दयन्ती। तं च तहाविहं दट्ठूण समुप्पन्ना मे चिन्ता। धिरत्थु माइन्दजालसरिसस्स जीवलोयस्स। बाहजलभरियलोयणेणं च सगग्गयक्खरं भणिया मए। सुन्दरि, किं ते बाहइ ? जाव न जंपइ त्ति। तओ विसण्णो अहं, पणट्ठा जीवियासा। तहावि 'गारुडिया एत्थ पमाणं, अचिन्ता मन्तसत्ति'त्ति सद्दाविया गारुडिया। दिट्ठा य तेहिं। विसण्णा य ते। भणिओ य णेहिं। सत्थवाहपुत्त, कालदट्ठा खु एसा न गोयरा मन्तस्स। ता न कुप्पियव्वं तुमए त्ति भणिऊण निग्गया गारुडिया। तओ

च मे चिन्ता 'किमेतत्पुनर्लब्धम्' इति। अत्रान्तरे साध्वसा इवागता नन्दयन्ती। दृष्टं च तया मम हस्ते मुद्रारत्नम्। व्यलीका सा, लक्षितस्तस्या भावः। ततोऽहं शीघ्रमेव निर्गतो गेहात्। चिन्तितं च तया–दृष्टमनेन कुण्डलयुगलम्, ततः किमत्र कर्तव्यम्। जातं मे लघुत्वम्, प्रनष्ट एषोऽपि। ततो यावत्स्वजनवर्गेऽपि मे लाघवं नोत्पद्यते तावद् व्यापादयाम्येतमिति। एष चात्रोपायः, सद्योघातनं तस्य कार्मणयोगं प्रयुञ्जे। कृतस्तया एव अनेकमरणावहद्रव्यसंयोगेन योगः। संस्थापयन्ती च तमेकदेशे दष्टा भुजङ्गमेन। कथितं च मे पुरोहितेन रुद्रदेवेन। गतोऽहं ससंभ्रान्तो गृहम्, दृष्टा च कृष्णमण्डलविषव्याप्तशरीरा जीवितमात्रशेषा नन्दयन्ती। तां तथाविधां दृष्ट्वा समुत्पन्ना मे चिन्ता, धिगस्तु मायेन्द्रजालसदृशं जीवलोकम्। बाष्पजलभृतलोचनेन च सगद्गदाक्षरं भणिता मया–सुन्दरि! किं ते बाधते? यावन्न जल्पति इति। ततो विषण्णोऽहं, प्रनष्टा जीविताशा। तथाऽपि 'गारुडिका अत्र प्रमाणम्, अचिन्त्या मन्त्रशक्तिः'

अक्कन्दणविलवणवावडस्स मे परियणस्स विमुक्का जीविएणं, कयं से उद्धदेहियं। तओ अहं तन्निव्वेएणं चेव पवड्ढमाणसंवेगो 'धिरत्थु जीवलोयस्स' त्ति परिचिन्तिऊण य असारयं चइऊण किलेसायासकारिणं सङ्गं पवन्नो पव्वज्जं ति। सा उण तवस्सिणी तहा मरिऊण समुप्पन्ना तमप्पहाभिहाणाए नरयपुढवीए। आउं च से इगवीसं सागराइं। एयं मे चरियं ति॥ एयं च सोऊण संजाओ रायनायराणं निव्वेओ। पुच्छियं च राइणा। भयवं, को उण तीए भवओ य परिणामो भविस्सइ ?। भयवया भणियं। तीसे अणन्तसंसारावसाणे मुत्ती, मम उण इहेव जम्मे त्ति॥

तओ अहमेय[1]मायण्णिऊण तस्स चेव भयवओ समीवे अणेयनायरजणपरिगओ पवन्नो पव्वज्जं। एयं मे विसेसकारणं ति॥

सीहकुमारेण भणियं-सोहणं ते निव्वेयकारणं। अह कइगइसमावन्नरूवो उण एस संसारो, किंविसिट्ठाणि वा इह सारीरमाणसा-

---

इति शब्दायिता गारुडिकाः। दृष्टा च तैः। विषण्णाश्च ते। भणितश्च तैः-सार्थवाहपुत्र! कालदष्टा खलु एषा, न गोचरा मन्त्रस्य। ततो न कुपितव्यं त्वयेति भणित्वा निर्गता गारुडिकाः। तत आक्रन्दनविलपनव्यापृतस्य मे परिजनस्य विमुक्ता जीवितेन, कृतं तस्यौर्ध्वदैहिकम्। ततोऽहं तन्निर्वेदेनैव प्रवर्धमानसंवेगो 'धिगस्तु जीवलोकस्य' इति परिचिन्त्य च असारं त्यक्त्वा क्लेशायासकारिणं सङ्गं प्रपन्नः प्रव्रज्यामिति। सा पुनः तपस्विनी तथा मृत्वा समुत्पन्ना तमःप्रभाभिधानायां नरकपृथिव्याम्। आयुश्च तस्या एकविंशतिः सागराणि। एतन्मे चरितमिति॥ एतच्च श्रुत्वा संजातो राजनागराणां निर्वेदः। पृष्टं च राज्ञा-भगवन्! कः पुनस्तस्याः भवतश्च परिणामो भविष्यति। भगवता भणितम्-तस्या अनन्तसंसारावसाने मुक्तिः, मम पुनरिहैव जन्मनीति॥

ततोऽहमेतदाकर्ण्य तस्यैव भगवतः समीपे अनेकनागरजनपरिगतः प्रपन्नः प्रव्रज्याम्। एतन्मे विशेषकारणमिति॥

---

[1] ०मायण्णिय ख

णि सुहदुक्खाणि अणुहवन्ति पाणिणो, को वा एत्थ संसारचारगविमोयणसमत्थो भयवं! धम्मो त्ति?। धम्मघोसेण भणियं–वच्छ! सुण, जं तए पुच्छियं—

एत्थ ताव चउगइसमावन्नरूवो संसारो। गईओ पुण इमाओ। तं जहा–नरयगई, तिरियगई, मणुयगई, देवगई। सुहदुक्खचिन्ताए पुण, कुओ संसारसमावन्नाणं जाइजरामरणपीडियाणं रागाइदोसगहियाणं विसयविसावहियचेयणाणं च सत्ताणं सुहं ति?। न किंचि सुहं, बहुं च दुक्खं। एत्थ मे सुण नायं–

जह नाम कोइ पुरिसो धणियं दालिद्ददुक्खसंतत्तो। मोत्तूणं नियं देसं परदेसं गन्तुमारद्धो॥
लङ्घेऊण य [1]देसं गामागरनयरपट्टणसणाहं। थे[2]वेदियहेहि नवरं कहंचि पन्थाउ पब्भट्ठो॥

सिंहकुमारेण भणितम्–शोभनं ते निर्वेदकारणम्। अथ कतिगतिसमापन्नरूपः पुनरेष संसारः, किंविशिष्टानि वा इह शारीरमानसानि सुखदुःखानि अनुभवन्ति प्राणिनः, को वाऽत्र संसारचारकविमोचनसमर्थो भगवन्! धर्म इति? धर्मघोषेण भणितम्–वत्स! शृणु, यत्त्वया पृष्टम्—

अत्र तावच्चतुर्गतिसमापन्नरूपः संसारः। गतयः पुनरिमाः। तद्यथा–नरकगतिः, तिर्यग्गतिः, मनुजगतिः, देवगतिः। सुखदुःखचिन्तया पुनः, कुतः संसारसमापन्नानां जातिजरामरणपीडितानां रागादिदोषगृहीतानां विषयविषापहृतचेतनानां च सत्त्वानां सुखम्–इति? न किंचित्सुखम्, बहु च दुःखम्। अत्र मम शृणु ज्ञातम्—

यथा नाम कोऽपि पुरुषो भृशं दारिद्र्यदुःखसंतप्तः। मुक्त्वा निजं देशं परदेशं गन्तुमारब्धः॥

---

१ तं सो ख २। थेवेहि दियहेहि कहं० ख।

पत्तो य साल-सरल-तमाल-तालालि-बउल-तिलय-निचुल-अंकोल्ल-कलम्ब-वञ्जुल-पलास-सल्लई-तिणिस-निम्ब-कुडय-नग्गोह-खइर-सज्ज-ऽज्जुण-म्ब-जम्बुयनियरगुविलं दरियमयणाहखरनहरसिहरावायदलियमत्तमायङ्गकुम्भत्थलगलियबहलरुहिरारत्तमुत्ताहलकुसुमपयरच्चियवित्थिण्णभूमिभागं वणकोल-सरह-वसह-पसय-वग्घ-तरच्छ-ऽच्छभल्ल-जम्बुय-गय-गवय-सीह-गण्डयाइ-रुद्दुट्ठसावयभीसणं दरियवणमहिसजूहसमालोडियासेसपल्ललजलुच्छलन्[1]तुत्तत्थजलयरमुक्कनायबहिरियदिसं महाडविं। तीए य तण्हा-छुहाभिभूएण दरियवणदुट्ठसावयरवायण्णणुत्तत्थलोयणेणं दीहपहपरिस्समुप्पन्नसेयजलधोयगत्तेणं मूढदिसा[2]चक्कं विसमपहखलन्तपयसंचारं परिब्भमन्तेण तेण दिट्ठो य पलयघणवन्द्रसन्निहो निट्ठवियाणेयपहियजणवड्ढिउच्छाहो गद्दभगज्जियर[3]वावूरियवियडरण्णुद्देसो मग्गओ तुरिय[4]तुरियं धावमाणो उद्धीकउद्दण्डसुण्डो वणहत्थि त्ति। तह य निसियकरवालवावडग्गहत्था विगरालवयणकाया भीमट्टट्टहाससंजुत्ता

लङ्घित्वा च देशं ग्रामाकरनगरपत्तनसनाथम्। स्तोकदिवसैर्नवरं कथंचित्पथः प्रभ्रष्टः॥

प्राप्तश्च साल-सरल-तमाल-तालालि-वकुल-तिलक-निचुला-ऽङ्कोल्ल-कदम्ब-वञ्जुल-पलाश-सल्लकि-तिनिश-निम्ब-कुटज-न्यग्रोध-खदिर-सर्जा-र्जुना-म्र-जम्बूकनिकरगुपिलां दृप्तमृगनाथखरनखरशिखरापातदलितमत्तमातङ्गकुम्भस्थलगलितबहलरुधिरारक्तमुक्ताफलकुसुमप्रकरार्चितविस्तीर्णभूमिभागां वनकोल-शरभ-वृषभ-पसय-व्याघ्र-तरच्छा-ऽच्छभल्ल-जम्बूक-गज-गवय-सिंह-गण्डकादिरुष्टदुष्टश्वापद-भीषणां दृप्तवनमहिषयूथसमालोडिताऽशेषपल्वलजलोच्छलदुत्त्रस्तजलचरमुक्तनादबधिरितदिशं महाटवीम्। तस्यां च तृष्णा-क्षुदभिभूतेन दृप्तवनदुष्टश्वापदरवाकर्णनोत्त्रस्तलोचनेन दीर्घपथपरिश्रमसमुत्पन्नस्वेदजलधौतगात्रेण मूढदिक्चक्र विषमपथस्खलत्पदसंचारं परिभ्रमता तेन दृष्टश्च प्रलयघनवन्द्रसन्निभो निष्ठापितानेकपथिकजनवर्द्धितोत्साहो गर्दभगर्जितरवापूरितविकटारण्योद्देशो मार्गतः त्वरितत्वरितं धावन्

---

१ ०तत्त्थ ख। २ ०चक्क वि० क-ख। ३ ०रवाऊरिय०। ४ तुरियं ख-ग।

असियवसणा पुरओ महादुट्ठरक्खसि त्ति । तओ य ते दट्ठूण मच्चुभयवेविरङ्गो अवलोइयसयलदिसामण्डलो पुव्वदिसाए उदयगिरिसिहरसन्निहं निरुद्धसिद्धगन्धव्वमिहुण[1]गयणपयारसग्गं महन्तं नग्गोहपायवं अवलोइऊण परिचिन्तिउं पयत्तो । कहं ?

जइ [2]नाम कहवि एयं रवितुरयखुरग्गछिन्नघणपत्तं । नग्गोहमारुहेज्जा छुट्टेज्ज तओ गइन्दस्स ॥
इय चिन्तिऊण भीओ कुससूईभिन्नपायतलमग्गो । वेगेण धाविऊणं वियडं वडपायवं पत्तो ॥
तं पेच्छिउं विसण्णो नग्गोहं गयणगोयराणं पि । दुल्लङ्घणिज्जमुत्तुङ्गखन्धमारुहिउमसमत्थो ॥
ताव वणदुट्ठहत्थिं मन्थरगण्डालिजालपामुक्कं । हुलियं समल्लियन्तं दट्ठुं वडपायवुद्देसं ॥
अब्भहियभयपवेविरसव्वङ्गो [3]वुण्णवयणतरलच्छं । एत्तो इओ नियन्तो पेच्छइ कूवं [4]तणोछन्नं ॥

ऊर्ध्वीकृतोद्दण्डशुण्डो वनहस्तीति । तथा च निशितकरवालव्यापृताग्रहस्ता विकरालवदनकाया भीमाट्टट्टहाससंयुक्ता असितवसना पुरतो महादुष्टराक्षसी इति । ततश्च तां दृष्ट्वा मृत्युभयवेपमानाङ्गोऽवलोकितसकलदिग्मण्डलः पूर्वदिशि उदयगिरिशिखरसन्निभं निरुद्धसिद्धगान्धर्वमिथुनगगनप्रचारमार्गं महान्तं न्यग्रोधपादपमवलोक्य परिचिन्तयितुं प्रवृत्तः । कथम् ?

यदि नाम कथमप्येतं रवितुरगखुराग्रच्छिन्नघनपत्रम् । न्यग्रोधमारोहेयं मुच्येय ततो गजेन्द्रात् ॥
इति चिन्तयित्वा भीतः कुशसूचिभिन्नपादतलमार्गः । वेगेन धावित्वा विकटं वटपादपं प्राप्तः ॥
तं प्रेक्ष्य विषण्णो न्यग्रोधं गगनगोचराणामपि । दुर्लङ्घनीयमुत्तुङ्गस्कन्धमारोढुमसमर्थः ॥
तावद् वनदुष्टहस्तिनं मन्थरगण्डालिजालप्रमुक्तम् । हुलितं (शीघ्रं) समालीयमानं दृष्ट्वा वटपादपोद्देशम् ।

---

[1] ०गमण० ख । [2] णवरि क । [3] चुण्ण० क-ग । [4] तणोच्छइयं क ।

अह मरणभीरुएणं नग्गोहासन्नजिण्णकूवम्मि । अप्पा निरावलम्बं मुक्को खणजीवलोहेण ॥
उत्तुङ्गभित्तिजाओ सरथम्भो तम्मि तत्थ य विलग्गो । पडणाभिघायकुविए पेच्छइ य भुयङ्गमे भीमे ॥
चउसु वि तडीसु दरिए विसलवसंवलियनयणसिहिजाले उब्भडफडाकराले पवेल्लिरङ्गे [1]डंसिउकामे ॥
फुंकारपवणपिसुणियमवयच्छियवयणमयगरमहो य । दिग्गयकरोरुकायं कसिणं रत्तच्छिबीभच्छं ॥
जावेसो सरथम्भो ताव महं जीवियं ति चिन्तन्तो । अवयच्छइ उद्धमुहो पेच्छइ य सुतिक्खदाढिल्ले ॥
धवलकसिणे य तुरियं दुवे तहिं मूसए महाकाए । निच्चं वावडवयणे छिन्दन्ते तस्स मूलाइं ।।
ताव वणवारणेण य [2]विज्झाइ नरं अपावमाणेणं । कुविएण विइण्णाइं धणियं नग्गोहरुक्खम्मि ॥

अभ्यधिकभयप्रवेपमानसर्वाङ्गस्त्रस्तवदनतरलाक्षम् । इत इतो गच्छन् पश्यति कूपं तृणोच्छन्नम् ॥
अथ मरणभीरुकेन न्यग्रोधासन्नजीर्णकूपे। आत्मा निरावलम्बं मुक्तः क्षणजीवलोभेन ॥
उत्तुङ्गभित्तिजातः शरस्तम्भस्तस्मिन् तत्र च विलग्नः । पतनाभिघातकुपितान् पश्यति च भुजङ्गमान् भीमान् ॥
चतसृष्वपि तटीषु दृप्तान् विषलवसंवलितनयनशिखिजालान् । उद्भटस्फटाकरालान् प्रवेल्लमानाङ्गान् दशितुकामान् ॥
फुत्कारपवनपिशुनितं प्रसारितवदनमजगरमधश्च । दिग्गजकरोरुकायं कृष्णं रक्ताक्षिबीभत्सम् ॥
यावदेष शरस्तम्भस्तावन्मम जीवितमिति चिन्तयन् । अवकासते ऊर्ध्वमुखः पश्यति च सुतीक्ष्णदाढावतः ॥
धवलकृष्णौ च त्वरितं द्वौ तत्र मूषकौ महाकायौ। नित्यं व्यापृतवदनौ छिन्तस्तस्य मूलानि ॥

---

१ डसिऊ० २ वेज्झाइ ख

संचालियम्मि तम्मि य अवडोवरि वियडसाहसंभूयं । खुडिऊण तम्मि पडियं महुजालं जिण्णकूवम्मि ॥
तो कुवियदुट्ठमहुयरिनियरडसिज्जन्तसव्वगत्तस्स । सीसम्मि निवडिया कह वि नवरं जोएण महुबिन्दू ॥
[1]ओयलिऊण य वयणं कहवि पविट्ठा उ उत्तिमङ्गाओ । खणमासाइउमिच्छइ पुणो वि अन्ने निवडमाणे ॥
अगणेउमयगरोरगकरिमूसयविलयमहुयरिभयाइं । महुबिन्दुरसासायणगेहिवसा हरिसिओ जाओ ॥
भवियजणमोहविउडणपच्चलमच्चत्थमियमुदाहरणं । परिगप्पियमेयस्स य उवसंहारं निसामेह ॥
जो पुरिसो सो जीवो चउगइभमणं च रण्णपरियडणं । वणवारणो य मच्चू निसायरिं जाण तह य जरं ॥
वडरुक्खो उण मोक्खो मरणगइन्दभयवज्जिओ नवरं । आरुहिउं विसयाउरनरेहि न य सक्कणिज्जो त्ति ॥

तावद् वनवारणेन च अभिघातनानि नरमप्राप्नुवता । कुपितेन वितीर्णानि भृशं न्यग्रोधवृक्षे ॥
संचालिते तस्मिंश्च अवटोपरिविकटशाखासंभूतम् । त्रुटित्वा तस्मिन् पतितं मधुजालं जीर्णकूपे ॥
ततः कुपितदुष्टमधुकरीनिकरदश्यमानसर्वगात्रस्य । शीर्षे निपतिताः कथमपि नवरं योगेन मधुबिन्दवः ॥
अवतीर्य च वदनं कथमपि प्रविष्टास्तूत्तमाङ्गात् । क्षणमास्वादितुमिच्छति पुनरपि अन्यान् निपततः ॥
अगणयित्वाऽजगरोरगकरिसूषकविलयमधुकरीभयानि । मधुबिन्दुरसास्वादनगृद्धिवशाद् हर्षितो जातः ॥
भविकजनमोहविकुटनप्रत्यलमत्यर्थमिदमुदाहरणम् । परिकल्पितमेतस्य च उपसंहारं निशामयत ॥
यः पुरुषः स जीवः चतुर्गतिभ्रमणं चारण्यपर्यटनम् । वनवारणश्च मृत्युर्निशाचरीं जानीहि तथा च जराम् ॥

---

[1] ओयरिं० ख.

मणुयत्तं पुण कूवो भुयङ्गमा तह य होन्ति उ कसाया । खइओ जेहि मणुस्सो कज्जाकज्जाइं न मुणेइ ॥
जो वि य पुण सरथम्भो सो जीयं जेण जीवइ जीवो । तं किण्हधवलपक्खा खणन्ति दढमुन्दुरसमाणा ॥
जाओ य महुयरीओ डसन्ति तं ते उ वाहिणो विविहा । अभिभूओ जेहि नरो खणं पि सोक्खं न पावेइ ॥
घोरो य अयगरो जो सो नरओ विसयमोहियमणो त्ति । पडिओ उ जम्मि जीवो दुक्खसहस्साइं पावेइ ॥ ॥१३९॥
महुबिन्दुसमे भोए तुच्छे परिणामदारुणे धणियं । इय वसणसंकडगओ विबुहो कह महइ भोत्तुं जे ? ॥
[१]तो भे भणामि सावय ! विसयसुहं दारुणं मुणेऊण । चवलतडिविलसियं पिव मणुयत्तं भङ्गुरं तह य ॥
सुयणसमागमसोक्खं चवलं जोव्वणं पि य असारं । सोक्खनिहाणम्मि सया धम्मम्मि मइं दढं कुणसु ॥

वटवृक्षः पुनर्मोक्षो मरणगजेन्द्रभयवर्जितो नवरम् । आरोढुं विषयातुरनरैः न च शक्नीय इति ॥
मनुजत्वं पुनः कूपो भुजङ्गमास्तथा च भवन्ति तु कषायाः । खादितो यैर्मनुष्यः कार्याकार्यं न जानाति ॥
योऽपि च पुनः शरस्तम्बः स जीवितं येन जीवति जीवः । तत्कृष्णधवलपक्षौ खनतो दृढमुन्दुरसमानौ ॥
जाताश्च मधुकर्यो दशन्ति तं ते तु व्याधयो विविधाः । अभिभूतश्च यैर्नरो क्षणमपि सौख्यं न प्राप्नोति ॥
घोरश्चाजगरो यः स नरको विषयमोहितमना इति । पतितस्तु यस्मिन् जीवो दुःखसहस्राणि प्राप्नोति ॥
मधुबिन्दुसमान् भोगान् तुच्छान् परिणामदारुणान् भृशम् । इति व्यसनसंकटगतो विबुधः कथं काङ्क्षति भोक्तुं यान् ? ॥
ततो भवन्तं भणामि श्रावक ! विषयसुखं दारुणं ज्ञात्वा । चपलतडिद्विलसितमिव मनुजत्वं भङ्गुरं तथा च ॥

---

[१] ता भो ख

सीहकुमारेण भणियं-भयवं ! केरिसो धम्मो त्ति ? । भगवया भणियं-सुण, खमाइगो । भणियं च-

खन्ती य मद्दवज्जवमोत्ती तवसंजमे य वोद्धव्वे । सच्चं सोयं [1]आकिंचणं च बम्भं च जइधम्मो ॥

तत्थ खन्ती नाम सम्मन्नाणपुव्वगं वत्थुसहावालोयणेण कोहस्स अणुदयो, उदयपत्तस्स वा विफलीकरणं । एवं मद्दवया वि माणस्स अणुदओ, उदयपत्तस्स वा विफलीकरणं । एवमज्जवया वि मायाए अणुदयो, उदयपत्ताए वा विफलीकरणं । एवं मुत्ती वि लोहस्स अणुदयो, उदयपत्तस्स वा विफलीकरणं ति । तवो पुण दुविहो-वाहिरो अब्भिन्तरो य । वाहिरओ अणसणाइगो । भणियं च-

अणसणमूणोयरिया वित्तीसंखेवओ रसचाओ । कायकिलेसो संलीणया य वज्झो तवो होइ ॥

अब्भिन्तरओ पुण पायच्छित्ताइओ । तं जहा-

सुजनसमागमसौख्यं चपलं यौवनमपि चासारम् । सौख्यनिधाने सदा धर्मे मतिं दृढं कुरु ॥

सिंहकुमारेण भणितम्-भगवन् ! कीदृशो धर्म इति ? । भगवता भणितम्-शृणु, क्षमादिकः । भणितं च—

क्षान्तिश्च मार्दवार्जवमुक्तितपःसंयमाश्च वोद्धव्याः । सत्यं शौचमाकिञ्चन्यं च ब्रह्म च यतिधर्मः ॥

तत्र क्षान्तिर्नाम सम्यग्ज्ञानपूर्वकं वस्तुस्वभावालोचनेन क्रोधस्यानुदयः, उदयप्राप्तस्य वा विफलीकरणम् । एवं मार्दवमपि मानस्यानुदयः, उदयप्राप्तस्य वा विफलीकरणम् । एवं आर्जवमपि मायाया अनुदयः, उदयप्राप्ताया वा विफलीकरणम् । एवं मुक्तिरपि लोभस्यानुदयः, उदयप्राप्तस्य वा विफलीकरणम् । तपः पुनर्द्विविधम्-वाह्यः अभ्यन्तरश्च । वाह्योऽनशनादिकः । भणितं च—

अनशनमूनोदरिका वृत्तिसंक्षेपो रसत्यागः । कायक्लेशः संलीनता च वाह्यं तपो भवति ॥

---

[1] आगिंचणं क

पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ। झाणं उस्सग्गो वि य अब्भिन्तरओ तवो होइ ॥

संजमो य सत्तरसविहो। भणियं च–

पञ्चासववेरमणं पञ्चिन्दियनिग्गहो कसायजओ। दण्डत्तिगविरई संजमो उ इय सत्तरसभेओ।

सच्चं पुण निरवज्जभासणं। सोयं च संजमं पइ निरुवलेवया। आकिंचणं च धम्मोवगरणाइरेगेणमपरिग्गहया। बम्भं च अट्ठारसविहाऽबम्भवज्जणं ति। एसो एवंभूओ जइधम्मो त्ति ॥

एयं च सोऊण आविब्भूयसम्मत्तपरिणामेण भावओ पवन्नसावयधम्मेण भणियं सीहकुमारेणं–भगवं! सोहणो जइधम्मो। एयं काउमसमत्थेण ताव किं कायव्वं ति?। धम्मघोसेण भणियं–'सावयत्तणं'। केरिसं तयं ति?। कहियं सम्मत्तमाइयं। पवन्नो

अभ्यन्तरः पुनः प्रायश्चित्तादिकः। तद् यथा—

प्रायश्चित्तं विनयो वैयावृत्यं तथैव स्वाध्यायः। ध्यानमुत्सर्गोऽपि च अभ्यन्तरः तपो भवति ॥

संयमश्च सप्तदशविधः। भणितं च—

पञ्चाश्रवविरमणं पञ्चेन्द्रियनिग्रहः कषायजयः। दण्डत्रिकविरतिः संयमस्तु इति सप्तदशभेदः ॥

सत्यं पुनर्निरवद्यभाषणम्। शौचं च संयमं प्रति निरुपलेपता। आकिञ्चन्यं च धर्मोपकरणातिरेकेणापरिग्रहता। ब्रह्म च अष्टादशविधाऽब्रह्मवर्जनमिति। एष एवंभूतो यतिधर्म इति ॥

एवं च श्रुत्वाऽऽविर्भूतसम्यक्त्वपरिणामेन भावतः प्रपन्नश्रावकधर्मेण भणितं सिंहकुमारेण–भगवन्! शोभनो यतिधर्मः। एवं कर्तुमसमर्थेन तावत् किं कर्तव्यम्–इति?। धर्मघोषेण भणितम्–श्रावकत्वम्। कीदृशं तदिति? कथितं सम्यक्त्वादिकम्। प्रपन्नो द्रव्य-

दव्वओ वि । तओ अप्पाणं कयकिच्चं मन्नमाणो कंचि वेलं पज्जुवासिऊण धम्मघोसं वन्दिऊण य सविणयं पविट्ठो नयरं । साहिओ तेण वुत्तन्तो कुसुमावलीए । पवन्ना य एसा वि कहंचि कम्मक्खओवसमओ सावयधम्मं । अणुदियहं च धम्मघोसगुरुपज्जुवासणपराणं अइक्कन्तो मासो । भावियाणि [1]जिणधम्मे । अन्नया य पुरिसदत्तो राया अमियतेयगुरुसमीवे सोऊण धम्मं अहिसिञ्चिऊण रज्जे सीहकुमारं संजायसंवेगो सह महादेवीए सिरिकन्ताए पवन्नो मुत्तिमग्गं । मीहकुमारो वि धम्माधम्मववत्थपरिपालणरओ सयलजणमणाणन्दयारी अणुरत्तसामन्तमण्डलो दीणाणाहकिविणजणोवयारसंपायणरई जहोइयगुणजुत्तो रायरिसी समुववजाओ त्ति । एवं च अच्चन्ताणुरत्तं च पियपणइणिं पिव मेइणिं भुंजन्तस्स अइक्कन्तो कोइ कालो । एत्थन्तरम्मि सो अग्गिसम्मतावसदेवो तओ विज्जुकुमारकायाओ चविऊणं संसारमाहिण्डिय अणन्तरभवे य किंपि बालतवविहाणं काऊण मोत्तूण तं देहं पुव्वकम्मवासणाविवागदोसेण समुप्पन्नो कुसु-

---

तोऽपि । तत आत्मानं कृतकृत्यं मन्यमानः कांचिद् वेलां पर्युपास्य धर्मघोषं वन्दित्वा च सविनयं प्रविष्टो नगरम् । कथितश्च तेन वृत्तान्तः कुसुमावल्याः । प्रपन्ना च एषाऽपि कथंचित् कर्मक्षयोपशमतः श्रावकधर्मम् । अनुदिवसं च धर्मघोषगुरुपर्युपासनपरयोरतिक्रान्तो मासः । भावितौ जिनधर्मे । अन्यदा च पुरुषदत्तो राजा अमिततेजोगुरुसमीपे श्रुत्वा धर्मं अभिषिच्य राज्ये सिंहकुमारं संजातसंवेगः सह महादेव्या श्रीकान्तया प्रपन्नो मुक्तिमार्गम् । सिंहकुमारोऽपि धर्माधर्मव्यवस्थापरिपालनरतः सकलजनमनआनन्दकारी अनुरक्तसामन्तमण्डलो दीनानाथकृपणजनोपकारसंपादनरतिर्यथोचितगुणयुक्तो राजर्षिः समुपजात इति । एवं चात्यन्तानुरक्तां च प्रियप्रणयिनीमिव मेदिनीं भुञ्जतोऽतिक्रान्तः कोऽपि कालः । अत्रान्तरे सोऽग्निशर्मतापसदेवस्ततो विद्युत्कुमारकायाच्च्युत्वा संसारमाहिण्ड्य अनन्तरभवे च किमपि बालतपोविधानं कृत्वा मुक्त्वा तं देहं पूर्वकर्मवासनाविपाकदोषेण समुत्पन्नः कुसुमावल्याः कुक्षौ । दृष्टस्तया स्वप्नः ।

---

[1] धम्मे ख

मावलीए कुच्छिंसि। दिट्ठो तीए सुमिणओ। जहा-पविट्ठो मे उयरं भुयङ्गमो, तेणं च निग्गच्छिऊण डक्को राया निवडिओ सिङ्घासणाओ। तं च दट्ठूण ससज्झसा विय विउद्धा कुसुमावली। अमङ्गलं ति कलिऊण न साहिओ तीए दइयस्स। पवड्ढमाणगब्भा य तद्दोसओ चेव न बहु मन्नए नरवइं। राया य अहियं सिणेह[1]परवसो। भणिया य परियणेणं 'सामिणि! न जुत्तमेयं' ति। तीए भणियं-'किमहं करेमि' ?। साहियं परियणेणं-जहा देवं न बहु मन्नसि त्ति। तीए भणियं-नूणं एस गब्भदोसो भविस्सइ। अन्नहा कहमहं अज्जउत्तं न बहु मन्नेमि। अन्नया समुप्पन्नो से दोहलो, जहा-इमस्स चेव राइणो अन्ताणि खाइज्ज त्ति। चिन्तियं च तीए-पावयारी मे एस गब्भो, ता अलं इमिणा। [2]इत्थीसहावओ य भत्तारनेहओ य समुप्पन्नो से ववसाओ, जहा पाडेमि एयं ति। तओ आलोचिऊण पहाणपरियणं कज्जगरुययाए य अणुन्नाया तेण गब्भपरिसाडणं काउमारद्धा। न य सो निकाइयकम्मदोसेण पडइ त्ति। तओ सा अणेगोसहपाणेणं डोहलयासंपत्तीए य परिदुब्बला जाया। पुच्छिया य राइणा-सुन्दरि! किं ते न संपज्जइ, केण वा ते

यथा-प्रविष्टो मे उदरं भुजङ्गमः, तेन च निर्गत्य दष्टो राजा निपतितो सिंहासनात्, तं च दृष्ट्वा साध्वसा इव विबुद्धा कुसुमावली। अमङ्गलमिति कलित्वा न कथितस्तया दयितस्य। प्रवर्धमानगर्भा च तद्दोषत एव न बहु मन्यते नरपतिम्। राजा चाधिकं स्नेहपरवशः। भणिता च परिजनेन-स्वामिनि! न युक्तमेतदिति। तया भणितम्-किमहं करोमि?। कथितं परिजनेन-यथा देवं न बहु मन्यसे इति। तया भणितम्=नूनमेष गर्भदोषो भविष्यति, अन्यथा कथमहमार्यपुत्रं न बहु मन्ये। अन्यदा समुत्पन्नस्तस्या दोहदः, यथा-अस्यैव राज्ञोऽन्त्राणि खादामीति। चिन्तितं च तया-पापकरी मम एष गर्भः, ततोऽलमनेन। स्त्रीस्वभावतश्च भर्तृस्नेहतश्च समुत्पन्नस्तस्य व्यवसायः, यथा पातयाम्येतमिति। तत आलोच्य प्रधानपरिजनं कार्यगुरुतयाऽनुज्ञाता तेन गर्भपरिशाटनं कर्तुमारब्धा। न च स निकाचितकर्मदोषेण

---

[1] ०पीडिओ ख। [2] थीस० ख

खण्डिया आणा, किं वा मए पडिकूलमासेवियं, जं निव्वेएण तुमं अप्पोयगा वित्र [१]कुमुइणी एवं झिज्जसि त्ति ? । तओ पडिहिययलद्धनेहं भणियं कुसुमावलीए–अज्जउत्त ! ईदिसो मे निव्वेओ, जेण चिन्तेमि 'अत्ताणयं वावाएमि'त्ति । राइणा भणियं–सुन्दरि ! किंनिमित्तो त्ति ? । कुसुमावलीए भणियं–अज्जउत्त ! भागधेयाणि मे पुच्छसु त्ति भणिऊण बाहजलभरियलोयणा सगग्गया संवुत्ता । तओ राइणा 'महन्तो से निव्वेओ, ता अलं ताव इमिणा कहाए चेव, अहं एयं अक्खिवामि' त्ति चिन्तिऊण अक्खित्ता कहा, कओ अन्नो पसङ्गो । पुणो य से समाहूओ मयणलेहापमुहो परियणो, सबहुमाणं च भणिओ राइणा । किं जुत्तं तुम्हाणं सुणियनिबन्धणाणं पि एवं कसिणपक्खचन्दलेहं व परिखिज्जमाणिं देविं उवेक्खिउं ति । न य असज्झवत्थुविसओ एस निव्वेओ, अओ जीवलोयसारभूया मे देवी । किं च तं वत्थुं, जं मे पाणेसु धरन्तेसु चेव देवीए न संपज्जइ त्ति । मयणलेहाए भणियं–महाराय ! एवमेयं; नवरमित्थीय-

पततीति । ततः साऽनेकौषधपानेन दोहदासंप्राप्त्या च परिदुर्बला जाता । पृष्टा च राज्ञा–सुन्दरि ! किं ते न संपद्यते, केन वा तव खण्डिताऽऽज्ञा, किं वा मया प्रतिकूलमासेवितम् , यद् निर्वेदेन त्वमल्पोदका इव कुमुदिनी एवं क्षीयसे इति । ततः प्रतिहृदयलब्धस्नेहं भणितं कुसुमावल्या–आर्यपुत्र ! ईदृशो मे निर्वेदः, येन चिन्तयामि 'आत्मानं व्यापादयामि' इति । राज्ञा भणितम्–सुन्दरि ! किंनिमित्त इति ?। कुसुमावल्या भणितम्–आर्यपुत्र ! भागधेयानि मम पृच्छ इति भणित्वा बाष्पजलभृतलोचना सगद्गदा संवृत्ता । ततो राज्ञा 'महान् तस्य निर्वेदः, ततोऽलं तावदनया कथया एव, अहमेतामाक्षिपामि' इति चिन्तयित्वाऽऽक्षिप्ता कथा, कृतोऽन्यः प्रसङ्गः । पुनश्च तस्या समाहूतो मदनलेखाप्रमुखः परिजनः, सबहुमानं च भणितो राज्ञा । किं युक्तं युष्माक श्रुतनिबन्धनानामपि एवं कृष्णपक्षचन्द्रलेखामिव परिखिद्यमानां देवीमुपेक्षितुमिति ? । न चासाध्यवस्तुविषय एव निर्वेदः, यतो जीवलोकसारभूता मे देवी । किं च तद् वस्तु, यन्मया

---

[१] कमलिणी ख

णसुलहो अविवेगो चेव केवलं एत्थ अवरज्झइ। ता सुणउ महाराओ। महाराय! न एयमियाणिं पि कहिउं पारीयइ, तहा वि 'न अन्नो उवाओ' त्ति काऊण कहीयइ। राइणा भणियं–अणुरूवमेयं संभमस्स; जं उवायसज्झं तं सयमेव कीरइ, इयरं निवेइयइ त्ति, ता कहेउ भोई, को एत्थ परमत्थो त्ति ?। तओ मयणलेहाए ससज्झसाए विय आचिक्खिओ गब्भसंभवाओ दोहलयदोसेण गब्भसाडणावसाणो ववहारो त्ति। राइणा चिन्तियं–अहो ! से देवीए ममोवरि असाहारणो नेहो, जेणावच्चजम्मं पि न बहु मन्नइ त्ति। असंपायणेणं च दोहलयस्स मा गब्भविवत्ती से भविस्सइ त्ति उवायं चिन्तेमि। विसज्जिओ य तेण 'जमहं कालोचियं भणिस्सामि, तं तहा कायव्वं' ति भणिऊण देवीपरियणो। सद्दाविओ मइसागरो नाम महामन्ती। सिट्ठो इमस्स एस वुत्तन्तो। चिन्तियं च तेणं, जुत्तं देवीए ववसियं। अहवा मा से इमिणा उवाएण तीसे वि देहपीडा भविस्सइ। ता एस ताव एत्थ उवाओ–बुभुक्खियस्स राइणो कारिमा अन्ता पोट्टवाहिं दाऊण नेत्तपट्टाइणा सुसिलिट्ठा य करिय पेच्छमाणीए चेव देवीए कड्ढिऊण दिज्जन्ति। पच्छा य पसूयाए चेव

प्राणेषु धार्यमाणेषु एव देव्या न संपद्यते इति। मदनलेखया भणितम्–महाराज! एवमेतद्, नवरं स्त्रीजनसुलभोऽविवेक एव केवलमत्रापराध्यति। ततः शृणोतु महाराजः। महाराज! नैतदिदानीमपि कथयितुं पार्यते, तथाऽपि नान्य उपाय इति कृत्वा कथ्यते। राज्ञा भणितम्–अनुरूपमेतत् संभ्रमस्य, यदुपायसाध्यं तत्स्वयमेव क्रियते, इतरद् निवेद्यते इति। ततः कथयतु भवती, कोऽत्र परमार्थ इति ?। ततो मदनलेखया ससाध्वसयेव आख्यातो गर्भसंभवाद् दोहददोषेण गर्भशातनावसानो व्यवहार इति। राज्ञा चिन्तितम्–अहो! तस्या देव्या ममोपरि असाधारणः स्नेहः, येनापत्यजन्मापि न बहु मन्यते इति। असंपादनेन च दोहदस्य मा गर्भविपत्तिः तस्या भूद् इति उपायं चिन्तयामि। विसर्जितश्च तेन 'यदहं कालोचितं भणिष्यामि, तत्तथा कर्तव्यम्' इति भणित्वा देवीपरिजनः। शब्दायितो मतिसागरो नाम महामन्त्री। शिष्ट एतस्य एष वृत्तान्तः। चिन्तितं तेन, युक्तं देव्या व्यवसितम्। अथवा मा तस्या अनेनोपायेन

गब्भमन्तरेण चिन्तिस्सामो त्ति चिन्तिऊण निवेइओ नरवइस्स निययाहिप्पाओ। बहु मन्निओ राइणा। भणिया य मइसायरेण देवी–सामिणि! तहा कड्ढेमि देवस्स अन्ते, जहा [1]एसो न विवज्जइ त्ति। गब्भसहावकूरत्तणेण पडिसुयं तीए। कओ सो उवाओ, संपन्नो दोहलो। पच्छा विसायमुवगयाए दरिसिओ से राया। तओ समासत्था एसा। भणिया य मन्तिणा–सामिणि! पढमपसूयाए न ताव देवस्स निवेयणीओ गब्भजम्मो, अवि य ममं ति; पच्छा जहोचियं करिस्सामि त्ति। पडिसुयं तीए। अन्नया उचियसमए परिणयप्पाए दियहे पसूया देवी। सद्दाविओ तीए मइसायरो। भणिया य तेण–सामिणि! अकुसलो विय देवस्स एस गब्भो लक्खीयइ। ता अलं इमिणा, अन्नत्थ संवड्ढउ, मओ देवस्स निवेइयइ त्ति। तीए भणियं–जुत्तमेयं ति। ममं चिय हियएण मन्तियं अमच्चेणं ति। तओ [2]पयट्टाविओ माहवीयाभिहाणाए दासचेडीए दारओ। गया थेवं भूमिभागं। एत्थन्तरम्मि दिट्ठा राइणा, पुच्छिया य ‘कि-

तस्या अपि देहपीडा भूत्। तत एष तावदत्रोपायः–बुभुक्षितस्य राज्ञः कृत्रिमानन्त्रान् पेट्टबहिर्दत्त्वा नेत्रपटादिना सुश्लिष्टाँश्च कृत्वा पश्यन्त्या एव देव्या कर्पित्वा दीयन्ते। पश्चात्प्रसूताया एव गर्भमन्तरेण चिन्तयिष्याम इति चिन्तयित्वा निवेदितो नरपतेर्निजकाभिप्रायः। बहु मतो राज्ञा। भणिता च मतिसागरेण देवी–स्वामिनि! तथा कर्षयामि देवस्यान्त्रान् यथा एष न विपद्यते इति। गर्भस्वभावक्रूरत्वेन प्रतिश्रुतं तया। कृतः स उपायः, संपन्नो दोहदः। पश्चाद् विषादमुपगताया दर्शितस्तस्या राजा। ततः समाश्वस्ता एषा, भणिता च मन्त्रिणा–स्वामिनि! प्रथमप्रसूतायां न तावद् देवस्य निवेदनीयं गर्भजन्म, अपि च ममेति; पश्चाद् यथोचितं करिष्यामि इति। प्रतिश्रुतं तया। अन्यदा उचितसमये परिणतप्राये दिवसे प्रसूता देवी, शब्दायितो तया मतिसागरः। भणिता च तेन–स्वामिनि! अकुशल इव देवस्य एष गर्भो लक्ष्यते। ततोऽलमनेन, अन्यत्र संवर्ध्यताम्, मृतो देवस्य निवेद्यते इति। तया भणितम्–युक्तमेतदिति। ममैव हृदयेन

---

[1] एसो वि क–ग। [2] परिट्ठाविओ ख।

मेयं' ति ? । तओ ससज्झसाए वेवमाणीए भणियं माहवियाए 'देव ! न किंचि' त्ति । एत्थन्तरम्मि रुइयं बालेण । तओ दारयं दट्ठूण कुविएणेव भणियं राइणा–आ पावे ! किमेयं ववसियं ति ? । तओ थीसहावकायरयाए साहिओ सयलवुत्तन्तो माहवीयाए । तओ राइणा गहिओ दारओ । चिन्तियं च णेणं, न एस एयाण हत्थे पुणो भविस्सइ त्ति । समप्पिओ अन्नधावीणं सावियाओ य ताओ । जइ कहवि दारयस्स पमाओ भविस्सइ, ता विणट्ठा मम हत्थाओ तुब्भे । निब्भच्छिया देवी मइसायरो य, काराविथं च देवीमन्तिचित्ताणुरोहिणा ईसि पच्छन्नभूयं तहाविहं वद्धावणयं । एवं च अइक्कन्तो कोइ कालो । पइट्ठावियं नामं दारयस्स आणन्दो त्ति । वड्ढिओ एसो, गाहिओ कलाकलावं । पुव्वकम्मदोसेण नरवइं पइ विसमचित्तो । दिन्नं से जुवरज्जं ॥

अन्नया पच्चन्तवासी आडविओ दुम्मई नाम सामन्तराया दुग्गभूमिबलगव्विओ वित्थक्को सीहरायस्स । निवेइयं राइणो । विस-

---

मन्त्रितममात्येनेति । ततः प्रवर्तितो माधविकाभिधानया दासीचेट्या दारकः । गता स्तोकं भूमिभागम् । अत्रान्तरे दृष्टा राज्ञा, पृष्टा च किमेतद् इति ? । ततः ससाध्वसया वेपमानया भणितं माधविकया 'देव ! न किंचिद्' इति । अत्रान्तरे च रुदितं बालकेन । ततो दारकं दृष्ट्वा कुपितेनेव भणितं राज्ञा–आः पापे ! किमेतद् व्यवसितम् इति ? । ततः स्त्रीस्वभावकातरतया कथितः सकलवृत्तान्तो माधविकया । ततो राज्ञा गृहीतो दारकः । चिन्तितं च तेन, नैष एतासां हस्ते पुन(र्जीविष्यति)र्भविष्यतीति समर्पितोऽन्यधात्रीणाम् , शापिताश्च ताः । यदि कथमपि दारकस्य प्रमादो भविष्यति, ततो विनष्टा मम हस्ताद् यूयम् । निर्भर्त्सिता देवी मतिसागरश्च, कारितं च देवीमन्त्रिचित्तानुरोधिना ईषत्प्रच्छन्नभूतं तथाविधं वर्द्धापनकम् । एवं चातिक्रान्तः कोऽपि कालः । प्रतिष्ठापितं नाम दारकस्य आनन्द इति । वर्धित एषः, ग्राहितः कलाकलापम् । पूर्वकर्मदोषेण नरपतिं प्रति विषमचित्तः । दत्तं तस्य यौवराज्यम् ॥

अन्यदा प्रत्यन्तवासी आटविको दुर्मतिर्नाम सामन्तराजो दुर्गभूमिबलगर्वितो वित्रस्तः सिंहराजस्य । निवेदितं राज्ञः । विसर्जितस्तेन

ज्झिओ तेण तस्सुवरि विक्खेवो। सभूमिबलगुणेणं च सो पराजिओ तेण । निवेइए य कुविओ राया, पयट्टो सयमेव अमरिसेणं । गओ पयाणयतियं । एत्थन्तरम्मि सिन्धुनईपुलिणे परिवहन्ते पयाणए करिवरोवरिट्ठिएणं जलाओ नाइदूरम्मि 'अहो कट्ठं'ति जंपिरं दिट्ठं मणुयवन्द्रं । गओ तं चेव भूमिभागं राया जाव दिट्ठो तेण महाकाओ अइकसिणदेहच्छवी विणिन्तनयणविसजालाभासुरो गहियरसन्तमण्डुक्कगासो [1]भयाणयवियरियाणणदुप्पेच्छो दुययरपवेल्लिरङ्गो महया कुररेण गसिज्जमाणो जुण्णभुयङ्गमो, कुररो वि दिग्गयकरोरुकाएण रत्तच्छबीभच्छएणं अयगरेण । जहा जहा य अयगरो कुररं गसइ, तहा तहा सो वि जुण्णभुयङ्गमं, जुण्णभुयङ्गमो वि य रसन्तमण्डुक्कयं ति । तं चेव एवंविहं जीवलोयसहावविब्भमं मूढहिययाणन्दकारयं सप्पुरिसनिव्वेयहेउं वइयरमवलोइऊण विसण्णो राया । चिन्तियं च णेणं, हन्त ! एवं ववत्थिए को उण इह उवाओ ? । गसियप्पाओ कुररो अयगरेणं, कुररेण वि भुयङ्गमो, भुयङ्गमेण मण्डुक्को त्ति कण्ठगय-

तस्योपरि विक्षेपः । स्वभूमिबलगुणेन च स पराजितस्तेन । निवेदिते च कुपितो राजा प्रवृत्तः स्वयमेवामर्षेण । गतः प्रयाणकत्रिकम् । अत्रान्तरे सिन्धुनदीपुलिने परिवहमाने प्रयाणके करिवरोपरिस्थितेन जलाद् नातिदूरे 'अहो कष्टम्' इति जल्पद् दृष्टं मनुजवन्द्रम् । गतस्तमेव भूमिभागं राजा यावद् दृष्टस्तेन महाकायोऽतिकृष्णदेहच्छायो विनिर्यन्नयनविषज्वालाभासुरो गृहीतरसद्मण्डूकग्रासो भयानकविवरिताननदुष्प्रेक्ष्यो द्रुततरप्रवेपमानाङ्गो महता कुररेण ग्रस्यमानो जीर्णभुजङ्गमः, कुररोऽपि दिग्गजकरोरुकायेन रक्ताक्षबीभत्सेनाजगरेण । यथा यथा च अजगरः कुररं ग्रसते, तथा तथा सोऽपि जीर्णभुजङ्गमम् , जीर्णभुजङ्गोऽपि च रसद्मण्डूकमिति । तदेव एवंविधं जीवलोकस्वभावविभ्रमं मूढहृदयानन्दकारकं सत्पुरुषनिर्वेदहेतुं व्यतिकरमवलोक्य विषण्णो राजा । चिन्तितं च तेन, हन्त ! एवं व्यवस्थिते कः पुनरिहोपायः ? । ग्रसितप्रायः कुररोऽजगरेण, कुररेणापि भुजङ्गमः, भुजङ्गमेनापि मण्डूक इति । कण्ठगतप्राणा अप्येते नान्योन्यं

---

[1] भयाणयदुप्पेच्छाणणो

पाणा वि एते न अन्नोन्नं विरमन्ति, अवि य अहिययरं पवत्तन्ति, न य अन्नयरविणासणाए मोयाविया एए संपयं जीवन्ति। ता किं इमिणा अपडियारगोयरेण वत्थुणा पुलोइएणं। तज्जाविओ मत्तवारणो, गओ आवासणियाभूमिं, आवासिओ सह कडएणं, कयं उचियकरणिज्जं। तओ अद्धखीणाए जामिणीए सुत्तविउद्धो राया। अयगराइवइयरं सरिऊण चिन्तिउं पयत्तो। कहं—

आवायमेत्तमहुरा विवागविरसा विसोवमा विसया। अबुहजणाण बहुमया विबुहजणविवज्जिया पावा ॥
एयाणमेस लोओ कएण मोत्तूण सासयं धम्मं। सेवेइ जीवियत्थी विसं व पावं सुहाभिरओ ॥
दुक्खं पावस्स फलं नासओ पावस्स दुक्खिओ निच्चं। सुहिओ वि कुणउ धम्मं धम्मस्स फलं वियाणन्तो ॥
मण्डुक्को इव लोओ तुच्छो इयरेण पन्नएणं व। एत्थ गसिज्जइ सो वि हु कुररसमाणेण अन्नेण ॥
सो वि हु न एत्थ सवसो जम्हा अयगरकयन्तवसगो त्ति। एवंविहे वि लोए विसयपसङ्गो महामोहो ॥

विरमन्ति, अपि चाधिकतरं प्रवर्तन्ते, न चान्यतरविनाशनया मोचिता एते साम्प्रतं जीवन्ति। तत्किमनेनाप्रतीकारगोचरेण वस्तुना प्रलोकितेन। तद् यापितो मत्तवारणः, गत आवसनिकाभूमिम्, आवासितः सह कटकेन, कृतमुचितकरणीयम्। ततोऽर्धक्षीणायां यामिन्यां सुप्तविबुद्धो राजा। अजगरादिव्यतिकरं स्मृत्वा चिन्तयितुं प्रवृत्तः। कथम्—

आपातमात्रमधुरा विपाकविरसा विषोपमा विषयाः। अबुधजनानां बहुमता विबुधजनवर्जिताः पापाः ॥
एतेषामेव लोकः कृतेन मुक्त्वा शाश्वतं धर्मम्। सेवते जीवितार्थी विषमिव पापं सुखाभिरतः ॥
दुःखं पापस्य फलं नाशको पापस्य दुःखितो नित्यम्। सुखितोऽपि करोतु धर्मं धर्मस्य फलं विजानन् ॥
मण्डूक इव लोकस्तुच्छ इतरेण पन्नगेनेव। अत्र ग्रस्यते सोऽपि खलु कुररसमानेनान्येन ॥

ता अलं मे अणेयदुक्खतरुवीयभूएण अहोपुरिसिगाविकारपाएणं रज्जेणं ति। रज्जं हि नाम पायालं पिव दुप्पूरं, जिण्णभवणं पिव सुलहविवरं, खलसंगयं पिव विरसावसाणं, वेसित्थियाहिययं पिव अत्थवल्लहं, वम्मीयं पिव बहुभुयङ्गं, जीवलोयं पिव अणिट्ठियकज्जं, सप्पकरण्डयं पिव जत्तपरिवालणिज्जं अणभिन्नं विसम्भसुहाणं, वेसाजोव्वणं पिव बहुजणाभिलसणीयं, अकारणं च सुद्धपरलोयमग्गस्स त्ति। ता एवं परिच्चइय पव्वज्जामो धीरपुरिससेवियं उभयलोयसुहावहं समणत्तणं ति। अह कहं पुण पत्थुयवत्थुविसए लाघवं न भविस्सइ ?। अहवा थेवमेयं एगजम्मपडिबद्धं ति। एवं चिन्तयन्तस्स अइक्कन्ता रयणी, कयं गोसकिच्चं, पविट्ठं मन्तिमण्डलं।

एत्थन्तरम्मि निवेइयं से विजयवइनामाए पडिहारीए–महाराय ! एसो खु दुम्मई देवं सयमेव पत्थियं वियाणिय चण्डं च देवसासणमवगच्छिय सिरोहराबद्धपरसू देवसासणाइक्कमणजायपच्छायावो कइवयपुरिसपरिवारिओ इहेवागओ देवदंसणसुहाभिलासी

सोऽपि खलु नात्र स्ववशो यस्मादजगरकृतान्तवशग इति। एवंविधेऽपि लोके विषयप्रसङ्गो महामोहः ॥

ततोऽलं मेऽनेकदुःखतरुबीजभूतेन आहोपुरुषिकाविकारप्रायेण राज्येनेनि। राज्यं नाम हि पातालमिव दुष्पूरम्, जीर्णभवनमिव सुलभविवरम्, खलसंगतमिव विरसावसानम्, वेश्यास्त्रीहृदयमिव अर्थवल्लभम्, वल्मिकमिव बहुभुजङ्गम्, जीवलोकमिवानिष्ठितकार्यम्, सर्पकरण्डकमिव यत्नपरिपालनीयम्, अनभिज्ञ विश्रम्भसुखानाम्, वेश्यायौवनमिव बहुजनाभिलषणीयम्, अकारणं च शुद्धपरलोकमार्गस्येति। तत एतत्परित्यज्य प्रपद्यामहे (प्रव्रजामः) धीरपुरुषसेवितमुभयलोकसुखावहं श्रमणत्वमिति। अथ कथं पुनः प्रस्तुतवस्तुविषये लाघवं न भविष्यति ?। अथवा स्तोकमेतदेकजन्मप्रतिबद्धमिति। एवं चिन्तयतोऽतिक्रान्ता रजनी, कृतं प्रातःकृत्यम्, प्रविष्टं मन्त्रिमण्डलम्।

अत्रान्तरे निवेदितं तस्य विजयवतीनामया प्रतिहार्या–महाराज ! एष खलु दुर्मतिर्देवं स्वयमेव प्रस्थितं विज्ञाय चण्डं च देवशासन-

पडिहारभूमीए चिट्ठइ । एयं सोऊण देवो पमाणं ति । तओ पुलोइओ राइणा मइसायरो । भणियं च तेण इङ्गियागारकुसलेण—पविसउ, को एत्थ दोसो ? । सरणागयवच्छला चेव राइणो हवन्ति। तओ राइणा [१]अणुन्नाओ पविट्ठो दुम्मई 'देव एसा सिरोहरा एसो य कुहाडो' त्ति भणिऊण पडिओ चलणेसु । तओ अभयं दाऊण बहु माणिओ राइणा, कओ से अहिययरसक्कारो । नियत्तिऊण य राया गओ जयउरं । निवेइओ राइणा निययाभिप्पाओ मन्तिमण्डलस्स । तेण वि य 'किच्चमेवेयमिह वंससंभवाणं रायाणं सेसयाणं पि, किं पुण तुम्हाणं जिणवयणभावियमईणं ति, उभयलोयसाहारणं च सफलं जीवियं देवस्स, वणदवसन्निहा य कामभोगा इन्धणाओ चेव जलन्ति किंपागफलसमाणा य विवागे, अयण्डमणोरहभङ्गकारी य पहवइ विणिज्जियसुरासुरो मच्चु' त्ति कलिऊण बहु मन्निओ । तओ सद्दाविया संवच्छरिया, भणिया य तेण—निरूवेह आणन्दकुमारस्स रज्जाभिसेयदिवसं । तेहिं भणियं—जं देवो आणवेइ । निरूविऊग

मवगत्य शिरोधराबद्धपरशुर्देवशासनातिक्रमणजातपश्चात्तापः कतिपयपुरुषपरिवारित इहैवागतो देवदर्शनसुखाभिलाषी प्रतिहारभूम्यां तिष्ठति । एतच्छ्रुत्वा देवः प्रमाणमिति । ततः प्रलोकितो राज्ञा मतिसागरः । भणितं च तेनेङ्गिताकारकुशलेन । प्रविशतु, कोऽत्र दोषः ? । शरणागतवत्सला एव राजानो भवन्ति । ततो राज्ञाऽनुज्ञातः प्रविष्टो दुर्मतिः 'देव ! एषा शिरोधरा, एष च कुठारः' इति भणित्वा पतितश्चरणयोः । ततोऽभयं दत्त्वा बहु मानितो राज्ञा, कृतस्तस्याधिकतरसत्कारः । निवर्त्य च राजा गतो जयपुरम् । निवेदितो राज्ञा निजाभिप्रायो मन्त्रिमण्डलस्य । तेनापि च 'कृत्यमेवैतद् इह वंशसंभवानां राज्ञां शेषाणामपि, किं पुनर्युष्माकं जिनवचनभावितमतीनाम्, उभयलोकसाधारणं च सफलं जीवितं देवस्य, वनदवसंनिभाश्च कामभोगा इन्धना एव ज्वलन्ति किंपाकफलसमानाश्च विपाके, अकाण्डमनोरथभङ्गकारी च प्रभवति विनिर्जितसुरासुरो मृत्युरिति कलयित्वा बहु मतः । ततः शब्दायिताः सांवत्सरिकाः, भणिताश्च तेन—

---

[१] ०णुन्नाओ ख ।

साहिओ णेहिं पञ्चमो दिवसो । तओ उवणीयाइं अहिसेयमङ्गलाइं । तं जहा–मच्छजुयलं पुण्णकलसो धवलकुसुमाइं महापउमा सिद्धत्थया पुढविपिण्डो वसहो महन्तयं दहियपुण्णं च भण्डयं महारयणाइं गोरोयणा सीहचम्मं धवलायवत्तं भद्दासणं चामराओ दुरुव्वा अच्छसुरा महाधओ गयमओ धन्नाइं दुगुल्लाणि अन्नाणि य एवमाइयाइं पसत्थदव्वाइं ति । एत्थन्तरम्मि परिचिन्तियं राइणा–काऊणमाणन्दकुमारस्स रज्जाहिसेयं तओ गमिस्सामि धम्मघोसगुरुसमीवं ति । एवं च चिन्तयन्तो अहिसेयदिणं पडिच्छमाणो चिट्ठइ ॥

इओ य पुव्वकयकम्मदोसओ अमुणियनरिन्दाहिप्पाओ घडिओ दुम्मइणा सह आणन्दकुमारो । मन्तियं च तेहिं 'कहंचि वञ्चणापओएण वावाएमो महारायं' ति । सुओ अहिसेयवुत्तन्तो । मिच्छाहिनिवेसेण सचित्तदुट्ठयाए य विपरीओ परिणओ आणन्दस्स । चिन्तियं च तेणं–नूणमहमणेण इमिणा ववएसेण मारिउं ववसिओ । ता कहमहमेवं छलिज्जामि । अहवा सच्चए वि एयम्मि वुत्तन्ते अलं मे रज्जेण, जं मे एएण दिन्नं संपज्जइ । तं पुण सलाहणिज्जं, जमेयं वावाइऊण बला घेप्पइ त्ति । एत्थन्तरम्मि सद्दाविओ राइणा

निरूपयत आनन्दकुमारस्य राज्याभिषेकदिवसम् । तैर्भणितम्–यद् देव आज्ञापयति । निरूप्य च कथितस्तैः पञ्चमो दिवसः । तत उपनीतानि अभिषेकमङ्गलानि । तद् यथा–मत्स्ययुगलं पूर्णकलशो धवलकुसुमानि महापद्माः सिद्धार्थाः पृथ्वीपिण्डो वृषभो महद् दधिपूर्णं च भाण्डं महारत्नानि गोरोचना सिंहचर्म धवलातपत्रं भद्रासनं चामरा दूर्वा अच्छसुरा महाध्वजो गजमदो धान्यानि दुकूलानि अन्यानि चैवमादिकानि प्रशस्तद्रव्याणि इति । अत्रान्तरे च परिचिन्तितं राज्ञा–कृत्वाऽऽनन्दकुमारस्य राज्याभिषेकं ततो गमिष्यामि धर्मघोषगुरुसमीपमिति । एवं चिन्तयन् अभिषेकदिनं प्रतीक्षमाणस्तिष्ठति ॥

इतश्च पूर्वकृतकर्मदोषतोऽज्ञातनरेन्द्राभिप्रायो घटितो दुर्मतिना सहानन्दकुमारः । मन्त्रितं च ताभ्यां 'कथंचिद् वञ्चनाप्रयोगेण व्यापादयावो महाराजम्' इति । श्रुतोऽभिषेकवृत्तान्तः । मिथ्याभिनिवेशेन स्वचित्तदुष्टतया च विपरीतः परिणत आनन्दस्य । चिन्तितं च तेन–

आणन्दो । जाव नेच्छइ आगन्तुं, तओ पडिहारदुइओ गओ कुमारभवणं राया । तेण वि य 'न इओ सुन्दरतरो पत्थावो' त्ति कलिऊण पुव्वाणुसयदोसेण सहसा 'हण हण' त्ति भणिऊण उक्खायासिणा अकयपरिरक्खणोवाओ सुविसत्थचित्तो पडिहारं वावाइऊण गाढप्पहारीकओ राया । एत्थन्तरम्मि समुट्ठाइओ कलयलो, संजाओ नयरसेन्नसंखोहो, परिवेढिओ समन्तओ रायसाहणेण आणन्दो, पारद्धो संगामो । तओ राइणा नियसरीरदोहसवहेण सावियं सेन्नं । भणियं च णेण । किं भे इयाणिं जुज्झिएणं ? अहं ताव वावाइओ चेव दट्ठव्वो, मा एयं पि वावाएह, ता करेह रायाभिसेयं एयस्स, एस भे राय त्ति । एत्थन्तरम्मि समाणत्तो दुम्मई 'बन्धेहि णं निविडबन्धेहिं' । तओ 'जं कुमारो आणवेइ' त्ति भणिऊण आसन्नीभूओ य से दुम्मई । पाडिया कुलपुत्तया, निब्भच्छिओ नायरजणो । तओ बन्धाविऊण पच्चइयपुरिसेहिं सुकयपरिरक्खणोवाओ कओ राया । अहिट्ठियं रज्जं, ठावियाओ ववत्थाओ, वसीकयं सामन्तमण्डलं ।

नूनमहमनेन एतेन व्यपदेशेन मारितुं व्यवसितः । ततः कथमहमेवं वञ्च्ये । अथवा सत्येऽपि एतस्मिन् वृत्तान्ते अलं मे राज्येन, यन्मे एतेन दत्तं संपद्यते । तत्पुनः श्लाघनीयम्, यदेतं व्यापाद्य वलाद् गृह्यते इति । अत्रान्तरे शब्दायितो राज्ञा आनन्दः । यावद् नेच्छति आगन्तुम्, ततः प्रतीहारद्वितीयो गतः कुमारभवनं राजा । तेनापि च 'न इतः सुन्दरतरः प्रस्तावः' इति कलयित्वा पूर्वानुशयदोषेण सहसा 'घ्नत घ्नत' इति भणित्वा उत्खातासिनाऽकृतपरिरक्षणोपायः सुविश्वस्तचित्तः प्रतीहारं व्यापाद्य गाढप्रहारीकृतो राजा । अत्रान्तरे समुत्थितः कलकलः, संजातो नगरसैन्यसंक्षोभः, परिवेष्टितः समन्ततो राजसाधनेनानन्दः, प्रारब्धः संग्रामः । ततो राज्ञा निजशरीरद्रोहशपथेन शापितं सैन्यम् । भणितं च तेन–किं युष्माकमिदानीं युद्धेन, अहं तावद् व्यापादित एव द्रष्टव्यः, मा एतमपि व्यापादयत, ततः कुरुत राज्याभिषेकमेतस्य, एष युष्माकं राजेति । अत्रान्तरे समाज्ञप्तो दुर्मतिः 'वधान तं निवीडवन्धैः, ततो 'यत्कुमार आज्ञापयति' इति भणित्वाऽऽसन्नीभूतश्च तस्य दुर्मतिः । पातिताः कुलपुत्रकाः, निर्भर्त्सितो नागरजनः । ततो वन्धयित्वा प्रत्ययितपुरुषैः सुकृतपरि-

तओ अणुसयवसेण नेयाविओ नयरचारयं नरवई । तं च अच्चन्तनिम्महमाणपुरीसकलमलगन्धं फुडियभित्तिपसुत्तसिरीसिवं भिणिभिणायमाणमसयमक्खियाजालं दरिविवरमुहविणिग्गयमूसउक्केरं उवरिविलम्बमाणोरयनिम्मोयं लूयातन्तुविरइयवियाणयं, वासहरं पिव दुस्समाए, लीलाभूमिं पिव अधम्मस्स, सहोयरं पिव सीमन्तयस्स, सहा[1] विव सव्वदुक्खसमुदयाणं, कुलहरं पिव सव्वजायणाणं, विस्सासभूमिं पिव मच्चुणो, सिद्धिखेत्तं पिव कयन्तस्स त्ति । तओ 'महाचारयं नीओ देवो' त्ति सोऊण सहसा विमुक्कक्कन्दभेरवं अणवरयनिवडमाणेहिं महल्लमुत्ताहलसरिसेहिं अकज्जलबाहबिन्दूहिं संपाइयहारसोहं देवसोएणं चेव परिमिलाणदेहं निरुज्झमाणं पि निउत्तपुरिसेहिं मङ्गलमणिवलय[2]झणझणारवुद्दामं सभूयाहिं बलाओ पेल्लिऊण ते उरपोट्टकुट्टणुज्जयं तओ य अणुइयधरणिपरिसक्कणेण सासससमाऊरियाणणं परिचत्तकुडिलभावत्तणेण वि य 'अदंसणीया देवावत्थ' त्ति सूयगेहिं पिव लम्बालएहिं निरुद्धनयणपसरं चारयमेव

क्षणोपायः, कृतो राजा । अधिष्ठितं राज्यम्, स्थापिता व्यवस्थाः, वशीकृतं सामन्तमण्डलम् । ततोऽनुशयवशेन नायितो नगरचारकं नरपतिः । तच्चात्यन्तनिर्मथ्यमानपुरीषकलमलगन्धं स्फुटितभित्तिप्रसुप्तसरीसृपं भणभणायमानमशकमक्षिकाजालं दरीविवरमुखविनिर्गतमूषकोत्करं उपरिविलम्बमानोरगनिर्मोकं लूतातन्तुविरचितवितानकं, वासगृहमिव दुःषमायाः, लीलाभूमिरिवाधर्मस्य, सहोदरमिव सिमन्तकस्य, सखा इव सर्वदुःखसमुदयानाम्, कुलगृहमिव सर्वयातनानाम्, विश्वासभूमिरिव मृत्योः, सिद्धिक्षेत्रमिव कृतान्तस्येति । ततो 'महाचारकं नीतो देवः' इति श्रुत्वा सहसा विमुक्ताक्रन्दभैरवं अनवरतनिपतद्भिर्महन्मुक्ताफलसदृशैरकज्जलबाष्पबिन्दुभिः संपादितहारशोभं देवशोकेनैव परिम्लानदेहं निरुध्यमानमपि नियुक्तपुरुषैः मङ्गलमणिवलयझणझणारवोद्दामं स्वभुजाभिर्बलात् पीडयित्वा तान् उरःपेट्टकुट्टनोद्यतं ततश्चाऽनुचितधरणीपरिष्वष्कनेन श्वाससमापूरिताननं परित्यक्तकुटिलभावत्वेनापि च 'अदर्शनीया देवावस्था' इति सूचकै-

---

१ सहं पिव क-ग २ रण ०ख

पत्तं कुसुमावलीपमुहमन्तेउरं ति । दिट्ठो य तेण काललोहमयनियलसमाऊरिओ नरवई । तओ असोयपल्लवागारेहिं हत्थेहिं 'अणुचियासेवणबहुलो संसारो' त्ति दंसयन्तं पिव हारलयावहणजणियखेयं पिव वच्छत्थलं ताडयन्तं अहिययरमक्कन्दिउं पवत्तं ति। तओ राइणा आरक्खिगेहिं च कहकहवि निवारियं । भणियं च राइणा–किमणेणायासमेत्तफलेण अहम्माणुबन्धिणा य सोएणं। अइबहुविचित्तरूवो खु एस संसारो, खेलणयभूया इमस्स सव्वे सरीरिणो, दुन्निवारो य पसरो पुव्वकयकम्मस्स, जलहरन्तरविणिग्गयसोयामणीवलयचञ्चला लच्छी, सुविणयसमो संगमो । एवमवसाणाणि एत्थ रागविलसियाणि । ता किमेइणा अविवेयजणाणुसरिसेण पलविएण ? । पत्तमेव तुब्भेहि जीवलोयसारभूयं जिणवयणं । ता तं चेव अणुचिट्ठेह । न तं मोत्तूण अन्नो दुक्खक्खओवाओ त्ति। तओ तमेयमायण्णिय एवमेवेयं न अन्नह' त्ति कलिऊण य अणुजाणाविऊण नरवइं जीवियनिरवेक्खयाए बला चेवाणन्दस्स गन्धव्वदत्ताए

रिव लम्बालकैर्निरुद्धनयनप्रसरं चारकमेव प्राप्तं कुसुमावलीप्रमुखमन्तःपुरम्–इति । दृष्टस्तेन काललोहमयनिगडसमापूरितो नरपतिः । ततोऽशोकपल्लवाकारैर्हस्तैः 'अनुचितासेवनबहुलः संसारः' इति दर्शयन्तमिव हारलतावहनजनितखेदमिव वक्षःस्थलं ताडयन्तमधिकतरमाक्रन्दितुं प्रवृत्तमिति । ततो राज्ञा आरक्षकैश्च कथंकथमपि निवारितम् । भणितं राज्ञा–किमनेनायासमात्रफलेन अधर्मानुबन्धिना च शोकेन ? । अतिबहुविचित्ररूपः खलु एष संसारः, खेलनकभूता अस्य सर्वे शरीरिणः, दुर्निवारश्च प्रसरः पूर्वकृतकर्मणः, जलधरान्तरविनिर्गतसौदामिनीवलयचञ्चला लक्ष्मीः, स्वप्नसमः संगमः, एवमवसानानि अत्र रागविलसितानि । ततः किमेतेनाविवेकजनानुसदृशेण प्रलपितेन । प्राप्तमेव युष्माभिर्जीवलोकसारभूतं जिनवचनम् । ततस्तदेवानुतिष्ठत, न तन्मुक्त्वाऽन्यो दुःखक्षयोपाय इति । ततस्तदेतदाकर्ण्य 'एवमेतद् नान्यथा' इति कलयित्वा चानुज्ञाप्य नरपतिं जीवितनिरपेक्षतया बलादेवानन्दस्य* गन्धर्वदत्ताया विद्याधरश्रमण्याः

---

* आज्ञां गृहीत्वेति शेषः

विज्जाहरसमणियाए सयासे पवन्नं पव्वज्जं ति ॥

इओ य पइदिणं कयत्थणाए वि कोहवसमगच्छमाणेण 'एद्दहमेत्तं मे जीवियं कालोइयं संपयमणसणं'ति पडिवन्नं राइणा। आरक्खिगेहिं निवेइयं आणन्दस्स, कुविओ एसो, पेसिओ तेण देवसम्मो नाम नियमहल्लओ 'गच्छ भुञ्जावेहि'त्ति। वत्तव्वो य एसो 'अभुञ्जमाणं नियमा वावाएमि'त्ति। गओ देवसम्मो, दिट्ठो तेण राया, भणिओ य–देव! देव्ववसयाणं पाणिणं विसमा कज्जगइ त्ति। एसो य देव्वो नाम अणाराहणीओ विणएण, अगुणगाही गुणीणं, अकालन्नू समीहियस्स, केवलमणत्थो जणाणं, मत्तहत्थि व्व सच्छन्दयारी, गङ्गापवाहो व्व उज्जुकुडिलो [1]महाहवो व्व निवायदक्खो, विसगण्ठि व्व नाणुकूलो रसाणं, पडिकूलो य समीहियाणं, अणुकूलो असमीहियस्स। ता जइ वि एस एवंभूओ, तहावि पुरिसेण खणमवि न पुरिसयारो मोत्तव्वो त्ति। जेण महाराय! पुव्वोवज्जियाणं कम्माणं चेव एयं नामं देव्वो, तं च पुरिसयारजेयमेव वट्टइ ति। ता अवलम्बेउ देवो पुरिसयारं, करेउ आहारगहणं। जीवमाणो हि पुरिसो

सकाशे प्रपन्ना प्रव्रज्येति ॥

इतश्च प्रतिदिनं कदर्थनयाऽपि क्रोधवशमगच्छता 'एतावन्मात्रं मे जीवितं, कालोचितं साम्प्रतमनशनम्' इति प्रतिपन्नं राज्ञा। आरक्षकैर्निवेदितमानन्दस्य, कुपित एषः, प्रेषितस्तेन देवशर्मा नाम निजमहत्तरः 'गच्छ भोजय' इति। वक्तव्यश्चैष 'अभुञ्जानं नियमाद् व्यापादयामि' इति। गतो देवशर्मा, दृष्टस्तेन राजा, भणितश्च–देव! दैववशगानां प्राणिनां विषमा कार्यगतिरिति। एष च दैवो नाम अनाराधनीयो विनयेन, अगुणग्राही गुणिनाम्, अकालज्ञः समीहितस्य, केवलमनर्थो जनानाम्, मत्तहस्तीव स्वच्छन्दचारी, गङ्गाप्रवाह इव ऋजुकुटिलः, महाहव इव निपातदक्षः, विषयग्रन्थिरिव नानुकूलो रसानाम्, प्रतिकूलश्च समीहितानाम्, अनुकूलोऽसमीहितस्य। ततो यद्यपि एष

---

[1] अंधयारो व्व ख

लङ्घिऊणावयं अवस्सं देव ! संपयं पावेइ त्ति। राइणा भणियं–भो देवसम्म ! न मुक्को मए चेव अहाकालाणुरूवो पुरिसयारो। पडिवन्ना य भावओ पव्वज्जा। अओ न संपयाभिलासपरं मे चित्तं। उचियकालं च नाऊण पडिवन्नं अणसणं। अओ न आहारगहणं करेमि त्ति। तेण भणियं–अकीरमाणम्मि आहारगहणे सुओ ते कुप्पिस्सइ। राइणा भणियं–अकारणो से कोवो, सच्चपइन्ना खु तवस्सिणो हवन्ति। तेण भणियं–देव ! विइयवुत्तन्तो चेव तुमं कुमारचरियस्स; ता मा ते पमायं करिस्सइ। एत्थन्तरम्मि 'चिरायइ देवसम्मो' त्ति संजायामरिसवेगो घेत्तूण खग्गं आगओ आणन्दो। भणियं च तेण–जइ न आहारगहणं करेसि,ता इमिणा कयन्तजीहाणुगारिणा करवालेण सीसं ते छिन्दामि। राइणा भणियं–

जाणन्तो मरणन्तं देहावासं असासयमसारं । को उव्विएज्ज नरवर ! मरणस्स अवस्स गन्तव्वे ॥

एवंभूतः, तथाऽपि पुरुषेण क्षणमपि न पुरुषकारो मोक्तव्य इति। येन महाराज ! पूर्वोपार्जितानां कर्मगामेवेतन्नाम दैवम्, तच्च पुरुषकारजेयमेव वर्तते इति। ततोऽवलम्बतां देवो पुरुषकारम्, करोतु आहारग्रहणम्। जीवन् हि पुरुषो लङ्घित्वाऽऽपदं अवश्यमेव संपदं प्राप्नोतीति। राज्ञा भणितम्-भो देवशर्मन् ! न मुक्त एव मया यथाकालानुरूपः पुरुषकारः, प्रतिपन्ना च भावतः प्रव्रज्या। अतो न संपदभिलाषपरं मे चित्तम्। उचितकालं च ज्ञात्वा प्रतिपन्नमनशनम्। अतो न आहारग्रहणं करोमि इति। तेन भणितम्–अक्रियमाणे आहारग्रहणे सुतस्तुभ्यं कुपिष्यति। राज्ञा भणितम्–अकारणस्तस्य कोपः, सत्यप्रतिज्ञाः खलु तपस्विनो भवन्ति। तेन भणितम्-देव ! विदितवृत्तान्त एव त्वं कुमारचरितस्य, ततो मा ते प्रमादं कार्षीत्। अत्रान्तरे 'चिरायते देवशर्मा' इति संजातामर्षवेगो गृहीत्वा खड्गमागत आनन्दः। भणितं च तेन–यदि नाहारग्रहणं करोषि, ततोऽनेन कृतान्तजिह्वानुकारिणा करवालेन शीर्षं ते छिनद्मि। राज्ञा भणितम्—

जानन् मरणान्तं देहावासमशाश्वतमसारम्। क उद्विज्याद् नरवर ! मरणादवश्यगन्तव्ये ॥

गब्भपभिइमावीई सलिलच्छेए सरं व सूसन्तं । अणुसमयं मरमाणं जियइ त्ति जणो कहं भणइ? ॥
संपत्थियाण परलोगमेगसत्थेण सत्थियाणं व। जइ तत्थ कोइ पुरओ वच्चइ भयकारणं किमिह ? ॥
जीयमणिच्चमवस्सं मरणं ति मणम्मि निच्छयं जस्स । सूणायारपसुस्स व का आसा जीविए तस्स ? ॥

हंदि ! जराधणुहत्थो वाहिसयविइण्णसायगो एइ । माणुसमयजूहवहं विहाणवाहो करेमाणो ॥
न गणेइ पच्चवायं न य पडियारं चिराणुवत्तिं वा । सच्छन्दसुहं विहरइ हरि व्व मच्चू मयकुलेसु ॥
एक्के च्चिय निव्विण्णा पुणो पुणो जाइउं च मरिउं च । जे भवमच्चुव्विग्गा भवरोगहरं अणुचरन्ति ॥
जरमरणरोगसमणं जिणवयणरसायनं अमयसारं । पाउं परिणामसुहं नाहं मरणस्स बीहेमि ॥

गर्भप्रभृति आवीच्या सलिलच्छेदे सर इव शुष्यत्। अनुसमयं म्रियमाणं जीवतीति जनः कथं भणति? ॥
संप्रस्थितानां परलोकमेकसार्थेण सार्थिकानामिव। यदि तत्र कोऽपि पुरतो व्रजति भयकारणं किमिह? ॥
जीवितमनित्यमवश्यं मरणमिति मनसि निश्चयं यस्य। सूनागारपशोरिव काऽऽशा जीविते तस्य? ॥

हन्त! जराधनुर्हस्तो व्याधिशतवितीर्णसायक एति। मानुषमृगयूथवधं प्रभातव्याधः कुर्वन् ॥
न गणयति प्रत्यवायं न च प्रतिकारं चिरानुवृत्तिं वा। स्वच्छन्दसुखं विहरति हरिरिव मृत्युर्मृगकुलेषु ॥
एके एव निर्विण्णाः पुनः पुनर्जनितुं च मर्तुं च। ये भवमृत्यूद्विग्ना भवरोगहरमनुचरन्ति ॥
जरामरणरोगशमनं जिनवचनरसायनममृतसारम्। प्राप्य परिणामसुखं नाहं मरणाद् विभेमि ॥

झोसियपावमलाणं परिसाडियवन्धलोहनियलाणं । किं कुणइ कालमरणं कयपडियारं मणुस्साणं ॥
अज्जियतवोधणाणं कलेवरहरे वि निप्पिवासाणं । संलिहियसरीराणं मरणं पि वरं सुविहियाणं ॥
सुगहियतवपत्थयणा निव्विसिऊण नियमेण अप्पाणं । मरणं मग्गन्ति मणोरहेहि धीरा धिइसहाया ॥
जस्स मयस्सेगयरो सग्गो मोक्खो व होइ नियमेण । मरणं पि तस्स नरवर ! ऊसवभूयं मणूसस्स ॥
अणवरयरोगभासुरवसणविसाणुगयदीहदाढस्स । कत्थ गओ वा मुच्चइ कयन्तकण्हाहिपोयस्स ॥
न वि जुद्धं न पलायं कयन्तहत्थिम्मि अग्घइ भयं वा । न य से दीसइ हत्थो गेण्हइ य दढं अमोक्खो य ॥
जह वा लुणाइ सासाइ कासओ परिणयाइ कालेण । इय भूयाइं कयन्तो लुणाइ जायाइं जायाइं ॥

त्यक्तपापमलानां परिशाटितबन्धलोभनिगडानाम् । किं करोति कालमरणं कृतप्रतिकारं मनुष्याणाम् ? ॥
अर्जिततपोधनानां कलेवरगृहेऽपि निष्पिपासानाम् । संलिखितशरीराणां मरणमपि वरं सुविहितानाम् ॥
सुगृहीततपःपथ्यदना निर्वेश्य नियमेनात्मानम् । मरणं मार्गयन्ति मनोरथैर्धीरा धृतिसहायाः ॥
यस्य मृतस्यैकतरः स्वर्गो मोक्षो वा भवति नियमेन । मरणमपि तस्य नरवर ! उत्सवभूतं मनुष्यस्य ॥
अनवरतरोगभासुरव्यसनविषानुगतदीर्घदा(ढात्)ढस्य । कुत्र गतो वा मुच्यते कृतान्तकृष्णाहिपो(तात्)तस्य ॥
नापि युद्धं न प्रलापं कृतान्तहस्तिनि अर्घति भयं वा । न च तस्य दृश्यते हस्तो गृह्णाति च दढममोक्षश्च ॥
यथा वा लुनाति सस्यानि कर्षकः परिणतानि कालेन । इति भूतानि कृतान्तो लुनाति जातानि जातानि ॥

---

१ वन्धु० क

जइ ताव मच्चुपासा सच्छन्दसुहं सुरेसु वियरन्ति । अच्चन्तमणोयारो जत्थ जरारोगवाहीणं ॥
किं पुण वाहिजरारोगसोगनिच्चुद्दुयम्मि माणुस्से । मच्चुस्स सो पमाओ जं जियइ नरो निमेसं पि ॥
ता मा अधीरजणसेवियस्स अयसस्स देहि उ(अ)वयासं । न हु मच्चुदाढलीढं इन्दो वि पहू नियत्तेउं ॥
इय मयमारणमेत्तेण वच्छ ! मा नियकुलं कलङ्केहि । गेण्हामि कहं चत्तं हन्त ! सवायाए आहारं ? ॥
सोऊण इयं वयणं कोवाणलजलियरत्तनयणेण । 'जंपइ अज्जाऽवि कहं' पहओ सीसम्मि खग्गेणं ॥
परिचिन्तियं च तेणं 'नमो जिणाणं' ति मुणियतत्तेणं । 'पुव्वकयकम्मदोसो एसो' त्ति विसुद्धभावेणं ॥
सव्वो पुव्वकयाणं कम्माणं पावए फलविवागं । अवराहेसु गुणेसु य निमित्तमेत्तं परो होइ ॥
एवं च चिन्तयन्तो पुणो वि हन्तूण पावकम्मेणं । विणिवाइओ महप्पा अकलुसचित्तो सकलुसेणं ॥

यदि तावन्मृत्युपाशाः स्वच्छन्दसुखं सुरेषु विचरन्ति । अत्यन्तमनवतारो यत्र जरारोगव्याधीनाम् ॥
किं पुनर्व्याधिजरारोगशोकनित्योद्द्रुते मानुषे । मृत्योः स प्रमादो यज्जीवति नरो निमेषमपि ॥
ततो माऽधीरजनसेवितस्यायशसो देहि अवकाशम् । न खलु मृत्युदाढालीढं इन्द्रोऽपि प्रभुर्निवर्तयितुम् ॥
इति मृतमारणमात्रेण वत्स ! मा निजकुलं कलङ्कय । गृह्णामि कथं त्यक्तं हन्त ! स्ववाचा आहारम् ॥
श्रुत्वेदं वचनं कोपानलज्वलितरक्तनयनेन । जल्पति अद्यापि कथं प्रहतः शीर्षे खड्गेन ॥
परिचिन्तितं च तेन 'नमो जिनेभ्यः' इति ज्ञाततत्त्वेन । पूर्वकृतकर्मदोष एष इति विशुद्धभावेन ॥
सर्वः पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकम् । अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥

मरिऊण य उववन्नो सणंकुमारम्मि सुरवरो जुइमं । अह पञ्चसागराऊ लीलारामे विमाणम्मि ॥
इयरो वि य काऊणं रज्जं मरिऊण रयणपुढवीए । उववन्नो नेरइओ उक्कोसाऊ महाघोरो ॥

याकिनीमहत्तरासूनु-परमगुणानुरागि-परमसत्यप्रिय-भगवत्-श्रीहरिभद्रसूरिवररचितायां
'समराइच्चकहाए' बीओ भवो समत्तो ।

एवं च चिन्तयन् पुनरपि हत्वा पापकर्मणा। विनिपातितो महात्माऽकलुषचित्तः सकलुषेण ॥
मृत्वा चोपपन्नः सनत्कुमारे सुरवरो द्युतिमान्। अथ पञ्चसागरायुर्लीलारामे विमाने ॥
इतरोऽपि च कृत्वा राज्यं मृत्वा रत्नपृथिव्याम्। उपपन्नो नैरयिक उत्कृष्टायुर्महाघोरः ॥

तइओ भवो ।

वक्खायं जं भणियं सीहा-णंदा य तह पियापुत्ता । सिहि-जालिणिमाइसुआ एत्तो एअं पवक्खामि ॥

अत्थि इहेव जम्बुद्दीवे, अवरविदेहे खेत्ते अपरिमियजणनिवासं, अणणुहूयवाहिवेयणं, अदिट्ठपरचक्कविब्भमं, [1]सुन्दरपुरनायगभूयं कोसंबनाम नयरं । जत्थ सरलसहावो, थिरसिणेहाणुबन्धो, अणङ्गरायहाणी, धम्मफलकप्पो इत्थियाजणो । जत्थ पियंवओ, सच्चवयणो, पढमाभिभासी, धम्मनिरओ य मणुस्सवग्गो । तत्थ य अणेयसमरसंघट्टविणिज्जियदरियनरिन्दावणयपल्हत्थवियडमउडकोडिरयणप्पहारञ्जियचरणजुयलो राया नामेण अजियसेणो त्ति । तस्स य सयलरज्जचिन्तओ, अत्ताणनिव्विसेसो इन्दसम्मो नाम माहणसचिवो । सुहंकरा से भारिया ॥ इओ य सो आणन्दनारओ सागरोवमन्तम्मि नरए खविऊण, अन्ने वि किंचूणे चत्तारि सागरोवमे संसारे

व्याख्यातं यद् भणितम् सिंहा-ऽऽनन्दौ च तथा पितृपुत्रौ । शिखि-जालिनिमातृसुते इत एतत प्रवक्ष्यामि ॥

अस्ति इहैव जम्बुद्वीपे, अपरविदेहे क्षेत्रे अपरिमितजननिवासम् , अननुभूतव्याधिवेदनम् , अदृष्टपरचक्रविभ्रमम् , सुन्दरपुरनायकभूतं कौशाम्बं नाम नगरम् । यत्र सरलस्वभावः, स्थिरस्नेहानुबन्धः, अनङ्गराजधानी, धर्मफलकल्पः स्त्रीजनः । यत्र प्रियंवदः, सत्यवचनः; प्रथमाऽभिभाषी धर्मनिरतो मनुष्यवर्गः । तत्र च अनेकसमरसंघट्टविनिर्जितदृप्तनरेन्द्रावनतपर्यस्तविकटमुकुटकोटिरत्नप्रभारञ्जितचरणयुगलो राजा नाम्ना अजितसेन इति । तस्य च सकलराज्यचिन्तकः, आत्मनिर्विशेष इन्द्रशर्मा नाम ब्राह्मणसचिवः । शुभंकरा तस्य भार्या ॥

---

[1] सुरपुरनायभूयं ख

समाहिण्डिय इन्दसम्मस्स माहणस्स सुहंकराए भारियाए कुच्छिंसि इत्थियत्ताए उववन्नो त्ति। जाया उचियसमएणं। कयं से नामं जालिणि त्ति कहाणयविसेसेण। पत्ता जोव्वणं। दिन्ना तस्स चेव राइणो बुद्धिसागराभिहाणसचिवपुत्तस्स बम्भदत्तस्स। कयं पाणिग्गहणं। भुञ्जमाणाण भोए गओ कोइ कालो॥

इओ य सो सीहदेवो तओ देवलोगाओ चविऊण अचिन्तमाहप्पयाए कम्मस्स, तीसे चेव जालिणीए कुच्छिंसि पुत्तत्ताए उववन्नो त्ति। दिट्ठो य तीए तीए चेव रयणीए सुमिणओ–जहा किर सुवण्णमयपुण्णकलसो मे उयरं पविट्ठो, सो य असंजायपरिओसाए विणिग्गओ समाणो कहकह वि भग्गो त्ति। तं च दट्ठूण ससज्झसा वि य विउद्धा एसा। जाओ से संकिण्णो सुहरसो। न साहिओ य तीए सुमिणओ दइयस्स। तओ से वड्ढिउं पयत्तो गब्भो। जाया से देहमणपीडा। चिन्तियं च तीए–'वावाएमि ताव एयं पाव-

---

इतश्च स आनन्दनारकः सागरोपममन्ते नरके क्षपयित्वा, अन्यानि अपि किञ्चिदूनानि चत्वारि सागरोपमाणि संसारे समाहिण्ड्य इन्द्रशर्मणो ब्राह्मणस्य शुभंकराया भार्यायाः कुक्षौ स्त्रिकतया उपपन्न इति। जाता उचितसमयेन। कृतं तस्या नाम जालिनी इति कथानकविशेषेण। प्राप्ता यौवनम्। दत्ता तस्य एव राज्ञो बुद्धिसागराभिधानसचिवपुत्रस्य ब्रह्मदत्तस्य। कृतं पाणिग्रहणम्। भुञ्जानयोर्भोगान् गतः कश्चित् कालः॥

इतश्च च सिंहदेवः ततो देवलोकात् च्युत्वा अचिन्त्यमाहात्म्यतया कर्मणः, तस्या एव जालिन्याः कुक्षौ पुत्रतया उपपन्न इति। दृष्टश्च तया तस्यामेव रजन्यां स्वप्नकः–यथा किल सुवर्णमयपूर्णकलशो मम उदरं प्रविष्टः, स च असंजातपरितोषाया विनिर्गतः सन् कथंकथमपि भग्न इति। तं च दृष्ट्वा ससाध्वसा इव विबुद्धा एषा। जातस्तस्या संकीर्णः सुखरसः। न कथितश्च तया स्वप्नको दयितस्य। ततः स वर्धितुं प्रवृत्तो गर्भः। जाता तस्य देह–मनःपीडा। चिन्तितं च तया–'व्यापादयामि तावद् एतं पापगर्भम्'

गब्भं' ति । पउत्ताइं गब्भसाडणाइं । कम्मविवागओ न विवन्नो गब्भो । मुणिओ य वुत्तन्तो बम्भदत्तेण । निउत्तो तेण परियणो पसूइसमए, जहा गब्भविवत्ती न हवइ तहा तुब्भेहिं जइयव्वं; अवि य भट्टिणीपरिओसनिमित्तं कहंचि चित्तं से वञ्चिऊण मम निवेइयव्वो त्ति । तओ जाओ से दोहलओ–करेमि सव्वसत्ताणमाणन्दं, संपाडेमि देवाययणाणं महापूयाओ, पूएमि भयवन्ते धम्मनिरए महातवस्सी, सुणिमो किंचि परलोयमग्गं ति । संपाडिओ से भत्तारेण डोहलो । गब्भपभावेण जाया मणोरमा लोयस्स । पत्तो य सूइसमओ । पसूया एसा । चिन्तियं च तीए–कहं पुण एस एद्दहमेत्तपरियणसमक्खं वावाइयव्वो त्ति ? । एत्थन्तरम्मि मुणियतयभिप्पायाए बम्भदत्तवयणं सरिऊण भणियं बन्धुजीवाभिहाणाए बालसहीए । भट्टिणि[1] ! पावो खु एस गब्भो । ता अलमिमिणा किलेसाऽऽयासकारएण, वरं विइञ्चिओ एसो त्ति । तओ कसायपरवसाए वावायणम्मि सहियणलज्जालुयाए भणियं जालिणीए–'तुब्भे जाणह'

इति । प्रयुक्तानि गर्भशातनानि । कर्मविपाकतो न विपन्नो गर्भः । ज्ञातश्च वृत्तान्तो ब्रह्मदत्तेन । नियुक्तस्तेन परिजनः प्रसूतिसमये, यथा गर्भविपत्तिर्न भवति तथा युष्माभिः यतितव्यम् , अपि च भर्तृपरितोषनिमित्तं कथंचित् चित्तं तस्य वञ्चित्वा मम निवेदयितव्य इति । ततो जातस्तस्या दोहदः-करोमि सर्वसत्त्वानामानन्दम्, संपादयामि देवतायतनानां महापूजाः, पूजयामि भगवतो धर्मनिरतान् महातपस्विनः, शृणुमः कंचित् परलोकमार्गम्–इति । संपादितस्तस्या भर्त्रा दोहदः । गर्भप्रभावेण जाता मनोरमा लोकस्य । प्राप्तश्च सूतिसमयः। प्रसूता एषा । चिन्तितं च तया–कथं पुनरेष एतावन्मात्रपरिजनसमक्षं व्यापादयितव्य ? इति । अत्रान्तरे ज्ञाततदभिप्रायया ब्रह्मदत्तवचनं स्मृत्वा भणितं बन्धुजीवाभिधानया बालसख्या । भर्त्रि ! पापः खलु एष गर्भः । ततोऽलमनेन क्लेशा–ऽऽयासकारकेन, वरं विभक्त (विनाशितः) एष इति । ततः कषायपरवशया व्यापादने सखीजनलज्जालुतया भणितं जालिन्या–'यूयं जानीत' इति । ततोऽपनीतो दारकः,

---

[1] वहिणि ख

त्ति। तओ अवणीओ दारओ, निवेइओ बम्भदत्तस्स। कयं से तेण सयलं सुत्थं। नीणिओ लोगवाओ 'वावन्नगब्भा भट्टिणि' त्ति। एवं च अइक्कन्तो कोइ कालो। पइट्ठावियं नामं बालयस्स 'सिहि' त्ति। वड्ढिओ सो कलाकलावेण देहोवचएण य। संपाइयं से निरवसेसं कालोचियं बम्भदत्तेणं। गहिओ पच्छा उदरपुत्तओ' त्ति। विन्नाओ य वुत्तन्तो इमिणा सुमिणयदंसण-गब्भसाडणाइओ य जणणीए। वेरग्गिओ एसो॥

एत्थन्तरम्मि मुणियवुत्तन्ता पुत्तस्स कसाइया से जणणी। चिन्तियं च तेण–किह?

एवंविहा कसाया पावा भवविडविमूलजल[1]ओघा। मोक्खत्थमुज्जएहिं वज्जेयव्वा पयत्तेण॥
एत्तो कम्मविवुड्ढी, तओ भवो, तत्थ दुक्खसंघाओ। तत्तो उव्विग्गमाणो पयहेज्ज तए महापावे॥

भणियं च—

निवेदितो व्रह्मदत्तस्य। कृतं तस्य तेन सकलं सुस्थम्। नीतो लोकवादः 'व्यापन्नगर्भा भर्त्री' इति। एवं च अतिक्रान्तः कश्चित् कालः। प्रतिष्ठापितं नाम वालकस्य 'शिखी' इति। वर्धितः स कलाकलापेन देहोपचयेन च। संपादितं तस्य निरवशेषं कालोचितं व्रह्मदत्तेन। गृहीतः पश्चात् 'उदरपुत्रः' इति। विज्ञातो वृत्तान्तोऽनेन स्वप्नदर्शन-गर्भशातनादिकश्च जनन्याः। वैराग्यित एषः॥

अत्रान्तरे ज्ञातवृत्तान्ता पुत्रस्य कषायिता तस्य जननी। चिन्तितं च तेन–कस्मात्?

एवंविधाः कषायाः पापा भवविटपिमूलजलदौघाः। मोक्षार्थमुद्यतैः वर्जयितव्याः प्रयत्नेन॥
इतः कर्मविवृद्धिः, ततो भयः, तत्र दुःखसंघातः। तत उद्विजमानः प्रजह्यात् तकान् महापापान्॥

---

[1] दो ग.

कलुसफलेण न जुज्जइ किं चित्तं तत्थ जं विगयरागो । सन्ते वि जो कसाए निगिण्हइ सो वि तत्तुल्लो ॥

तक्कसाओदएणं च सा कुविया बम्भदत्तस्स । परिचत्तं च सयलकरणिज्जं । भणिओ बम्भदत्तो । एयं वा पियं करेहि, ममं व त्ति, एयम्मि अपरिचत्ते नाहं पाणसाहारणं उदयं पि गेण्हामि त्ति । निसामिओ एस वुत्तन्तो सिहिकुमारेण । [१]अच्चुव्विग्गो निग्गओ गेहाओ । चिन्तियं च तेण—पेच्छ मे पावपरिणइं, जेण जणणी वि एवं वट्टइ त्ति । एयवइयरेणं च ताओ वि मे दुहिओ । ता न जुत्तं मे इह [२]अच्छिउं । एवं चिन्तिऊणमणापुच्छिऊण तायं निग्गओ नयराओ ॥

गओ असोगवणुज्जाणं । दिट्ठो य तत्थ असोयपायवतलगओ, स[३]सिस्सपरिवारिओ, एगविहसंजमरओ, दोअसज्झाणवि[४]रहिओ, तिदण्डरहिओ, चउक्कसायमहणो, पञ्चिन्दियनिग्गहपरो, छज्जीवनिकायवच्छलो, सत्तभयविप्पमुक्को, अट्ठमयट्ठाणरहिओ, नवबम्भचे-

---

भणितं च—

कलुषफलेन न युज्यते किं चित्रं तत्र यद् विगतरागः । सतोऽपि यः कषायान् निगृह्णाति सोऽपि तत्तुल्यः ॥

तत्कषायोदयेण च सा कुपिता ब्रह्मदत्तस्य । परित्यक्तं सकलकरणीयम् । भणितो ब्रह्मदत्तः । एतं वा प्रियं कुरु, मां वा इति, एतस्मिन् अपरित्यक्ते नाऽहं प्राणसंधारणमुदकमपि गृह्णामि इति । निशमित एष वृत्तान्तः शिखिकुमारेण । अत्युद्विग्नो निर्गतो गेहात् । चिन्तितं च तेन-प्रेक्षस्व मम पापपरिणतिम् , येन जनन्यपि एवं वर्तत इति । एतद्व्यतिकरेण च तातोऽपि मम दुःखितः । ततो न युक्तं मम इह आसितुम् । एवं चिन्तयित्वा अनापृच्छ्य तातं निर्गतो नगरात् ॥

गतोऽशोकवनोद्यानम् । दृष्टश्च तत्र अशोकपादपतलगतः, स्वशिष्यपरिवारितः, एकविधसंयमरतः, द्विअसद्ध्यानविरहितः, त्रिदण्ड-

---

१ अच्चुव्विग्गओ ख २ इहासिउं क ३ सुससिस्स० ख ४ विरओ ख

र[1]गुत्तो दसविहधम्मसुट्ठियमणो, एक्कारसंगनाणी, बारसतवचरणकम्मनिरओ य [2]विजयसिंहो नामायरिओ त्ति। तओ तं दट्ठूण समुप्पन्ना तस्स पीती। चिन्तियं च तेण–धन्नो खु एसो, जो अणवट्ठियसिणेहविब्भमे संसारे, एवं धम्मे निरओ त्ति। ता पुच्छामि ताव एयं, किं पुण एयस्स निव्वेयकारणं, जेण एसो एवं धम्मे निरओ त्ति। गओ तस्स समीवं। सविणयं पणमिओ भयवं। कओ से [3]गुरुणा वि धम्मलाहो। उवविट्ठो तस्स पायमूले। पुच्छिओ य भयवं–किं ते निव्वेयकारणं? जेणं तुमं एवं पि सव्वङ्गसुन्दराहिरामो, सुन्दराहिरामयाओ चेव पिसुणियनियविभववित्थारो, विभववित्थारा संघियसयणवग्गो, सयणवग्गनिरवेक्खमिमं ईइसं निस्सङ्गयं पवन्नो सि। गुरुणा भणियं–सुण, किमिह अट्ठिमंसरुहिरसंगए सरीरे वि सुन्दरत्तं? को वा आयासमेत्तफले विहववित्थारे पडिबन्धो, को वा सुमिणयसमागमचञ्चले सयणे त्ति। अवि य—

रहितः, चतुष्कषायमथनः, पञ्चेन्द्रियनिग्रहपरः, षड्जीवनिकायवत्सलः, सप्तभयविप्रमुक्तः अष्टमदस्थानरहितः, नवब्रह्मचर्यगुप्तः, दशविधधर्मसुस्थितमनाः, एकादशाङ्गज्ञानी, द्वादशतपश्चरणकर्मनिरतश्च विजयसिंहो नाम आचार्य इति। ततः तं दृष्ट्वा समुत्पन्ना तस्य प्रीतिः। चिन्तितं च तेन–धन्यः खलु एषः, योऽनवस्थितस्नेहविभ्रमे संसारे एवं धर्मे निरत इति। ततः पृच्छामि तावत् एनं, किं पुनः एतस्य निर्वेदकारणं? येन एषः एवं धर्मे निरत इति। गतस्तस्य समीपम्। सविनयं प्रणतो भगवान्। कृतस्तस्य गुरुणा अपि धर्मलाभः। उपविष्टस्तस्य पादमूले। पृष्टश्च भगवान्–किं तव निर्वेदकारणम्? येन त्वम् एवम् अपि सर्वाङ्गसुन्दराऽभिरामः, सुन्दराभिरामतया एव पिशुनितनिजविभवविस्तारः, विभवविस्तारात् संघितस्वजनवर्गः, स्वजनवर्गनिरपेक्षामिमाम् ईदृशीं निस्संगतां प्रपन्नोऽसि। गुरुणा भणितम्–शृणु, किमिह अस्थिमांसरुधिरसंगते शरीरेऽपि सौन्दर्यम्? को वा आयासमात्रफले विभवविस्तारे प्रतिबन्धः? को वा

---

१ ०गुत्तिगुत्तो ख २ विजयसिंघो ख ३ गुरुणा ध० ख

सयणस्स वि मज्झगओ रोगाभिहओ किलिस्सइ इहेगो। सयणो वि य से रोगं न [1]विरिञ्चइ ने य नासेइ ॥
मज्झम्मि बन्धवाणं एक्को मरइ कलुणं रुयन्ताणं। न य णं धारेइ तओ बन्धुजणो नेव दाराइं ॥
एक्को करेइ कम्मं फलमवि तस्सेक्कओ समणुहोइ। एक्को जायइ मरइ य परलोयं एक्कओ जाइ ॥
पत्तेयं पत्तेयं नियगं कम्मफलमणुहवन्ताणं। को कस्स जए सयणो को कस्स व होइ अन्नजणो ? ॥
मरिऊण वेरिओ वि हु जायइ [2]जणगो, सुओ वि [3]हु [4]रिवु त्ति। ता अणवट्ठियभावे सयणे सङ्गो त्ति मोहफलं ॥
अन्नं च। सुण, अम्हाणमेव जं वत्तं—

अत्थि इहेव विजए [5]लच्छिनिलयं नाम नयरं। तत्थ सागरदत्तो नाम सत्थवाहो, सिरिमई से भारिया, ताणं अहं सुओ त्ति।

स्वप्नकसमागमचञ्चले स्वजने इति ?। अपि च—

स्वजनस्याऽपि मध्यगतो रोगाभिहतः क्लिश्यति इहैकः। स्वजनोऽपि च तस्य रोगं न विभजति नैव नाशयति ॥
मध्ये बान्धवानामेको म्रियते करुणं रुदताम्। न च तं धारयति ततो बन्धुजनो नैव दाराः ॥
एकः करोति कर्म फलमपि तस्य एकः समनुभवति। एको जायते म्रियते च परलोकमेकको याति ॥
प्रत्येकं प्रत्येकं निजकं कर्मफलमनुभवताम्। कः कस्य जगति स्वजनः कः कस्य वा भवति अन्यजनः ? ॥
मृत्वा वैरिकोऽपि खलु जायते जनकः, सुतोऽपि खलु रिपुरिति। ततोऽनवस्थितभावे स्वजने संग इति मोहफलम् ॥
अन्यच्च। शृणु, अस्माकमेव यद् वृत्तम्-

---

१ विगिण्हइ ख २ जणणी ख ३ य ख ४ रिउ ख ५ लच्छितिलयं ग

कुमारभावे वट्टमाणो गओ तन्नयरासन्नमेव लच्छिपव्वयं। दिट्ठो य तत्थ एगम्मि विभागे सिणिद्धपत्तसंचओ, धरापविट्ठदीहपायगो, नालिएरिपायवो त्ति। तं च दट्ठूण समुप्पन्नं मे कोउयं। चिन्तियं च मए–अहो! अच्छरियं। एद्दहमेत्तस्सवि पायवस्स एद्दहमेत्ताओ विभागाओ ओयरिऊण पायओ धरणिं पविट्ठो त्ति। ता नूणमेत्थ कारणेण होयव्वं॥

एत्थन्तरम्मि य अयण्डम्मि चेव संजाओ मे पमोओ, वियम्भिओ सुरहिमारुओ, विमुक्को सहजो वि वेराणुबन्धो पसुगणेहिं, भुवणसिरीए विय समद्धासिओ लच्छिपव्वओ, सव्वोउयकुसुमेहि वि पुप्फियाइं काणणुज्जाणाइं, पमुइया विहंगसंघाया, मणहरुत्तालरम्मं च गुञ्जियं छप्पयावलीहिं, विसुद्धपयासमतावं च तमुद्देसमुज्जोइउं पयत्तो रवी। तओ मए चिन्तियं 'अह पुण किं इमं भुवणच्छेरयं' ति॥

एत्थन्तरम्मि तरुणरविमण्डलनिहं, सुविसुद्धजच्चकञ्चणं, अणेयरयणमण्डियं, जयजयरवावूरियनहङ्गणं, गिज्जन्ततियसमङ्गलं,

---

अस्ति इहैव विजये लक्ष्मीनिलयं नाम नगरम्। तत्र सागरदत्तो नाम सार्थवाहः, श्रीमती तस्य भार्या। तयोरहं सुत इति। कुमारभावे वर्तमानो गतो तन्नगरासन्नमेव लक्ष्मीपर्वतम्। दृष्टश्च तत्र एकस्मिन् विभागे स्निग्धपत्रसंचयः, धराप्रविष्टदीर्घपादकः, नालिकेरीपादप इति। तं च दृष्ट्वा समुत्पन्नं मम कौतुकम्। चिन्तितं च मया–अहो! आश्चर्यम्। एतावन्मात्रस्यापि पादपस्य एतावन्मात्राद् विभागाद् अवतीर्य पादको धरणीं प्रविष्ट इति। ततो नूनमत्र कारणेन भवितव्यम्॥

अत्रान्तरे च अकाण्ड एव संजातो मम प्रमोदः, विजृम्भितः, सुरभिमारुतः, विमुक्तः सहजोऽपि वैरानुबन्धः पशुगणैः, भुवनश्रिया अपि समध्यासितो लक्ष्मीपर्वतः, सर्वर्तुककुसुमैरपि पुष्पितानि काननोद्यानानि, प्रमुदिता विहंगसंघाताः, मनोहरोत्तालरम्यं च गुञ्जितं षट्पदावलीभिः, विशुद्धप्रकाशमतापं च तमुद्देशमुद्द्योतयितुं प्रवृत्तो रविः। ततो मया चिन्तितम्–'अथ पुनः किमिदं भुवनाश्चर्यकम्'–इति॥

अत्रान्तरे तरुणरविमण्डलनिभम्, सुविशुद्धजात्यकाञ्चनम्, अनेकरत्नमण्डितम्, जयजयरवापूरितनभोऽङ्गणम्, गीयमानत्रिदशमङ्गलम्

निवडन्तकुसुमवुट्ठिं, अणेयतियसपरियरियं, विजियसंसारचक्कपिसुणयं, अवरदिसाओ समोवयन्तं भयवओ अजियदेवतित्थयरस्स दिट्ठं मए धम्मचक्कं ति। तयणन्तरं च महग्घगुणरयणभूसिया सियम्बरधारिणो अणेगे साहवो, तओ सुरधरियकुन्दधवलायवत्तो दुन्दुहिनिणायबहिरियनहङ्गणो, विरायन्तदिव्वभामण्डलो, सुरवइसमुक्खित्तचारुचामरो, सुरासुरमणुयवन्द्रसंथुओ, कालायरुपवरतुरुक्कधूवमहमहेन्तगन्धो, गन्धवट्टिभूओ अच्चन्तसोमो कञ्चणमयदिव्वकमलावलीए परिसक्कमाणो भयवं, तिलोयनाहो, नित्थिण्णभवसमुद्दो अजियदेवतित्थयरो त्ति। तं च दट्ठूण समुप्पण्णो मे पमोओ, पणट्ठं मिच्छत्ततिमिरेणं, वियम्भियं धम्मववसाएणं। चिन्तियं च मए–धन्नो अहं, जेण मए तिलोयचिन्तामणी भयवं उवलद्धो त्ति ॥

एत्थन्तरम्मि य कयं तियसेहिं भयवओ मणिकणयकलहोयमयनिम्मियपायारतियं, सुविहत्तदिव्वतोरणं, रयणमयविचित्तकविसीसयं, ऊसियमहाकेउनिवहं, गुञ्जन्तमहुयरामोयसोहियं, ऊसियसियायवत्तमणहरं, वेरुलियदिव्वसीहासणं, महल्लसीहझयचक्कम-

---

निपतत्कुसुमवृष्टि, अनेकत्रिदशपरिकरितम् , विजितसंसारचक्रपिशुनकम् , अपरदिशः समवपतद् भगवतोऽजितदेवतीर्थकरस्य दृष्टं मया धर्मचक्रम्–इति। तदनन्तरं च महार्घगुणरत्नभूषिताः सिताम्बरधारिणोऽनेके साधवः, ततः सुरधृतकुन्दधवलातपत्रः, दुन्दुभिनिनादबधिरितनभोऽङ्गणः, विराजमानदिव्यभामण्डलः, सुरपतिसमुत्क्षिप्तचारुचामरः, सुराऽसुरमनुजवन्द्रसंस्तुतः, कालागुरुप्रवरतुरुष्कधूपप्रसरद्गन्धः, गन्धवर्तिभूतः, अत्यन्तसौम्यः, काञ्चनमयदिव्यकमलावल्या परिसरन् भगवान् , त्रिलोकनाथः, निस्तीर्णभवसमुद्रः, अजितदेवतीर्थकर इति। तं च दृष्ट्वा समुत्पन्नो मे प्रमोदः, प्रनष्टं मिथ्यात्वतिमिरेण, विजृम्भितं धर्मव्यवसायेन, चिन्तितं च मया–धन्योऽहम् , येन मया त्रिलोकचिन्तामणिर्भगवान् उपलब्ध इति

अत्रान्तरे च कृतं त्रिदशैर्भगवतो मणिकनककलधौतमयनिर्मितप्राकारत्रिकम् , सुविभक्तदिव्यतोरणम् , रत्नमयविचित्रकपिशीर्षकम्,

ण्डियं समोसरणं ति । पविट्ठो भयवं । पत्थुया धम्मकहा । कहिओ भगवया असासओ जीवलोगो । अवगओ अम्हाणं । तओ तं पुव्वकोउयं समणुस्सरन्तेण पुच्छिओ भयवं मए तिलोयनाहो । भयवं ! किं पुण तस्स नालिएरिपायवस्स पायओ ओइण्णो, किं अत्थि तत्थ दविणजायं किं वा नहि (निही), किंपरिमाणं वा, केण वा तं ठवियं, कीइसो वा तस्स विवागो त्ति ? । भगवया भणियं–सुण, लोहदोसेण पायओ ओइण्णो । अत्थि तत्थ दविणजायं । तं च दीणारसत्तलक्खपरिमाणं । तुमए तेणं च नालिएरिजीवेण ठवियं । धम्मसाहओ य विवागो एयस्स । मए भणियं–भयवं ! कहं पुण मए इमिणा य ठवियं, कहं च मम ईदिसो विवागो इमस्स वि ईदिसो त्ति । भगवया भणियं–सुण,

अत्थि इहेव विजए अमरउरं नाम नयरं । तत्थ अमरदेवो नाम गाहावई होत्था । सुन्दरी से भारिया । ताणं च तुब्भे दुवे वि

उच्छ्रितमहाकेतुनिवहम् , गुञ्जन्मधुकराऽऽमोदशोभितम् , उच्छ्रितसिताऽऽतपत्रमनोहरम् , वैडूर्यदिव्यसिंहासनम् , महासिंहध्वजचक्रमण्डितं, समवसरणम्–इति । प्रविष्टो भगवान् । प्रस्तुता धर्मकथा । कथितो भगवता अशाश्वतो जीवलोकः । अवगतोऽस्माभिः । ततस्तं पूर्वकौतुकं समनुस्मरता पृष्टो भगवान् मया त्रिलोकनाथः । भगवन् ! किं पुनस्तस्य नालिकेरीपादपस्य पादकोऽवतीर्णः, किम् अस्ति तत्र द्रविणजातं किं वा निधिः, किंपरिमाणं वा, केन वा तत् स्थापितम् , कीदृशो वा तस्य विपाक इति ? । भगवता भणितम्–शृणु, लोभदोषेण पादकोऽवतीर्णः । अस्ति तत्र द्रविणजातम् । तच्च दीनारसप्तलक्षपरिमाणम् । त्वया तेन च नालिकेरीजीवेन स्थापितम् । धर्मसाधकश्च विपाक एतस्य । मया भणितम्–भगवन् ! कथं पुनर्मया अनेन च स्थापितम् , कथं मम ईदृशो विपाकः, एतस्याऽपि ईदृश इति । भगवता भणितम् , शृणु–

अस्ति इहैव विजये अमरपुरं नाम नगरम् । तत्र अमरदेवो नाम गृहपतिरभवत् । सुन्दरो तस्य भार्या । तयोश्चयुवां द्वावपि उपर्युपरि-

उप्परोप्परजायगा गुणचन्दबालचन्दाभिहाणा य पुत्तय त्ति । संपत्तजोव्वणा य महन्तं चेलाइभण्डं घेत्तूण वाणिज्जवडियाए आगया इमं देसं । विणिओइयं भण्डं, समासाइओ इट्ठलाहो । एत्थन्तरम्मि विजयवम्मनरवइणा आढत्तो लच्छिनिलयसामी सूरतेओ नाम नरवई । सो यं नयरे गज्झं छोढूण गहियसारनयरलोओ आरूढो इमं पव्वयं । तुब्भे वि तेणेव नरवइणा सह घेत्तूण दविणजायं परबलभएण आरूढा लच्छिपव्वयं । ठिया य एयम्मि पएसे निहाणीकयमालोचिऊण इमं दविणजायं। अइक्कन्तो कोइ कालो । तओ लोहदोसेण 'भागिओ' त्ति करिय विसपओगकरणेणं वावाविओ तुमं गुणचन्देण । सुद्धसहावत्तणेणं च उववन्नो वंतरसुरेसु । गुणचन्दो वि य अपरिभुञ्जिऊण तं दव्वं एत्थ चेव पव्वए महाभुयङ्गडक्को मरिऊण उप्पन्नो रयणप्पहाए नरयपुढवीए नारओ । तओ तुमं देसूणपलिओवममहाउयं पालिऊण तओ चुओ एत्थेव विजए [1]टङ्कणाउरे नयरे हरिणन्दिस्स सत्थवाहस्स वसुमईए भारियाए कुच्छिंसि पुत्त-

---

जातकौ गुणचन्द्र-वालचन्द्राऽभिधानौ च पुत्रकौ इति । संप्राप्तयौवनौ च महत् चेलादिभाण्डं गृहीत्वा वाणिज्यवृत्तिकया आगतौ इमं देशम् । विनियोगितं भाण्डम् , समासादित इष्टलाभः । अत्रान्तरे विजयवर्मनरपतिना आक्रान्तो लक्ष्मीनिलयस्वामी सूरतेजा नाम नरपतिः । स च नगरे ग्राह्यं(असारं)क्षिप्त्वा गृहीतसारनगरलोकः आरूढ इमं पर्वतम् । युवामपि तेनैव नरपतिना सह गृहीत्वा द्रविणजातं परवलभयेन आरूढौ लक्ष्मीपर्वतम् । स्थितौ चैतस्मिन् प्रदेशे निधानीकृतमालोच्य इदं द्रविणजातम् । अतिक्रान्तः कीयानपि कालः । ततो लोभदोषेण 'भागिकः' इति कृत्वा विषप्रयोगकरणेन व्यापादितस्त्वं गुणचन्द्रेण । शुद्धस्वभावत्वेन च उपपन्नो व्यन्तरसुरेषु । गुणचन्द्रोऽपि च अपरिभुज्य तद् द्रव्यम् अत्र चैव पर्वते महाभुजङ्गदष्टो मृत्वा उत्पन्नो रत्नप्रभायां नरकपृथिव्यां नारकः । ततस्त्वं देशोनपल्योपममथाऽऽयुः पालयित्वा ततश्च्युतः अत्रैव विजये टङ्कणापुरे नगरे हरिनन्दिनः सार्थवाहस्य वसुमत्या भार्यायाः कुक्षौ पुत्रतया उपपन्नो-

---

[1] ढङ्कणाउरे ख

त्ताए उववन्नो सि। जाओ कालक्कमेणं। पइट्ठावियं च ते नामं देवदत्तो त्ति। पत्तो कुमारभावं। एत्थन्तरम्मि तओ वि गुणचन्दो नरगाओ उव्वट्टिऊण लोहदोसेणमेत्थेव लच्छिपव्वए एयस्स चेव निहाणस्स पच्चासन्नपएसे उप्पन्नो भुयङ्गमो त्ति। परिग्गहियं च णेण तं दव्वं। एत्थन्तरम्मि लच्छिनिवासिणीदेवयामहम्मि समागओ तुमं लच्छिपव्वयं। कया देवयाए पूया। दिन्नं दीणाणाहाण दविणजायं। संपाइओ भोयणोवयारो। तओ तुमं पुव्वभवसिणेहेणं रम्मयाए पव्वयस्स परिब्भमन्तो आगओ इमं उद्देसं। दिट्ठो भुयङ्गमेणं। तओ लोहदोसेण 'एस एयं दविणजायं गेण्हिस्सइ, त्ति डक्को चरणदेसम्मि। अच्चुग्गयाए विसस्स तक्खणा चेव निवडिओ धरणिवट्ठे। पासवत्तिणा य ते परियणेण वावाविओ भुयङ्गमो। उप्पन्नो एत्थेव पव्वए सीहत्ताए त्ति। तुमं पि मरिऊण एत्थेव विजए कयङ्गलाए नयरीए सिवदेवस्स कुलउत्तयस्स जसोहराए भारियाए कुच्छिसि पुत्तत्ताए उववन्नो सि। जाओ कालक्कमेण। पइट्ठावियं च ते नामं इन्ददेवो त्ति। पत्तो जोव्वणं। इओ य तेण सीहजीवेण पुव्वभवब्भत्थभावणाओ ओहसन्नाए परिग्गहियं तं दव्वं। एवं च गओ कोइ

ऽसि। जातः कालक्रमेण। प्रतिष्ठापितं च तव नाम देवदत्त इति। प्राप्तः कुमारभावम्। अत्रान्तरे ततोऽपि गुणचन्द्रो नरकाद् उद्वृत्य लोभदोषेण अत्रैव लक्ष्मीपर्वते एतस्य चैव निधानस्य प्रत्याऽऽसन्नप्रदेशे उत्पन्नो भुजङ्गम इति। परिगृहीतं च तेन तद् द्रव्यम्। अत्रान्तरे लक्ष्मीनिवासिनीदेवतामहसि समागतस्त्वं लक्ष्मीपर्वतम्। कृता देवतायाः पूजा। दत्तं दीनाऽनाथानां द्रविणजातम्। संपादितो भोजनोपचारः। ततस्त्वं पूर्वभवस्नेहेन रम्यतया पर्वतस्य परिभ्रमन् आगतः इममुद्देशम्। दृष्टो भुजङ्गमेन। ततो लोभदोषेण 'एष एतद् द्रविणजातं ग्रहीष्यति' इति दष्टश्चरणदेशे। अत्युग्रतया विषस्य तत्क्षणं चैव निपतितो धरणिपृष्ठे। पार्श्ववर्तिना च ते परिजनेन व्यापादितो भुजङ्गमः। उत्पन्नोऽत्रैव पर्वते सिंहतया इति। त्वमपि मृत्वाऽत्रैव विजये कृतङ्गलायां नगर्यां शिवदेवस्य कुलपुत्रस्य यशोधराया भार्यायाः कुक्षौ पुत्रतया उपपन्नोऽसि। जातः कालक्रमेण। प्रतिष्ठापितं च ते नाम इन्द्रदेव इति। प्राप्तो यौवनन्। इतश्च तेन सिंहजीवेन

कालो। अन्नया य वीरदेवनरवइणा नियसामिएण पेसिओ तुमं लच्छिनिलयसामिणो माणहङ्गस्स समीवं। आगच्छमाणो य कइवयपुरिसपरिवारिओ कालक्कमेण पत्तो इमं उद्देसं। उववि‌ट्ठो नीवपायवस्स हेट्ठे। एत्थन्तरम्मि गिरिगुहामुहगएणं दिट्ठो सि सीहेणं। तओ लोहसन्नाविवज्जासियचित्तेणं वावाविओ सि इमिणा, इमो वि य तुमए त्ति। उववन्ना य तुब्भे एत्थेव विजयम्मि सिरित्थलगे पट्टणे जक्खदाससन्नियस्स चण्डालस्स माइजक्खाए भारियाए जमलभाउगत्ताए त्ति। जाया कालक्कमेणं। पइट्ठावियाइं नामाइं तुज्झं[1] कालसेणो, इयरस्स चण्डसेणो त्ति। पत्ता य जोव्वणं। अन्नया आहेडयनिमित्तं गया लच्छिपव्वयं, वावाइओ कोलो। सो य एयम्मि चेव निहाणयपएसे विससिओ। पज्जालिओ जलणो। जलणपक्कं तं खाइउं पयत्ता। एत्थन्तरम्मि कट्टारयं निसाणिऊग कहंचि अणत्थदण्डओ चेव धरणिं खणमाणेण उवलद्धो निहाणयकलसस्स एगदेसो चण्डसेणेणं। पवत्तो गोविउं, लक्खिओ य तुमए। तओ

पूर्वभवाभ्यस्तभावनात ओघसंज्ञया परिगृहीतं तद् द्रव्यम्। एवं च गतः कीयान् कालः। अन्यदा च वीरदेवनरपतिना निजस्वामिकेन प्रेषितस्त्वं लक्ष्मीनिलयस्वामिनो मानभङ्गस्य समीपम्। आगच्छंश्च कतिपयपुरुषपरिवृतः कालक्रमेण प्राप्त इमनुद्देशम्। उपविष्टो नीपपादपस्याऽधः। अत्रान्तरे गिरिगुहामुखगतेन दृष्टोऽसि सिंहेन। ततो लोभसंज्ञाविपर्यासितचित्तेन व्यापादितोऽसि अनेन, अयमपि च त्वया इति। उपपन्नौ च युवामत्रैव विजये श्रीस्थलके पट्टने यक्षदाससंज्ञितस्य चाण्डालस्य मातृयक्षायां भार्यायां यमलभ्रातृकतया इति। जातौ कालक्रमेण। प्रतिष्ठापिते नाम्नी तव कालसेनः, इतरस्य चण्डसेन इति। प्राप्तौ च यौवनम्। अन्यदा आखेटकनिमित्तं गतौ लक्ष्मीपर्वतम्। व्यापादितः कोलः। स च एतस्मिन् चैव निधानकप्रदेशे विशसितः। प्रज्वालितो ज्वलनः। ज्वलनपक्वं तं खादितुं प्रवृत्तौ। अत्रान्तरे कट्टारकं निशाण्य कथञ्चिद् अनर्थदण्डत एव धरणीं खनता उपलब्धो निधानककलशस्य एकदेशश्चण्डसेनेन। प्रवृत्तो गोप-

---

[1] तुब्भं क

दव्वलोहेणं [1]वीसत्थो तुमं वावाइओ तेण। उववन्नो वालुयप्पहाए नरगपुढवीए पञ्चसागरोवमाऊ नारगो। इमो वि तद्दव्वलोभेग तं चेव देसं अमुञ्चमाणो अइक्कन्तेसु कइवयवरिसेसु अभुञ्जिऊण तं दव्वं अन्नवेरियचण्डालविनिवाइओ समाणो उप्पन्नो तमाभिहाणाए नरयपुढवीए अट्ठारससागरोवमाऊ नारगो त्ति। तओ तुमं पडिपुण्णे अहाउए नरगाओ उव्वट्टिऊण एत्थेव विजए सिरिमईए सन्निवेसम्मि सालिभद्दस्स गाहावइस्स नन्दिणीए भारियाए कुच्छिंसि पुत्तत्ताए उववन्नो त्ति। जाओ य कालक्कमेण। पइट्ठावियं ते नामं बालसुन्दरो त्ति। पत्तो जोव्वणं। एत्थन्तरम्मि सीलदेवाणगारसमीवे पत्तो तए अपत्तपुव्वो जिणवरपणीओ धम्मो। परिपालियं सावयत्तणं। कओ य जह[2]विहिं देहच्चाओ। उववन्नो लन्तयाभिहाणे देवलोए किंचूणतेरससागरोवमाऊ वेमाणिओ त्ति। तत्थ परिभुञ्जिऊग दिव्वभोए अहाउयपरिक्खएण चुओ समाणो एत्थेव विजए हत्थिणाउरे नयरे सुहत्थिस्स नगरसेट्ठिस्स कन्तिमईए भारियाए कुच्छिंसि पुत्तत्ताए

यितुम्, लक्षितश्च त्वया। ततो द्रव्यलोभेन विश्वस्तस्त्वं व्यापादितस्तेन। उपपन्नो वालुकाप्रभायां नरकपृथिव्यां पञ्चसागरोपमायुर्नारकः। अयमपि तद्द्रव्यलोभेन तं चैव देशममुञ्चन् अतिक्रान्तेषु कतिपयवर्षेषु अभुक्त्वा तद् द्रव्यम् अन्यवैरिकचाण्डालविनिपातितः सन् उत्पन्नस्तमाऽभिधानायां नरकपृथिव्यामष्टादशसागरोपमायुर्नारक इति। ततस्त्वं प्रतिपूर्णे यथाऽऽयुष्के नारकात् उद्वृत्य अत्रैव विजये श्रीमतौ सन्निवेशे शालिभद्रस्य गृहपतेर्नन्दिन्यां भार्यायां कुक्षौ पुत्रतया उपपन्न इति। जातश्च कालक्रमेण। प्रतिष्ठापितं तव नाम बालसुन्दर इति। प्राप्तो यौवनम्। अत्रान्तरे शीलदेवाऽनगारसमीपे प्राप्तस्त्वया अप्राप्तपूर्वो जिनवरप्रणीतो धर्मः। परिपालितं श्रावकत्वम्। कृतश्च यथाविधि देहत्यागः। उपपन्नो लान्तकाऽभिधाने देवलोके किञ्चिदूनत्रयोदशसागरोपमायुर्वैमानिक इति। तत्र परिभुज्य दिव्यभोगान् यथाऽऽयुष्कपरिक्षयेण च्युतः सन् अत्रैव विजये हस्तिनापुरे नगरे सुहस्तिनो नगरश्रेष्ठिनः कान्तिमत्या भार्यायाः

---

१ सुवीसत्थो क। २ जहाविहिणा ख

उववन्नो सि, इयरो वि तओ नरगाओ उव्वट्टिऊण तत्थेव नयरे तुज्झ चेव पिउणो सोमिलाभिहाणाए घरदासीए कुच्छिंसि पुत्तत्ताए त्ति। जाया कालक्कमेण। पइट्ठावियाइं नामाइं–तुज्झ समुद्ददत्तो, इयरस्स मङ्गलगो त्ति। पत्ता य तुब्भे अहाक्कमेणेव कुमारभावं। एत्थन्तरम्मि पवन्नो तए अणङ्गदेवगणिसमीवे जिणदेसिओ धम्मो। कया देसविरई। परिणीया य लच्छिनिलयवासिणो सावयस्स अचलसत्थवाहस्स धूया जिणमई। अन्नया य मङ्गलदुइओ जिणमईनिमित्तमेव पयट्टो लच्छिनिलयं। आगओ य कइवयपयाणगेहिं। पत्तो तमुद्देसं, जत्थ निहाणं ति। तओ बहुलपत्तलयाए पएसस्स वीसमिओ मुहुत्तयं। दिट्ठो य तए [1]पामाडज्झाडयस्स इमम्मि पएसे विणिग्गओ पायओ। भणियं कोउगेण–भो मङ्गलग ! एत्थ पएसे केणइ दविणजाएण होयव्वं। तेण भणियं–'निहालेमो' त्ति। तए भणियं–अलं इमिणा। कोउगमेत्तमेव मे कहणनिमित्तं, न उण [2]दविणलोहो। तेण भणियं–अहिययरं मे कोउयं; ता निहालेमो, को

कुक्षौ पुत्रतया उपपन्नोऽसि, इतरोऽपि ततो नरकाद् उद्वृत्त्य तत्रैव नगरे तव चैव पितुः सोमिलाऽभिधानाया गृहदास्याः कुक्षौ पुत्रतया इति। जातौ कालक्रमेण। प्रतिष्ठापिते नाम्नी–तव समुद्रदत्तः, इतरस्य मङ्गलक इति। प्राप्तौ च युवां यथाक्रमेण कुमारभावम्। अत्रान्तरे प्रपन्नस्त्वया अनङ्गदेवगणिसमीपे जिनदेशितो धर्मः। कृता देशविरतिः। परिणीता च लक्ष्मीनिलयवासिनः श्रावकस्य अचलसार्थवाहस्य दुहिता जिनमतिः। अन्यदा च मङ्गलद्वितीयो जिनमतिनिमित्तमेव प्रवृत्तो लक्ष्मीनिलयम्। आगतश्च कतिपयप्रयाणकैः। प्राप्तस्तमुद्देशम्, यत्र निधानमिति। ततो बहुलपत्रतया प्रदेशस्य विश्रान्तो मुहूर्तकम्। दृष्टश्च त्वया पामाडवृक्षस्य अस्मिन् प्रदेशे विनिर्गतः पादकः। भणितं कौतुकेन—भो मङ्गलक ! अत्र प्रदेशे केनचिद् द्रविणजातेन भवितव्यम्। तेन भणितम् 'निभालयामः' इति। त्वया भणितम्–अलमनेन। कौतुकमात्रमेव मम कथननिमित्तम्, न पुनर्द्रविणलोभः। तेन भणितम्–अधिकतरं मम कौतु-

---

१ पोमाड० ख। २ दव्व० ख

एत्थ परमत्थो त्ति ?। तओ अणभिप्पेयं पि भवओ पयट्टो तं तहाविहेण तिक्खसारकट्ठेण खणिउं ति। दिट्ठो य तेण थेवभूमिभाए कलसकण्ठओ। तओ पुव्वकयकम्मलोहदोसेण चिन्तियं मङ्गलगेण। अहो! महत्थो एस निही। जइ कहंचि भट्टिदारयं वञ्चिउ गिण्हिउं पारियइ त्ति। एत्थन्तरम्मि दिट्ठो तुमए वि कलसकण्ठगो। भणिओ य एसो–भद्द मङ्गलग! अलं इमिणा; एहि, नयरं गच्छामो त्ति। तओ पूरिऊण तम्मुद्देसं हिट्ठो विय पयट्टो मङ्गलगो। भणिओ य तुमए–भद्द! न तए कस्सइ पुरओ एस वइयरो अहिगरणहेउभूओ जंपियव्वो त्ति। तेण भणियं–भट्टिदारय! न जंपामो। चिन्तियं णेण–मए वि विणा एस एयं गेण्हिस्सइ त्ति। अओ से एस पयासो। ता कहं अहं इमिणा वञ्चिज्जामि। ता जाव चेव न गेण्हइ एस एयं, ताव चेव अहं केणइ उवाएण वावाइस्सं ति। एत्थन्तरम्मि पत्ता नयरं। आरामसमीवठिएणं भणिओ तुमए मङ्गलगो। भद्द मङ्गलग! गच्छ, ससुरकुलपउत्तिं मे कुओ वि उवलहिय संवाएहि, जेण पविसामो नयरं ति। पयट्टो मङ्गलगो। चिन्तियं च णेणं–पविट्ठो खु एसो लहुं चेव एयं गेण्हिस्सइ। ता तहाणुचिट्ठामि, जहा

कम्; ततो निभालयामः, कोऽत्र परमार्थ इति ?। ततोऽनभिप्रेतमपि भवतः प्रवृत्तस्तं तथाविधेन तीक्ष्णसारकाष्ठेन खनितुमिति। दृष्टश्च तेन स्तोकभूमिभागे कलशकण्ठकः। ततः पूर्वकृतकर्मलोभदोषेण चिन्तितं मङ्गलकेन–अहो! महार्थ एष निधिः। यदि कथंचिद् भर्तृदारकं वञ्चित्वा ग्रहीतुं पार्यत इति। अत्रान्तरे दृष्टस्त्वयाऽपि कलशकण्ठकः। भणितश्चैषः–भद्र मङ्गलक! अलमनेन; एहि, नगरं गच्छाम इति। ततः पूरयित्वा तमुद्देशं हृष्ट इव प्रवृत्तो मङ्गलकः। भणितश्च त्वया–भद्र! न त्वया कस्यचित् पुरत एष व्यतिकरोऽधिकरणहेतुभूतः कथयितव्य इति। तेन भणितम्–भर्तृदारक! न कथयामः। चिन्तितं तेन–मयाऽपि विना एष एतं ग्रहीष्यति इति। अतस्तस्य एष प्रयासः। ततः कथमहमनेन वञ्च्ये ? ततो यावच्चैव न गृह्णाति एष एनम्, तावच्चैव अहं केनचिदुपायेन व्यापादयिष्य इति। अत्रान्तरे प्राप्तौ नगरम्। आरामसमीपस्थितेन भणितस्त्वया मंगलकः–भद्र मंगलक! गच्छ, श्वसुरकुलप्रवृत्तिं मम कुतोऽपि उपलभ्य

न एस एत्थ पविसइ। गच्छन्तो य मे सुहवावायणिज्जो भविस्सइ। ता एयं से निवेएमि। जहा, इत्थिसहावओ कुलविरुद्धमाचरिऊण पविसिया ते घरिणी। अओ अच्चन्तमुव्विग्गं ते ससुरकुलं। सुयं च अम्हाणमागमणमेएहिं, अओ अहिययरं लज्जियाणि। ता न जुत्तमेत्थ पविसिउं ति संपहारिय तओ नयरं पविसिऊण कयकालक्खेवो मायाचरिएण विवण्णमुहच्छाओ आगओ ते समीवं। निवेइयं जहा चिन्तियं। तओ विसण्णो तुमं। चिन्तियं च तुमए–धिरत्थु इत्थिभावस्स, जमेवंविहा वि सावयकुलुप्पन्ना वि सुविन्नायजिणवयणसारा वि उभयलोयविरुद्धमायरइ। अहवा नत्थि दुक्करं मोहभावस्स। ता अलं मे इयाणिं पि गिहवासेण। पवज्जामो तित्थयरभासियं साहुधम्मं। एवमवसाणो खु एस सिणेहबन्धो। ता अलं मे सगिहगमणेणं पि। इओ चेव गच्छामि, जत्थ भगवं अणङ्गदेवो। एसो वि मङ्गलगो इओ चेव वच्चउ घरं, किमिमिणा किलिसिएणं ति संपहारिऊण भणिओ जहाचिन्तियमेव मङ्गलगो।

संपाद्य, येन प्रविशामो नगरमिति। प्रवृत्तो मंगलकः। चिन्तितं च तेन–प्रविष्टः खलु एष लघ्वेव एतं ग्रहीष्यति। ततस्तथाऽनुतिष्ठामि, यथा नैषोऽत्र प्रविशति। गच्छंश्च मम सुखव्यापादनीयो भविष्यति। तत एतत् तस्य निवेदयामि। यथा, स्त्रीस्वभावतः कुलविरुद्धमाचर्य प्रविष्टा (अन्यगृहे) तव गृहिणी। अतोऽत्यन्तमुद्विग्नं तव श्वसुरकुलम्। श्रुतं च अस्माकमागमनमेतैः, अतोऽधिकतरं लज्जितानि। ततो न युक्तमत्र प्रवेष्टुमिति संप्रधार्य ततो नगरं प्रविश्य कृतकालक्षेपः मायाचरितेन विवर्णमुखच्छाय आगतस्तव समीपम्। निवेदितं यथा चिन्तितम्। ततो विषण्णस्त्वम्। चिन्तितं च त्वया–धिगस्तु स्त्रीस्वभावम्, यदेवंविधाऽपि श्रावककुलोत्पन्नाऽपि, सुविज्ञातजिनवचनसाराऽपि उभयलोकविरुद्धमाचरति। अथवा नास्ति दुष्करं मोहभावस्य। ततोऽलं मम इदानीमपि गृहवासेन। प्रपद्यामहे तीर्थकरभाषितं साधुधर्मम्। एवमवसानः खलु एष स्नेहबन्धः। ततोऽलं मम स्वगृहगमनेनाऽपि। इत एव गच्छामि, यत्र भगवान् अनङ्गदेवः। एषोऽपि मंगलक इत एव व्रजतु गृहम्, किमनेन क्लेशितेनेति संप्रधार्य भणितो यथाचिन्तितमेव मङ्गलकः।

चिन्तियं च णेणं–अहो ! ! एस मायाचरिएणं मं वञ्चिउं उज्जओ । ता कहमहमिमिणा वञ्चिज्जामि त्ति । ता भणामि ताव एयं । जाव तुमं न चिन्तियदेसं पत्तो सि, ताव कहमहं भवन्तं परिच्चयामि । एवं कइवयदिणाणि इमिणा सह गच्छिऊण वावाइस्सं इमं ति । चिन्तिऊण भणिओ तुमं इमिणा । पडिभणियं च तुमए । भद्द मङ्गलग ! जइ ते निब्बन्धो, ता एवं हवउ त्ति । तओ पुच्छिस्सामो कंचि साहुं, कहिं भयवं अणङ्गदेवो त्ति ? । मन्तिऊण पत्थिया तुब्भे पडिपहेण । अइक्कन्ता कइवि वासरा । अन्नया अइविसमरण्णमज्झवत्तिनहयलसरन्तरमभिगए दिणयरम्मि 'महासाहसं' ति कलिऊण अच्चन्तखुद्दहियएणं लोहदोसओ तहा वि अणियत्तमाणेणं सुवीसत्थहियओ चेव पहओ तुमं पिट्ठिदेसम्मि छुरिगाए मङ्गलगेणं ति । एत्थन्तरम्मि अद्धाणपडिवन्नो अणेयसमणपरियरिओ तत्थेव पएसे सहसा समागओ अणङ्गदेवो । दिट्ठो तुमं अग्गगामिएहिं साहूहिं । एत्थन्तरम्मि सज्झसेण छुरियमवहाय नट्ठो मङ्गलगो । चिन्तियं च तुमए–हा ! किमेयं ति । किं तक्करा समागया भवे । [१]जोवियं पिट्ठओ, जाव दिट्ठो ससंभममाउलं पलायमाणो मङ्गलगो । चिन्तियं च

चिन्तितं च तेन–अहो ! एष मायाचरितेन मां वञ्चितुं उद्यतः । ततः कथमहमनेन वञ्च्ये इति । ततो भणामि तावद् एतम् । यावत् त्वं न चिन्तितदेशं प्राप्तोऽसि, तावत् कथमहं भवन्तं परित्यजामि । एवं कतिपयदिनानि अनेन सह गत्वा व्यापादयिष्ये इममिति चिन्तयित्वा भणितस्त्वमनेन । प्रतिभणितं च त्वया । भद्र ! मङ्गलक ! यदि तव निर्बन्धः, तत एवं भवतु इति । ततः प्रक्ष्यामः कञ्चित् साधुम् , कुत्र भगवान् अनङ्गदेव इति मन्त्रयित्वा प्रस्थितौ युवां प्रतिपथेन । अतिक्रान्ताः कतिचिद् वासराः । अन्यदा अतिविषमारण्यमध्यवर्तिनभस्तलसरोऽन्तरमभिगते दिनकरे 'महासाहसम्' इति कलयित्वा अत्यन्तक्षुद्रहृदयेन लोभदोषतस्तथाऽपि अनिवर्तमानेन सुविश्वस्तहृदय एव प्रहतस्त्वं पृष्ठदेशे छुरिकया मङ्गलकेन इति ॥ अत्रान्तरे अध्वप्रतिपन्नोऽनेकश्रमणपरिवृतः तत्रैव प्रदेशे सहसा समागतोऽन-

---

१ जोइयं क

तुमए-न एत्थ अन्ने चोरा दीसन्ति, पलायइ य एसो । ता किमेयं ति ?। एत्थन्तरम्मि दिट्ठा सोणियाणुरञ्जिया छुरिया । गहिया य सा तए पच्चभिन्नाया य । तओ संजाओ ते वियप्पो । किमेयं मङ्गलगेण ववसियं भवे ?। अहवा न एयस्स किंपि एवं ववसायकारणं उप्पेक्खामि । ता सद्देमि ताव एयं ति । एसेव मे एत्थ परमत्थं साहिस्सइ । सद्दिओ मङ्गलगो, जाव अहिययरं पलाइउमारद्धो । तओ अवगओ ते वियप्पो । हन्त ! एएण चेव ववसियं ति । ता किं पुण से इमस्स ववसायस्स कारणं । आभोइओ निहाणयवुत्तन्तो । चिन्तियं च तुमए-नत्थि अकरणिज्जं नाम लोहवसगाणं ति । अओ चेव निमित्तओ जिणमईवुत्तन्तो वि इमिणा विगप्पिओ भवे । अन्नहा कहं तारिसी महाकुलपसूया सुविन्नायजिणवयणसारा य तारिसं उभयलोगविरुद्धं करिस्सइ । एत्थन्तरम्मि पत्ता ते साहवो तमुद्देसं । पच्चभिन्नाओ य तेहिं । वन्दिया य तुमए । धम्मलाहिओ साहूहिं । पुच्छिओ य तेहिं । सावय ! किमेयं ति ?। साहिओ

ङ्गदेवः । दृष्टस्त्वमग्रगामिकैः साधुभिः । अत्रान्तरे साध्वसेन क्षुरिकामपहाय नष्टो मङ्गलकः । चिन्तितं च त्वया-हा ! किमेतदिति । किं तस्कराः समागता भवेयुः ? । दृष्टं पृष्ठतः, यावद् दृष्टः ससंभ्रमाकुलं पलायमानः मङ्गलकः । चिन्तितं च त्वया-न अत्र अन्ये चौरा दृश्यन्ते, पलायते च एषः । ततः किमेतदिति । अत्रान्तरे दृष्टा शोणिताऽनुरक्ता छुरिका । गृहीता च सा त्वया प्रत्यभिज्ञाता च । ततः सञ्जातस्तव विकल्पः । किमेतद् मंगलकेन व्यवसितं भवेत् ? अथवा न एतस्य किमपि एवं व्यवसायकारणमुत्प्रेक्षे । ततः शब्दयामि तावद् एतमिति । एष एव ममात्र परमार्थं कथयिष्यति । शब्दितो मङ्गलकः, यावद् अधिकतरं पलायितुमारब्धः । ततोऽपगतस्तव विकल्पः । हन्त ! एतेन एव एतद् व्यवसितमिति । ततः किं पुनः तस्याऽस्य व्यवसायस्य कारणम् ?। आभोगितो निधानकवृत्तान्तः । चिन्तितं च त्वया-नास्ति अकरणीयं नाम लोभवशगानामिति । अत एव निमित्ततो जिनमतीवृत्तान्तोऽपि अनेन विकल्पितो भवेत् । अन्यथा कथं तादृशी महाकुलप्रसूता सुविज्ञातजिनवचनसारा च तादृशं उभयलोकविरुद्धं करिष्यति । अत्रान्तरे प्राप्तास्ते साधवस्तमु-

तुमए तेसिं जहावत्तो वुत्तन्तो । समासासिओ साहूहिं । एत्थन्तरम्मि दिट्ठो अणङ्गदेवेणं । वन्दिओ सो तए । अभिगन्दिओ तुमं इमिणा धम्मलाहेण । पुच्छिओ पउत्तिं । साहिया तुमए । समासासिओ गुरुणा । नियत्तो तुमं समं साहुगच्छेण । पत्तो थाणेसरं नाम सन्निवेसं । ठिओ तत्थ गुरू मासकप्पं । पउणो ते पहारो । उवलद्धा जहट्ठिया जिणमईपउत्ती । चिन्तियं च तुमए—अहो ! मङ्गलस्स वञ्चणापगारो, अहो ! विचित्तया मोहस्स, अहो ! अणुवाएययया संसारस्स । ता जइ वि अखण्डियसीला जिगमई, तहावि अलं गिहासमेण । संपाडेमि उभयलोगसुहावहं समीहियं । सुविन्नायजिणवयणसारा य सा तुल्लचित्ता य मे पाएण । ता सोऊग इमं वइयरं सा वि य पव्वइस्सइ त्ति । एवं च कए सा वि हु तवस्सिणी इमाओ दुक्खबहुलाओ भवसमुद्दाओ समुत्तारिया हवइ । अलं च अपव्वइयस्स तीए दंसणेणं । वहुविग्घा चरणपडिपत्ती, सुहावहा य एसा चेव त्ति चिन्तिऊण पव्वइओ अणङ्गदेवगुरुसमीवे ॥

द्देशम् । प्रत्यभिज्ञातश्च तैः । वन्दिताश्च त्वया । धर्मलाभितः साधुभिः । पृष्टश्च तैः । श्रावक ! किमेतदिति । कथितस्त्वया तेषां यथावृत्तो वृत्तान्तः । समाश्वासितस्साधुभिः । अत्रान्तरे दृष्टोऽनङ्गदेवेन । वन्दितः स त्वया । अभिनन्दितस्त्वमनेन धर्मलाभेन । पृष्टः प्रवृत्तिम् । कथिता त्वया । समाश्वासितो गुरुणा । निवृत्तस्त्वं समं साधुगच्छेन । प्राप्तः स्थानेश्वरं नाम सन्निवेशम् । स्थितः तत्र गुरुर्मासकल्पम् । प्रगुणस्तव प्रहारः । उपलब्धा यथास्थिता जिनमतीप्रवृत्तिः । चिन्तितं च त्वया—अहो ! मङ्गलकस्य वञ्चनाप्रकारः, अहो ! विचित्रता मोहस्य, अहो ! अनुपादेयता संसारस्य । ततो यद्यपि अखण्डितशीला जिनमती, तथाऽपि अलं गृहाश्रमेण । संपादयामि उभयलोकसुखावहं समीहितम् । सुविज्ञातजिनवचनसारा च सा तुल्यचित्ता च मम प्रायेण । ततः श्रुत्वा इमं व्यतिकरं साऽपि च प्रव्रजिष्यतीति । एवं च कृते साऽपि खलु तपस्विनी अस्माद् दुःखवहुलाद् भवसमुद्रात् समुत्तारिता भवति । अलं च अप्रव्रजितस्य तस्या दर्शनेन । वहुविघ्ना चरणप्रतिपत्तिः, सुखावहा च एषा एव इति चिन्तयित्वा प्रव्रजितोऽनङ्गदेवगुरुसमीपे ॥

अइक्कन्तो कोइ कालो। सुओ एस वइयरो कुओवि जिणमईए। संविग्गा एसा। चिन्तियं च तीए। सोहणमणुचिट्ठियं अज्जउत्तेण। किलेसायासबहुलो एस संसारो, विओगावसाणो य संगमो, दारुणो य विवागो विसयपरिभोगस्स, दुल्लहं च मणुयभावंमि जिणमयं, उभयलोयसुहावहं च एयं चेव त्ति। तओ सा एवं विचिन्तिऊण अणुन्नविय जणणिजणए अणुन्नाया तेहिं आगया तं अन्नेसमाणी, जत्थ तुमं। दिट्ठो य अणाए। पेच्छिऊण निव्वुइपुरपट्ठियं तुमं भणियं च अणाए। अज्जउत्त, सोहणमणुचिट्ठियं तुमए। छिन्ना मोहवल्ली। अवलम्बियं सप्पुरिसचरियं। समुत्तारिया अहं अप्पा य इमाओ भवसमुद्दाओ त्ति। अहिणन्दिऊण पवन्ना पव्वज्जं अणङ्गदेवगुरुसमीवे। अइक्कन्तो कोइ कालो। निरइयारं सामण्णमणुवालिऊण तुमं कालक्कमेण मओ समाणो उववन्नो पणुवीससागरोवमाऊ गेवेज्जगसुरो त्ति। इयरो वि मङ्गलगो तमत्थं परिग्गहिय महासिलासंचओच्छाइयं च काऊण तम्ममत्तेण तत्थेव देसे कुणिमाहारेण किलेससंपाइयवित्ती अहाउयं पालिऊण मओ समाणो उववन्नो तमाभिहाणाए नरयपुढवीए वावीससागरोवमाऊ नारगो त्ति।

अतिक्रान्तः कश्चित् कालः। श्रुत एष व्यतिकरः कुतोऽपि जिनमत्या। संविग्ना एषा। चिन्तितं च तया–शोभनमनुष्ठितमार्यपुत्रेण। क्लेशायासबहुल एष संसारः, वियोगावसानश्च संगमः, दारुणश्च विपाको विषयपरिभोगस्य, दुर्लभं च मनुजभावे जिनमतम्, उभयलोकसुखावहं च एतदेव इति। ततः सा एवं विचिन्त्य अनुज्ञाप्य जननी–जनकौ अनुज्ञाता ताभ्याम्, आगता त्वामन्वेषमाणा यत्र त्वम्। दृष्टश्च अनया। प्रेक्ष्य निर्वृतिपुरप्रस्थितं त्वां भणितं चानया। आर्यपुत्र! शोभनमनुष्ठितं त्वया। छिन्ना मोहवल्ली। अवलम्बितं सत्पुरुषचरितम्। समुत्तारिताऽहम् आत्मा च अस्माद् भवसमुद्राद् इति। अभिनन्द्य प्रपन्ना प्रव्रज्याम् अनङ्गदेवगुरुसमीपे। अतिक्रान्तः कश्चित् कालः। निरतिचारं श्रामण्यमनुपाल्य त्वं कालक्रमेण मृतः सन् उपपन्नः पञ्चविंशतिसागरोपमायुर्ग्रैवेयकसुर इति। इतरोऽपि मङ्गलकस्तमर्थं परिगृह्य महाशिलासंचयावच्छादितं च कृत्वा तन्ममत्वेन तत्रैव देशे कुणिमाहारेण क्लेशसंपादितवृत्तिर्यथा-

तओ य महया परिकिलेसेण तमहाउयं पालिऊण उव्वट्टो समाणो एत्थेव विजए रट्ठवद्धणए गामे वेल्लियगस्स चण्डालस्स गेहे छेलगत्ताए उववन्नो त्ति। पत्तो य जोव्वणं। अन्नया य बहुछेलगमज्झगओ तओ रट्ठवद्धणाओ जयत्थले निज्जमाणो पत्तो इमं निहाणगुद्देसं। समुप्पन्नं च से तमुद्देसमवलोइऊण पुव्वभवब्भासओ जाइस्सरणं। तओ लोहदोसेण वियड्ढो वेल्लियगस्स नेच्छइ तओ उद्देसाओ अन्नत्थमभिगन्तुं, चोइज्जन्तो वि पुणो पुणो नियत्तइ त्ति। कोहाभिभूएणं वावाइओ वेल्लियगेण। उप्पन्नो तत्थेव निहाणगुद्देसे मूसओ। परिग्गहियं च णेण ओहसन्नाए तं दव्वं। अणुवालियं कंचि कालं। अन्नया सोमचण्डो नाम जूयारिओ कहचि परिब्भमन्तो आगओ तमुद्देसं। उवविट्ठो सालपायवसमीवे। तओ अन्नाणलोहदोसेण तस्स पुरओ सामरिसमिव परिभमिउमाढत्तो। वावाइओ य तेणं। समुप्पन्नो य तस्सेव पणट्ठसवणनासिगाए [१]दुग्गिलिगाभिहाणाए भारियाए कुच्छिसि पुत्तत्ताए त्ति। जाओ काल-

युष्कं पालयित्वा मृतः सन् उपपन्नः तमाभिधानायां नरकपृथिव्यां द्वाविंशतिसागरोपमायुर्नारक इति। ततश्च महता परिक्लेशेन तद् यथायुष्कं पालयित्वा उद्वृत्तः सन् अत्रैव विजये राष्ट्रवर्धनके ग्रामे वेल्लितकस्य चाण्डालस्य गेहे छागकतया उपपन्न इति। प्राप्तश्च यौवनम्। अन्यदा च बहुछागमध्यगतः ततो राष्ट्रवर्धनाद् जयस्थले नीयमानः प्राप्त इमं निधानकोद्देशम्। समुत्पन्नं च तस्य तमुद्देशमवलोक्य पूर्वभवाभ्यासतः जातिस्मरणम्। ततो लोभदोषेण विकृष्टो वेल्लितकस्य नेच्छति तत उद्देशाद् अन्यत्राऽभिगन्तुम्, चोद्यमानोऽपि पुनः पुनः निवर्तते इति। क्रोधाभिभूतेन व्यापादितो वेल्लितकेन। उत्पन्नस्तत्रैव निधानकोद्देशे मूषकः। परिगृहीतं चानेन ओघसंज्ञया तद् द्रव्यम्। अनुपालितं कंचित् कालम्। अन्यदा सोमचण्डो नाम द्यूताचार्यः कथञ्चित् परिभ्रमन् आगतस्तमुद्देशम्। उपविष्टः शालपादपसमीपे। ततोऽज्ञानलोभदोषेण तस्य पुरतः सामर्षमिव परिभ्रमितुमारब्धः। व्यापादितश्च तेन। समुत्पन्नश्च तस्यैव

---

१ दुग्गुल्लिया ख

लक्कमेणं। पइट्ठावियं च से नामं रुद्दचण्डो त्ति। पत्तो अणेगजणसंतावगारयं विसपायवो व्व जोव्वणं। असमञ्जसं च ववहरिउमारद्धो। अन्नया गहिओ [1]खत्तमुहे। उवणीओ राइणो समरभासुरस्स। समाणत्तो वज्झो। भिन्नो सूलियाए आरक्खियनरेहिं। मओ य समाणो समुप्पन्नो सक्कराभिहाणाए नरयपुढवीए किंचूणतिसागरोवमाऊ नारगो त्ति। तओ अहाउयमणुवालिऊण उव्वट्टो समाणो समुप्पन्नो एत्थेव विजए एत्थेव लच्छिनिलए असोगदत्तस्स सेट्ठिस्स सुहङ्कराए भारियाए कुच्छिंसि इत्थियत्ताए त्ति। जाया उचियसमएणं। पइट्ठावियं च से नामं सिरियादेवि त्ति। पत्ता जोव्वणं। दिन्ना सागरदत्तसत्थवाहपुत्तस्स समुद्ददत्तस्स। वत्तो विवाहो भुञ्जन्ति भोए त्ति। एत्थन्तरंमि तुमं गेवेज्जगेहिंतो चविऊण इमाए चेव कुच्छिंसि समुप्पन्नो पुत्तत्ताए त्ति। जाओ कालक्कमेण। पइट्ठावियं च से नामं सागरदत्तो त्ति। पत्तो जोव्वणं। पडिबुद्धो य देवसम्मायरियसमीवे। परिणीया ईसरक्खन्दसात्थगस्स धूया [2]नन्दिणि

प्रनष्टश्रवणनासिकाया दुर्गिलिकाऽभिधानाया भार्यायाः कुक्षौ पुत्रतया इति। जातः कालक्रमेण। प्रतिष्ठापितं च तस्य नाम रुद्रचण्ड इति। प्राप्तोऽनेकजनसंतापकारकं विषपादप इव यौवनम्। असमञ्जसं च व्यवहर्तुमारब्धः। अन्यदा गृहीतः खात्रमुखे। उपनीतो राज्ञः समरभासुरस्य। समाज्ञप्तो वध्यः। भिन्नः शूलिकया आरक्षितनरैः। मृतः सन् समुत्पन्नः शर्कराभिधानायां नरकपृथिव्यां किंचिदूनत्रिसागरोपमायुर्नारक इति, ततः यथायुष्कमनुपाल्य उद्वृत्तः सन् समुत्पन्नः अत्रैव विजये, अत्रैव लक्ष्मीनिलये अशोकदत्तस्य श्रेष्ठिनः शुभंकराया भार्यायाः कुक्षौ स्त्रीकतया इति। जाता उचितसमयेन। प्रतिष्ठापितं च तस्या नाम 'श्रीदेवी' इति। प्राप्ता यौवनम्। दत्ता सागरदत्तसार्थवाहपुत्रस्य समुद्रदत्तस्य। वृत्तो विवाहः। भुञ्जाते भोगान् इति। अत्रान्तरे त्वं ग्रैवयकेभ्यश्च्युत्वा अस्याश्चैव कुक्षौ समुत्पन्नः पुत्रतया। जातः कालक्रमेण। प्रतिष्ठापितं च तव नाम सागरदत्त इति। प्राप्तो यौवनम्। प्रतिवुद्धश्च देवशर्माचार्यसमोपे। परि-

---

१ संधिमुहे ख। २ नन्दणि ख।

त्ति । भोगसुहमणुहवन्ताणं कालक्कमेणं जाओ ते पुत्तो । अन्नया य पुत्तजम्मब्भुदयनिमित्तेणं चेव सपरिवारो आगओ उज्जाणिगाए इमं चेव निहाणगुद्देसं । दिट्ठो य तुमए पुत्तज्झयनिवेसणनिमित्तं खड्डं खणमाणेणं निहाणगकलसकण्ठेगदेसो त्ति । तओ तमन्नत्थ निवेसिऊण तं च पएसं पुणरवि तहेव करिऊण भुत्तुत्तरकाले पविट्ठो नयरं । चिन्तियं तुमए । किमेत्थ जुत्तं ति अम्बं ताव पुच्छामि । साहिओ इमीए एस वइअरो । पुच्छिया एसा 'किमेत्थ जुत्तं' ति । तीए भणियं । मम ताव तं पएसं [1]दंसेहि; तओ जं जुत्तं, तं भणिस्सामि त्ति । दाविओ से पएसो । अन्नाणलोहदोसेण चिन्तियं च तीए । वावाएमि एयं तओ एगाइणी गेण्हिस्सामि । एयं चिन्तिऊण भणिओ तुमं । पुत्तय, पभूयमेयं दव्वं । एयंमि घेप्पमाणे कयाइ नरवई अवगच्छे । तओ य सो सेसदव्वावहारं पि मा करिस्सइ ता अलं ताव एइणा, अवसरेण गेण्हिस्सामो त्ति । तए भणियं । अम्ब, जं तुमं आणवेसि । पविट्ठाइं नयरं । अइक्कन्ता कइवि दियहा

णीता ईश्वरस्कन्दश्रावकस्य दुहिता नन्दिनी इति । भोगसुखमनुभवतोः कालक्रमेण जातस्तव पुत्रः । अन्यदा च पुत्रजन्माभ्युदयनिमित्तेन चैव सपरिवार आगत उद्यानिकायाम्-इमं चैव निधानकोद्देशम् । दृष्टश्च त्वया पुत्रध्वजनिवेशननिमित्तं गर्तां खनमानेन निधानककलशकण्ठैकदेश इति । ततः तमन्यत्र निवेश्य तं च प्रदेशं पुनरपि तथैव कृत्वा भुक्तोत्तरकाले प्रविष्टो नगरम् । चिन्तितं त्वया-किमत्र युक्तमिति अम्बां तावत् पृच्छामि । कथितोऽस्या एष व्यतिकरः । पृष्टा एषा 'किमत्र युक्तम्' इति । तया भणितम्-मम तावत् तं प्रदेशं दर्शय, ततो यद् युक्तम्, तद् भणिष्यामि इति । दर्शितस्तस्याः प्रदेशः । अज्ञानलोभदोषेण चिन्तितं च तया-व्यापादयामि एतम्, तत एकाकिनी ग्रहीष्यामि । एवं चिन्तयित्वा भणितस्त्वम् । पुत्रक ! प्रभूतमेतद् द्रव्यम् । एतस्मिन् गृह्यमाणे कदाचिद् नरपतिरवगच्छेत् ततश्च स शेषद्रव्यापहारमपि मा करिष्यति, ततोऽलं तावद् एतेन, अवसरेण ग्रहीष्याम इति । त्वया भणितम्-अम्ब ! यत् त्वमाज्ञाप-

---

[1] पसासेहि ख

तुज्झं सुहेणं, इमीए पुण पुव्वभवब्भत्थलोहदोसेण तुह मरणचिन्तोवायपज्जाउलाए दुक्खेणं ति। परिचिन्तिओ उवाओ। देमि से पोसहोववासपारणयभोयणे विसं ति। तओ उववासलहुसरीरो विसप्पओएण लहुं चेव न भविस्सइ त्ति चिन्तिऊण पउत्तं विसं। लद्धो तुमं तेणं। एत्थन्तरंमि दिट्ठो नन्दिणीए। कओ अणाए कोलाहलो। तओ अहिययरं ते कूजिउं पयत्ता जणणी। संमिलिओ लोयनिवहो। तओ एक्केण सिद्धपुत्तेण विसावहारमन्तसामत्थओ 'साहम्मिओ' त्ति कलिऊण जीवाविओ। समुप्पन्ना य ते चिन्ता। एवमणेगोवद्दवभायणं मणुयाण जीवियं। ता अलं गिहवासेणं। मा पुणो वि मे पमत्तस्स एवमेव पाणावगमो भविस्सइ। अओ पव्वज्जामि पव्वज्जं ति चिन्तिऊण जहोचिएण विहिणा पवन्नो देवसम्मगुरुसमीवे पव्वज्जं ति। परिवालिऊण निरइयारं काऊण य कालमासे कालं उववन्नो तीससागरोवमाऊ गेवेज्जगसुरो त्ति। एसा च ते जणणी तद्दव्वलोभेण तत्थ चेव सहत्थसिप्पनिम्मियं महापेढं काऊण पुत्तवहपरिणामजणियनरयाउया अभुञ्जिऊण तं दव्वं मया समाणी धूमप्पभाए नरयपुढवीए उववन्ना पन्नरससागरोवमट्ठिई नारगो त्ति।

यसि। प्रविष्टौ नगरम्। अतिक्रान्ताः कतिचिद् दिवसाः तव सुखेन, अस्याः पुनः पूर्वभवाभ्यस्तलोभदोषेण तव मरणचिन्तोपायपर्याकुलाया दुःखेनेति। परिचिन्तित उपायः। ददामि तस्य पौषधोपवासपारणकभोजने विषमिति। तत उपवासलघुशरीरो विषप्रयोगेण लघ्वेव न भविष्यति इति चिन्तयित्वा प्रयुक्तं विषम्। लब्धस्त्वं तेन। अत्रान्तरे दृष्टो नन्दिन्या। कृतोऽनया कोलाहलः। ततोऽधिकतरं तव कूजितुं प्रवृत्ता जननी। संमिलितो लोकनिवहः। तत एकेन सिद्धपुत्रेण विषापहारमन्त्रसामर्थ्यतः 'साधर्मिकः' इति कलयित्वा जीवितः। समुत्पन्ना च तव चिन्ता। एवमनेकोपद्रवभाजनं मनुजानां जीवितम्। ततोऽलं गृहवासेन। मा पुनरपि मम प्रमत्तस्य एवमेव प्राणापगमो भविष्यति। अतः प्रपद्ये प्रव्रज्यामिति चिन्तयित्वा यथोचितेन विधिना प्रपन्नो देवशर्मगुरुसमीपे प्रव्रज्यामिति। परिपाल्य निरतिचाराम्, कृत्वा च कालमासे कालमुपपन्नः त्रिंशत्सागरोपमायुर्ग्रैवेयकसुर इति। एषा च तव जननी तद्द्रव्यलोभेन तत्रैव

तओ उव्वट्टा समाणी नाणातिरिएसु आहिण्डिय पुव्वभवब्भत्थलोभदोसओ एत्थ नालिएरिपायवत्ताए उववन्न त्ति। तुमं पि य तओ चविऊण सागरदत्तसेट्ठिगेहे सिरिमईए कुच्छिसि पुत्तत्ताए उववन्नो सि। दोण्हं पि तुम्हाणं संपयं इमा अवत्था। एस एत्थ वइयरो त्ति ॥

तओ ममेयं सोऊण समुप्पन्नो संवेगो, विरत्तो भवचारगाओ मणो। अणुन्नविओ भयवन्तसन्निहाणे तद्दव्ववइयरं नरवई। अणुन्नाओ य तेण तओ तं गेण्हाविय सयलदुहियसत्ताणं दाऊण पवन्ना मए विजयधम्मगणहरस्स समीवे पव्वज्ज त्ति ॥

सिहिकुमारेण भणियं–भयवं! एवमेयं, ईइसो चेव एस संसारो। धन्नो तुमं, जो एवमभिपव्वइओ त्ति। अह कइविहो पुण दाणाइभेयं पडुच्च पणीओ भयवया धम्मो। भयवया भणियं–सुण।

स्वहस्तशिल्पनिर्मितं महापीठं कृत्वा पुत्रवधपरिणामजनितनरकायुष्का अभुक्त्वा तद् द्रव्यं मृता सती धूमप्रभायां नरकपृथिव्यामुपपन्ना पञ्चदशसागरोपमस्थितिर्नारक इति। तत उद्वृत्ता सती नानातिर्यक्षु आहिण्ड्य पूर्वभवाभ्यस्तलोभदोषतोऽत्र नालिकेरीपादपतया उपपन्ना इति। त्वमपि च ततश्च्युत्वा सागरदत्तश्रेष्ठिगेहे श्रीमत्याः कुक्षौ पुत्रतया उपपन्नोऽसि। द्वयोरपि युवयोः साम्प्रतमियमवस्था। एषोऽत्र व्यतिकर इति ॥

ततो मम एतत् श्रुत्वा समुत्पन्नः संवेगः, विरक्तं भवचारकाद् मनः। अनुज्ञापितो भगवत्सन्निधाने तद्द्रव्यव्यतिकरं नरपतिः। अनुज्ञातश्च तेन, ततस्तद् ग्राहयित्वा सकलदुःखितसत्त्वेभ्यो दत्त्वा प्रपन्ना मया विजयधर्मगणधरस्य समीपे प्रव्रज्या इति ॥

शिखिकुमारेण भणितम्–भगवन्! एवमेतत्, ईदृश एव एष संसारः, धन्यस्त्वम्, यः एवमभिप्रव्रजित इति। अत्र कतिविधः पुनर्दानादिभेदं प्रतीत्य प्रणीतो भगवता धर्मः। भगवता भणितम्–शृणु।

धम्मो चउव्विहो दाण-सील-तव-विविहभावणामइओ । सावय! जिणेहि भणिओ तियसिन्द-नरिन्दनमिएहिं ॥
दाणं च होइ तिविहं नाणाऽभय-धम्मुवग्गहकरं च । जं तत्थ नाणदाणं तमहं वोच्छं समासेणं ॥
दिन्नेण जेण जीवो विन्नाया होइ बन्ध-मोक्खाणं । तं होइ नाणदाणं सिवसुहसंपत्तिबीयं तु ॥
दिन्नेण तेण जीवो पुण्णं पावं च बहुविहमसेसं । सम्मं वियाणमाणो कुणइ पवित्तिं निवित्तिं च ॥ ॥१८८॥
पुण्णम्मि पवत्तन्तो पावइ य लहुं नरामरसुहाइं । नारयतिरियदुहाण य मुच्चइ पावाउ सुणियत्तो ॥
तिरियाण व मणुयाण व असुरसुराणं च होइ जं सुक्खं । तं सव्वपयत्तेणं पावइ नाणप्पयाणेणं ॥
पावेइ य सुविसालं मोक्खसुहं सुहपरंपरेणेव । तस्सेव पहावेणं सुन्दर! विमलस्स नाणस्स ॥
एवं इहलोयम्मि वि परलोयम्मि य सुहाइ नाणेणं । पावेइ जेण जीवो तम्हा तं दाणपवरं तु ॥

धर्मश्चतुर्विधो दान-शील-तपो-विविधभावनामयः । श्रावक! जिनैर्भणितः त्रिदशेन्द्र-नरेन्द्रनतैः ॥
दानं च भवति त्रिविधं ज्ञाना-ऽभय-धर्मोपग्रहकरं च । यत् तत्र ज्ञानदानं तदहं वक्ष्ये समासेन ॥
दत्तेन येन जीवो विज्ञाता भवति बन्ध-मोक्षयोः । तद् भवति ज्ञानदानं शिवसुखसम्पत्तिबीजं तु ॥
दत्तेन तेन जीवः पुण्यं पापं च बहुविधमशेषम् । सम्यग् विजानन् करोति प्रवृत्तिं निवृत्तिं च ॥
पुण्ये प्रवर्तमानः प्राप्नोति च लघु नराऽमरसुखानि । नारकतिर्यग्दुःखेभ्यश्च मुच्यते पापात् सुनिवृत्तः ॥
तिरश्चां वा मनुजानां वा असुरसुराणां च भवति यत् सौख्यम् । तत् सर्वप्रयत्नेन प्राप्नोति ज्ञानप्रदानेन ॥
प्राप्नोति च सुविशालं मोक्षसुखं सुखपरंपरेणैव । तस्यैव प्रभावेण सुन्दर! विमलस्य ज्ञानस्य ॥

इहलोयपारलोइयसुहाइं सव्वाइं तेण दिन्नाइं । जीवाण फुडं सव्वन्नुभासियं देइ जो नाणं ॥
गयरागदोसमोहो सव्वन्नू होइ नाणदाणेणं । मणुयासुरसुरमहिओ कमेण सिद्धिं च पावेइ ॥
एयं खु नाणदाणं सुन्दर ! संखेवओ समक्खायं । देन्तस्स गाहगस्स य हियमेगन्तेण विन्नेयं ॥
पुढवि-दग-अगणि-मारुय-वणस्सईकाइयाण जीवाणं । बेइन्दिय-तेइन्दिय-चउरो-पञ्चिन्दियाणं च ॥
जा एयाणमहिंसा सम्मं मण-वयण-कायजोएहिं । तं होइ अभयदाणं सुसाहुज्जणसेवियं पवरं ॥
इच्छन्ति सव्वजीवा निब्भरदुहिया वि जीविउं जम्हा । तम्हा तं चेव पियं तेसिं कुसलेण विन्नेयं ॥
जम्हा य नरवरिन्दो मरणम्मि उवट्ठियम्मि रज्जं पि । देइ सजीवियहेउं तम्हा तं चेव इट्ठयरं ॥

एवमिहलोकेऽपि परलोके च सुखानि ज्ञानेन । प्राप्नोति येन जीवस्तस्मात् तद् दानप्रवरं तु ॥
इहलोकपारलौकिकसुखानि सर्वाणि तेन दत्तानि । जीवानां स्फुटं सर्वज्ञभाषितं ददाति यो ज्ञानम् ॥
गतरागद्वेषमोहः सर्वज्ञो भवति ज्ञानदानेन । मनुजा-ऽसुरमहितः क्रमेण सिद्धिं च प्राप्नोति ॥
एतत् खलु ज्ञानदानं सुन्दर ! संक्षेपतः समाख्यातम् । ददानस्य ग्राहकस्य च हितमेकान्तेन विज्ञेयम् ॥
पृथिवी-दक-अग्नि-मारुत-वनस्पतिकायिकानां जीवानाम् । द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियाणां च ॥
या एतेषामहिंसा सम्यग् मनो-वचन-काययोगैः । तद् भवति अभयदानं सुसाधुजनसेवितं प्रवरम् ॥
इच्छन्ति सर्वजीवा निर्भरदुःखिता अपि जीवितुं यस्मात् । तस्मात् तदेव प्रियं तेषां कुशलेन विज्ञेयम् ॥
यस्माच्च नरवरेन्द्रो मरणे उपस्थिते राज्यमपि । ददाति स्वजीवितहेतुं तस्मात् तदेव इष्टतरम् ॥

दायव्वं च मइमया जं इट्ठं होइ गाहगाणं तु । तं दाणं परलोए सुहमिच्छन्तेण सुविसालं ॥
दीहाऊ उ सुरूवो नीरोगो होइ अभयदाणेणं । जम्मन्तरे वि जीवो सयलजणसलाहणिज्जो य ॥
एयं तु अभयदाणं तियसिन्दनरिन्दनमियचलणेहिं । सावय ! जिणेहि भणियं दुज्जयकम्मट्ठदलणेहिं ॥
धम्मोवग्गहदाणं भण्णइ सयमेव दव्वमविरुद्धं । नवकोडीपरिसुद्धं दिज्जइ जं धम्मियजणस्स ॥
तं पुण असणं पाणं वत्थं पत्तं च भेसयं जोग्गं । दायव्वं तु मइमया तहेव सयणासणं पवरं ॥
दायव्वं पुण सज्झायझाणनिरयस्स निरुवगारिस्स । जो संजमतवभारं वहइ सया तेणुवग्गहिओ ॥
कम्मलहुयत्तणेण य सो अप्पाणं परं च तारेइ । कम्मगुरू अतरन्तो सयंपि कह तारए अन्नं ? ॥
दायव्वं पुण तं कारणेहि एएहि [1]चउहि परिसुद्धं । जिणभणिएहिं दायग-गाहग-तहकाल-भावेहिं ॥

दातव्यं च मतिमता यदिष्टं भवति ग्राहकाणां तु । तद् दानं परलोके सुखमिच्छता सुविशालम् ॥
दीर्घायुस्तु सुरूपो नीरोगो भवति अभयदानेन । जन्मान्तरेऽपि जीवः सकलजनश्लाघनीयश्च ॥
एतत् तु अभयदानं त्रिदशेन्द्रनरेन्द्रनतचरणैः । श्रावक ! जिनैर्भणितं दुर्जयकर्माष्टदलनैः ॥
धर्मोपग्रहदानं भण्यते स्वयमेव द्रव्यमविरुद्धम् । नवकोटिपरिशुद्धं दीयते यद् धार्मिकजनाय ॥
तत् पुनरशनं पानं वस्त्रं पात्रं च भेषजं योग्यम् ॥ दातव्यं तु मतिमता तथैव शयनाऽऽसनं प्रवरम् ॥
दातव्यं पुनः स्वाध्यायध्याननिरतस्य निरुपकारिणः । यः संयमतपोभारं वहति सदा तेनोपगृहीतः ॥

---

[1] चेव ख

दायगसुद्धं भण्णइ जो दाया देइ नाणसंपन्नो । अट्ठमयट्ठाणरहिओ सद्धारोमञ्चियसरीरो ॥
नाओवगयं दव्वं फासुगमविरुद्धगं च लोगम्मि । इहपरलोयासंसं मोत्तूणं निज्जरट्ठी उ ॥
सुक्खेत्तम्मि व बीयं विक्खित्तं तस्स बहुफलं होइ । तं दाणं मणुयामरसिवसुहसंपत्तिजणयं तु ॥
जो पुण सद्धारहिओ दाणं देइ जसकित्ति[1]रेसम्मि । अहिमाणेण व एसो देइ अहं किं न देमि त्ति ॥
तं सद्धाजलरहियं बीयं व न होइ बहुफलं तस्स । दाणं बहुं पि पवरं दूसियचित्तस्स मोहेण ॥
काऊण य पाणिवहं जो दाणं देइ धम्मसद्धाए । दहिऊण चन्दणं सो करेइ अङ्गारवाणिज्जं ॥

कर्मलघुत्वेन च स आत्मानं परं च तारयति । कर्मगुरुस्तरन् स्वयमपि कथं तारयेदन्यम् ? ॥
दातव्यं पुनस्तत् कारणैरेतैश्चतुर्भिः परिशुद्धम् । जिनभणितैर्दायक-ग्राहक-तथाकाल-भावैः ॥
दायकशुद्धं भण्यते यो दाता ददाति ज्ञानसंपन्नः । अष्टमदस्थानरहितः श्रद्धारोमाञ्चितशरीरः ॥
न्यायोपगतं द्रव्यं प्रासुकमविरुद्धकं च लोके । इहपरलोकाशंसां मुक्त्वा निर्जरार्थी तु ॥
सुक्षेत्रे इव बीजं विक्षिप्तं तस्य बहुफलं भवति । तद् दानं मनुजाऽमरशिवसुखसंपत्तिजनकं तु ॥
यः पुनः श्रद्धारहितो दानं ददाति यशःकीर्तिनिमित्तं । अभिमानेन वा एष ददाति अहं किं न ददामीति ? ॥
तत् श्रद्धाजलरहितं बीजमिव न भवति बहुफलं तस्य । दानं बहु अपि प्रवरं दूषितचित्तस्य मोहेन ॥
कृत्वा च प्राणिवधं यो दानं ददाति धर्मश्रद्धया । दग्ध्वा चन्दनं स करोति अङ्गारवाणिज्यम् ॥

---

[1] रेसम्मि (अन्य०) निमितार्थे ।

मूढो लोयविरुद्धं धम्मविरुद्धं च देइ जो दाणं । सो अप्पाणं तह गाहगं च पाडेइ संसारे ॥
जाणह गाहगसुद्धं पञ्चमहव्वयधरो उ जो नियमा । गुरुसुस्सूसानिरओ जोगम्मि समाहियप्पा य ॥
तह खन्ति-मद्दव-ऽज्जवजुत्तो धणियं च विगयलोहो उ । मण-वयण--कायगुत्तो पञ्चिन्दियनिग्गहपरो य ॥
सज्झायझाणनिरओ सुद्धप्पा सुद्धसाहुचरिओ य । इह परलोए य तहा सव्वत्थ दढं अपडिबद्धो ॥
मेरु व्व जो न तीरइ उवसग्गसमीरणेहि चालेउं । एयारिसम्मि दाणं गाहगसुद्धं तु विन्नेयं ॥
सीलव्वयरहियाणं दिज्जइ जं पुण धणं कुपत्ताणं । तं खलु धोवइ वत्थं रुहिरकयं सोणिएणेव ॥
दिन्नं सुहं पि दाणं होइ कुपत्तम्मि असुहफलमेव । सप्पस्स जह व दिन्नं खीरं पि विसत्तणमुवेइ ॥
तुच्छं पि सुपत्तम्मि उ दाणं नियमेण सुहफलं होइ । जह गावीए विइण्णं तणं पि खीरत्तणमुवेइ ॥

मूढो लोकविरुद्धं धर्मविरुद्धं च ददाति यो दानम् । स आत्मानं तथा ग्राहकं च पातयति संसारे ॥
जानीत ग्राहकशुद्धं पञ्चमहाव्रतधरस्तु यो नियमात् । गुरुशुश्रूषानिरतो योगे समाहितात्मा च ॥
तथा क्षान्ति-मार्दवा-ऽऽर्जवयुक्तो बाढं च विगतलोभस्तु । मनो-वचन-कायगुप्तः पञ्चेन्द्रियनिग्रहपरश्च ॥
स्वाध्यायध्याननिरतः शुद्धात्मा शुद्धसाधुचरितश्च । इह परलोके च तथा सर्वत्र दृढमप्रतिबद्धः ॥
मेरुरिव यो न शक्यते उपसर्गसमीरणैश्चालयितुम् । एतादृशे दानं ग्राहकशुद्धं तु विज्ञेयम् ॥
शीलव्रतरहितानां दीयते यत् पुनर्धनं कुपात्राणाम् । तत् खलु धावयति वस्त्रं रुधिरकृतं शोणितेनेव ॥
दत्तं शुभमपि दानं भवति कुपात्रे अशुभफलमेव । सर्पस्य यथा वा दत्तं क्षीरमपि विषत्वमुपैति ॥

होइ सुहासुहफलयं पत्तविसेसेण दाणमेगं पि । गावी-भुयङ्गपीयं जह उदगं होइ खीर-विसं ॥
भण्णइ य कालसुद्धं दाणं कालोववन्नयं जं तु । दिज्जइ तवस्सिदेहोवयारकालम्मि सुविसुद्धं ॥
सोएमि न नियदेहं एयं सोएमि मोहपरतन्तं । जिणवयणबाहिरमइं दुक्खसमुद्दंमि निवडन्तं ॥
मोहवसयाण अहवा केत्तियमेयं किलिट्ठसत्ताण । एसो मोहसहावो धिरत्थु संसारवासस्स ॥

इय सो सुहपरिणामो तीए विणिवाइओ उ पावाए । पन्नरससागराऊ उववन्नो सुक्कप्पंमि ।

भगवान् ज्वलनज्वालावल्या । संजातस्तस्य करुणाप्रधानत्वेन ध्यानयोगसंक्रमः । कथम्?

चिन्तयति स भगवान् कायोत्सर्गेऽचलितस्वभावः । अनुकम्पागतचित्तो ज्वलिते ज्वलने दह्यमानः ॥
इह धन्याः सत्पुरुषा ये नवरमनुत्तरं गता मोक्षम् । यस्मात्ते जीवानां न कारणं कर्मबन्धस्य ॥
एष तु मोहवशतः कोऽपि मां प्राप्य कुगतौ । व्रजिष्यति अहो कष्टं कष्टं बहुदुःखप्रचुरायाम् ॥
अहमेतस्य निमित्तं दुर्गतिगमने निमित्तविरहेण । न खलु भवति कार्यसिद्धिर्भणितमिदं लोकनाथेन ॥
शोचामि न निजदेहमेतं शोचामि मोहपरतन्त्रम् । जिनवचनबाह्यमतिं दुःखसमुद्रे निपतन्तम् ॥
मोहवशगानामथवा कियन्मात्रं क्लिष्टसत्त्वानाम् । एष मोहस्वभावो धिगस्तु संसारवासम् ॥

इओ य सा धणसिरी ससज्झसा विय गया चण्डियाययणं, पविसमाणी य वेइया चेडियाए। भणिया च तीए-सामिणि, कहिं गया आसि?। तीए भणियं-न कहिंचि, परं अद्धरत्तसंझाए भयवईए पयाहिणं कयं ति।

एत्थन्तरंमि उवलद्धो चेडियाए हुयासणुज्जोओ। किमेयं ति वियप्पिऊण पसुत्ता य एसा। पहाया रयणी। तओ काऊण देवयाए पूयं संमाणिऊण कम्मयरे पत्थिया धणसिरी सगिहं। दिट्ठो य पन्थे वावन्नो रिसी धणसिरीए कम्मयरेहि चेडियाए य। [1]अहो केण एयं ववसियं ति [2]जंपियं कम्मयरेहिं। 'न याणामि' त्ति भणियं धणसिरीए। समुप्पन्नो चेडियाए वियप्पो। पेसिया अहं भयवओ अन्नेसणनिमित्तं, निग्गया य एसा [3]अद्धरत्तसमए, उवलद्धो य मए तीए चेव वेलाए [4]उज्जोवो। ता न याणामो कहमेयं; मन्नेमि, जोइया अहं एयाए महापाव(वा)देसंमि। एवं चिन्तयन्ती पविट्ठा सह धणसिरीए गेहं ति॥

इति स शुभपरिणामस्तया विनिपातितस्तु पापया। पञ्चदशसागरायुरुपपन्नः शुक्रकल्पे॥

इतश्च सा धनश्रीः ससाध्वसा इव गता चण्डिकायतनम्, प्रविशन्ती च वेदिता चेटिकया। भणिता च तया-स्वामिनि! कुत्र गताऽऽसीः?। तया भणितम्-न कुत्रचिद्, परमर्धरात्रसंध्यायां भगवत्याः प्रदक्षिणं कृतमिति।

अत्रान्तरे उपलब्धश्चेटिकया हुताशनोद्योतः। 'किमेतद्' इति विकल्प्य प्रसुप्ता चैषा। प्रभाता रजनी। ततः कृत्वा देवतायाः पूजां संमान्य कर्मकरौ प्रस्थिता धनश्रीः स्वगृहम्। दृष्टश्च पथि व्यापन्न ऋषिर्धनश्रिया कर्मकराभ्यां चेटिकया च अहो केनैतद् व्यवसितमिति जल्पितं कर्मकराभ्याम्, 'न जानामि' इति भणितं धनश्रिया। समुत्पन्नश्चेटिकाया विकल्पः। प्रेषिताऽहं भगवतोऽन्वेषणनिमित्तम्, निर्गता चैषाऽर्धरात्रसमये, उपलब्धश्च मया तस्यामेव वेलायामुद्द्योतः। ततो न जानीमः कथमेतत्, मन्ये, योजिताऽहमेतया महापापादेशे।

---

[1] भणियं च णेहिं-अहो ख। [2] जंपियं धणसिरीए न याणामि त्ति ख। [3] अड्ढरत्त० क। [4] उज्जोओ ख।

एत्थन्तरंमि आगओ सागडिओ। दिट्ठो य णेणं पि अट्ठिमेत्तसेसो मुणिवरो। चिन्तियं च णेण--अहो मे अधन्नया। पडिवन्नो अहं कस्सइ किलिट्ठसत्तस्स भगवओ उवसग्गकरणेण सहायभावं। पाडिओ मए अप्पा दोग्गईए। ता निवेएमि एयं नरवइस्स। अद्धजाममेत्ते य वासरे गओ नरवइसमीवं। निवेइयमणेण। कुविओ राया। निउत्तो णेण दण्डवासिओ 'अरे लहु रिसिघायगं लहेहि' त्ति। निग्गओ दण्डवासिओ, गओ चण्डियाययणं[1]। पुच्छिया णेण भोइया। को उण अज्ज एत्थं वसिओ त्ति ?। तीए भणियं—न कोइ भुयङ्गप्पाओ, जइ परं समुद्ददत्तस्स घरिणी धणसिरि त्ति। दण्डवासिएण भणियं—किं पुण से निवासकज्जं[2] ?। भोइयाए भणियं—न याणामो त्ति। दण्डवासिएण चिन्तियं—न अज्ज अट्ठमी, न नवमी, न चउद्दसी, ता किं पुण से[3] निवासकारणं ?। पवसणनिमित्तं होज्जा; तं पि अघडमाणयं, जओ कल्लंमि अङ्गारयदिणो, चरमपोरिसीए य विट्ठी आसि विणिवायजोगो त्ति। न खलु दुट्ठमित्थिया-

एवं चिन्तयन्ती प्रविष्टा सह धनश्रिया गेहमिति।

अत्रान्तरे आगतः शाकटिकः। दृष्टश्च तेनापि अस्थिमात्रशेषो मुनिवरः। चिन्तितं च तेन-अहो मेऽधन्यता, प्रतिपन्नोऽहं कस्यचित् क्लिष्टसत्त्वस्य भगवत उपसर्गकरणेन सहायभावम्। पातितो मयाऽऽत्मा दुर्गतौ, ततो निवेदयाम्येतद् नरपतये। अर्धयाममात्रे च वासरे गतो नरपतिसमीपम्। निवेदितमनेन। कुपितो राजा। नियुक्तस्तेन दण्डपाशिकः, अरे लघु ऋषिघातकं लभस्वेति। निर्गतो दण्डपाशिकः, गतश्चण्डिकायतनम्। पृष्टास्तेन पूजिका, कः पुनरत्रोषित इति ?। तया भणितम्-न कोऽपि भुजङ्गप्रायः, यदि परं समुद्रदत्तस्य गृहिणी धनश्रीरिति। दण्डपाशिकेन भणितम्-किं पुनस्तस्या निवासकार्यम् ?। पूजिकया भणितम्-न जानीम इति। दण्डपाशिकेन चिन्तितम्-नाद्याष्टमी, न नवमी, न चतुर्दशी, ततः किं पुनस्तस्या निवासकारणम् ?। प्रवसननिमित्तं भवेत् तदप्यघटमानकम्, यतः कल्येऽ-

---

१ देवयाययणं ख। २ निवासस्स कारणं ख। ३ तीए पयोयणं ? तओ डंडवासिएणं अहिप्पासे निवास० क।

यणं मोत्तूणमेवंविहं कम्मं पि पाएण कस्सइ अन्नस्स संभवइ। ता गच्छामि ताव समुद्ददत्तगेहं, तओ चेव मे उवलद्धी हविस्सइ त्ति। गओ एसो, दिट्ठा य तेण दुवारदेसभायंमि चेव चेडी। पुच्छिया एसा। अत्थि इह सत्थवाहघरिणी न व त्ति?। तओ ससंखोहं भणियं चेडियाए। किं पुण तीए पओयणं?। तओ दण्डवासिएण अहिप्पायभणिइकुसलेण सासूयमिव जंपियं–आ पावे विसुमरिओ ते रिसिवुत्तन्तो त्ति?। तओ सकम्मदुट्ठत्तणेण नियडिबलिययाए य भणियं चेडियाए। अज्ज, गवेसणनिमित्तं चेव भगवओ ते अहं सामिणीए पेसिया, न उण अन्नं वियाणामि। तओ दण्डवासिएण 'न एत्थ संदेहो, अन्नहा किं गवेसणनिमित्तं' ति चिन्तिऊण पुच्छिया एसा। सुन्दरि, अलं भयसङ्काए; किं पुणुद्दिसिय तुमं भयवओ गवेसणनिमित्तं पेसिया। चेडियाए भणियं–अज्ज, सो खु भयवं कल्ले तइयपोरिसीए भिक्खानिमित्तं इहं पविट्ठो त्ति, अगेण्हिऊण भिक्खं लहु चेव निग्गओ। तओ निग्गच्छमाणं पेच्छिऊण भणिया अहं सामिणीए, जहा 'मञ्जरिए, गच्छ, कहिं पुण एस समणओ ठिओ त्ति जाणिऊण लहुं संवाएहि'। तओ संवाइयं मए, न उण कज्जं

ङ्गारकदिनः, चरमपौरुष्यां च विष्टिरासीद् विनिपातयोग इति। न खलु दुष्टं स्त्रीजनं मुक्त्वा एवंविधं कर्मापि प्रायेण कस्यचिदन्यस्य संभवति, ततो गच्छामि तावत् समुद्रदत्तगेहम्, तत एव मे उपलब्धिर्भविष्यतीति। गत एष, दृष्टा च तेन द्वारदेशभाग एव चेटी। पृष्टैषा–अस्तीह सार्थवाहगृहिणी नवेति?। ततः ससंक्षोभं भणितं चेटिकया–किं पुनस्तस्याः प्रयोजनम्? ततो दण्डपाशिकेनाभिप्रायभणितिकुशलेन सासूयमिव जल्पितम्–आः पापे! विस्मृतस्ते ऋषिवृत्तान्त इति?। ततः स्वकर्मदुष्टत्वेन निकृतिवलिकतया च भणितं चेटिकया–आर्य! गवेषणनिमित्तमेव भगवतोऽहं स्वामिन्या प्रेषिता, न पुनरन्यद् विजानामि। ततो दण्डपाशिकेन नात्र संदेहः, अन्यथा किं गवेषणनिमित्तम्'इति चिन्तयित्वा पृष्टैषा। सुन्दरि! अलं भयशङ्कया, किं पुनरुद्दिश्य त्वं भगवतो गवेषणनिमित्तं प्रेषिता?। चेटिकया भणितम्–आर्य! स खलु भगवान् कल्ये तृतीयपौरुष्यां भिक्षानिमित्तमिह प्रविष्ट इति, अगृहीत्वा भिक्षां लघ्वेव निर्गतः। ततो

वियाणामि। दण्डवासिएण भणियं–तओ तत्थ गन्तूण किं कयं तस्स तीए?। चेडियाए भणियं–अज्ज, न किंचि, न वन्दिओ वि एसो सामिणीए, अवि चण्डियाए कया पूय त्ति। दण्डवासिएण चिन्तियं। अओ चेव कूरदेवयाविहाणनिमित्तं पयारिऊण परियणं एयाए वावाइओ हविस्सइ। ता पेच्छामि ताव सत्थवाहघरिणिं, तओ मुहवियारओ चेव लक्खिस्सामि त्ति। गओ तीए पासं, संखुद्धा धणसिरी, लक्खिओ से भावो दण्डवासिएण, भणिया य णेण। पेसिओ अहं महाराएण, [*वावाइओ रिसी,] रिसिवावायगअण्णेसणनिमित्तं, पवत्तो य तस्स [१]घाययवियाणणत्थं ति। पसुत्ता य तुमं चण्डियाययणे, वियाणिओ य एस वुत्तन्तो मए। ता एहि, नरवइसमीवं गच्छम्ह। एयं च सोऊण ससज्झसा भयपवेविरङ्गी निवडिया धरणिवट्ठे धणसिरी। दण्डवासिएण चिन्तियं–कयमिणमिमीए. कहमन्नहा एवंविहं भयं ति। निब्भच्छिया एसा। मिलिओ जणवओ। एयं च वइयरमायण्णिऊण जणसयासाओ 'मा अहं च एवं

निर्गच्छन्तं प्रेक्ष्य भणिताऽहं स्वामिन्या, यथा 'मञ्जरिके! गच्छ, कुत्र पुनरेष श्रमणः स्थित इति ज्ञात्वा लघु संवादय'। ततः संवादितं मया, न पुनः कार्यं विजानामि। दण्डपाशिकेन भणितम्–ततस्तत्र गत्वा किं कृतं तस्य तया?। चेटिकया भणितम्–आर्य! न किञ्चित्, न वन्दितोऽप्येष स्वामिन्या, अपि चण्डिकायाः कृता पूजेति। दण्डपाशिकेन चिन्तितम्–अत एव क्रूरदेवताविधाननिमित्तं प्रतार्य परिजनमेतया व्यापादितो भविष्यति। ततः प्रेक्षे तावत् सार्थवाहगृहिणीम्, ततो मुखविकारत एव लक्षयिष्यामीति। गतस्तस्याः पार्श्वम्, संक्षुब्धा धनश्रीः, लक्षितस्तस्या भावः दण्डपाशिकेन, भणिता च तेन। प्रेषितोऽहं महाराजेन, [व्यापादित ऋषिः,] ऋषिव्यापादकान्वेषणनिमित्तम्, प्रवृत्तश्च तस्य घातकविज्ञानार्थमिति। प्रसुप्ता च त्वं चण्डिकायतने, विज्ञातश्चैष वृत्तान्तो मया। तत एहि नरपतिसमीपं गच्छावः। एतच्च श्रुत्वा ससाध्वसा भयप्रवेपमानाङ्गी निपतिता धरणीपृष्ठे धनश्रीः। दण्डपाशिकेन चिन्तितम्–कृतमिदमनया,

---

* अयं कोष्ठान्तर्गतः पाठः कपुस्तके नास्ति। [१] घाययन्नेसणत्थं ख।

चेव घेप्पिस्सामि' त्ति चिन्तिऊण अप्पविसिऊण नियगेहं दुवारओ चेव पलाणो नन्दओ। नीया य एसा नरवइसमीवं। साहिओ वुत्तन्तो नरवइस्स। पुलइया णेणं, चिन्तियं च। हन्त कहमेयाए आगिईए इमं ईदिसं निसंसकम्मं भविस्सइ ?। पुच्छिया य णेणं। अह[1] किंनिमित्तं तुमं चण्डियाययणं गया आसि ?। तओ य तं वयणं सोऊण संखुद्धत्तणेणं न जंपियमिमीए। समुप्पन्ना सङ्का राइणो। थेववेलाए पुणो वि पुच्छिया। कओ तुमं कस्स वा धूय त्ति ?। तओ साहियमिमीए। सुसम्मनयराओ, अहं पुण्णभद्दस्स धूया, समुद्ददत्तस्स घरिणी धणसिरी नाम। गवेसाविओ से भत्ता, नोवलद्धो य। तओ अच्चन्तसुद्धसहावयाए जहाठियं पयापरिवालणसद्दमुव्वहन्तेणं 'कयाइ न तरइ रायपुरओ साहिउं पओयणं, ता वीसत्था साहिस्सइ' त्ति कुलप्पवाहपरियाणणनिमित्तं पेसिओ राइणा पुण्णभद्दमन्तरेण एयवइयरपडिबद्धलेहसणाहो लेहवाहओ। रक्खाविया एसा, पइदियहं पुच्छावए नरवई, न य किंचि जंपइ त्ति। आगओ लेहवाहओ,

कथमन्यथा एवंविधभयमिति। निर्भर्त्सितैषा। मिलितो जनव्रजः। एतं च व्यतिकरमाकर्ण्य जनव्रजसकाशात् 'माऽहं च एवमेव ग्रहीष्ये' इति चिन्तयित्वाऽप्रविश्य निजगेहं द्वारत एव पलायितो नन्दनः। नीता चैषा नरपतिसमीपम्। कथितो वृत्तान्तो नरपतये। दृष्टा तेन, चिन्तितं च। हन्त कथमेतयाऽऽकृत्या इदमीदृशं नृशंसकर्म भविष्यति ? पृष्टा च तेन–अथ किंनिमित्तं त्वं चण्डिकायतनं गताऽऽसीः ?। ततश्च तद् वचनं श्रुत्वा संक्षुब्धत्वेन न जल्पितमनया। समुत्पन्ना शङ्का राज्ञः। स्तोकवेलायां पुनरपि पृष्टा–कुतस्त्वं कस्य वा दुहितेति ?। ततः कथितमनया–सुशर्मनगरात, अहं पूर्णभद्रस्य दुहिता, समुद्रदत्तस्य गृहिणी धनश्रीर्नाम। गवेषितस्तस्य भर्ता, नोपलब्धश्च। ततोऽत्यन्तशुद्धस्वभावतया यथास्थितं प्रजापालनशब्दमुद्वहता 'कदाचिद् न शक्यते राजपुरतः कथयितुं प्रयोजनम्, ततो विश्वस्ता कथयिष्यति' इति कुलप्रवाहपरिज्ञाननिमित्तं प्रेषितो राज्ञा पूर्णभद्रमन्तरेण (समीपे) एतद्व्यतिकरप्रतिबद्धलेखसनाथो लेखवाहकः।

---

[1] कह क

समप्पिओ तेण पडिलेहो, वाइओ राइणा। लिहियं च तत्थ। अत्थि मे धूया धणसिरी कुलदूसणा य। तओ राइणा चिन्तियं–असंसयं कयमिणमिमीए, अकज्जायरणसीला चेव एसा महापावा। अहो से मूढया, अहो महापावकम्माणुट्ठाणं, अहो कूरहिययया, अहो अणालोइयत्तणं। तहा वि 'अवज्झा इत्थिय' त्ति धाडिया णेण सरज्जाओ। गच्छमाणी य वासरन्ते तण्हाछुहाभिभूया पसुत्ता गामदेउलसमीवे। डक्का भुयङ्गमेणं। [1]महापरिकिलेसेण विमुक्का जीविएणं। उववन्ना य एसा मरिऊण वालुयप्पभाए पुढवीए सत्तसागरोवमट्ठिई नारगो त्ति ॥

याकिनीमहत्तरासूनु–परमगुणानुरागि–परमसत्यप्रिय–भगवत्–श्रीहरिभद्रसूरिविरचितायां
'समराइचकहाए' चतुर्थो भवः समाप्तः।

रक्षितैषा, प्रतिदिवसं प्रच्छयति नरपतिः, न च किञ्चिज्जल्पतीति। आगतो लेखवाहकः, समर्पितस्तेन प्रतिलेखः, वाचितो राज्ञा। लिखितं च तत्र। अस्ति मे दुहिता धनश्रीः कुलदूषणा च। ततो राज्ञा चिन्तितम्–असंशयं कृतमिदमनया, अकार्याचरणशीला एवैषा महापापा। अहो! अस्या मूढता, अहो महापापकर्मानुष्ठानम्, अहो क्रूरहृदयता, अहो अनालोचितत्वम्। तथापि 'अवध्या स्त्री' इति धाटिता तेन स्वराज्याद्। गच्छन्ती च वासरान्ते तृष्णाक्षुदभिभूता प्रसुप्ता ग्रामदेवकुलसमीपे। दष्टा भुजङ्गमेन। महता परिक्लेशेन विमुक्ता जीवितेन। उपपन्ना चैषा मृत्वा वालुकाप्रभायां पृथिव्यां सप्तसागरोपमस्थितिर्नारक इति।

इति श्रीयाकिनीमहत्तरासूनु–परमगुणानुरागि–परमसत्यप्रिय श्रीहरिभद्राचार्यविरचितायां
समरादित्यकथायां संस्कृतानुवादे चतुर्थभवग्रहणं समाप्तम्।

---

[1] महया परि० क।

॥ पञ्चमो भवो ॥

वक्खायं जं भणियं धणधणसिरिमो य एत्थ पइभज्जा। जयविजया य सहोयर एत्तो एयं पवक्खामि ॥

अत्थि इहेव जम्बुद्दीवे दीवे भारहे वासे कायन्दी नाम नयरी। जीए समुद्दोद्देसा[1] विय पङ्कयगाहाउलाओ फरिहाओ, पइव्वयाजणमणो विय परपुरिसालङ्घणिज्जो पागारो[2], धरणिहरकन्दराइं विय सीहबालयसमद्धासियाइं दुवारतोरणाइं, सरयजलहरुक्केरा विय धवलाभोयसुन्दरा पासाया। अवि य

दियहपियविहरखिन्नो जीए पओसंमि कुलवहूसत्थो। दूमिज्जइ जालन्तरपडिएहि[3] मियङ्ककिरणेहिं ॥

व्याख्यातं यद् भणितं धन-धनश्रियौ चात्र पतिभार्ये। जयविजयौ च सहोदरौ इत एतत् प्रवक्ष्यामि ॥

अस्ति इहैव जम्बूद्वीपे द्वीपे भारते वर्षे काकन्दी नाम नगरी। यस्याः समुद्रोद्देशा इव पङ्कजग्राहाकुलाः परिखाः, प्रतिव्रताजनमन इव परपुरुषालङ्घनीयः प्राकारः, धरणीधरकन्दराणीव सिंहबालकसमध्यासितानि द्वारतोरणानि, शरज्जलधरोत्करा इव धवलाभोगसुन्दराः प्रासादाः। अपि च—

दिवसप्रियविरहखिन्नो यस्यां प्रदोषे कुलवधूसार्थः। दूयते जालान्तरपतितैर्मृगाङ्ककिरणैः ॥

---

[1] समुद्ददेसा क। [2] पयारो क। [3] ०विडिएहि ख।

गुरुयणविणउज्जुत्तो पणईयणवच्छलो सुहाभिगमो। धम्मत्थसाहणरई जीए जणो गुणनिही वसइ॥

तीए अखण्डियनियभुयपरक्कमो सूरतेओ नाम राया।

जंमि रणवासरेसुं विसालवंसंमि वियडकडयंमि। [1]अत्थधराहरसिहरे व्व सूरतेओ पडिप्फलिओ॥

तस्स य सयलन्तेउरप्पहाणा रूवि व्व कुसुमचावघरिणी लीलावई नाम भारिया। तस्स राइणो इमीए सह विसयसुहमणुहवन्तस्स अइक्कन्तो कोइ कालो॥

इओ य सो महासुक्ककप्पवासी देवो अहाउयमणुवालिऊण तओ चुओ समाणो समुप्पन्नो लीलावईए कुच्छिंसि। दिट्ठो य तीए सुमिणयंमि तीए चेव रयणीए पहायसमयंमि संपुण्णमण्डलो सयलजणमणाणन्दयारी चन्दिमापसाहियभुवणभवणो मयलञ्छणो वयणे-

गुरुजनविनयोद्युक्तः प्रणयिजनवत्सलः सुखाभिगम्यः। धर्मार्थसाधनरतिर्यस्यां जनो गुणनिधिर्वसति॥

तस्यामखण्डितनिजभुजपराक्रमः सूरतेजा नाम राजा।

यस्मिन् रणवासरेषु विशालवंशे विकटकटके। अस्तधराधरशिखरे इव सूरतेजः प्रतिफलितम्॥

तस्य च सकलान्तःपुरप्रधाना रूपिणीव कुसुमचापगृहिणी लीलावती नाम भार्या। तस्य राज्ञोऽनया सह विषयसुखमनुभवतोऽतिक्रान्तः कोऽपि कालः।

इतश्च च महाशुक्रकल्पवासी देवो यथायुरनुपाल्य ततश्च्युतः सन् समुत्पन्नो लीलावत्याः कुक्षौ। दृष्टश्च तया स्वप्ने तस्यामेव रजन्यां प्रभातसमये संपूर्णमण्डलः सकलजमनआनन्दकारी चन्द्रिकाप्रसाधितभुवनभवनो मृगलाञ्छनो वदनेनोदरं प्रविशन्निति। दृष्ट्वा च तं सुख-

---

[1] अत्थहरा० क

णमुयरं पविसमाणो त्ति। पासिऊण य तं सुहविबुद्धाए सिट्ठो तीए जहाविहिं दइयस्स। हरिसवसुब्भिन्नपुलएणं भणिया य तेणं। सुन्दरि, सयलसामन्तमियङ्को पुत्तो ते भविस्सइ। पडिस्सुयमिमीए। परितुट्ठा एसा। तिवग्गसंपायणसुहमणुहवन्तीए पत्तो पसूइसमओ सुहजोएणं च पसूया एसा। जाओ से दारओ। निवेइओ निव्वुइनामाए रायदारियाए नरवइस्स। कयं जहोचियमणेणं। अइक्कन्तो मासो। पइट्ठावियं च से नामं दारयस्स जयकुमारो त्ति कहाणयविसेसेण। पत्तो कुमारभावं। गहिओ तेण रायकुमारोचियकलाकलावो। पुव्वभवभावणाओ य अत्थि से धम्मचरणंमि अणुराओ॥

अन्नया य निग्गओ आसवाहणियाए। दिट्ठो य तेण चन्दोदयउज्जाणे अहाफासुए पएसे दिणयरो विय दित्तयाए चन्दो विय सोमयाए समुद्दो विय गम्भीरयाए रयणरासी विय महग्घयाए कुसुमामेलो विय लायण्णयाए सग्गो विय रम्मयाए मोक्खो विय निव्वयणिज्जयाए सेयवियाहिवस्स जसवम्मणो पुत्तो पडिवन्नसमणलिङ्गो ससमयपरसमयगहियसारो अणेयसमणपरियओ सणंकुमारो

विबुद्धया शिष्टस्तया यथाविधि दयितस्य। हर्षवशोद्भिन्नपुलकेन भणिता च तेन। सुन्दरि! सकलसामन्तमृगाङ्क पुत्रस्ते भविष्यति। प्रतिश्रुतमनया। परितुष्टैषा। त्रिवर्गसंपादनसुखमनुभवन्त्याः प्राप्तः प्रसूतिसमयः। शुभयोगेन च प्रसूतैषा। जातस्तस्या दारकः। निवेदितो निर्वृतिनामया राजदारिकया नरपतये। कृतं यथोचितमनेन। अतिक्रान्तो मासः। प्रतिष्ठापितं च तस्य नाम दारकस्य 'जयकुमार' इति कथानकविशेषेण। प्राप्तः कुमारभावम्। गृहीतस्तेन राजकुमारोचितकलाकलापः। पूर्वभवभावनातश्चास्ति तस्य धर्मचरणेऽनुरागः।

अन्यदा च निर्गतोऽश्ववाहनिकया। दृष्टस्तेन चन्द्रोदयोद्याने यथाप्रासुके प्रदेशे दिनकर इव दीप्त्या, चन्द्र इव सौम्यतया, समुद्र इव गम्भीरतया, रत्नराशिरिव महार्घतया, कुसुमापीड (काम) इव लावण्यतया (लावण्येन), स्वर्ग इव रम्यतया, मोक्ष इव निर्वचनीयतया श्वेतविकाधिपस्य यशोवर्मणः पुत्रः प्रतिपन्नश्रमणलिङ्गः स्वसमयपरसमयगृहीतसारोऽनेकश्रमणपरिवृतः सनत्कुमारनामाचार्य

नामायरिओ त्ति। तं च दट्ठूण समुप्पन्नो कुमारस्स संवेगो। चिन्तियं च णेणं। अहो णु खलु ईइसो एस संसारो, जेण एवंविहेहिं पि सुरलोयदुल्लहेहिं अजत्तसंपज्जन्तसयलमणोरहेहिं महापुरिसेहिं परिचत्तो त्ति। ता को पुण एसो, किं वा से परिच्चायविसेसकारणं ति पुच्छामि एयं। गओ तस्स समीवं, वन्दिओ तेण भयवं सणंकुमारायरिओ सेससाहुणो य। धम्मलाहिओ भयवया सेससाहूहि य। उवविट्ठो गुरुपायमूले। विणयरइयकरयलञ्जलिउडं भणियं च णेणं। भयवं, असारो चेव एस संसारो कस्स वा सयण्णविन्नाणस्स न निव्वेयकारणं, तहा वि पाएणं न बज्झनिमित्तमन्तरेण एस संजायइ त्ति। ता [1]आचिक्ख भयवं, किं ते विसेसनिव्वेयकारणं, [2]कं वा भयवन्तमवगच्छामि त्ति। तओ भयवया 'अहो से विवेगो, अहो वयणविन्नासो, अकहिज्जमाणे मा अलोइयं संभावइस्सइ' त्ति चिन्तिऊण भणियं। सोम, सुण। विसेसकारणं पि न संसारवियारमन्तरेण, तहावि विइयसंसारसहावस्सवि भवओ कोउयं ति [3]कलिऊग साहिज्जइत्ति।

इति। तं च दृष्ट्वा समुत्पन्नः कुमारस्य संवेगः। चिन्तितं च तेन-अहो! नु खलु ईदृश एष संसारः, येन एवंविधैरपि सुरलोकदुर्लभैरयत्नसंपद्यमानसकलमनोरथैर्महापुरिषैः परित्यक्त इति। ततः कः पुनरेषः, किं वा तस्य परित्यागविशेषकारणमिति पृच्छाम्येतम्। गतस्तस्य समीपम्। वन्दितस्तेन भगवान् सनत्कुमाराचार्यः शेषसाधवश्च। धर्मलाभितो भगवता शेषसाधुभिश्च। उपविष्टो गुरुपादमूले विनयरचितकरतलाञ्जलिपुटं भणितं च तेन। भगवन्! असार एवैष संसारः, कस्य वा सकर्णविज्ञानस्य न निर्वेदकारणम्? तथाऽपि प्रायेण न बाह्यनिमित्तमन्तरेण एष संजायते इति। तत आचक्ष्व भगवन्! किं ते विशेषनिर्वेदकारणम्, [2]कं वा भगवन्तमवगच्छामीति। ततो भगवता 'अहो तस्य विवेकः, अहो वचनविन्यासः, अकथ्यमाने मा अलौकिकं संभावयिष्यति' इति चिन्तयित्वा भणितम्। सौम्य! शृणु। विशेषकारणमपि न संसारविचारमन्तरेण, तथाऽपि विदितसंसारस्वभावस्यापि भवतः कौतुकमिति कलयित्वा कथ्यते इति।

---

१ आचिक्खउ ख। २ 'किं वा भयवन्तमणुजाणामि त्ति' इत्यपि पाठः ख। ३ कलिय ख।

सुणिऊणऽप्पनियाणं महाविवागं च कम्मपरिणामं। चित्तङ्गयविज्जाहरसमणसमीवंमि निक्खन्तो ॥

किह ?

अत्थि इहेव भारहे वासे सेयविया नाम नयरी। तत्थ जसवम्मो राया। तस्स पुत्तो सणंकुमाराभिहाणो अहं। जायमेत्तस्स आइट्ठं च मे संवच्छरिएण विज्जाहरनरिन्दत्तणं ति। अइवल्लहो तायस्स कुमारभावे तत्थ चिट्ठामि जाव गहिया केइ तक्करा वज्झा निज्जन्ति। दिट्ठा य ते मए वाहियालिं गएणं। भणियं च तेहिं। देव, सरणागया अम्हे, परित्तायउ देवो। तओ मोयाविया मए, रुट्ठा नायरया, निवेइयमारक्खिएहि महारायस्स। भणियं च तेणं। जहा कुमारो न याणइ, तहा गेण्हिऊण ते निवेइऊण नायरयाणं वावाएह त्ति। वावाइया य तक्करा, विन्नाओ मए एस वुत्तन्तो। रुट्ठो महारायस्स निग्गओ नयरीओ बला पहाणपरियणस्स, आगओ तामलित्तिं। मुणिओ एस वुत्तन्तो तन्नयरिसामिणा ईसाणचन्देण। निग्गओ पच्चोणिं। बहुमन्निओ अहं तेण भणिओ य। वच्छ,

---

श्रुत्वाऽल्पनिदानं महाविपाकं च कर्मपरिणामम्। चित्राङ्गदविद्याधरश्रमणसमीपे निष्क्रान्तः ॥

कथम् ?।

अस्ति इहैव भारते वर्षे श्वेतविका नाम नगरी। तत्र यशोवर्मा राजा। तस्य पुत्रः सनत्कुमाराभिधानोऽहम्। जातमात्रस्यादिष्टं च मे सांवत्सरिकेन विद्याधरनरेन्द्रत्वमिति। अतिवल्लभस्तातस्य कुमारभावे तत्र तिष्ठामि यावद् गृहीताः केचित् तस्करा वध्या नीयन्ते। दृष्टाश्च ते मयाऽश्ववाहनिकां गतेन। भणितं च तैः-देव शरणागता वयम्, परित्रायतां देवः। ततो मोचिता मया। रुष्टा नागरिकाः, निवेदितमारक्षकैर्महाराजस्य। भणितं च तेन-यथा कुमारो न जानाति तथा गृहीत्वा तान् निवेद्य नागरिकेभ्यो व्यापादयतेति। व्यापादिताश्च तस्कराः, विज्ञातो मयैष वृत्तान्तः। रुष्टो महाराजाय निर्गतो नगर्या बलात् प्रधानपरिजनस्य। आगतस्तामलिप्तीम्। ज्ञात एष

इमं पि ते निययं चेव रज्जं; ता सुन्दरमणुचिट्ठियं, जमिहागओ सि त्ति। पविट्ठो नयरिं, दिन्नो मे कुमारावासो। अइक्कन्तेसु कइवयदिणेसु भणाविओ अहं तेण। गेण्हाहि जहिच्छियं जीवणं ति। न पडिवन्नं च तं मए॥

तओ तत्थेव चिट्ठमाणस्स आगओ अविवेय[1]ग्घवियजणमणाणन्दयारी वसन्तसमओ, वियम्भिओ मलयमारुओ, फुल्लियाइं काणणुज्जाणाइं, उच्छलिओ परहुयारवो, पयत्ताओ नयरिचच्चरीओ। एवंविहे य वसन्तसमए नियगेहाओ चेव विसेसुज्जल[2]नेवच्छो वयंसयसमेओ पयट्टो कीलानिमित्तं तामलित्तीतिलयभूयं अणङ्गनन्दणं नाम उज्जाणं। अइयओ रायमग्गं, दिट्ठो य वायायणनिविट्ठाए नयरिसामिणो ईसाणचन्दस्स धूयाए विलासवईए। भवन्तरब्भासओ समुप्पन्नो से ममोवरि अणुराओ, विमुक्का वावायणासन्नं वच्चमाणस्स तीए ममोवरि सहत्थगुत्था बउलमालिया, लक्खिया य मे विइयहिययभूएण वसुभूइणा, निवडिया मे कण्ठदेसभाए।

वृत्तान्तो तन्नगरीस्वामिना ईशानचन्द्रेण। निर्गतः (पच्चोर्णि दे) सन्मुखम्। वहुमानितोऽहं तेन भणितश्च। वत्स! इदमपि ते निजकमेव राज्यम्, ततः सुन्दरमनुष्ठितं यदिहागतोऽसीति। प्रविष्टो नगरीम्, दत्तो मे कुमारावासः। अतिक्रान्तेषु कतिपयदिनेषु भणितोऽहं तेन गृहाण यथेप्सितं जीवनमिति। न प्रतिपन्नं च तन्मया।

ततस्तत्रैव तिष्ठत आगतोऽविवेकपूर्णजनमनआनन्दकारी वसन्तसमयः, विजृम्भितो मलयमारुतः, फुल्लितानि काननोद्यानानि, उच्छलितः परभृतारवः, प्रवृत्ता नगरचर्चर्यः। एवंविधे च वसन्तसनये निजगेहादेव विशेषोज्ज्वलनेपथ्यो वयस्यसमेतः प्रवृत्तः क्रीडानिमित्तं तामलिप्तीतिलकभूतमनङ्गनन्दनं नामोद्यानम्। अतिगतो राजमार्गम्, दृष्टश्च वातायननिविष्टया नगरीस्वामिन ईशानचन्द्रस्य दुहित्रा विलासवत्या। भवान्तराभ्यासतः समुत्पन्नस्तस्य ममोपर्यनुरागः, विमुक्ता वातायनासन्नं व्रजतस्तया ममोपरि स्वहस्तग्रथिता वकुलमालिका,

---

१ अग्घवियं–पूर्णम्। २ ०नेवत्थो ख।

पुलइयं मए उवरिहुत्तं, दिट्ठं से वायायणविणिग्गयं वयणकमलं, समुप्पन्नो मे हिययंमि परिओसो, पेच्छमाणीए य निमिया सा मए सिणेहबहुमाणं कण्ठदेसे। एत्थन्तरंमि परिओसविसायगब्भिणं ईसिविहसियसणाहं नीससियमिमीए। अइक्कन्तो अहयं तमुद्देसं देहमेत्तेणं न पुण चित्तेण, पत्तो अणङ्गनन्दणं उज्जाणं। तत्थ वि य वयंसयाणुरोहेण विचित्तकीलापवत्तो वि देहचेट्ठाए तं चेव पयइसुन्दरं तीए वयणकमलं चिन्तयन्तो ठिओ कंचि कालं। उचियसमएणं च पविट्ठो तामलित्तिं। कयं उचियकरणिज्जं। अइक्कन्तो वासरो, समागया रयणी। संमाणिऊण 'सिरं मे दुक्खेइ[1]' त्ति लहुं चेव विसज्जिया वयंसया। गओ वासभवणं, ठिओ सयणिज्जे। तत्थ य अणाचिक्खणीयं असंभावणीयं अणणुहूयपुव्वं तहाविहं दुक्खाइसयमणुहवन्तस्स खणमेत्तलद्धनिद्दस्स अइक्कन्ता रयणी। कयंगोसकिच्चं। समागया वसुभूइप्पमुहा वयंसया। विइण्णाइं तंबोलाइं। गया अम्हे कीलानिमित्तं तमेव भवणुज्जाणं। पवत्ता कीलिउं

लक्षिता च मे द्वितीयहृदयभूतेन वसुभूतिना, निपतिता मे कण्ठदेशभागे। प्रलोकितं मया उपरिभूतम्' (ऊर्ध्वम्,) दृष्टं तस्या वातायनविनिर्गतं वदनकमलम्, समुत्पन्नो मे हृदये परितोषः, प्रेक्षमाणायां च स्थापिता सा मया स्नेहबहुमानं कण्ठदेशे। अत्रान्तरे परितोषविषादगर्भितमीषद्विहसितसनाथं निःश्वसितमनया। अतिक्रान्तोऽहं तमुद्देशं देहमात्रेण न पुनश्चित्तेन, प्राप्तोऽनङ्गनन्दनमुद्यानम्। तत्रापि च वयस्यानुरोधेन विचित्रक्रीडाप्रवृत्तोऽपि देहचेष्टया तदेव प्रकृतिसुन्दरं तस्या वदनकमलं चिन्तयन् स्थितः कञ्चित्कालम्। उचितसमयेन च प्रविष्टः तामलिप्तीम्। कृतमुचितकरणीयम्। अतिक्रान्तो वासरः, समागता रजनी। संमान्य 'शिरो मे दुःखयति' इति लघ्वेव विसर्जिता वयस्याः। गतो वासभवनम्, स्थितः शयनीये। तत्र चानाख्येयमसंभावनीयमननुभूतपूर्वं तथाविधं दुःखातिशयमनुभवतः क्षणमात्रलब्धनिद्रस्यातिक्रान्ता रजनी। कृतं प्रातःकृत्यम्। समागता वसुभूतिप्रमुखा वयस्याः। वितीर्णानि ताम्बूलानि। गता वयं क्री-

---

[1] दुक्खति क।

विचित्तकीलाहिं। सुन्नहिययत्तणाओ य लक्खिओ मे चित्तंमि मयणवियारो वसुभूइणा। [1]वित्ते य कीलावइयरे माहवीलयामण्डवंमि चिट्ठमाणो भणिओ अहं तेण। भो वयस्स, अह 'किं पुण तुमं अज्ज वासरंमि वससी विच्छाओ दीससि, खणं च झाणगओ विय मुणी सयलचेट्ठं निरुम्भसि, तओ य लद्धलाहो विय जूयारो परिओसमुव्वहसि त्ति। तओ मए असमिक्खियकारियाए मयणस्स बीयहिययभूयस्स वि गूहमाणेण निययमायारं जंपियं 'न किंचि लक्खेमि' त्ति। वसुभूइणा भणियं 'अहं लक्खेमि'। मए भणियं 'किं तयं'। वसुभूइणा भणियं–आरोविओ ते बउलमालियानिहेण रायदारियाए गरुयचिन्ताभारो, विद्धो य तीए दिट्ठिपायच्छलेण मयणसरधोरणीहिं। तज्जणिओ एस वियारो। अन्नहा कहमयण्डम्मि चेव परिपण्डुरं ते वयणं, अलद्धनिद्दासुहाइं च तारतम्बाइं लोयणाइं, हिययायासकारिणो दीहदीहा नीसास त्ति। ता मा संतप्प; इच्छइ सा तए सह समागमं, पेसिया य तीए [2]सिणेहबहुमाणं बउ-

डानिमित्तं तदेव भवनोद्यानम्। प्रवृत्ताः क्रीडितुं विचित्रक्रीडाभिः। शून्यहृदयत्वाच्च लक्षितो मे चित्ते मदनविकारो वसुभूतिना। वृत्ते च क्रीडाव्यतिकरे माधवीलतामण्डपे तिष्ठन् भणितोऽहं तेन। भो वयस्य! अथ किं पुनस्त्वमद्य वासर इव शशी विच्छायो दृश्यसे, क्षणं च ध्यानगत इव मुनिः सकलचेष्टां निरुणत्सि, ततश्च लब्धलाभ इव द्यूतकारः परितोषमुद्वहसीति ?। ततो मयाऽसमीक्षितकारितया मदनस्य द्वितीयहृदयभूतस्यापि गूहता निजमाकारं जल्पितं 'न किंचिद् लक्षयामि' इति। वसुभूतिना भणितम्–'अहं लक्षयामि'। मया भणितम्–'किं तद्'। वसुभूतिना भणितम्–आरोपितस्ते वकुलमालिकानिभेन राजदारिकया गुरुकचिन्ताभारः, विद्धश्च तया दृष्टिपातच्छलेन मदनशरधोरणिभिः। तज्जनित एष विकारः। अन्यथा कथमकाण्डे एव परिपाण्डुरं ते वदनम्, अलब्धनिद्रासुखे च तारताम्रे लोचने, हृदयायासकारिणो दीर्घदीर्घा निःश्वासा इति ?। ततो मा संतप्यस्व, इच्छति सा तया सह समागमम्, प्रेषिता स तया

---

१ वत्ते य क। २ सणेह० क।

लमालिया दूई। अन्नं च–अवहिओ विही अवस्सभवियव्वेसुं, घडेइ एस अहिमुहीहूओ नियमेण अन्नदीवगयं पि पाणिणं। करेमि अहं एत्थ कंचि उवायं ति। पडिस्सुयं मए। कओ तेण विलासवइधाविधूयाए अणङ्गसुन्दरीए सह पसङ्गो। अहिगमणीयपुरिसगुणजोगओ लग्गा य सा तस्स।

अइक्कन्ता कइवि[1] दियहा। तओ 'न कयमिह किंचि वसुभूइणा, न पहवइ वा से मइगोयरो' त्ति चितन्यन्तो मयणपरायत्तयाए गओ सयणिज्जं। तत्थ पुण मुच्छिओ विय[2] मूढो विय मत्तो[3] विय मूओ विय भीओ विय गहगहिओ विय वेवमाणहियओ अप्पहवन्तो इन्दियाणं चिट्ठामि जाव थेववेलाए चेव पहट्ठवयणपङ्कओ आगओ वसुभूई। वयणवियारेण लक्खियं मए, जहा कयमणेण पओयणं भविस्सइ त्ति। भणियं च तेण। भो वयस्स, परिच्चय विसायं, अङ्गीकरेहि पमोयं, सपन्नं ते समीहियं ति। मए भणियं–'कहं[4] विय'। तेण भणियं–सुण।

स्नेहबहुमानं वकुलमालिका दूती। अन्यच्च अवहितो विधिरवश्यभवितव्येषु घटयत्येषोऽभिमुखीभूतो नियमेनान्यद्वीपगतमपि प्राणिनम्। करोम्यहमत्र कंचिदुपायमिति। प्रतिश्रुतं मया। कृतस्तेन विलासवतीधात्रीदुहित्राऽनङ्गसुन्दर्या सह प्रसङ्गः। अभिगमनीयपुरुषगुणयोगतो लग्ना च सा तस्य।

अतिक्रान्ता कत्यपि दिवसाः। ततो 'न कृतमिह किंचिद् वसुभूतिना, न प्रभवति वा तस्य मतिगोचरः' इति चिन्तयन् मदनपरायत्ततया गतो शयनीयम्। तत्र पुनर्मूर्च्छित इव मूढ इव मत्त इव मूक इव भीत इव ग्रहगृहीत इव वेपमानहृदयोऽप्रभवन् इन्द्रियाणां तिष्ठामि यावत् स्तोकवेलायामेव प्रहृष्टवदनपङ्कज आगतो वसुभूतिः। वदनविकारेण लक्षितं मया, यथा कृतमनेन प्रयोजनं भविष्यतीति।

---

[1] कइवयदि० ख। [2] 'विय' पाठस्थाने सर्वत्र 'इव' पाठः कपुस्तके। [3] अयं पाठः कपुस्तके नास्ति। [4] किहं ग।

गओ अहमिओ अज्ज अणङ्गसुन्दरीगेहं। दिट्ठा मए पव्वायवयणपङ्कया अणङ्गसुन्दरी, भणिया य। सुन्दरि, किं पुण ते उव्वेयकारणं; आचिक्ख, जइ अकहणीयं न होइ। तीए भणियं–

कह तंमि *निव्वरिज्जइ दुक्खं कण्डुज्जुएण[1] हियएण। अद्दाए पडिबिम्बं व जंमि दुक्खं न संकमइ ॥

मए भणियं–सुन्दरि !

विरला जाणन्ति गुणा[2] विरला जंपन्ति[3] ललियकव्वाइं। सामन्नधणा विरला परदुक्खे दुक्खिया विरला ॥

तहावि अत्थि मे तुह मणोरहसंपायणेच्छा। तीए भणियं–जइ एवं, ता सुण। अत्थि महारायधूया विलासवई नाम कन्नया। सा मे भिन्नदेहा वि अत्ताणनिव्विसेसा सामिसाली वि असामिसालिसीला। तीए अपच्छिमा अवत्था वट्टइ। तओ मए भणियं। किं

भणितं च तेन–भो वयस्य ! परित्यज विषादम्, अङ्गीकुरु प्रमोदम्, संपन्नं ते समीहितमिति। मया भणितम्-'कथमिव'। तेन भणितम्-शृणु।

गतोऽहमितोऽद्य अनङ्गसुन्दरीगेहम्। दृष्टा मया म्लानवदनपङ्कजाऽनङ्गसुन्दरी, भणिता च। सुन्दरि! किं पुनस्ते उद्वेगकारणम्? आचक्ष्व, यद्यकथनीयं न भवति। तया भणितम्—

कथं तस्मिन् कथ्यते दुःखं काण्डर्जुकेन हृदयेन। आदर्शे प्रतिबिम्बमिव यस्मिन् दुःखं न संक्रामति ॥

मया भणितम्–सुन्दरि !

विरला जानन्ति गुणान् विरला जल्पन्ति ललितकाव्यानि। श्रामण्यधना विरलाः परदुःखे दुःखिता विरलाः ॥

तथाप्यस्ति मे तव मनोरथसंपादनेच्छा। तया भणितम्–यद्येवं ततः शृणु। अस्ति महाराजदुहिता विलासवती नाम कन्यका। सा

---

* दुःखे निव्वरः। दुःखविषयस्य कथेर्निव्वरादेशो वा भवति। सिद्ध. ८–४–३ ॥ [1] कन्दुज्जु० ख। [2] गुणे क–ग। [3] पालंति निद्धणा नेहा ख।

पुण एत्थ कारणं। तीए भणियं 'मयणवियारो'। तओ मए भणियं—केण पुण भयवया वीयरागेण विय खण्डियं विणिज्जियसुरासुरस्स रइमणाणन्दयारिणो पञ्चबाणस्स सासणं। तीए भणियं—न याणामि खण्डियं न खण्डियं ति। एत्तिओ उण मे संतावो, जं से मणोरहविसओ न नज्जइ। मए भणियं 'कहं विय'। तीए भणियं—सुण। पवत्ते मयणमहूसवे निग्गयासु[1] नयरचच्चरीसु चच्चरियामेत्तसंगयाए दिट्ठो इमीए—अणुमाणओ वियाणामि—मुत्तिमन्तो विय कुसुमाउहो कोवि जुवाणओ। अन्नहा कहं[2] ईइसस्स कन्नयारयणस्स अणीइसे[3] वरे अहिलासो त्ति। न पत्थइ पङ्कयसिरी हढवणाइं। मुक्का य तीए तस्सुवरि सहत्थगुत्था बउलमालिया, निवडिया से इमी वि य कण्ठदेसे मणोरहेहिं। तओ उवरिहुत्तमवलोइऊण निमिया य तेणं अन्नजणसंपायभीरुययाए घेत्तूण तीए हिययं पिव कण्ठंमि[4]। अइक्कन्तो[5] य सो। विलासवई वि य तयप्पभूइस्सेव[6] परिचत्तनिययवावारा तहा कया वम्महेण, जहा अविक्खिउं[7] पि न पारीयइ त्ति। विन्नाओ य

मे भिन्नदेहा अपि आत्मनिर्विशेषा स्वामिन्यपि अस्वामिनीशीला। तस्या अपश्चिमाऽवस्था वर्तते। ततो मया भणितम्—किं पुनरत्र कारणम्?। तया भणितम्—'मदनविकारः'। ततो मया भणितम्—केन पुनर्भगवता वीतरागेणेव खण्डितं विनिर्जितसुरासुरस्य रतिमनआनन्दकारिणः पञ्चबाणस्य शासनम्?। तया भणितम्—न जानामि खण्डितं न खण्डितमिति। एतावान् पुनर्मे संतापः, यत्तस्या मनोरथविषयो न ज्ञायते। मया भणितम्—'कथमिव'। तया भणितम्—शृणु। प्रवृत्ते मदनमधूत्सवे निर्गतासु नगरचर्चरीषु चर्चरिकामात्रसंगतया दृष्टोऽनया—अनुमानतो विजानामि—मूर्तिमानिव कुसुमायुधः कोऽपि युवा। अन्यथा कथमीदृशस्य कन्यारत्नस्यानीदृशे वरेऽभिलाष इति?। न प्रार्थयते पङ्कजश्रीर्हठवनानि। मुक्ता च तया तस्योपरि स्वहस्तग्रथिता बकुलमालिका, निपतिता तस्येयमपि च कण्ठदेशे मनोरथैः। तत उपरिभूतमवलोक्य स्थापिता च तेनान्यजनसंपातभीरुकतया गृहीत्वा तस्या हृदयमिव कण्ठे। अतिक्रान्तश्च सः। विलासवत्यपि च

---

१ विणिग्गयासु ख। २ ०मीदिसस्स ख। ३ अन्नारिसे अ० ख। ४ ०मि मालं ख। ५ अइक्कन्तो तमुद्देसाओ ख। ६ तयप्पभिइमेव ख। ७ आचिक्खिउं ख

एस वुत्तन्तो मए बब्बरियासयासाओ, पुणो रायधूयाओ त्ति। समासासिया सा मए। सामिणि, अलं विसाएणं, संवाएमि सामिणिं हिययवल्लहेण। न खण्डिज्जइ कोमुई मयलञ्छणेणं ति। भणिऊण पणिहिलोयणेहिं निरूविओ सो, न उण उवलद्धो त्ति। तओ य सा अज्ज मयणवियारओ चेव असंपाइयपओयणं मं अवगच्छिऊण निब्भरुक्कण्ठा पराहीणहियया संकन्तदूसहसरीरसंतावं परिच्चइय [1]सयणीयं अवलम्बिय [2]सहीयणं उवरितलमारूढा। दक्खिणाणिलेण य सविसेसपज्जलिज्जन्तमयणाणला उण्हं च दीहं च नीससिय तं चेव रायमग्गुद्देसं पुलोइउं पवत्ता। पव्वालिया य से अहिययरं बाहसलिलेण दिट्ठी। तओ सहसा चेव झणझणारवमुहलमणिवलयं विहुणिय [3]करपल्लवं अवहत्थिय अङ्गसंधारयं सहियायणं मोहमुवगय त्ति। तओ ससंभन्तो उट्ठिओ अहं, भणिओ य वसुभूई। वयस्स, कहिं सा हिययाणन्दयारिणी, दंसेहि मे, अलं तीए अच्चाहिए [4]जीविएण। वसुभूइणा भणियं-देव, वत्तं खु एयं, कहावसाणं पि ताव हियया-

तत्प्रभृत्येव परित्यक्तनिजकव्यापारा तथा कृता मन्मथेन यथाऽवेक्षितुमपि न पार्यते (शक्यते)। विज्ञातश्चैष वृत्तान्तो मया वर्वरिका(चेटी) सकाशात्, पुना राजदुहितुरिति। समाश्वासिता सा मया-स्वामिनि! अलं विषादेन, संपादयामि स्वामिनी हृदयवल्लभेन। न खण्ड्यते कौमुदी मृगलाच्छनेनेति भणित्वा प्रणिधिलोचनैर्निरूपितः सः, न पुनरुपलब्ध इति। ततश्च सा अद्य मदनविकारत एवासंपादितप्रयोजनां मामवगत्य निर्भरोत्कण्ठा पराधीनहृदया संक्रान्तदुःसहशरीरसंतापं परित्यज्य शयनीयमवलम्ब्य सखीजनमुपरितलमारूढा। दक्षिणानिलेन च सविशेषप्रज्वाल्यमानमदनानला उष्णं च दीर्घं च निःश्वस्य तमेव राजमार्गोद्देशं द्रष्टुं प्रवृत्ता। छादिता च तस्या अधिकतरं बाष्पसलिलेन दृष्टिः। ततः सहसैव झणझणारवमुखरमणिवलयं विधूय करपल्लवमपहस्तयित्वाऽङ्गसंधारकं सखीजनं मोहमुपगतेति॥ ततः ससंभ्रान्त उत्थितोऽहम्, भणितश्च वसुभूतिः। वयस्य! कुत्र सा हृदयानन्दकारिणी? दर्शय मे, अलं तस्या अत्याहिते

---

१ सयणिज्जं। २ सहियणिं ख। ३ नियकर० ख। ४ जीएण ख।

णन्दकारयं चेव, तं सुणउ[१] देवो। तओ लज्जावणयवयणकमलं ईसि विहसिऊण णुवन्नो अहं। वसुभूइणा भणियं—तओ, देव, निमिया सहियाहिं उच्छङ्गसयणिज्जे, वीजिया मए बाहसलिलसित्तेण तालियण्टेण, दिन्नं च से सहावसीयलवच्छत्थलंमि चन्दणं, उवणीओ मुणालियावलयहारो, लद्धा कहवि तीए चेयणा, उम्मिल्लियं अलद्धनिद्दाक्खेयपाडलं लोयणजुयं। मए भणियं—सामिणि, ,किं ते बाहइ त्ति। तओ उक्कडयाए मयणवियारस्स अणवेक्खिऊण सहियणं अव्वत्तं चेव जंपियं तीए 'तस्स चेव्वादंसणं' ति। तओ मए तीए साहारणत्थं अलियं चेव जंपियं। सामिणि, धीरा होहि, उवलद्धा तस्स मए पउत्ती, विन्नविस्सं, सामिणि, तमन्तरेण। तओ विहसियं तीए, दिन्नं च मे कडिसुत्तयं॥ एत्थन्तरंमि समागया से जणणी, भणिया य तीए। जाय विलासवइ, सारेहि वीणं, जओ आणत्तं महाराएण 'अज्जं तए वीणाविणोओ कायव्वो' त्ति। तओ गुरुयणलज्जालुयाए जंपियं तीए। जइ एवं, ता लहुं वीणाधरिणिं सद्देहि। सद्दिया वीणाय-

(प्राणान्तकष्टे) जीवितेन। वसुभूतिना भणितम्—देव! वृत्तं खल्वेतत्, कथावसानमपि तावद् हृदयानन्दकारकमेव, तच्छृणोतु देवः। ततो लज्जावनतवदनकमलमीषद् विहस्य निपन्नो(सुप्तोऽ)हम्। वसुभूतिना भणितम्—ततो देव! न्यस्ता सखीभिरुत्संगशयनीये, वीजिता मया बाष्पसलिलसिक्तेन तालवृन्तेन, दत्तं च तस्य स्वभावशीतलवक्षःस्थले चन्दनम्, उपनीतो मृणालिकावलयहारः, लब्धा कथमपि तया चेतना, उन्मिलितमलब्धनिद्राखेदपाटलं लोचनयुगम्। मया भणितम्—स्वामिनि! किं ते बाधते इति?। तत उत्कटतया मदनविकारस्यानपेक्ष्य सखीजनमव्यक्तमेव जल्पितं तया 'तस्यैवादर्शनम्' इति। ततो मया तस्याः संधारणार्थमलीकमेव जल्पितम्—स्वामिनि! धीरा भव, उपलब्धा तस्य मया प्रवृत्तिः, विज्ञपयिष्यामि स्वामिनि! तमन्तरेण (अवसरेण)। ततो विहसितं तया, दत्तं च मे कटिसूत्रकम्। अत्रान्तरे समागता तस्या जननी। भणिता च तया—जाते विलासवति! सारय वीणाम्, अत आज्ञप्तं महाराजेन 'अद्य त्वया

---

[१] सुणादु ख

रिणी। एत्थन्तरंमि किंकायव्वमूढा अविसज्जिया चेव रायधूयाए निग्गया रायगेहाओ, आगया सभवणं, निरूविओ विसेसेण, न लद्धा य तस्स पउत्ती। ता किं पुण अहं सामिणीए विन्नविस्सं ति समद्धासिया चिन्तापिसाइयाए। ता एयं मे उव्वेयकारणं ति॥ मए भणियं–परिच्चय चिन्तापिसाइयं, जाणामि अहयं तं जुवाणयं। ता तहा करिस्सं, [1]जहा ते सामिणी निव्वुया भविस्सइ त्ति। अणङ्गसुन्दरीए भणियं–साहेहि ताव, कह तुमं जाणासि, को वा सो जुवाणओ। मए भणियं–अप्पाणनिव्विसेसो वयंसओ, अद्दवा सामिसालो, अओ वियाणामि। सो पुणो सेयवियाहिवस्स महारायजसवम्मणो पुत्तो सणंकुमारो नाम। तस्स कीलानिमित्तं अणङ्गनन्दणं पत्थियस्स पेसिया तीए वउलमालिया, बहुमन्निया य तेणं। अणङ्गसुन्दरीए भणियं–जइ एवं, ता अलं ते सामिसालेण. जो एवं पि सामिणीहिययं वियाणिय निरुज्जमो चिट्ठइ। मए भणियं। न निरुज्जमो, किं तु उवायं विचिन्तेइ ‘कहं पुण अणिन्दिएण विहिणा एसा

वीणाविनोदः कर्तव्य’ इति। ततो गुरुजनलज्जालुतया जल्पितं तया–यद्येवं ततो लघु वीणाचार्यां शब्दय। शब्दिता वीणाचार्या। अत्रान्तरे किंकर्तव्यमूढा अविसर्जितैव राजदुहित्रा निर्गता राजगेहात्, आगता स्वभवनम्, निरूपितो विशेषेण, न लब्धा च तस्य प्रवृत्तिः। ततः ‘किं पुनरहं स्वामिन्यै विज्ञपयिष्यामि’ इति समाध्यासिता चिन्तापिशाचिकया। तत एतन्मे उद्वेगकारणमिति॥ मया भणितम्–परित्यज चिन्तापिशाचिकाम्, जानाम्यहं तं युवानम्। ततस्तथा करिष्यामि यथा ते स्वामिनी निर्वृता भविष्यतीति। अनङ्गसुन्दर्या भणितम्–कथय तावत्, कथं त्वं जानासि, को वा स युवा?। मया भणितम्–आत्मनिर्विशेषो वयस्यः, अथवा स्वामी, अतो विजानामि। स पुनः श्वेतविकाधिपस्य महाराजयशोवर्मणः पुत्रः सनत्कुमारो नाम। तस्य क्रीडानिमित्तमनङ्गनदनं प्रस्थितस्य प्रेषिता तया वकुलमालिका, बहुमता च तेन। अनङ्गसुन्दर्या भणितम्–यद्येवं ततोऽलं ते स्वामिना, य एवमपि स्वामिनीहृदयं विज्ञाय निरुद्यमस्तिष्ठति।

---

[1] जहा एसा ते ख

पावियव्व' त्ति। अणङ्गसुन्दरीए भणियं-समाणरूवाणुरायकुलकन्नयाहरणं पि अणिन्दिओ चेव विही। मए भणिय। अत्थि एवं, किं तु अच्चन्तसिणेहवन्तो महाराओ सणंकुमारस्स, जओ अपडिहओ सव्वत्थामेसु गइपसरो, उवन्नत्थं च तस्स सबहुमाणं महाराएण जीवणं। ता कयाइ पत्थिओ चेव देइस्सइ त्ति। ता किं एइणा। निवेएहि ताव एयं वुत्तन्तं सामिणीए, चिन्तेहि य उवायं, कहं पुण एयाणं दंसणं संजाइस्सइ[1] त्ति। अणङ्गसुन्दरीए भणियं-निवेएमि एयं। दंसणोवाओ पुण, नेइस्सं अहं सामिणिं मन्दिरुज्जाणं, तुमं पि य कुमारं घेत्तूण तहिं चेव सन्निहिओ हवेज्जासि त्ति। पडिस्सुयं च तं मए। संपयं तुमं पमाणं ति॥

तओ एयं सोऊण मोहदोसेणाहं[2] सव्वसोक्खाणं पिव गओ पारं, पीईए वि य पाविओ पीइं, धिईए व अवलम्बिओ धिइं, ऊसवेण विय कओ मे ऊसवो। दिन्नं वसुभूइणो कडयजुयलं। भणिओ य एसो। वयंस, न खु अहं भवन्तमप्पमाणीकरेमि त्ति। गया अम्हे

मया भणितम्-न निरुद्यमः, किन्तूपायं विचिन्तयति 'कथं पुनरनिन्दितेन विधिनैषा प्राप्तव्या' इति। अनङ्गसुन्दर्या भणितम्-समानरूपानुरागकुलकन्यकाहरणमपि अनिन्दित एव विधिः। मया भणितम्-अस्त्येतत्, किन्तु अत्यन्तस्नेहवान् महाराजः सनत्कुमारस्य, यतोऽप्रतिहतः सर्वस्थानेषु गतिप्रसरः, उपन्यस्तं च तस्य सबहुमानं महाराजेन जीवनम्। ततः कदाचित् प्रार्थित एव दास्यतीति। ततः किमेतेन। निवेदय तावदेतं वृत्तान्तं स्वामिन्यै, चिन्तय चोपायम्, कथं पुनरेतयोर्दर्शनं संजनिष्यते इति?। अनङ्गसुन्दर्या भणितम्-निवेदयाम्येताम्। दर्शनोपायः पुनर्नेष्येऽहं स्वामिनीं मन्दिरोद्यानम्। त्वमपि च कुमारं गृहीत्वा तत्रैव सन्निहितो भवेरिति। प्रतिश्रुतं च तन्मया। साम्प्रतं त्वं प्रमाणमिति

तत एतच्छ्रुत्वा मोहदोषेणाहं सर्वसौख्यानामिव गतो पारम्, प्रीत्येव प्राप्तः प्रीतिम्, धृत्येवावलम्बितो धृतिम्, उत्सवेनेव कृतो

---

[1] जायइ त्ति ख। [2] महामोह० ख।

तमुज्जाणं। दिट्ठा य तत्थ रुक्खसत्थविकोवियपुरिससंपाइयागालडोहलपसूयवियारोवलक्खिज्जमाणसरूवा सव्वे उऊ। पढमं चेव कुसुमियतिलयासोयसिन्दुवारमञ्जरीमणहरो वसन्तो, तओ वि य वियसियसुरहिमल्लियाकुसुमसोहिओ गिम्हो, तओ कयम्बकुसुमगन्धाणुवासिओ घणसमओ, तओ गइन्दमयगन्धाणुवासियसत्तच्छयकुसुमसमुग्गमो सरयकालो, तओ परिपिञ्जरपियङ्गुमञ्जरीकयावयंसो हेमन्तो, तओ वियम्भिउद्दामकुन्दकुसुमहरहासधवलो सिसिरसमओ त्ति। तओ तं दट्ठूण चिन्तियं मए। अहो मणुस्सलोयदुल्लहा इयं उज्जाणरिद्धी। तहिं च जाव थेवकालं चिट्ठामि, ताव सा आगया अणङ्गसुन्दरी। भणियं च तीए। कुमार, आसणपरिग्गहेण अलंकरेहि एयं चन्दणलयाहरयं। तओ मए पुलोइयं वसुभूइवयणं। भणियं च तेण 'जं एसा भणइ' त्ति। तओ अम्हे गया चन्दणलयाहरयं। दिट्ठा य तत्थ जलहरोयरविणिग्गयरयणियरपणइणि व्व तारायणपरिवुडा रायहंसि व्व कलहंसिपरिवारा समुद्दवेल व्व थूलमुत्ताहलक्कलियसलायण्णपओहरा, अणङ्गघरिणि व्व उउलच्छिपरिगया चित्ताणुकूलाणुरत्तनिउणसहियणमज्झगया लहुइयरत्तकमलसोहेहिं

मे उत्सवः। दत्तं वसुभूतये कटकयुगलम्। भणितश्चैषः-वयस्य! न खल्वहं भवन्तमप्रमाणीकरोमीति। गतावावां तदुद्यानम्। दृष्टाश्च तत्र वृक्षशास्त्रविकोविदपुरुषसंपादिताकालदोहदप्रसुतविकारोपलक्ष्यमाणस्वरूपाः सर्वे ऋतवः। प्रथममेव कुसुमिततिलकाशोकसिन्दुवारमञ्जरीमनोहरो वसन्तः, ततोऽपि च विकसितसुरभिमल्लिकाकुसुमशोभितो ग्रीष्मः, ततः कदम्बकुसुमगन्धानुवासितो घनसमयः, ततो गजेन्द्रमदगन्धानुवासितसप्तच्छदकुसुमसमुद्गमः शरत्कालः, ततः परिपिञ्जरप्रियङ्गुमञ्जरीकृतावतंसो हेमन्तः, ततो विजृम्भितोद्दामकुन्दकुसुमहरहासधवलः शिशिरसमय इति। ततस्तं दृष्ट्वा चिन्तितं मया-अहो मनुष्यलोकदुर्लभेयमुद्यानऋद्धिः। तत्र च यावत् स्तोककालं तिष्ठामि तावत्साऽऽगताऽनङ्गसुन्दरी। भणितं तया-कुमार! आसनपरिग्रहेण अलंकुरु एतच्चन्दनलतागृहम्। ततो मया दृष्टं वसुभूतिवदनम्। भणितं च तेन 'यदेषा भणति' इति। तत आवां गतौ चन्दनलतागृहम्। दृष्टा च तत्र जलधरोदरविनिर्गतरजनीकर-

कुम्मुन्नएहिं घणसरलकोमलङ्गुलिविहूसिएहिं अलक्खिज्जमाणसिराजालमणहरेहिं निम्मलनहमऊहोहपडिबद्धपरिएसमण्डलेहिं अलद्धहिययपवेसेणं पिव पुव्वसेवासंपायणोवायचउरेणं जावयराएणं पडिवन्नएहिं चलणेहिं, चलणाणुरूवाहिं चेव पसन्नसुकुमालाहिं अकयकुङ्कुमरायपिञ्जराहिं जङ्घियाहिं, मयणजमलतोणीरकरणिल्लेणं [2]पयामथोरेणं च निरन्तरेणं च ऊरुजुयलेणं, उत्तत्त[3]कणयनिम्मिएणेव्व पीवरेणं घडियविमलमणिमेहलाहरणेणं अणङ्गभवणेणं पिव वित्थिण्णेणं नियम्बबिम्बेणं, सयलतेलोक्कलायण्णसलिलनिवाणेणं पिव सहावगम्भीरेणं नाहिमण्डलेणं, कुसुमाउहचावलेहाविब्भमाए तणुमज्झपसाहणाए[4] रोमराईए, जोव्वणारुहणसोवाणभूयतिवलिसणाहेणं मज्झेणं, ईसानडिएण लायण्णाइसयलम्पडेणं पिव मयणेण सइ समालिङ्गिएहिं परिणाहुब्भिज्जन्तएहि अपओहरेहिं पओहरेहिं, सुपइट्ठियाहिं बाहुलयाहिं, असोयपल्लवविब्भमेहिं सुपसत्थलेहालंकिएहिं माणिक्कपज्जुत्तकणयकडयसणाहेहिं अणुचियकम्माकरेहिं

प्रणयिनीव तारागणपरिवृता, राजहंसीव कलहंसीपरिवारा, समुद्रवेलेव स्थूलमुक्ताफलकलितसलावण्यपयोधरा, अनङ्गगृहिणीव ऋतुलक्ष्मीपरिगता, चित्तानुकूलानुरक्तसखीजनमध्यगता, लघूकृतरक्तकमलशोभाभ्यां कूर्मोन्नताभ्यां घनसरलकोमलाङ्गुलिविभूषिताभ्यां अलक्ष्यमाणशिराजालमनोहराभ्यां निर्मलनखमयूखौघप्रतिबद्धपरिवेशमण्डलाभ्यामलब्धहृदयप्रवेशेनेव पूर्वसेवासंपादनोपायचतुरेण यावकरागेण प्रतिपन्नाभ्यां चरणाभ्याम्, चरणानुरूपाभ्यामेव प्रसन्नसुकुमालाभ्यामकृतकुङ्कुमरागपिञ्जराभ्यां जङ्घाभ्याम्, मदनयमलतूणीर(करणिल्लेणं)सदृशेन (पयाम)अनुपूर्वस्थूलेन च निरन्तरेण च ऊरुयुगलेन, उत्तप्तकनकनिर्मितेनेव पीवरेण घटितविमलमणिमेखलाभरणेन अनङ्गभवनेनेव विस्तीर्णेन नितम्बबिम्बेन, सकलत्रैलोक्यलावण्यसलिलनिपानेनेव स्वभावगम्भीरेण नाभिमण्डलेन, कुसुमायुधचापलेखाविभ्रमया तनुमध्यप्रसाधनया रोमराज्या, यौवनारोहणसोपानभूतत्रिवलिसनाथेन मध्येन, ईश(नडिएण)व्याकुलितेन लावण्यातिशयलम्पटेनेव मदनेन सदा

---

१ घनमसण० ख। २ पयाममणुपुव्वं (देशी. २-६.) ३ ०कणयमयनि० क। ४ रोमराइयाए ख।

करेहिं, परिमण्डलाए महल्लमुत्ताहलमालापरिगयाए तिलेहालंकियाए सिरोहराए, वन्धूय[1]करणिल्लेणं सहावारुणेण अहरेण, विणिज्जियकुन्दकुसुमसोहेहिं विणिन्तमऊहजालसोहिल्लेहिं दसणेहिं, उत्तुङ्गेणं सहावरमणिज्जेणं नासावंसएण, कन्तिपडिपूरिएहिं विणिज्जियचन्दविम्बसोहेहिं असोयपल्लवावयंस[2]पडियपडिमेहिं गण्डपासेहिं, विउद्धनवकुवलयदलकन्तिसुकुमालेहिं सुपम्हलेहिं दंसणगोयरावडियजणमणाणन्दणेहिं नयणेहिं, [3]गहकल्लोलदरगहियमियङ्कमण्डलनिहेण सुसिणिद्धालयाउलेणं निडालवट्टेणं, वयणाणुरूवेहिं जच्चतवणिज्ज[4]तलवत्तियासणाहेहिं अप्पियवयणासवणेहिं सवणेहिं, जिणझाणाणलडज्झन्तमयणधूमुग्गारेणं पिव कसिणकुडिलेणं मालईकुसुमदामसुरहिगन्धायड्ढियभमन्तमुहलभमरोलिपरियएणं केसकलावेणं, तिहुयणेक्कसुन्दरपरमाणु[5]विणिम्मियं पिव अपडिरूवं रूवसोहं वहन्ती, ईसि-

समालिङ्गिताभ्यां परिणाहोद्भिद्यमानाभ्यामपयोधराभ्यां पयोधराभ्याम्, सुप्रतिष्ठिताभ्यां वाहुलताभ्याम्, अशोकपल्लवविभ्रमाभ्यां सुप्रशस्तरेखाऽलंकृताभ्यां माणिक्यपर्युक्तकनककटकसनाथाभ्यामनुचितकर्माकराभ्यां कराभ्याम्, परिमण्डलया महन्मुक्ताफलमालापरिगतया त्रिरेखालंकृतया शिरोधरया, वन्धूकसदृशेण स्वभावारुणेनाधरेण, विनिर्जितकुन्दकुसुमशोभैर्विनिर्गच्छन्मयूखजालशोभमानैर्दशनैः, उत्तुङ्गेन स्वभावरमणीयेन नासावंशेन, कान्तिप्रतिपूरिताभ्यां विनिर्जितचन्द्रविम्बशोभाभ्यामशोकपल्लवावतंसकपतितप्रतिविम्बाभ्यां गण्डपार्श्वाभ्याम्, विबुद्धनवकुवलयदलकान्तिसुकुमालाभ्यां सुपक्ष्मलाभ्यां दर्शनगोचरापतितजनमनआनन्दनाभ्यां नयनाभ्यां ग्रहकल्लोलेषद्गृहितमृगाङ्कनिभेन सुस्निग्धालकाकुलेन ललाटपट्टेन, वदनानुरूपाभ्यां जात्यतपनीयतलवर्तिकासनाथाभ्यामप्रियवचनाश्रवणाभ्यां श्रवणाभ्याम्, जिनध्यानानलदह्यमानमदनधूमोद्गारेणेव कृष्णकुटिलेन मालतीकुसुमदामसुरभिगन्धाकर्षितभ्रमन्मुखरभ्रमरावलिपरिगतेन केशकलापेन, त्रिभुवनैकसुन्दरपरमाणुविनिर्मितामिवाप्रतिरूपां रूपशोभां वहन्ती, ईषद्विहसितारब्धसखीजनकथाप्रबन्धा विमलमाणिक्यप्रयुक्त(खचित)कनकासनो-

---

[1] करणिल्लं (दे) सदृशम्। [2] ०पडिमावएहिं गण्डहवासेहिं ख। [3] कल्लोलो (दे) शत्रुः राहुरित्यर्थः। [4] तलवत्तियं (दे) कर्णाभरणम्। [5] ०विणिम्मिवियं ख।

विहसियारद्धसहियणकहापबन्धा विमलमाणिक्क[1]पज्जुत्तकणयासणोवविट्ठा विलासवइ त्ति। तओ तं दट्ठूण [2]मोहतिमिरदोसेण अणिरूविऊण परमत्थं अक्खिप्पन्तहिययं फुरन्तबाहुजुयलो परिचिन्तिउं पयत्तो। किह

ओहामियसुरसुन्दरिरूवाइसयं विणिम्मियं दट्ठुं। विहिणो वि नूणमेयं बहुमाणो आसि अप्पाणे॥

एसा चावायड्ढणवियलं मुणिऊण वम्महं विहिणा। जणहिययभेयणसहा विणिम्मिया हत्थभल्लि व्व॥

एत्थन्तरंमि समागओ से अहं दंसणगोयरं, पुलइओ य तीए ससिणेहमारत्तकसणधवलेहिं चलन्ततारएहिं नयणेहिं ससज्झसा विय अणाचिक्खणीयं अवत्थन्तरमणुहवन्ती समुट्ठिया एसा। तओ [[3]भणियं अणंगसुन्दरीए सुसागयं मयरद्धयस्स,] [4]मए वि भणियं सागयं वसन्तलच्छीए। सुन्दरि, अलं संभमेण। एत्थन्तरंमि तं चेवासणमुवदंसिऊग भणियं अगङ्गसुन्दरीए। उववसिउ कुमारो। विलासवइआसणं[5] ति बहुमाणेण उवविट्ठो अहं। उवणीयं च मे कलधोयमयतलियाए तम्बोलं। तं च घेत्तूग भणियं मए। उवविसउ

पविष्टा विलासवतीति। ततस्तं दृष्ट्वा मोहतिमिरदोषेणानिरूप्य परमार्थमाक्षिप्यमानहृदयं स्फुरद्बाहुयुगलः परिचिन्तितुं प्रवृत्तः। कथम्?

तुलितसुरसुन्दरीरूपातिशयां विनिर्मितां दृष्ट्वा। विधेरपि नूनमेतां बहुमान आसीदात्मनि॥

एषा चापाकर्षणविकलं ज्ञात्वा मन्मथं विधिना। जनहृदयभेदनसहा विनिर्मिता हस्तभल्लिरिव॥

अत्रान्तरे समागतस्तस्याहं दर्शनगोचरम्, दृष्टश्च तया सस्नेहमारक्तकृष्णधवलाभ्यां चलत्तारकाभ्यां नयनाभ्याम्। ससाध्वसेव अनाख्येयमवस्थान्तरमनुभवन्ती समुत्थितैषा। ततो [भणितमनङ्गसुन्दर्या-सुस्वागतं मकरध्वजस्य] मयाऽपि भणितम्-स्वागतं वसन्तलक्ष्म्याः। सुन्दरि! अलं संभ्रमेण। अत्रान्तरे तदेवासनमुपदर्श्य भणितमनङ्गसुन्दर्या-उपविशतु कुमारः। विलासवत्यासनमिति बहुमानेनोपविष्टो-

---

[1] पज्जत्त° ख। [2] अन्नाणमोहदो° ख। [3] अयं कोष्ठान्तर्गतः पाठः क-ग पुस्तके नास्ति। [4] मए भ° क। [5] °आसणे ति ख।

रायधूय त्ति । उवविट्ठा एसा । ठियाणि[1] कंचि वेलं ॥

एत्थन्तरंमि समागओ मित्तभूई नाम कन्नन्तेउरमहल्लओ । पणमिओ अहं तेण, मए वि य अहिवाइओ । भणियं च तेण । विलासवइ, महाराओ आणवेइ । विसुमरिया ते वीणापओगा । कुविओ अहं कल्लं । ता लहुं सुमरेहि 'अज्ज पुण तए वीणा वाइयव्व' त्ति । तओ 'जं महाराओ आणवेइ' त्ति भणिऊण निग्गया लहुं ।

अह कञ्चुइयसमेया सणेहमारत्तकसणधवलेहिं । नयणेहिं अपेच्छन्तं पेच्छन्ती वलियतारेहिं ॥
मन्थरगईए वियलन्तहत्थसंरुद्धमुहलमणिरसणा । मयणसरघायभीय व्व वेवमाणी गया भवणं ॥

तओ वसुभूइणा भणियं । वयस्स[2], एहि गच्छामो, विणा विलासवईए किमिह चिट्ठिएणं ति । निग्गया अम्हे, दिट्ठा य उज्जाण-

ऽहम् । उपनीतं च मे कलधौतमयतलिकया ताम्बूलम् । तं च गृहीत्वा भणितं मया-उपविशतु राजदुहितेति । उपविष्टैषा । स्थिताः काञ्चिद् वेलाम् ॥

अत्रान्तरे समागतो मित्रभूतिर्नाम कन्याऽन्तःपुरमहत्तकः । प्रणतोऽहं तेन, मयाऽपि चाभिवादितः । भणितं च तेन-विलासवति ! महाराज आज्ञापयति-विस्मृतास्ते वीणाप्रयोगाः, कुपितोऽहं कल्ये, ततो लघु स्मर 'अद्य त्वया वीणा वादयितव्या' इति । ततो 'यद् महाराज आज्ञापयति' इति भणित्वा निर्गता लघु ।

अथ कञ्चुकिसमेता सस्नेहमारक्तकृष्णधवलाभ्याम् । नयनाभ्यामप्रेक्षमाणं प्रेक्षमाणा वलिततारभ्याम् ॥
मन्थरगतया विचलद्हस्तसंरुद्धमुखरमणिरशना । मदनशरघातभीतेव वेपमाना गता भवनम् ॥

---

१ ठिया य क । २ वयंस ख ।

दुवारदेसभाए अणङ्गवइनामाए रायपत्तीए। अकज्जायरणकुलहरत्तणेण मयणस्स समुप्पन्नो तीए वि ममोवरि अहिलासो। [1]गया अम्हे सगिहं॥ वासरन्तंमि य घेत्तूण विज्जाहरबन्धगुत्थाइं सिन्दुवारकुसुमाइं विलेवणसणाहं च तम्बोलमागया अणङ्गसुन्दरी[2]। भणियं च तीए। कुमार, विन्नत्तं सामिणीए 'एयाइं सिन्दुवारकुसुमाइं अवस्सं अज्जउत्तेणं परिहियव्वाइं' ति। तओ '[3]संवाइयं चेव इमिणा उवन्नासेण मे समीहियं' ति चिन्तिऊण, 'जं देवी आणवेइ' त्ति भणिऊण गहियं कुसुमदामं, विरइयं उत्तिमङ्गे; [4]विलित्तो वि पिययमा[5]बहुमाणेण पुणो विलित्तो अप्पा; मोत्तूणमावीलं समाणियं तम्बोलं। एत्थन्तरंमि भणियं वसुभूइणा। अणङ्गसुन्दरि, दिट्ठं तए पियवयंसस्स विणीयत्तणं। तीए भणियं। न एवंविहेसु महापुरिसेसु विणओ अच्छेरयं ति। तओ कंचि वेलं गमेऊण पयट्टा अणङ्ग-

ततो वसुभूतिना भणितम्—वयस्य! एहि, गच्छावः, विना विलासवत्या किमिह स्थितेनेति। निर्गतावावाम्। दृष्टौ च उद्यानदेशभागे अनङ्गवतीनामया राजपत्न्या। अकार्याचरणकुलगृहत्वेन मदनस्य समुत्पन्नस्तस्या अपि ममोपर्यभिलाषः। गतावावां स्वगृहम्। वासरान्ते च गृहीत्वा विद्याधरबन्धग्रथितानि सिन्दुवारकुसुमानि विलेपनसनाथं च ताम्बूलमागताऽनङ्गसुन्दरी। भणितं च तया—कुमार! विज्ञप्तं स्वामिन्या 'एतानि स्वहस्तग्रथितानि सिन्दुवारकुसुमानि अवश्यमार्यपुत्रेण परिधातव्यानि' इति। ततः 'संवादितं चैवानेनोपन्यासेन मे समीहितम्' इति चिन्तयित्वा 'यद् देवी आज्ञापयति' इति भणित्वा गृहीतं कुसुमदाम, विरचितमुत्तमाङ्गे, विलिप्तोऽपि (कृतविलेपनोऽपि) प्रियतमाबहुमानेन पुनर्विलिप्त आत्मा, मुक्त्वाऽऽवीलं (समाणिअं) भुक्तं ताम्बूलम्। अत्रान्तरे भणितं वसुभूतिना—अनङ्गसुन्दरि! दृष्टं त्वया प्रियवयस्यस्य विनीतत्वम्। तया भणितम्—नैवंविधेषु महापुरुषेषु विनय आश्चर्यमिति। ततः काञ्चिद् वेलां

---

१ तओ तं वीणं वायंतीमपेच्छिऊण ख। २ नाम विलासवइसंतीया दासचेडिया चलणेसु निवडिऊण ख। ३ संपाइयं ख। ४ पुव्वविलित्तो संतो ख। ५ बहुमाणओ ख।

सुन्दरी। दिन्नो य से मए भुवणसारो कण्ठओ। तओ पहट्ठवयणकमला 'संपन्ना सामिणीए मणोरह' त्ति चिन्तयन्ती भणिया य एसा। सुन्दरि, सयं ते गेहमेयं, ता इहागमणेण खेओ न कायव्वो त्ति। तओ 'जं कुमारो आणवेइ' त्ति भणिऊण गया अणङ्गसुन्दरी। पवड्ढमाणाणुरायाण अइक्कन्ता कइवि दियहा॥

अन्नया य रायकुलाओ निग्गच्छमाणो भणिओ अहं चेडियाए। कुमार, महारायपत्ती अणङ्गवई[1] भगाइ 'जइ नाईव उवरोहो, ता इहागच्छउ कुमारो' त्ति। तओ वीसत्थयाए महारायस्स 'अम्बाए वि आगासंपायणे न उवरोहो' त्ति भणिऊण पयट्टो अगङ्गवई[2]-समीवं। दुवारपवेसे य फुरियं मे वामलोयणेणं, उवरोहसीलयाए तहवि य पविट्ठो अहयं। दिट्ठा य सा मए वामकरयलपणामियं[3] परिमलियकवोलपत्तलेहं वयणकमलमुव्वहन्ती पणमिया सायरं। अपरिफुडक्खरं च 'कुमार सरणागया, परित्तायाहि[4]' त्ति जंपियं

गमयित्वा प्रवृत्ताऽनङ्गसुन्दरी। दत्तस्तस्यै मया भुवनसारः कण्ठकः। ततः प्रहृष्टवदनकमला 'संपन्नाः स्वामिन्या मनोरथाः' इति चिन्तयन्ती भणिता चैषा। सुन्दरि! स्वं ते गेहमेतद्, तत इहागमनेन खेदो न कर्तव्य इति। ततो 'यत्कुमार आज्ञापयति' इति भणित्वा गताऽनङ्गसुन्दरी। प्रवर्धमानानुरागयोरतिक्रान्ताः कत्यपि दिवसाः।

अन्यदा च राजकुलाद् निर्गच्छन् भणितोऽहं चेटिकया। कुमार! महाराजपत्नी अनङ्गवती भणति 'यदि नातीवोपरोधस्तत इहागच्छतु कुमार' इति। ततो विश्वस्तया महाराजस्य 'अम्बाया अप्याज्ञासंपादने न उपरोधः' इति भणित्वा प्रवृत्तोऽनङ्गवतीसमीपम्। द्वारप्रवेशे च स्फुरितं मे वामलोचनेन, उपरोधशीलतया तथाऽपि च प्रविष्टोऽहम्। दृष्टा च सा मया वामकरतलार्पितं परिमर्दितकपोलपत्रलेखं वदनकमलमुद्वहन्ती प्रणता सादरम्। अपरिस्फुटाक्षरं च 'कुमार! शरणागता, परित्रायस्व' इति जल्पितं तया। मया भणितम्—

---

१ अणंगमती ख। २ ०मति० ख। ३ पणामियं–अर्पितम्। ४ परित्तायह त्ति ख।

तीए । मए भणियं । अम्ब, कुओ भयं । तओ मयणवियारनिब्भराए दिट्ठीए मं पुलोइऊण[1] भणियं तीए । कुमार, अणंगाओ । जयप्पभिइ दिट्ठो मए मन्दिरुज्जाणाओ निग्गच्छमाणो तुमं, तयप्पभिइ पञ्चबाणो वि मयणो ममं चित्तलक्खे दसबाणकोडी संवुत्तो । ता हियएण समप्पियं नियगुणेहिं संदामियं अणुराएण धारियं मयणबाणेहिं सल्लियं निव्ववेहि मे सरीरं अत्तणोवओगेण । ते य सत्तिमन्ता पुरिसा, जे अब्भत्थणावच्छला, समावडियकज्जा न गणेन्ति आयइं, अब्भुद्धरेन्ति दीणयं, पूरेन्ति परमणोरहे[2], रक्खन्ति सरणागयं । ता रक्खेहि मं इमाओ अणङ्गाओ त्ति । तओ एयमायण्णिऊण ताडिओ विय[3] असणिवरिसेण[4] भिन्नो विय सूलेणं समाहओ विय मम्मेसु मुच्चमाणो विय जीविएणं महन्तं दुक्खमणुपत्तो म्हि । तओ 'नत्थि अकरणिज्जं विसयाउराणं' ति चिन्तिऊण जंपियं मए । अम्ब, परिच्चय इमं उभयलोयविरुद्धं अणज्जसंकप्पं, आलोएहि अत्तणो महाकुलं, अवेक्खाहि महारायसन्तिए गुणे । संकप्पजोणी

अम्ब ! कुतो भयम् ?। ततो मदनविकारनिर्भरया दृष्ट्या मां दृष्ट्वा भणितं तया। कुमार ! अनङ्गात्। यत्प्रभृति दृष्टो मया मन्दिरोद्यानाद् निर्गच्छन् त्वम्, तत्प्रभृति पञ्चबाणोऽपि मदनो मम चित्तलक्षे दशबाणकोटिः संवृत्तः। ततो हृदयेन समर्पितं निजगुणैः संदामितं (बद्धं) अनुरागेण धारितं मदनबाणैः शल्यितं निर्वापय मे शरीरमात्मोपयोगेन। ते च शक्तिमन्तः पुरुषा येऽभ्यर्थनावत्सलाः, समापतितकार्या न गणयन्त्यायतिम् , अभ्युद्धरन्ति दीनम् , पूरयन्ति परमनोरथान् , रक्षन्ति शरणागतम् । ततो रक्ष मामस्मादनङ्गादिति। तत एवमाकर्ण्य ताडित इवाशनिवर्षेण, भिन्न इव शूलेन, समाहत इव मर्मसु, मुच्यमान इव जीवितेन महान्तं दुःखमनुप्राप्तोऽस्मि। ततो 'नास्त्यकरणीयं विषयातुराणाम्' इति चिन्तयित्वा जल्पितं मया। अम्ब ! परित्यजेममुभयलोकविरुद्धमनार्यसंकल्पम् , आलोचयात्मनो महा-

---

१ पलोइऊण क। २ पणइमणोरहे क। ३ विव ख। ४ असिणि० ख।

य निरयगमणेक्कदेसिओ अणङ्गो, न यापरिचत्तेहि इमेहिं एस उवरमइ। न य विहाय चलणवन्दणं तुह सरीरेण मे उवओगो। सत्तिमन्ता वि य पुरिसा, जे न परिच्चयन्ति धम्मं, न खण्डेन्ति सीलं, न लङ्घेन्ति आयारं, न करेन्ति वयणिज्जं, न मुज्झन्ति उचिएसुं। अणङ्गपरिरक्खणं पि य न विवेयसन्नाहमन्तरेण। अन्नं च—वल्लहो अहं ते, ता कह खणियसुहं चेव बहु मन्निऊण पाडेहि मं अविज्झायहुयवहजालावलीभीसणे नरए। अओ परिच्चय इमं अविवेइजणबहुमयं कामाहिलासं। सामिसाली य तुमं ति। अओ एवं भणामि। भणियं च।

जो पावं कुणमाणं अणुयत्तइ सामियं व मित्तं वा। सो निरय[1]पत्थियस्स कहेइ [2]कण्डुज्जुयं मग्गं ॥

एत्थन्तरंमि लज्जावणयवयणाए भणियं अणङ्गवईए। साहु कुमार साहु, उचिओ ते विवेगो। मए वि रूवसीलाइं विरुद्धाइं ति

कुलम्, अपेक्षस्व महाराजसत्कान् गुणान्। संकल्पयोनिश्च निरयगमनैकदेशिकोऽनङ्गः, न चापरित्यक्तैरेभिरेष उपरमति। न च विहाय चरणवन्दनं तव शरीरेण मे उपयोगः। शक्तिमन्तोऽपि च (ते) पुरुषा ये न परित्यजन्ति धर्मम्, न खण्डयन्ति शीलम्, न लङ्घयन्त्याचारम्, न कुर्वन्ति वचनीयम्, न मुह्यन्त्युचितेषु। अनङ्गपरिरक्षणमपि च न विवेकसन्नाहमन्तरेण। अन्यच्च—वल्लभोऽहं ते, ततः कथं क्षणिकसुखमेव बहु मत्वा पातयसि मामविध्यातहुतवहज्वालावलिभीषणे नरके। अतः परित्यजेममविवेकिजनबहुमतं कामाभिलाषम्। स्वामिशाली च त्वमिति, अत एवं भणामि। भणितं च—

यः पापं कुर्वन्तमनुवर्तते स्वामिकं वा मित्रं वा। स नरकप्रस्थितस्य कथयति काण्डर्जुक (काण्डवत्–बाणवद् ऋजु–सरलम्) मार्गम् ॥

अत्रान्तरे लज्जावनतवदनया भणितमनङ्गवत्या। साधु कुमार! साधु, उचितस्ते विवेकः। मयाऽपि रूपशीले विरुद्धे इति लोक-

---

[1] –पत्थियस्सा ख। [2] कन्दुज्जुयं ख, कन्दुज्जयं पन्थं क।

लोगवायवि(जि)न्नासणत्थं इममणुचिट्ठियं, न उण परमत्थओ त्ति। ता गच्छउ कुमारो। तओ अहं पणमिऊण तीए चलणजुयलं निग्गओ, तओ गओ नियगेहं ॥

अइक्कन्ता काइ वेला। समागओ नरवइबीयहिययभूओ विणयंधरो नाम नयरारक्खिओ। भणियं च तेण। कुमार, वत्तुकामो अहं; ता विवित्तमप्पाणयं आणवेउ कुमारो त्ति। तओ पुलइया वसुभूइपमुहा वयंसया, अवगया य। भणियं च तेण। कुमार, अवहिओ सुण।

अत्थि भवओ पिइरज्जंमि सत्थिमई नाम सन्निवेसो। तत्थ वीरसेणो नाम कुलउत्तओ। सो य

अच्चन्तदाणवसणी अहिमाणधणो दयालुओ सूरो। गम्भीरो सरणागयपरिरक्खणबद्धकच्छिल्लो ॥

वादजिज्ञासनार्थमिदमनुष्ठितं न पुनः परमार्थत इति। ततो गच्छतु कुमारः। ततोऽहं प्रणम्य तस्याश्चरणयुगलं निर्गतः। ततो गतो निजगेहम्।

अतिक्रान्ता काचिद् वेला। समागतो नरपतिद्वितीयहृदयभूतो विनयंधरो नाम नगरारक्षकः। भणितं च तेन-कुमार! वक्तुकामोऽहम्, ततो विविक्तमात्मानमाज्ञापयतु कुमार इति। ततो दृष्ट्वा वसुभूतिप्रमुखा वयस्या अपगताश्च। भणितं च तेन-कुमार, अवहितः शृणु।

अस्ति भवतः पितृराज्ये स्वस्तिमती नाम सन्निवेशः। तत्र वीरसेनो नाम कुलपुत्रकः। स च—

अत्यन्तदानव्यसनी अभिमानधनो दयालुकः शूरः। गम्भीरः शरणागतपरिरक्षणबद्धकक्षावान् ॥

तस्स य कप्पपायवस्स विय परत्थसंपायणेण सफलं जम्ममणुहवन्तस्स अइक्कन्तो कोइ कालो। जाया य से आवन्नसत्ता घरिणी। तओ सो तं गेण्हिऊण महया चडयरेण पयट्टो तीए कुलहरं जयत्थलं नाम नयरं। [1]पत्तो सेयवियं, आवासिओ बाहिरियाए। एथन्तरंभि समागओ साससमावूरियाणणो भयकायरचक्खू खीणगमणसत्ती कण्ठगयपाणो तुरियं तुरियं कोइ कुलउत्तओ। भणियं च तेण। अज्ज, परित्तायाहि परित्तायाहि, सरणागओ अज्जस्स। कुलउत्तएण भणियं। भद्द, अलं भएण, को मम पाणेसु धरन्तेसु भद्दस्स केसं पि उप्पाडेइ। घरिणीए भणियं–अज्जउत्त, मा एवं करेहि; कयाइ दोसयारी भवे। कुलउत्तएण भणियं। सुन्दरि, [2]अदोसयारी किं सरणं पवज्जइ। ता किं एइणा। जो होउ, सो होउ; पडिवन्नो मए। भणिओ य एसो 'भद्द, उवविसाहि'त्ति। तेण भणियं। अज्ज, कयन्तहत्थिलङ्घियाणि विय मयकुलाणि सीयन्ति मे अङ्गाणि, भयाभिभूयइत्थियाहिययं विय [3]थरहरन्ति मे ऊरू, परनिन्दाए विय सज्जणभारही

तस्य च कल्पपादस्येव परार्थसंपादनेन सफलं जन्मानुभवतोऽतिक्रान्तः कोऽपि कालः। जाता च तस्यापन्नसत्त्वा गृहिणी। ततः स तां गृहीत्वा महता चटकरेण (परिकरेण।) प्रवृत्तस्तस्याः कुलगृहं जयस्थलं नाम नगरम्। प्राप्तः श्वेतविकाम्। आवासितो बाह्यायाम्। अत्रान्तरे समागतः श्वाससमापूरिताननो भयकातरचक्षुः क्षीणगमनशक्तिः कण्ठगतप्राणस्त्वरितं त्वरितं कोऽपि कुलपुत्रकः। भणितं तेन–आर्य! परित्रायस्व, परित्रायस्व, शरणागत आर्यस्य। कुलपुत्रकेन भणितम्–भद्र! अलं भयेन, को मम प्राणेषु धरत्सु भद्रस्य केशमपि उत्पाटयति। गृहिण्या भणितम्–आर्यपुत्र! मा एवं कुरु, कदाचिद् दोषचारी भवेत्। कुलपुत्रकेण भणितम्–सुन्दरि! अदोषचारी किं शरणं प्रपद्यते?। ततः किमेतेन। यो भवतु स भवतु, प्रतिपन्नो मया। भणितश्च भद्र! उपविशेति। तेन भणितम्–आर्य!

---

१ अणवरयपयाणएहि य पत्तो सेयवियं भवओ पिउणो जसोधम्मुणो रायहाणिं क। २ दोसयारी सरणं पवज्जइ, न उण निद्दोसो सरणं पवज्जइ त्ति क। ३ थरहरायन्ते ख।

न पसरइ मे गई, अत्थिजणुल्लावा विय पए पए खलन्ति चलणया, पेयनाहस्स विय देवस्स विजयवम्मणो आसन्नीहवन्ति निद्देसयारिणो त्ति। कुलउत्तएण भणियं। भद्द, अलं भएण। को मम पाणेसु धरन्तेसु भद्दस्स [1]अंगुलीए वि दसइस्सइ त्ति। ता परिच्चय विसायं, उवविससु आवासन्तरे॥ एत्थन्तरंमि समागया रायपुरिसा। भणियं च तेहिं। अरे रे पावकम्म, चण्डं देवसासणमइक्कमिऊण अज्ज वि पाणे धारेसि।

जइ वच्चसि पायालं सरणं वा सुरवइं पयत्तेणं। लङ्घेसि जलनिहिं वा तहावि [3]जीयं न पावेसि॥

कुलउत्तएण भणियं-भद्द, किं कयमणेणं। तेहिं भणियं-परदव्वावहारेणं देवसासणाइक्कमो त्ति। कुलउत्तएण भणियं-भद्द,

---

कृतान्तहस्तिलङ्घितानीव मृगकुलानि सीदन्ति मेऽङ्गानि, भयाभिभूतस्त्रीहृदयमिव कम्पेते मे ऊरू, परनिन्दायामिव सज्जनभारती न प्रसरति मे गतिः, अर्थीजनोल्लापा इव पदे पदे स्खलतश्चरणौ, प्रेतनाथस्येव देवस्य विजयवर्मण आसन्नीभवन्ति निर्देशकारिण इति। कुलपुत्रकेण भणितम्-भद्र! अलं ते भयेन, को मम प्राणेषु धरत्सु भद्रस्य अङ्गुल्यापि दर्शयिष्यतीति। ततः परित्यज विषादम्, उपविश आवासान्तरे। अत्रान्तरे समागता राजपुरुषाः। भणितं च तैः-अरे रे पापकर्मन्! चण्डं देवशासनमतिक्रम्य अद्यापि प्राणान् धारयसि?।

यदि व्रजसि पातालं शरणं वा सुरपतिं प्रयत्नेन। लङ्घसे जलनिधिं वा तथापि जीवितं न प्राप्नोषि॥

कुलपुत्रकेन भणितम्-भद्र! किं कृतमनेन?। तैर्भणितम्-परद्रव्यापहारेण देवशासनातिक्रम इति। कुलपुत्रकेन भणितम्-भद्र!

---

१ केसंपि उप्पाडेइ ख। २ आवासन्तरं, उवविट्ठो य एसो दूसहरब्भन्तरे। एत्थ क। ३ जीवं क।

सरणागयपरिवज्जणं चोररक्खणं च दुवे वि हु विरुद्धाणि; तहावि अमुणिऊण परमत्थं पडिवन्नं मए इमस्स सरणं। एवं च ठिए समाणे भद्दा पमाणं ति। तेहि भणियं–भो कुलउत्तय, जइ अम्हे पमाणं, ता समप्पेहि एयं पावकम्मं, मा पवज्जेहि देवकोवाणलजालावलीए पयङ्गत्तणं। कुलउत्तएण भणियं–न ईइसो सप्पुरिसाण मग्गो, जं सरणागओ [1]समप्पिज्जइ। तेहिं भणियं। जइ एवं, परिरक्खेहि एयं; बला गेण्हामो त्ति। तेण भणियं। को मम पाणेसु धरन्तेसु एयं गेण्हइ त्ति। भणिऊण मग्गियं मण्डलग्गं कुलउत्तएण, सन्नद्धो य से परिवारो। तओ रायपुरिसेहिं 'मा णे अवराहियं भविस्सइ' त्ति चिन्तिऊण निवेइयं महारायस्स। भणियं च तेण। सासणाइक्कन्तं पि 'मे सरणागयं'ति रक्खइ; ता लहुं वावाएह त्ति। तओ समागयं अहिययरं नरिन्दसाहणं, वेढिया कुलउत्तयस्सावासभूमी, पयट्टमाओहणं॥ एत्थन्तरंमि समागओ वाहियालीओ [3]महारायपुत्तो महया आससाहणेण जसोवम्मदेवो। पुच्छावियं तेण 'अरे किमेयं'

शरणागतपरिवर्जनं चौररक्षणं च द्वे अपि खलु विरुद्धे, तथाऽप्यज्ञात्वा परमार्थं प्रतिपन्नं मयाऽस्य शरणम्। एवं च स्थिते सति भद्राः प्रमाणमिति। तैर्भणितम्–भो कुलपुत्रक! यदि वयं प्रमाणं ततः समर्पय एतं पापकर्माणम्, मा प्रपद्यस्व देवकोपानलज्वालावल्यां पतङ्गत्वम्। कुलपुत्रकेन भणितम्–न ईदृशः सत्पुरुषाणां मार्गो यच्छरणागतः समर्प्यते। तैर्भणितम्–यद्येवं परिरक्ष एतम्, बलाद् गृह्णीम इति। तेन भणितम्–को मम प्राणेषु धरत्सु एतं गृह्णातीति भणित्वा मार्गितं मण्डलाग्रं कुलपुत्रकेण, सन्नद्धश्च तस्य परिवारः। ततो राजपुरुषै 'र्मास्माकं अपराद्धं भविष्यति' इति चिन्तयित्वा निवेदितं महाराजाय। भणितं च तेन–शासनातिक्रान्तमपि मे शरणागतमिति रक्षति ततो लघु व्यापादयतेति। ततः समागतमधिकतरं नरेन्द्रसाधनम्, वेष्टिता कुलपुत्रस्यावासभूमिः, प्रवृत्तमायोधनम्। अत्रान्तरे समागतो वाह्यालीतो महाराजपुत्रो महताऽश्वसाधनेन यशोवर्मदेवः। प्रच्छितं तेन–अरे किमेतदिति। कथितं च तस्य राजपुरुषैः।

---

१ समप्पिअइ क। २ निग्गया रायपुरिसा निवेइयं ख। ३ अयं पाठः खपुस्तके नास्ति।

ति। साहियं च से रायपुरिसेहिं। भणियं च तेण। अरे मए अवावाइयंमि को सरणागयवच्छलं वावाएइ त्ति निवेएह तायस्स। तओ उवसन्तमाओहणं, निवेइयं राइणो, [1]अवहीरियं च तेण। भद्द, वीसत्थो गच्छाहि त्ति बहु माणिऊण कुलउत्तयं गओ कुमारो। कुलउत्तओ य तक्करं पूइऊण अणुसासिऊण य तं पत्तो दुमासमेत्तेण कालेण जयत्थलं। पसूया से [2]घरिणी। जाओ से दारओ; सो उण कुमार, अहं चेव। ता एवं सयलसत्तोवगारगो वि विसेसओ उवयारी ते पिया तायस्य अम्बाए ममं च त्ति। [3]निवेइयं कुमारस्स, कारणं पुण इमं। अज्ज खलु समागयमेत्तो चेव ईसाणचन्दो महाराओ वाहियालीओ पविट्ठो अणङ्गवइगेहं। दिट्ठा य तेण करुरुहविलिहियाणणा बाहजलधोयकवोलपत्तलेहा अणङ्गवई, भणिया य 'सुन्दरि, किमेयं' ति। तीए भणियं—सीलपरिरक्खणविवाओ। राइणा भणियं। साहेउ सुन्दरी, कस्स सुमरियं कयन्तेण। तीए भणियं। न विन्नत्तं चेव मए महारायस्स; 'किमणेण असंबद्धपलावेणं' ति। अन्नहा

भणितं च तेन—अरे मयि अव्यापादिते कः शरणागतवत्सलं व्यापादयतीति निवेदयत तातस्य। तत उपशान्तमायोधनम्, निवेदितं राज्ञः, अवधीरितं च तेन। भद्र! विश्वस्तो गच्छ इति बहु मानयित्वा कुलपुत्रकं गतो कुमारः। कुलपुत्रकश्च तस्करं पूजयित्वाऽनुशिष्य च तं प्राप्तो द्विमासमात्रेण कालेन जयस्थलम्। प्रसूता च तस्य गृहिणी। जातस्तस्या दारकः, स पुनः कुमार! अहमेव। तत एवं सकलसत्त्वोपकारकोऽपि विशेषत उपकारी ते पिता तातस्याम्बाया मम चेति। निवेदितं कुमाराय, कारणं पुनरिदम्—अद्य खलु समागतमात्र एव ईशानचन्द्रो महाराजो वाह्यालितः प्रविष्टोऽनङ्गवतीगेहम्। दृष्टा च तेन कररुहविलिखितानना बाष्पजलधौतकपोलपत्रलेखाऽनङ्गवती। भणिता च सुन्दरि! किमेतदिति। तया भणितम्—शीलपरिरक्षणविपाकः। राज्ञा भणितम्—कथयतु सुन्दरी, कस्य स्मृतं कृता-

---

१ वाराविय महाराएण क। २ भारिया क। ३ सुयं च मे जणणिजणयाण सयासाओ। जहा विजयधम्मणो पुत्तजसोधम्मसंतिओ णे जियलोओ। जस्स नामं पि सुमरिऊण हरिसवसुप्फुल्ललोयणो वासरंपि सयलं तस्स सब्भूयगुणकित्तणं करेत्ताण न तिप्पइ मत्तो चेव ईसाणचंदो क।

अइक्कंता कइवि वासरा सणकुमारस्स मं पत्थेमाणस्स । न पडिवन्नं च तं मए । अज्ज उण सयमेवागच्छिऊण अपडिवज्जमाणी से हिययइच्छियं एवं कयत्थिय म्हि । तओ कुविओ राया । भणियं च तेण । अरे विणयंधर, लहुं तं दुरायारं कुलफंसणं वावाएहि त्ति । मए भणियं । जं देवो आणवेइ । राइणा भणियं । तहा तए वावाइयव्वो, जहा न कोइ णं लक्खेइ त्ति । तओ मए चिन्तियं । अहो दारुणे निउत्तो म्हि । एवंफला नरिन्दपच्चासन्नया । धन्ना खु ते जणा, सेवन्ति जे निद्दुज्जणाइं तवोवणाइं । हा किमेत्थ कायव्वं ति । सोहणं होइ, जइ सो दीहाऊ न वावाइज्जइ । समद्धासिओ चिन्तापिसाइयाए 'तहावि य अलङ्घणीओ देवाएसो' त्ति पयट्टो एयवइयरेण । एत्थन्तरंमि छीयं केणावि तोरणपएसे । तमायण्णिऊण विलम्बमाणो भणिओ सिद्धाएसनेमित्तिएण । भद्द विणयंधर, मा विलम्बेहि; जओ [1]सोम्मा नाम सत्तमी एसा छिक्का आरोग्गफला अणन्तरा अपुव्वअत्थलाभोत्तरा य । तहा य भणियमिणमिसीहिं—

न्तेन ?। तया भणितम्-न विज्ञतमेव मया महाराजाय 'किमनेनासंबद्धप्रलापेन' इति । अन्यथाऽतिक्रान्ताः कत्यपि वासराः सनत्कुमारस्य मां प्रार्थयमानस्य । न प्रतिपन्नं च तन्मया । अद्य पुनः स्वयमेवागत्याप्रतिपद्यमाना तस्य हृदयेप्सितमेवं कदर्थिताऽस्मि । ततः कुपितो राजा । भणितं च तेन-अरे विनयन्धर ! लघु तं दुराचारं कुलपांसनं व्यापादयेति । मया भणितम्-यद् देव आज्ञापयति । राज्ञा भणितम्-तथा त्वया व्यापादयितव्यो यथा न कोऽपि तद् लक्षयतीति । ततो मया चिन्तितम्-अहो दारुणे नियुक्तोऽस्मि । एवंफला नरेन्द्रप्रत्यासन्नता । धन्याः खलु ते जनाः सेवन्ते ये निर्दुर्जनानि तपोवनानि । हा किमत्र कर्तव्यमिति । शोभनं भवति यदि स दीर्घायुर्न व्यापाद्यते । समध्यासितश्चिन्तापिशाचिकया. 'तथापि चालङ्घनीयो देवादेशः' इति प्रवृत्त एतद्व्यतिकरेण । अत्रान्तरे क्षुतं केनापि तोरणप्रदेशे । तमाकर्ण्य विलम्बमानो भणितः, सिद्धादेशनैमित्तिकेन । भद्र विनयन्धर ! मा विलम्बस्व, अतः सौम्या नाम सप्तम्येषा क्षुत

---

[1] सोमा ख ।

पतिसेहमजत्तं वा हाणिं वुड्ढिं खयं असिद्धिं वा। आरोग्गमत्थलाभं छीयंमि पयाहिणदिसासु ॥

तं एस इमीए विवागो। निमित्तन्तरजोगओ य अवगच्छामि, निद्दोसवत्थुविसओ विइण्णो ते रन्ना विरुद्धाएसो, नाहिप्पेओ य भवओ। ता मा संतप्प। जहा तुमं चिन्तेसि, तहा एसो परिणमिस्सइ। किं तु सिग्घं पयट्टेहि, अन्नहा असोहणं परिणमइ ॥ तओ मए चिन्तियं। अणेयसंजणियपच्चओ सिद्धाएसो खु एसो, एयं च एवंविहं पओयणं, विन्नवणागोयरो य कोवो देवस्स, सव्वहा विसममेयं ति चिन्तयन्तो गओ निययगेहं। हा को उण इहोवाओ त्ति चिन्तयन्तो गहिओ उव्वेएण। पुच्छिओ य जणणीए। पुत्तय, किमेवमुव्विग्गो विय लक्खीयसि। तओ मए 'नत्थि जणणीओ वि अवरं वीसासथामं' ति साहियं तीए। भणियं च णाए। पुत्तय, न तए इममणुचिट्ठियव्वं, कुलोवयारिपुत्तो खु एसो पुत्तयस्स त्ति। साहिओ कहियवुत्तन्तो। ता एवं ववत्थिए कुमारो पमाणं ति ॥

(छिक्का) आरोग्यफलाऽनन्तराऽपूर्वार्थलाभोत्तरा च। तथा च भणितमिदमृषिभिः—

प्रतिषेधमयत्नं(यात्रं) वा हानिं वृद्धिं क्षयमसिद्धिं वा। आरोग्यमर्थलाभं क्षुते प्रदक्षिणदिक्षु ॥

तदेषोऽस्या विपाकः। निमित्तान्तरयोगतश्चावगच्छामि, निर्दोषवस्तुविषयो वितीर्णस्ते राज्ञा विरुद्धादेशः, नाभिप्रेतश्च भवतः। ततो मा संतप्यस्व। यथा त्वं चिन्तयसि तथैष परिणंस्यति। किन्तु शीघ्रं प्रवर्तस्व, अन्यथाऽशोभनं परिणमति ततो मया चिन्तितम्—अनेकसंजनितप्रत्ययः सिद्धादेशः खल्वेषः, एतच्च एवंविधं प्रयोजनम्, विज्ञापनागोचरश्च कोपो देवस्य, सर्वथा विषममेतदिति चिन्तयन् गतो निजकगेहम्। हा कः पुनरिहोपाय इति चिन्तयन् गृहीत उद्वेगेन। पृष्टश्च जनन्या। पुत्र! किमेवमुद्विग्न इव लक्ष्यसे?। ततो मया 'नास्ति जननीतोऽप्यपरं विश्वासस्थानम्' इति कथितं तस्यै। भणितं चानया-पुत्र! न त्वयेदमनुष्ठातव्यम्, कुलोपकारिपुत्रः खल्वेष पुत्रस्येति कथितः कथितवृत्तान्तः। तत एवं व्यवस्थिते कुमारः प्रमाणमिति ॥

ठिओ तुण्हिक्को विणयंधरो। तओ मए चिन्तियं। अहो मायासीलया इत्थिवग्गस्स। अहवा महिलिया नाम भुयङ्गमगई विय कुडिलहियया, विज्जू विय दिट्ठनट्ठपेम्मा, सरिया विय उभय[1]कुलुच्छायणी, ससङ्गपव्वज्जा विय अपुट्ठधम्मा, हिंसा विय जीवलोयगरहिय त्ति। अहवा किं इमीए चिन्ताए। अविवेयबहुला विसयविसलालमा ईइसी चेव महिलिया होइ। अह कहं पुण महाराएण तीए वयणओ एयमेवं चेव पडिवन्नं ति। अहवा ईदिसी मे अवत्था, जेण संभवइ एयं पि। अविमिस्सगारीणि किल जोव्वणाणि हवन्ति। इट्ठा य सा महारायस्स। ता किमेत्थ जुत्तं ति। किं साहेमि जहट्ठियं महारायस्स। अहवा वावाइज्जइ सा तवस्सिणी अवस्सं महाराएण। न कयं च [2]से समीहियं। ता कहमन्नं पि अणत्थं से संपाडेमि। असाहिज्जमाणे य मइलणा मे कुलहरस्स। तहावि वरं मइलणा, न उण परपीड त्ति। चिन्तयन्तो भणिओ विणयंधरेण। ता आइसउ कुमारो, किं मए एत्थ कायव्वं ति। मए भणियं। भद्द, आएसयारी

स्थितस्तूष्णिको विनयन्धरः। ततो मया चिन्तितम्-अहो मायाशीलता स्त्रीवर्गस्य। अथवा महिलिका नाम भुजंगमगतिरिव कुटिलहृदया, विद्युदिव दृष्टनष्टप्रेमा, सरिदिव उभयकुलोच्छादनी, ससंगप्रव्रज्येव अस्पृष्टधर्मा, हिंसेव जीवलोकगर्हितेति। अथवा किमनया चिन्तया। अविवेकबहुला विषयविपलालसा ईदृश्येव महिलिका भवति। अथ कथं पुनर्महाराजेन तस्या वचनत एतदेवमेव प्रतिपन्नमिति?। अथवा ईदृशी मेऽवस्था, येन संभवत्येतदपि। अविमृश्यकारीणि किल यौवनानि भवन्ति। इष्टा च सा महाराजस्य। ततः किमत्र युक्तमिति। किं कथयामि यथास्थितं महाराजाय। अथवा व्यापाद्यते सा तपस्विनी अवश्यं महाराजेन। न कृतं च तस्याः समीहितम्। ततः कथमन्यमप्यनर्थं तस्य संपादयामि। अकथ्यमाने च मलिनता मे कुलगृहस्य। तथापि वरं मलिनता, न पुनः परपीडेति चिन्तयन् भणितो विनयन्धरेण। तत आदिशतु कुमारः, किं मया कर्तव्यमिति। मया भणितम्-भद्र! आदेशकारी त्वम्, ततः

---

१ कुलघायणी क। २ मे ग।

तुम, ता संपाडेहि रायसासणं; किं वा मए दुरायारेण कुलफंसणेण जीवमाणेणं ति। अद्धभणिए छिक्किय सिरिहराभिहाणेण रायमग्गचारिणा नरेणं ति। नियकहापडिबद्धं च रायमग्गगामिएहिं महया सद्देणं जंपियं बम्भणेहिं 'भो किं बहुणा, न एस दोसयारी, एत्थ अम्हे [1]कोसविसएहिं पच्चाएमो'। एयमायण्णिऊण भणियं विणयंधरेण। कुमार, न तुमं दुरायारो, जओ जंपियं सिद्धाएसेण 'निद्दोसवत्थुविसओ विइण्णो ते रन्ना विरुद्धाएसो' त्ति। अवितहाएसो य सो भयवं, न सहिओ य भवओ दुरायाराइसद्दो अवितहसूयगेहिं छिक्कादिनिमित्तेहिं। ता किं एइणा पलावप्पाएण। साहेहि, कहं पुण इमं ववत्थियं; जेण विन्नवेमि महारायस्स। मए भणियं। भद्द, किमहं साहेमि; अम्बा एत्थ पमाणं। तेण भणियं। कुमार, न तुज्झ एत्थ दोसो, दुट्ठा य सा पाव त्ति सामन्नओ निच्छियमिणं, विसेसं नावगच्छामि। ता किं ममेइणा। एवं चेव एयं विन्नवेमि महारायस्स; तओ सो चेव एत्थ अन्तं लहिस्सइ त्ति। भणिऊण उट्ठिओ

संपादय राजशासनम्, किं वा मया दुराचारेण कुलपांसनेन जीवतेति अर्धभणिते क्षुतं श्रीधराभिधानेन राजमार्गचारिणा नरेणेति। निजकथाप्रतिवद्धं च राजमार्गगामिकैर्महता शब्देन जल्पितं ब्राह्मणैः 'भो! किं बहुना, न एष दोषकारी. अत्र वयं +कोशविषयैः प्रत्याश्रयामः। एतदाकर्ण्य भणितं विनयन्धरेण। कुमार! न त्वं दुराचारः, यतो जल्पितं सिद्धादेशेन 'निर्दोषवस्तुविषयो विस्तीर्णस्ते राज्ञा विरुद्धादेशः' इति। अवितथादेशश्च स भगवान्, न सोढश्च भवतो दुराचारादिशब्दोऽवितथसूचकैः क्षुतादिनिमित्तैः। ततः किमेतेन प्रलापप्रायेण। कथय कथं पुनरिदं व्यवस्थितम्, येन विज्ञपयामि महाराजाय। मया भणितम्–भद्र! किमहं कथयामि, अम्बाऽत्र प्रमाणम्। तेन भणितम्–कुमार! न तवात्र दोषः, दुष्टा च सा पापेति सामान्यतो निश्चितमिदम्, विशेषं नावगच्छामि। ततः किं ममैतेन। एवमेवैतद् विज्ञपयामि महाराजाय, ततः स एवात्र अन्तं लप्स्यते इति भणित्वोत्थितो विनयन्धरः, धृतो मया भुजादण्डे भणितश्च। भद्र!

---

[1] कोससवहेहिं ख। + कोशः–सत्यंकारार्थं तप्तलोहादिस्पर्शप्रमुखदिव्यविशेषः।

विणयंधरो, धरिओ मए भुयादण्डे, भणिओ य। भद्द, अलं अम्बाए उवरि संरम्भेण। चञ्चलं जीवियं। न खलु एयं बहु मन्निऊण गुरुयणसंकिलेसकरण जुज्जइ। विणयंधरेण भणियं। कुमार, पुत्तो तुमं महारायजसवम्मणो, किमेत्थ अन्नं भणीयइ। अओ चेव मे तीए पावाए उवरि कोवो। ता करेहि पसायं; मुञ्च मं, जेण विन्नवेमि एयं वइयरं देवस्स। मए भणियं। अलमिमिणा निब्बन्धेण। तेण भणियं। कुमार, अवस्समिणं मए देवस्स विन्नवियव्वं ति। मए भणियं। भद्द, जइ एवं, ता अवस्सं मए वि अप्पा वावाइयव्वो त्ति। एयमायण्णिऊण[1] बाहुल्ललोयणो विसण्णो विणयंधरो। भणियं च णेण। अहो देवस्स असमिक्खियकारिया, जं ईइसं पुरिसरयणमेवं संभावीयइ। धिरत्थु एयस्स देवसद्दो। मए भणियं। भद्द, मा तायं अहिक्खिवाहि[2]; को एत्थ दोसो तायस्स, मम चेव पुव्वकम्मपरिणई एस त्ति। तओ महासोयाभिभूएण भणियं विणयंधरेण। कुमार, जइ एवं, ता आइसउ कुमारो, किं मए पावकम्मेण कायव्वं ति। मए भणियं। भद्द, आएसयारी तुमं, पावकम्मो अहं; ता संपाडेहि रायसासणं। किं मए दुट्ठसीलेण जीवन्तएण। तेण भणियं।

अलमम्बाया उपरि संरम्भेण, चञ्चलं जीवितम्, न खल्वेतद् बहु मत्वा गुरुजनसंक्लेशकरणं युज्यते। विनयन्धरेण भणितम्–कुमार! पुत्रस्त्वं महाराजयशोवर्मणः, किमत्र अपरं भण्यते। अत एव मे तस्या पापाया उपरि कोपः। ततः कुरु प्रसादम्, मुञ्च माम्, येन विज्ञपयाम्येतं व्यतिकरं देवस्य। मया भणितम्–अलमनेन निर्बन्धेन। तेन भणितम्–कुमार! अवश्यमिदं मया देवस्य विज्ञपितव्यमिति। मया भणितम्–भद्र! यद्येवं ततोऽवश्यं मयाऽप्यात्मा व्यापादयितव्य इति। एतदाकर्ण्य बाष्पार्द्रलोचनो विषण्णो विनयन्धरः। भणितं च तेन–अहो देवस्यासमीक्षितकारिता, यदीदृशं पुरुषरत्नमेवं संभाव्यते। धिगस्तु एतस्य देवशब्दः। मया भणितम्–भद्र! मा तातमधिक्षिप, कोऽत्र दोषस्तातस्य, ममैव पूर्वकर्मपरिणतिरेषेति। ततो महाशोकाभिभूतेन भणितं विनयन्धरेण। कुमार! यद्येवं तत आदिशतु

---

१ –मायण्णिय। २ अहिक्खिव ख।

मा एवमाइसउ कुमारो, किं इमिणा असंबद्धपलावेण वयणविण्णासेण, जहाह दुट्ठसीलो पावकम्मो; धन्नो तुमं, भायणं सयलकल्लाणाणं आलओ सयलगुणरयणाणं, कप्पतरुभूओ सयलसत्ताणं। किं बहुणा, निव्वुइ[1]दाणकप्पो तेलोक्कस्स वि। ता जइ न विन्नवेयव्वमेयं देवस्स, रक्खियव्वा सा रायदुट्ठपत्ती, ता चिन्तेहि एत्थुवायं, जहा भवओ पाणधारणाणन्दियमणो देवस्स अणवराही हवामि त्ति। तओ मए चिन्तियं। न वावाएइ एसो; अवावाएन्तो य एवमवराहियं न पावेइ, जइ अलक्खिओ परियणेणं वसुभूइबिइओ विप्पगिट्ठदेसन्तरमुवगच्छामि त्ति। चिन्तिऊण इमं चेव भणिओ विणयंधरो। भणियं च तेण। कुमार, को अन्नो उवायन्तु त्ति, ता अणुचिट्ठउ इणमेव कुमारो। अन्नं च-पयट्टं चेव [2]वहणं सुवण्णभूमिं, अज्जेव रयणीए मुच्चिस्सइ त्ति। तेणेव सुवण्णभूमिगमणेण अणुग्गहेउ मं कुमारो। मए भणियं। जं वो रोयइ त्ति ॥

कुमारः, कि मया पापकर्मणा कर्तव्यमिति। मया भणितम्-भद्र ! आदेशकारी त्वम् , पापकर्माऽहम् , ततः संपादय राजशासनम्। किं मया दुष्टशीलेन जीवता। तेन भणितम्-मैवमादिशतु कुमारः, किमनेनासंबद्धप्रलापेन वचनविन्यासेन, यथाऽहं दुष्टशीलः पापकर्मा, धन्यस्त्वम् , भाजनं सकलकल्याणानाम् , आलयः सकलगुणरत्नानाम् , कल्पतरुभूतः सकलसत्त्वानाम् , कि बहुना ? निर्वृतिदानकल्पस्त्रैलोक्यस्यापि। ततो यदि न विज्ञपयितव्यमेतत् देवस्य, रक्षितव्या सा राजदुष्टपत्नी, ततश्चिन्तयात्रोपायम् , यथा भवतः प्राणधारणानन्दितमना देवस्यानपराधी भवामीति। ततो मया चिंतितम्-न व्यापादयत्येषः, अव्यापादयंश्च एवमपराधितां न प्राप्नोति, यदि अलक्षितः परिजनेन वसुभूतिद्वितीयो विप्रकृष्टदेशान्तरमुपगच्छामीति। चिन्तयित्वा इदमेव भणितो विनयन्धरः। भणितं च तेन-कुमार ! कोऽन्य उपायश्च इति, ततोऽनुतिष्ठत्विदमेव कुमारः। अन्यच्च-प्रवृत्तमेव वहनं सुवर्णभूमिम् , अद्यैव रजन्यां मोक्ष्यते इति। तेनैव सुवर्णभूमि-

---

१ -घणकप्पो ख। २ पवहणं क।

एत्थन्तरंमि समागओ संझासमओ। निग्गओ अहं वसुभूइविणयंधरसमेओ तामलित्तीओ, गओ वेलाउलं। समप्पिया अम्हे विणयंधरेण सबहुमाणं वहणसामिणो समुद्ददत्तस्स, पडिच्छिया तेण। अइकन्ता थेववेला। समुग्गओ कामिणीगण्डपण्डुरो चन्दो, समागया संखुद्धजलयरनिनायगब्भिणा समुद्दवेला। समारूढो य अहयं वसुभूइदुईओ जाणवत्तं। चलणेसु निवडिऊण 'कुमार, न मे कुप्पियव्वं' ति भणिऊण बाहोल्ललोयणो [1]नियत्तो विणयंधरो। कयाइं मङ्गलाइं, उवउत्तो [2]कण्णहारो, आपूरियं जाणवत्तं, पयट्टं पवणवेगेण। एत्थन्तरंमि वसुभूइणा भणियं। भो वयंस, किमेयं ति। तओ मए साहिओ अणङ्गवइवुत्तन्तो। तेण भणियं। अह किं पुण जहट्ठियं चेव न निवेइयं महारायस्स। मए भणियं। वयंस, अणङ्गवइपीडाभएणं ति।

पत्ता अम्हे दुमासमेत्तेण कालेण सुवण्णभूमिं, ओइण्णा पवहणाओ। गया सिरिउरं नाम नयरं। दिट्ठो य तत्थ सेयवियावत्थ-

गमनेनानुगृह्णातु मां कुमारः। मया भणितम्-यद् वो रोचते इति॥

अत्रान्तरे समागतः सन्ध्यासमयः। निर्गतोऽहं वसुभूतिविनयन्धरसमेतः ताम्रलिप्तीतः, गतो वेलाकुलम्। समर्पितावावां विनयन्धरेण सबहुमानं वहनस्वामिनः समुद्रदत्तस्य। प्रतीष्टौ तेन। अतिक्रान्ता स्तोकवेला। समुद्गतः कामिनीगण्डपाण्डुरश्चन्द्रः, समागता संक्षुब्धजलचरनिनादगर्भिता समुद्रवेला। समारूढश्चाहं वसुभूतिद्वितीयो यानपात्रम्। चरणयोर्निपत्य 'कुमार! न मे कुपितव्यम्' इति भणित्वा बाष्पार्द्रलोचनो निवृत्तो विनयन्धरः। कृतानि मङ्गलानि, उपयुक्तः कर्णधारः, आपूरितं यानपात्रम्, प्रवृत्तं पवनवेगेन। अत्रान्तरे वसुभूतिना भणितम्-भो वयस्य! किमेतदिति। ततो मया कथितोऽनङ्गवतीवृत्तान्तः। तेन भणितम्-अथ किं पुनर्यथास्थितमेव न निवेदितं महाराजाय। मया भणितम्-वयस्य! अनङ्गवतीपीडाभयेनेति।

---

१ विणियत्तो ख। २ कण्णधारो ख।

व्वओ समिद्धिदत्तसेट्ठिपुत्तो वाणिज्जसमागओ मणोरहदत्तो नाम बालवयंसओ त्ति, तेण वि य अम्हे। तओ असंभावणीया[1]गमणसंकेण निरूविया कंचि कालं, विहसियं च अम्हेहिं। तओ पच्चभिन्नाया अम्हे। पणमिऊण हरिसविसायगब्भिणं जपियं तेण। कुमार, अवि कुसलं महारायस्स। मए भणियं 'कुसलं'। नीया तेण सगिहं। कओ णे विभवपीइसरिसो उवयारो। भुत्तुत्तरकालंमि पुच्छिओ आगमणपओयणं। तायनिव्वेएण विणिग्गओ, सीहलेसरनियमाउलसमीवं गमिस्सामि' त्ति साहिऊण सबहुमाणं भणिओ य एसो। सीहलदीवगामिवहणोवलम्भे अवहिएण होयव्वं' ति। मणोरहदत्तेण भणियं। जं कुमारो आणवेइ॥ अइक्कन्तो कोइ कालो। पीइलङ्घिओ विओयभीरुत्तणेण न साहेइ णे उवलद्धं पि सीहलदीवगामियं वहणं। अन्नया य मुणिउण अम्हाणमूसूयत्तणं भणियमणेण। कुमार, किमवस्समासन्नमेव गन्तव्वं कुमारेण। मए भणियं। वयंस, पओयणं मे अत्थि त्ति। तेण भणियं। जइ एवं, ता खमियव्वं कुमारेण,

प्राप्तावावां द्विमासमात्रेण कालेन सुवर्णभूमिम्। अवतीर्णौ प्रवहणात्। गतौ श्रीपुरं नाम नगरम्। दृष्टश्च तत्र श्वेतविकावास्तव्यः समृद्धिदत्तश्रेष्ठिपुत्रो वाणिज्यसमागतो मनोरथदत्तो नाम बालवयस्य इति, तेनापि चावाम्। ततोऽसंभावनीयागमनशङ्केन निरूपितौ कञ्चित्कालम्, विहसितं चावाभ्याम्। ततः प्रत्यभिज्ञातावावाम्। प्रणम्य हर्षविषादगर्भितं जल्पितं तेन। कुमार! अपि कुशलं महाराजस्य। मया भणितं-कुशलम्। नीतौ तेन स्वगृहम्। कृतो नौ त्रिभवप्रीतिसदृश उपचारः। भुक्तोत्तरकाले पृष्ट आगमनप्रयोजनम्। 'तातनिर्वेदेन विनिर्गतः, सिंहलेश्वरनिजमातुलसमीपं गमिष्यामि' इति कथयित्वा सबहुमानं भणितश्चैषः। 'सिंहलद्वीपगामिवहनोपलम्भेऽवहितेन भवितव्यम्' इति। मनोरथदत्तेन भणितम्-यत्कुमार आज्ञापयति॥ अतिक्रान्तः कोऽपि कालः। प्रीतिलङ्घितो वियोगभीरुत्वेन न कथयति नौ उपलब्धमपि सिंहलद्वीपगामिकं वहनम्। अन्यदा च ज्ञात्वाऽऽवयोरुत्सुकत्वं भणितमनेन। कुमार! किमवश्यमासन्नमेव

---

[1] -गमणसंकिएण ख।

जं मए विओयभीरुत्तणेण एद्दहमेत्तं कालं कओ पओयणविघाओ त्ति; जओ पाएणमिओ पइदिणमेव वहणाइं सीहलद्दीवं गच्छन्ति। मए भणियं। वयंस, जइ एवं, ता अज्जेव गच्छम्ह। तेण भणियं, 'अविग्घं कुमारस्स'। उवलद्धं जाणवत्तं, पसाहियं करणिज्जं। उवणीओ य मे फुरन्तभासुरच्छाओ महापमाणो अच्चन्तसहिणरूवो पडओ। भणियं च तेण। कुमार, सकोउयं ति करिऊण गेण्हाहि एयं नयणमोहणाभिहाणं पडरयण ति। मए भणियं 'कीइसं कोउगं' ति। तेण भणियं। इमेण पच्छाइयसरीरो न दीसइ नयणेहिं पुरिसो त्ति। मए वि(जि)न्नासियं जाव तहेव त्ति। समुप्पन्नं च मे कोउयं। भणिओ मणोरदहत्तो। वयंस, कहं पुण तए एस पाविओ त्ति। तेण भणियं। सुण-

इहेवागयस्स समुप्पन्ना मे पीई आणन्दउरनिवासिणा सिद्धविज्जापओएण सिद्धसेणाभिहाणेणं सिद्धउत्तेण। भणिओ य सो मए। वयंस, को उण इह विज्जासाहणंमि परमत्थो; किं हवइ सच्चमेवेह दिव्वसंवाओ न व त्ति। तेण भणियं। जहुत्तयारिणो हवइ त्ति।

गन्तव्यं कुमारेण। मया भणितम्-वयस्य! प्रयोजनं मेऽस्तीति। तेन भणितम्-यद्येवं ततः क्षन्तव्यं कुमारेण, यन्मया वियोगभीरुत्वेन एतावन्मात्रं कालं कृतः प्रयोजनविघात इति, यतः प्रायेण इतः प्रतिदिवसमेव वहनानि सिंहलद्वीपं गच्छन्ति। मया भणितम्-वयस्य! यद्येवं ततोऽद्यैव गच्छावः। तेन भणितम्-'अविघ्नं कुमारस्य'। उपलब्धं यानपात्रम्, प्रसाधितं करणीयम्। उपनीतश्च मह्यं स्फुरद्भासुरच्छायो महाप्रमाणोऽत्यन्तश्लक्ष्णरूपः पटः। भणितं च तेन-कुमार! सकौतुकमिति कृत्वा गृहाणैतद् नयनमोहनाभिधानं पटरत्नमिति। मया भणितं-कीदृशं कौतुकमिति?। तेन भणितम्-अनेन प्रच्छादितशरीरो न दृश्यते नयनाभ्यां पुरुष इति। मया विन्यासितं (जिज्ञासितं) यावत्तथैवेति। समुत्पन्नं च मे कौतुकम्। भणितो मनोरथदत्तः। वयस्य! कथं पुनस्त्वया एष प्राप्त इति?। तेन भणितम्-शृणु।

इहैवागतस्य समुत्पन्ना मे प्रीतिरानन्दपुरवासिना सिद्धविद्याप्रयोगेण सिद्धसेनाभिधानेन सिद्धपुत्रेण। भणितश्च स मया। वयस्य!

मए भणियं। वयंस, महन्तं मे कोउय; ता दंसेहि मे दिव्वविलसियं ति। तेण भणियं थेवमियं, किं तु कायव्वं मण्डलं। मए भणियं 'करेउ वयंसो'। तेण भणियं। जइ एवं, ता संजत्तीकरेह सिद्धत्थसाइयं मण्डलोवगरणं। संपाइयं मए। तओ अत्थमिए दिणयरे वियम्भिए अन्धयारे रडन्तेसु निसायरेसु घेत्तूण मण्डलोवगरणं विणिग्गया अम्हे दुवे वि नयराओ त्ति। पत्ता य पे[1]यवणं। आलिहियमणेण तत्थेगदेसम्मि मण्डलं, समप्पियं च मे मण्डलग्गं, जालिओ जलणो। भणियं च तेण। वयंस, अप्पमत्तेण होयव्वं ति। पडिस्सुयं मए। पारद्धो तेण मन्तजावो। तओ थेववेलाए चेव दिट्ठा मए गरुयनियम्बवहणायासझीणमज्झा अहिणवुब्भिन्नकढिणथणविरायन्तवच्छत्थला संपुण्णमयलञ्छणमुही वियसियकन्दोट्टनयणसोहा सुरतरुकुसुममालाविहूसियं धम्मेल्लमुव्वहन्ती परिणयमहुयकुसुमवण्णा पवणधुयवसणपयडं ऊरुजुयलं ठएन्ती गयणयलाओ समोवयमाणा जक्खकन्नय त्ति। तओ मए चिन्तियं। अहो महापहावया मन्तस्स।

कः पुनरिह विद्यासाधने परमार्थः, किं भवति सत्यमेवेह दिव्यसंवादो नवेति। तेन भणितम्-यथोक्तकारिणो भवतीति। मया भणितम्-वयस्य! महद् मे कौतुकम्, ततो दर्शय मे दिव्यविलसितमिति। तेन भणितम्-स्तोकमिदम्, किन्तु कर्तव्यं मण्डलम्। मया भणितम्-'करोतु वयस्यः'। तेन भणितम्-यद्येवं ततः संयात्रीकुरु सिद्धार्थादिकं (सर्षपादि)मण्डलोपकरणम्। संपादितं मया। ततोऽस्तमिते दिनकरे विजृम्भितेऽन्धकारे रटत्सु निशाचरेषु (घूकादिषु) गृहीत्वा मण्डलोपकरणं विनिर्गतावावां द्वावपि नगरादिति। प्राप्तौ च प्रेतवनम्। आलिखितमनेन तत्रैकदेशे मण्डलम्, समर्पितं च मे मण्डलाग्रम्, ज्वालितो ज्वलनः। भणितं च तेन-वयस्य! अप्रमत्तेन भवितव्यमिति। प्रतिश्रुतं मया। प्रारब्धस्तेन मन्त्रजापः। ततः स्तोकवेलायामेव दृष्टा मया गुरुनितम्बवहनायासक्षीणमध्या अभिनवोद्भिन्नकठिनस्तनविराजद्वक्षःस्थला संपूर्णमृगलाञ्छनमुखी विकसित(कन्दोट्ट)नीलोत्पलनयनशोभा सुरतरुकुसुममालाविभूषितं धम्मि-

---

१ पिउवणं क।

तीए पणमिओ सिद्धसेणो, भणिओ य सबहुमाणं। भयवं, किं पुण मे सुमरणपओयणं ति। तेण भणियं। न किंचि अन्नं, अवि य दिव्वदंसणाणुराई मे पियवयसो। तओ तीए मं पुलोइऊण भणियं। भद्द, परितुट्ठा ते अहं इमेण दिव्वदंसणाणुराएण; ता किं ते पियं करेमि त्ति। मए भणियं। तुह दंसणाओ वि अवरं पियं ति। तीए भणियं। तहावि अमोहदंसणाओ देवयाओ; गेण्हाहि एयं नयणमोहणं पडरयणं ति। तओ मए ससंभमसंभासणजणिओवरोहेण पणमिऊण तीसे चलणजुयलं सबहुमाणं चेव गहियं इमं। गया जक्खकन्नया। पविट्ठा अम्हे पभायाए रयणीए नयरं। ता एवं पाविओ त्ति ॥

मए भणियं। सुन्दरा संपत्ती। गहिओ पडो। तओ आउच्छिऊण मणोरहदत्तपरियणं अहिणन्दिया तेण, सह मणोरहदत्तेण गया वेलाउलं। दिट्ठं च सुरविमाणागारमणुगरेन्तं विचित्तधयमालोवसोहियं जाणवत्तं। अब्भुट्ठिया जाणवत्तसामिणा ईसरदत्तेण। कओ

लमुद्वहन्ती परिणतमधूककुसुमवर्णा पवनधूतवसनप्रकटमूरुयुगलं स्थगयन्ती गगनतलात्समवपतन्ती यक्षकन्येति। ततो मया चिन्तितम्-अहो महाप्रभावता मन्त्रस्य। तया प्रणतः सिद्धसेनः, भणितश्च सबहुमानम्। भगवन्! किं पुनर्मे स्मरणप्रयोजनमिति?। तेन भणितम्-न किञ्चिदन्यत्, अपि च दिव्यदर्शनानुरागी मे प्रियवयस्यः। ततस्तया मां दृष्ट्वा भणितम्-भद्र! परितुष्टा तेऽहं दिव्यदर्शनानुरागेण, ततः किं ते प्रियं करोमीति। मया भणितम्-तव दर्शनादपि अपरं प्रियमिति?। तया भणितम्-तथाप्यमोघदर्शना देवताः, गृहाणैतद् नयनमोहनं पटरत्नमिति। ततो मया ससंभ्रमसंभाषणजनितोपरोधेन प्रणम्य तस्याश्चरणयुगलं सबहुमानमेव गृहीतमिदम्। गता यक्षकन्यका। प्रविष्टावावां प्रभातायां रजन्यां नगरम्। तत एवं प्राप्त इति। मया भणितम्-सुन्दरा संप्राप्तिः। गृहीतः पटः। तत आपृच्छ्य मनोरथदत्तपरिजनमभिनन्दितौ तेन, सह मनोरथदत्तेन गतौ वेलाकुलम्। दृष्टं च सुरविमानाकारमनुकुर्वद् विचित्रध्वजमालोपशोभितं यान-

पोण पणामो। उवणीयाइं आसणाइं। समप्पिया मणोरहदत्तेण। भणियं च तेण। सत्थवाहपुत्त, एए खु मम सामिणो वयसया बन्धवा जीविय, न केइ ते जे न हवन्ति त्ति; ता सुन्दरं दट्ठव्वा। तेण भणियं। वयंस, किमणेणं पुणरुत्तविण्णासेण; मज्झ वि इमे ईइसा चेव त्ति। तओ उवारूढा जाणवत्त, खित्तो बली समुद्दस्स, ऊसिओ सियवडो, दिन्नं दिसिसंमुह निज्जामएण पवहणं ति। पणमिऊण अम्हे ठिओ मणोरहदत्तो। पयट्टं जाणवत्तं। गम्मए सीहलदीवाहिमुहं ति। एवं गच्छमाणाण तेरसमे [2]दियहे उन्नओ अम्हाणमुवरि कालो व्व कालमेहो, जीवियासा विय फुरिया विज्जुलेहा, उम्मूलियगिरिकाणणो य आगम्पयन्तो जलनिहिं उक्खिवन्तो महन्तकल्लोले वियम्भिओ विसममारुओ, निवडियं असणिवरिसं, उम्मेण्ठमत्तहत्थी विय अणियमियगमणेणं अवसीहूयं जाणवत्तं, विसण्णा निज्जामया। तओ मए अवट्ठम्भं काऊण छिन्नाओ सियवडनिबन्धणाओ रज्जूओ, मउलिओ [3]सियवडो, विमुक्का नङ्गरा। तहावि य [4]गरुययाए भण्डस्स

पात्रम्। अभ्युत्थिता यानपात्रस्वामिनेश्वरदत्तेन। कृतस्तेन प्रणामः। उपनीतान्यासनानि। समर्पितौ मनोरथदत्तेन। भणितं च तेन—सार्थवाहपुत्र! एतौ खलु मम स्वामिनौ वयस्यौ बान्धवौ जीवितं, न कावपि तौ यौ न भवत इति, ततः सुन्दरं द्रष्टव्यौ। तेन भणितम्—वयस्य! किमनेन पुनरुक्तविन्यासेन, ममापीमौ ईदृशावेवेति। तत उपारूढौ यानपात्रम्, क्षिप्तो बलिः समुद्रस्य। उच्छ्रितः सितपटः। दत्तं दिक्संमुखं निर्यामकेन प्रवहणमिति। प्रणम्यावां स्थितो मनोरथदत्तः। प्रवृत्तं यानपात्रम्। गम्यते सिंहलद्वीपाभिमुखमिति। एवं गच्छतां त्रयोदशे दिवसे उन्नतोऽस्माकमुपरि काल इव कालमेघः, जीविताशेव स्फुरिता विद्युल्लेखा, उन्मूलितगिरिकाननश्चाकम्पयन् जलनिधिमुत्क्षिपन् महतः कल्लोलान् विजृम्भितो विषममारुतः, निपतितमशनिवर्षम्, उन्मिण्ठ(हस्तिपकोत्क्रान्त)मत्तहस्तीवानियमितगमनेनावशीभूतं यानपात्रम्। विषण्णा निर्यामकाः। ततो मयाऽवष्टम्भं कृत्वा छिन्नाः सितपटनिबन्धना रज्जवः, मुकुलितः सितपटः। विमुक्ता ना-

---

१ णे क। २ दिवसे क। ३ सीयवडो क। ४ गरुयाए ख।

संखुद्धयाए जलनिहिणो उक्कडयाए असणिवरिसस्स विसण्णयाए निज्जामयाणं विचित्तयाए कम्मपरिणामस्स विवन्नं जाणवत्तं । बन्धवा वि य कालपरियाएणं विउत्ता सव्वपाणिणो । समासाइयं मए फलयं[1] । तओ अहं आउयसेसयाए गमिऊण तिण्णि अहोरत्ते फलयदुइओ पत्तो तडसमीवं । अन्धयारलेहा विय दिट्ठा वणराई । समूससियं मे हियएग । उत्तिण्णो जलनिहीओ, निप्पीलियाइं पोत्ताइं । न तिन्तं[2] च निवसणगण्ठिसंठियं पडरयणं । अहो एयस्स सामत्थं ति जाओ मे विम्हओ । तओ गन्तूग थेवं भूमिभागं उवविट्ठो जम्बुपायवसमीवे । चिन्तियं च मए । एयाणि ताणि विहिणो जहिच्छियाविलसियाणि, एसा य सा कम्मुणो अचिन्तणीया सत्ती, जमेवमवि असद्दहणिज्जं अवत्थन्तरमणुहविऊण पाणे धारेमि । किं वा एगुदरनिवासिणा[3] विय वसुभूइणा विउत्तस्स पाणेहिं । अहवा विचित्ता कम्मपरिणई, न विसाइणा होयव्वं ति । दिवससिसिसमा संजोयविओया; कयाइ सो वि एवं चेव कहंचि पाणे धारेइ त्ति । तओ

ङ्गराः । तथाऽपि च गुरुकतया भाण्डस्य संक्षुब्धतया जलनिधेरुत्कटतयाऽशनिवर्षस्य विपण्णतया निर्यामकानां विचित्रतया कर्मपरिणामस्य विपन्नं यानपात्रम् । बान्धवा इव कालपर्यायेण वियुक्ताः सर्वप्राणिनः । समासादितं मया फलकम् । ततोऽहमायुःशेषतया गमयित्वा त्रीनहोरात्रान् फलकद्वितीयः प्राप्तः तटसमीपम् । अन्धकारलेखेव दृष्टा वनराजिः । समुच्छ्वसितं मे हृदयेन । उत्तीर्णो जलनिधितः, निष्पाडितानि पोतानि (वस्त्राणि) । न तिमितं (आर्द्रं) च निवसनग्रन्थिसंस्थितं पटरत्नम् । अहो एतस्य सामर्थ्यमिति जातो मे विस्मयः । ततो गत्वा स्तोकं भूमिभागमुपविष्टो जम्बूपादपसमीपे । चिन्तितं च मया–एतानि तानि विधेर्यथेच्छाविलसितानि, एषा च सा कर्मणोऽचिन्तनीया शक्तिः, यदेवमपि अश्रद्धानीयमवस्थान्तरमनुभूय प्राणान् धारयामि । किं वा एकोदरनिवासिनेव वसुभूतिना वियुक्तस्य प्राणैः । अथवा विचित्रा कर्मपरिणतिः, न विषादिना भवितव्यमिति । दिवसनिशासमौ संयोगवियोगौ, कदाचित् सोऽपि एवमेव कथञ्चित्प्राणान् धार-

---

१ फलहयं क । २ तिंमियं क । ३ –वासिणो क ।

खुहापिवासाभिभूओ उययफलनिमित्तं पयट्टो उत्तराहिमुहं। गओ थेवं भूमिं। दिट्ठा य फणस[1]कयलयसहयारसंछन्नकूला तीरतरुकुसुमरयरंजियजला गिरिनई। कया पाणवित्ती। चिट्ठमाणेण य सहयारपायवसमीवे गिरिनईपुलिणम्मि दिट्ठो पियाए चाडुयं करेमाणो सारसजुवाणओ। सुमरियं विलासवईए। जाया मे चिन्ता। अहो णु खलु एए अदिट्ठबन्धुविरहदुक्खा साहीणाहारपयारा अविन्नायजायणादीणभावा पासट्ठियपणइणीपसङ्गदुल्ललिया असञ्जायमहावसणभया सुहं जीवन्ति मियपक्खिणो। एवं चिन्तयन्तस्स अत्थगिरिसिहरमुवगओ सहस्सरस्सी, रयणुज्जोवो विय सीयलीहूओ आयवो। कयं मए विमलसिलायलम्मि पल्लवसयणिज्जं। सम्पाडियं सञ्झावस्सयं। उचियसमए कओ देवयागुरुपणामो। णुवन्नो वामपासेणं। अहिणन्दिओ कुसुमसुरहिणा मारुएणं। वहुदिवसखेयओ समागया मे निद्दा। अइक्कन्ता रयणी। विउद्धो नाणाविहविहंगमविरुयपाहाउएण। कओ देवयागुरुपणामो। पयट्टो काणणन्तराइं पुलो-

यतीति। ततः क्षुत्पिपासाभिभूत उदकफलनिमित्तं प्रवृत्त उत्तराभिमुखम्। गतः स्तोकां भूमिम्। दृष्टा च पनसकदलसहकारसंछन्नकूला तीरतरुकुसुमरजोरञ्जितजला गिरिनदी। कृता प्राणवृत्तिः। तिष्ठता च सहकारपादपसमीपे गिरिनदीपुलिने दृष्टः प्रियायाश्चाटुकं कुर्वन् सारसयुवा। स्मृतं च विलासवत्याः। जाता मे चिन्ता। अहो नु खल्वेते अदृष्टबन्धुविरहदुःखाः स्वाधीनाहारप्रचारा अविज्ञातयाचनादीनभावाः पार्श्वस्थितप्रणयिनीप्रसङ्गदुर्ललिता असंजातमहाव्यसनभयाः सुखं जीवन्ति मृगपक्षिणः। एवं चिन्तयतोऽस्तगिरिशिखरमुपगतः सहस्ररश्मिः, रत्नोद्योत इव शीतलीभूत आतपः। कृतं मया विमलशिलातले पल्लवशयनीयम्। संपादितं सन्ध्यावश्यकम्। उचितसमये कृतो देवतागुरुप्रणामः। निपन्नो (शयितः) वामपार्श्वेण। अभिनन्दितः कुसुमसुरभिना मारुतेन। बहुदिवसखेदतः समागता मे निद्रा। अतिक्रान्ता रजनी। विबुद्धो नानाविधविहङ्गमविरुतप्राभातिकेन। कृतो देवतागुरुप्रणामः। प्रवृत्तः काननान्तराणि द्रष्टुम्। पश्यंश्च

---

१ कयलिय ख, कयल क।

इउं । पेच्छमाणो य विचित्त काणणभाए पत्तो सुकुमारवालुयं अच्चन्तसोमदंसणं गिरिसरियापुलिणं । दिट्ठा य तत्थ सुपइट्ठियङ्गुलितला पसत्थलेहालङ्किया तक्खणुट्ठिया चेव पयपन्ती । निरूविया हरिसियमणेणं, विन्नाया य लहुयसुकुमारभावओ इत्थियाए इयं न [१]उण पुरिसस्स । लग्गो पयमग्गओ । दिट्ठा य नाइदूरंमि चेव सहिणवक्कलनिवसणा तवियकणयावदायदेहा हिययनिब्भच्छिएण विय चलणतललग्गेण राएण अविभावियसिरागुप्फसम्बाहेण मयणभवणतोरणेण विय जाणुजुयलेण रसणाकलावजोग्गेण विउलेणं नियम्बभाएणं बहुदिवसोववासखिन्नेण विय किसयरेणं मज्झेणं सज्जणचित्तगम्भीराए विय मयणरसकूवियाए नाहीए तवविणिज्जिएण विय मोहन्धयारेण पुणो हिययप्पवेसकामेणं रोमलयामग्गेण सुकयपरिणामेहि विय समुन्नएहिं पओहरेहिं अहिणवुग्गयरत्तासोयलयाविब्भमाहिं [२]बाहाहिं कम्बुपरिमण्डलाए सिरोहराए पाडलकुसुमसन्निहेणं अहरेणं अच्चन्तसच्छविमलाहिं कवोलवालीहिं हरिणवहूकयसंविभा-

विचित्रान् काननभागान् प्राप्तः सुकुमारवालुकमत्यन्तसौम्यदर्शनं गिरिसरित्पुलिनम् । दृष्टा च तत्र सुप्रतिष्ठिताङ्गुलितला प्रशस्तरेखाऽलंकृता तत्क्षणोत्थितैव पदपंक्तिः । निरूपिता हृषितमनसा, विज्ञाता च लघुकसुकुमारभावतः स्त्रिया इयं न पुनः पुरुषस्य । लग्नः पदमार्गतः । दृष्टा च नातिदूर एव श्लक्ष्णवल्कलनिवसना, तप्तकनकावदातदेहा हृदयनिर्भर्त्सितेनेव चरणतललग्नेन रागेण, अविभावितशिरागुल्फसंबाधेन मदनभवनतोरणेनेव जानुयुगलेन, रसनाकलापयोग्येन विपुलेन नितम्बभागेन, बहुदिवसोपवासखिन्नेनेव कृशतरेण मध्येन, सज्जनचित्तगम्भीरयेव मदनरसकूपिकया नाभ्या, तपोविनिर्जितेनेव मोहान्धकारेण पुनर्हृदयप्रवेशकामेन रोमलतामार्गेण सुकृतपरिणामाभ्यामिव समुन्नताभ्यां पयोधराभ्याम् , अभिनवोद्गतरक्ताशोकलताविभ्रमाभ्यां बाहुभ्याम् , कम्बुपरिमण्डलया शिरोधरया, पाट-

---

१ वुण क । २ वाहियाहिं क ।

एहि विय लोयणेहिं पमाणजुत्तेणं नासियावंसेणं दीहपम्हलाहिं आयड्ढियकोडण्डसन्निभाहिं भमुहाहिं सुसिणिद्धदंसणेणं [1]चन्दसन्निभेण निडालवट्टेणं पट्ठिदेससंठिएणं नियम्बसुकयरक्खणेण विय चक्खुस्सवाणुयारिणा कुडिलकेसकलावेण वामहत्थगहिय[2]छज्जिया दाहिणहत्थेण कुसुमावचयं करेन्ती तावसकन्नय त्ति। तं च दट्ठूण चिन्तियं मए। अहो वणवासदुक्खमणुहवन्तीए वि [3]लायण्णं। उवगन्तूणं च थेवभूमिभागं सविसेसं पुलइया लयाजालयन्तरेणं जाव मोत्तूण वणवासवेसं सव्वं चेव विलासवईए अणुगरेइ त्ति। तओ सुमरणपवणसन्धुक्किओ पज्जलिओ मे मणम्मि मयणाणलो। भरिया य तीए कुसुमाण छज्जिया। पयट्टा ताव वणाहिमुहं। तओ अहं [4]निगूहिऊण मयणवियारं निग्गओ [5]लयाजालयाओ, गओ तीए समीवं। पणमिऊण भणिया एसा। भयवइ, वड्ढउ ते तवोकम्मं। अहं खु पुरिसो सेयवियाए वत्थव्वओ तामलित्तीओ सीहलदीवं पयट्टो। अन्तराले विवन्नं मे जाणवत्तं। अओ एगा-

---

लाकुसुमसन्निभेन अधरेण, अत्यन्तस्वच्छविमलाभ्यां कपोलपालीभ्याम्, हरिणवधूकृतसंविभागाभ्यामिव लोचनाभ्याम्, प्रमाणयुक्तेन नासिकावंशेन, दीर्घपक्ष्मलाभ्यामाकृष्टकोदण्डसन्निभाभ्यां भ्रूभ्याम्, सुस्निग्धदर्शनेन चन्द्रसन्निभेन ललाटपट्टेन, पृष्ठदेशसंस्थितेन नितम्बसुकृतरक्षणेनेव चक्षुःश्रवानुकारिणा कुटिलकेशकलापेन, वामहस्तगृहीतछज्जिका(पुष्पकरण्डिका) दक्षिणहस्तेन कुसुमावचयं कुर्वती तापसकन्यकेति। तां च दृष्ट्वा चिन्तितं मया। अहो! वनवासदुःखमनुभवन्त्या अपि लावण्यम्। उपगत्य च स्तोकभूमिभागं सविशेषं दृष्टा लताजालकान्तरेण यावन्मुक्त्वा वनवासवेशं सर्वमेव विलासवत्या अनुकरोतीति। ततः स्मरणपवनसंधुक्षितः प्रज्वलितो मे मनसि मदनानलः। भृता च तया कुसुमैः :करण्डिका। प्रवृत्ता तावद् वनाभिमुखम्। ततोऽहं निगुह्य मदनविकारं निर्गतो लताजालकात्, गतस्तस्याः समीपम्। प्रणम्य भणितैषा। भगवति! वर्धतां ते तपःकर्म। अहं खलु पुरुषः श्वेतविकाया वास्तव्यः ताम-

---

१ दुइयाचन्द-क। २ छज्जिया (दे०) पुष्पभाजनम्, चंगेरीति भाषायाम्। ३ लायण्णं ऽहुरया क। ४ निगूहेऊण क। ५ लयाओ तामलित ख।

गी संवुत्तो। ता कहेउ भयवई, को पुण इमो पएसो, किं ताव जलनिहितडं, किं वा कोइ दीवो, कहिं वा तुम्हाणमासमपयं ति। तओ सा मं दट्ठूण निउञ्चियदिट्ठिपसरा दिसामण्डलं पुलोएमाणी मन्दवलियवितिरिच्छलोयणायामं ससज्झसा विय खणमेत्तं अहोमुही ठिया अदिन्नपडिवयणा पयट्टा तवोवणाहिमुहं। तओ ‘जुवई तावसी एगागिणी य, ता [1]किं इह इमीए: अन्नं कंचि पुच्छिस्सामि’ त्ति चिन्तिऊण नियत्तो अहं। पविट्ठो तं चेव सहावसुन्दरं लयागहणं। चिन्तियं च मए। पेच्छामि ताव, कहिं पुण एसा वच्चइ त्ति। पुलोइउं पयत्तो। दिट्ठा य सविसेसमन्थराए गईए वच्चमाणी। गया य थेवं भूमिभायं। मग्गओ पुलोइयं तीए। न दिट्ठो कोइ सत्तो। तओ मोत्तूण कुसुमछज्जियं परिहियं पि पुणो परिहियं वक्कलं, परामुट्ठो केसकलावो, मोडियाइं अङ्गाइं, उव्वेल्लियाओ बाहुलयाओ, पयट्टं वियम्भणं ति। तओ मए चिन्तियं। अह किं पुण इमं; अहवा किमणेण विरुद्धवत्थुविसएणं आलोचिएणं। गओ

लिप्सीतः सिंहलद्वीपं प्रवृत्तः। अन्तराले विपन्नं मे यानपात्रम्, अत एकाकी संवृत्तः। ततः कथयतु भगवती, कः पुनरयं प्रदेशः, किं तावज्जलनिधितटं किंवा कोऽपि द्वीपः, कुत्र वा युष्माकमाश्रमपदमिति ?। ततः सा मां दृष्ट्वा निकुञ्चितदृष्टिप्रसरा दिग्मण्डलं पश्यन्ती मन्दवलितवितिर्यग्लोचनायामं ससाध्वसेव क्षणमात्रमधोमुखी स्थिताऽदत्तप्रतिवचना प्रवृत्ता तपोवनाभिमुखम्। ततो ‘युवतिः तापसी एकाकिनी च ततः किमिह अनया, अन्यं कंचित् प्रक्ष्यामि’ इति चिन्तयित्वा निवृत्तोऽहम्। प्रविष्टस्तदेव स्वभावसुन्दरं लतागहनम्। चिन्तितं च मया-पश्यामि तावत्, कुत्र पुनरेषा व्रजतीति। द्रष्टुं प्रवृत्तः। दृष्टा च सविशेषमन्थरया गत्या व्रजन्ती। गता च स्तोकं भूमिभागम्। मार्गतः प्रलोकितं तया। न दृष्टः कोऽपि सत्त्वः। ततो मुक्त्वा कुसुमकरण्डिकां परिहितमपि पुनः परिहितं वल्कलम्, परामृष्टः केशकलापः, मोटितान्यङ्गानि, उद्वेल्लिते बाहुलते, प्रवृत्तं विजृम्भणमिति। ततो मया चिन्तितम्-अथ किं पुनरिदम्, अथवा

---

[1] किं इमीए ख।

गिरिनइं। कया पाणवित्ती। परिब्भमन्तस्स [1]काणणन्तरे अइक्कन्तो वासरो। पसुत्तो य पुव्वविहिणा। दिट्ठो य जाममेत्तावसेसाए विहावरीए सुमिणओ। उवणीया मे कञ्चणपायवासन्नसंठियस्स दिव्वइत्थियाए सव्विन्दियमणोहराए कुसुममाला। भणियं च तीए। कुमार, एसा खु दिव्वकुसुममाला पुव्वनिव्वत्तिया चेव मए कुमारस्स उवणीया; ता गेण्हउ कुमारो। गहिया य सा मए, विइण्णा कण्ठदेसे। एत्थन्तरंमि वियम्भिओ सारसरवो, विउद्धो अहयं परितुट्ठो चित्तेण। चिन्तियं मए। आसन्नकन्नयालाहफलसूयएणं ति होयव्वमणेणं, अणुकूलो खु सउणसंघाओ, अचिरफलदायगो खु एस सुमिणओ, अरण्णं च एयं; ता न याणामो कहं भविस्सइ त्ति। एत्थन्तरंमि फुरियं मे दाहिणभुयाए लोयणेण य। तओ मए चिन्तियं। न अन्नहा रिसिवयणं ति होयव्वमणेण। अणुकूलो सउणसंघाओ। न य मे विलासरायहाणिं विलासवइं वज्जिय अन्नकन्नालाहे वि बहुमाणो। भणियं च सुमिणयदेवयाए 'कुमार, एसा खु

किमनेन विरुद्धविषयेणालोचितेन। गतो गिरिनदीम्। कृता प्राणवृत्तिः। परिभ्रमतः काननान्तरेऽतिक्रान्तो वासरः। प्रसुप्तश्च पूर्वविधिना। दृष्टश्च याममात्रावशेषायां विभावर्यां स्वप्नः। उपनीता मे काञ्चनपादपासन्नसंस्थितस्य दिव्यस्त्रिया सर्वेन्द्रियमनोहरया कुसुममाला। भणितं च तया-कुमार! एषा खलु दिव्यकुसुममाला पूर्वनिर्वर्तिता एव मया कुमारस्योपनीता, ततो गृह्णातु कुमारः। गृहीता च सा मया, वितीर्णा कण्ठदेशे। अत्रान्तरे विजृम्भितः सारसरवः, विबुद्धोऽहं परितुष्टश्चित्तेन। चिन्तितं मया-आसन्नकन्यकालाभफलसूचकेन [इति] भवितव्यमनेन, अनुकूलः खलु शकुनसंघातः, अचिरफलदायकः खल्वेष स्वप्नः। अरण्यं चैतत्, ततो न जानीमो कथं भविष्यतीति। अत्रान्तरे स्फुरितं मे दक्षिणभुजया लोचनेन च। ततो मया चिन्तितम्-नान्यथा ऋषिवचनमिति भवितव्यमनेन। अनुकूलः शकुनसंघातः। न च मे विलासराजधानीं विलासवतीं वर्जित्वाऽन्यकन्यालाभेऽपि बहुमानः। भणितं च स्वप्नदेवतया-'कुमार! एषा खलु दिव्यकुसुम-

---

[1] काणणंतरेसु ख।

दिव्वकुसुममाला पुव्वनिव्वत्तिया चेव’। तो न अन्ना दिव्वकुसुममालाए उवमाणसंगया, न अन्नाए पुव्वपरिचओ त्ति विलासवइलाहेण चेव होयव्वं ति। अणुहरइ य सा तावसी विलासवईए। विचित्ताणि य विहिणो विलसियाइं। कयाइ सं[१] चेव होज्ज त्ति। अन्नहा कहं तावसी, कहं मयणवियारो। किं च–जइ वि सा विलासवई, तहावि पडिवन्नवयाए विरुद्धो विसयसङ्गो। अहवा संपत्तदंसणसुहस्स पिययमामग्गमणुगच्छमाणस्स वयधारणं पि मे सुन्दरं चेव। एवं च चिन्तयन्तस्स अइक्कन्ता रयणी, उग्गओ अंसुमाली, घडियाइं रयणिविरहपीडियाइं चक्कवायाइं। तओ अहं उक्कडयाए रायस्स रम्मयाए काणणाणं विलोहणिज्जयाए सुमिणयस्स गहिओ कामजरएण पयत्तो तं तावसिं गवेसिउं। वग्गभट्ठस्स विय हरिणयस्स जूहभट्ठस्स विय गइन्दस्स तंमि चेव काणणन्तरे भमन्तस्स महया परिकिलेसेणं अइक्कन्ता कइवि दियहा। दिट्ठो माहवीलयालिङ्गिओ सहयारो। उवविट्ठो तस्स समीवे। तं चेव मुद्धहरिणलोयणं चिन्तयन्तो चिट्ठामि जाव, सुओ मए सुक्कपत्ताणं मरमरारवो। वालिया सिरोहरा, वियारिया दिट्ठी। दिट्ठा य भूइनिम्मिएणं निडालपुण्ड-

माला पूर्वनिर्वर्तिता एव’। ततो नान्या दिव्यकुसुममालाया उपमानसंगता, न अन्यायाः पूर्वपरिचय इति विलासवतीलाभेनैव भवितव्यमिति। अनुहरति च सा तापसी विलासघत्याः। विचित्राणि च विघेर्विलसितानि, कदाचित् सैव भवेदिति। अन्यथा कथं तापसी, कथं मदनविकारः?। किंच यद्यपि सा विलासवती तथापि प्रतिपन्नव्रतया विरुद्धो विषयसंगः। अथवा संप्राप्तदर्शनसुखस्य प्रियतमामार्गमनुगच्छतो व्रतधारणमपि मे सुन्दरमेव। एवं च चिन्तयतोऽतिक्रान्ता रजनी, उद्गतोंऽशुमाली, घटिता रजनीविरहपीडिताश्चक्रवाकाः। ततोऽहमुत्कटतया रागस्य, रम्यतया काननानां विलोभनीयतया स्वप्नस्य गृहीतो कामज्वरेण प्रवृत्तस्तां तापसीं गवेषयितुम्। वर्गभ्रष्टस्येव हरिणस्य यूथभ्रष्टस्येव गजेन्द्रस्य तस्मिन्नेव काननान्तरे भ्रमतो महता परिक्लेशेनातिक्रान्ताः कत्यपि दिवसाः। दृष्टो माधवीलताऽऽ-

---

[१] सा चेव क।

एणं उड्ढबद्धेण जडाकलावेण पुत्तंजीवयमालालंकिएणं दाहिणकरेण वामहत्थगहियकमण्डलू महन्तवक्कलनिवसणा बहुदिवससंचियतवायासेण अट्ठिचम्मावसेसेणं सरीरएणं अइक्कन्तमज्झिमवयसा तावसि त्ति। तओ तं दट्ठूग गूहिओ मए मयणवियारो। पणमिया य सा। तओ विसेसेण मं पुलोइऊण ईसिबाहोल्ललोयणाए भणियं तीए 'रायपुत्त, चिरं जीवसु' त्ति। तओ मए चिन्तियं। कहं पुण एसा मं वियाणइ त्ति। अहवा विमलनाणनयणो चेव तवस्सियणो होइ; ता किं न याणइ त्ति। एत्थन्तरंमि पुणा भणियमिमीए। कुमार, [1]उवविसम्ह; अत्थि किंचि भणियव्वं तए सह। तओ मए 'जं भयवई आणवेइ' त्ति भणिऊण पमज्जियं धरणिवट्ठं। उवविट्ठा तावसी अहयं च। भणियं च तीए। कुमार, सुण।

अत्थि इहेव भारहे वासे वेयड्ढो नाम पव्वओ। तत्थ गन्धसमिद्धं नाम विज्जाहरपुरं। तत्थ सहस्सबलाभिहाणो राया होत्था,

लिङ्गितः सहकारः। उपविष्टस्तस्य समीपे। तामेव मुग्धहरिणलोचनां चिन्तयन् तिष्ठामि यावत्, श्रुतो मया शुष्कपत्राणां मर्मरारवः। वालिता शिरोधरा, वितारिता दृष्टिः। दृष्टा च भूतिनिर्मितेन ललाटपुण्ड्रकेन ऊर्ध्वबद्धेन जटाकलापेन पुत्रंजीवकमालाऽलंकृतेन दक्षिणकरेण वामहस्तगृहीतकमण्डलुर्महद्वल्कलनिवसना बहुदिवससंचिततपआयासेन अस्थिचर्मावशेषेण शरीरकेन अतिक्रान्तमध्यमवयाः तापसीति। तस्तां दृष्ट्वा गूढो मया मदनविकारः। प्रणता च सा। ततो विशेषेण मां दृष्ट्वा ईषद्बाष्पार्द्रलोचनया भणितं तया 'राजपुत्र! चिरं जीव' इति। ततो मया चिन्तितं-कथं पुनरेषा मां विजानातीति। अथवा विमलज्ञाननयन एव तपस्विजनो भवति, ततः किं न जानातीति। अत्रान्तरे पुनर्भणितमनया-कुमार! उपविशावः, अस्ति किंचिद् भणितव्यं त्वया सह। ततो मया 'यद् भगवत्याज्ञापयति' इति भणित्वा प्रमार्जितं धरणीपृष्ठम्। उपविष्टा तापसी अहं च। भणितं तया-कुमार! शृणु।

---

[1] उववविसह्म क।

सुप्पभा से भारिया, ताणं सुया अहं मयणमञ्जरी नाम। संपत्तजोव्वणा परिणीया विलासउरनयरसामिणो विज्जाहरनरिन्दस्स पुत्तेणं पवणगइणा। अइक्कन्तो य कोइ कालो विसयसुहमणुहवन्ताण। अन्नया य आगासजाणेणं गयाइं नन्दणवणं, पवत्ताइं कीलिउं विचित्तकीलाहिं, जाव अयण्डंमि चेव निवडिओ कणयसिलासणाओ पवणगई, अणाचिक्खियपओयणं च संमिल्लियं तेण विणिज्जियकन्दोट्टदलसोहं लोयणजुयं, पयम्पिया सिरोहरा, पव्वायं वयणकमलं। तओ असारयाए जीवलोयस्स पेच्छमाणीए चेव सो पञ्चत्तमुवगओ त्ति। तओ अहं अणाहा विय गहिया महासोएण, सोगाइरेयओ य सारसी विय अणिवारियं परिब्भमन्ती सहसा चेव निवडिया धरणिवट्ठे, लद्धचेयणा य उप्पइउमारद्धा जाव न पसरइ मे गई। तओ सुमरिया नहङ्गणगामिणी विज्जा, तहावि न पसरई त्ति। तओ मए चिन्तिय 'हा किमेयमवरं' ति जाव थेववेलाए समागओ तायबिइयहिययभूओ पडिवन्नतावसवओ देवाणन्दो नाम विज्जाहरो। भणियं

अस्ति इहैव भारते वर्षे वैताढ्यो नाम पर्वतः। तत्र गन्धसमृद्धं नाम विद्याधरपुरम्। तत्र सहस्रबलाभिधानो राजाऽभवत्। सुप्रभा तस्य भार्या। तयोः सुताऽहं मदनमञ्जरी नाम। संप्राप्तयौवना परिणीता विलासपुरनगरस्वामिनो विद्याधरनरेन्द्रस्य पुत्रेण पवनगतिना। अतिक्रान्तश्च कोऽपि कालो विषयसुखमनुभवतोः। अन्यदा चाकाशयानेन गतौ नन्दनवनम्। प्रवृत्तौ क्रीडीतुं विचित्रक्रीडाभिः, यावदकाण्डे एव निपतितः कनकशिलाऽऽसनात् पवनगतिः। अनाख्यातप्रयोजनं च संमिलितं तेन विनिर्जितकमलदलशोभं लोचनयुगम्, प्रकम्पिता शिरोधरा, म्लानं वदनकमलम्। ततोऽसारतया जीवलोकस्य प्रेक्षमाणायामेव स पञ्चत्वमुपगत इति। ततोऽहमनाथेव गृहीता महाशोकेन। शोकातिरेकतश्च सारसीव अनिवारितं परिभ्रमन्ती सहसैव निपतिता धरणीपृष्ठे। लब्धचेतना च उत्पतितुमारब्धा यावद् न प्रसरति मे गतिः। ततः स्मृता नभोऽङ्गणगामिनी विद्या, तथाऽपि न प्रसरतीति। ततो मया चिन्तितम्-'हा किमेतदपरम्' इति यावत् स्तोकवेलायां समागतः तातद्वितीयहृदयभूतः प्रतिपन्नतापसव्रतो देवानन्दो नाम विद्याधरः। भणितं च तेन-वत्से

च तेण । वच्छे मयणमञ्जरि, किमेयं ति । मए भणियं । भयवं, कयन्तविलसियं । तेण भणियं 'कहं विय' । मए भणियं । विवन्नो मे अज्जउत्तो, न पहवइ य नहगामिणी विज्जा । तओ बाहोल्ललोयणेण भणियं भयवया । वच्छे, अलं परिदेविएणं, ईइसो चेव एस संसारो । एयं च असारयं संसारस्स अद्धुवयं जीवलोयस्स खणभंगुरयं संगमाणं चञ्चलयं इन्दियाणं परिचिन्तिऊण पवज्जन्ति पाणिणो सयलतेलोक्कपरमत्थबन्धवं धम्मं । तओ मए 'एवमेयं'ति चिन्तिऊण भणिओ भयवं। करेहि मे अणुग्गहं वयपयाणेण । भयवया भणियं। वच्छे, जुत्तमेयं, अह किं पुण ते नहगमणविज्जाभंसकारणं । मए भणियं । भयवं, न याणामि । तओ नाणावलोएण निरूवियं भयवया, भणियं च तेण । वच्छे, सोयाभिभूयाए लङ्घियं सिद्धाययणकूडं, निवडियं च ते एयस्स चेव सिहरभाए कुसुमदामं, तन्निमित्तो ते विज्जाभंसो त्ति । मए भणियं । भयवं, अलमिहलोयमेत्तोवयारिणीहिं विज्जाहिं, करेहि मे अणुग्गहं वयपयाणेणं ति । तओ भयवया

मदनमञ्जरि ! किमेतदिति । मया भणितम्-भगवन् ! कृतान्तविलसितम् । तेन भणितम्-'कथमिव' । मया भणितम्-विपन्नो मे आर्यपुत्रः, न प्रभवति च नभोगामिनी विद्या । ततो बाष्पार्द्रलोचनेन भणितं भगवता । वत्से ! अलं परिदेवितेन, ईदृश एवैष संसारः । एतां चासारतां संसारस्य अध्रुवतां जीवलोकस्य, क्षणभङ्गुरतां संगमानां चञ्चलतामिन्द्रियाणां परिचिन्त्य प्रपद्यन्ते प्राणिनः सकलत्रैलोक्यपरमार्थबान्धवं धर्मम् । ततो मया 'एवमेतद्' इति चिन्तयित्वा भणितो भगवान् । कुरु मेऽनुग्रहं व्रतप्रदानेन । भगवता भणितम्-वत्से युक्तमेतद्", अथ किं पुनस्ते नभोगमनविद्याभ्रंशकारणम् ? । मया भणितम्-भगवन् ! न जानामि । ततो ज्ञानावलोकेन निरूपितं भगवता, भणितं च तेन। वत्से ! शोकाभिभूतया लङ्घितं सिद्धायतनकूटम् , निपतितं च ते एतस्यैव शिखरभागे कुसुमदाम, तन्निमित्तस्ते विद्याभ्रंश इति। मया भणितम्-भगवन् ! अलमिहलोकमात्रोपकारिणीभिर्विद्याभिः, कुरु मेऽनुग्रहं व्रतप्रदानेनेति । ततो भगवता

पुच्छिऊण तायं संसिऊण नियममायारं तवप्पभावेण आणिऊण तावसीणमुचियमुवगरणं [2]एत्थ चेव दीवंमि दिक्खिय म्हि भयवया। अइक्कन्तो कोइ कालो। अन्नया य कुसुम[1]सामिहेयनिमित्त गया समुद्दतीरं। दिट्ठा य तत्थ जलहिजलकल्लोलनोल्लिया मियङ्कलेहा विय देहप्पहाए समुज्जोवयन्ती तमुद्देसं फलहयदुइया कन्नय त्ति ॥ एयं सोऊण, भो कुमार, वियम्भिओ मे पमोओ। चिन्तियं च मए। दीसइ मणोरहपायवस्स कुसुमुग्गमो ॥ तावसीए भणियं। तओ अहं गया तमुद्देसं, दिट्ठा य लायण्णसब्भावाओ 'जीवइ' त्ति गम्ममाणा कन्नय त्ति। अब्भुक्खिया कमण्डलुपाणिएणं, उम्मिल्लियं तीए लोयणजुयं, भणिया य सा मए। वच्छे धीरा होहि। तावसी खु अहं। तओ बाहजलभरियलोयणं पणमिया तीए। ससंभमं च उवविसिऊण खिज्जियं चित्तेणं, लक्खिओ से भावो। तओ मए चिन्तियं। अहो से महाणुभावया; भवियव्वमिमीए महाकुलपसूयाए त्ति। उवणीयाइं च से फलाइं। अणिच्छमाणी वि य कराविया

पृष्ट्वा तातं शंसित्वा निजमाचारं तपःप्रभावेण आनीय तापसीनामुचितमुपकरणमत्रैव द्वीपे दीक्षिताऽस्मि भगवता। अतिक्रान्तः कोऽपि कालः। अन्यदा च कुसुमसामिधेयनिमित्तं गता समुद्रतीरम्। दृष्टा च तत्र जलधिजलकल्लोलनोदिता (प्रेरिता) मृगाङ्कलेखेव देहप्रभया समुद्द्योतयन्ती तमुद्देशं फलकद्वितीया कन्यकेति। एतच्छ्रुत्वा भोः कुमार! विजृम्भितो मे प्रमोदः। चिन्तितं च मया–दृश्यते मनोरथपादपस्य कुसुमोद्गमः ॥ तापस्या भणितम्–ततोऽहं गता तमुद्देशम्, दृष्टा च लावण्यसद्भावाद् 'जीवति' इति गम्यमाना कन्यकेति। अभ्युक्षिता कमण्डलुपानीयेन, उन्मीलितं तया लोचनयुगम्, भणिता च सा मया। वत्से! धीरा भव, तापसी खल्वहम्। ततो बाष्पजलभृतलोचनं प्रणता तया। ससंभ्रमं चोपविश्य खिन्नं चित्तेन, लक्षितस्तस्या भावः। ततो मया चिन्तितम्–अहो तस्या महानुभावता,

---

१ सामिधेयं–समिधां–काष्ठानां समूहः। २ एयं से य दीवोवगंठं ख

पाणवित्तिं । नीया आसमपदं, दंसिया कुलवइणो, पणमिओ तीए भयवं, अहिणन्दिया य भगवया । कयं आवस्सयं, पुच्छिया य सा मए । वच्छे,कुओ तुमं । तीए भणियं । भयवइ, तामलित्तीओ । मए भणियं । का उण तुमं,कहिं वा पट्ठिय त्ति । तओ दीहदीहं नीससिय न जंपियमिमीए । तओ मए चिन्तियं । महाकुलपसूया खु एसा; ता कहमेवमत्ताणं पयासेइ; ता किं एइणा;कुलवइं पुच्छिस्सामि त्ति । अइक्कन्तो वासरो । कयं सञ्झासमओचियमणुट्ठाणं । गयाहं कुलवइसयासं । पणमिऊण पुच्छिओ भयवं कुलवई । भयवं, का उण एसा कन्नया, कहं वा इमं ईइसमवत्थन्तरं पत्ता, कीइसो वा [१]से विवाओ भविस्सइ त्ति । तओ दाऊणमुवओगं वियाणिऊण तवप्पहावेणं भणियं भयवया । सुण । तामलित्तीसामिणो ईसाणचन्दस्स धूया खु एसा भत्तारसिणेह[२]पराहीणयाए इमं ईइसं अवत्थन्तरं पत्त त्ति । मए भणियं । भयवं, किन्न एसा कन्नय त्ति । भयवया भणियं । कन्नया दव्वओ, न उण भावओ त्ति । मए भणियं 'कहं विय' । भय-

भवितव्यमनया महाकुलप्रसूतयेति । उपनीतानि तस्याः फलानि । अनीच्छन्त्यपि च कारिता प्राणवृत्तिम् । नीताऽऽश्रमपदम् , दर्शिता कुलपतये, प्रणतस्तया भगवान् , अभिनन्दिता च भगवता । कृतमावश्यकम् , पृष्टा च सा मया । वत्से ! कुतस्त्वम् ? । तया भणितम्-भगवति ! ताम्रलिप्तीतः । मया भणितम्-का पुनस्त्वम् , कुत्र वा प्रस्थितेति ? । ततो दीर्घदीर्घं निःश्वस्य न जल्पितमनया । ततो मया चिन्तितम्-महाकुलप्रसूता खल्वेषा, ततः कथमेवमात्मानं प्रकाशयति ? ततः किमेतेन, कुलपतिं प्रक्ष्यामीति । अतिक्रान्तो वासरः । कृतं सन्ध्यासमयोचितमनुष्ठानम् । गताऽहं कुलपतिसकाशम् ! प्रणम्य पृष्टो भगवान् कुलपतिः । भगवन् ! का पुनरेषा कन्यका, कथं वेदमीदृशमवस्थान्तरं प्राप्ता, कीदृशो वा तस्या विपाको भविष्यतीति । ततो दत्त्वोपयोगं विज्ञाय तपःप्रभावेण भणितं भगवता । श्रृणु–ताम्रलिप्तीस्वामिन ईशानचन्द्रस्य दुहिता खल्वेषा भर्तृस्नेहपराधीनतया इदमीदृशमवस्थान्तरं प्राप्तेति । मया भणितम्-भगवन् ! किन्न

---

[१] एयाए क । [२] परायत्तयाए क ।

वया भणियं। सुण। दिट्ठो इमीए मयणमहूसवम्मि तीए चेव नयरीए सेयवियाहिवस्स जसवम्मणो पुत्तो सणंकुमारो नाम। [*मोयाविया णेण तक्करा। ते य कहञ्चि दिट्ठिं वञ्चाविऊण वावाइया से ताएणमायण्णियं वयणमणेण। तओ निग्गच्छिऊण तायञ्जाओ कोवेणमागओ तामलित्तिं। पडिच्छिओ सबहुमाणं ईसाणचन्देण। तओ वसन्तसमए] कीलानिमित्तं अणङ्गणन्दणं उज्जाणं गच्छमाणो दिट्ठो इमीए, समुप्पन्नो य से तम्मि अणुराओ। पडिवन्नो तीए एस भत्ता मणोरहेहिं न उण परिणीय त्ति। अइक्कन्तेसु कइवयदिणेसु जणरवाओ वियाणियमिमीए, जहा सो वावाइओ त्ति। तओ तन्नेहमोहियमणा 'अहं पि खु तम्मि चेव पिउवणे पञ्चत्तमुवगयं पि तं पेच्छिऊण पाणे परिच्चयामि' त्ति चिन्तिऊण अड्ढरत्तसमए पसुत्ते परियणे एगागिणी चेव निग्गया रायगेहाओ। ओइण्णा रायमग्गं, गहिया तक्करेहिं, गेण्हिऊण आहरणयं विक्कीया बब्बरकूलगामिणो अयलसत्थवाहस्स हत्थे। पयट्टाविया तेण निययकूलं। विवन्नं च

एषा कन्यकेति? भगवता भणितम्-कन्यका द्रव्यतो न पुनर्भावत इति। मया भणितम्-'कथमिव'?। भगवता भणितम्-शृणु। दृष्टोऽनया मदनमधूत्सवे तस्यामेव नगर्यां श्वेतविकाधिपस्य यशोवर्मणः पुत्रः सनत्कुमारो नाम। [मोचिता अनेन तस्कराः। ते च कथञ्चिद् दृष्टिं वञ्चयित्वा व्यापादितास्तस्य तातेन, आकर्णितं वचनमनेन। ततो निर्गत्य तातार्यात् कोपेनागतो तामलिप्तीम्। प्रतीष्टः सबहुमानमीशानचन्द्रेण। ततो वसन्तसमये] क्रीडानिमित्तमनङ्गनन्दनमुद्यानं गच्छन् दृष्टोऽनया, समुत्पन्नश्च तस्यास्तस्मिन्ननुरागः। प्रतिपन्नश्च तया एष भर्ता मनोरथैर्न पुनः परिणीतेति। अतिक्रान्तेषु कतिपयदिनेषु जनरवाद् विज्ञातमनया, यथा स व्यापादित इति। ततः तत्स्नेहमोहितमनाः 'अहमपि खलु तस्मिन्नेव पितृवने पञ्चत्वमुपगतमपि तं (भर्तारं) प्रेक्ष्य प्राणान् परित्यजामि' इति चिन्तयित्वाऽधरात्रसमये प्रसुप्ते परिजने एकाकिन्येव निर्गता राजगेहात्। अवतीर्णा राजमार्गम्। गृहीता तस्करैः। गृहीत्वाऽऽभरणं विक्रीता बर्बरकुलगामिनो-

---

* अयं कोष्ठान्तर्गतः पाठः कपुस्तकप्रान्तभागे एव।

तं जाणवत्तं, समासाइयं [1]च इमीए फलहयं। तओ तिरत्तेण पत्ता इमं [2]कूलं अवत्थं च। विवाओ उण, पाविऊण भत्तारं भुञ्जिऊण भोए परलोयसाहणेणं सफलं चेव माणुसत्तणं करिस्सइ त्ति ॥ मए भणियं। भयवं, किन्न वावाइओ से हिययवल्लहो। भयवया भणियं आमं ति। मए चिन्तियं 'सोहणं संजायं' ति। अइक्कन्ता सा रयणी। बिइयदियहंमि य भणिया मए सा। रायपुत्ति, परिच्चय विसायं अवलम्बेहि धिइं ईइसो एस संसारो। एत्थ खलु सुमिणयसंपत्तितुल्लाओ रिद्धीओ, अमिलाणकुसुममिव खणमेत्तरमणीयं जोव्वणं, [3]विज्जुविलसियं पिव दिट्ठनट्ठाइं सुहाइं, अणिच्चा पियजणसमागम त्ति। तीए भणियं। भयवइ, एवमेयं; ता करेहि मे पसायं वयप्पयाणेणं। मए भणियं। रायपुत्ति, अलं [4]तव वयगहणेणं। दुन्निवारणीओ पढमजोव्वणत्थस्स पाणिणो मयणबाणपसरो। पुच्छिओ य मए दिव्वनाणसूरो तुज्झ वुत्तन्तं सव्वं चेव भयवं कुलवई। साहिओ य तेण सेयवियाहिवसुयदंसणाइओ। ता मा संतप्प, भविस्सइ

ऽचलसार्थवाहस्य हस्ते। प्रवर्तिता तेन निजकूलम्। विपन्नं च तद् यानपात्रम्। समासादितं चानया फलकम्। ततस्त्रिरात्रेण प्राप्तेदं कूलमवस्थां च। विपाकः पुनः प्राप्य भर्तारं भुक्त्वा भोगान् परलोकसाधनेन सफलमेव मानुषत्वं करिष्यतीति। मया भणितम्-भगवन्! किं न व्यापादितस्तस्या वल्लभः?। भगवता भणितम्-आममिति। मया चिन्तितम्-'शोभनं संजातम्' इति। अतिक्रान्ता सा रजनी। द्वितीयदिवसे च भणिता मया सा। राजपुत्रि! परित्यज विषादम्, अवलम्बस्व धृतिम्, ईदृश एष संसारः। अत्र खलु स्वप्नसंपत्तितुल्या ऋद्धयः, अम्लानकुसुममिव क्षणमात्ररमणीयं यौवनम्, वि द्विलसितमिव दृष्टनष्टानि सुखानि, अनित्याः प्रियजनसमागमा इति। तया भणितम्-भगवति! एवमेतद्, ततः कुरु मे प्रसादं व्रतप्रदानेन। मया भणितम्-राजपुत्रि! अलं तव व्रतग्रहणेन। दुर्निवारणीयः प्रथमयौवनस्थस्य प्राणिनो मदनबाणप्रसरः। पृष्टश्च मया दिव्यज्ञानसूरस्तव वृत्तान्तं सर्वमेव भगवान् कुलपतिः। कथितश्च

---

१ चिमीए क। २ कूलं ईदसं (ईदिसिं) अव-क। ३ -विलसियाइं पिव क। ४ ताव क।

तुह तेण समागमो, जीवइ खु सो दीहाउओ त्ति। तओ परिओसविम्हयसणाहं अच्चन्तसोहणमणाचिक्खणीयं अवत्थन्तरमुवगच्छिऊण संकप्पओ असन्तं पि ओयारिऊण दिन्नं मम कडयजुयलं, पणामिओ य हारलयानिमित्तं सिरोहराए हत्थो, असंपत्तीए य तस्स समागयं से चित्तं, विलिया य एसा। तओ मए भणियं। रायपुत्ति, अलं संभमेणं, उचिया खु तुमं ईइसस्स तुट्ठिदाणस्स। ता अलं [1]तव वयगहणेणं ति। तओ 'जं तुमं आणवेसि' त्ति पडिस्सुयं तीए। तावसकन्नओचिएणं च विहिणा अइक्कन्तो कोइ कालो। अन्नया गओ य णे भयवं कुलवई धम्मभाउयदंसणत्थं सिद्धपव्वयं ति। जाव इओ अईयकइवयदिणमि गन्तूण एसा कुसुमसामिहेयस्स अइक्कन्ताए उचियवेलाए मग्गओ पुलोएमाणी अणुफुसियकवोलतललग्गवाहजललवा सेयसलिलधोय[2]गत्ता खीरोयमहणतक्खणुट्ठिया विय सिरी अरइपरिगया आगया आसमपयं। तओ मए पुच्छिया 'रायपुत्ति, किमेयं' ति। तीए भणियं। अज्ज मए बन्धवाणं सुमरियं।

तेन श्वेतविकाधिपसुतदर्शनादिकः। ततो मा संतप्यस्व, भविष्यति तव तेन समागमः, जीवति खलु स दीर्घायुष्क इति। ततः परितोषविस्मयसनाथमत्यन्तशोभनमनाख्येयमवस्थान्तरमुपगत्य संकल्पतोऽसदपि अवतार्य दत्तं मह्यं कटकयुगलम्, अर्पितश्च हारलतानिमित्तं शिरोधरायां हस्तः। असंप्राप्त्या च तस्य समागतं तस्याश्चित्तम्. व्यलीका चैषा। ततो मया भणितम्–राजपुत्रि! अलं संभ्रमेण, उचिता खलु त्वमीदृशस्य तुष्टिदानस्य। ततोऽलं तव व्रतग्रहणेनेति। ततो 'यत् त्वमाज्ञापयसि' इति प्रतिश्रुतं तया। तापसकन्योचितेन च विधिनाऽतिक्रान्तः कोऽपि कालः। अन्यदा गतश्च अस्माकं भगवान् कुलपतिर्धर्मभ्रातृदर्शनार्थं सिद्धपर्वतमिति। यावदितोऽतीतकतिपयदिने गत्वैषा कुसुमसामिधेयाय (कुसुम–काष्ठसमूहाय) अतिक्रान्तायामुचितवेलायां मार्गतः पश्यन्ती अनुप्रोञ्छितकपोलतललग्नबाष्पजललवा स्वेदसलिलधौतगात्रा क्षीरोदमथनतत्क्षणादुत्थितेव श्रीरिवारतिपरिगताऽऽगताऽऽश्रमपदम्। ततो मया पृष्टा

---

१ ताव् क। २ –गंडा ख।

मए भणियं। परिच्चय विसायं, जाव कुलवई आगच्छइ; तओ सो बन्धवाणं [1]नेइस्सइ त्ति। पडिस्सुयं तीए। जाव तओ चेव दिवसाओ आरब्भ मन्दायरा देवयापूयाए अणुज्जुत्ता अतिहिबहुमाणे न करेइ कुसुमोच्चयं, न पणमइ हुयासणं, आलिहइ विज्जाहरमिहुणाइं, पुलोएइ सारस[2]जुयलाइं, करेइ मणोहवस्स वि मणोरहे जोव्वणवियारे, नियभत्तारगयइत्थियाणुरायपहाणपोराणियकहासुं च उव्वहइ परिओसं। तओ मए चिन्तियं। अहो से वयविसेसेण [3]उवागयं जोव्वणं, जोव्वणेणं मओ, मएण मयणो, मयणेणं विलासा, विलासेहिं सव्वहा न सुलहं निव्वियारं जोव्वणं ति। अवि य

न य अत्थि [4]नवि य होही पाएणं तिहुयणंमि सो जीवो। जो जोव्वणमणुपत्तो वियाररहिओ सया होइ॥

बिइयदियहमि य नागवल्लीलयालिङ्गियं [5]पूयपायवमवलोइऊण तयासन्नं च सहयरि[6]चडुयम्मकारयं रायहंसं विहुणियकरपल्लवं

'राजपुत्रि! किमेतद्' इति। तया भणितम्-अद्य मया बान्धवानां स्मृतम्। मया भणितम्-परित्यज विषादम्, यावत्कुलपतिरागच्छति, ततः स बान्धवान् नेष्यतीति। प्रतिश्रुतं तया। यावत् तत एव दिवसादारभ्य मन्दादरा देवतापूजायामनुद्युक्ताऽतिथिबहुमाने न करोति कुसुमोच्चयम्, न प्रणमति हुताशनम्, आलिखति विद्याधरमिथुनानि, पश्यति सारसयुगलानि, करोति मनोभवस्यापि मनोरथान् यौवनविकारान्, निजभर्तृगतस्त्र्यनुरागप्रधानपौराणिककथासु च उद्वहति परितोषम्। ततो मया चिन्तितम्-अहो अस्या वयोविशेषेणोपागतं यौवनम्, यौवनेन मदः, मदेन मदनः, मदनेन विलासाः, विलासैः सर्वथा न सुलभं निर्विकारं यौवनमिति। अपि च

न चास्ति नापि च भविष्यति प्रायेण त्रिभुवने स जीवः। यो यौवनमनुप्राप्तो विकाररहितः सदा भवति॥

द्वितीयदिवसे च नागवल्लीलताऽऽलिङ्गितं पूगपादपमवलोक्य तदासन्नं च सहचरीचाटुकर्मकारकं राजहंसं विधूतकरपल्लवं बाष्पा-

---

[1] नइस्सइ क। [2] -जुयलं ख। [3] उवगयं क। [4] न इव क। [5] चूयपायव- ख, असोयपायव- क। [6] चाडुयम्मगारयं क।

बाहोल्ललोयणा [1]नीससिऊण दीहदीहं निग्गया तवोवणाओ। तओ मए चिन्तियं। न सोहणो से आगारो। ता पेच्छामि ताव कहिं एसा वच्चइ त्ति। जाव य गेण्हिऊण छज्जियं गया कुसुमोच्चयभूमिं, तरलतारयं च पयत्ता पुलोइउं। तओ मए चिन्तियं। किं पुण एसा पुलोएइ त्ति। जाव पुलोएमाणी य गया असोयवीहियं। कयलिवणन्तरिया य ठिया से अहं मग्गओ। परुण्णा य सा। भणियं च तीए। भयवईओ वणदेवयाओ, एसो खु सो पएसो, जहिं अज्जउत्तेण तावसि त्ति कलिऊण सविणयं पणमिय म्हि, भणिया य। भयवइ, वड्ढउ ते तवोकम्मं. अहं खु पुरिसो सेयवियावत्थव्वओ तामलित्तीओ सीहलदीवं पयट्टो। अन्तराले विवन्नं जाणवत्तं, अओ एगाई संवुत्तो। ता कहेउ भयवई, को पुण इमो पएसो; किं ताव जलनिहितडं, किं वा कोइ दीवो; कहिं वा तुम्हाणमासमपयं ति। मए पुण ससज्झसहिययाए न दिन्नं पडिवयणं [2]वामयाए सहावेण उक्कडयाए मयणस्स न तिण्णं मए जंपिउं। गया थेवं भूमिभायं। काऊण धीरयं पुलोएमाणीए न उवलद्धो य पिट्ठओ। ता न याणामि, किं उप्पेक्खेमि[3] तं दीहाउयं, आउ हिययाओ मे विणिग्गओ, आउ

र्द्रलोचना निःश्वस्य दीर्घदीर्घं निर्गता तपोवनात्। ततो मया चिन्तितम्–न शोभनस्तस्या आकारः। ततः पश्यामि तावत् कुत्रैषा व्रजतीति। यावच्च गृहीत्वा पुष्पकरण्डिकां गता कुसुमोच्चयभूमिम्, तरलतारकं च प्रवृत्ता द्रष्टुम्। ततो मया चिन्तितम्–किं पुनरेषा पश्यतीति? यावत् पश्यन्ती च गताऽशोकवीथिकाम्। कदलीवनान्तरिता च स्थिता तस्या अहं मार्गतः। प्ररुदिता च सा। भणितं च तया–भगवत्यो वनदेवताः! एष खलु स प्रदेशः, यत्र आर्यपुत्रेण तापसीति कलयित्वा सविनयं प्रणताऽस्मि, भणिता च। भगवति! वर्धतां ते तपःकर्म, अहं खलु पुरुषः श्वेतविकावास्तव्यः तामलिप्तीतः सिंहलद्वीपं प्रवृत्तः। अन्तराले विपन्नं यानपात्रम्, अत एकाकी संवृत्तः। ततः कथयतु भगवती, कः पुनरयं प्रदेशः, किं तावज्जलनिधितटम्, किं वा कोऽपि द्वीपः, कुत्र वा युष्माकमाश्रमपदमिति। मया पुनः ससा-

---

१ नीससिय क। २ वामयास– क ३ किं मए उप्पविक्खयमेयं,।

पलोहेइ मं अज्जउत्तवेसेण कोइ अमाणुसो, आउ सच्चयं चेव अज्जउत्तो त्ति। सव्वहा जं होउ तं होउ। न सक्कुणोमि पुणो[1] पज्जलियमयणाणला अज्जउत्तविरहदुक्खं विसहिउं। ता एयाए अइमुत्तयलयाए उब्बन्धिऊण वावाएमि अत्ताणयं। अप्पमत्ता होज्जह सरीरे अज्जउत्तस्स, साहेज्जह य एयं वुत्तन्तं जणणिनिव्विसेसाए अयारणवच्छलाए भयवईए। अहं पुण लज्जापराहीणयाए न सक्कुणोमि आचिक्खिउं ति। भणिऊणमारूढा वम्मीयसीहरं[2], निबद्धो लयापासओ। तओ मए चिन्तियं। नत्थि दुक्करं मयणस्स। कओ तीए गुरुदेवयाणं पणामो, दिन्नो पासओ सिरोहराए, पवत्ता मेल्लिउं अप्पाणयं। एत्थन्तरंमि परित्तायह त्ति भणन्ती गया अहं तीए पासं। अवणीओ से पासओ, भणिया य सा। रायउत्ति, जुत्तं[3] णु इमं लोयन्तरपयट्टाए वि अणापुच्छणं जणणितुल्लाए य मे पओयणाकहणं ति। तओ हद्धी[4] सव्वं चेव एयाए आयण्णियं ति लज्जावणयवयणाए जंपियं तीए। भयवइ, न तए कुप्पियव्वं; लज्जा[5] य मे अवरज्झइ।

ध्वसहृदयया न दत्तं प्रतिवचनम्, वामतया स्वभावेन उत्कटतया मदनस्य न शक्तं मया जल्पितुम्। गता स्तोकं भूमिभागम्। कृत्वा धीरतां पश्यन्त्या च नोपलब्धश्च पृष्ठतः। ततो न जानामि-किमुपेक्षे तं दीर्घायुष्कम्, अथवा हृदयान्मे विनिर्गतः, अथवा प्रलोभयति मामार्यपुत्रवेशेण कोऽप्यमानुषः, अथवा सत्यमेवार्यपुत्र इति। सर्वथा यद् भवतु तद् भवतु। न शक्नोमि पुनः प्रज्वलितमदनानलाऽऽर्यपुत्रविरहदुःखं विसोढुम्। तत एतयाऽतिमुक्तलतया उद्बध्य व्यापादयाम्यात्मानम्। अप्रमत्ता भवेः शरीरे आर्यपुत्रस्य, कथयतं चैतं वृत्तान्तं जननीनिर्विशेषाया अकारणवत्सलाया भगवत्याः। अहं पुनर्लज्जापराधीनतया न शक्नोम्याख्यातुमिति। भणित्वाऽऽरूढा वल्मीकशिखरम्, निबद्धो लतापाशः। ततो मया चिन्तितम्-नास्ति दुष्करं मदनस्य। कृतस्तया गुरुदेवताभ्यः प्रणामः, दत्तः पाशः शिरोधरायाम्, प्रवृत्ता क्षेप्तुमात्मानम्। अत्रान्तरे परित्रायध्वमिति भणन्ती गताऽहं तस्याः पार्श्वम्। अपनीतस्तस्याः पाशः। भणिता च सा-राजपुत्रि! युक्तं न्विदं लोका-

---

[1] पुणो वि ख। [2] -सिहरंमि ख। [3] जुत्तमिमं क, जुत्तमिणं ख। [4] अहद्धी क। [5] लज्जा मे ख।

तओ मए भणियं। रायउत्ति, अलं कोवासंकाए, न कोवणो तवस्सिजणो होइ। साहेहि ताव, किं तए एत्थ अउव्वो कोइ अइही दिट्ठो त्ति। तीए भणियं। सुयं चेव भयवईए। मए भणियं। रायउत्ति, धीरा होहि; अमोहवयणो खु भयवं कुलवई। ता अवस्समासन्नं ते पियं भविस्सइ। ता एहि ताव, गच्छम्ह आसमपयं। तओ 'जं भयवई आणवेइ' त्ति पडिसुयं तीए। गयाओ अम्हे आसमपयं। पेसिया य मए तुज्झ अण्णेसणनिमित्तं मुणिकुमारया। अप्पमत्ता य पोराणियकहाविणोएण ठिया अहं रायउत्तिसमीवे। निवेइयं च मे मुणिकुमारएहिं 'न अम्हेहिं दिट्ठो' त्ति। तओ अहं रायउत्तिसमीवे निउञ्जिय सयलपरियणं 'न अन्नो से जीविओवाओ' त्ति विचिन्तिऊण एगागिणी चेव तुज्झ अन्नेसणनिमित्तं इह आगय म्हि। दंसिओ य मे तुमं अवस्सकज्जविणिओगदक्खाए भवियव्वयाए। ता एहि, गच्छम्ह आसमपयं; जीवावेहि तं कण्ठगयपाणं अबन्धवं कन्नयं ति।

न्तरप्रवृत्तयाऽपि अनापृच्छनं जननीतुल्यायाश्च मे प्रयोजनाकथनमिति। ततो हा धिक्, सर्वमेव एतयाऽऽकर्णितमिति लज्जावनतवदनया जल्पितं तया। भगवति! न त्वया कुपितव्यम्, लज्जा च मेऽपराध्यति। ततो मया भणितम्-राजपुत्रि! अलं कोपाशङ्कया, न कोपनः तपस्विजनो भवति। कथय तावत् किं त्वयाऽत्र अपूर्वः कोऽपि अतिथिर्दृष्ट इति?। तया भणितम्-श्रुतमेव भगवत्या। मया भणितम्-राजपुत्रि! धीरा भव, अमोघवचनः खलु भगवान् कुलपतिः। ततोऽवश्यमासन्नं ते प्रियं भविष्यति। तत एहि तावत्, गच्छाव आश्रमपदम्। ततो 'यद् भगवती आज्ञापयति' इति प्रतिश्रुतं तया। गते आवामाश्रमपदम्। प्रेषिताश्च मया तवान्वेषणनिमित्तं मुनिकुमारकाः। अप्रमत्ता च पौराणिककथाविनोदेन स्थिताऽहं राजपुत्रीसमीपे। निवेदितं च मे मुनिकुमारकैः 'नास्माभिर्दृष्टः' इति। ततोऽहं राजपुत्रीसमीपे नियुज्य सकलपरिजनं 'नान्यस्तस्या जीवितोपायः' इति विचिन्त्य एकाकिन्येव तवान्वेषणनिमित्तमिहागताऽस्मि। दर्शितश्च मे त्वमवश्यकार्यविनियोगदक्षया भवितव्यतया। तत एहि, गच्छाव आश्रमपदम्, जीवय तां कण्ठगतप्राणामबान्धवां कन्यकामिति।

तओ मए भणियं 'जं भयवई आणवेइ' त्ति। गयाइं तवोवणं। पविट्ठा पढमं चेव तावसी, पच्छा य मुणिकुमारयाहूओ अहय ति। उवणीयं मे आसणं। दिट्ठा य मुणालियावलयहारमुव्वहन्ती नलिणिदलसत्थरगया विलासवई। सा य मं दट्ठूण [1]विलिया मोत्तूण सत्थरं अब्भन्तरं गया। उवविट्ठो य अहयं, संपाइओ अग्घो तीए वयंसियाहिं तावसकुमारियाहिं। तावसीसमाएसेणं च घेत्तूण चलणसोयं संठवेन्ती उत्तरिज्जं पुलोएमाणी वलियकन्धरं दिसामुहाइं समागया विलासवई। सोचिया चलणा॥ एत्थन्तरंमि ठिओ गगणमज्झयारी दिणयरो, जाओ य सनिओयतप्परो मुणिजणो, उवणीयाइं फणसमाइयाइं फलाइं, कया पाणवित्ती। आगया य तावसी। भणियं च तीए। रायपुत्त, त[2]एजारिसाणं आसमपयमागयाणं कन्दफलमेत्ता[3]हाराण पाणवित्ती। वक्कलनिवसणो य तावसजणो, ता किं करेउ अतिहिसक्कारं। तं एसा विलासवई मम जीवियाओ वि वल्लहयरा पुव्वसंपाडिया चेव विहिणा पुणो मे संपाडिय

ततो मया भणितम्-'यद् भगवत्याज्ञापयति' इति। गतौ तपोवनम्। प्रविष्टा प्रथममेव तापसी, पश्चाच्च मुनिकुमारकाहूतोऽहमिति। उपनीत च मे आसनम्। दृष्टा च मृणालिकावलयहारमुद्वहन्ती नलिनीदलस्रस्तरगता विलासवती। सा च मां दृष्ट्वा व्यलीका मुक्त्वा स्रस्तरमभ्यन्तरं गता। उपविष्टश्चाहम्, संपादितोऽर्घस्तस्या वयस्याभिः तापसकुमारिकाभिः। तापसीसमादेशेन च गृहीत्वा चरणशौचं संस्थापयन्ती उत्तरीयं पश्यन्ती वलितकन्धरं दिङ्मुखानि समागता विलासवती। शौचितौ चरणौ। अत्रान्तरे स्थितो गगनमध्यचारी दिनकर, जातश्च स्वनियोगतत्परो निजनः। उपनीतानि पनसादिकानि फलानि, कृता प्राणवृत्तिः। आगता च तापसी। भणितं च तया -राजपुत्र! त्वत्सदृशानामाश्रमपदमागतानां कन्दफलमात्राहाराणां प्राणवृत्तिः, वल्कलनिवसनश्च तापसजनः, ततः किं करोत्वतिथिसत्कारम्। तदेषा विलासवती मम जीवितादपि वल्लभतरा पूर्वसंपादितैव विधिना पुनर्मया संपादितेति। भणित्वा वल्कलान्तपिहितानना रोदितुं प्र-

---

१ -विलियविलिया क्ष। २ तएरिसाणं क। ३ -हारपाण-ख।

त्ति। भणिऊण वक्कलन्तपिहियाणणा रोविउं पयत्ता[1]। तओ मए भणियं। भयवइ, विइयसंसारसहावा चेव तुमं; ता किमेयं ति[2]। उवणीयं च से तावसकुमारियाए सविणयं वयणसोयणसलिलं। सोचिंय तीए वयणं, वक्कलन्तेण[3]मवमज्जिऊण उट्ठिया आसणाओ। सयमेव होममण्डवे होमकुण्डंमि चेव मङ्गलं ति कलिय पज्जालिओ हुयवहो। निययाहरणभूसिया समप्पिया मे विलासवई। गहिया य सा मए पढमं हियएणं पच्छा करयलेणं। भमियाइं मण्डलाइं। पणमिया भयवई। तस्समाएसेणं च गयाइं अम्हे तवोवणासन्नं चेव सुन्दरवणं[4] नाम उज्जाणं। तं पुण समवाओ विय उऊणं निवासो विय गन्धरिद्धीए कुलहरं विय वणस्सईणं आययणं विय मयरद्धयस्स। तत्थ वि य कप्पूररससिच्चमाणमालईगुम्मवेढियं पविट्ठा एलालयापिणद्धं हरिचन्दणगहणं। तत्थ य महुयररुयगीयसणाहं मन्दमलयाणिलवसनच्चिरीओ पियङ्गुमञ्जरीओ अन्ने[5] य अउव्वविब्भमे लोयणसुहए तरुगणे पेच्छमाणाणमइक्कन्तो वासरो। विरइयं पल्लवसयणिज्जं।

वृत्ता। ततो मया भणितम्-भगवति! विदितसंसारस्वभावा एव त्वम्, ततः किमेतदिति। उपनीतं च तस्यै तापसकुमारिकया सविनयं वदनशोचन(शुचिकरण)सलिलम्। शोचितं (शुचीकृतं) तया वदनम्, वल्कलान्तेनावमार्ज्य उत्थिताऽऽसनात्। स्वयमेव होममण्डपे होमकुण्डे एव मङ्गलमिति कलयित्वा प्रज्वालितो हुतवहः। निजकाभरणभूषिता समर्पिता मे विलासवती। गृहीता च सा मया प्रथमं हृदयेन पश्चात्करतलेन। भ्रमितानि मण्डलानि। प्रणता भगवती। तत्समादेशेन च गतावावां तपोवनासन्नमेव सुन्दरवनं नामोद्यानम्। तत् पुनः समवाय इव ऋतूनां निवास इव गन्धऋद्ध्याः कुलगृहमिव वनस्पतीनामायतनमिव मकरध्वजस्य। तत्रापि च कर्पूररससिच्यमानमालतागुल्मवेष्टितं प्रविष्टौ एलालतापिनद्धं हरिचन्दनगहनम्। तत्र च मधुकररुतगीतसनाथं मन्दमलयानिलवशानृत्यन्तीः प्रियङ्गुमञ्जरीरन्यां-

---

१ पवत्ता ख। २ उवणीयं ति क। ३ मुहं म। ४ वणं उज्जाणं क। ५ अणेय- ग।

पसुत्ताइं च अम्हे। समुप्पन्नो वीसम्भो। अइक्कन्ता रयणी। एवमणुदियहं चिट्ठन्ताणं अइक्कन्तेसु य कइवयदिणेसु उवगयाइं अम्हे कुसुमसामिहेयस्स। गहियाइं मए फलाइं। विलासवई [1]पुण पवणवसपकम्पियाहिं सोउमल्ललोहेण विय परामुसिज्जमाणी वणलयाहिं उब्भिन्नकलियानियरेहिं च रोमञ्चिएहि विय पुलोइज्जमाणी तरुवरेहिं कुसुमगन्धलोहिल्लयाए य उवरि निवडमाणेणं भमरजालेण समत्तपओयणा वि अक्खित्तहियया 'एहि गच्छामो' त्ति मए भणिया वि न विरमए कुसुमोच्चयस्स। तओ मए चिन्तियं 'नयणमोहणपडपाउरणेण विप्पलम्भेमि एयं' ति समीवसंठिएणं चेव अपेच्छमाणीए पाउओ पडो। पुलोइयं च तीए, न दिट्ठो अहं। [2]तओ असंभवेण गमणवियप्पस्स 'हा अज्जउत्त' त्ति भणमाणी निवडिया धरणिवट्ठे। तओ मए 'हा किमेयमणुचिट्ठियं' ति चिन्तिऊण मोत्तूण तं पडं कुमुयालयाभिहाणाओ विहङ्ग[3]गणकुलहराओ घेत्तूण भिसिणीपत्तं सीविऊण निच्छिद्दं पुडयं तं [4]सलिलपुण्णं करिय समागओ

श्चापूर्वविभ्रमान् लोचनसुखदान् तरुगणान् प्रेक्षमाणयोरतिक्रान्तो वासरः। विरचितं पल्लवशयनीयम्। प्रसुप्तौ चावाम्। समुत्पन्नो विश्रम्भः। अतिक्रान्ता रजनी। एवमनुदिवसं तिष्ठतोरतिक्रान्तेषु च कतिपयदिवसेषु उपगतावावां कुसुमसामिधेयाय (कुसुम-काष्ठसमूहाय)। गृहीतानि मया फलानि। विलासवती पुनः पवनवशप्रकम्पिताभिः सौकुमार्यलोभेनेव परामृश्यमाना वनलताभिरुद्भिन्नकलिकानिकरैश्च रोमाञ्चितैरिव प्रलोक्यमाना तरुवरैः कुसुमगन्धलोभितया चोपरि निपतता भ्रमरजालेन समाप्तप्रयोजनाऽप्याक्षिप्तहृदया 'एहि गच्छावः' इति मया भणिताऽपि न विरमति कुसुमोच्चयात्। ततो मया चिन्तितम्-'नयनमोहनपटप्रावरणेन विप्रलम्भयामि एताम्' इति समीपस्थितेनैव अप्रेक्षमाणायां प्रावृतः पटः। प्रलोकितं च तया, न दृष्टोऽहम्। ततोऽसम्भवेन गमनविकल्पस्य 'हा आर्यपुत्र'! इति भणन्ती निपतिता धरणीपृष्ठे। ततो मया 'हा किमेतदनुष्ठितम्' इति चिन्तयित्वा मुक्त्वा तं पटं कुमुदालयाभिधानाद् विहंगगणकुलगृहाद् (सरसः) गृहीत्वा

---

१ वुण क। २ तओ य संभमेण क। ३ –विहंगगमण–ख। ४ सलिलं पुण घेत्तूणमागओ ख।

हुलियं । [1]परिसित्ता य जलेण समासासिया एसा । भणियं च तीए 'अज्जउत्त, किमेयं' त्ति । मए भणियं 'किं तयं' । तीए भणियं । एण्हिं चेव न दिट्ठो मए तुमं ति, [2]एण्हिं चेव दिट्ठो, ता किमेयं ति । मए भणियं 'न याणामो' त्ति । तीए भणियं । हा कहं न याणासि । समुप्पन्नं मे सज्झसं, ता साहेहि परमत्थं ति । तओ मए 'कायराणि इत्थियाहिययाणि, मा अन्नहा संभावइस्सइ' त्ति चिंतिऊण साहिओ पडरयणवुत्तन्तो । विन्नासिओ य तीए, उवलद्धपच्चयाए य गहिओ पडो ॥

एवं च वड्ढमाणाणुरायाण अइक्कन्तो कोइ कालो । जाया य मे चिन्ता 'गच्छामो सएसं' । साहियं विलासवईए । भणियं च तीए । अज्जउत्त, जं वो रोयइ त्ति । पुच्छिया तावसी । अणुमयं तीए । कओ भिन्नपोयद्धओ । गया क[3]इवि दियहा । एत्थन्तरंमि समागया गालवाहियाए निज्जामया । दिट्ठा य ते मए । भणियं च तेहिं । भो महापुरिस, महाकडाहत्रासिणा साणुदेवसत्थवाहेण मलयविसयप-

---

विसिनीपत्रं स्यूत्वा निश्छिद्रपुटकं तं सलिलपूर्णं कृत्वा समागतः शीघ्रम् । परिषिक्ता च जलेन समाश्वासितैषा । भणितं च तया 'आर्यपुत्र ! किमेतद्' इति । मया भणितम्–'किं तद्' । तया भणितम्–इदानीमेव न दृष्टो मया त्वमिति, इदानीमेव दृष्टः, ततः किमेतदिति । मया भणितम्–'न जानीमः' इति । तया भणितम्–हा कथं न जानासि ? समुत्पन्नं मे साध्वसम् , ततः कथय परमार्थमिति । ततो मया 'कातराणि स्त्रीहृदयानि, माऽन्यथा संभावयिष्यति' इति चिन्तयित्वा कथितः पटरत्नवृत्तान्तः । विन्यासितश्च तया, उपलब्धप्रत्ययया च गृहीतः पटः ।

एवं च वर्धमानानुरागयोरतिक्रान्तः कोऽपि कालः । जाता च मे चिन्ता 'गच्छावः स्वदेशम्' । कथितं विलासवत्यै । भणितं च तया–आर्यपुत्र ! यद् वो रोचते इति । पृष्टा तापसी । अनुमतं तया । कृतः भिन्नपोतध्वजः । गता कत्यपि दिवसाः । अत्रान्तरे समागता लघु-

---

[1] सित्ता पाणिएणं ख । [2] एण्हिं दिट्ठो तुमं ख । [3] कइवय- ख ।

त्थिएणं दट्ठूण भिन्नपोयद्धयं पेसिया अम्हे। ता एहि गच्छम्ह। तओ मए भणियं। भद्दा, [1]जायादुइओ अहं। तेहिं भणियं। न दोसो सो, सा वि पयट्टउ त्ति। तओ आपुच्छिऊण तावसजणं अणुगम्ममाणो य तेणं गओ जलनिहितडं। पणमिऊण तावसे [1]जायादुइओ आरूढो गालवाहियं। पत्तो य जाणवत्तं बहुमन्निओ य सत्थवाहपुत्तेण। तओ मए 'इत्थियासहावओ घोरयाए महोयहिस्स [2]पढममिलियाए वि[3]ब्भमेण मा से पमाओ पडरयणम्मि भविस्सइ' त्ति चिन्तिऊण गहियं पडरयणमप्पणा। अइक्कन्ता कइवि वासरा। अन्नया य जामावसेसाए रयणीए पासवणनिमित्तं उट्ठिओ अहं सत्थवाहपुत्तो य। एत्थन्तरंमि चिन्तियं सत्थवाहपुत्तेण। इमं ईइसं इत्थियारयणं, सव्वावराहच्छाइणी य सव्वरी; दुल्लहो य ईइसो अवसरो। ता घत्तिऊण महोयहिंमि एयं अङ्गीकरेमि मयणमञ्जूसं इत्थीरयणं ति संपाडेमि जहासमीहियं। हियए ववत्थाविय भणियं च तेण 'ठायसु तुमं' ति। ठिओ अहं जाणवत्तणिज्जूहए, पेल्लिओ य तेण

नौकाया निर्यामकाः। दृष्टाश्च ते मया। भणितं च तैः। भो महापुरुष! महाकटाहवासिना सानुदेवसार्थवाहेन मलयविषयप्रस्थितेन दृष्ट्वा भिन्नपोतध्वजं प्रेषिता वयम्। तत एहि, गच्छामः। ततो मया भणितम्—भद्रा! जायाद्वितीयोऽहम्। तैर्भणितम्—न दोषः सः, साऽपि प्रवर्ततामिति। तत आपृच्छ्य तापसजनमनुगम्यमानश्च तेन गतो जलनिधितटम्। प्रणम्य तापसान् जायाद्वितीय आरूढो लघुनावम्। प्राप्तश्च यानपात्रं बहुमानितश्च सार्थवाहपुत्रेण। ततो मया 'स्त्रीस्वभावतो घोरतया महोदधेः प्रथममिलिताया विभ्रमेण मा तस्याः प्रमादः पटरत्ने भविष्यति' इति चिन्तयित्वा गृहीतं पटरत्नमात्मना। अतिक्रान्ताः कत्यपि वासराः। अन्यदा च यामावशेषायां रजन्यां प्रस्रवणनिमित्तमुत्थितोऽहं सार्थवाहपुत्रश्च। अत्रान्तरे चिन्तितं सार्थवाहपुत्रेण। इदमीदृशं स्त्रीरत्नम्, सर्वापराधच्छादनी च शर्वरी, दुर्लभश्च ईदृशोऽवसरः। ततः क्षिप्त्वा महोदधावेतमङ्गीकरोमि मदनमञ्जूषां स्त्रीरत्नमिति संपादयामि यथासमीहितम्। हृदये व्यवस्थाप्य

---

१ जायादुतीओ ख। २ पढममुणियाइ ख। ३ मा से विब्भमेण न पडरयणं भविस्सइ क। ४ समीहियं ति। संपहारिऊण हियए भणियं तेण क।

निवडिओ संसारविसाले सायरे। समासाइयं च पुव्वभिन्नबोहित्थसन्तियं फलहयं[1]। लङ्घिओ जीवियसेसयाए पञ्चरत्तेणं जलनिही। पत्तो मलयकूलं, उत्तिण्णो जलनिहीओ। चिन्तियं मए। अह किं पुण सत्थवाहपुत्तस्स मम वावायणपओयणं। नूणं विलासवइलोहो। ता मूढो खु सो वाणियओ अणभिन्नो विलासवइचित्तस्स। न खलु सा मम विओए पाणे धारेइ, विन्नायं पडयसंभमेण। विणा य तीए किं कज्जं मे निप्फलेण पाणसंधारणेणं। ता वावाएमि अत्ताणयं ति। चिन्तिऊण निज्झाइयाओ दिसाओ, दिट्ठो य नाइदूरंमि चेव थलसंठिओ नीवपायवो। तओ निव्वावेमि[2] पिययमाविरहसंतावियं एत्थ उक्कलंबणेण अप्पाणयं ति चिन्तिऊण पयट्टो नीवपायवसमीवं। दिट्ठ च नाइदूरंमि चेव तीरतरुसण्डमण्डियं वियसियकमलसङ्घायसंछाइयमज्झभायं हसन्तं विय कुमुयगणेहिं पुलोयन्तं विय कसणुप्पलविलासेहिं रुयन्तं विय चक्कवायकूइएहिं गायन्तं विय मुइयमहुयररुएहिं नच्चमाणं विय हल्लन्तवीइहत्थेहिं कमलरयपिञ्जरजलं महासरं।

भणितं च तेन 'तिष्ठ त्वम्' इति। स्थितोऽहं यानपात्रनिर्यूहके, प्रेरितश्च तेन निपतितः संसारविशाले सागरे। समासादितं च पूर्वभिन्नबोहित्थसत्कं फलकम्। लङ्घितो जीवितशेषतया पञ्चरात्रेण जलनिधिः। प्राप्तो मलयकूलम्, उत्तीर्णो जलनिधितः। चिन्तितं मया। अथ किं पुनः सार्थवाहपुत्रस्य मम व्यापादनप्रयोजनम्?। नूनं विलासवतीलोभः। ततो मूढः खलु स वाणिजकोऽनभिज्ञो विलासवतीचित्तस्य। न खलु सा मम वियोगे प्राणान् धारयति। विज्ञातं पटसंभ्रमेण। विना च तया किं कार्यं मे निष्फलेन प्राणसंधारणेन। ततो व्यापयाद्याम्यात्मानमिति। चिन्तयित्वा निध्याता (अवलोकिता) दिशः। दृष्टश्च नातिदूरे एव स्थलसंस्थितो नीपपादपः। ततो निर्वापयामि प्रियतमाविरहसंतापितमत्रोत्कलम्बनेनात्मानमिति चिन्तयित्वा प्रवृत्तो नीपपादपसमीपम्। दृष्टं च नातिदूरे एव तीरतरुषण्डमण्डितं विकसितकमलसंघातसंछादितमध्यभागं हसदिव कुमुदगणैः, विलोकयदिव कृष्णोत्पलविलासैरुदिव चक्रवाककूजितैर्गायदिव मुदि-

---

[1] फलयं क। [2] वावाएमि पिययमाविरहसंतावियं अप्पाणयं ख।

दिट्ठो य तत्थ एक्को कलहंसो कहवि पिययमारहिओ। पियदइयारहिओ पुण इमेहि लिंगेहि विन्नाओ ॥
अवलोएइ दसदिसिं एगागी तरलतारयं खिन्नो। कलुणं च कूजिऊणं खणमेत्त निच्चलो ठाइ ॥
पिययमसरिसं हंसिं दट्ठूणं हरिसिओ समल्लियइ। मुणिऊण य अन्नं तं नियत्तए नवर सविसायं ॥
मरणावेसियचित्तो पज्जलियं हुयवहं व कमलवणं। [1]पइसइ मुणालखण्डं विसं व सो पेच्छए [2]पुरओ ॥
विहुणइ पवणायम्पियकमलरउक्खुडियपिञ्जरच्छायं। विरहाणलपज्जलियं व मणहरं पेहुणकलावं ॥
मिउपवणपहल्लावियतलिणतरंगुच्छलन्तसिसिरेहिं। सिच्चन्तो मुच्छिज्जइ विवसो जलसीयरेहिं पि ॥
वीइज्जन्तो य पुणो नलिणीपत्तेहि चेयणं लहइ। दट्ठूण [3]नियं छायं जलम्मि परिओसमुव्वहइ ॥

मधुकररुतैर्नृत्यदिव कम्पमानवीचिहस्तैः कमलरजःपिञ्जरजलं महासरः।
दृष्टश्च तत्रैकः कलहंसः कथमपि प्रियतमाविरहितः। प्रियदयितारहितः पुनरेभिर्लिङ्गैर्विज्ञातः ॥
अवलोकयति दश दिश एकाकी तरलतारकं खिन्नः। करुणं च कूजित्वा क्षणमात्रं निश्चलस्तिष्ठति ॥
प्रियतमासदृशीं हंसीं दृष्ट्वा हृषितः समालीयते। ज्ञात्वा चान्यां तां निवर्तते नवरं सविषादम् ॥
मरणाविष्टचित्तः प्रज्वलितं हुतवहमिव कमलवनम्। प्रविशति मृणालखण्डं विषमिव स प्रेक्षते पुरतः ॥
विधुनाति पवनाकम्पितकमलरजोमिश्रितपिञ्जरच्छायम्। विरहानलप्रज्वलितमिव मनोहरं पिच्छकलापम् ॥
मृदुपवनप्रचालितचपलतरङ्गोच्छलच्छिशिरैः। सिच्यमानो मूर्च्छति विवशो जलसिकरैरपि ॥

---

१ कोमलमु- क। २ नवरं ख। ३ नियय- क।

तं पेच्छिऊण मज्झं जाया चिन्ता कहण्णु एसो वि। पियविप्पओयदुहिओ विहिणा विणडिज्जइ वराओ ॥
तेणेय पण्डिया परिहरंति पेम्मं अहिं विलगयं व। जाणन्ति जेण पियविप्पओयविसवेयमाहप्पं ॥
इय जा चिन्तेमि अहं ताव य कलहंसओ विहिवसेण। पत्तो परिब्भमन्तो सरम्मि एक्कं सरुद्देसं ॥
असणिभयविप्पणट्ठा वियडं भमिऊण सरवरं तत्थ। कुवलयछायाए ठिया दिट्ठा कलहंसिया तेण ॥
विरहपरिदुब्बलङ्गी असमत्था कूइउं पि सोएण। दट्ठूण य तं हंसो धणियं परिओसमावन्नो ॥
दट्ठूणं पियजायाघडियं कलहंसयं विहिवसेण। मज्झं पि सावय तओ मणम्मि चिन्ता समुप्पन्ना ॥
एवं जीवन्ताणं कालेण कयाइ होइ सम्पत्ती। जीवाण मयाणं पुण कत्तो दीहम्मि संसारे ॥

वीज्यमानश्च पुनर्नलिनीपत्रैश्चेतनां लभते। दृष्ट्वा निजां छायां जले परितोषमुद्वहति ॥
तं प्रेक्ष्य मम जाता चिन्ता कथं नु एषोऽपि। प्रियविप्रयोगदुःखितो विधिना विगुप्यते (व्याकुलीक्रियते) वराकः ॥
तेनैव पण्डिताः परिहरन्ति प्रेम अहिं विलगतमिव। जानन्ति येन प्रियविप्रयोगविषवेगमाहात्म्यम् ॥
इति यावच्चिन्तयामि अहं तावच्च कलहंसको विधिवशेन। प्राप्तः परिभ्रमन् सरस्येकं शरोद्देशम् ॥
अशनिभयविप्रनष्टा विकटं भ्रान्त्वा सरोवरं तत्र। कुवलयच्छायायां स्थिता दृष्टा कलहंसिका तेन ॥
विरहपरिदुर्बलाङ्गी असमर्था कूजितुमपि शोकेन। दृष्ट्वा च तां हंसो गाढं परितोषमापन्नः ॥
दृष्ट्वा च प्रियजायाघटितं कलहंसकं विधिवशेन। ममापि श्रावक! ततो मनसि चिन्ता समुत्पन्ना ॥
एवं जीवतां कालेन कदाचिद् भवति संप्राप्तिः। जीवानां मृतानां पुनः कुतः दीर्घे संसारे ॥

पाणेसु धरन्तेसु य नियमा उच्छाहसत्तिममुयन्तो। पावेइ फलं पुरिसो नियववसायाणुरूवं तु ॥

अन्नं च। विलासवईए वि साहिओ कुलवइणा विवाओ, जहा पाविऊण भत्तारं भुञ्जिऊण भोए परलोयसाहणेण सफलं चेव माणुसत्तणं करिस्सइ त्ति। ता न वावाएइ सा अत्ताणयं। विचित्ताणि य विहिणो विलसियाइं। ता इमं ताव पत्तकालं, जं तीए गवेसणं ति। चिन्तिऊण नारङ्गोवओएण कया पाणवित्ती। पयट्टो जलनिहितडेणं, गओ अद्धजोयणमेत्तं भूमिभागं। दिट्ठं च वीईपणोल्लिज्जमाणं समुद्दतीरंमि फलहयं। पयट्टो तस्स समीवं। पत्तं च तीरं। दिट्ठा य तत्थलग्गा कण्ठगयपाणा विलासवई। हरिसिओ चित्तेणं, पच्चभिन्नाओ य अहं तीए। रोविउं पयत्ता, समासासिया मए पुच्छिया य 'देवि, किमेयं' ति। तीए भणियं। अज्जउत्त, सुण। मम मन्दभागधेयाए अपुण्णेहिं निवडिए तुमम्मि अज्जउत्तसोएणं च अत्ताणयं समुद्दपवाहणुज्जए [1]सत्थवाहे तन्निवारणत्थं च सह मए

प्राणेषु धरत्सु (विद्यमानेषु) च नियमादुत्साहशक्तिममुञ्चन् । प्राप्नोति फलं पुरुषो निजव्यवसायानुरूपं तु ॥

अन्यच्च—विलासवत्या अपि कथितः कुलपतिना विपाकः, यथा प्राप्य भर्तारं भुक्त्वा भोगान् परलोकसाधनेन सफलमेव मानुषत्वं करिष्यतीति । ततो न व्यापादयति साऽऽत्मानम् । विचित्राणि च विधेर्विलसितानि । तत इदं तावत्प्राप्तकालं यत्तस्या गवेषणमिति । चिन्तयित्वा नारङ्गोपयोगेन कृता प्राणवृत्तिः । प्रवृत्तो जलनिधितटेन, गतोऽर्धयोजनमात्रं भूमिभागम् । दृष्टं च वीचिप्रणुद्यमानं समुद्रतीरे फलकम् । प्रवृत्तस्तस्य समीपम् । प्राप्तं च तीरम् । दृष्टा च तत्रलग्ना कण्ठगतप्राणा विलासवती । हृष्टश्चित्तेन, प्रत्यभिज्ञातश्चाहं तया । रोदितुं प्रवृत्ता, समाश्वासिता मया, पृष्टा च देवि ! 'किमेतद्' इति । तया भणितम्-आर्यपुत्र ! शृणु । मम मन्दभागधेयाया

---

[1] "ममंमि सत्थवाहपुत्ते य 'मम पत्ती होहि' ति भणन्ते तओ अणिच्छन्ती अहं" इति पाठः कपुस्तकप्रान्तभागे एव लिखितः, स च प्रक्षिप्त आभाति। पूर्वापरसंदर्भविरोधात् ।

आउलीहूए परियणे पहायाए रयणीए 'अवट्ट अवट्ट' त्ति वाहरन्ते कण्णहारे रज्जुपरिवत्तणुज्जएसु निज्जामएसुं अयण्डम्मि चेव गिरिसिहरनिवडियं पिव विवन्नं जाणवत्तं। विहडिओ जणो। अज्जउत्तअणुभावेण मम पुण्णोयएणं च समासाइयं मए फलहयं। लङ्घिओ जलनिही, दिट्ठो य तुमं ति॥ तओ मए चिन्तियं। अहो मायासीलया अहो अकज्जसङ्कप्पपरिणामो सत्थवाहस्स। अहवा किमेत्थ अच्छरियं। खलु अणुवायओ कज्जसिद्धी, अणुवायओ पावायरणं सुहाणं, जेण तत्थ पढमं चेव अत्तणो संकिलेसो पुणो य परपीडा। ता कहमेवंविहब्भासओ सुहपरिणामो। तहावि अविइयसुहसाहणोवाया पयट्टन्ति एत्थ पाणिणो विप्पलद्धा मीण व्व गलसम्पत्तितुल्लाए विवागदारुणाए सुहसम्पत्तीए॥ एत्थन्तरंमि भणियं विलासवईए। अज्जउत्त, तुमं पुण कहं निवडिओ, कहं वा उत्तिण्णो त्ति। तओ 'न जुत्तं परदोसपयडणं' ति चिन्तिऊण जम्पियं मए। देवि, पमायओ फेल्लुसिऊण[1] निवडिओ तद्देससमासाइयपुव्वभिन्नवहण-

अपुण्यैर्निपतिते त्वयि आर्यपुत्रशोकेन चात्मानं समुद्रप्रवाहणोद्यते सार्थवाहे च तन्निवारणार्थं सह मया आकुलीभूते परिजने प्रभातायां रजन्यां 'अपवर्तय अपवर्तय' इति व्याहरति कर्णधारे रज्जुपरिवर्तनोद्यतेषु निर्यामकेषु अकाण्डे एव गिरिशिखरनिपतितमिव विपन्नं यानपात्रम्। विघटितो जनः। आर्यपुत्रानुभावेन मम पुण्योदयेन च समासादितं मया फलकम्। लङ्घितो जलनिधिः, दृष्टश्च त्वमिति॥ ततो मया चिन्तितम्-अहो मायाशीलता, अहो अकार्यसंकल्पपरिणामः सार्थवाहस्य। अथवा किमत्राश्चर्यमिति। न खल्वनुपायतः कार्यसिद्धिः, अनुपायतः पापाचरणं सुखानाम्, येन तत्र प्रथममेव आत्मनः संक्लेशः पुनश्च परपीडा। ततः कथमेवंविधाभ्यासतः शुभपरिणामः, तथाप्यविदितसुखसाधनोपायाः प्रवर्तन्तेऽत्र प्राणिनो विप्रलब्धा मीना इव गलसंप्राप्तितुल्यायां विपाकदारुणायां सुखसंप्राप्तौ। अत्रान्तरे भणितं विलासवत्या। आर्यपुत्र! त्वं पुनः कथं निपतितः, कथं वोत्तीर्ण इति। ततो 'न युक्तं परदोषप्रकटनम्' इति चिन्तयित्वा

---

१ फेल्लिसिऊण क, फेलसिऊण ख।

फलहएणं च उत्तिण्णो म्हि ॥

अइक्कन्ता काइ वेला । तीए भणियं । अज्जउत्त, तिसाभिभूय म्हि । मए भणियं । देवि, इओ नाइदूरंमि चेव महन्तं सरवरं । ता एहि गच्छम्ह। पयट्टा विलासवई । समागया थेवं भूमिभागं । तओ गरुययाए नियम्बस्स खीणयाए[1] समुद्दतरणेणं सोमालयाए देहस्स वीसत्थाए मम सन्निहाणेणं न[2] सक्केइ चंकमिउं । तओ मए भणियं । देवि, चिट्ठाहि[3] ताव तुमं नग्गोहपायवसमीवे, जाव संपाडेमि देवीए नलिणिपत्तणमुदयं ति । तीए भणियं । न मे तुह वयणदंसणतण्हाओ बाहए सलिलतण्हा । मए भणियं । देवि, धीरा होहि; आगओ चेव अहयं ति । कयं च से पल्लवसयणिज्जं। समप्पिओ नयणमोहणो पडो। भणिया य एसा । देवि, बहुपच्चवायं अरण्णं, अओ एयपच्छाइयसरीराए चिट्ठियव्वं, जाव अहमागच्छामि त्ति । अबहुमयं पि हियएण अपडिकूलयाए पडिस्सुयं तीए । अहं गओ सरवरं ।

जल्पितं मया । देवि ! प्रमादतः (फेल्लुसिऊण दे.) स्मृत्वा निपतितस्तद्देशसमासादितपूर्वभिन्नवहनफलकेन चोत्तीर्णोऽस्मि ॥

अतिक्रान्ता काऽपि वेला। तया भणितम्–आर्यपुत्र! तृषाऽभिभूताऽस्मि। मया भणितम्–इतो नातिदूरे एव महत् सरोवरम्। तत एहि गच्छावः। प्रवृत्ता विलासवती। समागता स्तोकं भूमिभागम्। ततो गुरुतया नितम्बस्य क्षीणतया समुद्रतरणेन सुकुमारतया देहस्य विश्वस्ततया मम सन्निधानेन न शक्नोति चंक्रमितुम्। ततो मया भणितम्–देवि! तिष्ठ तावत्त्वं न्यग्रोधपादपसमीपे यावत् संपादयामि देव्यै नलिनीपत्रेणोदकमिति। तया भणितम्–न मे तव वदनदर्शनतृष्णाया बाधते सलिलतृष्णा। मया भणितम्–देवि! धीरा भव, आगत एवाहमिति। कृतं च तस्याः पल्लवशयनीयम्। समर्पितो नयनमोहनो पटः। भणिता चैषा, देवि! बहुप्रत्यवायमरण्यम्, अत एतत्प्रच्छादितशरीरया स्थातव्यम्, यावदहमागच्छामीति। अबहुमतमपि हृदयेन अप्रतिकूलतया प्रतिश्रुतं तया।

---

[1] खिन्नयाए क । [2] भणियं च णाए 'न सक्कुणामि चंकमिउं' क। [3] चिट्ठ क।

गहियमुयगं नारङ्गफलाणि य। पयट्टो पडिवहेणं, समागओ तमुद्देसं। भणिया य एसा। देवि, मुञ्च नयणमोहणं पडयं, गेण्हाहि उदगं ति। जाव न वाहरइ त्ति, तओ मए भणियं। देवि, अलं परिहासेणं, मुञ्च नयणमोहणं पडयं। तहावि न वाहरइ। तओ मए चिन्तियं। नूणं नत्थि चेव इह देवी। अन्नहा दट्ठूण मं कहं न अब्भुट्ठेइ, कहं वा न वाहरइ त्ति। तओ परामुट्ठो सत्थरो, नोवलद्धा य देवी। तओ आसङ्कियं मे हियएणं, फुरियं वामलोयणेणं, निवडियं च मे हत्थाओ पयत्तगहियं पि सोययं नलिणिवत्तं। विसायपराहीणो विय वुण्णवयणतरलच्छं 'देवि देवि' त्ति जंपमाणो पवत्तो गवेसिउं। वालुयाथलीए य उवलद्धा अयगरघ[1]संणी। वेवमाणहियओ पयट्टो तयणुसारेणं। दिट्ठो य [2]तरुवरगहणे अइकसणदेहच्छवी विणिन्तनयणविससिहाजालभासुरो नयणमोहणपडगसणवावडो महाकाओ अयगरो त्ति। तं च दट्ठूण चिन्तियं मए। हद्धी वावाइया देवी। तओ न जाणियं मए, किं दिवसो किं रत्ती किं उण्हं किं

अहं गतः सरोवरम्। गृहीतमुदकं नारङ्गफलानि च। प्रवृत्तः प्रतिपथेन, समागतस्तमुद्देशम्। भणिता चैषा। देवि! मुञ्च नयनमोहनं पटम्, गृहाणोदकमिति। यावन्न व्याहरतीति, ततो मया भणितम्-देवि! अलं परिहासेन, मुञ्च नयनमोहनं पटम्। तथापि न व्याहरति। ततो मया चिन्तितम्-नूनं नास्त्येव इह देवी, अन्यथा दृष्ट्वा मां कथं नाभ्युत्तिष्ठति, कथं वा न व्याहरतीति। ततः परामृष्टः स्रस्तरः, नोपलब्धा च देवी। तत आशङ्कितं मे हृदयेन, स्फुरितं वामलोचनेन, निपतितं च मे हस्तात्प्रयत्नगृहीतमपि सोदकं नलिनीपत्रम्। विषादपराधीन इव भीतवदनतरलाक्षं 'देवि देवि' इति जल्पन् प्रवृत्तो गवेषयितुम्। वालुकास्थल्यां चोपलब्धाऽजगरघर्षणी। वेपमानहृदयः प्रवृत्तस्तदनुसारेण। दृष्टश्च तरुवरगहनेऽतिकृष्णदेहच्छविर्विनिर्यन्नयनविषशिखाज्वालाभासुरो नयनमोहनपटग्रसनव्यापृतो महाकायोऽजगर इति। तं च दृष्ट्वा चिन्तितं मया। हा धिग्, व्यापादिता देवी। ततो न ज्ञातं मया, किं दिवसः किं रात्रिः,

---

१ -वेहणी क, -घसरणी ख। २ गरुयतरुवर- ख।

सीयं किं सुहं किं दुक्खं किं ऊसवो किं वसणं किं जीवियं किं मरणं किं गओ किं ठिओ त्ति; केवलमणाचिक्खणीयं अवत्थन्तरं पाविऊण मुच्छानिमीलियनयणो निवडिओ धरणिवट्ठे, विउत्तासवो विय ठिओ कंचि कालं। जलहिमारुयसमागमेणं च लद्धा चेयणा। चिन्तियं मए। जाव एस अयगरो न देसन्तरमुवगच्छइ, ताव चेव इमिणा अत्ताणयं खवावेमि[1]। मयस्स वि बहुमओ चेव मे देवीसमागमो त्ति। गओ अयगरसमीवं। सो य मं दट्ठूण कयावराहो विय कुपुरिसो संकुडिओ अयगरो। चिन्तियं मए। मयस्स वि पिययमासमागमो दुल्लहो त्ति। तओ कहं अकुविओ ममं गहेऊणं एसो गसिस्सइ'[2] त्ति आहओ उत्तिमङ्गभाए अयगरो। भयकायरेणं च तेण निग्गिलिओ नयणमोहणो पडो, आबद्धा मण्डली, निसामिओ फणाभोओ। तओ पिययमागत्तसङ्गबहुमाणेग गहिओ पडो, विइण्णो वच्छत्थले। चिन्तियं च मए। एयं चेव नयणमोहणं हियए दाऊण उक्कलम्बणेण वावाएमि अत्ताणयं ति। गओ नग्गोहसमीवं, जत्थ पिययमा पसुत्ता आसि। निबद्धो पासओ, साहागएणं च निमिया सिरोहरा, विमुक्को अप्पा, निरुद्धो कण्ठदेसो। तओ

किमुष्णं किं शीतम्, किं सुखं किं दुःखम्, किमुत्सवः किं व्यसनम्, किं जीवितं किं मरणम्, किं गतः किं स्थित इति। केवलमनाख्येयमवस्थान्तरं प्राप्य मूर्च्छानिमिलितनयनो निपतितो धरणीपृष्ठे, वियुक्तासुरिव स्थितः कञ्चित्कालम्। जलधिमारुतसमागमेन च लब्धा चेतना। चिन्तितं मया। यावदेषोऽजगरो न देशान्तरमुपसर्पति तावदेवानेनात्मानं खादयामि। मृतस्यापि बहुमत एव मे देवीसमागम इति। गतोऽजगरसमीपम्। स च मां दृष्ट्वा कृतापराध इव कुपुरुषः संकुचितोऽजगरः। चिन्तितं मया—मृतस्यापि प्रियतमासमागमो दुर्लभ इति। ततः 'कथमकुपितो मां गृहित्वा ग्रसिष्यति' इति आहत उत्तमाङ्गभागेऽजगरः। भयकातरेण च तेन निर्गिलितो नयनमोहनः पटः, आवद्धा मण्डली, निशामितः फणाभोगः। ततः प्रियतमागात्रसङ्गबहुमानेन गृहीतः पटः, वितीर्णो वक्षः-

---

[1] गिलावेमि क। [2] तओ कुविएण चिय कहं णामाकुविओ गसिस्सइ त्ति ख।

भमियं व्विय काणणेहिं, निवडियं विय नहङ्गणेणं, विणिग्गयाइं नयणाइं, अवसीहूयं सरीरयं। अओ परमणाचिक्खणीयं अणणुभूयपुव्वं संमोहमणुपत्तो म्हि । थेववेलाए य सुमिणए व्विय दिट्ठो मए कमण्डलुपाणिएण ममं चेव गत्तसिञ्चणवावडो रिसी । समागया चेयणा । चिन्तियं च । हन्त, धरणिगओ अहं, न विवन्नो चेव मन्दपुण्णो त्ति । तओ परामुट्ठं मे अङ्गमिसिणा । भणिओ य सो मए । भयवं, किं तए ववसिय ति । तेण भणियं । सुण । दिट्ठो तुमं अत्तवावायणुज्जओ मए दूरदेसवत्तिणा कुसुमसामिहेयागएणं । तओ 'हा को पुण एसो सप्पुरिसनिन्दियं मग्गं पवज्जइ, किंवा से ववसायकारणं पुच्छिऊण निवारेमि एयं' ति चिन्तिऊण पयट्टो तुरियतुरियं, जाव मुक्को तए अप्पा। तओ 'मा साहसं मा साहसं'ति भणमाणो तुरिययरं धाविओ पत्तो य नग्गोहसमीवं । एत्थन्तरंमि तुट्टो ते पासओ । निवडिओ धरणिवट्ठे । तओ य सित्तो मए कमण्डलुपाणिएण, लद्धचेयणं मुणिऊण परामुट्ठं च ते अङ्गं । एयं मे ववसियं

स्थले। चिन्तितं च मया-एतमेव नयनमोहनं हृदये दत्त्वा उत्कलस्वनेन व्यापादयाम्यात्मानमिति। गतो न्यग्रोधसमीपम् , यत्र प्रियतमा प्रसुप्ताऽऽसीत्। निबद्धः पाशकः, शाखागतेन च न्यस्ता शिरोधरा, विमुक्त आत्मा, निरुद्धः कण्ठदेशः। ततः भ्रान्तमिव काननैः, निपतितमिव नभोऽङ्गणेन, विनिर्गते नयने, अवशीभूतं शरीरम्। अतः परमनाख्येयमननुभूतपूर्वं संमोहमनुप्राप्तोऽस्मि। स्तोकवेलायां च स्वप्ने इव दृष्टो मया कमण्डलुपानीयेन ममैव गात्रसेचनव्यापृत ऋषिः। समागता चेतना, चिन्तितं च। हन्त, धरणीगतोऽहम् , न विपन्न एव मन्दपुण्य इति। ततः परामृष्टं मेऽङ्गमृषिणा। भणितश्च स मया। भगवन्! किं त्वया व्यवसितमिति। तेन भणितम्-श्रृणु। दृष्टस्त्वमात्मव्यापादनोद्यतो मया दूरदेशवर्तिना कुसुम-सामिधेया(काष्ठा)गतेन। ततो हा कः पुनरेष सत्पुरुषनिन्दितं मार्गं प्रपद्यते, किंवा तस्य व्यवसायकारणं पृष्ट्वा निवारयाम्येतम्' इति चिन्तयित्वा प्रवृत्तस्त्वरितत्वरितम्, यावन्मुक्तस्त्वयाऽऽत्मा। ततो 'मा साहसं मा साहसं' इति भणन् त्वरिततरं धावितः प्राप्तश्च न्यग्रोधसमीपम्। अत्रान्तरे त्रटितस्ते पाशः। निपतितो धरणीपृष्ठे।

ति। ता आचिक्खं [1]धम्मसील, किं पुण इमस्स ववसायस्स कारणं। तओ सविलिएणं जंपियं मए। भयवं, अलं मे ववसायकारणेणं। तेण भणियं। वच्छ, अलं ते लज्जाए। सव्वस्स जणणिभूओ तवस्सिजणो होइ। अमुणियवुत्तन्तो य किमहं भणामि त्ति। ता आचिक्खउ भवं। तओ मए 'अकारणवच्छलो माणणीओ गिहिणो जइजणो' त्ति चिन्तिऊण साहिओ सेयवियानिग्गमणाइओ उक्कलम्बणावसाणो निययवुत्तन्तो। भणियं च तेण। वच्छ, ईइसो एस संसारो। एत्थ खलु सरयजलहरसमं जीवियं, कुसुमियतरुसमाओ रिद्धीओ, सुमिणओवभोयसरिसा विसयभोगा, विओयावसाणाइं पियजणसमागमाइं। ता परिच्चय इमं ववसायं ति। न परिच्चत्तपाणो वि जीवो अकाऊण कुसलसंचयं समीहियं संपावेइ त्ति। मए भणियं। भयवं, एवमेयं; तहावि न सक्कुणोमि पिययमाविरहजलणजालावली[2]परियरिओ खणे खणे मरणाइरित्तं दुक्खमणुहविउं। ता अवस्सं मरणुज्जयस्स आचिक्खं भयवं, केण उण उवाएण इयाणिं चेव मे लोय-

ततश्च सिक्तो मया कमण्डलुपानीयेन। लब्धचेतनं ज्ञात्वा परामृष्टं च तेऽङ्गम्। एतन्मे व्यवसितमिति। तत आचक्ष्व धर्मशील! किं पुनरस्य व्यवसायस्य कारणम्। ततः सव्यलीकेन जल्पितं मया-भगवन्! अलं मे व्यवसायकारणेन। तेन भणितम्-वत्स! अलं ते लज्जया, सर्वस्य जननीभूतः तपस्विजनो भवति, अज्ञातवृत्तान्तश्च किमहं भणामि इति। तत आचष्टां भवान्। ततो मया 'अकारणवत्सलो माननीयो गृहिणो यतिजनः' इति चिन्तयित्वा कथितः श्वेतविकानिर्गमनादिक उत्कलम्बनावसानो निजवृत्तान्तः। भणितं च तेन-वत्स ईदृश एष संसारः। अत्र खलु शरज्जलधरसमं जीवितम्, कुसुमिततरुसमा ऋद्धयः, स्वप्नोपभोगसदृशा विषयभोगाः, वियोगावसानाः प्रियजनसमागमाः। ततः परित्यजेमं व्यवसायमिति। न परित्यक्तप्राणोऽपि जीवोऽकृत्वा कुशलसंचयं समीहितं संप्राप्नोतीति। मया भणितम्-भगवन्! एवमेतद्, तथाऽपि न शक्नोमि प्रियतमाविरहज्वलनज्वालावलिपरिवृतः क्षणे क्षणे

---

[1] धम्मसीलया क। [2] परियओ क।

न्तरगया वि पिययमाए संजोगो हवेज्ज त्ति। तेण भणियं। जइ एवं, ता सुण। अत्थि इहेव मलयपव्वए मणोरहापूरयं नाम सिहरं। तं च किल कामियं पडणं। ता एयमारुहिय काऊण जहोचियं पणिहाणं पाविहिसि समीहियं ति। तओ मए पणमिऊण चलणजुयलं पुच्छिओ इसी। भयवं, कहिं पुण तं[1]मुद्देसं मणोरहापूरयं ति। दंसियमणेण। पयट्टो अहयं, पत्तो तइयदियहे। आरूढो सप्पुरिसाहि[2]माणं व तुङ्गं सिहरं। 'जम्मन्तरे वि तीए समागमो हवेज्ज' त्ति भणिय कओ पणिही, विमुक्को अप्पा। 'अहो पमाओ' त्ति भणमाणेण गयणयलचारिणा धुव्वन्तचीणंसुएणं वामपासनिमियासिणा संभमोवयणवियलियमुण्डमालेण चन्दाणुगारिणा अच्चन्तसोमदंसणेण पडिच्छिओ विज्जाहरेण, नीओ सहावसीयलं चन्दकन्तमणिसणाहं चन्दणलयाहरयं। समासासिऊण भणिओ य तेण। भो महासत्त, किं पुण ते अणन्नसरिसागिइपिसुणियमहापुरिसभावस्स इमं ईइसं इयरपुरिसाणुरूवं चेट्ठियं, किं वा एत्थ कारणं; साहेहि ताव, जइ

मरणातिरिक्तं दुःखमनुभवितुम्। ततोऽवश्यं मरणो तस्याचक्ष्व भगवन्! केन पुनरुपायेन इदानीमेव मे लोकान्तरगताया अपि प्रियतमायाः संयोगो भवेदिति। तेन भणितम्-यद्येवं ततः श्रृणु। अस्ति इहैव मलयपर्वते मनोरथापूरकं नाम शिखरम्। तच्च किल कामितं पतनम्। ततं पतदारुह्य कृत्वा यथोचितं प्रणिधानं प्राप्स्यसि समीहितमिति। ततो मया प्रणम्य चरणयुगलं पृष्ट ऋषिः। भगवन्! कुत्र पुनस्तदुद्देशं मनोरथापूरकमिति। दर्शितमनेन। प्रवृत्तोऽहम्, प्राप्तस्तृतीयदिवसे। आरूढः सत्पुरुषाभिमानमिव तुङ्गं शिखरम्। 'जन्मान्तरेऽपि तया समागमो भवेद्' इति भणित्वा कृतः प्रणिधिः, विमुक्त आत्मा। 'अहो प्रमादः' इति भणता गगनतलचारिणा धूयमानचीनांशुकेन वामपार्श्वन्यस्तासिना संभ्रमावपतनविचलितमुण्डमालेन चन्द्रानुकारिणाऽत्यन्तसौम्यदर्शनेन प्रतीष्टो विद्याधरेण, नीतः स्वभावशीतलं चन्द्रकान्तमणिसनाथं चन्दनलतागृहम्। समाश्वास्य भणितश्च तेन। भो महासत्त्व! किं पुनस्तेऽनन्य-

---

१ तमुद्देस-क। २ -माणमिवोत्तुंगं ख।

अकहणीयं न होइ । मए भणियं । किं नाम परोवयारनिरयस्स दोसवज्जिणो विइयपाणिधम्मस्स सज्जणस्सावि अकहणीयं । ता सुणउ भद्दो । पिययमाविओयवावायणुज्जयस्स साहियं मे रिसिणा इमं मणोरहावूरयं कामियं पडणं । तओ 'जम्मन्तरंमि वि पिययमाजोओ हवेज्ज' त्ति काऊण पणिहाणं विमुक्को अप्पा । एयं मे एत्थ कारणं ति । तओ ईसि विहसिऊण भणियं विज्जाहरेण । अहो णु खलु नत्थि दुक्करं सिणेहस्स । सिणेहो हि नाम मूलं सव्वदुक्खाणं निवासो अविवेयस्स अग्गला निव्वुईए बन्धवो कुगइवासस्स पडिवक्खो कुसलजोयाणं देसओ संसाराडवीए वच्छलो असच्चववसायस्स । एएण अभिभूया पाणिणो न गणन्ति आयइं, न जोयन्ति कालोचियं, न सेवन्ति धम्मं, न पेच्छन्ति परमत्थं, महालोहपञ्जरगया विय केसरिणो समत्था वि सीयन्ति त्ति । सविसओ वि एस एवं पावो, किमङ्ग पुण अविसओ । ता परिच्चय इमं अविसयसिणेहं । आलोएहि विवेयदीवालोएण निन्नासिऊण मोहतिमिरं, कहं विचित्तकम्मपरिणा-

---

सदृशाकृतिपिशुनितमहापुरुषभावस्य इदमीदृशमितरपुरुषानुरूपं चेष्टितम्, किंवाऽत्र कारणम्, कथय तावद् यद्यकथनीयं न भवति । मया भणितम्, किं नाम परोपकारनिरतस्य दोषवर्जिनो विदितप्राणिधर्मस्य सज्जनस्याप्यकथनीयम् । ततः शृणोतु भद्रः । प्रियतमावियोगव्यापादनोद्यतस्य कथितं मे ऋषिणा इदं मनोरथापूरकं कामित पतनम् । ततो 'जन्मान्तरेऽपि प्रियतमायोगो भवेद्' इति कृत्वा प्रणिधानं विमुक्त आत्मा । एतन्मेऽत्र कारणमिति । तृत ईषद् विहस्य भणितं विद्याधरेण । अहो नु खलु नास्ति दुष्करं स्नेहस्य । स्नेहो नाम मूलं सर्वदुःखानां निवासोऽविवेकस्य अगला निर्वृतेः वान्धवः कुगतिवासस्य प्रतिपक्षः कुशलयोगानां देशकः संसाराटव्या वत्सलोऽसत्यव्यवसायस्य । एतेनाभिभूताः प्राणिनो न गणयन्त्यायतिम्, न पश्यन्ति कालोचितम्, न सेवन्ते धर्मम्, न प्रेक्षन्ते परमार्थम्, महालोहपञ्जरगता इव केसरिणः समर्था अपि सीदन्तीति । सविषयोऽपि एष एवं पापः, किमङ्ग पुनरविषय इति । ततः परित्यजेममविषयस्नेहम् । आलोचय विवेकदीपालोकेन निर्नाश्य मोहतिमिरम्, कथं विचित्रकर्मपरिणामवशगानां जीवानां पतनानुभावत एका

मवसयाण जीवाणं पडणाणुहावओ एगा गई संगमो वा। तहाकम्मपरिणइभावे य किं इमिणा संरम्भेणं[1]। अहिलसियसाहगोवाओ वि य न दाणसीलतवे मोत्तूण एत्थ दिट्ठो परमत्थपेच्छएहिं ति।

अन्नं साहेमि अहं पच्चयजणयं तु सव्वसत्ताणं। जं वित्तं वणियाणं अच्चन्तविरुद्धयं सोम ॥
नेहेण पओसेण य भिन्नं काऊण एत्थ पणिहाणं। जह तं भे[2]ज्जुपईयं निहणगयं तं निसामेहि ॥

अत्थि इह मलयविसए कण्णियारसिवं नाम सन्निवेसो। तत्थ सँ[3]भिलओ नाम गाहावई। तस्स नामओ वि अमणुन्ना सीहा नाम भारिया। सो वुण इमीसे जीवियाओ वि इट्ठयरो। ताणं चं परोप्परं विओयदंसणे बहु मन्नन्ताणमइक्कन्तो कोइ कालो। अन्नया य आयण्णियं तेणं मणोहरापूरयं कामियं पडणं। जाँ[4]यानिव्वेयओ आगन्तूणं मा मम जम्मन्तरंमि वि एसा भारिया हवेज्ज'त्ति काऊण

गतिः समागमो वा। तथाकर्मपरिणतिभावे च किमनेन संरम्भेण। अभिलषितसाधकोपायोऽपि च न दानशीलतपांसि मुक्त्वाऽत्र दृष्टः परमार्थप्रेक्षकैरिति।

अन्यत्कथयाम्यहं प्रत्ययजनकं तु सर्वसत्त्वानाम्। यद् वृत्तं वणिजोरत्यन्तविरुद्धकं सौम्य ! ॥
स्नेहेन प्रद्वेषेण च भिन्नं कृत्वाऽत्र प्रणिधानम्। यथा तद् भार्यापत्योर्निधनगतं तद् निशामय ॥

अस्तीह मलयविषये कर्णिकारशिवं नाम सन्निवेशः। तत्र सम्भिलको नाम गृहपतिः। तस्य नामतोऽपि अमनोज्ञा सिंहा नाम भार्या। स पुनरस्या जीवितादपीष्टतरः। तयोश्च परस्परं वियोगदर्शने बहु मन्यतोरतिक्रान्तः कोऽपि कालः। अन्यदा चाकर्णितं तेन मनोरथा-

---

१ समारंमेणं क ख। २ भज्जपईयं ख, भज्जूपईयं क। ३ सविसओ ग, सभिलओ क। ४ जायानिव्वेएणं

पणिहाण विमुक्को अप्पा, मओ य सो। मुणिओ य एस वुत्तन्तो भारियाए। गहिया सोएणं। आगया इमं पडणं। भत्तारसिणेहओ कओ तीए पणिही 'जम्मन्तरंमि वि सो चेवं[1] मे भत्ता भवेज्ज' त्ति। विमुक्को अप्पा, मया य सा। परोप्परविरोहओ य तक्केमि, न संपन्ना तेसिं मणोरहा॥ ता किं एइणा जुत्तिविरहियविसएण अणुट्ठाणेणं। कहं कया वा पिययमाए विओओ संजाओ त्ति ता आचिक्ख एयं। तओ मए 'सुन्दरं भणइ' त्ति चिन्तिऊण साहिओ अयगरवुत्तन्तो। तइयदियहो य इमस्स वत्तस्स। विज्जाहरेण भणियं। केदूरे वत्तं ति। मए भणियं। अत्थि इओ दसहिं जोयणेहिं। विज्जाहरेण भणियं। जइ एवं, ता अलं विसाएण; न विवन्ना ते पिययमा। मए भणियं। कहं विय। तेण भणियं। सुण। अत्थि अणेयविज्जाहरनरिन्दमउलिमणिप्पभाविसरविच्छुरियपायपीढो चक्कसेणो नाम विज्जाहरवई। पारद्धं च तेण अपडिहयचक्काए महाविज्जाए साहणं। दुवालसमासिया से कया पुव्वसेवा। तओ अडयालीसं[2]जोयणं

पूरकं कामित पतनम्। जायानिर्वेदतश्चागत्य 'मा मम जन्मान्तरेऽप्येषा भार्या भवेद्' इति कृत्वा प्रणिधानं विमुक्त आत्मा, मृतश्च सः। ज्ञातश्चैष वृत्तान्तो भार्यया। गृहीता शोकेन। आगतेदं पतनम्। भर्तृस्नेहतः कृतस्तया प्रणिधिः 'जन्मान्तरेऽपि स एव मे भर्ता भवेद्' इति। विमुक्त आत्मा, मृता च सा। परस्परविरोधतश्च तर्कयामि, न संपन्ना तयोर्मनोरथाः। ततः किमेतेन युक्तिविरहितविषयेणानुष्ठानेन। कथं कदा वा प्रियतमाया वियोगः संजात इति तावद् आचक्ष्व एतद्। ततो 'सुन्दरं भणति' इति चिन्तयित्वा कथितोऽजगरवृत्तान्तः। तृतीयदिवसश्चास्य वृत्तस्य। विद्याधरेण भणितम्-कियद्दूरे वृत्तमिति। मया भणितम्-अस्तीतो दशभिर्योजनैः। विद्याधरेण भणितम्-यद्येवं ततोऽलं विषादेन, न विपन्ना ते प्रियतमा। मया भणितम्-कथमिव। तेन भणितम्-शृणु। अस्ति अनेकविद्याधरनरेन्द्रमौलिमणिप्रभाविसरविच्छुरितपादपीठश्चक्रसेनो नाम विद्याधरपतिः। प्रारब्धं च तेनाप्रतिहतचक्राया महाविद्यायाः

---

१ च्चेव क। २ –लीसं ख।

काऊण खेत्तसुद्धिं सव्वसत्ताणं दाऊणमभयदाणं 'सत्तरत्तं जाव रक्खियव्वा इह महापयत्तेणं हिंस' त्ति निरूविऊण निंयसरीरभूए विज्जाहरे पहाणसिद्धिनिमित्तं एगागी चेव गेण्हिऊण फलिहमणिवलयं पविट्ठो सिद्धिनिलयाभिहाणं मलयगिरिगुहं ति। पारद्धो तेण सत्तलक्खिओ मन्तजावो। पूराणि य से समं पणइमणोरहेहिं अज्जेव सत्त राइंदियाइं, भविस्सइ य सुए सामिणो विज्जासिद्धी। अओ अवगच्छामि, एद्दहमेत्तखेत्तमज्झगया न विवन्ना ते पिययमा; जओ उज्जुत्ता सामिकज्जे विज्जाहरा॥ तओ मए चिन्तियं। एवमेयं जुत्तिसंगयं च। अन्नहा कहं पडरयणपाउयाए केवलपडरयणगसणं, कहं वा तक्खणोवभुत्ताए तहा मण्डलिकरणं अयगरस्स त्ति। चिन्तिऊण भणिओ विज्जाहरो। भो महापुरिस, जइ एवं, ता पुज्जन्तु ते मणोरहा। आसासिओ अहं भयवया, नियत्तिओ अकुसलववसायाओ। ता चिट्ठ तुमं, अहं पुण गच्छामि पिययमं अन्नेसिउं। विज्जाहरेण भणियं। अलं किलेसेण। अहमेव कल्लं संपाडियदेवसासणो

साधनम्। द्वादशमासिकी तस्याः कृता पूर्वसेवा। ततोऽष्टचत्वारिंशद्योजनां कृत्वा क्षेत्रशुद्धिं सर्वसत्त्वेभ्यो दत्त्वाऽभयदानं 'सप्तरात्रं यावद् रक्षितव्येह महाप्रयत्नेन हिंसा' इति निरूप्य निजशरीरभूतान् विद्याधरान् प्रधानसिद्धिनिमित्तं एकाक्येव गृहीत्वा स्फटिकमणिवलयं प्रविष्टः सिद्धिनिलयाभिधानां मलयगिरिगुहामिति। प्रारब्धस्तेन सप्तलक्षिको मन्त्रजापः। पूर्णानि च तस्य समं प्रणयिमनोरथैरद्यैव सप्त रात्रिंदिवानि, भविष्यति च श्वः स्वामिनो विद्यासिद्धिः। अतोऽवगच्छामि एतावन्मात्रक्षेत्रमध्यगता न विपन्ना ते प्रियतमा, यत उद्युक्ताः स्वामिकार्ये विद्याधराः। ततो मया चिन्तितम्—एवमेतद् युक्तिसंगतं च। अन्यथा कथं पटरत्नप्रावृतायाः केवलपटरत्नग्रसनम्, कथं वा तत्क्षणोपभुक्तायां तथा मण्डलीकरणमजगरस्येति। चिन्तयित्वा भणितो विद्याधरः। भो महापुरुष! यद्येवं ततः पूर्यन्तां ते मनोरथाः। आश्वासितोऽहं भगवता. निवर्तितोऽकुशलव्यवसायात्। ततस्तिष्ठ त्वम्, अहं पुनर्गच्छामि प्रियतमा-

---

१ नियय- ख। २ मे ते क।

पडिपुण्णमणोरहो सेसविज्जाहरेहिंतो उवलहिऊण[2] जहट्ठियं वुत्तन्तं पिययमं ते घडिस्सामि[3]। तओ मए 'अलङ्घणीयवयणो सुहि[4]' त्ति चिन्तिऊण 'जं तुमं भणासि' त्ति वहुमन्निओ विज्जाहरो।

अइक्कन्तो वासरो। अद्धजामावसेसाए रयणीए अयण्डम्मि चेव उज्जोवियं(य)नहङ्गणं, संखुहियं[5]जलनिहिं पयम्पियमहियल[6] गिज्जन्तमङ्गलं च समागयं सुरविमाणागारमणुगरेन्तं विज्जाहरविमाणं। तओ[7] संभन्तो[8] उट्ठिओ विज्जाहरो। भणियं च तेण। भो भो पेक्ख पेक्ख संसिद्धमहाविज्जस्स सामिणो चक्कसेणस्स रिद्धिं। पेच्छमाणाण य वोलियं चडगरेणं, पभाया रयणी, उग्गओ अंसुमाली। तओ य मं घेत्तूण गओ चक्कसेणसमीवं निव्वुइकरं नाम मलयसिहरं। पणमिओ तेण विज्जाहरीसरो। विइण्णाइं आसणाइं। उवविट्ठा अम्हे। साहिओ तेण मदीय[9]वुत्तन्तो चक्कसेणस्स। भणियं च तेण। भो महापुरिस, मा संतप्प। अज्जेव ते पिययमं घडिस्सामि त्ति॥ एत्थ-

मन्वेषयितुम्। विद्याधरेण भणितम्-अलं क्लेशेन। अहमेव कल्ये संपादितदेवशासनः प्रतिपूर्णमनोरथः शेषविद्याधरेभ्य उपलभ्य यथास्थितं वृत्तान्तं ते प्रियतमां घटयिष्यामि। ततो मया 'अलङ्घनीयवचनः सुहृद्' इति चिन्तयित्वा 'यत्त्वं भणसि' इति बहुमानितो विद्याधरः।

अतिक्रान्तो वासरः। अर्धयामावशेषायां रजन्यामकाण्डे पवोद्योतितनभोऽङ्गणम्, संक्षोभितजलनिधि, प्रकम्पितमहीतलम्, गीयमानमङ्गलं च समागतं सुरविमानाकारमनुकुर्वद् विद्याधरविमानम्। ततः संभ्रान्त उत्थितो विद्याधरः, भणितं च तेन। भो भोः! प्रेक्षस्व प्रेक्षस्व संसिद्धमहाविद्यस्य स्वामिनश्चक्रसेनस्य ऋद्धिम्। प्रेक्षमाणयोश्चातिक्रान्तं चटकरेण (समूहेन)। पभाता रजनी, उद्गतोंऽशुमाली। ततश्च मां गृहीत्वा गतश्चक्रसेनसमीपं निर्वृतिकरं नाम मलयशिखरम्। प्रणतस्तेन विद्याधरेश्वरः। वितीर्णे आसने। उपविष्टावावाम्।

---

१ परिपुण्ण-क। २ उवलभिऊण ख। ३ -मि त्ति क। ४ सुणहि ख। ५ संखुहिओ जलनिही क-ग। ६ पयम्पियं महियलं क-ग। ७ नास्ति ख पुस्तके। ८ ससंभंतो क। ९ मतीय-ख।

न्तरंमि समागया दुवे विज्जाहरा। पणमिओ तेहिं चक्कसेणो। भणियं च एगेण। महाराय, देवसमाएसेणेव सयलजीवोवघायपरिरक्खणनिमित्तं भमन्तेहिं काणणन्तराइं एगम्मि उद्देसे दिट्ठा महाकायअयगरभएण मोत्तूण उत्तरीयं 'हा अज्जउत्त, हा अज्जउत्त' त्ति भणमाणी [[1]उट्ठिया पल्लवसयणीयाओ] पलायमाणा इत्थिया। निवडिऊण वावत्तिभीएहिं गहिया य अम्हेहिं, उवणीया मलयसिहरं, विमुक्का य पल्लवसयणिज्जे। मुच्छिया विय ठिया कञ्चि कालं। तओ भयवेविरङ्गी 'हा अज्जउत्त हा अज्जउत्त' त्ति भणमाणी उट्ठिया पल्लवसयणीयाओ। भणिया य अम्हेहिं। सुन्दरि, अलं ते भएण; साहेहि ताव, कहिं ते अज्जउत्तो। तीए भणियं। उदयस्स सरवरं गओ त्ति। तओ गविट्ठो तत्थ अम्हेहिं, न उण उवलद्धो त्ति। सा [2]उण तओ चेव दिवसाओ आरब्भ अकयपाणवित्ती 'हा अज्जउत्त हा अज्जउत्त' त्ति[3]-[4]परायणा चिट्ठइ। एयं सोऊण देवो पमाणं ति। तओ मं [5]पुलोइऊण भणियं चक्कसेणेण। भद्द, निरूवेहि ताव, किं सा भवओ पिययमा

कथितस्तेन मदीयवृत्तान्तश्चक्रसेनाय। भणितं च तेन-भो महापुरुष! मा संतप्यस्व, अद्यव ते प्रियतमां घटयिष्यामीति। अत्रान्तरे समागतौ द्वौ विद्याधरौ। पणतस्ताभ्यां चक्रसेनः। भणितं चैकेन-महाराज! देवसमादेशेनैव सकलजीवोपघातपरिरक्षणनिमित्तं भ्रमद्भ्यां काननान्तराणि एकस्मिन्नुद्देशे दृष्टा महाकायाजगरभयेन मुक्त्वोत्तरीयं 'हा आर्यपुत्र! हा आर्यपुत्र!' इति भणन्ती [उत्थिता पल्लवशयनीयात] पलायमाना स्त्री। निपत्य व्यापत्तिभीताभ्यां गृहीता चावाभ्याम्, उपनीता मलयशिखरम्। विमुक्ता च पल्लवशयनीये॥ मूर्च्छितेव स्थिता कञ्चित्कालम्। ततो भयवेपमानाङ्गी 'हा आर्यपुत्र! हा आर्यपुत्र'! इति भणन्ती उत्थिता पल्लवशयनीयात्। भणिता चावाभ्याम्-सुन्दरि! अलं ते भयेन, कथय तावत् कुत्र ते आर्यपुत्रः। तया भणितम्-उदकाय सरोवरं गत इति। ततो गवेषितस्तत्रावाभ्याम्, न पुनरुपलब्ध इति। सा पुनस्तत एव दिवसादारभ्य अकृतप्राणवृत्तिः 'हा आर्यपुत्र! हा आर्यपुत्र'! इति परायणा तिष्ठति।

---

[1] अयं पाठः कपुस्तकप्रान्तभागे। [2] वुण क। [3] कहिं गओ कहिं गओ त्ति क। [4] ताय त्ति परायणा ख। [5] पलोइऊण क।

न व त्ति। तओ विज्जाहरदुइओ गओ चन्दणवणाभिरामं मलयसाणुं। दिट्ठा य सयलकलोववेया वि बीय[1]चन्दलेहागारमणुगारेन्ती कण्ठगयजीविया विलासवई। ऊससियं मे हियएण। समासासिया एसा, कारिया विज्जाहरोवणीएणं सयलिन्दिओवयारिणा दिव्वाहारेण पाणवित्तिं। साहियं चक्कसेणस्स, जहा स च्चेव मे पिययम त्ति। चक्कसेणेण भणियं। सुन्दरं जायं। भद्द भण, किं ते अवरं करणिज्जं करेमि त्ति। मए भणियं। नत्थि अओ वि अवरं करणिज्जं ति। तेण भणियं। भद्द, देहलक्खणेहिंतो चेवावगच्छामि, भवियव्वं तए विज्जाहरनरिन्देण। ता गेण्हाहि एयं महापुरिसववसायमेत्तसाहणं अजियबलं नाम महाविज्जं ति। पाएणमविग्घसाहणा एसा परिणामफलदा य। तओ मए सुमरिऊण बालभावसाहियं संवच्छरियवयणं 'माणणीया महापुरिस'त्ति चिन्तिऊण जंपियं 'जं तुमं भणासि' त्ति। तओ तेण विइण्णा विज्जा, साहिओ साहणोवाओ। तओ गएसु विज्जाहरेसु समुप्पन्ना मे चिन्ता। [2]सिद्धिखेत्तमेयं, एयाई य अहं।

एतच्छ्रुत्वा देवः प्रमाणमिति। ततो मां प्रलोक्य भणितं चक्रसेनेन। भद्र! निरूपय तावत् किं सा भवतः प्रियतमा नवेति। ततो विद्याधरद्वितीयो गतश्चन्दनवनाभिरामं मलयसानु। दृष्टा च सकलकलोपेताऽपि द्वितीयाचन्द्रलेखाकारमनुकुर्वती कण्ठगतजीविता विलासवती। उच्छ्वसितं मे हृदयेन। समाश्वासितैषा, कारिता विद्याधरोपनीतेन सकलेन्द्रियोपकारिणा दिव्याहारेण प्राणवृत्तिम्। कथितं चक्रसेनाय यथा सैव मे प्रियतमेति। चक्रसेनेन भणितम्-सुन्दरं जातम्। भद्र! भण, किं तेऽपरं करणीयं करोमीति। मया भणितम्-नास्त्यतोऽपि अपरं करणीयमिति। तेन भणितम्-भद्र! देहलक्षणेभ्य एवावगच्छामि भवितव्यं त्वया विद्याधरनरेन्द्रेण। ततो गृहाणैतां महापुरुषव्यवसायमात्रसाधनामजितबलां नाम महाविद्यामिति। प्रायेणाविघ्नसाधनैषा परिणामफलदा च। ततो मया स्मृत्वा बालभावकथितं सांवत्सरिकवचनं 'माननीया महापुरुषाः' इति चिन्तयित्वा जल्पितं 'यत्त्वं भणसि' इति। ततस्तेन वितीर्णा विद्या, कथितः साधनोपायः। ततो

---

१ चन्द- क। २ सिद्ध- ख।

ता कहं पुण विणा उत्तरसाहएण एयं पसाहेमि त्ति । सुमरियं च वसुभूइणो । एत्थन्तरंमि भवियव्वयानिओएण सूययन्तो विय महाविज्जासिद्धिं तावसवेसधारी समागओ वसुभूई । बाहोल्ललोयणं च सगग्गयक्खरं 'अहो देव्वपरिण्णामो' त्ति जंपमाणेण आलिङ्गिओ अहमणेण । किमेयं ति सवियक्केण पणमिओ सो मए देवीए य । 'वयस्स चिरं जीवसु, तुमं पि अविहवा होहि' त्ति जंपियमणेण । वसुभूइ त्ति पच्चभिन्नाओ मए सद्देणं । संपत्तो अहमणाचिक्खणीयं परिओसं । आणन्दबाहजलभरियलोयणं दिन्नं से मए पल्लवासणं । संपाडिय देवीए चलणसोयं । काराविओ पाणवित्तिं, पुच्छिओ वुत्तन्तं । वयस्स, कहं पुण तुमं नित्थिण्णो समुद्दं; किं वा पावियं तए; कुओ वा संपयं ति । वसुभूइणा भणियं । सुण ।

विवन्ने जाणवत्ते संपत्ते तहाविहे फलए तओ [१]फलहगदुइओ भवियव्वयानिओएण पञ्चहिं दिणेहिं लङ्घिऊण जलनिहिं लग्गो मल-

गतेषु विद्याधरेषु समुत्पन्ना मे चिन्ता-सिद्धिक्षेत्रमेतद्, एकाकी चाहम्, ततः कथं पुनर्विना उत्तरसाधकेनैतां प्रसाधयामीति । स्मृतं च वसुभूतेः । अत्रान्तरे भवितव्यतानियोगेन सूचयन्निव महाविद्यासिद्धिं तापसवेषधारी समागतो वसुभूतिः । बाष्पार्द्रलोचनं च सगद्गदाक्षरं 'अहो दैवपरिणामः' इति जल्पताऽऽलिङ्गितोऽहमनेन । किमेतदिति सवितर्केण पणतः स मया देव्या च । 'वयस्य ! चिरं जीव, त्वमपि अविधवा भव' इति जल्पितमनेन । वसुभूतिरिति प्रत्यभिज्ञातो मया शब्देन । संप्राप्तोऽनाख्यानीयं परितोषम् । आनन्दबाष्पजलभृतलोचनं दत्तं तस्मै मया पल्लवासनम् । संपादितं देव्या चरणशौचम् । कारितः प्राणवृत्तिम् । पृष्टो वृत्तान्तम् । वयस्य ! कथं पुनस्त्वं निस्तीर्णः समुद्रम् . किं वा प्राप्तं त्वया, कुतो वा साम्प्रतमिति । वसुभूतिना भणितम्–श्रृणु ।

विपन्ने यानपात्रे संप्राप्ते तथाविधे फलके ततः फलकद्वितीयो भवितव्यतानियोगेन पञ्चभिर्दिनैर्लङ्घित्वा जलनिधिं लग्नो मलयकूले,

---

१ फलग- क ।

यकूले, दिट्ठो य समुद्दतडावलोयणगएणं तावसेणं। समासासिओ तेण भणिओ य। वच्छ, तवोवणं गच्छम्ह। गओ तवोवणं। दिट्ठो कुलवई, वन्दिओ सबहुमाणं। काराविओ य तेणाहं पाणवित्तिं। पुच्छिओ पच्छा 'वच्छ, कुओ भवं' ति। साहिओ से सयलवुत्तन्तो। 'ईइसो एस संसारो' त्ति अणुसासिओ तेणं। तओ मए चिन्तियं। [1]वयस्सविउत्तस्स तवोवणं चेव रमणीयं। अलमन्नहिं गएण, अलं च सुविणय[2]समागमविब्भमे सुयणसंगमंमि [3]इमिणा संसारपरिकिलेसेणं ति। चिन्तिऊण निवेइओ कुलवइणो निययाहिप्पाओ। भणियं च तेण। वच्छ, उचियमिणं; किं तु अइरोद्दा[4] कम्मपरिणई, दुप्परिच्चया सिणेहतन्तवो, विसमाइं इन्दियाइं, अब्भत्था विसया, दुप्परिच्चओ संसारपरिकिलेसो, विसमं मुणिजणचरियं, अब्भुवगयापालणं च अणत्थसज्जयं परलोए लज्जावणिज्जयं इहलोयम्मि। ता नाऊणमुचियमागमत्थं तुलिऊणमप्पाणय जुज्जए संसारपरिकिलेसचाओ न उण अन्नह त्ति। अन्नं च। नाणओ अवगच्छामि, धरइ ते पियव-

दृष्टश्च समुद्रतटावलोकनगतेन तापसेन। समाश्वासितस्तेन भणितश्च। वत्स ! तपोवनं गच्छावः। गतो तपोवनम्। दृष्टः कुलपतिः, वन्दितः सबहुमानम्। कारितश्च तेनाहं प्राणवृत्तिम्। पृष्टः पश्चाद् 'वत्स ! कुतो भवान्' इति। कथितस्तस्मै सकलवृत्तान्तः। 'ईदृश एष संसारः' इति अनुशिष्टस्तेन। ततो मया चिन्तितम्-वयस्यवियुक्तस्य तपोवनमेव रमणीयम्। अलमन्यत्र गतेन, अलं च स्वप्नसमागमविभ्रमे सुजनसङ्गमेऽनेन संसारपरिक्लेशेनेति। चिन्तयित्वा निवेदितः कुलपतये निजाभिप्रायः। भणितं च तेन-वत्स ! उचितमिदम्, किन्तु अतिरौद्रा कर्मपरिणतिः, दुष्परित्यजाः स्नेहतन्तवः, विषमाणीन्द्रियाणि, अभ्यस्ता विषयाः, दुष्परित्यजः संसारपरिक्लेशः, विषमं मुनिजनचरितम्, अभ्युपगतापालनं चानर्थसंगतं परलोके लज्जनीयमिहलोके। ततो ज्ञात्वोचितागमार्थं तोलयित्वाऽऽत्मानं युज्यते

---

१ वयंस- क। २ -सरिसस-क। ३ न काइ परिनिद्दा कपुस्तकप्रान्तभागे। ४ अइरोद्दकम्म-क-ख।

यस्सो पाणे, भविस्सइ तेण तुह सङ्गमो। ता इमं ताव एत्थ पत्तकालं, तवस्सिजणं चेव पज्जुवासमाणो कञ्चि कालं चिट्ठसु त्ति। तओ अहं मुणिवयणाओ तुह दंसणजायपच्चासो तवस्सिजणपज्जुवासणपरो ठिओ एत्तियं कालं। तइयदियहे य सुओ मए तावसेण कुलवइणो निवेइज्जमाणो तुज्झ वुत्तन्तो। कहावसाणे य 'सो चेव मे वयस्सओ' त्ति संसिऊण कुलवइणो अणुन्नविय कुलवइं पयट्टो मणोरहापूरयं सम्पत्तो य कल्लं। दिट्ठो य विज्जाहरो, पुच्छिओ ते पवुत्तिं। पुव्वबन्धवेण विय निरवसेसा साहिया य तेण। तओ अहं भवन्तमन्नेसमाणो इह आगओ। एस मे वुत्तन्तो त्ति ॥

तओ मए चिन्तियं। भवियव्वं विज्जासंपयाए, अन्नहा कहमयण्डम्मि चेव वसुभूइणा[१] सह समागमो। साहिओ से विज्जालम्भवुत्तन्तो। ईसि विहसिऊण भणियं च तेण। भो वयंस, न अन्नहा संवच्छरियवयणं। विलासवइविज्जासंपत्तीओ चेवावगच्छामि, भवि-

संसारपरिक्लेशत्यागो न पुनरन्यथेति। अन्यच्च ज्ञानतोऽवगच्छामि, धरति ते प्रियवयस्यः प्राणान्, भविष्यति तेन तव संगमः। तत इदं तावदत्र प्राप्तकालम्, तपस्विजनमेव पर्युपासमानः कञ्चित्कालं तिष्ठेति। ततोऽहं मुनिवचनात् तव दर्शनजातप्रत्याशः तपस्विजनपर्युपासनपरः स्थित एतावन्तं कालम्। तृतीयदिवसे च श्रुतो मया तापसेन कुलपतये निवेद्यमानस्तव वृत्तान्तः। कथावसाने च 'स एव मे वयस्यः' इति शंसित्वा कुलपतयेऽनुज्ञाप्य कुलपति प्रवृत्तो मनोरथापूरकं संप्राप्तश्च कल्ये। दृष्टश्च विद्याधरः, पृष्टश्च ते प्रवृत्तिम्। पूर्वबान्धवेनेव निरवशेषा(प्रवृत्तिः)कथिता च तेन। ततोऽहं भवन्तमन्वेषमाण इहागतः। एष मे वृत्तान्त इति।

ततो मया चिन्तितम्-भवितव्यं विद्यासंपदा, अन्यथा कथमकाण्डे एव वसुभूतिना सह समागमः। कथितस्तस्मै विद्यालाभवृत्तान्तः। इषद् विहस्य भणितं च तेन। भो वयस्य! नान्यथा सांवत्सरिकवचनम्। विलासवती-विद्यासंपत्त्यैवावगच्छामि, भवितव्यं त्वया विद्या-

---

[१] सह ख।

यव्वं तए विज्जाहरनरिन्देण । ता करेहि समीहियं ॥ तओ तंमि चेव मलयसिहरे पारद्धा पुव्वसेवा । अइक्कन्ता मोणव्वयसेवणाए परिमियफलाहारस्स विसुद्धबम्भयारिणो छम्मासा । समत्तो पुव्वसेवाकप्पो । भणिया विलासवई । देवि, धीरा होहि । संपन्नं समीहियं, कय जमिह दुक्करं । संपयं अहोरत्तसज्झं फलं ति । तीए भणियं । पुज्जन्तु मणोरहा अज्जउत्तस्स । तओ मए सा 'कायरहियया इत्थिय' त्ति ठविया नाइदूरदेसवत्तिणीए मलयगिरिगुहाए । पारद्धा पहाणसेवा । उवणीयाइं दसद्धवण्णाइं कुसुमाइं । [1]ठाविया देवया । [2]विहिओ वसुभूई दिसावालो । कओ पउमासणवन्धो । निविट्ठाइं मुद्दामण्डलाइं । पारद्धो सयसाहस्सिओ मन्तजावो । अइक्कन्ता काइ वेला । जाव हसियं विय नहङ्गणेण, गज्जियं विय [3]अयालमेहेहिं, गुलुगुलियं विय समुद्देण, कम्पियं [4]विय मेइणीए । तओ मए चिन्तियं । पाविस्सइ भयं पिययमा । सुमरियं चक्कसेणवयणं 'न अन्नो विहीसियं [5]मोत्तूण उवद्दवो' त्ति । पयट्टो मन्तजावो । तओ थेववेलाए चेव दिट्ठो

धरनरेन्द्रेण । ततः कुरु समीहितम् । ततस्तस्मिन्नेव मलयशिखरे प्रारब्धा पूर्वसेवा । अतिक्रान्ता मौनव्रतसेवनया परिमितफलाहारस्य विशुद्धब्रह्मचारिणः षण्मासाः । समाप्तः पूर्वसेवाकल्पः । भणिता विलासवती । देवि ! धीरा भव, संपन्नं समीहितम् । कृतं यदिह दुष्करम् । साम्प्रतमहोरात्रसाध्यं फलमिति । तया भणितम्—पूर्यन्तां मनोरथा आर्यपुत्रस्य । ततो मया सा 'कातरहृदया स्त्री' इति स्थापिता नातिदूरदेशवर्तिन्यां मलयगिरिगुहायाम् । प्रारब्धा प्रधानसेवा । उपनीतानि दशार्धवर्णानि कुसुमानि । स्थापिता देवता । विहितो वसुभूतिदिक्पालः । कृतः पद्मासनवन्धः । निविष्टानि मुद्रामण्डलानि । प्रारब्धः शतसाहस्रिको मन्त्रजापः । अतिक्रान्ता काऽपि वेला । यावद् हसितमिव नभोङ्गणेन गर्जितमिवाकालमेघैः, गुडगुडितमिव समुद्रेण, कम्पितमिव मेदिन्या । ततो मया चिन्तितम्—प्राप्स्यति भयं प्रियतमा ।

---

१ ठविया क । २ वसुभूई दिसावालो कओ ख । ३ पलय- क । ४ पिव क । ५ दावेइ ख ।

मए दन्तग्गविभिन्नलम्बमाणाहोरणो कण्णवालिलुढियङ्कुसो अमरिसावेसकुण्डलियकरो करविक्खित्तसिसिरसीयरासारो आसारपयट्टमयवारिपरिमलो परिमलोवयन्तमुहल[1]महुयरउलो उत्तरमेहो व्व [2]गुलुगुलेन्तो 'हा अज्जउत्त हा अज्जउत्त'त्ति विलवन्तिं विलासवइमइक्कमिऊण अत्तणो चेव समुवयन्तो मत्तवारणो । न खुद्धो य चित्तेण, अवगया विहीसिया । थेववेलाए य अइभीसणकसणवण्णा सोयामणिफुलिङ्गलोयणा गलोलम्बियकरचरणमाला रुहिरोल्लनरचम्मनिवसणा कवालचसएण रुहिरासवं पियन्ती अट्टहासाणलेण नहङ्गणमुज्जोवयन्ती वामहत्थेण भयसंभन्तलोयणं विलासवइं गेण्हिऊण 'अरे रे विज्जाहरसङ्गदुव्वियड्ढ कावुरिस कहिं वच्चसि'त्ति जंपमाणी आगमणवेगाणिलनिवाडियसाहिजाला तुरियतुरियं अभिमुहमुवागच्छमाणी दिट्ठा मए दुट्ठपिसाइय त्ति । न खुद्धो हियएणं, उवसन्ता विहीसिया । थेववेलाए य अणब्भमेव गज्जियं मेहेहिं, वरिसियं रुहिरधाराहिं, फेक्कारियं सिवाहिं, [3]धाहावियं वेयालेहिं, नच्चियं कबन्धेहिं, पज्जलन्त-

स्मृतं चक्रसेनवचनं 'नान्यो विभीषिकां मुक्त्वा उपद्रवः' इति । प्रवृत्तो मन्त्रजापः । ततः स्तोकवेलायामेव दृष्टो मया दन्ताग्रविभिन्नलम्बमानाधोरणः कर्णपालिलुठितांकुशोऽमर्षावेशकुण्डलितकरः करविक्षिप्तशिशिरसीकरासार आसारप्रवृत्तमदवारिपरिमलः परिमलावपतन्मुखरमधुकरकुल उत्तरमेघ इव गुडगुडायमानो 'हा आर्यपुत्र ! हा आर्यपुत्र ! इति विलपन्तीं विलासवतीमतिक्रम्य आत्मन एव समुपयन् मत्तवारणः । न क्षुब्धश्च चित्तेन, अपगता विभीषिका । स्तोकवेलायां चातिभीषणकृष्णवर्णा सौदामिनिस्फुलिङ्गलोचना गलावलम्बितकरचरणमाला रुधिरार्द्रनरचर्मनिवसना कपालचषकेन रुधिरासवं पिवन्ती अट्टहासानलेन नभोऽङ्गणमुद्योतयन्ती वामहस्तेन भयसंभ्रान्तलोचनां विलासवतीं गृहीत्वा 'अरे रे विद्याधरसङ्गदुर्विदग्ध कापुरुष ! कुत्र व्रजसि'इति जल्पन्ती आगमनवेगानिलनिपातितशाखिजाला त्वरितत्वरितमभिमुखमुपागच्छन्ती दृष्टा मया दुष्टपिशाचिकेति । न क्षुब्धो हृदयेन, उपशान्ता विभीषिका । स्तोकवेलायां चानभ्रमेव गर्जितं मेघैः, वृष्टं

---

[1] -महुयराउलो क । [2] गुलगुलेन्तो ख । [3] धावियं क ।

नयणतारयाहिं च उद्धकेसियाहिं विमुक्क[1]निवसणाहिं [2]किलिकिलियं डाइणीहिं। न खुद्धो चित्तेणं, पणट्ठा विहीसिया। थेववेलाए य केणावि अमुणियं चेव पणट्ठचन्ददिवायरे निरयघोरन्धयारे पक्खित्तो महापायलभीसणे अयडे, दिट्ठाओ य तत्थ भयस्स वि य भयंकरीओ दाढावियरालभीसणेहिं वयणेहिं कवालमालापरिगयाहिं सिरोहराहिं नाहिमण्डलगएहिं थणेहिं पलम्बमाणमहोयरीओ सूणसवविब्भमेहि ऊरुएहिं तुङ्गतालखन्धसंठाणाहिं जङ्घाहिं निसियकप्पणीहिं नरकलेवरे [3]विगत्तमाणीओ [4]जलन्तनयणतारयं च अइभीसणमिओ तओ पुलोएमाणीओ दुट्ठरक्खसीओ 'हण हण छिन्द छिन्द भिन्द भिन्द' भणमाणीओ य धावियाओ अभिमुहं। न खुद्धो चित्तेणं, पसन्ता विहीसिया। तओ अद्धजामावसेसाए जामिणीए समत्तपाए मन्तजावे सुरहिकुसुमामोयगब्भिणो पवाइओ महुरमारुओ, निवडिया कुसुमवुट्ठी, जय जय त्ति उट्ठिओ कलयलरवो, गाइयं किन्नरीहिं। तओ थेववेलाए चेव उज्जोवयन्ती नहङ्गणं अणेयदेवयापरिगया

रुधिरधाराभिः, फेत्कारितं शिवाभिः, घाहावितं (चित्कारित)वेतालैः, नर्तितं कबन्धैः, प्रज्वलन्नयनतारकाभिश्च ऊर्ध्वकेशिकाभिर्विमुक्तनिवसनाभिः किलिकिलितं डाकिनोभिः न क्षुब्धश्चित्तेन, प्रनष्टा विभीषिका। स्तोकवेलायां च केनाप्यज्ञातमेव प्रनष्टचन्द्रदिवाकरे निरयघोरान्धकारे प्रक्षिप्तो महापातालभीषणेऽवटे। दृष्टाश्च तत्र भयस्यापि भयंकर्यो दाढाविकरालभीषणैर्वदनैः कपालमालापरिगताभिः शिरोधराभिर्नाभिमण्डलगतैः स्तनैः प्रलम्बमानमहोदर्यः सूनाशवविभ्रमैरूरुभिः तुङ्गतालस्कन्धसंस्थानाभिर्जङ्घिकाभिर्निशितकर्तनीभिर्नरकलेवरान् विकर्तयन्त्यो ज्वलन्नयनतारकं चातिभीषणमितस्ततः प्रलोकयन्त्यो दुष्टराक्षस्यो 'हत हत छिन्त छिन्त भिन्त भिन्त'इति भणन्त्यश्च धाविता अभिमुखम्। न क्षुब्धश्चित्तेन, प्रशान्ता विभीषिका। ततोऽर्धयामावशेषायां यामिन्यां समाप्तप्राये मन्त्रजापे सुरभिकुसुमामोदगर्भितः प्रवातो मधुरमारुतः, निपतिता कुसुमवृष्टिः, जय जय इत्युत्थितः कलकलरवः, गीतं किन्नरीभिः। ततः स्तोकवेलायामेव

---

[1] -निवसणं ख । [2] किलिगिलियं क । [3] विकप्पमाणीओ क । [4] सूजलन्त-क ।

आगया अजियबल त्ति। दिट्ठा य सा मए

दित्ताणलस्स व सिहा पहासमिद्धि व्व सारयरविस्स। जोण्हा छणचन्दस्स व वसन्तकमलायरसिरि व्व॥

भणियं च तीए। अहो ते ववसाओ, अहो ते पोरुसं, अहो ते निच्छओ, अहो ते उवओगो त्ति। ता सिद्धा ते अहं। उवरम इओ ववसायाओ त्ति। तओ मए असमत्तकइवयमन्तजावेण विहीसियासङ्काए अपणमिऊण भयवइं समाणिओ मन्तजावो, पणमिया य पच्छा। एत्थन्तरंमि

पहाणकायसंगया सुयन्धगन्धगन्धिया। अवायमल्ल[१]मण्डिया पइण्णहारचन्दिमा॥
लसन्तहेमसुत्तया फुरन्तआउहप्पहा। चलन्तकण्णकुण्डला जलन्तसीसभूसणा॥

उद्द्योतयन्ती नभोऽङ्गणमनेकदेवतापरिगताऽऽगताऽजितबलेति। दृष्टा च सा मया।

दीप्तानलस्येव शिखा प्रभासमृद्धिरिव शारदरवेः। ज्योत्स्ना क्षणचन्द्रस्येव वसन्तकमलाकरश्रीरिव॥

भणितं च तया-अहो ते व्यवसायः, अहो ते पौरुषम्, अहो ते निश्चयः, अहो ते उपयोग इति। ततः सिद्धा तेऽहम्। उपरम इतो व्यवसायादिति। ततो मयाऽसमाप्तकतिपयमन्त्रजापेन विभीषिकाशङ्कयाऽप्रणम्य भगवतीं समाप्तो मन्त्रजापः। प्रणता च पश्चात्। अत्रान्तरे

प्रधानकायसंगताः सुगन्धगन्धगन्धिताः। अम्लानमाल्यमण्डिताः प्रकीर्णहारचन्द्रिकाः॥
लसद्धेमसूत्रकाः स्फुरदायुधप्रभाः। चलत्कर्णकुण्डला ज्वलच्छीर्षभूषणाः॥

---

१ –मण्डना क।

निबद्धजोव्वणुद्धरा सुकन्तकन्नसंगया। मियङ्कसोहियाणणा नवारविन्दसच्छहा ॥
समत्तलक्खणङ्किया विचित्तकामरूविणो। समुद्ददुन्दुहिस्सणा पणामसंठियञ्जली ॥

समागया विज्जाहर त्ति।

भणियं च देवयाए। पुत्तय, महापुरिसववसायगुणाणुरञ्जियं पडिवन्नभिच्चभावं पणमइ चण्डसीहप्पमुहं भवन्तमेव विज्जाहरबलं। तओ मए 'एस [1]भयवईपसाओ' त्ति भणिऊण समाइच्छिया विज्जाहरा। भणियं च देवयाए। पुत्तय, करेमि ते विज्जाहरनरिन्दाहिसेयं। मए भणियं। करेउ भयवई, किंतु देवीए वसुभूइणो य पच्चक्खं ति। तओ सद्दाविओ वसुभूई, जाव न जंपइ त्ति; तओ निहालिओ, जाव न दीसइ त्ति। तओ आसङ्कियं मे हियएण। विज्जाहरसमेओ य नहङ्गणगमणेणं पयट्टो गवेसिउं। दिट्ठो य एगंमि निगुञ्जे इओ

निबद्धयौवनोद्धराः सुकान्तकर्णसंगताः। मृगाङ्कशोभितानना नवारविन्दसच्छायाः ॥
समस्तलक्षणाङ्किता विचित्रकामरूपिणः। समुद्रदुन्दुभिस्वनाः प्रणामसंस्थिताञ्जलयः ॥

समागता विद्याधरा इति।

भणितं च देवतया। पुत्रक! महापुरुषव्यवसायगुणानुरञ्जितं प्रतिपन्नभृत्यभावं प्रणमति चण्डसिंहप्रमुखं भवन्तमेव विद्याधरबलम्। ततो मया 'एष भगवतीप्रसादः' इति भणित्वा समागता (सत्कृता) विद्याधराः। भणितं च देवतया-पुत्रक! करोमि ते विद्याधरनरेन्द्राभिषेकम्। मथा भणितम्-करोतु भगवती, किन्तु देव्या वसुभूतेश्च प्रत्यक्षमिति। ततः शब्दायितो वसुभूतिः, यावद् न जल्पतीति। ततो निभालितो यावद् न दृश्यते इति। तत आशङ्कितं मे हृदयेन। विद्याधरसमेतश्च नभोङ्गणगमनेन प्रवृत्तो गवेषयितुम्। दृष्टश्च

---

[1] भयवती-ख।

तओ परिब्भमन्तो वसुभूई। सो य पेच्छिऊण अम्हे उभयकरगहियरुक्खसालो 'अरे रे दुट्ठविज्जाहरा, पियवयंसस्स जीवियाओ वि अब्भहिययरं देविं विलासवइं अवहरिऊण कहिं गच्छसि'त्ति भणमाणो धाविओ अहिमुहं ति। तओ मए चिन्तियं। अवहरिया देवी, अफलो मे परिस्समो। पुच्छिओ वसुभूई 'कहिं कहिं देवि'त्ति। तओ तेण विज्जाहरविप्पलद्धबुद्धिणा वाहिओ मे घाओ। वञ्चिओ सो मए अवहरिया य से साहा। तओ गेण्हिऊण हत्थे 'वयस्स, अलमन्नहावियप्पिएण; साहेहि ताव, कहिं देवि'त्ति पुणो पुणो पुच्छिओ। तओ विसेसेण पउत्तलोयणवावारं मं पुलोइऊण भणियमणेण। भो वयस्स, सुण। पउत्तविज्जासाहणारम्भे तुमंमि जाए अड्ढरत्तसमए समागयं विज्जाहरवन्द्रं, विहीसियासङ्काए य अवमन्नियं तं मए। तओ थेववेलाए चेव 'हा अज्जउत्त, हा अज्जउत्त'त्ति आयण्णिओ देवीए सद्दो। आसङ्कियं मे हियएणं। दिट्ठा य विज्जाहरविमाणारूढा 'अज्ज वसुभूई परित्तायाहि परित्तायाहि'त्ति अक्कन्दमाणी देवी।

एकस्मिन् निकुञ्जे इतस्ततः परिभ्रमन् वसुभूतिः। स च प्रेक्ष्यास्मान् उभयकरगृहीतवृक्षशाखः 'अरे रे दुष्टविद्याधर! प्रियवयस्यस्य जीवितादप्यधिकतरां देवीं विलासवतीमपहृत्य कुत्र गच्छसि' इति भणन् धावितोऽभिमुखमिति। ततो मया चिन्तितम्-अपहृता देवी, अफलो मे परिश्रमः। पृष्टो वसुभूतिः 'कुत्र कुत्र देवी' इति। ततस्तेन विद्याधरविप्रलब्धबुद्धिना वाहितो मे घातः। वञ्चितः स मया, अपहृता च तस्य शाखा। ततो गृहीत्वा हस्ते 'वयस्य! अलमन्यथा विकल्पितेन, कथय तावत् कुत्र देवी' इति पुनः पुनः पृष्टः। ततो विशेषेण प्रयुक्तलोचनव्यापारं मां प्रलोक्य भणितमनेन। भो वयस्य! शृणु। प्रयुक्तविद्यासाधनारंभे त्वयि जातेऽर्धरात्रसमये समागतं विद्याधरवन्द्रम्। विभीषिकाशङ्कया चावमतं तन्मया। ततः स्तोकवेलायामेव 'हा आर्यपुत्र! हा आर्यपुत्र! इत्याकर्णितो देव्याः शब्दः। आशङ्कितं मे हृदयेन। दृष्टा च विद्याधरविमानारूढा 'आर्य वसुभूते! परित्रायस्व परित्रायस्व' इत्याक्रन्दमाना देवी। संभ्रमविशेषतः

---

१ त्ति भणंतीए ख।

संभमविसेसओ संजायासंकेण निरूविया गुहाए जाव नत्थि। तओ विमाणाणुसारेणं धाविओ मग्गओ, न पावियं च विमाणं। अओ न याणामि; संपयं कहिं देवि त्ति। मए चिन्तियं। विज्जाहरेण हरिया देवी। अत्थि य मे गयणगमणसत्ती। ता कहिं सो नइस्सइ। भणिओ य वसुभूई। परिच्चय विसायं। सिद्धा मे अजियबला। ता थेवमेयं ति। एत्थन्तरंमि समागया विज्जा। भणियं च तीए। वच्छ, किमेयं ति। साहिओ से वुत्तन्तो। को पुण तुमं[1] परिहवइ त्ति कुविया य एसा। पेसिया दिसो दिसं तीए अन्नेसणनिमित्तं पवणगइप्पमुहा विज्जाहरा। विज्जासमाएसेण य ठिया अम्हे तहिं चेव मलयसिहरे। तइयदियहंमि य समागओ पवणगई। भणियं च तेण। देव, उवलद्धा देवी। मए भणियं। कत्थ उवलद्ध त्ति। तेण भणियं। देव, सुण। अत्थि वेयड्ढपव्वए रहनेउरचक्कवालउरं नाम नयरं। तत्थ उवलद्ध त्ति। मए भणियं। कहं विय। तेण भणियं। देव, सुण। पत्थिओ देवसमाएसेणाहं परिब्भमन्तो गओ रहनेउरचक्कवालउरं नयरं। दिट्ठं च तं सव्वमेव उव्विग्गजणवयं सव्वाययणसंपाइयपूओवयारं भमन्तसगडबलिसहस्ससंकुलं चच्चरसमारद्धविविहलक्खहोमं च। तओ मए तत्थ पुच्छिओ एगो विज्जाहरो 'भद्द, किमेयं' ति। तेण भणियं। सामिणो दुन्नयफलस्स कुसुमुग्गमो

संजाताशङ्केन निरूपिता गुहायां यावन्नास्ति। ततो विमानानुसारेण धावितो मार्गतः (पृष्ठतः), न प्राप्तं च विमानम्। अतो न जानामि साम्प्रतं कुत्र देवीति। मया चिन्तितम्-विद्याधरेण हृता देवी। अस्ति च मे गगनगमनशक्तिः, ततः कुत्र स नेष्यति। भणितश्च वसुभूतिः। परित्यज विषादम्, सिद्धा मेऽजितबला, ततः स्तोकमेतदिति। अत्रान्तरे समागता विद्या। भणितं च तया-वत्स! किमेतदिति। कथितस्तस्यै वृत्तान्तः। 'कः पुनस्त्वां परिभवति' इति कुपिता चैषा। प्रेषिता दिशि दिशि तयाऽन्वेषणनिमित्तं पवनगतिप्रमुखा विद्याधराः। विद्यासमादेशेन च स्थिता वयं तत्रैव मलयशिखरे। तृतीयदिवसे च समागतः पवनगतिः। भणितं च तेन-देव! उप-

---

[1] मं क।

त्ति । मए भणियं । कहं विय । तेण भणियं । सुण । अत्थि एत्थ अणङ्गरई नाम विज्जाहरनयरसामी । तेण मयणवसवत्तिणा कस्सइ महापुरिसस्स विज्जासाहणुज्जयस्स अवहरिऊण पिययमा इहं आणीय त्ति । अणिच्छमाणिं च तं बला [1]गेण्हिउं पवत्तो । एत्थन्तरंमि 'कहा एस' त्ति अणवेक्खिऊण अहयं पवड्ढमाणकोवाणलो 'अरे रे दुट्ठविज्जाहरा, कहं मए जीवमाणंमि मम जायं परिहवसि'त्ति 'को एत्थ चिट्ठइ; अरे खग्गं खग्गं' ति भणमाणो उट्ठिओ अमरिसेण पयट्टो अहिमुहं । तओ '[2]पसीयउ देवो'त्ति जंपियं पवणगइणा। भणियं च तेण । देव, कहाणयमिणं; न उण केसरिकिसोरजायं पसज्झं सारमेओ अहिहवइ । ता कहावसाणं पि ताव निसामेउ देवो त्ति। तओ विलिऊण उवविट्ठो अहं पुणो । भणियं च तेण । वला गेण्हणपवत्तस्स य 'असमओ' त्ति काऊण उवट्ठिया महाकालि-

लब्धा देवी। मया भणितम्-कुत्रोपलब्धेति। तेन भणितम्-देव ! श्रृणु। अस्ति वैताढ्यपर्वते रथनूपुरचक्रवालपुरं नाम नगरम् , तत्रोपलब्धेति। मया भणितं-कथमिव। तेन भणितम्-देव ! शृणु। प्रस्थितो देवसमादेशेनाहं परिभ्रमन् गतो रथनूपुरचक्रवालपुरं नगरम्। दृष्टं च तत्सर्वमेवोद्विग्नजनव्रजं सर्वायतनसंपादितपूजोपचारं भ्रमच्छकटवलिसहस्रसंकुलं चत्वरसमारब्धविविधलक्षहोमं च। ततो मया तत्र पृष्ट एको विद्याधरो 'भद्र ! किमेतद्' इति। तेन भणितम्-स्वामिनो दुर्नयफलस्य कुसुमोद्गम इति। मया भणितम्-कथमिव। तेन भणितम्-श्रृणु। अस्त्यत्र अनङ्गरतिर्नाम विद्याधरनगरस्वामी। तेन मदनवशवर्तिना कस्यचिद् महापुरुषस्य विद्यासाधनोद्यतस्य अपहृत्य प्रियतमेहानीतेति। अनिच्छन्तीं च तां वलाद् ग्रहीतुं प्रवृत्तः। अत्रान्तरे 'कथा एषा' इत्यनवेक्ष्याहं प्रवर्धमानकोपानलः 'अरे रे दुष्टविद्याधर ! कथं मयि जीवति मम जायां परिभवसि'इति 'कोऽत्र तिष्ठति, अरे खड्गं खड्गमिति भणन्नुत्थितोऽमर्षेण प्रवृत्तोऽभिमुखम्। ततः 'प्रसीदतु देवः' इति जल्पितं पवनगतिना। भणितं च तेन-देव ! कथानकमिदम् , न पुनः केसरिकिशोरजायां प्रसह्य सारमेयोऽभिभवति। ततः कथावसानमपि तावद्

---

[1] गहिउं क । [2] पसीयउ पसीयउ देवो त्ति ग ।

विज्जा। संजाओ भूमिकम्पो, निवडियाओ उक्काओ, समुब्भूओ निग्घाओ। भणिओ य तीए अणङ्गरई। भो भो न जुत्तं इमं संपत्तविज्जाहरनरिन्दसद्दस्स काउरिसचेट्ठियं। तओ नियत्तो सो इमाओ ववसायाओ काएण, न उण चित्तेण। [1]पयलियाए य नयरदेवयाए पुणो नयरविणासो आसि त्ति संजायसंकेहि पत्थुयं सन्तिगम्मं नायरएहिं। तओ मए भणियं। कहिं पुण सा इत्थिया चिट्ठइ। तेण भणियं। नरिन्दभवणुज्जाणे सहयारपायवतले त्ति। तओ मए नाइदूरदेसवत्तिणा गयणयलसंठिएण निरूविया देवी। दिट्ठा य अणेयविज्जाहरीवन्द्रमज्झगया वामकरयलपणामियवयणकमलमुव्वहन्ति त्ति। आरक्खियविज्जाहरसंबाहभावओ अणाएसओ य देवस्स न गओ तीए समीवं। [2]आगओ इहइं। एयं च सोऊण देवो पमाणं ति॥

तओ मए पुलइओ वसुभूई। भणियं च तेण। भो वयस्स, इमं ताव एत्थ पत्तकालं। नयरदेवओवएसेण लज्जिओ खु सो राया।

निशामयतु देव इति। ततो व्रीडित्वा उपविष्टोऽहं पुनः। भणितं तेन, बलाद्ग्रहणप्रवृत्तस्य च 'असमयः' इति कृत्वोपस्थिता महाकालीविद्या। संजातो भूमिकम्पः, निपतिता उल्काः, समुद्भूतो निर्घातः। भणितश्च तयाऽनङ्गरतिः। भो भो न युक्तमिदं संप्राप्तविद्याधरनरेन्द्रशब्दस्य कापुरुषचेष्टितम्। ततो निवृत्तः सोऽस्माद् व्यवसायात् कायेन न पुनश्चित्तेन। प्रचलितायां(प्रज्वलितायां?) च नगरदेवतायां पुनर्नगरविनाश आसीदिति संजाताशङ्कैः प्रस्तुतं शान्तिकर्म नागरकैः। ततो मया भणितम्—कुत्र पुनः सा स्त्री तिष्ठति। तेन भणितम्—नरेन्द्रभवनोद्याने सहकारपादपतले इति। ततो मया नातिदूरदेशवर्तिना गगनतलसंस्थितेन निरूपिता देवी। दृष्टा चानेकविद्याधरीवन्द्रमध्यगता वामकरतलन्यस्तवदनकमलमुद्वहन्तीति। आरक्षकविद्याधरसंबाधभावतोऽनादेशतश्च देवस्य न गतस्तस्याः समीपम्। आगत इह। एतच्छ्रुत्वा देवः प्रमाणमिति॥

---

१ पलिययाए क। २ आगओ य क।

ता पेसेहि से सामपुव्वगमेव देवीजायणनिमित्तं कंचि दूयं ति। तओ बम्भयत्तेण भणियं। सदाराणयणे वि दूयसंपेसणमपुव्वो सामभेओ। समरसेणेण उत्तं। तस्स वि दूयसंपेसणं ति महन्तो अणक्खो। वाउवेगेण भणियं। न संपन्नमहिलसियं। वाउमित्तेण भणियं। देवो जाणइ त्ति। विहसियं चण्डसीहेण, उन्नाडियं पिङ्गलगन्धारेण, पयम्पियं मयङ्गेण, नीससियं अमयप्पहेण, पंचलियं[1] देवोसहेण। तओ सुभडभावेण वीरेक्करसाणं अणभिमओ वि विज्ञाहराणं 'एस ट्ठिइ'त्ति पडिबोहिऊण ते पवणगई चेव विसज्जिओ दूओ त्ति। भणिओ य एसो। भद्द, वत्तव्वो तए स विज्ञाहरनरिन्दो। जं खलु अयसस्स कारयं[2] अत्तणो हारयं धिईए वारयं लोयस्स हासयं सत्तुणो आणन्दयं उभयलोयविरुद्धं च, तं कहं सप्पुरिसो समायरइ। विरुद्धं च परदारहरणं[3]। ता परिच्चय एवं असव्ववसायं, पेसेहि मे जायं ति। अपडिवज्जमाणे य वत्तव्वा तए देवी, जहा 'न कायव्वो तए खेओ, उवलद्धा तुमं ति; अवस्सं थोवदिणब्भन्तरे मोया-

ततो मया दृष्टो वसुभूतिः। भणितं च तेन–भो वयस्य! इदं तावदत्र प्राप्तकालम्। नगरदेवतोपदेशेन लज्जितः खलु स राजा। ततः प्रेषय तस्य सामपूर्वकमेव देवीयाचननिमित्तं कंचिद् दूतमिति। ततो ब्रह्मदत्तेन भणितम्–स्वदारानयनेऽपि दूतसंप्रेषणमपूर्वः सामभेदः। समरसेनेनोक्तम्–तस्यापि दूतसंप्रेषणमिति महान् (अणक्खो दे.) अपवादः। वायुवेगेन भणितम्–न संपन्नमभिलषितम्। वायुमित्रेण भणितम्–देवो जानातीति। विहसितं चण्डसिंहेन, उन्नाटितं पिङ्गलगान्धारेण, प्रकम्पितं मतङ्गेन, निःश्वसितममृतप्रभेण, प्रचलितं देवर्षभेण। ततः सुभटभावेन वीरैकरसानामनभिमतोऽपि विद्याधराणाम् 'एषा स्थितिः' इति प्रतिबोध्य तान् पवनगतिरेव विसर्जितो दूत इति। भणितश्चैषः, भद्र! वक्तव्यस्त्वया स विद्याधरनरेन्द्रः। यत् खल्वयशसः कारकमात्मनो हारकं धृत्या वारकं लोकस्य हासकं शत्रोरानन्दकमुभयलोकविरुद्धं च, तत्कथं सत्पुरुषः समाचरति। विरुद्धं च परदारहरणम्। ततः परित्यजैतमसद्व्यवसायम्, प्रेषय मे

---

१ न चलियं क। २ कारणं ख। ३ परदारगमणं किं पुण हरणं ति क।

वेमि'। तओ 'जं देवो आणवेइ'त्ति भणिऊण गओ पवणगई। बिइयदियहे य आगओ। भणियं च तेण। देव, भणिओ जहाइट्ठ देवेण सो विज्जाहराहमो। न पडिवन्नं च देवसासणं। भणियं च तेण। कहं धरणिगोयरो वि मे 'परिच्चय एयं असव्ववसायं' ति आणं पेसेइ। ता न पेसेमि से जायं। साहेउ जस्स साहियव्वं ति। देवीए य विन्नत्तं। अज्जउत्तस्स घरिणिसद्दं वहन्तीए को महं खेओ त्ति॥ तओ एयं सोऊण खुहिया विज्जाहरभडा। गरुयवियम्भमाणामरिसविसेसेण हुंकारियं बम्भयत्तेण, रणरसुच्छाहपुलइएण अप्फालिओ भुओ समरसेणेण, रोसरज्जन्तनयणतारया भिउडीविसेसभीसणा खग्गरयणंमि निवाइया दिट्ठी वाउवेगेण, [1]रिउपहारविसमं [2]उन्नामियं वच्छत्थलं वाउमित्तेण, कोवाणलजलिएणं पिव अन्धारियं मुहं चण्डसीहेणं, उव्वेल्लिउद्धबाहुजुयलं वियम्भियं पिङ्गलगन्धारेण, पयम्पियमहिहरं समाहयं धरणियलं मयङ्केण, आसन्नसमरपरिओसफुरियनयणमुहेण आससियं अमियप्पहेण, नीसेसभरियगिरिगुहाकन्दरं

जायामिति। अप्रतिपद्यमाने च वक्तव्या त्वया देवी, 'यथा न कर्तव्यस्त्वया खेदः, उपलब्धा त्वमिति, अवश्यं स्तोकदिनाभ्यन्तरे मोचयामि' ॥ ततो 'यद् देव आज्ञापयति' इति भणित्वा गतः पवनगतिः। द्वितीयदिवसे चागतः। भणितं च तेन-देव! भणितो यथादिष्ट देवेन स विद्याधराधमः। न प्रतिपन्नं च देवशासनम्। भणितं च तेन, कथं धरणीगोचरोऽपि मे परित्यजैतमसद्व्यवसायम्' इति आज्ञां प्रेषयति। ततो न प्रेषयामि तस्य जायाम्। कथयतु यस्य कथयितव्यमिति। देव्या च विज्ञप्तम्-आर्यपुत्रस्य गृहिणीशब्दं वहन्त्याः को मम खेद इति॥ तत एतच्छ्रुत्वा क्षुब्धा विद्याधरभटाः। गुरुविजृम्भमाणामर्षविशेषेण हुंकारितं ब्रह्मदत्तेन, रणरसोत्साहपुलकितेनास्फालितो भुजः समरसेनेन, रोषरज्यमाननयनतारका भृकुटिविशेषभीषणा खड्गरत्ने निपातिता दृष्टिर्वायुवेगेन, रिपुप्रहारविषममुन्नामितं वक्षःस्थलं वायुमित्रेण, कोपानलज्वलितेनेवान्धकारितं मुखं चण्डसिंहेन, उद्वेल्लितोर्ध्वबाहुयुगलं विजृम्भितं पिङ्गलगान्धारेण, प्रकम्पितम-

---

१ रिवु- ख । २ उन्नाडियं ख ।

हसियं देवोसहेणं ॥ तओ मए भणियं। आसन्नविणिवाओ पणट्ठबुद्धिविहवो य सो [1]तवस्सी। ता अलं तंमि संरम्भेण। चिट्ठह तुब्भे। अहं पुण खग्ग[2]दुइओ चेव इओ गच्छिऊण दंसेमि से भूमिगोयरपरक्कमं ति। विज्जाहरेहि भणियं। देव, असमत्थो खु सो देवस्स भिच्चपरक्कमं पि पे[3]क्खिउं, [4]किमङ्ग पुण देवपरक्कमं ति।

एत्थन्तरंमि मिलियं विज्जाहरबलं। [5]उवणीयं मे विमाणं, अजियबल[6]पवत्तिओ उवारूढो वसुभूइसमेओ विमाणे। [7]समाहयाइं समरमङ्गलतूराइं। अणुगूलमारुयन्दोलिरविमाणधयवडं चलियं विज्जाहरबलं। समुग्घुट्ठो जयजयसद्दो, निवडिया कुसुमवुट्ठी, समुब्भूओ आणन्दो। आगासगमणेणं च पेच्छमाणो नाणाविहगामागरनगरसयसोहियं महिमण्डलं अजायपरिस्समो रणरसुच्छाहेण थेववेलाए चेव पत्तो वेयड्ढपव्वयं। अजियबलाएसओ य आवासिओ हेट्ठओ। कओ तिरत्तोववासो, सव्वविज्जाणं च संपाडियाओ पूयाओ।

हीधरं समाहतं धरणीतलं मतङ्गेन, आसन्नसमरपरितोषस्फुरितनयनमुखेनाश्वसितममृतप्रभेण, निःशेषभृतगिरिगुहाकन्दरं हसितं देवर्षभेण ॥ ततो मया भणितम्—आसन्नविनिपातः प्रनष्टबुद्धिविभवश्च स तपस्वी। ततोऽलं तस्मिन् संरम्भेण। तिष्ठत यूयम्। अहं पुनः खड्गद्वितीय एव इतो गत्वा दर्शयामि तस्मै भूमिगोचरपराक्रममिति। विद्याधरैर्भणितम्—देव! असमर्थः खलु स देवस्य भृत्यपराक्रममपि प्रेक्षितुं किमङ्ग पुनर्देवपराक्रममिति ॥

अत्रान्तरे मिलितं विद्याधरबलम्। उपनीतं मे विमानम्, अजितबलाप्रवर्तित उपारूढो वसुभूतिसमेतो विमाने। समाहतानि समरमङ्गलतूर्याणि। अनुकूलमारुतान्दोलयद्विमानध्वजपटं चलितं विद्याधरबलम्। समुद्घुष्टो जयजयशब्दः, निपतिता कुसुमवृष्टिः, समुद्भूत आनन्दः। आकाशगमनेन च प्रेक्षमाणो नानाविधग्रामाकरनगरशतशोभितं महीमण्डलमजातपरिश्रमो रणरसोत्साहेन स्तोकवेलायामेव प्राप्तो

---

१ वराओ क। २ –दुतीओ ख। ३ पेच्छिउं ग। ४ किं पुण ग। ५ उवणयं ख। ६ –पवत्तियं उ ख। ७ समाहयं समरसंगलतूरं ख।

मेत्तिमुवगया मे सेसविज्जाहरा। मुणियं अणङ्गरइणा अवज्ञाविलसिएणं। पेसिओ तेण दुम्मुहो नाम सेणावई, समागओ महया विज्जाहरबलेणं। आगयं परबलं ति [1]उद्धाइओ अम्हाण सेन्नंमि कलयलो। आहया समरभेरी। पवत्ता संनज्झिउं विज्जाहरा। गहियं मे खग्गरयणं॥ एत्थन्तरंमि [2]समागओ दूओ। भणियं च तेण। भो भो पवन्नभूमिगोयरभिच्चभावा विज्जाहरभडा, निसामेह सेणावइसासणं। पेसिओ अहं अणङ्गरइसेणावइणा दुम्मुहाभिहाणेणं। भणियं च तेण। अत्थि तुम्हाणं अइभूमिगयमोहाणं अपडिहयसासणेण देवेण अणङ्गरइणा सह समरसद्धा, पयट्टा य तुब्भे देवरायहाणिं। ता किं इमिणा किलेसेण। सज्जा होह। समाणेमि अहं देवस्स एगभिच्चो एत्थेव तुम्हाणं विग्गहं ति। एयं च सोऊण 'नाणङ्गरई आगओ' त्ति मुक्कं मए खग्गरयणं, मउलियं विज्जाहरबलं। सेणावई आगओ त्ति, अहं पि [3]इहइं सेणावइ त्ति उट्ठिओ चण्डसीहो। भणियं च तेण। [4]देव, देहि आणत्तिं। पेक्खन्तु [5]देवस्स भिच्चविलसियं विज्जाहर-

वैताढ्यपर्वतम्। अजितबलादेशतश्चावासितोऽधः। कृतस्त्रिरात्रोपवासः, सर्वविद्यानां च संपादिताः पूजाः। मैत्रीमुपगता मे शेषविद्याधराः। ज्ञातमनङ्गरतिनाऽवज्ञाविलसितेन। प्रेषितस्तेन दुर्मुखो नाम सेनापतिः, समागतो महता विद्याधरबलेन। आगतं परबलमित्युद्धावितोऽस्माकं सैन्ये कलकलः। आहता समरभेरी। प्रवृत्ताः संनद्धुं विद्याधराः। गृहीतं मया खङ्गरत्नम्। अत्रान्तरे समागतो दूतः। भणितं च तेन। भो भोः प्रपन्नभूमिगोचरभृत्यभावा विद्याधरभटाः! निशामयत सेनापतिशासनम्। प्रेषितोऽहमनङ्गरतिसेनापतिना दुर्मुखाभिधानेन। भणितं च तेन-अस्ति युष्माकमतिभूमिगतमोहानामप्रतिहतशासनेन देवेन अनङ्गरतिना सह समरश्रद्धा. प्रवृत्ताश्च यूयं देवराजधानीम्। ततः किमनेन क्लेशेन। सज्जा भवत। समापयाम्यहं देवस्यैकभृत्योऽत्रैव युष्माकं विग्रहमिति। एतच्च श्रुत्वा 'नानङ्गरतिरागतः' इति मुक्तं मया खङ्गरत्नम्, मुकुलितं विद्याधरबलम्। सेनापतिरागत इति, अहमपीह सेनापतिरित्युत्थितश्चण्डसिंहः। भणितं

---

१ उद्धाइओ ग। २ से समा- ख। ३ इह उ क। ४ देह आणत्तिं क। ५ देवभिच्चस्स क।

भडा। तओ मए 'उचियमेयं' ति चिन्तिऊण दिन्नं कण्ठकुसुमदामं। पणामपुव्वयं गहियं च णेण, [1]ठावियमुत्तिमङ्गे। धाविओ दुम्मुहबलाभिमुहं। ठिओ अहं विमाणे सह विज्जाहरेहिं। आगया समरपेक्खगा सुरसिद्धा अच्छराओ य। पवत्तमाओहणं। मेहजालेण विय ओत्थयं अम्बरयलं सरजालेण, निग्घाया विय पडन्ति खग्गप्पहारा, आहम्मन्ति [2]विज्जाहरभडा, मिलिया य नायगा। तओ जंपियं चण्डसीहेण। अरे रे दुरायार, अग्गओ होहि। अहं चण्डसीहो, तुमं दुम्मुहो त्ति। समागओ एसो। लग्गं गयाजुद्धं। दिन्नो पहारो दुम्मुहेण, पडिच्छिओ चण्डसीहेण। तओ रोसायम्बलोयणेणं 'कीइसो तुह [वि दिन्नो हवइ] पहारो, सहसु मे संपयं' ति भणमाणेण दिन्नो से[3] उत्तिमङ्गे, विदारियं च [से उत्तिमङ्गं][4]। जाओ विहलंघलो य सो मुक्करुहिरुग्गारं निवडिओ धरणिवट्ठे। भग्गं दुम्मुहबलं। उग्घुट्ठो जयजयरवो। विमुक्कं सुरसिद्धहि उवरि चण्डसीहस्स कुसुमवरिसं। तओ विणिज्जिए सेणावइंमि चडिओ [5]अहं

च तेन-देव! देहि आज्ञप्तिमिति। प्रेक्षन्तां देवस्य भृत्यविलसितं विद्याधरभटाः। ततो मया 'उचितमेतद्' इति चिन्तयित्वा दत्तं कण्ठकुसुमदाम। प्रणामपूर्वकं गृहीतं च तेन, स्थापितमुत्तमाङ्गे। धावितो दुर्मुखबलाभिमुखम्। स्थितोऽहं विमाने सह विद्याधरैः। आगताः समरप्रेक्षकाः सुरसिद्धा अप्सरसश्च। प्रवृत्तमायोधनम्। मेघजालेनेवावस्तृतमम्बरतलं शरजालेन, निर्घाता इव पतन्ति खड्गप्रहाराः, आहन्यन्ते विद्याधरभटाः, मिलिताश्च नायकाः। ततो जल्पितं चण्डसिंहेन। अरे रे दुराचार! अग्रतो भव, अहं चण्डसेनस्त्वं दुर्मुख इति। समागत एषः। लग्नं गदायुद्धम्। दत्तः प्रहारो दुर्मुखेन, प्रतीष्टश्चण्डसिंहेन। ततो रोषाताम्रलोचनेन 'कीदृशस्तव [अपि दत्तो भवति] प्रहारः, सहस्व मे साम्प्रतम्' इति भणता दत्तस्तस्योत्तमाङ्गे, विदारितं च [तस्योत्तमाङ्गम्]। जातो विह्वलाङ्गश्च स मुक्तरुधिरोद्गारं निपतितो धरणीपृष्ठे। भग्नं दुर्मुखबलम्। उद्घुष्टो जयजयरवः। विमुक्तं सुरसिद्धैरुपरि चण्डसिंहस्य कुसुमवर्षम्। ततो विनिर्जिते

---

१ ठविय-ख। २ विज्जाहरा। ३ ख पुस्तके नास्ति। ४ 'तेण' इत्यधिकः पाठः खपुस्तके। ५ हं ख।

वेयड्ढपव्वयं, गओ रहनेउरचक्कवालउरविसयं। पेसिया मए अणङ्गरइसमीवं दुवे विज्जाहरा। भणिया य एए। भणह तं अणङ्गरइं, जहा किमणेण अप्पोययमीणचेट्ठिएण; मोत्तूण रज्जं तवोवणं वा जाहि, ममासमकोहिन्धणुप्पन्नसत्थाणलग्गाहुई वा हवाहि त्ति। गया ते मम चरणजुयलं वन्दिउं। आगया थेववेलाए। भणियं च तेहिं। देव, अणुचिट्ठियं देवसासणं अम्हेहि। भणिओ जहाइट्ठमेव देवेण अणङ्गरई। कुविओ य एसो। समाहयं धरणिवट्ठं। अरे धरणिगोयर, अहं तव सत्थाणलग्गाहुई [1]हवामि न [2]उण तुमं ममं ति; ता किं एइणा, थेवमेत्थमन्तरं ति। भणिऊण समाइट्ठं च तेण। [3]देह सन्नाहभेरिं [4]रएह सगडवूहं; अइभूमिमागओ धरणिगोयरो त्ति। तओ आहया भेरी, निसामिओ भेरीरवो अणेगहा सेणिगेहिं। पढमं भयहित्थलोयणेहिं कुपुरिसेहिं, आसन्नविरहूसुयगलन्तबाहाहिं सेणाभडीहिं, चिररूढफुडियवणकन्दरेहिं रणरहसुब्भिज्जमाणपुलएहिं सामिसुकयपडिमोयणासयण्हेहिं सुहडेहिं, पढमरणदंसणूसुएहिं रायकुमारेहिं,

सेनापतौ आरूढोऽहं वैताढ्यपर्वतम्, गतो रथनूपुरचक्रवालपुरविषयम्। प्रेषितौ मयाऽनङ्गरतिसमीपं द्वौ विद्याधरौ। भणितौ चैतौ। भणत तमनङ्गरतिम्, यथा किमनेन अल्पोदकमीनचेष्टितेन, मुक्त्वा राज्यं तपोवनं वा याहि, ममासमक्रोधेन्धनोत्पन्नशस्त्रानलाग्राहुतिर्भवेति। गतौ तौ मम चरणयुगलं वन्दितुम्। आगतौ स्तोकवेलायाम्। भणितं च ताभ्याम्–देव! अनुष्ठितं देवशासनमावाभ्याम्। भणितो यथादिष्टमेव देवेनानङ्गरतिः। कुपितश्चैषः। समाहतं धरणीपृष्ठम्। अरे धरणीगोचर! अहं तव शस्त्रानलाग्राहुतिर्भवामि न पुनस्त्वं ममेति, ततः किमेतेन, स्तोकमत्रान्तरमिति। भणित्वा समादिष्टं च तेन। दत्त सन्नाहभेरीम्, रचयत शकटव्यूहम्। अतिभूमिमागतो धरणीगोचर इति। तत आहता भेरी, निशामितो भेरीरवोऽनेकधा सैनिकैः (श्रेणिगैः?)। प्रथमं भयत्रस्तलोचनैः कापुरुषैः, आसन्नविरहौत्सुक्यगलद्बाष्पाभिः सेनाभटीभिः, चिररूढस्फुटितव्रणकन्दरैः रणरभसोद्भिद्यमानपुलकैः स्वामिसुकृतप्रतिमोचनासतृष्णैः सुभटैः, प्रथम-

---

[1] होमि क। [2] बुण क। [3] भणिया य एते, देहि ख। [4] रएहिं ख।

नियनिओगसंपायणतुरिएहिं निओयकारीहिं। पवत्तं संनज्झिउं अणङ्गरइबलं। दित्तोसहिपरिगया विय सेलकूडा ढोइज्जन्ति कञ्चणसन्नाहा, दुज्जणवाणीओ विय भेयकरीओ आणीयन्ति भल्लीओ, जमजीहासन्निगासाओ सुहडजणरुहिरलालसाओ सुबहुजणजीवियहरीओ पायडिज्जन्ति असिलट्ठीओ, वेसित्थियाओ विय गुणनिबद्धाओ वि पयइकुडिलाओ धणुहीओ, खलजणालावा विय मम्मघट्टणसमत्था य नाराया, असणिलयासन्निगासाओ य गयाओ। एवं च उवणीयमाणेहिं समरोवगरणेहिं केणावि 'पिययमापओहरफंसरुम्भओ' त्ति न कओ सन्नाहो सरीरंमि, अन्नेण समरसुहबद्धराएण थोरंसुयं असइं रुयन्ती वि न गणिया पिययमा, अन्नेण तक्खणसिढिलवलया वियलियकञ्चिदामा नयणनिग्गयबाहसलिला मङ्गलविलक्खहसिएहिं अवहीरयन्ती गाढसंतावं 'एसो अहं आगओ' त्ति समासासिया पिययमा, अन्नस्स गमणुस्सुयस्स पाणभरियं वट्टयं पियावयणसमप्पियं पीयमाणं पि तीए सुट्ठुयरं भरियमंसुएहिं, अन्नाए य निग्गच्छमाणे पिययमे मुच्छाए चेव दंसिओ अणुराओ। एवं च वट्टमाणे अणङ्गरइबले समागया अम्हे। संपयं देवो पमाणं ति॥

रणदर्शनोत्सुकै राजकुमारैः, निजनियोगसंपादनत्वरितैर्नियोगकारिभिः। प्रवृत्तं संनद्धुमनङ्गरतिबलम्। दिप्तौषधिपरिगता इव शैलकूटा ढौक्यन्ते काञ्चनसन्नाहाः, दुर्जनवाण्य इव भेदकर्य आनीयन्ते भल्ल्यः, यमजिह्वासंनिकाशाः सुभटजनरुधिरलालसाः सुबहुजनजीवितहर्यः प्रकट्यन्तेऽसिलष्ट्यः, वेश्यास्त्रिय इव गुणनिबद्धा अपि प्रकृतिकुटिला धनुषः। खलजनालापा इव मर्मघट्टनसमर्थाश्च नाराचाः, अशनिलतासंनिकाशाश्च गदाः। एवं चोपनीयमानैः समरोपकरणैः केनापि 'प्रियतमापयोधरस्पर्शरोधकः' इति न कृतः सन्नाहः शरीरे, अन्येन तत्क्षणशिथिलवलया विचलितकाञ्चीदामा नयननिर्गतबाष्पसलिला मङ्गलविलक्षहसितैरवधीरयन्ती गाढसन्तापं 'एषोऽहमागतः' इति समाश्वासिता प्रियतमा, अन्यस्य गमनोत्सुकस्य पानभृतं वर्तकं (वाटका) प्रियावदनसमर्पितं पीयमानमपि तया सुष्ठुतरं भृतमश्रुभिः। अन्यया च निर्गच्छति प्रियतमे मूर्च्छयैव दर्शितोऽनुरागः। एवं च वर्तमानेऽनङ्गरतिबले समागता वयम्। साम्प्रतं देवः प्रमाणमिति॥

तओ मए भणियं। ताडेह समरसन्नाहभेरिं। आएससमणन्तरं च ताडिया समरभासुरेण। सा य कुवियकयन्तहुंकारसन्निहा वज्जप्पहारफुट्टन्तगिरिसद्दभीसणा पलयजलयणायसरिसं गज्जिउं पवत्ता। [1]समरसाहसरसियाणं च समुट्ठिओ कलयलरवो विज्जाहरभडाणं। तओ [2]नीयमाणविलेवणं दिज्जमाणसुरहिकुसुममालं पिज्जमाणपवरासवं हसिज्जमाणवल्लहं संमाणिज्जमाणसुहडं [3]आलोइज्जमाणसन्निज्झं वण्णिज्जमाणपडिवक्खं सज्जिज्जमाणविमाणं उब्भिज्जमाणभडइन्धं दिज्जमाणपडायं पलम्बिज्जमाणचामरं वज्झमाणकिङ्किणीजालं रइज्जमाणवूहविसेसं मण्डिज्जमाणायवत्तं संपाडिज्जमाणगमणमङ्गलं उग्घोसिज्जमाणजयजयसद्दं सुणिज्जमाण[5]पुण्णाहघोसं आवूरिज्जमाणरायङ्गणं पवट्टमाणकलयलं पहावमाणपरियणं अम्हाणं पि सन्नद्धं बलं ति। उप्पइया विज्जाहरभडा, पयलियाणि विमाणाणि, निवेसिया पउमवूहरयणा। ठिओ वूहस्स अग्गओ चण्डसीहो, वामपासे समरसेणो, दक्खिणेण देवोसहो, पच्छिमेण मयङ्गो, मज्झे पिङ्गलगन्धारो।

ततो मया भणितम्–ताडयत समरसन्नाहभेरीम्। आदेशसमनन्तरं च ताडिता समरभासुरेण। सा च कुपितकृतान्तहुंकारसन्निभा वज्रप्रहारस्फुटद्गिरिशब्दभीषणा प्रलयजलदनादसदृशं गर्जितुं प्रवृत्ता। समरसाहसरसिकानां च समुत्थितः कलकलरवो विद्याधरभटानाम्। ततो नीयमानविलेपनं दीयमानसुरभिकुसुममालं पीयमानप्रवरासवं हास्यमानवल्लभं संमान्यमानसुभटम् आलोक्यमानसान्निध्यं वर्ण्यमानप्रतिपक्षं सज्यमानविमानम् उद्भिद्यमानभटचिह्नं दीयमानपताकं प्रलम्ब्यमानचामरं वध्यमानकिङ्किणीजालं रच्यमानव्यूहविशेषं मण्डयमानातपत्रं संपाद्यमानगमनमङ्गलम् उद्घोष्यमानजयजयशब्दं श्रूयमाणपुण्याह(वाद्य)घोषम् आपूर्यमाणराजाङ्गणं प्रवर्तमानकलकलं प्रधावमानपरिजनमस्माकमपि सन्नद्धं बलमिति। उत्पतिता विद्याधरभटाः, प्रचलितानि विमानि, निवेशिता पद्मव्यूहरचना। स्थितो व्यूहस्याग्रतश्च-

---

१ समररसहरिसियाणं क। २ दीयमाण- ख। ३ आलोचिज्जमाणसंनेज्झं ख। ४ -पुप्पुयविसेसं ख। ५ पुन्नाहनिग्घोसं क।

अहं पि य विमाणारूढो [1]वाउवेगप्पमुहविज्जाहररायपरियओ ठिओ गयणमग्गे। तओ आसन्नीहूयं अणङ्गरइबलं। पुच्छिओ मए परबलराईणं नामाइं अमियगई। भणियं च तेण। देव, तुण्डे ठिओ सयडवूहस्स कञ्चणदाढो, वामपासे असोओ, दक्खिणे [2]कालसीहो, मज्झे विरूवो, पिट्ठओ अणङ्गरई। तओ परबलदंसणपहट्ठं पयलियं चण्डसीहबलं। पुरओ से ठियं जुद्धसज्जं कञ्चणदाढसेन्नं। तओ वज्जन्तसमरतूरं वग्गन्तविज्जाहरं उग्घोसिज्जन्तपुव्वपुरिसगोत्तं मुच्चन्तसीहनायं समावडियं जुद्धं। तत्थ खलसमिद्धीओ विय असुहयाओ निवडन्ति भल्लीओ, कालरत्तिदिट्ठि[3]सन्निगासा अइन्ति नाराया, जममहिससिङ्गतुल्लाओ पडन्ति गयाओ, [4]लहुइयअसणिमाहप्पा वियम्भन्ति मोग्गरा, अद्धचन्दछिन्नाणि उप्पायमण्डलाणि विय गलन्ति आयवत्ताणि। तओ सोणियसित्तमहियलं विज्जाहरसीससंकुलं बहुपडियकबन्धभीसणं निवडमाणपहरणसद्दालं सन्नाहनिवडियासिसंभूयहुयवहजालाउलं च जायं महासमरं ति। लग्गा दो वि नायगा। असि-

ण्डसिंहः, वामपार्श्वे समरसेनः, दक्षिणेन देवर्षभः, पश्चिमेन मतङ्गः, मध्ये पिङ्गलगान्धारः। अहमपि च विमानारूढो वायुवेगप्रमुखविद्याधरराजपरिवृतः स्थितो गगनमार्गे। तत आसन्नीभूतमनङ्गरतिबलम्। पृष्टो मया परबलराजानां नामानि अमितगतिः। भणितं च तेन-देव! तुण्डे (मुखे) स्थितः शकटव्यूहस्य काञ्चनदंष्ट्रः, वामपार्श्वेऽशोकः, दक्षिणे कालसिंहः, मध्ये विरूपः, पृष्ठतोऽनङ्गरतिः। ततः परबलदर्शनप्रहृष्टं प्रचलितं चण्डसिंहबलम्। पुरतस्तस्य स्थितं युद्धसज्जं काञ्चनदंष्ट्रसैन्यम्। ततो वाद्यमानसमरतूर्यं वल्गद्विद्याधरम् उद्घोष्यमानपूर्वपुरुषगोत्रं मुच्यमानसिंहनादं समापतितं युद्धम्। तत्र खलसमृद्धय इवासुखदा निपतन्ति भल्ल्यः, कालरात्रिदृष्टिसन्निकाशा आयान्ति नाराचाः, यममहिषशृङ्गतुल्याः पतन्ति गदाः, लघूकृताशनिमाहात्म्या विजृम्भन्ते मुद्गराः, अर्धचन्द्रछिन्नानि उत्पातमण्डलानीव गलन्ति आतपत्राणि। ततः शोणितसिक्तमहीतलं विद्याधरशीर्षसंकुलं बहुपतितकबन्धभीषणं निपतत्प्रहरणशब्दवत् सन्नाहनिपतितासिसंभूतहुतवहज्वालाकुलं च

---

१ वायुवेग- क-ख । २ कालजीहो ख । ३ -संगासा क । ४ लघुइयास-क ।

सत्तिकुन्तचक्केहिं आवडियं पहाणजुद्धं । तओ कंचि वेलं जुज्झिऊण विसण्णो चण्डसीहो आहओ कञ्चणदाढेण निडालवट्टे खग्गरयणेण, निवडिओ य एसो । उट्ठिओ अणङ्गरइबले विसमतूरनिग्घोससणाहो उद्दामकलयलो । भग्गं चण्डसीहसेन्नं । उट्ठियं अणङ्गरइबलं । तओ अहं समरसेणप्पमुहविज्जाहरनरिन्दसहिओ धाविओ अहिमुहं अणङ्गरइबलस्स ।

आवडियं तेण समं महसमरं मुक्कतियसकुसुमोहं । पडिभडसंघडियभडोहसंकुलं तक्खणं चेव ॥
आयण्णायड्ढियजीवकोडिचक्कलियचावमुक्केहिं । अप्फुण्णं गयणयलं सरेहि घणजलहरेहिं व ॥
अन्नोन्नावडणखणक्खणन्तकरवालनिवहसंजणिओ । तडिनियरो व्व समन्ता विप्फुरिओ सिहिफुलिङ्गोहो ॥
नट्ठा य विमाणाणं खुरुप्पनिवहेहि तक्खणं छिन्ना । सरघणजालन्तरिया धवलधया रायहंस व्व ॥
कुन्तग्गभिन्ननिद्दयदप्पियविज्जाहरीससंघाया । वरिसन्ति रुहिरवरिसं भयजणया पलयमेह व्व ॥

जातं महासमरमिति। लग्नौ द्वावपि नायकौ। असि-शक्ति-कुन्त-चक्रैरापतितं प्रधानयुद्धम्। ततः काञ्चिद् वेलां युद्ध्वा विषण्णश्चण्डसेन आहतः काञ्चनदंष्ट्रेण ललाटपट्टे खड्गरत्नेन, निपतितश्चैषः। उत्थितोऽनङ्गरतिबले विषमतूर्यनिर्घोषसनाथ उद्दामकलकलः। भग्नं चण्डसिंहसैन्यम्। उत्थितमनङ्गरतिबलम्। ततोऽहं समरसेनप्रमुखविद्याधरनरेन्द्रसहितो धावितोऽभिमुखमनङ्गरतिबलस्य।

आपतितं तेन समं महासमरं मुक्तत्रिदशकुसुमौघम्। प्रतिभटसंघटितभटौघसंकुलं तत्क्षणमेव ॥
आकर्णाकर्षितजीवाकोटिचक्रीकृतचापमुक्तैः। आक्रान्तं गगनतलं शरैर्घनजलधरैरिव ॥
अन्योन्यापतनखणखणायमानकरवालनिवहसंजनितः। तडिन्निकर इव समन्ताद् विस्फुरितः शिखिस्फुलिङ्गौघः ॥
नष्टाश्च विमानानां क्षुरप्रनिवहैस्तत्क्षणं छिन्नाः। शरघनजालान्तरिता धवलध्वजा राजहंसा इव ॥

मेल्लन्ति सीहनाए सत्तीओ भिण्डिमालचक्काइं । अन्नोन्नरणरसुग्गयपुलया दप्पुद्धुरं सुहडा ॥

एवं च वट्टमाणे महासमरे दिट्ठो मए अणङ्गरई, भणिओ य एसो । भो भो विज्जाहरीसर, किमेएहिं वावाइएहिं विज्जाहरभडेहिं, तुज्झं ममं च विवाओ; ता इओ एहि । तओ सो विहसिऊण चलिओ मे अहिमुहं । भणियं च णेण । अरे धरणिगोयर, कीइसो तुज्झ मए सह विवाओ । किं सुओ तए केसरिसियालाण विवाओ त्ति । मए भणियं । किं इमिणा जंपिएणं । समागया [1]नियाणवेला, ता भणिस्सन्ति एए समरसहासया सुरसिद्धविज्जाहरा, जो एत्थ सियालो, जो वा केसरि त्ति । एत्थन्तरंमि विइण्णो सुरसिद्धविज्जाहरेहिं साहुवाओ । ओसरियाइं बलाइं । ठिया समरववहारसहासया [2]विज्जाहरनरिन्दा, अम्हे वि गयणचारिणो । मुक्कं च णेण ममोवरि असणिवरिसं, वारियं च तं चम्मरयणेण भयवईए । ठिया [3]अदूरे फुरन्तकरवालभासुरा विज्जुसंगया विय मेहावली वामपासंमि भयवई ।

कुन्ताग्रभिन्ननिर्दयदर्पितविद्याधरेशसंघाताः । वर्षन्ति रुधिरवर्षं भयजनकाः प्रलयमेघा इव ॥
मुञ्चन्ति सिंहनादान् शक्तीर्भिन्दिपालचक्राणि । अन्योन्यरणरसोद्गतपुलका दर्पोद्धुरं सुभटाः ॥

एवं च वर्तमाने महासमरे दृष्टो मयाऽनङ्गरतिः, भणितश्चैषः । भो भो विद्याधरेश्वर ! किमेतैर्व्यापादितैर्विद्याधरभटैः, तव मम च विवादः, तत इत एहि । ततः स विहस्य चलितो मेऽभिमुखम् । भणितं च तेन–अरे धरणीगोचर ! कीदृशस्तव मया सह विवादः । किं श्रुतस्त्वया केसरिशृगालयोर्विवाद इति । मया भणितम्–किमनेन जल्पितेन । समागता निदानवेला, ततो भणिष्यन्त्येते समरसभासदः सुर-सिद्ध-विद्याधराः, योऽत्र शृगालो यो वा केसरीति । अत्रान्तरे वितीर्णः सुर-सिद्ध-विद्याधरैः साधुवादः । अपसृतानि बलानि । स्थिताः समरव्यवहारसभासदो विद्याधरनरेन्द्राः, आवामपि गगनचारिणौ । मुक्तं च तेन ममोपरि अशनिवर्षम्, वारितं च तच्चर्मरत्नेन

---

[1] निहसवेला क । [2] विज्जाहरिंदा ख । [3] य समीवे क ।

मए भणियं । भो भो विज्जाहरीसर, नियाणमेयं । ता किं इमिणा मायाजुज्झिएण, नियबलेण जुज्झामो त्ति । पडिवन्न च तेण । आहओ अहं सत्तीए उरे । पहारवियणाउरो निवडिओ धरणिवट्ठे । उट्ठाइओ[1] कलयलरवो, किलिगिलियं अणङ्गरइबलेण । अमरिसवसेण उट्ठिओ अहयं । रोसफुरियाहरं च मए वि आहओ गयाए अणङ्गरई, भिन्नसिरत्ताणमत्थगो निवडिओ धराए[2] । उट्ठाइओ[3] कलयलरवो, निवारिओ सो मए । गओ तस्स समीवं । समासासिऊण उट्ठाविओ एसो । लग्गो य सो समं बाहुजुज्झेण । तओ दप्पुद्धुरा विय वसहा पवणहया विय जलहरा मत्ता विय दिसागया तहा संपलग्गा दुवे वि अम्हे, जहा रुहिरधारापरिसित्तगत्ताणं पहारसंचुण्णियमउडाणं च न लक्खिओ विसेसो अम्हाणं सुरसिद्धविज्जाहरेहिं । तओ मए विज्जाबलाइरेगेण[4] विणिज्जिओ अणङ्गरई । उग्घोसिओ जयजयसद्दो सुरसिद्धविज्जाहरेहिं, विमुक्कं च णे उवरि कुसुमवरिसं, समाहयं जयतूरं । तओ मए दिज्जमाणं पि रज्जं अणिच्छिऊण गओ

भगवत्या । स्थिता अदूरे स्फुरत्करवालभासुरा विद्युत्संगतेव मेघावली वामपार्श्वे भगवती । मया भणितम्-भो भो विद्याधरेश्वर ! निदानमेतत्, ततः किमनेन मायायुद्धेन, निजबलेन युध्याव इति । प्रतिपन्नं च तेन । आहतोऽहं शक्त्या उरसि । प्रहारवेदनातुरो निपतितो धरणीपृष्ठे । उत्थितः कलकलरवः, किलिकिलितमनङ्गरतिबलेन । अमर्षवशेनोत्थितोऽहम् । रोषस्फुरिताधरं च मयाऽपि आहतो गदयाऽनङ्गरतिः, भिन्नशिरस्त्राणमस्तको निपतितो धरायाम् । उत्थितः कलकलरवः, निवारितः स मया । गतस्तस्य समीपम् । समाश्वास्य उत्थापित एषः । लग्नश्च स मया बाहुयुद्धेन । ततो दर्पोद्धुराविव वृषभौ पवनहताविव जलधरौ मत्ताविव दिग्गजौ तथा संप्रलग्नौ द्वावप्यावाम्, यथा रुधिरधारापरिषिक्तगात्रयोः प्रहारसंचूर्णितमुकुटयोश्च न लक्षितो विशेष आवयोः सुर-सिद्ध विद्याधरैः । ततो मया विद्याबलातिरेकेण विनिर्जितोऽनङ्गरतिः । उद्घोषितो जयजयशब्दः सुर-सिद्ध-विद्याधरैः, विमुक्तं च ममोपरि कुसुमवर्षम्,

---

१ उद्धाइओ ख । २ वराओ क । ३ उद्धाइओ ख । ४ हेलाए विय क ।

तवोवणमणङ्गरई। अहमवि य सयलविज्जाहरिन्दसमुइओ पविट्ठो नयरं। दिट्ठा य विरहपरिदुब्बलङ्गी आणन्दबाहोल्ललोयणा देवी। ईसि विहसियं मए। विलिया य एसा रूवविम्हयक्खित्तहियएहिं पणमिया विज्जाहरिन्देहिं। कयाओ नयरववत्थाओ। अहिसित्तो अहयं उभयबलविज्जाहरीसरेहिं तत्थ रज्जे। ठावियाओ नीईओ।

वोलीणा कइवयदियहा। तओ समं कइवयविज्जाहरेहिं विलासवईए य गओ गुरुजणदंसणत्थं। वन्दिया तेसिं चलणा। जणिओ विभूइदंसणेण आणन्दो। विलासवईनिग्गमणदुहिओ य सिद्धाएसमुणियसयलवुत्तन्तो तप्पभूइ कुविओ अणङ्गवईए गन्तूण सविणयं पसाइओ ईसाणचन्दो। एवं गमिऊण कइवयदियहे समागओ निययरज्जे। अइक्कन्तो कोइ कालो रज्जसुहमणुहवन्तस्स।

अन्नया य मेरु व्व तुङ्गयाए घणतमालभमरञ्जणसरिसदेहच्छवी एरावणसरिसो चउदन्तमुसलो चरिमजामावसेसाए रयणीए दिट्ठो

समाहतं जयतूर्यम्। ततो मया दीयमानमपि राज्यमनिच्छन् गतः तपोवनमनङ्गरतिः। अहमपि च सकलविद्याधरसमुदितः प्रविष्टो नगरम्। दृष्टा च विरहपरिदुर्बलाङ्गी आनन्दवाष्पार्द्रलोचना देवी। ईषद् विहसितं मया। व्रीडिता चैषा रूपविस्मयाक्षिप्तहृदयैः प्रणता विद्याधरेन्द्रैः। कृता नगरव्यवस्थाः। अभिषिक्तोऽहमुभयबलविद्याधरेश्वरैस्तत्र राज्ये। स्थापिता नीतयः।

व्यतिक्रान्ताः कतिपयदिवसाः। ततः समं कतिपयविद्याधरैर्विलासवत्या च गतो गुरुजनदर्शनार्थम्। वन्दितास्तेषां चरणाः। जनितो विभूतिदर्शनेनानन्दः। विलासवतीनिर्गमनदुःखितश्च सिद्धादेशज्ञातसकलवृत्तान्तस्तत्प्रभृति कुपितोऽनङ्गवत्यै गत्वा सविनयं प्रसादित ईशानचन्द्रः। एवं गमयित्वा कतिपयदिवसान् समागतो निजराज्ये। अतिक्रान्तः कोऽपि कालो राज्यसुखमनुभवतः।

अन्यदा च मेरुरिव तुङ्गतया घन-तमाल-भ्रमरा-ञ्जनसदृशदेहच्छविरैरावणसदृशश्चतुर्दन्तमुशलश्चरमयामावशेषायां रजन्यां दृष्टो

विलासवईए सुहपसुत्ताए सुमिणयंमि सयललक्खणोववेओ वयणेणमुयरं पविसमाणो महागइन्दो त्ति । सुहपडिवुद्धा एसा, साहिओ य हरिसवसुप्फुल्ललोयणाए देवीए ममं । भणिया एसा मए । सुन्दरि, सयलविज्जाहरनमिओ विज्जाहरचक्कवट्टी पुत्तो ते भविस्सइ । पडिसुयमिमीए । तयप्पभिइं विसेसेण तिवग्गसंपायणरयाए अइक्कन्ता नव मासा अद्धट्ठमाणि य राइंदियाणि। तओ सुपसत्थतिहिमुहुत्ते जाओ सुओ । वद्धाविओ अहं मञ्जरियाभिहाणाए दासचेडीए। दिन्नं पारितोसियं। काराविय वद्धावणयं जाव संपन्नो मासो त्ति । अजियबलापभावेण [1]पाविया रायलच्छि त्ति काऊण अणाए चेव [2]उवलद्धो कयं च से नामं अजियबलो त्ति । पत्तो कुमारभावं ।

एत्थन्तरंमि समुप्पन्ना मे चिन्ता । को दाणिं कालो [3]अम्मापिईणं दिट्ठाणं ति । [4]दुप्पडियाराणि अम्मापियरो लोयंमि भवन्ति । अन्नं च । किं ताए रिद्धीए सेस[5]फणारयणलाभतुल्लाए, जा सुयणेहि न भुत्ता, जा न य दिट्ठा खलयणेहिं । ता सम्मं पुच्छिऊण

विलासवत्या सुखप्रसुप्तया स्वप्ने सकललक्षणोपेतो वदनेनोदरं प्रविशन् महागजेन्द्र इति। सुखप्रतिवुद्धैषा, कथितश्च हर्षवशोत्फुल्ललोचनया देव्या मम। भणितैषा मया-सुन्दरि! सकलविद्याधरनतो विद्याधरचक्रवर्ती पुत्रस्ते भविष्यति। प्रतिश्रुतमनया। तत्प्रभृति विशेषेण त्रिवर्गसंपादनरतायाऽतिक्रान्ता नव मासा अर्धाष्टमानि च रात्रिंदिवानि। ततः सुप्रशस्ततिथिमुहूर्ते जातः सुतः। वर्धापितोऽहं मञ्जरिकाभिधानया दासचेट्या। दत्तं पारितोषिकम्। कारितं वर्धापनकं यावत्संपन्नो मास इति। अजितबलाप्रभावेण प्रापिता राज्यलक्ष्मीरिति कृत्वा अनयैवोपलब्ध [इति] कृतं च तस्य नाम अजितबल इति। प्राप्तः कुमारभावम्।

अत्रान्तरे समुत्पन्ना मे चिन्ता-क इदानीं कालो मातापितॄणां दृष्टानामिति। दुष्प्रतिकाराश्च मातापितरो लोके भवन्ति। अन्यच्च किं तया ऋद्ध्या शेषफणारत्नलाभतुल्यया, या सुजनैर्न भुक्ता, या न च दृष्टा खलजनैः। ततः सम्यक् पृष्ट्वा विद्याधरनरेन्द्रान् अजितबलां

---

१ पारिया रायउलब्वित्ति ख। २ उवलद्धो जाओ मे पुत्तो ख। ३ अम्मापिऊणं क। ४ दुप्पडियारा य मायापियरो भवन्ति लोयम्मि क। ५ फणाजाल-क।

विज्जाहरनरिन्दे अजियबलं भयवइं च गच्छामि सदेसं ति चिन्तिऊग संपाडियं समीहियं। अणुमन्नियं च तेहिं। निरूविऊण कोट्ट-वालं [1]देवोसिंह निग्गओ राया महया चडगरेण, अजियवलविउव्विए तेलोक्कविम्हयजगए विमाणमारूढो विलासवइसमेओ कुमारअजि-यबलेण य। कइवयदियहेहिं पत्तो सेयवियं, आवासिओ सव्वरिउसमूहसन्निहे उज्जाणे। पेसिओ मए पवणगई [2]निवेइउं तायस्स, पविट्ठो पडिहारसंसूइओ तायसयासं। निवेइयं कयञ्जलिउडेण ममागमणं। तओ आणन्दवाहजलभरियलोयणो कण्टइयसव्वङ्गो उट्ठिओ महाराओ; निग्गओ सयलन्तेउरअमच्चमहासामन्तनायरेहि य परिहरिओ। पच्चोणिं गन्तूग निवडियाइं चलणेसु अम्मापिईण अम्हे। परुन्नं च [3]पभूयमुभयवग्गेहिं। [4]समासासियाइं कहकहवि अमच्चमहासामन्तेहिं। तओ पवेसियाइं राइणा महाविभूईए [सेयवियं। जण-णिजणयाण निययदंसणेण आणन्दो कुमारेण कओ। तओ महाविभूइए] अइक्कन्तो कोइ कालो तायसगासे चिट्ठन्तस्स। [5]तओ

भगवतीं च गच्छामि स्वदेशमिति चिन्तयित्वा संपादितं समीहितम्। अनुमतं च तैः। निरूप्य कोट्टपालं देवर्षभं निर्गतो राजा महता चटकरेण (आडम्बरेण). अजितवलाविकुर्वितं त्रैलोक्यविस्मयजनकं विमानमारूढो विलासवतीसमेतः कुमाराजिनवलेन च। कतिपय-दिवसैः प्राप्तः श्वेतविकाम्। आवासितः सर्वर्तुसमूहसन्निभे उद्याने। प्रेपितो मया पवनगतिर्निवेदयितुं तातस्य। प्रविष्टः प्रतीहार-संसूचितः तातसकाशम्। निवेदितं कृताञ्जलिपुटेन ममागमनम्। तत आनन्दवाष्पजलभृतलोचनः कण्टकितसर्वाङ्ग उत्थितो महाराजः, निर्गतः सकलान्तःपुरा-मात्य-महासामन्त-नागरैश्च परिभृतः। पच्चोणिं (दे०) सन्मुखं गत्वा निपतिताश्चरणयोर्मातापितॄणां वयम्। प्ररुदितं च प्रभूतमुभयवर्गैः। समाश्वासिताः कथं कथमपि अमात्य-महासामन्तैः। ततः प्रवेशिता राज्ञा महाविभूत्या [श्वेतविकाम्।

---

[1] देवतोसयं क। [2] निविइओ ग। [3] बहूय-क। [4] कहकहवि समासासियाइं क। [5] "अन्नया गन्तूण तामलित्ति (त्तिं) वि(ला)सवइनिग्गमणदुहिओ सिद्धाए-सवयणमुणियसयलवुत्तंतो तयप्पभिई कुदिओ अणंगवईए गंतूण सविणयं पसाइओ इसाणचंदो कुमारेण। एवं सो गमिऊण तत्थ कइ(व)यदियहे समागओ पुणो वि

पञ्चत्तमुवगएसु काऊण जणणिजणएसु रज्जाभिसेयं नियाणुजस्स कित्तिनिलयाभिहाणस्स गओ वेयड्ढपव्वयं। पविट्ठो रहनेउरचक्कवालपुरं। अइक्कन्तो कोइ कालो।

एत्थन्तरंमि आगओ भयवं बहुसीसपरिवारो संपुण्णसमण[1]गुणहरो चउनाणसंगओ चित्तङ्गओ नाम विज्जाहरसमणगो त्ति। आयण्णिओ मए परियणाओ। निग्गओ अहं भयवन्तदंसणवडियाए। वन्दिओ भयवं। धम्मलाहिओ भयवया। भणियं च तेण। भो भो विज्जाहरीसर, पावियं तए फलं पुव्वभागधेयाणं; ता इमं वियाणिऊण पुणो वि कुसलपक्खे मइं करेहि त्ति। मए भणियं। कीइसो कुसलपक्खो त्ति। आचिक्खिओ भयवया पसमसंवेगमूलो जिणदेसिओ धम्मो। परिणओ अम्हाणं, पडिवन्नं सम्मत्तं, गहियाइं अणुव्वयाइं। पुच्छिओ भयवं चित्तङ्गओ। भयवं, अह किं पुण मए पुव्वमायरियं, जस्स इमो [2]विचित्तो पिययमाविरहजलणसंतावो परि-

जननीजनकयोश्च निजदर्शनेनानन्दः कुमारेण कृतः। ततो महाविभूत्या] अतिक्रान्तः कोऽपि कालः तातसकाशे तिष्ठतः। ततः पञ्चत्वमुपगतयोर्जननीजनकयोः कृत्वा राज्याभिषेकं निजानुजस्य कीर्तिनिलयाभिधानस्य गतो वैताढ्यपर्वतम्। प्रविष्टो रथनुपूरचक्रवालपुरम्। अतिक्रान्तः कोऽपि कालः।

अत्रान्तरे आगतो भगवान् बहुशिष्यपरिवारः संपूर्णश्रमणगुणधरश्चतुर्ज्ञानसंगतश्चित्रांगदो नाम विद्याधरश्रमणक इति। आकर्णितो मया परिजनात्। निर्गतोऽहं भगवद्दर्शनवृत्तितया। वन्दितो भगवान्। धर्मलाभितो भगवता। भणितं च तेन–भो भो विद्याधरेश्वर! प्राप्तं त्वया फलं पूर्वभागधेयानाम्, तत इदं विज्ञाय पुनरपि कुशलपक्षे मतिं कुर्विति। मया भणितम्–कीदृशः कुशलपक्ष इति। आख्यातो भगवता परमसंवेगमूलो जिनदेशितो धर्मः। परिणतोऽस्माकम्, प्रतिपन्नं सम्यक्त्वम्, गृहीतान्यणुव्रतानि। पृष्टो भग-

---

तायनगरि(रिं), ठिओ तत्थ कइवि दियेहिं'' इत्यधिकः पाठः कपुस्तके। १ –गणहरो क। २ विवित्तो क–ग।

णामो त्ति। भयवया भणियं। सुण।

अत्थि इहेव भारहे वासे कम्पिल्लं नाम नयरं। तत्थ चन्दउत्तो नाम नरवई होत्था। जगसुन्दरी से भारिया। ताणं सुओ रामगुत्तो नाम तुमं ति। एसा य ते उत्तरावहनरीसरतारापीढधूया हारप्पहा नाम पिययम त्ति। कयं च तुमए इमीए सह विसयसुहमणुहवन्तेण अणाभोगओ इमं। उवट्ठिए[1] वसन्तसमए[2] गयाइं तुम्हे[3] कीलिउं भवणुज्जाणं[4]। पवत्ता[5] य कीला, मज्जियाइं भवणदीहियाए। उवट्ठियाइं तीरसंठिएसु कयलीहरएसु। उवणीयं कुंकुमविलेवणं। कओ अङ्गराओ। एत्थन्तरंमि समागयं हंसमिहुणयं। तओ कोउगेण सरसकुंकुमविलित्तहत्थेण गहिया तए हंसिया इयरीए हंसओ त्ति। जणियं तेसिं विरहदुक्खं। फसलियाणि कुंकुमराएण। विमुक्काणि थेववेलाए। पयट्टाणि अन्नोन्नं गवेसिउं। कुंकुमरायसङ्गेण चक्कवायासङ्काए दंसणे वि परोप्परं न पच्चभिजाणियमणेहिं। विरहवेयणाउराइं च ववसियाइं

वान् चित्राङ्गदः। भगवन्! अथ किं पुनर्मया पूर्वमाचरितम्, यस्यायं विचित्रः प्रियतमाविरहज्वलनसंतापः परिणाम इति। भगवता भणितम्-शृणु।

अस्तीहैव भारते वर्षे काम्पिल्यं नाम नगरम्। तत्र चन्द्रगुप्तो नाम नरपतिरभवत्। जगत्सुन्दरी तस्य भार्या। तयोः सुतो रामगुप्तो नाम त्वमिति। एषा च ते उत्तरापथनरेश्वरतारापीठदुहिता हारप्रभा नाम प्रियतमेति। कृतं च त्वयाऽनया सह विषयसुखमनुभवताऽनाभोगत इदम्। उपस्थिते वसन्तसमये गतौ युवां क्रीडितुं भवनोद्यानम्। प्रवृत्ता च क्रीडा, मज्जितौ भवनदीर्घिकायाम्। उपस्थितौ तीरसंस्थितेषु कदलीगृहेषु। उपनीतं कुङ्कुमविलेपनम्। कृतोऽङ्गरागः। अत्रान्तरे समागतं हंसमिथुनकम्। ततः कौतुकेन सरसकुङ्कुमविलिप्तहस्तेन गृहीता त्वया हंसिका इतरया हंसक इति। जनितं च तयोर्विरहदुःखम्। '[फसलियाणि'(दे.)] शृङ्गारितौ कुङ्कुमरागेण।

---

[1] उट्ठिए क। [2] "महया विभूतीए" इत्यधिकः कपुस्तके। [3] तुब्भे क। [4] सभवणु-क। [5] वत्ता क।

मरणं । पवाहिओ दोहिं पि तेहि गेहदीहियाए अप्पा । निरुद्धनीसासं च निब्बुड्डाणि जलमज्झे । तओ दुप्परिच्चययाए जीवियस्स भवियव्वयाए पियसंगमस्स अचिन्तसत्तीए कम्मुणो [1]अवणीयकुंकुमरायं कण्ठगयपाणाणि उब्बुड्डाणि सहसा । जायं परोप्परदंसणं । पच्चभिन्नायाणि अन्नोन्नं ॥

एयं तए आयरियं, एयवइयरं च जं बद्धं कम्मयं, तस्स एसो परिणामो त्ति । तओ मए चिन्तियं । अहो अप्पं नियाणं महन्तो विवाओ त्ति । ता अलमणेयदुक्खसंवड्ढएण इमिणा पयासेण । पवज्जामि भयवओ समीवे समणत्तणं ति । भणिओ य भयवं चित्तङ्गओ । भयवं, विरत्तं मे चित्तं इमिणा नियचरियसवणेण । ता करेहि मे अणुग्गहं, उत्तारेहि इमाओ भवाडवीओ, देहि मज्झं समणलिङ्गं । पडिवन्नं भयवया । तओ अहं नियसुयाजियबलस्स दाऊण रज्जं आघोसणापुव्वयं दवाविऊण य महादाणं महया विभूईए वसुभूइणा

विमुक्तौ स्तोकवेलायाम् । प्रवृत्तौ अन्योन्यं गवेषयितुम् । कुङ्कुमरागसंगेन चक्रवाकाशङ्कया दर्शनेऽपि परस्परं न प्रत्यभिज्ञातमाभ्याम् । विरहवेदनातुरौ च व्यवसितौ मरणम् । प्रवाहितो द्वाभ्यामपि ताभ्यां गृहदीर्घिकायामात्मा । निरुद्धनिःश्वासं च निमग्नौ जलमध्ये । ततो दुष्परित्यजतया जीवितस्य भवितव्यतया प्रियसङ्गमस्य अचिन्त्यशक्त्या कर्मणोऽपनीतकुङ्कुमरागं कण्ठगतप्राणौ उन्मग्नौ सहसा । जातं परस्परदर्शनम् । प्रत्यभिज्ञातावन्योन्यम् ।

एतत्त्वयाऽऽचरितम् , एतद्व्यतिकरं च यद् बद्धं कर्म, तस्यैष परिणाम इति । ततो मया चिन्तितम्-अहो अल्पं निदानम् , महान् विपाक इति । ततोऽलमनेकदुःखसंवर्धकेनानेन प्रयासेन । प्रपद्ये भगवतः समीपे श्रमणत्वमिति । भणितश्च भगवान् चित्राङ्गदः । भगवन् ! विरक्तं मे चित्तमनेन निजचरितश्रवणेन । ततः कुरु मेऽनुग्रहम् , उत्तारय अस्या भवाटवीतः । देहि मह्यं श्रमणलिङ्गम् । प्रतिपन्नं भग-

---

[1] अवणीयं क, अवणीयो कुंकुमरायो ख ।

देवीए य पहाणपरियणेण य समेओ पवन्नो समणत्तणं। ता एय मे विसेसकारणं ति ॥

तओ जयकुमारेण भणियं। भयवं, सोहणं विसेसकारणं। धण्णो तुमं। अह कहं पुण भवाडवीओ उत्तरणं, उत्तिण्णाण वा कत्थ गमणं ति। भयवया भणियं। सुण। एत्थ अडवी दुविहा, दव्वाडवी भावाडवी य। तत्थ दव्वाडवीए ताव उदाहरणं। जहा कुओ वि य नयराओ कोइ सत्थवाहो पुरन्तरं गन्तुकामो घोसणं कारेइ 'जो मए सह अमुगं पुरं गच्छइ, तमहं निद्देसकारिणं अविग्घेण [1]पावेमि'त्ति। निसामिऊण तमाघोसणं पयट्टा तेण सह बहवे सत्थिया। तओ सो तेसिं पन्थदोसगुणे कहेइ। भो भो सत्थिया, एत्थ खलु एगो पन्थो उज्जुओ, अवरो मणागमणुज्जुओ। तत्थ जो सो अणुज्जुओ, तेण सुहयरं गम्मइ, परं बहुणा य कालेण, पज्जन्ते वि उज्जुयं ओयरिऊण इच्छियपुरं पाविज्जइ। जो पुण उज्जुओ, तेण [2]दुक्खयरेण गम्मइ लहुं च पाविज्जइ, जम्हा सो अतीव विसमो

वता। ततोऽहं निजसुताजितबलाय दत्त्वा राज्यमाघोषणापूर्वकं दापयित्वा च महादानं महता विभूत्या वसुभूतिना देव्या च प्रधानपरिजनेन च समेतः प्रपन्नः श्रमणत्वम्। तत एतन्मे विशेषकारणमिति।

ततो जयकुमारेण भणितम्-भगवन्! शोभनं विशेषकारणम्, धन्यस्त्वम्, अथ कथं पुनर्भवाटवीत उत्तरणम्, उत्तीर्णानां वा कुत्र गमनमिति। भगवता भणितम्-श्रृणु। अत्राटवी द्विविधा, द्रव्याटवी भावाटवी च। तत्र द्रव्याटव्यां तावदुदाहरणम्। यथा कुतोऽपि च नगरात् कोऽपि सार्थवाहः पुरान्तरं गन्तुकामो घोषणं कारयति 'यो मया सहामुकं पुरं गच्छति तमहं निर्देशकारिणमविघ्नेन प्रापयामि' इति। निशम्य तदाघोषणं प्रवृत्तास्तेन सह बहवः सार्थिकाः। ततः स तेभ्यः पथदोषगुणान् कथयति। भो भोः सार्थिकाः! अत्र खल्वेकः पन्था ऋजुकः, अपरो मनागनृजुकः। तत्र यः सोऽनृजुकः तेन सुखतरं गम्यते, परं बहुना च कालेन, पर्यन्तेऽपि ऋजुकमव-

---

१ पराणेमि क। २ दुक्खयरं क।

संकडो य । तत्थ खलु ओयारे चेव अच्चन्तभीसणा अहिलसियपुरसंपत्तिविग्घहेयवो दुवे वग्घसिंघा परिवसन्ति । ते य ओयरिउं चेव नो पयच्छन्ति । तओ ते पुरिसयारेण उद्धंसिऊण ओयरियव्वं । ओइण्णाण वि य ताव अणुवट्टन्ति जाव अहिलसियपुरसमीवं । उम्मग्गलग्गं च पाणिणं वावाएन्ति; मग्गलग्गस्स य न पहवन्ति त्ति । रुक्खा य एत्थ एगे मणोहरा सिणिद्धपत्तला सुरहिकुसुमसोहिया सीयलच्छाया, अन्ने य परिसडियपण्डुपत्ता कुसुमफलविवज्जिया अमणोहरा य । तत्थ पढमाणं छाया वि विणासकारणं, किं पुण परिभोगो त्ति । न तेसु वीसमियव्वं, इयरेसु मुहुत्तमेत्तं वीसमियव्वं ति । मणोहररूवधारिणो महुरवयणा य एत्थ मग्गतडट्ठिया बहवे पुरिसा हक्कारेन्ति 'एह भो सत्थिया एह, एवं पि तं पुरं गम्मइ' त्ति । तेसिं वयणं न सोयव्वं । सुसत्थिया उण [1]मुहुत्तमेत्तमवि कालं खणमवि न मोत्तव्वा । एयाइणो नियमा भयं । दुरन्तो य थेवो दवग्गी अप्पमत्तेहिं [2]उल्हवेयव्वो, अणोल्हविज्जन्तो नियमेण डहइ ।

तीर्यं इप्सितपुरं प्राप्यते । यः पुनर्ऋजुकस्तेन दुःखतरेण गम्यते, लघु च प्राप्यते, यस्मात् सोऽतीव विषमः संकटश्च । तत्र खल्वतारे एवात्यन्तभीषणावभिलषितपुरसंप्राप्तिविघ्नहेतू द्वौ व्याघ्रसिंहौ परिवसतः । तौ चावतरितुमेव न प्रयच्छतः । ततस्तौ पुरुषकारेण उद्ध्वस्यावतरितव्यम् । अवतीर्णानामपि च तावदनुवर्तेते यावदभिलषितपुरसमीपम् । उन्मार्गलग्नं च प्राणिनं व्यापादयतः, मार्गलग्नस्य च न प्रभवत इति । वृक्षाश्चात्र एके मनोहराः स्निग्धपत्राः सुरभिकुसुमशोभिताः शीतलच्छायाः, अन्ये च परिशटितपाण्डुपत्राः कुसुमफलविवर्जिता अमनोहराश्च । तत्र प्रथमानां छायाऽपि विनाशकारणम् , किं पुनः परिभोग इति । न तेषु विश्रमितव्यम् , इतरेषु मुहूर्तमात्रं विश्रमितव्यमिति । मनोहररूपधारिणो मधुरवचनाश्चात्र मार्गतटस्थिता बहवः पुरुषा आकारयन्ति 'एत भोः सार्थिका एत, एवमपि तत्पुरं गम्यते' इति । तेषां वचनं न श्रोतव्यम् । सुसार्थिकाः पुनर्मुहूर्तमात्रमपि कालं क्षणमपि न मोक्तव्याः । एकाकिनो नियमाद् भयम् । दुरन्तश्च

---

१ कंचि क । २ ओल्ह–ग ।

पुणो य दुग्गो उच्चो य पव्वओ, सो वि उवउत्तेहिं लङ्घियव्वो; अलङ्घणे य नियमा मरिज्जइ । तओ वि य महन्ती [१]अइगुविलगव्वरा वंसकुडङ्गी, सा वि य दुययरं वोलेयव्वा । संठियाणं च तीए समीवे अणेए उवद्दवा । [२]तओ अणन्तरं च लहुओ खड्डोलओ । तस्स समीवे मणोरहो नाम बम्भणो निच्चमेव परिवसइ । सो भणइ । भो भो सत्थिया, मणायं [३]पूरेह एयं, तओ [४]गमिस्सह त्ति । तस्स नो सोयव्वं वयणं, [५]अवगणिऊण गन्तव्वं । न खलु सो पूरियव्वो । सो खु पूरिज्जमाणो महल्लयरो हवइ, पन्थाओ य [६]पडिभंसइ । फलाणि य णं एत्थ दिव्वाणि पञ्चप्पयाराणि नेत्ताइसुहयराणि किंपागाणं, न पेक्खियव्वाणि, न वा भोत्तव्वाणि । बावीसं च णं एत्थ घोरा [७]महाकाया कराला पिसाया खणं खणमहिद्दवन्ति । ते वि य ण गणेयव्वा । भत्तपाणं च एत्थ विभागओ [८]परिभुज्जमाणमईव विरसं दुल्लहं च हवइ त्ति (विवागओ उणमईव सरसं जहा बालस्स य जवाभेसजं] । तत्थ न विसाइणा होयव्वं । अपयाणयं न कायव्वं ति,

स्तोको दवाग्निरप्रमत्तैर्विध्यापितव्यः, अविध्याप्यमानो नियमेन दहति । पुनश्च दुर्गं उच्चश्च पर्वतः सोऽपि उपयुक्तैर्लङ्घितव्यः, अलङ्घने च नियमाद् म्रियते । ततोऽपि च महती अतिगुपिल(गहन)गह्वरा वंशकुडङ्गी, साऽपि च द्रुततरमतिक्रमितव्या । संस्थितानां च तस्याः समीपेऽनेक उपद्रवाः । ततोऽनन्तरं च लघुको गर्तालयः । तस्य समीपे मनोरथो नाम ब्राह्मणो नित्यमेव परिवसति । स भणति–भो भोः सार्थिकाः ! मनाक् पूरयत एतम् , ततो गमिष्यथेति । तस्य नो श्रोतव्यं वचनम् , अवगणय्य गन्तव्यम् । न खलु स पूरयितव्यः । स खलु पूर्यमाणो महत्तरो भवति, पथश्च परिभ्रश्यति । फलानि चात्र दिव्यानि पञ्चप्रकाराणि नेत्रादिसुखकराणि किंपाकानाम् , न प्रेक्षितव्यानि न वा भोक्तव्यानि । द्वाविंशतिश्चात्र घोरा महाकायाः करालाः पिशाचाः क्षणं क्षणमभिद्रवन्ति । तेऽपि च न गणयितव्याः । भक्तपानं चात्र विभागतः परिभुज्यमानमतीव विरसं दुर्लभं च भवतीति (विपाकतः पुनरतीव सरसं यथा बालस्य च इन्द्रयवभैषज्यम्) । तत्र न विषादिना

---

१ अइगुविला क । २ नास्ति खपुस्तके । ३ पूरेहिं ख । ४ गमिस्ससि ख । ५ अवमन्निऊण ख । ६ पलिहंजइ ख । ७ महाकराला क-ख । ८ नास्ति खपुस्तके ।

रयणीए वि जामदुयं नियमेण वहियव्वं । एवं च गच्छमाणेहिं देवाणुप्पिया, खिप्पमेवाडवी लङ्घिज्जइ, लङ्घित्ता य तमेगन्तदोगच्चवज्जियं निव्वुइपुरं पाविज्जइ त्ति। तत्थ न होन्ति पुणो केइ किलेसोवद्दवा ॥ एस दिट्ठन्तो, इमो उण उवणओ ॥ एत्थ सत्थवाहो तिलोयचिन्तामणी सुरासुरपूइओ अरहा । घोसणं तु अक्खेवणिविक्खेवणिसंवेयणिनिव्वेयणिलक्खणा धम्मकहा । सत्थिया य संसाराडविलङ्घणेण निव्वुइपुरपत्थिया जीवा । अडवी पुण नारयतिरियमणुयदेवगइलक्खणो संसारो । उज्जुयपन्थो साहुधम्मो; मणागमणुज्जुओ सावयधम्मो, सो वि य पज्जन्ते साहुधम्मफलो चेव इच्छिज्जइ । न य भावओ अपडिवन्नसाहुधम्मा संसाराडविं [१]लङ्घेन्ति । इच्छियपुरं पुण जम्मजरामरणरोगसोगाइउवद्दवरहियं सिवपुरं । वग्घसिंघा य मोक्खविग्घहेयवो रागदोसा। अभिभूया य एएहिं पाणिणो पेच्छमाणा वि माइन्दजालसरिसं जीवलोयं न चएन्ति पडिवज्जिउं परमपयसाहयं समणत्तणं । पवन्नवयाणं पि य एए

भवितव्यम् । अप्रयाणकं न कर्तव्यमिति । रजन्यामपि यामदुगं नियमेन वोढव्यम् । एवं च गच्छद्भिर्देवानुप्रियाः ! क्षिप्रमेवाटवी लङ्घ्यते, लङ्घित्वा च तदेकान्तदौर्गत्यवर्जितं निर्वृतिपुरं प्राप्यते इति। तत्र न भवन्ति पुनः केऽपि क्लेशोपद्रवाः ॥ एष दृष्टान्तः, अयं पुनरुपनयः । अत्र सार्थवाहस्त्रिलोकचिन्तामणिः सुरासुरपूजितोऽर्हन् । घोषणं तु आक्षेपणी-विक्षेपणी-संवेदनी-निर्वेदनीलक्षणा धर्मकथा । सार्थिकाश्च संसाराटवीलङ्घनेन निर्वृतिपुरप्रस्थिता जीवाः। अटवी पुनर्नारकतिर्यग्मनुजदेवगतिलक्षणः संसारः । ऋजुकपन्थाः साधुधर्मः । मनागनृजुकः श्रावकधर्मः, सोऽपि च पर्यन्ते साधुधर्मफल एव इष्यते। न च भावतोऽप्रतिपन्नसाधुधर्मा संसाराटवीं लङ्घन्ते। ईप्सितपुरं पुनर्जन्मजरामरणरोगशोकाद्युपद्रवरहितं शिवपुरम्। व्याघ्रसिंहौ च मोक्षविघ्नहेतू रागद्वेषौ। अभिभूताश्च ताभ्यां प्राणिनः प्रेक्षमाणा अपि मृगेन्द्रजालसदृशं जीवलोकं न शक्नुवन्ति प्रतिपत्तुं परमपदसाधकं श्रमणत्वम्। प्रपन्नव्रतानामपि चैतौ असंप्राप्तकेवलभावानां न मुञ्चतो मार्गम्,

---

१ लंघेइत्ति ख, विलंघेति क।

॥४८०॥ असंपत्तकेवलभावाणं न मुयन्ति मग्गं, विमुक्कजिणवयणमग्गे अहिहवन्ति जीवे न उण इयरे त्ति । मणोरमरुक्खच्छायाओ सपडिबन्धाओ थीपसुपण्डयसंसत्ताओ वसहीओ। परिसडियपण्डुपत्ताओ य अणवज्जवसहीओ । मग्गतडत्था य हक्कारणपुरिसा परलोयविरुद्धोवएसदायगा पासत्थाई अकल्लाणमित्ता, सुसत्थिया उण अट्ठारससीलङ्गसहस्सधारिणो समणा। दवग्गी कोहो, पव्वओ माणो, वंसकुडङ्गी माया, खड्डोलओ लोहो । मणोरहबम्भणो इच्छाविसेसो, थेवपूरणे वि इमस्स अपज्जवसाणगमणं। किंपागफलाणि सद्दादओ विसया। सीओण्हखुहापिवासाइया य बावीसं परीसहा पिसाया। विरसं भोयणं अणवज्जं महुयरवित्तीए एसणिज्जं । अपयाणयं सया अप्पमाओ । जामदुयगमणं च सज्झायकरणं । एवं च वट्टमाणेहिं देवाणुप्पिया, सिग्घमेव भवाडवी लङ्घिज्जइ, लङ्घित्ता य तमेगन्तमणाबाहं सिवपुरं पाविज्जइ त्ति ॥

तओ संजायसम्मत्तदेसविरइपरिणामेण भणियं जयकुमारेण । भयवं, एवमेयं न अन्नहा । गहियाइं अणुव्वयाइं । पविट्ठो नयरिं।

विमुक्तजिनवचनमार्गान् अभिभवतो जीवान् न पुनरितरानिति । मनोरमवृक्षच्छायाः सप्रतिबन्धा स्त्रीपशुपण्डकसंसक्ता वसतयः। परिशटितपाण्डुपत्राश्चानवद्यवसतयः। मार्गतटस्थाश्च आकारणपुरुषाः परलोकविरुद्धोपदेशदायकाः पार्श्वस्थादयोऽकल्याणमित्राणि, सुसार्थिकाः पुनरष्टादशशीलाङ्गसहस्रधारिणः श्रमणाः। दवाग्निः क्रोधः, पर्वतो मानः, वंशकुडङ्गी माया, गर्तालयो लोभः। मनोरथब्राह्मण इच्छाविशेषः, स्तोकपूरणेऽपि अस्य (गर्तालयस्य) अपर्यवसानगमनम्। किंपाकफलानि शब्दादयो विषयाः। शीतोष्णक्षुत्पिपासादयश्च द्वाविंशतिः परिषहाः पिशाचाः। विरसं भोजनमनवद्यं मधुकरवृत्त्या एषणीयम्। अप्रयाणकं सदाऽप्रमादः। यामद्विकगमनं च स्वाध्यायकरणम्। एवं च वर्तमानैर्देवानुप्रिय! शीघ्रमेव भवाटवी लङ्घ्यते, लङ्घित्वा च तदेकान्तमनाबाधं शिवपुरं प्राप्यते इति।

ततः संजातसम्यक्त्वदेशविरतिपरिणामेन भणितं जयकुमारेण। भगवन्! एवमेतद् नान्यथा। गृहीतान्यणुव्रतानि। प्रविष्टो नगरीम्।

कओ से पिउणा जुवरज्जाहिसेओ। पवत्तो सेविउं भयवन्तं [1]सणंकुमारायरियं। वित्तो मासकप्पो। गओ भयवं॥

एत्थन्तरंमि सो धणसिरीजीवनारओ तओ नरयाओ उव्वट्टिऊण संसारमाहिण्डिय अणन्तरजम्मंमि य तहाविहं कंपि अकामनिज्जरं पाविऊण मओ समाणो समुप्पन्नो इमस्स चेव जयकुमारस्स भाउयत्ताए त्ति। जाओ कालक्कमेण, पइट्ठावियं च से नामं विजओ त्ति। पत्तो कुमारभावं। वल्लहो जयकुमारस्स, अवल्लहो जयकुमारो [2]विजयस्स। एवं च अइक्कन्तो कोइ कालो।

अन्नया असारयाए संसारस्स निरवेक्खयाए मच्चुणो विचित्तयाए कम्मपरिणामस्स सपज्जवसाणयाए [3]जम्मणो पञ्चत्तमुवगओ राया। अहिसित्तो रज्जंमि सामन्तमण्डलेण जयकुमारो। विजओ य पओसेण [4]पलायमाणो रज्जट्ठिइं काऊण वद्धो रज्जचिन्तएहिं। जाओ य से जणणीए सोओ॥ अन्नया य अत्थाइयामण्डवगयस्स राइणो आगया समुद्दवीई विय मुत्तानियरवाहिणी पाउससिरी विय समुन्न-

---

कृतस्तस्य पित्रा यौवराज्याभिषेकः। प्रवृत्तः सेवितुं भगवन्तं सनत्कुमाराचार्यम्। वृत्तो मासकल्पः। गतो भगवान्।

अत्रान्तरे स धनश्रीजीवनारकस्ततो नरकादुद्वृत्य संसारमाहिण्ड्य अनन्तरजन्मनि च तथाविधां कामपि अकामनिर्जरां प्राप्य मृतः सन् समुत्पन्नोऽस्यैव जयकुमारस्य भ्रातृतयेति। जातः कालक्रमेण। प्रतिष्ठापितं च तस्य नाम विजय इति। प्राप्तः कुमारभावम्। वल्लभो जयकुमारस्य, अवल्लभो जयकुमारो विजयस्य। एवं चातिक्रान्तः कोऽपि कालः।

अन्यदाऽसारतया संसारस्य निरपेक्षतया मृत्योर्विचित्रतया कर्मपरिणामस्य सपर्यवसानतया जन्मनः पञ्चत्वमुपगतो राजा। अभिषिक्तो राज्ये सामन्तमण्डलेन जयकुमारः। विजयश्च प्रद्वेषेण पलायमानो राज्यस्थितिं कृत्वा बद्धो राज्यचिन्तकैः। जातश्च तस्य जनन्याः शोकः। अन्यदा चास्थानिकामण्डपगतस्य राज्ञ आगता समुद्रवीचिरिव मुक्तानिकरवाहिनी, प्रावृट्श्रीरिव समुन्नतपयोधरा मलयमेखलेव

---

[1] सणंकुमारं ख। [2] एयस्स क। [3] जन्तुणो क। [4] अन्नत्थ वच्चमाणो क।

यपओहरा मलयमेहला विय चन्दणगन्धवाहिणी वसन्तलच्छी विय [1]रुइरपत्ततिलयाहरणा पडिहारी। तीए य दुहाविरिक्कसंघडियकमलसंपुडेण विय मत्थयावत्थिएण अञ्जलिणा पणामं काऊण विणत्तो राया। देव, एसा खु ते जणणी केणावि कारणेण देवदंसणमहिलसन्ती पडिहारभूमीए चिट्ठइ। तओ ससंभमं 'चिट्ठह तुब्भे' त्ति भणन्तो रायसंघायं उट्ठिओ राया। गओ दुवारभागं। पणमिया जणणी भणिया य। अम्ब, किं न सद्दाविओ अहं, किं वा आगमणपओयणं। तओ परुइया एसा। भणियं च णेण। अम्ब, [2]किंनिमित्तमिमं। तीए भणियं। जाय, सुयसिणेहसं[3]वड्ढियसोयाणलवियारो; ता देहि मे पुत्तजीवियं। राइणा भणियं। अम्ब, कुओ भयं कुमारस्स। तीए भणियं। जाय, ठिई एसा पयापरिवालणुज्जयाणं नरवईणं, जं पडिवक्खभूओ महया जत्तेण रक्खिज्जइ। तओ सो कुमारो 'मा अन्नसामन्तपयारिओ संपयं अहिद्दविस्सइ' त्ति गहिओ रज्जचिन्तएहिं, अणुमयं च मे एयं। किं पुण जहा तस्स सरीरे

चन्दनगन्धवाहिनी वसन्तलक्ष्मीरिव रुचिरपत्रतिलकाभरणा प्रतीहारी। तया च द्विधाविरिक्त(विभक्त)संघटितकमलसंपुटेनेव मस्तकावस्थितेन अञ्जलिना प्रणामं कृत्वा विज्ञप्तो राजा। देव! एषा खलु ते जननी केनापि कारणेन देवदर्शनमभिलषन्ती प्रतिहारभूमौ तिष्ठति। ततः ससंभ्रमं 'तिष्ठत यूयम्' इति भणन् राजसंघातमुत्थितो राजा। गतो द्वारभागम्। प्रणता जननी भणिता च। अम्ब! किं न शब्दायितोऽहम्, किं वाऽऽगमनप्रयोजनम्। ततः प्ररुदितैषा। भणितं च तेन-अम्ब! किं निमित्तमिदम्। तया भणितम्-जात! सुतस्नेहसंवर्धितशोकानलविकारः, ततो देहि मे पुत्रजीवितम्। राज्ञा भणितम्-अम्ब! कुतो भयं कुमारस्य। तया भणितम्-जात! स्थितिरेषा प्रजापरिपालनोद्यतानां नरपतीनाम्, यत्प्रतिपक्षभूतो महता यत्नेन रक्ष्यते। ततः स कुमारो 'मा अन्यसामन्तप्रतारितः साम्प्र-

---

[1] रुइरेयत्ति तिलयापहरणा क। [2] किंनिमित्तो एस सोओ। [3] -वसवट्टिओ एसो सोयानल-क।

पमाओ न हवइ, तहा तए जइयव्वं ति । राइणा भणियं । अम्ब, किं पडिवक्खभूओ मे कुमारो; जइ एवं, ता को उण सपक्खो त्ति । ता किं एइणा । एहि, अब्भिन्तरं पविसम्ह । पविट्ठो राया । उवणीयं से जणणीए आसणं । उवविट्ठा य एसा । भणियं च णेण । भो भो महन्तया, आणेह इह कुमारं । गया कुमाराणयणनिमित्तं रायपुरिसा । चिन्तियं च राइणा । अहो णु खलु ईइसं इमं रज्जं, जस्स कए महं [1]अणाचिक्खियकारणन्तरमवलम्बिऊण एयं पि ववसियं महन्तएहिं ति । ता किं एइणा बन्धुजणस्स वि अणिव्वुइकरेण विहलकिलेसायासमेत्तेण परमपमाएक्कहेउणा विवागदारुणेणं रज्जेणं । एत्थं पि बहुमाणो अविइयसंसारसरूवाणं जीवाणं । अओ देमि इमं कुमारस्स, अवणेमि सुयसिणेहसंवड्ढियसोयाणलवियारमम्बाए । एत्थन्तरंमि पुव्वकयकम्मदोसेणं राइणो उवरि वहपरिणामपरिणओ आणिओ कुमारो । दिट्ठो राइणा, सबहुमाणं च ठविओ सीहासणे । आणाविया [2]सुगन्धो[3]दयभरिया कणयकलसा । गहिओ राइणा

तमभिद्रविष्यति' इति गृहीतो राज्यचिन्तकैः, अनुमतं च मयैतद्। किं पुनर्यथा तस्य शरीरे प्रमादो न भवति तथा त्वया यतितव्यम्। राज्ञा भणितम्—अम्ब ! किं प्रतिपक्षभूतो मे कुमारः, यद्येवं ततः कः पुनः स्वपक्ष इति। ततः किमेतेन। एहि, अभ्यन्तरं प्रविशावः। प्रविष्टो राजा। उपनीतमथ जनन्या आसनम्। उपविष्टा चैषा। भणितं च तेन—भो भो महान्तः, आनयतेह कुमारम्। गताः कुमारानयननिमित्तं राजपुरुषाः। चिन्तितं च राज्ञा—अहो नु खल्वीदृशमिदं राज्यम् , यस्य कृते महद् अनाख्यातकारणान्तरमवलम्ब्य एतदपि व्यवसितं महद्भिरिति। ततः किमेतेन बन्धुजनस्याप्यनिर्वृतिकरेण विफलक्लेशायासमात्रेण परमप्रमादैकहेतुना विपाकदारुणेन राज्येन। अत्रापि बहुमानोऽविदितसंसारस्वरूपाणां जीवानाम्। अतो ददामीदं कुमाराय, अपनयामि सुतस्नेहसंवर्धितशोकानलविकारमम्बायाः। अत्रान्तरे पूर्वकृतकर्मदोषेण राज्ञ उपरि वधपरिणामपरिणत आनीतः कुमारः। दृष्टो राज्ञा, सबहुमानं च स्थापितः सिंहासने। आनायिताः सुग-

---

१ अणोचेक्खिय—क। २ सुयन्धो- ख। ३ सुगन्धतोय- क।

सयमेव एक्को, गहिया य अन्ने पहाणसामन्तेहिं। अहिसित्तो कुमारो। भणियं च णेण। भो भो सामन्ता, भो भो महन्तया, एस भे राय त्ति। छूढा नवज्जा राइणा सेससामन्तएहि य। तओ चलणेसु निवडिऊण पुच्छिया अम्बा। अम्ब, अवि अवगओ ते सोयाणलो। तओ महापुरिसचरियविम्हयक्खित्तहिययाए भणियमम्बाए। जाय, कहमेवं अवेइ; न खलु इन्धणेहिंतो चेव अवगमो सोयाणलस्स। राइणा भणियं। अम्ब, किं पुण एत्थ कारणं ति नागवच्छामि। तीए भणियं। जाय, सुण। महामिसभूयं खु एयं रज्जं। एयबहुमाणेण य कुणिमगिद्धा इव मण्डला अपरमत्थपेच्छिणो कावुरिसा न गणेन्ति सुकयं, न जाणन्ति उचियं, न पेच्छन्ति आयइं; विसयविसमोहियमणा सव्वहा तं तमायरन्ति, जेण साहीणे सग्गनिव्वाणगमणसाहणे अचिन्तचिन्तामणिरयणभूए मणुयत्ते निरयमेव गच्छन्ति त्ति। महापुरिसो य तुमं ति कज्जओऽवगच्छामि। एसो उण ते भाया कयाइ न एवंविहो हवेज्ज त्ति। अकल्लाणमित्तवं च राया हवइ। तस्स खलु अणारिया विसयलोलुयत्तणेण कहं नाम अम्हे पिया भविस्सामो। तओ 'देस इणे एस विसयसाहणं धणं' ति

न्धोदकभृताः कनककलशाः। गृहीतो राज्ञा स्वयमेव एकः, गृहीताश्चान्ये प्रधानसामन्तैः। अभिषिक्तः कुमारः। भणितं च तेन–भो भोः सामन्ताः, भो भो महान्तः, एष युष्माकं राजेति। क्षिप्ता (णवज्जा दे.) नमस्या राज्ञा शेषसामन्तैश्च। ततश्चरणयार्निपत्य पृष्टाऽम्बा। अम्ब! अप्यपगतस्ते शोकानलः। ततो महापुरुषचरितविस्मयाक्षिप्तहृदयया भणितमम्बया। जात! कथमेवमपैति, न खलु इन्धनेभ्य एवापगमः शोकानलस्य। राज्ञा भणितम्–अम्ब! किं पुनरत्र कारणमिति नावगच्छामि। तया भणितम्–जात! शृणु। महाऽऽमिषभूतं खल्वेतद् राज्यम्। एतद्बहुमानेन च कुणिमगृद्धा इव मण्डला (काका) अपरमार्थप्रेक्षिणः कापुरुषा न गणयन्ति सुकृतम्, न जानन्त्युचितम्, न प्रेक्षन्ते आयतिम्, विषयविषमोहितमनसः सर्वथा तत्तदाचरन्ति, येन स्वाधीने स्वर्गनिर्वाणगमनसाधने अचिन्त्यचिन्तामणिरत्नभूते मनुजत्वे निरयमेव गच्छन्तीति। महापुरुषश्च त्वमिति कार्यतोऽवगच्छामि। एष पुनस्ते भ्राता कदाचिन्न एवंविधो भवेदिति। अकल्याणमित्रवांश्च

करेन्ति अकरणिज्जं, जंपन्ति अजंपियव्वं, पवत्तन्ति उभयलोगविरुद्धे, नियत्तन्ति धम्मववसायाओ। तओ सो सयं पि पावकम्मो पावकम्मेहि य पवत्तिओ, नत्थि तं जं न सेवइ। अओ जमासङ्कियमिमस्स, तं इमाओ नियमेण ते संभावेमि। ता कहं सोयाणलो मे अवेइ त्ति। राइणा भणियं। अम्ब, अलमासङ्काए। सत्थो खु कुमारो। अहवा किमणेण। पव्वज्जामि अम्बाए अणुन्नाओ सयलजीवनिव्वुइकारयं समणत्तणं ति। तीए भणियं। जाय, अलं ते समणत्तणेणं। पयं परिवालेहि, एयस्स वि य करेहि जुवरज्जाहिसेयं ति। राइणा भणियं। अम्ब, तायपसायलालियाओ धन्नाओ पयाओ। निउत्तो य एयासिं परिवालणे कुमारो। कयरज्जाहिसेयस्स य विरुद्धो जुवरज्जाहिसेओ। जिणधम्मबोहेण विरत्तं च मे चित्तं संसारवासाओ। ता किं वहुणा। करेउ पसायं अम्बा, पव्वज्जामि अह समणत्तणं ति। भणिऊण निवडिओ चलणेसु। तीए भणियं। जाय, जं ते रोयइ; किं तु अहं पि पडिवज्जामि त्ति। राइणा भणियं।

राजा भवति। तस्य खल्वनार्या विषयलोलुपत्वेन 'कथं नाम वयं प्रिया भविष्यामः, ततो दास्यति नः (एष) विषयसाधनं धनम्' इति कुर्वन्त्यकरणीयम्, जल्पन्त्यजल्पितव्यम्, प्रवर्तन्ते उभयलोकविरुद्धे, निवर्तन्ते धर्मव्यवसायात्। ततः स स्वयमपि पापकर्मा पापकर्मभिश्च प्रवर्तितो नास्ति तद् यन्न सेवते। अतो यदाशङ्कितमस्य तदस्माद् नियमेन ते संभावयामि, ततः कथं शोकानलो मेऽपैतीति। राज्ञा भणितम्-अम्ब! अलमाशङ्कया। स्वस्थः खलु कुमारः। अथवा किमनेन। प्रपद्येऽम्बयाऽनुज्ञातः सकलजीवनिर्वृतिकारकं श्रमणत्वमिति। तया भणितम्-जात! अलं ते श्रमणत्वेन। प्रजां परिपालय, एतस्यापि च कुरु यौवराज्याभिषेकमिति। राज्ञा भणितम्-अम्ब! तातप्रसादलालिता धन्याः प्रजाः। नियुक्तश्चैतासां परिपालने कुमारः। कृतराज्याभिषेकस्य च विरुद्धो यौवराज्याभिषेकः। जिनधर्मबोधेन विरक्तं च मे चित्तं संसारवासात्, ततः किं वहुना। करोतु प्रसादमम्बा, प्रपद्येऽहं श्रमणत्वमिति। भणित्वा निपतितश्चरणयोः। तया भणितम्-जात! यत्ते रोचते, किन्त्वहमपि प्रतिपद्ये इति। राज्ञा भणितम्-अम्ब! प्रकृतिनिर्गुणे संसारे युक्तमेतद्।

अम्ब, पयइनिग्गुणे संसारे जुत्तमेयं। एत्थ खलु सव्वे सपज्जवसाणा निचया, पडणन्ता उस्सेहा, विओयपज्जवसाणा संजोया, मरणन्तं जीवियं। अकयसुकयकम्माण य दारुणो विवाओ, दुल्लहं च मणुयत्ते जिणिन्दवयणं। ता किच्चमेयमम्बाए वि। भणिओ य कुमारो। वच्छ,तायपसायलालियाओ पयाओ; तं तहा चेट्ठियव्वं, जहा पयाओ केणइ उवद्दवेण न सुमरेंति तायस्स। परिच्चइयव्वं कुमारचेट्ठियं, अवलम्बियव्वं रायरिसिचरियं, न मइलियव्वो पुव्वपुरिसविढत्तो जसो। किं बहुणा। जहा सुलद्धमिह माणुसत्तणं हवइ, तहा कायव्वं ति। भणिया य रज्जचिन्तया सामन्ता य। तुब्भेहिं पि उचियं नियविवेगस्स सरिसं तायपसायाणं अणुरूवं महाकुलस्स विद्धिकारयं कित्तीए हियं पयाकुमाराणं उभयलोयसुहावहं चेट्ठियव्वं ति। तत्थ केहिंचि इहलोयसावेक्खएहिं भणियं। महाराय, कीइसा अम्हाणं महारायविरहियाणं दुवे वि लोया। तहावि जं देवो आणवेइ। अप्पडिहयसासणो देवो। के अम्हे समीहियन्तरायकरणस्स विसेसओ परलोयमग्गे। तओ अहिणन्दिऊण एयं तेसिं वयणं उट्ठिओ राया। पयट्टो सणंकुमारायरियसमीवं।

अत्र खलु सर्वे सपर्यवसाना निचयाः, पतनान्ता उत्सेधाः, वियोगपर्यवसानाः संयोगाः, मरणान्तं जीवितम्। अकृतसुकृतकर्मणां च दारुणो विपाकः। दुर्लभं च मनुजत्वे जिनेन्द्रवचनम्। ततः कृत्यमेतदम्बाया अपि। भणितश्च कुमारः, वत्स! तातप्रसादलालिताः प्रजाः, तत्तथा चेष्टितव्यं यथा प्रजाः केनचिदुपद्रवेण न स्मरन्ति तातस्य। परित्यक्तव्यं कुमारचेष्टितम्, अवलम्बितव्यं राजर्षिचरितम्, न मलिनयितव्यं पुर्वपुरुषार्जितं यशः। किं बहुना, यथा सुलब्धमिह मानुषत्वं भवति तथा कर्तव्यमिति। भणिताश्च राज्यचिन्तकाः सामन्ताश्च। युष्माभिरपि उचितं निजविवेकस्य सदृशं तातप्रसादानामनुरूपं महाकुलस्य वृद्धिकारकं कीर्त्या हितं प्रजाकुमारयोरुभयलोकसुखावहं चेष्टितव्यमिति। तत्र कैश्चिदिहलोकसापेक्षैर्भणितम्–महाराज! कीदृशौ अस्माकं महाराजविरहितानां द्वावपि लोकौ, तथाऽपि यद्देव आज्ञापयति। अप्रतिहतशासनो देवः। के वयं समीहितान्तरायकरणस्य, विशेषतः परलोकमार्गे। ततोऽभिनन्द्य एतत्तेषां वचनमु-

एत्थन्तरंमि समागओ गुरुपवत्तिकहणनिउत्तो सिद्धत्थो नाम बम्भणो। भणियं च तेण। देव, संसिद्धा ते मणोरहा। इहेवागओ भगवं सणंकुमारायरिओ, आवासिओ तेन्दुगुज्जाणे। एयं च सोऊण हरिसिओ राया। सत्तट्ठ वा पयाणि गन्तूण तप्पएसट्ठिएणेव पडिलेहिय महियलं समुल्लसियरो[1]मञ्चं धरणिनिहियजाणुकरयलेणं वन्दिओ णेण, वन्दिऊण पयट्टो भयवन्तदंसणतुडियाए। विन्नत्तो महन्तयसामन्तेहिं। देव, संपन्नं चेव समीहियं देवस्स। ता एत्थेव पसत्थतिहिकरणमुहुत्तजोए पव्वइस्सइ देवो। पडिसुयं राइणा। गओ गुरुसमीवं। इयरेहिं पि विजयं भणिऊण दवावियं महादाणं, काराविया सव्वाययणेसु पूया। अन्नया य पसत्थे तिहिकरणमुहुत्तजोए समारूढो रहवरं परियरिओ रायलोएण उग्घोसिज्जमाणाए वरवरियाए पूरेन्तो अत्थिजणमणोरहे 'अहो अच्छरीयमहो उत्तिमपुरिसचेट्ठियं' ति भणमाणेहि पुलोइज्जमाणो नायरेहिं 'अणाहा कायन्दी, अयालो य एसो पव्वज्जाए' त्ति जंपमाणीहिं सदुक्खं कहकहवि

त्थितो राजा। प्रवृत्तः सनत्कुमाराचार्यसमीपम्।

अत्रान्तरे समागतो गुरुप्रवृत्तिकथननियुक्तः सिद्धार्थो नाम ब्राह्मणः। भणितं च तेन–देव! संसिद्धास्ते मनोरथाः। इहैवागतो भगवान् सनत्कुमाराचार्यः। आवासितस्तिन्दुकोद्याने। एतच्च श्रुत्वा हृष्टो राजा। सप्ताष्ट वा पदानि गत्वा तत्प्रदेशस्थितेनैव प्रतिलेख्य महीतलं समुल्लसितरोमाञ्चं धरणीनिहितजानुकरतलेन वन्दितस्तेन। वन्दित्वा प्रवृत्तो भगवद्दर्शनत्वरितया। विज्ञप्तो महत्तकसामन्तैः– देव! संपन्नमेव समीहितं देवस्य। ततोऽत्रैव प्रशस्ततिथिकरणमुहूर्तयोगे प्रव्रजिष्यति देवः। प्रतिश्रुतं राज्ञा। गतो गुरुसमीपम्। इतरैरपि विजयं भणित्वा दापितं महादानम्, कारिता सर्वायतनेषु पूजा। अन्यदा च प्रशस्ते तिथिकरणमुहूर्तयोगे समारूढो रथवरं परिवृतो राजलोकेन उद्घोष्यमाणया वरवरिकया पूरयन् अर्थिजनमनोरथान् 'अहो आश्चर्यमहो उत्तमपुरुषचेष्टितम्' इति भणद्भिः प्रलो

---

१ –रोमञ्चेण ख।

दिस्समाणो नायरियाहिं वज्जन्तेण पुण्णाहतूरेण पढन्तेहिं मङ्गलाइं[1] बन्दिवन्द्रेहिं पव्वज्जानिमित्तं निग्गओ नयरीओ राया। पत्तो तेन्दुगुज्जाणं। पव्वइओ[2] एसो सणंकुमारायरियसमीवे सह जणणीए पहाणपरियणेण य। कंचि वेलं चिट्ठिऊण य वन्दिऊण य भयवन्तं बाहोल्ललोयणा पविट्ठा कायन्दिं रायनायरया। अन्नया य समत्ते मासकप्पे विहरिओ भयवं। अहिज्जियं च सुत्तं जयाणगारेण। तओ निरइयारं सामण्णमणुवालेन्तस्स अइक्कन्तो कोइ कालो॥

इओ य 'न वावाइओ पव्वइओ'त्ति जाओ से मच्छरो विजयस्स। पेसिया य णेण कुओइ कालाओ इमस्स नियपच्चइयपुरिसा वावायगा। तेहिं चिय 'किंनिमित्तं अणिमित्तं वावायणं'ति अवावाइऊण 'वावाइओ'त्ति निवेइयं विजयस्स। परितुट्ठो खु एसो॥ अन्नया य 'कयाइ कस्सइ मं दट्ठूण हवेज्ज जिणधम्मपडिबोहो' त्ति अवस्सभवियव्वयानिओएण अणुन्नविय गुरुं कइवयसुसाहुपरिवारिओ सय-

क्यमानो नागरकैः 'अनाथा काकन्दी, अकालश्चैष प्रव्रज्यायाः' इति जल्पन्तीभिः सदुःखं कथं कथमपि दृश्यमानो नागरिकाभिः, वाद्यमानेन पूर्णाहतूर्येण पठद्भिर्मङ्गलानि बन्दिवृन्दैः प्रव्रज्यानिमित्तं निर्गतो नगर्या राजा। प्राप्तस्तिन्दुकोद्यानम्। प्रव्रजित एष सनत्कुमाराचार्यसमीपे सह जनन्या प्रधानपरिजनेन च। कांचिद् वेलां स्थित्वा च वन्दित्वा च भगवन्तं बाष्पार्द्रलोचनाः प्रविष्टाः काकन्दीं राजनागरकाः। अन्यदा च समाप्ते मासकल्पे विहृतो भगवान्। अधीतं च सूत्रं जयानगारेण। ततो निरतिचारं श्रामण्यमनुपालयतोऽतिक्रान्तः कोऽपि कालः॥

इतश्च 'न व्यापादितः प्रव्रजितः' इति जातश्चाथ मत्सरो विजयस्य। प्रेषिताश्च तेन कुतश्चित्कालादस्य निजप्रत्ययितपुरुषा व्यापादकाः। तैरेव 'किं निमित्तमनिमित्तं व्यापादनम्' इत्यव्यापाद्य 'व्यापादितः' इति निवेदितं विजयाय। परितुष्टः खल्वेषः। अन्यदा च

---

१ मंगलपाढएहिं क। २ पव्वइओ य क।

णालोयणनिमित्तं कायन्दिं चेव गओ जयाणगारो। निवेइयं राइणो। कुविओ एसो तेसिं वावायगपुरिसाणं। सद्दाविया णेणं पुच्छिया य। अरे[1] कत्थ वा कहं वा तुब्भेहिं सो समणगरूवधारी वेरिओ मे वावाइओ त्ति। तओ तेहिं विन्नायतयागमणेहिं भणियं। देव, नन्दिवद्धणे सन्निवेसे। केसालंकारविगमेण न पच्चभिन्नाओ अम्हेहिं। तओ पुच्छिओ तत्थ एगो समणगो 'कहिं कयमो वा एत्थ जओ' त्ति। तेण भणियं। एत्थ नागदेवहरए जो एस झाणमुवगओ त्ति। तओ 'सुन्नमेव तमुज्जाणं' ति गन्तूण वावाइओ अम्हेहिं। राइणा भणिय। अन्नो कोइ तवस्सी तुब्भेहिं वावाइओ, सो उण महापावो इहागओ त्ति। तेहिं भणियं। देव, न सम्मं वियाणामो। राइणा भणियं। 'किं गयं एत्थ संपयं वावाएस्सामो'। पडिस्सुयं च णेहिं। निग्गओ य एसो नियमन्दिराओ[2] भयवन्तदंसणनिमित्तं। दिट्ठो णेण भयवं वन्दिओ य। धम्मलाहिओ य भयवया। कहिओ से सव्वन्नुभासिओ धम्मो। न विरत्तो एसो संसारवासाओ त्ति मुणिओ

'कदाचित् कस्यचिद् मां दृष्ट्वा भवेद् जिनधर्मप्रतिवोधः' इत्यवश्यभवितव्यतानियोगेनानुज्ञाप्य गुरुं कतिपयसुसाधुपरिवृतः स्वजनालोकननिमित्तं काकन्दीमेव गतो जयाऽनगारः। निवेदितं राज्ञे। कुपित एष व्यापादकपुरुषेभ्यः। शब्दायितास्तेन पृष्टाश्च। अरे कुत्र वा कथं वा युष्माभिः स श्रमणकरूपधारी वैरिको मे व्यापादित इति। ततस्तैर्विज्ञाततदागमनैर्भणितम्-देव ! नन्दिवर्धने सन्निवेशे। केशालंकारविगमेन न प्रत्यभिज्ञातोऽस्माभिः। ततः पृष्ट एकः श्रमणकः 'कुत्र कतमो वाऽत्र जय'इति। तेन भणितम्-अत्र नागदेवगृहे य एष ध्यानमुपगत इति। ततः 'शून्यमेव तदुद्यानम्' इति गत्वा व्यापादितोऽस्माभिः। राज्ञा भणितम्-अन्यः कोऽपि तपस्वी युष्माभिर्व्यापादितः, स पुनर्महापाप इहागत इति। तैर्भणितम्-देव ! न सम्यग् विजानीमः। राज्ञा भणितम्-किं गतम् , अत्र साम्प्रतं व्यापादयिष्यामः। प्रतिश्रुतं च तैः। निर्गत एष निजमन्दिराद् भगवद्दर्शननिमित्तम्। दृष्टस्तेन भगवान् वन्दितश्च। धर्मलाभि-

---

[1] हरे क। [2] नियडीए क।

से अहिप्पाओ। भणिओ य एसो। महाराय, अवगयं चेव तए एयं, जहा कम्मपरिणामफलं संसारियाण सत्ताणं सुहं दुक्खं च। सव्वे य सत्ता सुहं अहिलसन्ति, न दुक्खं। मूलं पुण इमस्स धम्मो। तस्स परिणामो सुरूवया पियसमागमसुहाइं सोहग्गं [1]अरोगया विउला य भोया। ता अवलम्बेहि सयलसोक्खनिहाणभूयं धम्मं, आयरसु मेत्तिं, [2]वट्टेहि दाणं, करेहि सव्वसत्तेसु दयं ति। विजएण चिन्तियं। समुप्पन्नं इमस्स मरणभयं, अओ एवं भणाइ। ता कहिं वच्चइ त्ति। चिन्तिऊण भणियं च णेण। भयवं, जं तुमं आणवेसि। अन्नं च, [3]जयप्पभूइमेव पडिवन्नो तुमं वीयरागभासियं धम्मं, [4]तयप्पभूइमेव आढत्तं मए इमं। भयवया भणियं। सोहणं कयं तए। तओ कंचि वेलं पज्जुवासिऊण पविट्ठो नयरिं। चिन्तियं च णेण। अज्जेव एयं दुरायारं वावाएमि। पसन्ते वि भयवन्ते पुव्वकयकिलिट्ठकम्मपरिणई चेवेत्थ कारणं विजयस्स। भणियं च

तश्च भगवता। कथितश्च तस्मै सर्वज्ञभाषितो धर्मः। न विरक्त एव संसारवासादिति ज्ञातस्तस्याभिप्रायः। भणितश्चैषः। महाराज! अवगतमेव त्वयैतद्, यथा कर्मपरिणामफलं सांसारिकानां सत्त्वानां सुखं दुःखं च। सर्वे च सत्त्वा सुखमभिलषन्ति, न दुःखम्। मूलं पुनरस्य धर्मः। तस्य परिणामः सुरूपता प्रियसमागमसुखानि सौभाग्यमरोगता विपुलाश्च भोगाः। ततोऽवलम्बस्व सकलसौख्यनिधानभूतं धर्मम्, आचर मैत्रीम्, वर्तय दानम्, कुरु सर्वसत्त्वेषु दयामिति। विजयेन चिन्तितम्–समुत्पन्नमस्य मरणभयम्, अत एवं भणति। ततः कुत्र व्रजति? इति चिन्तयित्वा भणितं च तेन। भगवन्! यत्त्वमाज्ञापयसि। अन्यच्च यत्प्रभृत्येव प्रतिपन्नस्त्वं वीतरागभाषितं धर्मं तत्प्रभृत्येवारब्धं मयेदम्। भगवता भणितम्–शोभनं कृतं त्वया। ततः काञ्चिद् वेलां पर्युपास्य प्रविष्टो नगरीम्। चिन्तितं च तेन–अद्यैव एतं दुराचारं व्यापदयामि। प्रशान्तेऽपि भगवति पूर्वकृतक्लिष्टकर्मपरिणतिरेवात्र कारणं विजयस्य। भणितं च—

---

[1] आरोग्गया ख। [2] दवावेहि क। [3] जयप्पभिइमेव क। [4] तयप्पभिइमेव क।

अइसंकिलिट्ठकम्माणुवेयणे जो उ होइ परिणामो । सो संकिलिट्ठकम्मस्स कारणं जमिह पाएण ॥

समागया रयणी । भणिया य राइणा पुव्वपेसिया वावायगपुरिसा । [1]अरे अज्जं तं दुरायारं वावाएमो त्ति । पडिस्सुयमणेहिं । अत्थमिओ मियङ्को । कइवयपुरिसपरिवारिओ गओ जयाणगारसमीवं विजओ । दिट्ठो य णेण [2]निवायसरणपदीवो व्व सज्झाणसंगओ भयवं । तिव्वाणुहावकसाओदएणं च कड्ढियं मण्डलग्गं । अहिययरं गहिओ कसाएहिं । अवगया [3]सुकयवासणा, पवत्तो महामोहो, आसगलिओ तिव्वकम्मपरिणईए । पवड्ढमाणकोवाणलेण पहओ सिरोहराए, एगपहारेणेव पाडियं उत्तिमङ्गं । 'विजयकुमारो चेव एसो' त्ति 'अहो विचित्तया जीवचरियाणं, अचिन्तणीया कम्मुणो गइ' त्ति चिन्तिऊण अवगया साहुणो ॥

भयवं पुण गम्भीरयाए आसयस्स विसुद्धयाए [4]मेत्तीए अचलिययाए झाणस्स निम्ममयाए सरीरे [5]भावियाए जिणवयणस्स खीण-

---

अतिसंक्लिष्टकर्मानुवेदने यस्तु भवति परिणामः । स संक्लिष्टकर्मणः कारणं यदिह प्रायेण ॥

समागता रजनी । भणिताश्च राज्ञा पूर्वप्रेषिता व्यापादकपुरुषाः । अरे अद्य तं दुराचारं व्यापादयाम इति । प्रतिश्रुतमेभिः । अस्तमितो मृगाङ्कः । कतिपयपुरुषपरिवृतो गतो जयानगारसमीपं विजयः । दृष्टस्तेन निवातशरणप्रदीप इव सद्ध्यानसंगतो भगवान् । तीव्रानुभावकषायोदयेन च कृष्टं मण्डलाग्रम् । अधिकतरं गृहीतः कषायैः । अपगता सुकृतवासना, प्रवृत्तो महामोहः, (आसगलिओ दे.) आक्रान्तः तीव्रकर्मपरिणत्या । प्रवर्धमानकोपानलेन प्रहतः शिरोधरायाम् । एकप्रहारेणैव पातितमुत्तमाङ्गम् । 'विजयकुमार एषः' इति अहो विचित्रता जीवचरितानाम्, अचिन्तनीया कर्मणो गतिः' इति चिन्तयित्वाऽपगताः साधवः ॥

भगवान् पुनर्गम्भीरतयाऽऽशयस्य विशुद्धतया मैत्र्या अचलिततया ध्यानस्य निर्ममतया शरीरे भाविततया जिनवचनस्य क्षीण

---

[1] हरे क । [2] निव्वायसरणपईवो क । [3] -सन्ना क । [4] जीवाणमुवरि मेत्तीए क । [5] भावणाए ।

प्पाययाए पावकम्मुणो विसुद्धयाए लेसाभावस्स थिरयाए संजमधिईए आसन्नयाए परमपयस्स अपरिवडियसुहपरिणामो चइऊण देहं समुप्पन्नो आणयाभिहाणे देवलोए सिरिप्पहे विमाणे अट्ठारससागरोवमाऊ वेमाणिओ त्ति। विजयओ वि य तं वावाइऊण महाणुभावं कयकिच्चं मन्नमाणो अप्पाणं पविट्ठो नयरिं। सेससाहुणो वि गोसे गया सणंकुमारायरियसमीवं। साहिओ सयलवुत्तन्तो आयरियस्स। सुसीसो त्ति काऊणमणन्नसरिसं कयं परिदेवणं गुरुणा। इयरो वि य विजयनरवई तयप्पभूइमेव महया पावोदएण समुप्पन्नमहावाहिवेयणो 'जओ वावाइओ' त्ति एद्दहमेत्तेणमप्पाणं कयत्थं मन्नमाणो अहाउयं पालिऊण दुक्खमच्चुणा मओ समाणो उप्पन्नो पङ्कप्पहाए पुढवीए दससागरोवमाऊ महाघोरनारओ ति ॥

॥ पञ्चमं भवग्गहणं समत्तं ॥

प्रायतया पापकर्मणो विशुद्धतया लेश्याभावस्य स्थिरतया संयमधृत्या आसन्नतया परमपदस्य अपरिपतितशुभपरिणामश्च्युत्वा देहं समुत्पन्न आनताभिधाने देवलोके श्रीप्रभे विमाने अष्टादशसागरोपमायुष्को वैमानिक इति। विजयोऽपि च तं व्यापाद्य महानुभावं कृतकृत्यं मन्यमान आत्मानं प्रविष्टो नगरीम्। शेषसाधवोऽपि प्रातर्गताः सनत्कुमाराचार्यसमीपम्। कथितः सकलवृत्तान्त आचार्याय। सुशिष्य इति कृत्वाऽनन्यसदृशं कृतं परिदेवनं गुरुणा। इतरोऽपि च विजयनरपतिस्तत्प्रभृत्येव महता पापोदयेन समुत्पन्नमहाव्याधिवेदनो 'जयो व्यापादितः' इति एतावन्मात्रेणात्मानं कृतार्थं मन्यमानो यथायुष्कं पालयित्वा दुःखमृत्युना मृतः सन्नुत्पन्नः पङ्कप्रभायां पृथिव्यां दशसागरोपमायुष्को महाघोरनारक इति।

इति श्रीयाकिनीमहत्तरासूनु-परमगुणानुरागि-परमसत्यप्रियश्रीहरिभद्राचार्यविरचितायां
समरादित्यकथायां संस्कृतानुवादे पञ्चमभवग्रहणं समाप्तम् ॥

॥ छट्ठो भवो ॥

जयविजया य सहोयर जं भणियमिहासि तं गयमियाणिं । वोच्छामि पुव्वविहियं धरणो लच्छी य पइभज्जा ॥

अत्थि इहेव जम्बुद्दीवे दीवे भारहे वासे परिहरिया अहम्मेणं वज्जिया कालदोसेण रहिया उवद्दवेण निवासो नयसिरीए मायन्दी नाम नयरी ।

जीए महुमत्तकामिणिलीलाचंकमणणेउररवेण । भवणवणदीहिओयररया विं हंसा नडिज्जन्ति ॥
जीए सरलसहावो पियंवओ धम्मनिहियनियचित्तो । पढमाभासी नेहालुओ य पुरिसाण वग्गो त्ति ॥

तत्थ दरियारिमद्दणो सुकयधम्माधम्मववत्थो [[1]कालो व्व रिवूणं] कालमेहो नाम नरवई । तस्स अईव बहुमओ सयलनयरिसेट्ठिचूडामणी[2]-

जयविजयौ च सहोदरौ, यद् भणितं तं गतमिदानीम् । वक्ष्ये पूर्वविहितं धरणो लक्ष्मीश्च प्रतिभार्यै ॥

अस्तीहैव जम्बूद्वीपे द्वीपे भारते वर्षे परिहृताऽधर्मेण, वर्जिता कालदोषेण, रहिता उपद्रवेण, निवासो नयश्रियो माकन्दी नाम नगरी ।

यस्यां मधुमत्तकामिनीलीलाचंक्रमणनूपुररवेण । भवनदीर्घिकोदररता अपि हंसा गुप्यन्ते (व्याकुलीक्रियन्ते) ॥
यस्यां सरलस्वभावः प्रियंवदो धर्मनिहितनिजचितः । प्रथमाभाषी स्नेहालुकश्च पुरुषाणां वर्ग इति ॥

तत्र दृप्तारिमर्दनः सुकृतधर्माधर्मव्यवस्थः काल इव रिपूणां कालमेघो नाम नरपतिः । तस्यातीव बहुमतः सकलनगरीश्रेष्ठिचूडामणीभूतो

---

[1] नास्ति खपुस्तके । [2] चूडामणी ख ।

भूओ बन्धुदत्तो नाम सेट्ठि त्ति। सो य परम्मुहो परकलत्ते न अब्भत्थणाए, अलुद्धो परविभवे न धम्मोवज्जणे, असंतुट्ठो परोवयारे न धणागमे, अहिगओ पीईए न मच्छरेणं, दरिद्दो दोसेहिं न विहवेणं। तेण सा नयरी मलयवणं पिव पारिजाएण वसन्तो विय कुसुमुग्गमेण पाउससिरी विय मेहावलीए सरयकालो विय चन्दमण्डलेणं अहियं विभूसिय त्ति। तस्स कमलायरस्स विय विलुप्पइ कोसो मित्तमण्डलेण, कप्पतरुवरस्स विय खन्धे पायं काऊण गहियाइं फलाइं अत्थिनिवहेण। तस्स समाणकुलरूवविहवसहावा हारप्पहा नाम भारिया। स इमीए सह धम्मत्थअभग्गपसरं विसयसुहमणुहविंसु[1] त्ति ॥ इओ य सो आणयकप्पवासी देवो तम्मि देवलोए [2]अहाउयं पालिऊण चुओ समाणो समुप्पन्नो हारप्पहाए कुच्छिंसि। दिट्ठा य णाए तीए चेव रयणीए चरिमजामंमि सुमिणए दिव्वपउमासणोवविट्ठा धवलदुगुल्लनिवसणा विविहरयणखचियरसणाकलावा सुकुमालमिउफंसेण उत्तरीएण पच्छाइयपओहरा मुत्तावलीविहूसियाए सिरोहराए रुण्टन्तमहु[3]यरुप्फुल्लग-

बन्धुदत्तो नाम श्रेष्ठीति। स च पराङ्मुखः परकलत्रे नाभ्यर्थनायाम्, अलुब्धः परविभवे न धर्मोपार्जने, असंतुष्टः परोपकारे न धनागमे, अधिगतः प्रीत्या न मत्सरेण, दरिद्रो दोषैर्न विभवेन। तेन सा नगरी मलयवनमिव पारिजातेन वसन्त इव कुसुमोद्गमेन प्रावृट्श्रीरिव मेघावल्या शरत्काल इव चन्द्रमण्डलेनाधिकं विभूषितेति। तस्य कमलाकरस्येव विलुप्यते कोशो मित्रमण्डलेन, कल्पतरुवरस्येव स्कन्धे पादं कृत्वा गृहीतानि फलान्यर्थिनिवहेन। तस्य समानकुल-रूप-विभव-स्वभावा हारप्रभा नाम भार्या। सोऽनया सह धर्मार्थाभग्नप्रसरं विषयसुखमन्वभवत्। इतश्च स आनतकल्पवासी देवो तस्मिन् देवलोके यथायुष्कं पालयित्वा च्युतः सन् समुत्पन्नो हारप्रभायाः कुक्षौ। दृष्टा चानया तस्यामेव रजन्यां चरमयामे स्वप्ने दिव्यपद्मासनोपविष्टा धवलदुकूलनिवसना विविधरत्नखचितरसनाकलापा सुकुमारमृदुस्पर्शेणोत्तरीयेण प्रच्छादितपयोधरा मुक्तावलिविभूषितशिरोधरया [विभ्राजमाना] रणन्मधुकरोत्फुल्लगृहीतकमला धवलकरिवराभ्यां दिव्य-

---

[1] -मणुभविंसु क। [2] अहाउयमणु-क। [3] -महुयरफुल्ल-ख।

हियकमला धवलकरिवरेहिं दिव्वकञ्चणकलसेहिं अहिसिच्चमाणा सिरी वयणेणमुयरं पविसमाणि त्ति। तओ तं दट्ठूण विउद्धा एसा। साहिओ तीए [1]हरिसनिब्भराए दइयस्स। भणिया य [2]णेणं। सुन्दरि, सिरिनिवासो ते पुत्तो भविस्सइ। पडिस्सुयमिमीए। तओ विसेसेण तिवग्गसंपायणरयाए अइक्कन्तो कोइ कालो। पत्तो पसूइसमओ। पसूया य एसा, जाओ से दारओ, निवेइओ परितोसनामाए चेडियाए बन्धुदत्तस्स। परितुट्ठो एसो। दिन्नं तीए पारिओसियं। कयं उचियं करणिज्जं। अइक्कन्तो मासो दारयस्स। पइट्ठावियं च से नामं [3]पियामहस्स सन्तियं धरणो त्ति। पत्तो कुमारभावं, गाहिओ कलाकलावं। निम्माओ य तत्थ पयाणुसारी संवुत्तो॥

एत्थन्तरंमि सो विजयजीवनारओ तओ नरयाओ उव्वट्टिऊण पुणो संसारमाहिण्डिय अणन्तरभवे तहाविहमणुट्ठाणं काऊण तीए चेव नयरीए कत्तियस्स सेट्ठिस्स जयाए भारियाए कुच्छिसि इत्थियत्ताए उववन्नो त्ति। जाया कालक्कमेण। पइट्ठावियं च से नामं

काञ्चनकलशाभ्यामभिषिच्यमाना श्रीर्वदनेनोदरं प्रविशन्तीति। ततस्तां दृष्ट्वा विबुद्धैषा। कथितस्तया हर्षनिर्भरया दयिताय। भणिता च तेन–सुन्दरि! श्रीनिवासस्ते पुत्रो भविष्यति। प्रतिश्रुतमनया। ततो विशेषेण त्रिवर्गसंपादनरताया अतिक्रान्तः कोऽपि कालः। प्राप्तः प्रसूतिसमयः। प्रसूता चैषा, जातस्तस्य दारकः, निवेदितः परितोषानाम्न्या चेटिकया बन्धुदत्ताय। परितुष्ट एषः। दत्तं तस्यै पारितोषिकम्। कृतमुचितं करणीयम्। अतिक्रान्तो मासो दारकस्य। प्रतिष्ठापितं च तस्य नाम पितामहस्य सत्कं धरण इति। प्राप्तः कुमारभावम्, ग्राहितः कलाकलापम्। निर्मायश्च तत्र पदानुसारी संवृत्तः॥

अत्रान्तरे स विजयजीवनारकः ततो नरकादुद्वृत्य पुनः संसारमाहिण्डथ अनन्तरभवे तथाविधमनुष्ठानं कृत्वा तस्यामेव नगर्यां कार्तिकस्य श्रेष्ठिनो जयाया भार्यायाः कुक्षौ स्त्रीतयोपपन्न इति। जाता कालक्रमेण। प्रतिष्ठापितं च तस्या नाम लक्ष्मीरिति। प्राप्ता च

---

१ परिहरिस– क। २ तेण क। ३ पियामहसंतियं क।

लच्छि त्ति। पत्ता य जोव्वणं। अचिन्तणीययाए कम्मपरिणामस्स भवियव्वयाए निओएण महाविभूईए परिणीया य णेणं। अत्थि पीई धरणस्स लच्छीए, न उण तीए धरणंमि। चिन्तेइ एसा। अलं मे जीवलोएण, जत्थ धरणो पइदिणं दीसइ त्ति। एवं च विडम्बणापायं विसयसुहमणुहवन्ताणं अइक्कन्तो कोइ कालो॥

अन्नया य पयत्ते मयणमहूसवे कीलानिमित्तं पयट्टो रहवरेण धरणो मलयसुन्दरं उज्जाणं। पत्तो नयरिदुवारदेसं। एत्थन्तरंमि तओ चेव उज्जाणाओ कीलिऊणागओ रहवरेण नयरिदुवारदेसभायं पञ्चनन्दिसेट्ठिपुत्तो देवनन्दि त्ति। मिलिया रहवरा दुवारदेसभाए। वित्थिण्णयाए रहवराणं न दोण्हं पि निग्गमणपवेसभूमी। भणियं च देवनन्दिणा। भो भो धरण, ओसारेहि ताव[2] रहवरं, जाव मे पविसइ रहो त्ति। धरणेण भणियं। अइगओ मे रहो, न तीरए वालेउं। ता तुमं चेव ओसारेहि, जाव मे नीसरइ त्ति। देवनन्दिणा

यौवनम्। अचिन्तनीयतया कर्मपरिणामस्य भवितव्यताया नियोगेन महाविभूत्या परिणीता च तेन। अस्ति प्रीतिर्धरणस्य लक्ष्म्यां न पुनस्तस्या धरणे। चिन्तयत्येषा-अलं मे जीवलोकेन, यत्र धरणः प्रतिदिनं दृश्यते इति। एवं च विडम्बनाप्रायं विपयसुखमनुभवतोरतिक्रान्तः कोऽपि कालः॥

अन्यदा च प्रवृत्ते मदनमहोत्सवे क्रीडानिमित्तं प्रवृत्तो रथवरेण धरणो मलयसुन्दरमुद्यानम्। प्राप्तो नगरीद्वारदेशम्। अत्रान्तरे तत एवोद्यानात् क्रीडित्वा गतो रथवरेण नगरीद्वारदेशभागं पञ्चनन्दिश्रेष्ठिपुत्रो देवनन्दीति। मिलितौ रथवरौ द्वारदेशभागे। विस्तीर्णतया रथवरयोर्न द्वयोरपि निर्गमनप्रवेशभूमिः। भणितं च देवनन्दिना-भो भो धरण! अपसारय तावद् रथवरम्, यावन्मे प्रविशति रथ इति। धरणेन भणितम्-अतिगतो मे रथः, न शक्यते वालयितुम्। ततस्त्वमेवापसारय, यावन्मे निःसरतीति। देवनन्दिना भणितम्-

---

१ देवनंदिणा भणियं क। २ रहवरं ताव ख।

भणियं। भो भो धरण, अह केण उण अहं भवओ ऊणओ, जेण रहवरं ओसारेमि। धरणेण भणियं। भो भो देवनन्दि, तुल्लमेवेयं। एवं च वित्थक्का दुवे वि सेट्ठिपुत्ता। रुद्धो निग्गमपवेसमग्गो नायरयाणं। पवित्थिण्णो जणवाओ। विन्नाओ एस वुत्तन्तो नयरिमहन्तएहिं। आलोचियं च णेहिं। दुवे वि खु महापुरिसपुत्ता, न खलु एत्थ एगस्स वि निरागरणं जुज्जइ त्ति। ता इमं एत्थ पत्तयालं; निब्भच्छिज्जन्ति एए। जहा 'कीस तुब्भे पुव्वपुरिसज्जिएणं विहवेणं गव्वमुव्वहह। केण तुम्हाण नियभुओवज्जिएणं दविणजाएणं दिन्नं महादाणं। केण वा काराविओ धम्माहिगारो। केण वा अब्भुद्धरिओ विहलवग्गो। केण वा परिओसिया जणणिजणया। ता किमेइणा निरत्थएण बुहजणोवहसणिज्जेण अहोपुरिसियापाएण चेट्ठिएणं। अओ उवसंहरह एयं, ओसारेह नियनियथामाओ चेव पिट्ठओ रहवरे' किमन्नेणं ति। एवमालोचिऊण 'इणमेव तुब्भेहिं ते वत्तव्व' त्ति भणिऊण विसज्जिया वयणविन्नासकुसला धम्मत्थविसारया परिणयवओवत्थाए निवासो [1]उवसमस्स इहपरलोयावायदंसगा सुट्ठिया धम्मपक्खे सयलनयरिजणबहुमया चत्तारि चारिया। गया ते तेसिं समीवं।

भो भो धरण! अथ केन पुनरहं भवत ऊनः, येन रथवरमपसारयामि। धरणेन भणितम्–भो भो देवनन्दिन्! तुल्यमेवैतत्। एवं च विरोधितौ द्वावपि श्रेष्ठिपुत्रौ। रुद्धो निर्गमप्रवेशमार्गो नागरिकानाम्। प्रविस्तीर्णो जनवादः। विज्ञात एष वृत्तान्तो नगरीमहद्भिः। आलोचितं च तैः। द्वावपि खलु महापुरुषपुत्रौ, न खल्वत्र एकस्यापि निराकरणं युज्यते इति। तत इदमत्र प्राप्तकालम्, निर्भर्त्स्येते एतौ, यथा कस्माद् युवां पूर्वपुरुषार्जितेन विभवेन गर्वमुद्वहथः। केन युवयोर्निजभुजोपार्जितेन द्रविणजातेन दत्तं महादानम्, केन वा कारितो धर्माधिकारः, केन वाऽभ्युद्धृतो विह्वलवर्गः, केन वा परितोषितौ जननीजनकौ। ततः किमेतेन निरर्थकेन बुधजनोपहसनीयेनाहोपुरुषिकाप्रायेण चेष्टितेन। अत उपसंहरतैतद्, अपसारयतं निजनिजस्थानादेव पृष्ठतो रथवरौ, किमन्येनेति। एवमालोच्य 'इदमेव युष्माभिस्तौ

---

[1] धम्मस्स क।

अब्भुट्ठिया य णेहिं। अणुसासिया चारिएहिं। साहिओ पउराहिप्पाओ। 'अहो सोहणं ति' परितुट्ठो देवनन्दी। असोहणं ति लज्जिओ धरणो। भणियं च तेण। भो भो महन्तया, जं तुब्भे आणवेह, तमवस्सं म[1]ए कायव्वं। किं तु पडिबोहिओ अहं तुब्भेहिं, लज्जिओ य अत्तणो चेट्ठिएणं, महई मे ओहावणा, आमगब्भपायं च मन्नेमि अत्ताणयं। ता एवं मे अणुग्गहं करेह। ओसारिज्जन्तु एए रहवरा। गच्छामो य अम्हे इओ अज्जेव देसन्तरं। तओ संवच्छरेण जो चेव णे [2]पहूयं दविणजायं विढविऊण इहागच्छिय अहियं सप्पुरिसचेट्ठियं करेस्सइ, तस्सेव सन्तिओ रहो इमीए चेव तेरसीए पविसिस्सइ वा निक्खमिस्सइ वा। चारिएहिं भणियं। अलमेइणा अभिनिवेसेण। धरणेण भणियं। न अन्नहा मे निव्वुई होइ। चारिएहिं भणियं। [3]पउरामेत्थ पमाणं। धरणेण भणियं। निवेएह पउराणं। देवनन्दिणा

वक्तव्यौ' इति भणित्वा विसर्जिता वचनविन्यासकुशला धर्मार्थविशारदाः परिणता वयोऽवस्थया निवास उपशमस्य इहपरलोकापायदर्शकाः सुस्थिताः धर्मपक्षे सकलनगरीजनबहुमताश्चत्वारश्चारिकाः (प्रधानपुरुषाः)। गतास्ते तयोः समीपम्। अभ्युत्थिताश्च ताभ्याम्। अनुशासितौ च चारिकैः। कथितः पौराभिप्रायः। अहो शोभनमिति परितुष्टो देवनन्दी। अशोभनमिति लज्जितो धरणः। भणितं च तेन-भो भो महान्तः! यद् यूयमाज्ञापयत तदवश्यं मया कर्तव्यम्। किंतु प्रतिबोधितोऽहं युष्माभिः, लज्जितश्चात्मनश्चेष्टितेन, महती मेऽपभावना, आमगर्भप्रायं च मन्ये आत्मानम्। तत एवं मेऽनुग्रहं कुरुत। अपसार्येतामेतौ रथवरौ। गच्छावश्चावामितोऽद्यैव देशान्तरम्। ततः संवत्सरेण य एवावयोः प्रभूतं द्रविणजातमुपार्ज्य इहागत्याधिकं सत्पुरुषचेष्टितं करिष्यति तस्यैव सत्को रथोऽस्यामेव त्रयोदश्यां प्रवेक्ष्यति वा निष्क्रमिष्यते वा। चारिकैर्भणितम्-अलमेतेनाभिनिवेशेन। धरणेन भणितम्-नान्यथा मे निर्वृतिर्भवति। चारिकैर्भणितम्-पौरा अत्र

---

१ मे क। २ बहुयं क। ३ पउरमेत्थ क।

भणियं। जुत्तमेयं, को एत्थ दोसो। तओ निवेइयं पउराणं। बहुमयं च तेसिं। सद्दाविया य तेसिं जणणिजणया। साहिओ वुत्तन्तो, बहुमओ य तेसिं पि। तओ काराविया सवहं 'न तुब्भेहिं एएसिं संवाहणा कायव्वा'। सद्दाविया धरणदेवनन्दी। [1]समप्पियं पत्तेयं तेसिं पञ्चदीणारलक्खपमाणं भण्डमोल्लं। कयं ववत्थापत्तयं 'जो चेव एएसिं संवच्छरब्भन्तरे अहिययरदविणजाएण पोरुसं पयडइस्सइ, तस्सेव सन्तिएण रहवरेण गन्तव्वं, न इयरस्स'। दिन्ना य णेहिं सहत्था। मुद्दियं पत्तयं। छूढं पउरभण्डारे। निग्गया नियपरिवारपरियरिया महया चडयरेण धरणदेवनन्दी; गेण्हिऊण जहोचियं भण्डं पयट्टा देसन्तरं, एगो उत्तरावहं, अवरो पुव्वदेसं।

एत्थन्तरंमि चिन्तियं लच्छीए। दीहाणि देसन्तराणि, सुहेण विओओ, दुक्खेण समागमो; ता न याणामो, अन्तराले [2]किमहं पाविस्सं ति। अवावाइओ चेव विउत्तो खु एसो। गया य सत्थवाहपुत्ता एगं पयाणयं। पेसियाओ य एएसिं बन्धुदत्तपञ्चनन्दीहिं

प्रमाणम्। धरणेन भणितम्-निवेदयत पौरेभ्यः। देवनन्दिना भणितम्-युक्तमेतत्, कोऽत्र दोषः। ततो निवेदितं पौरेभ्यः। बहुमतं च तेषाम्। शब्दायितौ च तयोर्जननीजनकौ। कथितो वृत्तान्तः, बहुमतश्च तयोरपि। ततः कारितौ शपथं 'न युष्माभिरेतयोः संवाहना (सहायता) कर्त्तव्या'। शब्दायितौ धरणदेवनन्दिनौ। समर्पितं प्रत्येकं तयोः पञ्चदीनारलक्षप्रमाणं भाण्डमौल्यम्। कृतं व्यवस्थापत्रम् 'य एवैतयोः संवत्सराभ्यन्तरेऽधिकतरद्रविणजातेन पौरुषं प्रकटयिष्यते तस्यैव सत्केन रथवरेण गन्तव्यम्, नेतरस्य'। दत्तौ चाभ्यां स्वहस्तौ। मुद्रितं पत्रम्। क्षिप्तं पौरभाण्डागारे। निर्गतौ निजपरिवारपरिवृतौ महताऽऽडम्बरेण धरणदेवनन्दिनौ, गृहीत्वा यथोचितं भाण्डं प्रवृत्तौ देशान्तरम्। एक उत्तरापथम्, अपरः पूर्वदेशम्।

अत्रान्तरे चिन्तितं लक्ष्म्या-दीर्घाणि देशान्तराणि, सुखेन वियोगः, दुःखेन समागमः, ततो न जानामि, अन्तराले किमहं प्राप्स्यामि

---

[1] आगंतूण उवविट्ठा पणामपुव्वयं' इत्यधिकः पाठः कपुस्तके। [2] किमेत्थं भविस्सइ त्ति क।

सरीरट्ठिइनिमित्त[1]मालोचिय आउच्छिऊण नयरिमहन्तए सपरिवाराओ वहूओ, मिलियाओ य एएसिं। पइदिणपयाणएहिं च गच्छमाणाणं अइक्कन्ता कइवि दियहा॥

अन्नया य परिवहन्ते सत्थे दिट्ठो धरणेण एगंमि वणनिउञ्जे अच्चन्तसोमरूवो उप्पायनिवाए करेमाणो विज्जाहरकुमारओ। गओ तस्स समीवं। पुच्छिओ य एसो। भो किंनिमित्तं पुण तुमं असंजायपक्खो विय गरुडपोयओ मुहवियारोवलक्खिज्जमाणनहङ्गणगमणूसुओ विय उप्पायनिवाए करेसि। आचिक्ख, जइ अकहणिज्जं न होइ। तओ अहो से भावन्नुयया, अहो आगई, अहो वयणविन्नासो' त्ति चिन्तिऊण भणियं विज्जाहरेण। भो, सुण। अहं खु वेयड्ढपव्वए अमरपुरनिवासी हेमकुण्डलो नाम विज्जाहरकुमारो अणब्भत्थविज्जो सयनिओयपरो तत्थेव चिट्ठामि, जाव समागओ तायस्स परममित्तो विज्जुमाली नाम विज्जाहरो। भणिओ य ताएण। कुओ

-इति। अव्यापादित एव वियुक्तः खल्वेषः। गतौ च सार्थवाहपुत्रौ एकं प्रयाणकम्। प्रेषिते चैतयोर्बन्धुदत्तपञ्चनन्दिभ्यां शरीरस्थितिनिमित्तमालोच्य आपृच्छ्य नगरीमहतः सपरिवारे वध्वौ, मिलिते चैतयोः। प्रतिदिनप्रयाणकैश्च गच्छतोरतिक्रान्ताः कत्यपि दिवसाः॥

अन्यदा च परिवहति सार्थे दृष्टो धरणेन एकस्मिन् वननिकुञ्जेऽत्यन्तसौम्यरूप उत्पातनिपातान् कुर्वन् विद्याधरकुमारः। गतस्तस्य समीपम्। पृष्टश्चैषः। भोः किंनिमित्तं पुनस्त्वमसंजातपक्ष इव गरुडपोतको मुखविकारोपलक्ष्यमाणनभोङ्गणगमनोत्सुक इव उत्पातनिपातान् करोषि। आचक्ष्व यद्यकथनीयं न भवति। 'ततोऽहो तस्य भावज्ञता, अहो आकृतिः, अहो वचनविन्यासः' इति चिन्तयित्वा भणितं विद्याधरेण। भोः! श्रृणु। अहं खलु वैताढ्यपर्वतेऽमरपुरनिवासी हेमकुण्डलो नाम विद्याधरकुमारोऽनभ्यस्तविद्यः स्वनियोगपरस्तत्रैव तिष्ठामि, यावत् समागतस्तातस्य परममित्रं विद्युन्माली नाम विद्याधरः। भणितश्च तातेन। कुतस्त्वम्, कस्माद् वा विमनस्कदुर्मनस्को

---

१ -मालोचिऊण पुच्छिऊण क।

तुमं, कीस वा विमणदुम्मणो [1]दीससि । तेण भणियं । विञ्झाओ अहं । विमणदुम्मणत्ते पुण इमं कारण । दिट्ठं मए विञ्झाओ इहागच्छमाणेण उज्जेणीए [2]निव्वेयकारणं । ताएण भणियं । कीइसं निव्वेयकारणं । विज्जुमालिणा भणियं । सुण ।

अत्थि उज्जेणीए सिरिप्पहो नाम राया । तस्स [3]रूविणि व्व कुसुमाउहवेजयन्ती जयसिरी नाम धूया । सा य पत्थेमाणस्स वि न दिन्ना कोङ्कणरायपुत्तस्स [4]सिसुवालस्स, दिन्ना य [5]इमेण वच्छेसरसुयस्स परोवयारकरणेक्कलालसस्स सिरिविजयस्स । कुविओ सिसुवालो । आगओ जयसिरिविवाहनिमित्तं सिरिविजओ । तओ पारद्धे महाविभूईए विवाहमहूसवे निग्गया मयण[6]वन्दणनिमित्त समालोचिय विहाएणमवक्खन्दं दाऊणं अवहरिया सिसुवालेण जयसिरी । [7]उट्ठाइओ कलयलो । मुणिओ वुत्तन्तो सिरविजएणं । लग्गो मग्गओ । समासाइओ सिसुवालो । आवडियमाओहणं । गाढपहारीकएणं च [8]जेऊण सिसुवालं नियत्तिया जयसिरी । पहारगरुययाए य सो महाणु-

दृश्यसे । तेन भणितम्-विन्ध्यादहम् , विमनोदुर्मनस्त्वे पुनरिदं कारणम् । दृष्टं मया विन्ध्यादिहागच्छता उज्जयिन्यां निर्वेदकारणम् । तातेन भणितम्-कीदृशं निर्वेदकारणम् । विद्युन्मालिना भणितम्-शृणु ।

अस्त्युज्जयिन्यां श्रीप्रभो नाम राजा । तस्य रूपिणीव कुसुमायुधवैजयन्ती जयश्रीर्नाम दुहिता । सा च प्रार्थयमानस्यापि न दत्ता कोङ्कणराजपुत्रस्य शिशुपालस्य, दत्ताऽनेन वत्सेश्वरसुतस्य परोपकारकरणैकलालसस्य श्रीविजयस्य । कुपितः शिशुपालः । आगतो जयश्रीविवाहनिमित्तं श्रीविजयः । ततः प्रारब्धे महाविभूत्या विवाहमहोत्सवे निर्गता मदनवन्दननिमित्तं समालोच्य विहायसाऽवस्कन्दं दत्त्वाऽपहृता शिशुपालेन जयश्रीः । उत्थितः कलकलः । ज्ञातो वृत्तान्तः श्रीविजयेन । लग्नो मार्गतः । समासादितः शिशुपालः । आपतितमायोधनम् ।

---

१ संवुत्तो क । २ महानिव्वेय- ख । ३ रूविव्व क-ख । ४ सिसुपालस्स ख । ५ इमेण सिरिप्पहनरवइणा क । ६ मयणपूयानिमित्तं । ७ उद्धाइओ ख । ८ जिणिऊण क ।

भावो पाणसंसए वट्टए। सा वि रायधूया ‘[1]न अहमेयंमि अकयपाणभोयणे पाणवित्तिं करेमि’ त्ति वामकरयलपणामियवयणपङ्कया अणाचिक्खणीयं अवत्थन्तरमणुहवन्ती दुक्खेण चिट्ठइ ॥ एयं मे एत्थ कारणं। ताएण भणियं। ईइसो एस संसारो। [2]खेल्लणयभूया खु एत्थ कम्मपरिणईए पाणिणो। ता अलं निव्वेएण ॥ तओ मए चिन्तियं। साहियं मे कल्लं चेव हिमवन्तपव्वयगयस्स दरिहरुग्गयं महोसहिमवलोइऊण गन्धव्वरइनामेण गन्धव्वकुमारेण मम वयंसएण। जहा भो हेमकुण्डल, सच्चो खु एस लोयवाओ, जं अचिन्तो हि मणिमन्तोसहीणं पभावो त्ति, जओ एयाए ओसहीए एसो पहावो, जेण विदारियट्ठी वि [3]खग्गाइपहारो इमीए पक्खालणोयएणं पि पणट्ठवेयणं तक्खणा चेव रुज्झइ त्ति। दिट्ठपच्चया य [4]मए सा। ता गच्छामि अहयं हिमवन्तं गेण्हिऊण तयं ओसहिं उवणेमि सिरिविजयस्स। तओ सुमरिऊण कहंचि गयणगामिणिं विज्जं गओ हिमवन्तपव्वयं। गहिया ओसही। ओइण्णो हिमवन्ताओ । ‘मा सि-

गाढप्रहारीकृतेन च जित्वा शिशुपालं निर्वर्तिता जयश्रीः। प्रहारगुरुकतया च स महानुभावः प्राणसंशये वर्तते। साऽपि राजदुहिता ‘नाहमेतस्मिन्नकृतपानभोजने प्राणवृत्तिं करोमि’ इति वामकरतलार्पितवदनपङ्कजाऽनाख्यानीयमवस्थान्तरमनुभवन्ती दुःखेन तिष्ठति। एतन्मेऽत्र कारणम्। तातेन भणितम्-ईदृश एष संसारः। खेलनकभूताः खल्वत्र कर्मपरिणत्याः प्राणिनः। ततोऽलं निर्वेदेन। ततो मया चिन्तितम्-कथितं मे कल्ये एव हिमवत्पर्वतगतस्य दरीगृहोद्गतां महौषधिमवलोक्य गान्धर्वरतिनाम्ना गान्धर्वकुमारेण मम वयस्येन। यथा भो हेमकुण्डल! सत्यः खल्वेष लोकवादः, यदचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति। यत एतस्या ओषध्या एष प्रभावः, येन विदारितास्थिरपि खङ्गादिप्रहारोऽस्याः प्रक्षालनोदकेनापि प्रनष्टवेदनं तत्क्षणादेव रुह्यते इति। दृष्टप्रत्यया च मया सा। ततो गच्छाम्यहं हिमवन्तं गृहीत्वा तामोषधिमुपनयामि श्रीविजयाय। ततः स्मृत्वा कथंचिद् गगनगामिनीं विद्यां गतो हिमवत्पर्वतम्। गृहीतौषधिः। अवतीर्णो

---

१ नाहमेयंमि क। २ खेलणय- क। ३ खग्गाइपहारेण क। ४ मम एसा ख।

रिविजयस्स अच्चाहियं भविस्सइ' त्ति पडिनियत्तो वेएण । पत्तो एयं निउञ्जं, खीणयाए वेयागमणेण वीसमणनिमित्तं ओइण्णो इहइं, कयं चलणसोयं उवविट्ठो कुरवयपायवसमीवे, ठिओ मुहुत्तमेत्तं, उच्चलिओ य उज्जेणिं । सुमरिया गयणगामिणी विज्जा, जाव अहिणवगिहीय[1]त्तणेण गमणसंभमेण य विसुमरियं मे पयं । तओ सा न वहइ त्ति उप्पायनिवाए करेमि । धरणेण भणियं । भो एवं ववत्थिए को इह उवाओ । हेमकुण्डलेण भणियं । नत्थि उवाओ । अओ चेव रायउत्तविणाससङ्काए उत्तम्मइ मे हिययं, पणस्सइ मे मई । सव्वहा न अप्पपुण्णाणं समीहियं संपज्जइ त्ति दढं विसण्णो म्हि । धरणेण भणियं । भो अत्थि एस कप्पो, जं सा अन्नस्स[2] समक्खं पढिज्जइ । हेमकुण्डलेण भणियं 'अत्थि' । धरणेण भणियं । जइ एवं, ता पढ; कयाइ अहं ते पयं लहामि । तओ हेमकुण्डलेण 'नत्थि अविसओ पुरिससामत्थस्स' त्ति चिन्तिय[3] सामन्नसिद्धिं काऊण पढिया विज्जा । पयाणुसारित्तणेण लद्धं पयं धरणेण । साहियं हेमकु-

हिमवतः। 'मा श्रीविजयस्यात्याहितं भविष्यति' इति प्रतिनिवृत्तो वेगेन । प्राप्त एतद् निकुञ्जम् । क्षीणतया वेगागमनेन विश्रमणनिमित्तमवतीर्ण इह। कृतं चरणशौचम्, उपविष्टः कुरबकपादपसमीपे, स्थितः मुहूर्तमात्रम् , उच्चलितश्चोज्जयिनीम्। स्मृता गगनगामिनी विद्या, यावदभिनवगृहीतत्वेन गगनसंभ्रमेण च विस्मृतं मया पदम्। ततः सा न वहतीति उत्पातनिपातान् करोमि। धरणेन भणितम्-भो एवं व्यवस्थिते क इहोपायः। हेमकुण्डलेन भणितम्-नास्त्युपायः। अत एव राजपुत्रविनाशशङ्कया उत्ताम्यति मे हृदयम् , प्रणश्यति मे मतिः। सर्वथा नाल्पपुण्यानां समीहितं संपद्यते इति दृढं विषण्णोऽस्मि। धरणेन भणितम्-भो अस्त्येष कल्पः, यत्साऽन्यस्य समक्षं पठ्यते। हेमकुण्डलेन भणितम्-'अस्ति'। धरणेन भणितम्-यद्येवं ततः पठ, कदाचिदहं तव पदं लभे। ततो हेमकुण्डलेन 'नास्त्यविषयः पुरुषसामर्थ्यस्य' इति चिन्तयित्वा सामान्यसिद्धिं कृत्वा पठिता विद्या। पदानुसारित्वेन लब्धं पदं धरणेन। कथितं हेमकुण्डलाय। परि-

---

[1] गहीयत्तणेण । [2] अन्नाणं पि क । [3] चिन्तिऊण क ।

ण्डलस्स। परितुट्ठो एसो। भणियं च णेण। भो भो महापुरिस, दिन्नं तए जीवियं मम समीहियसंपायणेण रायउत्तस्स, ता किं ते करेमि। धरणेण भणियं। कयं ते करणिज्जं; गच्छ समीहियं संपाडेहि। तओ हेमकुण्डलेण 'अहो से महाणुभावय' त्ति चिन्तिय परत्थं करेज्जासि त्ति भणिऊण दिन्नं ओसहिवलयखण्डं। पणयभङ्गभीरुत्तणेण गहियं च णेण। गओ विज्जाहरो, आगओ य धरणो निययसत्थं। अइक्कन्ता कइवि दियहा॥

अन्नया य गिरिनइतीरंमि समावासिए सत्थे गवलजलयवण्णा वेल्लिनिबद्धुद्धकेसहारा वक्कलद्धनिवसणा कण्णियकोडण्डवावडग्गहत्था सुणयवन्द्रसंगया सदुक्खं रुयमाणा दिट्ठा धरणेण नाइदूरगामिणा सवरजुवाणय त्ति। सद्दाविया णेण पुच्छिया य। भो किंनिमित्तं रुयह त्ति। तेहिं भणियं अज्ज, अत्थि अम्हाणं कालसेणो नाम पल्लीवई।

तुष्ट एषः। भणितं च तेन–भो भो महापुरुष! दत्तं त्वया जीवितं मम समीहितसंपादनेन राजपुत्राय, ततः किं ते करोमि। धरणेन भणितम्–कृतं त्वया करणीयम्, गच्छ समीहितं संपादय। ततो हेमकुण्डलेन 'अहो तस्य महानुभावता' इति चिन्तयित्वा 'परार्थं कुर्याः' इति भणित्वा दत्तमोषधिवलयखण्डम्। प्रणयभङ्गभीरुत्वेन गृहीतं च तेन। गतो विद्याधरः, आगतश्च धरणो निजसार्थम्। अतिक्रान्ताः कत्यपि दिवसाः।

अन्यदा च गिरिणदीतीरे समावासिते सार्थे गवलजलदवर्णा वल्लिनिबद्धोर्ध्वकेशहारा वल्कलाधनिवसनाः कर्णिककोदण्डव्यापृताग्रहस्ताः शुनकवन्द्रसंगताः सदुःखं रुदन्तो दृष्टा धरणेन नातिदूरगामिना शबरयुवान इति। शब्दायितास्तेन पृष्टाश्च। भोः किंनिमित्तं रुदितेति। तैर्भणितम्–आर्य! अस्त्यस्माकं कालसेनो नाम पल्लिपतिः।

जस्स इह विम्हियाओ सत्तिनियाणाणि चिन्तयन्तीओ । न समल्लियन्ति दुग्गं परचक्कभए वि वाहीओ ॥
एक्कसरघायलद्धा जस्स य करिकुम्भदारणेक्करसा । न वि विहलन्तसरीरा गच्छन्ति पयं पि केसरिणो ॥

सो[1] खु केसरी आगओ त्ति आयण्णिय घेत्तूण कोदण्डं[2] कण्णियसरं च एगागी चेव निग्गओ पल्लीओ । न दिट्ठो य णेण नग्गोहपायवन्तरिओ केसरी । गओ तस्स समीवं । गहिओ य णेण पट्ठिदेसे । वावाइओ तेण वलिऊण कट्टारएण[3] केसरी । तेण वि य [4]से तोडियं उत्तिमङ्गखण्डं । तओ सो 'नत्थि मे जीवियं[5]' ति मन्नमाणो जलणपवेसं काउमारद्धो । मुणिओ से एस[8] वुत्तन्तो गेहिणीए । तओ सा वि आवन्नसत्ता तं चेव काउं ववसिया, वारिया वि पल्ली[7]वइणा न विरमइ त्ति । तओ तेण पेसिया अम्हे तीए संधारणत्थं पिउणो से आणयणनिमित्तं । वीररसपहाणो खु सो[6] सयणवच्छलो य । ता न याणामो, किं पडिवज्जिस्सइ त्ति । महादुक्खपीडिया असमत्था

यस्येह विस्मिता शक्तिनिदानानि चिन्तयन्त्यः। न समालीयन्ते(समाश्रयन्ति)दुर्गं परचक्रभयेऽपि व्याध्यः (व्याधपत्न्यः)
एकशरघातलब्धा(प्राप्ता) यस्य च करिकुम्भदारणैकरसाः। नापि विह्वलच्छरीरा गच्छन्ति पदमपि केसरिणः॥

स खलु केसरी आगत इत्याकर्ण्य गृहीत्वा कोदण्डं कर्णिकशरं च एकाक्येव निर्गतः पल्लितः। न दृष्टश्चानेन न्यग्रोधपादपान्तरितः केसरी। गतस्तस्य समीपम्। गृहीतश्च तेन पृष्ठदेशे। व्यापादितस्तेन वलित्वा कट्टारकेन केसरी। तेनापि च तस्य तोडितमुत्तमाङ्गखण्डम्। ततः स 'नास्ति मे जीवितम्' इति मन्यमानो ज्वलनप्रवेशं कर्तुमारब्धः। ज्ञातस्तस्यैष वृत्तान्तो गेहिन्या। ततः साऽपि आपन्नसत्त्वा तमेव कर्तुं व्यवसिता, वारिताऽपि पल्लिपतिना न विरमतीति। ततस्तेन प्रेषिता वयं तस्याः संधारणाथ पितुस्तस्या आनयननिमित्तम्। वीररसप्रधानः खलु स स्वजनवत्सलश्च। ततो न जानीमः किं प्रतिपत्स्यत इति। महादुःखपीडिता असमर्थाश्च धर्तुमिमं

---

१ सो य केसरी क। २ कोडंडं क। ३ छुरियाए क। ४ तोडियं से उत्तिमङ्ग–क। ५ जीयं क। ६ ययस्स क। ७ पल्लि–क। ८ एसो क।

य धरिउं इमं सोयाइरेयं अविज्जमाणोवाया य पडिवज्जिऊण इत्थियाभावं केवलं रुयम्ह। धरणेण भणियं। भद्दा, अलं सोएण। दंसेहि मे तं पल्लीवइं। कयाइ जीवावेमि अहयं। तओ चलणेसु निवडिऊण हरिसवसुप्फुल्ललोयणेहिं[१] जंपियं सवरेहिं। अज्ज, एवं तुमं देवावयारो विय आगईए। ता तुमं चेव समत्थो सि देवं समासासेउं। अन्नं च। जइ अम्हेसु अणुग्गहबुद्धी अज्जस्स, ता तुरियं गच्छउ अज्जो; मा तस्स महाणुभावस्स अच्चाहियं भवे। तओ घेत्तूण विज्जाहरविइण्णं ओसहिवलयं आरुहिय वेसरं कइवयनियपुरिसपरिवारिओ तुरियतुरियं गओ सत्थवाहपुत्तो। दिट्ठो य तेणं नग्गोहपायवतलम्मि चियगासन्नसंठिओ रुहिरधारापरिसित्तगत्तो सिणेहसारमसद्दं च रोवमाणीए[२] जायाए संगओ[३] कालसेणो। निवेइओ से वुत्तन्तो सवरजुवाणएण। अब्भुट्ठमाणो य मुच्छानिमीलियलोयणो निवडिओ धरणिवट्ठे। धरणेण भणियं। उदयमुदयं ति। तओ आणीयमुदयं नलिणिपत्तेणं[४]। छूढमोसहिवलयं[५] दाऊणमुत्तिमङ्गखण्डं। सित्तो य

शोकातिरेकम्, अविद्यमानोपायाश्च प्रतिपद्य स्त्रीभावं केवलं रुदिमः। धरणेन भणितम्–भद्रा! अलं शोकेन। दर्शय मे तं पल्लीपतिम्, कदाचिज्जीवयाम्यहम्। ततश्चरणयोर्निपत्य हर्षवषोत्फुल्ललोचनैर्जल्पितं शवरैः। आर्य! एवं त्वं देवावतार इवाकृत्या। ततस्त्वमेव समर्थोऽसि देवं समाश्वासितुम्। अन्यच्च, यद्यस्मास्वनुग्रहबुद्धिरार्यस्य ततस्त्वरितं गच्छत्वार्यः, मा तस्य महानुभावस्यात्याहितं भवेत्। ततो गृहीत्वा विद्याधरवितीर्णमोषधिवलयमारुह्य वेसरं कतिपयनिजपुरुषपरिवृतस्त्वरितत्वरितं गतः सार्थवाहपुत्रः। दृष्टस्तेन न्यग्रोधपादपतले चितासन्नसंस्थितो रुधिरधारापरिषिक्तगात्रः स्नेहसारमशब्दं च रुदत्या जायया संगतः कालसेनः। निविदितस्तस्य वृत्तान्तः शवरयूना। अभ्युत्तिष्ठंश्च मूर्च्छानिमिलितलोचनो निपतितो धरणीपृष्ठे। धरणेन भणितम्–'उदकमुदकमिति। तत आनीतमुदकं

---

[१] -लोयणं पयंपियं क। [२] रोयमाणीए क। [३] सह क। [४] पोइणिवत्तेहिं क। [५] छोढूणमो-क।

णेणं[1], जाव अचिन्तयाए ओसहिपहावस्स पुव्वरूवाओ वि अहिययरं दंसणीओ अलक्खिज्जमाणवणविभाओ उट्ठिओ कालसेणो । तुट्ठा य से घरिणी सह परियणेण । चलणेसु निवडिऊण भणियं च णेण । अज्ज, पिययमाजीयरक्खणेणं संपाडियमहापओयणा तुह सन्तिया पाणा; किमेत्थ अवरं भणीयइ । धरणेण भणियं । सव्वसाहारणा चेव महापुरिस,पाणा हवन्ति । किमेत्थ [2]अहियं । कालसेणेण भणियं । ता आइसउ अज्जो, जं मए कायव्वं ति । धरणेण भणियं । महापुरिसो खु तुमं; ता किं अवरं भणीयइ; तहा वि सत्तेसु दया । कालसेणेण भणियं परिवज्जिया जावज्जीवमेव मए अज्जवयणेण पारद्धी । धरणेण भणियं । कयं मे करणिज्जं । तओ गओ सत्थवाहपुत्तो निययसत्थं ॥

अइक्कन्ता कइवि दियहा अणवरयपयाणएणं[3] । दिट्ठो य णेण पक्खसन्धीए उववास[4]ट्ठिएणं आयामुहीसन्निवेसम्मि आवासिए सत्थे

नलिनीपत्रेण । क्षिप्तमोषधिवलयं दत्त्वोत्तमाङ्गखण्डम् । सिक्तस्तेन, यावदचिन्त्यतया ओषधिप्रभावस्य पूर्वरूपादप्यधिकतरं दर्शनीयोऽलक्ष्यमाणव्रणविभाग उत्थितः कालसेनः । तुष्टा च तस्य गृहिणी सह परिजनेन। चरणयोर्निपत्य भणितं च तेन । आर्य ! प्रियतमाजीवितरक्षणेन संपादितमहाप्रयोजनास्तव सत्काः प्राणाः, किमत्रापरं भण्यते । धरणेन भणितम्–सर्वसाधारणा एव महापुरुष ! प्राणा भवन्ति, किमत्राधिकम् । कालसेनेन भणितम्–तत आदिशत्वार्यः, यन्मया कर्तव्यमिति । धरणेन भणितम्–महापुरुषः खलु त्वम् , ततः किमपरं भण्यते, तथापि सत्त्वेषु दया। कालसेनेन भणितम्–परिवर्जिता यावज्जीवमेव मयाऽऽर्यवचनेन पापर्द्धिः । धरणेन भणितम्–कृतं मे करणीयम्। ततो गतः सार्थवाहपुत्रो निजसार्थम् ।

अतिक्रान्ता कत्यपि दिवसा अनवरतप्रयाणकेन। दृष्टस्तेन पक्षसन्धौ उपवासस्थितेन आयामुखीसन्निवेशे आवासिते सार्थे जरच्ची-

---

[1] णेणमोसहिधोवउदएणं क। [2] अउव्वं क। [3] पयाणएहिं वच्चमाणेण क। [4] उववाससंठिएण क।

जरचीरनिवसणो गेरुयविलित्तसव्वगत्तो खन्धदेसारोवियतिक्खसूलिओ अचोरो चेव चोरो त्ति करिय गहिओ वज्जन्तविरसडिण्डिमं वज्झत्थामं नीयमाणो चण्डालजुवाणओ त्ति। तेण वि य महन्तं सत्थमवलोइय सुद्धयाए आसयस्स वल्लहयाए जीवियस्स तस्स समीवम्मि चेव महया सद्देण जंपियं। भो भो सत्थिया, सुणेह[1] तुब्भे। महासरनिवासी मोरिओ[2] नाम चण्डालो अहं, कारणेण य कुसत्थलं पयट्टो, विप्पलद्धबुद्धीहि य दण्डवासिएहिं अपेच्छिऊण चोरे अदोसयारी चेव मन्दभागो गिहीओ म्हि। ता मोयावेह, भो मोयावेह; सरणागओ अहं अज्जाणं। अन्नं च, मरणदुक्खाओ वि मे इयमब्भहियं, जं तहाविहनिक्कलङ्कपुव्वपुरिसज्जियस्स जसस्स[3] विणा वि दोसेणं मइलण त्ति। ता मोयावेह, भो मोयावेह। तओ सुद्धचित्तयाए चिन्तियं धरणेण। न खलु दोसयारी एवं जंपइ। करुणापवन्नेण भणिया णेण आरक्खिया। भो भो कुलउत्तया, मम कएण विहीरह मुहुत्तयं, जाव एयमन्तरेण विन्नविऊण नरवइं दविणपयाणेणावि[4] मोया-

रनिवसनो गेरुकविलिप्तसर्वगात्रः स्कन्धदेशारोपिततीक्ष्णशूलिकोऽचोर एव चोर इति कृत्वा गृहीतो वाद्यमानविरसडिण्डिमं वध्यस्थानं नीयमानश्चण्डालयुवेति। तेनापि च महान्तं सार्थमवलोक्य शुद्धतयाऽऽशयस्य वल्लभतया जीवितस्य तस्य समीप एव महता शब्देन जल्पितम्–भो भोः सार्थिकाः शृणुत यूयम्। महाशरनिवासी मौर्यो नाम चण्डालोऽहम्, कारणेन च कुशस्थलं प्रवृत्तः, विप्रलब्धबुद्धिभिश्च दण्डपाशिकैरप्रेक्ष्य चौरान् अदोषकार्येव मन्दभाग्यो गृहीतोऽस्मि। ततो मोचयत भो मोचयत, शरणागतोऽहमार्याणाम्। अन्यच्च मरणदुःखादपि मे इदमभ्यधिकम्, यत्तथाविधनिष्कलङ्कपूर्वपुरुषार्जितस्य यशसो विनापि दोषेण मलिनतेति। ततो मोचयत भो मोचयत। ततः शुद्धचित्ततया चिन्तितं धरणेन। न खलु दोषकारी एवं जल्पति। करुणाप्रपन्नेन भणितास्तेन आरक्षकाः। भो भोः कुलपुत्रा! मम कृतेन प्रतीक्षध्वं मुहूर्तम्, यावदेतदन्तरेण (एतत्संबन्धेन) विज्ञप्य नरपतिं द्रविणप्रदानेनापि मोचयाम्येतम्। तैर्भणितम्–यद्येवं ततो लघु

---

१ सुणह क। २ मोरियओ क। ३ कुलजसस्स क। ४ –पयागेण य क।

वेमि एयं। तेहिं भणियं। जइ एवं, ता लहुं होहिं[1]। तओ घेत्तूण नरिन्ददरिसणनिमित्तं दीणारसयसहस्समुल्लं मुत्ताहलमालं गओ नरवइसमीवं। दिट्ठो य णेण राया। साहिऊण वुत्तन्तं विन्नत्तो चण्डालमन्तरेण नरवई। कओ से पसाओ। दूयसहिओ य तस्स मोक्खणनिमित्तं आगओ तमुद्देसं। मोयाविओ एसो। 'तुब्भे इमस्स जीवियदायग' त्ति भणिऊण पूइया आरक्खिया। [2]देवाविऊण पाहेयं भणिओ य चण्डालो। भद्द, संपाडेहि समीहियं। 'अज्ज, मा तुह सा अवत्था हवउ, जीए मए चिय पओयणं' ति भणिऊण [[3]कयञ्जलिउडो खिइनिमियजाणुकरयलमुत्तिमङ्गो पणमिऊण सत्थवाहपुत्तं[4]] गओ चण्डालो॥

[5]धरणो वि य कइवयपयाणएहिं पत्तो उत्तरावहतिलयभूयं अयलउरं नाम [6]पट्टणं। दिट्ठो य राया। बहुमन्निओ तेणं। विभागसंपत्तीए य विक्किणियमणेण भण्डं। समासाइओ [7]अट्ठगुणो लाभो। ठिओ तत्थेव कयविक्कयनिमित्तं चत्तारि मासे। पुण्णोयएणं च विढत्तं

भव। ततो गृहीत्वा नरेन्द्रदर्शननिमित्तं दीनारशतसहस्रमूल्यां मुक्ताफलमालां गतो नरपतिसमीपम्। दृष्टश्च तेन राजा। कथयित्वा वृत्तान्तं विज्ञप्तश्चण्डालान्तरेण (चण्डालसंबन्धेन) नरपतिः। कृतस्तस्य प्रसादः। दूतसहितश्च तस्य मोक्षणनिमित्तमागतस्तमुद्देशम्। मोचित एषः। 'यूयमस्य जीवितदायकाः' इति भणित्वा पूजिता आरक्षकाः। दापयित्वा पाथेयं भणितश्च चण्डालः। भद्र! संपादय समीहितम्। 'आर्य! मा तव साऽवस्था भवतु यस्यां ममेव प्रयोजनम्' इति भणित्वा [कृताञ्जलिपुटः क्षितिन्यस्तजानुकरतलोत्तमाङ्गः प्रणम्य सार्थवाहपुत्रं गतश्चण्डालः॥

धरणोऽपि च कतिपयप्रयाणकैः प्राप्त उत्तरापथतिलकभूतमचलपुरं नाम पत्तनम्। दृष्टश्च राजा। बहु मानितस्तेन। विभागसंपत्त्या

---

१ एहि क। २ 'परिहाविऊण जुवलं' इत्यधिकः कपुस्तके। ३ अयं पाठः खपुस्तके नास्ति। ४ "तस्स सभीवाओ काएण न वुण चित्तेन" इत्यधिकः पाठः कपुस्तके। ५ तओ धरणो वि क। ६ नयरं क। ७ इट्ठलाहो क।

पभूयं दविणजायं। संखावियं च णेण, जाव अत्थि कोडिमेत्तं ति। तओ गहियं मायन्दिसंववहारोचियं भण्डं। भराविओ सत्थो। पयट्टो नियदेसागमणनिमित्तं महया चडयरेण।

पइदियहपयाणेण य सवरवहूगेयसु(मु)हियमयजूहं। थेवदियहेहि सत्थो पत्तो कायम्बरिं अडविं ॥
वसहमयमहिससद्दूलकोलसयसंकुलं महाभीमं। माइन्दविन्दचन्दणनिरुद्धससिसूरकरपसरं ॥
फलपुट्ठतरुवरट्ठियपरपुट्ठविमुक्कविसमहलवोलं। *तरु[1]कणइकयन्दोलणवाणरवुक्काररमणिज्जं ॥
मयणाहदरियरु[2]ज्झियसद्दसमुत्तत्थफिडियगयजूहं। वणदवजालावेढियचलमयरायन्तगिरिनियरं ॥

च विक्रीतमनेन भाण्डम्। समासादितोऽष्टगुणो लाभः। स्थितस्तत्रैव क्रयविक्रयनिमित्तं चतुरो मासान्। पुण्योदयेन चार्जितं प्रभूतं द्रविणजातम्। संख्यापितं च तेन, यावदस्ति कोटिमात्रमिति। ततो गृहीतं माकन्दीसंव्यवहारोचितं भाण्डम्। भरितः सार्थः। प्रवृत्तो निजदेशागमननिमित्तं महताऽऽडम्बरेण।

प्रतिदिवसप्रयाणेन च शवरवधूगेयमुग्धमृगयूथाम्। स्तोकदिवसैः सार्थः प्राप्तः कादम्बरीमटवीम् ॥
वृषभ-मृग-महिष-शार्दूल-कोलशतसंकुलां महाभीमाम्। माकन्दवृन्द-चन्दननिरुद्धशशि-सूरकरप्रसराम् ॥
फलपुष्टतरुवरस्थितपरपुष्टविमुक्तविषमकोलाहलाम्। तरुलताकृतान्दोलनवानरबुत्काररमणीयाम् ॥
मृगनाथदप्तरुञ्जितशब्दसमुत्त्रस्तस्फेटितगजयूथाम्। वनदवज्वालावेष्टितचलन्मृगराजद्गिरिनिकराम् ॥

---

* कणई (दे) तरुलतेत्यर्थः। १ -कणय-क। २ -भिडिय-क।

निद्दयवराहघोणाहिघायजज्जरियपल्ललोयन्तं। दप्पुद्धुरकरिनिउरुम्बदलियहिन्तालसंघायं ॥
तीए वहिऊण सत्थो तिण्णि पयाणाइ पल्ललसमीवे। आवासिओ य पल्ललजलयरसंजणियसंखोहं ॥
आवासिऊण तीरे सरस्स मज्झम्मि कीलिऊण सुहं[1]। तो रयणीए सत्थो सुत्तो दाऊण थाणाइं ॥
[2]रयणीए चरिमजामंमि भीसण(य)सिङ्गसद्दगद्दभा। अह सबरभिल्लसेणा पडिया सत्थंमि वीसत्थे ॥
हण हण हण त्ति गद्दभसद्दसंजणियजुवइसंतासा। अन्नोन्नसम्भमालग्गदीहकोदण्ड[3]संघाया ॥
तीसे ससद्दबोहियसत्थियपुरिसेहि सह महाभीमं। जुज्झमह संपलग्गं सरोहविच्छिन्नसरनियरं ॥
सत्थियपुरिसेहि दढं सेणा दप्पुद्धुरेक्कवीरेहिं। आवाए च्चिय खित्ता दिसो दिसं हरिणजूह व्व ॥

निर्दयवराहघोणाभिघातजर्जरितपल्वलोपान्ताम् । दर्पोद्धुरकरिनिकुरम्बदलितहिन्तालसंघाताम् ॥
तस्यामूढ्वा (वहनं कृत्वा) सार्थस्त्रीणि प्रयाणानि पल्वलसमीपे । आवासितश्च पल्वलजलचरसंजनितसंक्षोभम् ॥
आवास्य तीरे सरसो मध्ये क्रीडित्वा सुखम् । ततो रजन्यां सार्थः सुप्तो दत्त्वा (थाणाइं दे.) रक्षाः ॥
रजन्याश्चरमयामे भीषणशृङ्गशब्द(गद्दभा दे.)कठोरा । अथ शबरभिल्लसेना पतिता सार्थे विश्वस्ते ॥
जहि जहि जहीति कठोरशब्दसंजनितयुवतिसंत्रासा । अन्योन्यसंभ्रमाद् लग्नदीर्घकोदण्डसंघाता ॥
तस्याः स्वशब्दबोधितसार्थिकपुरुषैः सह महाभीमम् । युद्धमथ संप्रलग्नं शरौघविच्छिन्नशरनिकरम् ॥
सार्थिकपुरुषैर्दृढं सेना दर्पोद्धुरैकवीरैः । आपाते पव क्षिप्ता दिशि दिशि हरिणयूथवद् ॥

---

१ चिरं क। २ एत्थन्तरंमि। इत्यधिकः पाठः कपुस्तके। ३ -कोडंड-क।

तो वीरसेणपमुहा सवरा सव्वे पुणो वि मिलिऊण । अन्नोन्नतज्जणाजणियरोसपसरा समल्लीणा ॥
अह निज्जिओ स सत्थो थेवत्तणओ य सबरसेणाए । पयरो पिवीलियाणं भीमं पि भुयंगमं डसइ ॥
निज्जिणिऊण[1] य सत्थं रित्थं घेत्तूण निरवसेसं पि[2] । बन्दं पि किंपि सवरा उवट्ठिया कालसेणस्स ॥

भणियं च णेहिं । एयं रित्थं सत्थाओ देव आणीयं बन्दं च किंपि थेवं । संपइ देवो पमाणं ति । तओ कालसेणेण पुच्छिया बन्दयपुरिसा । भो कुओ एस सत्थो कस्स वा सन्तिओ त्ति । एत्थन्तरंमि सीहकयपहारसंरोहणनिमित्तं सत्थवाहपुत्तेण [3]सहागओ उवलद्धो पच्चभिन्नाओ णेण संगमो नाम सत्थवाहपुत्तपुरिसो । भणियं च णेण । भद्द, कहिं तुमं मए दिट्ठो त्ति । तेण भणियं । न याणामो, तुमं चेव जाणसि त्ति । कालसेणेण भणियं । अवि आसि तुमं इओ उत्तरावहपयट्टस्स मम पाणपयाणहेउणो अविन्नायनामधे-

ततो वीरसेनप्रमुखाः शबराः सर्वे पुनरपि मिलित्वा । अन्योन्यतर्जनाजनितरोषप्रसराः समालीनाः ॥
अथ निर्जितः स सार्थः स्तोकत्वाच्च शबरसेनया । प्रकरः पिपीलिकानां भीममपि भुजङ्गमं दशति ॥
निर्जित्य च सार्थं रिक्थं गृहीत्वा निरवशेषमपि । बन्दिनमपि कमपि शबरा उपस्थिताः कालसेनस्य ॥

भणितं च तैः-एतद् रिक्थं सार्थाद् देव ! आनीतं बन्दी च कोऽपि स्तोकः । संप्रति देवः प्रमाणमिति । ततः कालसेनेन पृष्टा बन्दिपुरुषाः । भोः कुत एष सार्थः, कस्य वा सत्क इति । अत्रान्तरे सिंहकृतप्रहारसंरोहणनिमित्तं सार्थवाहपुत्रेण सहागत उपलब्धः प्रत्यभिज्ञातस्तेन संगमो नाम सार्थवाहपुत्रपुरुषः । भणितं तेन-भद्र ! कुत्र त्वं मया दृष्ट इति। तेन भणितं-न जानामि, त्वमेव जानासीति । कालसेनेन भणितम्-अपि आसीस्त्वमित उत्तरापथप्रवृत्तस्य मम प्राणप्रदानहेतोरविज्ञातनामधेयस्य सार्थवाहपुत्रस्य समीपे ।

---

[1] अह निज्जिऊण सत्थं क । [2] तु क । [3] सह समागओवलद्धो क ।

यस्स सत्थवाहपुत्तस्स समीवे। संगमेण भणियं। को कहं वा तुह पाणपयाणहेऊ। कालसेणेण भणियं। अत्थि इओ अईयवरिसंमि कयन्तेणेव केसरिणा कहंचि कण्ठगयपाणो अहं कओ आसि। तओ इओ उत्तरावहं वच्चमाणेण केणावि सत्थवाहपुत्तेण न याणामो कहिंचि जीवाविओ म्हि। ता एवं मज्झ सो पाणपयाणहेउ त्ति। तओ सुमरिऊण वुत्तन्तं पच्चभियाणिऊण[1] कालसेणं भणियं संगमेण। जइ एवं, ता आसि दिट्ठो तुमए। कालसेणेण सबहुमाणमवरुण्डिऊण पुच्छिओ संगमओ[2]। भद्द, कहिं सो सत्थवाहपुत्तो। तओ बाहजलभरियलोयणेण भणियं संगमएण[3]। भो महापुरिस[4], देव्वो वियाणइ त्ति। कालसेणेण भणियं। कहं विय। संगमएण भणियं। सुण, एसो खु तस्स सन्तिओ चेव सत्थो। आवडिए य सत्थघाए कोदण्डसरसहाओ दिट्ठो मए सबरसंमुहं धावमाणो। तओ[5] न संपयं वियाणामि। तओ एयमायण्णिऊण दीहं च नीससिय 'हा कयमकज्जं' ति भणिऊण मोहमुवगओ कालसेणो, वक्कलाणिलेण वीइओ

संगमेन भणितम्-कः कथं वा तव प्राणप्रदानहेतुः। कालसेनेन भणितम्-अस्तीतोऽतीतवर्षे कृतान्तेनेव केसरिणा कथंचित् कण्ठगतप्राणोऽहं कृत आसम्। तत इत उत्तरापथं व्रजता केनापि सार्थवाहपुत्रेण न जानीमः कथंचिज्जीवितोऽस्मि। तत एवं मम स प्राणप्रदानहेतुरिति। ततः स्मृत्वा वृत्तान्तं प्रत्यभिज्ञाय कालसेनं भणितं संगमेन। यद्येवं तत आसं दृष्टस्त्वया। कालसेनेन सबहुमानमालिङ्ग्य पृष्टः संगमकः। भद्र! कुत्र स सार्थवाहपुत्रः। ततो वाष्पजलभृतलोचनेन भणितं संगमकेन-भो महापुरुष! दैवं विजानातीति। कालसेनेन भणितम्-कथमिव। संगमकेन भणितम्-शृणु, एष खलु तस्य सत्क एव सार्थः। आपतिते च सार्थघाते कोदण्डशरसहायो दृष्टो मया शबरसंमुखं धावन्। ततो न साम्प्रतं विजानामि। तत एतदाकर्ण्य दीर्घं च निःश्वस्य 'हा कृतमकार्यम्' इति

---

[1] पच्चहियाणिऊण क। [2] संगमो क। [3] संगमेण क। [4] -वुरिस क। [5] न वुण क।

सबरेहि, लद्धा चेयणा। भणियं च णेण। हरे, न एत्थ कोइ वावाइओ त्ति। सबरेहिं भणियं। न वावाइओ, केवलं पहारीकओ त्ति। तओ निरूविया पडिबद्धपुरिसा, न दिट्ठो य धरणो। तओ एगत्थ रित्थं करेऊण समासासिऊण सत्थं पडिबद्धपुरिसाण य वणकम्ममाइसिय धरणगवेसणनिमित्तं पयट्टाविया दिसो दिसं सबरपुरिसा। अप्पणा वि य[1] 'हा दुट्ठु कयं' ति चिन्तयमाणो[2] गओ तं गवेसिउं[3]। न दिट्ठो य तेण धरणो। समागओ सत्थं। मिलिया सव्वसबरा। निवेइयं च णेहिं। देव, न दिट्ठो त्ति। तओ परं सोगमुवगओ कालसेणो। भणियं च णेण।

दुज्जणजणंमि सुकयं असुहफलं होइ सज्जणजणस्स। जह भुयगस्स विदिन्नं[4] खीरं पि विसत्तणमुवेइ ॥
दिन्ना य णेण पाणा मज्झं जायाए तह य पुत्तस्स। एयस्स मए पुण सव्वमेव विवरीयमायरियं ॥

भणित्वा मोहमुपगतः कालसेनः, वल्कलानिलेन वीजितः शबरैः, लब्धा चेतना। भणितं च तेन-अरे नात्र कोऽपि व्यापादित इति। शबरैर्भणितम्-न व्यापादितः, केवलं प्रहारीकृत इति। ततो निरूपिताः प्रतिवद्धपुरुषाः। न दृष्टश्च धरणः। तत एकत्र रिक्थं कृत्वा समाश्वास्य सार्थं प्रतिबद्धपुरुषाणां च व्रणकर्मादिश्य धरणगवेषणनिमित्तं प्रवर्तिता दिशि दिशि शबरपुरुषाः। आत्मनाऽपि च 'हा दुष्ठु कृतम्' इति चिन्तयन् गतस्तं गवेषयितुम्। न दृष्टश्च तेन धरणः। समागतः सार्थम्। मिलिताः सर्वशबराः। निवेदितं च तैः-देव! न दृष्ट इति। ततः परं शोकमुपगतः कालसेनः। भणितं च तेन—

दुर्जनजने सुकृतमशुभफलं भवति सज्जनजनस्य। यथा भुजगाय वितीर्णं क्षीरमपि विषत्वमुपैति ॥
दत्ताश्च तेन प्राणा मम जायायास्तथा च पुत्रस्य। एतस्य मया पुनः सर्वमेव विपरीतमाचरितम् ॥

---

१ य ग। २ चिन्तेमाणो क। ३ आरण्णभूमिं इत्यधिकः पाठः कपुस्तके। ४ वदिन्नं ख।

ता किं एइणा अयालकुसुमनिग्गमेण विय निप्फलेणं वायावित्थरेणं । भो भो सत्थिया, भो भो सबरा, एसा महं पइन्ना ।

जइ तं न घडेमि अहं इमिणा विहवेण पञ्चहि दिणेहिं । पइसामि सुहुयहुयवहजालानिवहंमि किं बहुणा ॥

एवं च पइन्नं काऊण कयं कुलदेवयाए कायम्बरिनिवासिणीए ओवाइयं ।

जइ तं महाणुभावं जीवन्तं एत्थ कहवि पेच्छिस्सं[1] । दसहि पुरिसेहि भयवइ तो तुज्झ बलिं करिस्सामि ॥

एवं च ओवाइयं[2] काऊण गहियाणेयदिवसपाहेया पट्ठविया धरणगवेसणनिमित्तं दिसो दिसं सबरा । अप्पणा वि य अच्चन्तवि-[3]मणदुम्मणो गओ तं गवेसिउं ॥

सो पुण धरणो विणिज्जिए सत्थे 'न एत्थ अन्नो उवाओ' त्ति चिन्तिऊण ओसहिवलयमेत्तरित्थो घेत्तूण लच्छि पलाणो पिट्ठओ-

---

ततः किमेतेनाकालकुसुमनिर्गमेनेव निष्फलेन वाग्विस्तरेण । भो भोः सार्थिकाः ! भो भोः शबरा ! एषा मम प्रतिज्ञा ।

यदि तं न घटयाम्यहमनेन विभवेन पञ्चभिर्दिनैः । प्रविशामि सुहुतहुतवहज्वालानिवहे किं बहुना ॥

एवं च प्रतिज्ञां कृत्वा कृतं कुलदेवतायाः कादम्बरीनिवासिन्या औपयाचितम् ।

यदि तं महानुभावं जीवन्तमत्र कथमपि प्रेक्षिष्ये । दशभिः पुरुषैर्भगवति ! ततस्तव बलिं करिष्यामि ॥

एवं चौपयाचितं कृत्वा गृहीतानेकदिवसपाथेयाः प्रस्थापिता धरणगवेषणनिमित्तं दिशि दिशि शबराः । आत्मनापि च अत्यन्तविमनोदुर्मना गतस्तं गवेषयितुम् ।

स पुनर्धरणो विनिर्जिते सार्थे 'नात्रान्य उपायः' इति चिन्तयित्वा ओषधिवलयमात्ररिक्थो गृहीत्वा लक्ष्मीं पलायितः पृष्ठतोमुखः ।

---

[1] पेक्खिस्सं क । [2] उवाइयं क । [3] –मणेदुम्मणो क–ख ।

मुहो[1]। जायाए भएणं च मूढदिसामण्डलं तुरियतुरियं गच्छमाणो पत्तो मुहुत्तमेत्तसेसे वासरे

बहुविहरुक्खसाहासंघट्टसंभवन्तवणदवं। वणदवपलित्तकन्दरविणिन्तसीहं।
सीहहयपडिहयहत्थिकडेवरकयारविसमं। विसमखलणदुक्खहिण्डन्तभीयमुद्धमयं।

मयरुहिरपाणमुइयघोरन्तसुत्तवग्घं। वग्घभयपलायन्तमहिसउलं।
महिसउल[2]चलणग्गलग्गगरुयअयगरं। अयगरवि[3]मुक्तनीसाससद्दभीमं।
भीमबहुविहभमन्तकव्वायलुत्तसत्तं। सत्तखयकालसच्छहं सिलिं[5]धनिलयं नाम पव्वयं ति।

तत्थ य अणुचियचलणपरिसक्कणेण खीणगमणसत्तिं सेयजललवालिद्धवयणकमलं च पेच्छिऊण लच्छिं चिन्तियं धरणेण। अहो

जायाया भयेन च मूढदिग्मण्डलं त्वरितत्वरितं गच्छन् प्राप्तो मुहूर्तमात्रशेषे वासरे

बहुविधवृक्षशाखासंघट्टसंभवद्वनदवं, वनदवप्रदीप्तकन्दराविनिर्यत्सिंहम्।
सिंहहतप्रतिहतहस्तिकलेवरकचवरविषमं, विषमस्खलनदुःखहिण्डमानभीतमुग्धमृगम्।
मृगरुधिरपानमुदितघुरत्सुप्तव्याघ्रं, व्याघ्रभयपलायमानमहिषकुलम्॥

महिषकुलचलनाग्रलग्नगुरुकाजगरं, अजगरविमुक्तनिःश्वासशब्दभीमम्।
भीमबहुविधभ्रमत्क्रव्यादलुप्तसत्त्वं, सत्त्वक्षयकालसच्छायं शिलिन्ध्रनिलयं नाम पर्ततमिति।

---

१ –मुहं क, –मुहओ ख। २ चलणमग्गगरुयअयगरं ख, चलणयभग्गगरुय-ग। ३ –पसुत्त–क–ख। ४ णीलुत्त ख। ५ सिणिंध–ख, पिलिंध–ग।

मे कम्मपरिणई, जेण पिययमाए वि ईइसी[1] अवत्थ त्ति। लच्छीए चिन्तियं। किलेसो वि मे बहुमओ चेव एयस्स आवईए। गविट्ठं धरणेण लच्छीए पाणसंधारणनिमित्तं फलोययं, न उण लद्धं ति। अइक्कन्तो वासरो। पसुत्ताइं पल्लवसत्थरे। [2]अइक्कन्ता रयणी। [[3]उग्गओ अंसुमाली। तओ] बिइयदियहे य जाममेत्तसेसे वासरे खुहापिवासाहिभूया[4] नग्गोहपायवच्छायाए निवडिया लच्छी। संमिल्लियमिमीए लोयणजुयं, विमूढा से चेयणा, निवडियं तालुयं, मिलायं वयणकमलं। तओ धरणेण चिन्तियं। अहो दारुणो जीवलोगो, अचिन्ता कम्मपरिणई, न मे जीविएणावि एत्थ साहारो त्ति। तहावि बाहजलभरियलोयणेणं संवाहियं से अङ्गं। समागया चेयणा। तओ अव्वत्तसद्दं जंपियमिमीए। अज्जउत्त, दढं तिसाभिभूय म्हि। तओ सो 'सुन्दरि, धीरा होहि, आणेमि उदयं, तए ताव इहेव चिट्ठियव्वं' ति भणिऊण आरूढो तरुवरं। पलोइयं उदयं, न उण उवलद्धं। तओ 'उदयमन्तरेणं न एसा जीवइ' त्ति तुवरिट्ठियं पेच्छिऊण

तत्र चानुचितचरणपरिष्वष्कनेन(परिचंक्रमणेन) क्षीणगमनशक्तिं स्वेदजललवाश्लिष्टवदनकमलां च प्रेक्ष्य लक्ष्मीं चिन्तितं धरणेन। अहो मे कर्मपरिणतिः, येन प्रियतमाया अपीदृशी अवस्थेति। लक्ष्म्या चिन्तितम्-क्लेशोऽपि मे बहुमत एव एतस्यापदा। गवेषितं धरणेन लक्ष्म्याः प्राणसंधारणनिमित्तं फलोदकं न पुनर्लब्धमिति। अतिक्रान्तो वासरः। प्रसुप्तौ पल्लवस्रस्तरे। अतिक्रान्ता रजनी। उद्गतोंऽशुमाली। ततो द्वितीयदिवसे च याममात्रशेषे वासरे क्षुत्पिपासाभिभूता न्यग्रोधपादपच्छायायां निपतिता लक्ष्मीः। संमिलितमनया लोचनयुगम्, विमूढा तस्याश्चेतना, निपतितं तालु, म्लानं वदनकमलम्। ततो धरणेन चिन्तितम्-अहो दारुणो जीवलोकः, अचिन्त्या कर्मपरिणतिः, न मे जीवितेनाप्यत्र साधारः(उपकारः) इति। तथापि बाष्पजलभृतलोचनेन संवाहितं तस्या अङ्गम्। समागता चेतना। ततोऽव्यक्तशब्दं जल्पितमनया-आर्यपुत्र! दृढं तृषाऽभिभूताऽस्मि। ततः स 'सुन्दरि! धीरा भव, आनयाम्युदकम्, त्वया तावदिहैव स्थातव्यम्' इति

---

१ ईदिसी क। २ पहाया क। ३ अयं पाठो नास्ति ख-ग पुस्तके। ४ -हिहूया क।

तीए[1] य किर रसेण संगयं सिलीभूयमवि सोणियं उदयसारिच्छं हवइ' त्ति ता एएण सुमरियपओएणं 'देमि से तुवरिट्ठियारसेणं[2] संपाडिओदयभावं बाहुसिरामोक्खणेण नियमेव रुहिरं, इमिणा य वणदवग्गिणा पइऊग छुहावणोयणनिमित्तं ऊरुमंसं ति; अन्नहा निस्संसयं न होइ एसा, विवन्नाए य इमीए किं महं जीविएणं; अत्थि य मे वणसंरोहणं ओसहिवलयं, तेण रुहिरसंगएणेव अवणीयवणवेयणो इमीए वि न दुक्खकारणं भविस्सइ' त्ति चिन्तिऊण नियच्छुरियाए पलासपत्तपुडयंमि संपाडियं समीहियं ति। गओ य तीसे समीवं। भणिया य एसा। सुन्दरि, संपन्नमुदयं, ता पियउ सुन्दरी। पियं च णाए। समासत्था एसा। उवणीयं च से मंसं। भणियं णेणं। सुन्दरि, एयं खु वणदवविवन्नससयमंसं, बुक्खिया य तुमं, ता आहारसु त्ति। आहारियमिमीए॥

तओ कंचि वेलं गमेऊण पयट्टाणि दिणयराणुसारेण उत्तरामुहं। पत्ताणि य महासरं नाम[3] नयरं। अत्थमिओ सूरिओ त्ति न पइ-

---

भणित्वा आरूढस्तरुवरम्। प्रलोकितमुदकं न पुनरुपलब्धम्। तत 'उदकमन्तरेण नैषा जीवति' इति तुवर्यस्थिकां प्रेक्ष्य 'तस्याश्च किल रसेन संगतं शिलीभूतमपि शोणितमुदकसदृशं भवति' इति तत एतेन स्मृतप्रयोगेण 'ददामि तस्यै तुवर्यस्थिकारसेन संपादितोदकभावं बाहुशिरामोक्षणेन निजमेव रुधिरम्, अनेन च वनदवाग्निना पक्त्वा क्षुदपनोदनिमित्तमूरुमांसमिति, अन्यथा निःसंशयं न भवत्येषा, विपन्नायां चास्यां किं मम जीवितेन, अस्ति च मे व्रणसंरोहणमोषधिवलयम्, तेन रुधिरसंगतेनैवापनीतव्रणवेदनोऽस्या अपि न दुःखकारणं भविष्यति' इति चिन्तयित्वा निजच्छुरिकया पलाशपत्रपुटे संपादितं समीहितमिति। गतश्च तस्याः समीपम्। भणिता चैषा—सुन्दरि! संपन्नमुदकम्, ततः पिबतु सुन्दरी। पीतं चानया। समाश्वस्तैषा। उपनीतं च तस्य मांसम्। भणितं च तेन—सुन्दरि! एतत्खलु वनदवविपन्नशशकमांसम्, बुभुक्षिता च त्वम्, तत आहरेति। आहृतमनया॥

---

[1] जीए य क। [2] तुवरट्ठिया क। [3] नास्ति क-खपुस्तके।

ट्ठाणि नयरं । ठियाणि जक्खालए । तओ अइक्कन्ते जाममेत्ते जंपियं लच्छीए । अज्जउत्त, तिसाभिभूय म्हि । धरणेण भणियं । सुन्दरि, चिट्ठ तुमं, आणेमि उदयं नईओ । गहिओ तत्थ वारओ, आणीयमुदयं । पीयं च णाए । पसुत्तो धरणो । चरिमजामंमि य विउद्धा लच्छी । चिन्तियं च णाए । अणुकूलो मे विही, जेण एसो ईइसं अवत्थं पाविओ त्ति । ता केण उवाएण इओ वि अहिययरं से हवेज्ज त्ति । एत्थन्तरंमि य आरक्खियपुरिसपेल्लिओ गहियरयणभण्डो खीणगमणसत्ती पविट्ठो चण्डरुद्दाभिहाणो तक्करो । रुद्धं च से वारं । भणियं चारक्खियनरेहिं । अरे, अप्पमत्ता हवेज्जह । गहिओ खु एसो, कहिं वच्चइ त्ति । सुयं च एयं लच्छीए, आयण्णिओ चण्डरुद्दपयसद्दो । चिन्तियं च णाए । भवियव्वं एत्थ कारणेण । ता पुच्छामि एयं, किं पुण इमं ति । कयाइ पुज्जन्ति मे मणोरहा । तओ दीहसुंक्कारपिसुणियं गया चण्डरुद्दसमीवं । पुच्छिओ एसो । भद्द, को तुमं, किं वा एए दुवारदेसंमि इमं वाहरन्ति । तेण भणियं ।

ततः काञ्चिद् वेलां गमयित्वा प्रवृत्तौ दिनकरानुसारेणोत्तरामुखम् । प्राप्तौ च महाशरं नाम नगरम् । अस्तमितः सूर्य इति न प्रविष्टौ नगरम् । स्थितौ यक्षालये । ततोऽतिक्रान्ते याममात्रे जल्पितं लक्ष्म्या-आर्यपुत्र ! तृषाऽभिभूताऽस्मि । धरणेन भणितम्-सुन्दरि ! तिष्ठ त्वम्, 'आनयाम्युदकं नद्याः, गृहीतस्तत्र वारकः (पात्रम्), आनीतमुदकम् । पीतं चानया । प्रसुप्तो धरणः । चरमयामे च विबुद्धा लक्ष्मीः । चिन्तितं चानया-अनुकूलो मे विधिः, येन एष ईदृशीमवस्थां प्रापित इति । तत केनोपायेन इतोऽप्यधिकतरं तस्य भवेदिति । अत्रान्तरे चारक्षकपुरुषपीडितो गृहीतरत्नभाण्डः क्षीणगमनशक्तिः प्रविष्टश्चण्डरुद्राभिधानस्तस्करः । रुद्धं च तस्य द्वारम् । भणितं चारक्षकनरैः-अरे अप्रमत्ता भवत । गृहीतः खल्वेषः, कुत्र व्रजतीति । श्रुतं चैतद् लक्ष्म्या, आकर्णितश्चण्डरुद्रपदशब्दः । चिन्तितं चानया-भवितव्यमत्र कारणेन । ततः पृच्छाम्येतम्, किं पुनरिदमिति । कदाचित् पूर्यन्ते मे मनोरथाः । ततो दीर्घसुत्कारपिशुनितं गता चण्डरुद्रसमीपम् । पृष्ट एषः-भद्र ! कस्त्वम्, किंवा एते द्वारदेशे इदं व्याहरन्ति । तेन भणितम्-सुन्दरि ! अलं मया (मे प्रश्नेन);

सुन्दरि, अलं मए । किं तु पुच्छामि सुन्दरिं 'अवि अत्थि कहिंचि थेवमुदयं' ति । तीए भणियं । अत्थि, जइ मे पओयणं साहेसि । तओ चिन्तियमणेणं । अहो धीरया इत्थियाए, अहो साहसं, अहो वयणविन्नासो; ता भवियव्वमिमीए पत्तभूयाए त्ति । चिन्तिऊण जंपियं चण्डरुद्देणं । सुन्दरि, महन्ती खु एसा कहा, न संखेवओ कहिउं पारीयइ । तहावि सुण । संपयं ताव तक्करो अहं, नरिन्दगेहाओ गहेऊण रयणभण्डं नीसरन्तो नयराओ उवलद्धो दण्डवासिएहिं । लग्गा मे मग्गओ बहुया दण्डवासिया, एगो य अहयं । खीणगमणसत्ती य एत्थ पविट्ठो त्ति । एए य अन्धारयाए रयणीए सावेक्खयाए जीवियस्स साहारणयाए पओयणस्स 'संपन्नं च णे अहिलसियं' ति मन्नमाणा दुवारदेसमायं निरुम्भिऊण दण्डवासिया एवं वाहरन्ति । तओ 'संपन्नं मे समीहियं, जइ विही अणुवत्तिस्सइ' त्ति चिन्तिऊणं जंपियं लच्छीए । भद्द, जइ एवं, ता अलं ते उव्वेएणं; अहं तुमं जीवावेमि, जइ मे वयणं सुणेसि । चण्डरुद्देण भणियं । आणवेउ सुन्दरी । लच्छीए भणियं । सुण । अहं खु मायन्दीनिवासिणो कत्तियसेट्ठिस्स धूया लच्छिमई नाम पुव्ववेरिएण विय परि-

---

किन्तु पृच्छामि सुन्दरीम् , 'अप्यस्ति अत्र कथंचित् स्तोकमुदकम्' इति । तया भणितम्–अस्ति, यदि मे प्रयोजनं कथयसि । ततश्चिन्तितमनेन–अहो धीरता स्त्रियाः, अहो साहसम् , अहो वचनविन्यासः, ततो भवितव्यमनया पात्रभूतयेति चिन्तयित्वा जल्पितं चण्डरुद्रेण । सुन्दरि ! महती खल्वेषा कथा, न संक्षेपतः कथयितुं पार्यते, तथापि शृणु । साम्प्रतं तावत्तस्करोऽहम् , नरेन्द्रगृहाद् गृहीत्वा रत्नभाण्डं निःसरन् नगरादुपलब्धो दण्डपाशिकैः । लग्ना मे मार्गतो (पृष्ठतः) बहवः दण्डपाशिकाः, एकश्चाहम् , क्षीणगमनशक्तिश्चात्र प्रविष्ट इति । एते चान्धकारतया रजन्याः सापेक्षतया जीवितस्य साधारणतया प्रयोजनस्य 'संपन्नं नोऽभिलषितम्' इति मन्यमाना द्वारदेशभागं निरुध्य दण्डपाशिका एवं व्याहरन्ति । ततः 'संपन्नं मे समीहितं यदि विधिरनुवर्तिष्यते' इति चिन्तयित्वा जल्पितं लक्ष्म्या । भद्र ! यद्येवं ततोऽलं ते उद्वेगेन, अहं त्वां जीवयामि, यदि मे वचनं शृणोसि । चण्डरुद्रेण भणितम्–आज्ञापयतु

णीया धरणेण । अणिट्ठो मे भत्तारो, पसुत्तो य [1]एसो एत्थ देवउले । ता अङ्गीकरेहि मं, परिच्चयसु मोसं, पावेउ [2]एसो सकम्मसरिसं गतिं । पहायाए रयणीए गिहीएहिं तुब्भेहिं नरवइसमक्खं पि भणिस्सामि अहयं 'एसो महं भत्तारो, न उण एसो' त्ति । तओ सो [3]चेव भयवओ कयन्तस्स पाहुडं [4]भविस्सइ । चण्डरुद्देण भणियं । सुन्दरि, अत्थि एयं, किं तु अहमेत्थ वत्थव्वओ चउचरणपडिबद्धो । अओ [5]वियाणइ मे [6]तं अगिहीयनामं सव्वलोओ चेव एत्थ महिलियं त्ति । लच्छीए भणियं । जइ एवं, ता को पुण इह उवाओ । चण्डरुद्देण भणियं । अत्थि [7]एत्थ उवाओ, जइ थेवमुदयं हवइ । तीए भणियं '[8]कहं विय' । चण्डरुद्देण भणियं । सुण । अत्थि मे चिन्तामणिरयणभूया भयवया खन्दरुद्देण विइण्णा दिट्ठपच्चया परदिट्ठिमोहणी नाम चोरगुलिया । तीए य उदयसंजोएण अञ्जिएहिं नयणेहिं सहस्सलोयणो देवाहिवो वि न पेच्छइ पाणिणं, किमङ्ग पुण मच्चलोयवासी जणो । लच्छीए भणियं । जइ एवं, ता कहिं गुलिया ।

सुन्दरी । लक्ष्म्या भणितम्-शृणु । अहं खलु माकन्दीनिवासिनः कार्तिकश्रेष्ठिनो दुहिता लक्ष्मीवती नाम पूर्ववैरिकेनापि च परिणीता धरणेन । अनिष्टो मे भर्ता, प्रसुप्तश्च एषोऽत्र देवकुले । ततोऽङ्गीकुरु माम्, परित्यज मोषम् (मुषितम्), प्राप्नोत्वेष स्वकर्मसदृशीं गतिम् । प्रभातायां रजन्यां गृहीतयोर्युवयोर्नरपतिसमक्षमपि भणिष्याम्यहम् 'एष मम भर्ता, न पुनरेष' इति । ततः स एव भगवतः कृतान्तस्य प्राभृतं भविष्यति । चण्डरुद्रेण भणितम्-सुन्दरि ! अस्त्येतत्, किन्तु अहमत्र वास्तव्यश्चतुश्चरणप्रतिबद्धः (भार्यायुक्तः), अतो विजानाति मे तामगृहीतनाम्नीं सर्वलोक एवात्र महिलामिति । लक्ष्म्या भणितम्-यद्येवं ततः कः पुनरिहोपायः । चण्डरुद्रेण भणितम्-अस्त्यत्र उपायः, यदि स्तोकमुदकं भवति । तया भणितम्-'कथमिव' । चण्डरुद्रेण भणितम्-शृणु । अस्ति मे चिन्तामणिरत्नभूता भगवता स्कन्दरुद्रेण वितीर्णा दृष्टप्रत्यया परदृष्टिमोहनी नाम चौरगुटिका । तया चोदकसंयोगेन अञ्जितयोर्नयनयोः सहस्रलोचनो देवाधिपोऽपि

---

१ सो ख । २ सो संपयमसरिसं क । ३ च्चेव नरवई क । ४ पहविस्सइ क । ५ वियाणाइ ख । ६ यं क । ७ एत्थुवाओ क । ८ कहं सो वि य उवाओ क ।

चण्डरुद्देण भणियं 'उट्टियाए' । लच्छीए भणियं । जइ एवं, ता किं न अञ्जेसि । चण्डरुद्देण भणियं 'नत्थि उदयं' ति । लच्छीए भणियं 'अहं देमि' । चण्डरुद्देण भणियं 'जीवाविओ भोईए' । [1]दिन्नमुदयं । दुवेहिं पि[2] अञ्जियाइं लोयणाइं । भणिया य एसा । सुन्दरि, अणीणिए सत्थवाहपुत्तंमि न तए गन्तव्वं ति । पडिस्सुयमिमीए । मुक्कं रयणभण्डं धरणसमीवे । ठियाइं एगदेसे ॥

पहाया रयणी । उट्ठिओ धरणो । गहिओ आरक्खिएहिं । निहालियं रयणभण्डं, उवलद्धं च तस्स समीवे । तओ नीणिओ देवउलाओ । बद्धो खु एसो । चिन्तियं च णेण । हन्त किमेयं ति । अहवा न किंचि अन्नं; अवि य पडिकूलस्स विहिणो वियम्भियं ति । पडिकूले य एयंमि अमयं पि हु विसं, रज्जू वि य किण्हसप्पो, [3]गोप्पयं पि सायरो, अणू वि य गिरी, मूसयविवरं पि रसायलं, सुयणो वि दुज्जणो, सुओ वि [4]वइरी, [5]जाया वि भुयङ्गी, पयासो वि अन्धयारं, खन्ती वि कोहो, मद्दवं पि माणो, अज्जवं पि माया, संतोसो वि

न प्रेक्षते प्राणिनम्, किमङ्ग पुनर्मर्त्यलोकवासी जनः । लक्ष्म्या भणितम्–यद्येवं ततः कुत्र गुटिका । चण्डरुद्रेण भणितम्–'उष्ट्रिकायां' (पात्रविशेषे) । लक्ष्म्या भणितम्–यद्येवं ततः किं नाञ्जयसि । चण्डरुद्रेण भणितम्–नास्त्युदकमिति । लक्ष्म्या भणितम्–'अहं ददामि' । चण्डरुद्रेण भणितम्–'जीवितो भवत्या' । दत्तमुदकम् । द्वाभ्यामपि अञ्जिते लोचने । भणिता चैषा । सुन्दरि ! अनीते सार्थवाहपुत्रे न त्वया गन्तव्यमिति । प्रतिश्रुतमनया । मुक्तं रत्नभाण्ड धरणसमीपे । स्थितावेकदेशे ॥

प्रभाता रजनी । उत्थितो धरणः । गृहीत आरक्षकैः । निभालितं रत्नभाण्डम्, उपलब्धं च तस्य समीपे । ततो नीतो देवकुलाद्, बद्धः खल्वेषः । चिन्तितं च तेन–हन्त किमेतदिति । अथवा न किञ्चिदन्यत्, अपि च प्रतिकूलस्य विधेर्विजृम्भितमिति । प्रतिकूले चैतस्मिन् अमृतमपि खलु विषम्, रज्जुरपि च कृष्णसर्पः, गोष्पदमपि सागरः, अणुरपि च गिरिः, मूषकविवरमपि रसातलम्, सुजनोऽपि

---

[1] दिन्नं से उययं लच्छीए क । [2] पि संजोइऊण गुणियं क । [3] गोपयं पि ख । [4] वेरी ख । [5] माया ख ।

लोहो, सच्चं पि अलियं, पियं पि फरुसं, कलत्तं पि (मित्तं पि) वेरिओ त्ति[1]। ता किं इमिणा वि चिन्तिएणं। एयस्स वसवत्तिणा न तीरए अन्नहा वट्टिउं। इमाओ वि य कयत्थणाओ इमं मे अहियं बाहइ, जं सा तवस्सिणी अदिट्ठबन्धुविरहा न दीसइ। अहवा वरं न दिट्ठा चेव। मा सा वि मे संसग्गिकलङ्कदूसिया इमं चेव पाविस्सइ त्ति। चिन्तयन्तो नीओ रायउलं। अप्पत्थावो नरिन्दस्स त्ति [2]धरिओ रायमग्गे। [3]अइक्कन्तो वासरो। अवसरो त्ति कलिय निवेइओ नरिन्दस्स। [4]देव, सलोत्तओ चेव मायापओयकुसलो वाणिययवेसधारी गहिओ महाभुयङ्गो। संपयं देवो पमाणं ति। तओ राइणा भणियं। किं तेण, वावाएह त्ति। नीओ णेहिं पाणवाडयं। समप्पिओ रायउलकमागयाणं वहनिओगकारीणं पच्चइयपाणाणं। भणिया य एए। हरे, देवो समाइसइ 'एस तक्करो वावाइयव्वो' त्ति। तेहिं भणियं। जं देवो आणवेइ त्ति। समप्पिऊण तेसिं गया डंडवासिया। भणियं चण्डालमयहरेण। हरे, कस्स वावायणमासवारओ। चण्डालेहिं

दुर्जनः, सुतोऽपि वैरी, जायाऽपि [माताऽपि] भुजङ्गी (व्यभिचारिणी), प्रकाशोऽपि अन्धकारम्, क्षान्तिरपि क्रोधः, मार्दवमपि मानः, आर्जवमपि माया, संतोषोऽपि लोभः, सत्यमपि अलीकम्, प्रियमपि परुषम्, कलत्रमपि (मित्रमपि) वैरिकमिति। ततः किमनेनापि चिन्तितेन। एतस्य वशवर्तिना न शक्यतेऽन्यथा वर्तितुम्। अस्या अपि च कदर्थनाया इदं मेऽधिकं बाधते, यत्सा तपस्विनी अदृष्टबन्धुविरहा न दृश्यते। अथवा वरं न दृष्टैव। मा साऽपि मे संसर्गकलङ्कदूषिता इमां (कदर्थनां) एव प्राप्स्यतीति। चिन्तयन् नीतो राजकुलम्। अप्रस्तावो नरेन्द्रस्येति धृतो राजमार्गे। अतिक्रान्तो वासरः। अवसर इति कलित्वा निवेदितो नरेन्द्रस्य। देव! सलोप्त्रक एव मायाप्रयोगकुशलो वाणिजकवेषधारी गृहीतो महाभुजङ्गः। साम्प्रतं देवः प्रमाणमिति। ततो राज्ञा भणितम्-किं तेन, व्यापाद्यतेति। नीतस्तैः प्राणवाटकम् (चण्डालवाटकम्)। समर्पितो राजकुलक्रमागतानां प्रत्ययितविश्वस्तप्राणानाम्। भणिता चैते। अरे देवः समादिशति 'एष तस्करो

---

[1] अत्र 'पिया वि मियारी, अंधवा विग्घा' इत्यधिकः पाठः क। [2] धारिओ क। [3] अइक्कंता काइ वेला क। [4] 'भणियमारक्खिएहिं' इत्यधिकः पाठः क।

भणियं 'मोरियस्स'। तेण भणियं। लहुं सद्दावेह[1] मोरियं। सद्दाविओ मोरिओ, आगओ य। भणिओ मयहरेण। हरे मोरिय, एस तक्करो देवेण पेसिओ वावाइयव्वो त्ति। ता नेऊण मसाणभूमिं लहुं वावाएहि। जाममेत्तावसेसो य वासरो, एण्हिं अवावाइए मा रयणीए पमाओ भविस्सइ। मोरियएण भणियं। जं तुमं भणसि त्ति समप्पिओ मोरिययस्स पच्चभिन्नाओ[2] य णेणं। 'कहं सो चेव एसो जीवियदायओ मे सत्थवाहपुत्तो; अहो कट्ठं, इमस्स वि ईइसी[3] अवत्थ' त्ति चिन्तिऊण विसण्णो मोरियओ। चिन्तियं च णेणं। अहवा पावेन्ति चन्ददिवायरा वि मुहुत्तमेत्तं गहकल्लोलाओ आवइं। बहुमओ य मे सामिसालसमाएसो एयस्स दंसणेणं। ता नेमि ताव एयं मसाणभूमिं। जाणामि य इमाओ जहट्ठियं वुत्तन्तं। नीओ मसाणभूमिं, छोडिया बन्धा, चलणेसु निवडिऊणं पुच्छिओ य णेणं। अज्ज, अवि सुमरेसि मं आयामुहीए विमोइयं। धरणेण भणियं। भद्द, न सुट्ठु सुमरेमि[4]। मोरियएण[5] भणियं। कहं न सुमरेसि,

व्यापादयितव्यः' इति। तैर्भणितम्-यद् देव आज्ञापयति इति। समर्प्य तेभ्यो गता दण्डपाशिकाः। भणितं +चण्डालमुख्येन-अरे कस्य व्यापादनमासवारकः। चण्डालैर्भणितं 'मौर्यस्य'। तेन भणितम्-लघु शब्दाययत मौर्यम्। शब्दायितो मौर्य आगतश्च। भणितो मुख्यचण्डालेन-अरे मौर्य! एष तस्करो देवेन प्रेषितो व्यापादयितव्य इति। ततो नीत्वा श्मशानभूमिं लघु व्यापादय। याममात्रावशेषश्च वासरः, इदानीमव्यापादिते मा रजन्यां प्रमादो भविष्यति। मौर्येण भणितम्-यत्त्वं भणसीति। समर्पितो मौर्यस्य प्रत्यभिज्ञातश्च तेन। कथं स एवैष जीवितदायको मे सार्थवाहपुत्रः, अहो कष्टम्, अस्यापीदृशी अवस्थेति चिन्तयित्वा विषण्णो मौर्यः। चिन्तितं च तेन-अथवा प्राप्नुतश्चन्द्रदिवाकरावपि मुहूर्तमात्रं ग्रहकल्लोलाद् (राहोः) आपदम्। बहुमतश्च मे स्वामिसमादेश एतस्य दर्शनेन। ततो नयामि तावदेतं श्मशानभूमिम्। जानामि चास्माद् यथास्थितं वृत्तान्तम्। नीतो श्मशानभूमिम्, छोटिता बन्धाः, चरणयोर्निपत्य पृष्टश्चानेन। आर्य! अपि

---

१ सद्दावेहि ख। २ पच्चहिन्नाओ क। ३ इदिसी क। ४ सुमरामि क। ५ मोरिएण क। + अत्र महयरशब्दो देश्यो मुख्यवाची।

हरिसवसुप्फुल्ललोयणेणं। पुच्छिया एसा। सुन्दरि, कुओ तुम त्ति। तओ सा रोविउं पयत्ता भणिया य णेणं। सुन्दरि, मा रोव, ईइसो एस संसारो। आवयाभायणं खु एत्थ पाणिणो। ता अलं विसाएण। धन्नो य अहयं, जेण तुमं संपत्त त्ति। तओ तीए भणियं। अज्जउत्त,पासवणनिमित्तमुट्ठिया गहिया तक्करेण, इत्थीसहा[2]वाओ अज्जउत्तसिणेहाइसएण य न किंपि वाहरियं। 'अणिच्छमाणी य इत्थिया न घेप्पइ' त्ति करिय मुसिऊण उज्झिया इहइं। अन्नं च। तक्करकयत्थणाओ वि मे एयं अहिययरं बाहइ, जं तुमं ईइसिं अवत्थमुवगओ दिट्ठो त्ति। तओ 'न अन्नहा मे वियप्पियं' ति चिन्तिऊण [3]भणियं धरणेणं। सुन्दरि, थेव[4]मियं कारणं। न मे उव्वेवकारिणी इय[5]मवत्था तुह दंसणेणं। ता किं एइणा। एहि, गच्छम्ह। चिन्तियं च णाए। अहो मे पावपरिणई, जं कयन्तमुहाओ वि [6]एस आगओ त्ति। पयट्टा एसा। समागयाइं वियारउरं नाम सन्निवेसं। कया पाणवित्ती। अत्थमिओ सूरिओ। अइवाहिया रयणी। चिन्तियं धरणेणं। एवं

लोचनेन। पृष्टैषा। सुन्दरि! कुतस्त्वमिति। ततः सा रोदितुं प्रवृत्ता भणिता च तेन। सुन्दरि! मा रुदिहि, ईदृश एष संसारः। आपद्भाजनं खल्वत्र प्राणिनः। ततोऽलं विषादेन। धन्यश्चाहं येन त्वं संप्राप्तेति। ततस्तया भणितम्-आर्यपुत्र! प्रस्रवणनिमित्तमुत्थिता गृहीता तस्करेण, स्त्रीस्वभावाद् आर्यपुत्रस्नेहातिशयेन च न किमपि व्याहृतम्। 'अनिच्छन्ती च स्त्री न गृह्यते' इति कृत्वा मुषित्वा उज्झितेह। अन्यच्च तस्करकदर्थनाया अपि मे एतदधिकतरं बाधते, यत्त्वमीदृशीमवस्थामुपगतो दृष्ट इति। ततो 'नान्यथा मे विकल्पितम्' इति चिन्तयित्वा भणितं धरणेन। सुन्दरि! स्तोकमिदं कारणम्। न मे उद्वेगकारिणीयमवस्था तव दर्शनेन। ततः किमेतेन। एहि गच्छावः। चिन्तितं चानया-अहो मे पापपरिणतिः, यत्कृतान्तमुखादपि एष आगत इति। प्रवृत्तैषा। समागतौ विचारपुरं नाम सन्निवेशम्। कृता प्राणवृत्तिः। अस्तमितः सूर्यः। अतिवाहिता रजनी। चिन्तितं धरणेन-एवं कृतान्ताभिभूतस्य न युक्तमिह

---

१ -त्तं समुट्ठिया क। २ -सहावओ क। ३ धरणेण भणियं क। ४ थेवमिदं क। एसा अ-क। ५ एसो क। ६ -मामयस्स क।

अज्जे अवस्समहम[1]प्पाणं वावाएमि। ता गच्छउ अज्जो। तओ 'नत्थि अविसओ सज्जणसिणेहस्स'त्ति चिन्तिऊण जंपियं धरणेणं। भद्द, जइ एवं, ता अवक्कमामि। मोरिएण भणियं। [2]अणुग्गिहीओ म्हि। दंसिओ से पन्थो। पणमिऊण य नियत्तो मोरिओ। मि[3]त्तोवरोहेण पलाणो धरणो। चिन्तियं च णेण। अह कहिं पुण सा मुद्धमयलोयणा भविस्सइ। नूणमु[4]वरोहसीलयाए मं अणुट्ठविय पासवणनिमित्तमुट्ठिया केणावि तक्करेणं समासाइया भवे, नीया य णेणं, मम विणा[5]सासङ्किणीए न जंपियमिमीए; अन्नहा कहं न दिट्ठ त्ति। अदंसणेणं च [6]तीसे विहलमेव पाणलाहं मन्नामि त्ति। चिन्तयन्तो पयट्टो गवेसिउं। ण्हाओ उ[7]ज्जुवालियाए॥

इओ य सो चण्डरुद्दो तओ देवउलाओ अवक्कमिऊण गओ उ[8]ज्जुवालियं नइं। चिन्तियं च णेणं। अहो दारुणया इत्थिवग्गस्स,

---

प्राणव्यापत्तिं करोति। अगच्छति चार्ये अवश्यमहमात्मानं व्यापादयामि। ततो गच्छत्वार्यः। ततो 'नास्त्यविषयः सज्जनस्नेहस्य' इति चिन्तयित्वा जल्पितं धरणेन। भद्र! यद्येवं ततोऽपक्रामामि। मौर्येण भणितम्—अनुगृहीतोऽस्मि। दर्शितस्तस्य पन्थाः। प्रणम्य च निवृत्तो मौर्यः। मित्रोपरोधेन पलायितो धरणः। चिन्तितं च तेन—अथ कुत्र पुनः सा मुग्धमृगलोचना भविष्यति, नूनमुपरोधशीलतया मामनुत्थाप्य प्रस्रवणनिमित्तमुत्थिता केनापि तस्करेण समासादिता भवेत्, नीता च तेन, मम विनाशाशङ्किन्या न जल्पितमनया, अन्यथा कथं न दृष्टेति। अदर्शनेन च तस्या विफलमेव प्राणलाभं मन्ये इति। चिन्तयन् प्रवृत्तो गवेषयितुम्। स्नात ऋजुवालिकायाम्।

इतश्च स चण्डरुद्रस्ततो देवकुलादपक्रम्य गत ऋजुवालिकां नदीम्। चिन्तितं च तेन—अहो दारुणता स्त्रीवर्गस्य, यदेषा एकपदे एव महा-

---

१ अप्पाणयं क। २ 'देव, महापसाओ' इत्यधिकः पाठः कपुस्तके। ३ तओ मोरिआवरोहेण गओ धरणो क। ४ –मवरोहसीलयाए क–ख। ५ विणाससंकियाए क। ६ तीए क। ७ उज्जुमालियाए क उज्जुयालियाए ख। ८ उज्जामालियं क।

जमेसा एगपए चेव महावसणपायालंमि पक्खिविय भत्तारं अणवेक्खिऊण नियकुलं सिविणयंमि वि अदिट्ठपुव्वेण मए सह पयट्ट त्ति।

हा [1]किह दूरेण जियं विसवग्घभुयङ्गसिङ्घसरहाणं । कलिकालवण्हिरक्खसिकयन्तचरियं महिलियाहिं ॥
असलिलपङ्कग्गाही होइ खणेणं अकन्दरा वग्घी । अणियत्ता जमभिउडी अणब्भवज्जासणी महिला ॥
महिला आल[2]कुलघरं महिला लोयंमि दुच्चरियखेत्तं । महिला दुग्गइदारं महिला जोणी अणत्थाणं ॥
विज्जु व्व चञ्चलाओ महिलाउ विसं व पमुहमहुराओ । मच्चु व्व निग्घिणाओ पावं पिव वज्जणिज्जाओ ॥

ता अलं मे एयाए; मा मज्झं पि इणमेव संपाडइस्सइ त्ति चिन्तिऊण घेत्तूणमङ्गलग्गं सुवण्णयं परिचत्ता खु एसा। चिन्तियं च तीए। तहावि सोहणं चेव एयं, जं सो वावाइओ त्ति। ता गच्छामि अन्नत्थ। पयट्टा नईतीराए। दिट्ठा धरणेण

व्यसनपाताले प्रक्षिप्य भर्तारमनपेक्ष्य निजकुलं स्वप्नेऽपि अदृष्टपूर्वेण मया सह प्रवृत्तेति।

हा कथं दूरेण जितं विष-व्याघ्र-भुजङ्ग-सिंह-शरभानाम्। कलिकालवह्निराक्षसीकृतान्तचरितं महिलाभिः ॥
असलिलपंकग्राही+ भवति क्षणेनाकन्दरा व्याघ्री। अनिवृत्ता यमभृकुटिरनभ्रवज्राशनिर्महिला ॥
महिला आल(असद्दोषारोप)कुलगृहं महिला लोके दुश्चरितक्षेत्रम्। महिला दुर्गतिद्वारं महिला योनिरनर्थानाम् ॥
विद्युदिव चञ्चला महिला विषमिव प्रमुखमधुराः। मृत्युरिव निर्घृणाः पापमिव वर्जनीयाः ॥

ततोऽलं मे एतया, मा ममापीदमेव संपादयिष्यति इति' चिन्तयित्वा गृहीत्वाङ्गलग्न सुवर्णं परित्यक्ता खल्वेषा। चिन्तितं च तया-तथापि शोभनमेवैतत् , यत्स व्यापादित इति। ततो गच्छाम्यन्यत्र। प्रवृत्ता नदीतीरे। दृष्टा धरणेन हर्षवशोत्फुल्ल-

---

१ कहं क। २ कुलहरं क। + ग्राहो जलजन्तुविशेषः, तस्य स्त्री जातित्वात् ग्राही।

जो भवं विय अचोरो चेव 'चोरो'त्ति कलिय गहिओ अहं महया दविणजाएण पेच्छिऊण नरवइं तए विमोइओ त्ति। धरणेण भणियं। भद्द, थेवमेयं। मोरिएण भणियं। ता साहेउ अज्जो, कहं पुण अज्जस्स ईइसी अवत्थ त्ति। धरणेण भणियं। भद्द, देव्वं एत्थ पुच्छसु त्ति। मोरिएण चिन्तियं। न एत्थ कालक्खेवेण पओयणं[1], अहिमाणी य एसो कहं कहइस्सइ[2]। किं वा कहिएणं। विचित्ताणि विहिणो विलसियाणि। ता किं ममेइणा निब्बन्धेण। अहवा कहियं चेवाणेण परमत्थओ 'देव्वं पुच्छसु'त्ति भणमाणेण। ता इमं ताव एत्थ पत्तयालं, जं एसो इओ लहुं विसज्जीयइ[3] त्ति। चिन्तिऊण भणिओ खु एसो। अज्ज, किं बहुणा जंपिएण; मोत्तूण विसाय लहुं अवक्कमसु[4]। धरणेण भणियं। भद्द, न खलु अहं परपाणेहिं अत्तणो पाणे रक्खेमि। ता वावाएहि मं, [5]निद्देसकारी खु तुमं ति। मोरिएण भणियं। अज्ज, अलं मज्झ पाणविणाससङ्काए[6]। सत्तपुरिसो[7] खु एस राया, न अम्हाणं अवराहसए वि य पाणवावत्तिं[8] करेइ। अगच्छमाणे य

स्मरसि मामायामुख्यां विमोचितम्। धरणेन भणितम्-न सुष्ठु स्मरामि। मौर्येण भणितम्-कथं न स्मरसि, यो भवानिव अचोर एव 'चोर' इति कलयित्वा गृहीतोऽहं महता द्रविणजातेन प्रेक्ष्य नरपतिं त्वया विमोचित इति। धरणेन भणितम्-भद्र! स्तोकमेतद्। मौर्येण भणितम्-ततः कथयत्वार्यः, कथं पुनरार्यस्य ईदृशी अवस्थेति। धरणेन भणितम्-भद्र! दैवमत्र पृच्छेति। मौर्येण चिन्तितम्-नात्र कालक्षेपेन प्रयोजनम्, अभिमानी चैष कथं कथयिष्यति, किं वा कथितेन। विचित्राणि विधेर्विलसितानि। ततः किं ममैतेन निर्बन्धेन। अथवा कथितमेवानेन परमार्थतो 'दैवं पृच्छ'इति भणता। तत इदं तावदत्र प्राप्तकालम्, यदेष इतो लघु विसर्ज्यते इति। चिन्तयित्वा भणितः खल्वेषः। आर्य! किं बहुना जल्पितेन, मुक्त्वा विषादं लघु अपक्राम। धरणेन भणितम्-भद्र! न खल्वहं परप्राणैरात्मनः प्राणान् रक्षामि। ततो व्यापादय माम्, निर्देशकारी खलु त्वमिति। मौर्येण भणितम्-आर्य! अलं मम प्राणविनाशशङ्कया। सत्पुरुषः खल्वेष राजा, नास्माकमपराधशतेऽपि च

---

१ पओयणं ति क। २ कहिस्सइ क। ३ विसज्जियइ ख। ४ अवक्कमाहि क। ५ आएसयारी क। ६ -विणासणासंकाए क। ७ सत्तवुरिसिओ क। ८ विवित्तिं क।

कयन्ताभिभूयस्स न जुत्तमिह चिट्ठिउं । ता पराणेमि ताव एयं दन्तउरनिवासिणो खन्ददेवमाउलस्स[1] समीवं; पच्छा जहाजुत्तं करेस्सामि त्ति । साहियं लच्छीए । बहुमयं च तीए । पयट्टाणि दन्तउरं ॥

इओ य न लद्धो सत्थवाहपुत्तो त्ति संजायसोएण पच्चइयनिययपुरिसाण समप्पिओ सत्थो कालसेणेण । भणिया य एए । हरे, पावियव्वो तुम्हेहिं एस महाणुभावस्स गुरूणं ति । चिन्तियं च णेण । जइ वि न संपन्नमोवाइयं, तहावि कायम्बरीए जहा भणियमेव बलिविहाणं काऊण पइन्नं पि ताव सफलं करेमि त्ति । पेसिया बलिपुरिसनिमित्तं सबरपुरिसा। कराविया कायम्बरीए पूया, मज्जिओ गिरिनईए, परिहियाइं वक्कलाइं, कया कणवीरमुण्डमाला, रयाविया महामहल्लकट्ठेहिं[3] चिया, पयट्टो चण्डियाययणं ॥

इओ य दन्तउरपत्थिओ बिइयदियहंमि[2] अरुणुग्गमे चेव कायम्बरिं परिब्भमन्तेहिं समासाइओ सत्थवाहपुत्तो कालसेणसबरेहिं । बद्धो

स्थातुम् । ततः परानयामि तावदेतां दन्तपुरनिवासिनः स्कन्ददेवमातुलस्य समीपम्, पश्चाद् यथायुक्तं करिष्यामीति । कथितं लक्ष्म्यै । बहुमतं च तया। प्रवृत्तौ दन्तपुरम् ॥

इतश्च न लब्धः सार्थवाहपुत्र इति संजातशोकेन प्रत्ययितनिजपुरुषेभ्यः समर्पितः सार्थः कालसेनेन। भणिताश्चैते । अरे प्रापयितव्यो युष्माभिरेष महानुभावस्य गुरूणामिति। चिन्तितं च तेन–यद्यपि न संपन्नमौपयाचितं तथापि कादम्बर्या यथाभणितमेव बलिविधानं कृत्वा प्रतिज्ञामपि तावत्सफलां करोमीति। प्रेषिता बलिपुरुषनिमित्तं शबरपुरुषाः। कारिता कादम्बर्याः पूजा, मज्जितो गिरिणद्याम्, परिहितानि वल्कलानि, कृता करवीरमुण्डमाला, रचिता महामहाकाष्ठैश्चिता, प्रवृत्तश्चण्डिकाऽऽयतनम् ॥

इतश्च दन्तपुरप्रस्थितो द्वितीयदिवसेऽरुणोद्गमे एव कादम्बरीं परिभ्रमद्भिः समासादितः सार्थवाहपुत्रः कालसेनशबरैः। बद्धो

---

१ –मामयस्स क। २ बीय–क। ३ महामुल्ल ग।

वल्लिरज्जूए । पयट्टाविओ समहिलिओ चेव चण्डियाययणं । गओ थेवं भूमिभागं । दिट्ठं च णेण चण्डियायणपासमण्डलं । कीइसं । परिसडियजिण्णरुक्खगु[1]द्देहियखइयकट्ठसंघायसंकुलं भुयङ्गमिहुणसणाहवियडवम्मीयं परत्तमुहलसउणगणकयवमालं वियडतरुखन्धबहलरुहिरायड्ढियतिसूलसंघायं पायवसाहावबद्धमहिसमेसमुहपुच्छखुरसिङ्गसिरोहराचीरनिवहं ति । अवि य

वायससउन्तसंवलियगिद्धवन्द्रेहि विप्फुरन्तेहिं । पडिबद्धसूरकिरणं करङ्ककलियं मसाणं व ॥
गहभूयजक्खरक्खसपिसायसंजणियहिययपरिओसं । रुहिरबलिखित्तपसमियनिस्सेसधरारउग्घायं ॥

तं च एवगुणाहिरामं चण्डियाययणपासमण्डलं सभयं वोलिऊण आययणं पेच्छिउं पयत्तो ।

धवलवरनरकलेवरवित्थिण्णुत्तुङ्गघडियपायारं । उब्भडकबन्धविरइयतोरणपडिबद्धसिरमालं ॥

वल्लिरज्ज्वा । प्रवर्तितः समहिलिक एव चण्डिकायतनम् । गतः स्तोकं भूमिभागम् । दृष्टं च तेन चण्डिकायतनपार्श्वमण्डलम् । कीदृशम् । परिशटितजीर्णवृक्षगोद्देहिकाखादितकाष्ठसंघातसंकुलं भुजगमिथुनसनाथविकटवल्मीकं प्ररक्तमुखरशकुनगणकृत(वमाल दे.)कोलाहलं विकटतरुस्कन्धवहलरुधिराक्तृष्टत्रिशूलसंघातं पादपशाखाववद्धमहिष-मेषमुखपुच्छखुरशृङ्गशिरोधराचीरनिवहमिति । अपि च–

वायसशकुन्तसंवलितगृध्रवन्द्रैर्विस्फुरद्भिः । प्रतिवद्धसूर्यकिरण करङ्ककलितं श्मशानमिव ॥
ग्रहभूतयक्षराक्षसपिशाचसंजनितहृदयपरितोषम् । रुधिरवलिक्षिप्तप्रशमितनिःशेषधरारजउद्धातम्(समूहम्) ॥

तं चैवंगुणाभिरामं चण्डिकायतनपार्श्वमण्डलं सभयं व्यतिक्रम्यायतनं प्रेक्षितुं प्रवृत्तः ।

धवलवरनरकलेवरविस्तीर्णोत्तुङ्गघटितप्राकारम् । उद्भटकवन्धविरचिततोरणप्रतिवद्धशिरोमालम् ॥

---

१ उद्देहिया–क ।

मयणाहवयणभीसणविरइयपायारसिहरसंघायं । उत्तुङ्गवेणुलम्बियदीहरपोण्डरियकत्तिझयं ॥
दीणमुहपासपिण्डियवन्दयबीभच्छरुद्धओवासं । निसियकरवालवावडकरसबरजुवाणपरियरियं ॥
विसमसमाहयपडुपडहसद्दवित्तत्थसउणसंघायं । अच्चंतरुयन्तसदुक्खसबरिविलयाजणाइण्णं ॥
वियडगयदन्तनिम्मियभित्तिसमुक्किन्नसूलसंघायं । तक्खणमेत्तुक्कत्तियचम्मसमोच्छइयगब्भहरं ॥
पुरिसवसापरिपूरियकवालपज्जलियमङ्गलपईवं । डज्झन्तविल्लगुग्गुलुपवियम्भियधूम[1]संघायं ॥
सबरवहूरुहिरक्खयगयमोत्तियरइयसत्थियसणाहं । चन्दकरधवलदीहरपरिलम्बियचमरसंघायं ॥
रुहिरकसब्वालम्बियदीहरवणकोलवब्भनिउरुम्बं । कङ्केल्लिपल्लवुप्पङ्कनिमियरे[2]हन्तधरणितलं ॥

मृगनाथवदनभीषणविरचितप्राकारशिखरसंघातम् । उत्तुङ्गवेणुलम्बितदीर्घपौण्डरीककृत्तिध्वजम् ॥
दीनमुखपाशपिण्डितवन्दिकवीभत्सरुद्धावकाशम् । निशितकरवालव्यापृतकरशबरयुवपरिकरितम् ॥
विषमसमाहतपटुपटहशब्दवित्रस्तशकुनसंघातम् । अत्यन्तरुदत्सदुःखशबरीवनिताजनाकीर्णम् ॥
विकटगजदन्तनिर्मितभित्तिसमुत्कीर्णशूलसंघातम् । तत्क्षणमात्रोत्कर्तितचर्मसमाच्छादितगभगृहम् ॥
पुरुषवसापरिपूरितकपालप्रज्वलितमङ्गलप्रदीपम् । दह्यमानविल्वगुग्गुलुप्रविजृम्भितधूमसंघातम् ॥
शवरवधूरुधिराक्षतगजमौक्तिकरचितस्वस्तिकसनाथम् । चन्द्रकरधवलदीर्घपरिलम्बितचामरसंघातम् ॥
रुधिर-(कसब्व दे.)व्याप्तालम्बितदीर्घवनकोलवभ्रनिकुरम्बम् । कंकेल्लि(अशोक)पल्लवोत्पंक(राशि)न्यस्तराजद्धरणीतलम् ॥

---

१ धूमनिउरुंबं क । २ रायंत-क ।

कोदण्डखग्गघण्टयमहिसासुरपुच्छवावडकराए। कच्चाइणिपडिमाए विहूसियं घोररूवाए॥

तओ तं दट्ठूण चिन्तियं धरणेणं

सक्का सीहस्स वणे पलाइउं [1]वारणस्स य तहेव। सुकयस्स दुकयस्स य भण कत्थ पलाइउं सक्का॥
एवं च चिन्तयन्तो छूढो सबरेहि वन्द्रमज्झंमि। अह बन्धिऊण गाढं पुव्वविरुद्धेहि व खलेहिं॥

एत्थन्तरंमि समागओ चण्डियाययणं कालसेणो, पडिओ चण्डियाए चलणेसु, भणियं च सगग्गयक्खरं। भयवइ, जइ वि न कओ तए महं पसाओ, तहावि जम्मन्तरे वि जहा न एवं दुक्खभायणं हवामि, तहा तए कायव्वं ति। 'सत्थवाहपुत्तावयारकरणेण जं महं दुक्खं, तं तुमं चेव जाणसि' त्ति भणिऊण भणिओ कुरङ्गओ। हरे, निवेएहि भयवईए बलिं। तेण जं देवो आणावेइ' त्ति भणिऊण

कोदण्डखड्गघण्टामहिषासुरपुच्छव्यापृतकरया। कात्यायनीप्रतिमया विभूषितं घोररूपया॥

ततस्तं दृष्ट्वा चिन्तितं धरणेन।

शक्ताः सिंहाद् वने पलायितुं वारणात्तथैव। सुकृताद् दुष्कृताच्च भण कुत्र पलायितुं शक्ताः॥
एवं च चिन्तयन् क्षिप्तः शबरैर्वन्द्रमध्ये। अथ बद्ध्वा गाढं पूर्वविरुद्धैरिव खलैः॥

अत्रान्तरे समागतश्चण्डिकायतनं कालसेनः। पतितश्चण्डिकायाश्चरणयोः। भणितं च सगद्गदाक्षरम्। भगवति! यद्यपि न कृतस्त्वया मम प्रसादः, तथापि जन्मान्तरेऽपि यथा नैवं दुःखभाजनं भवामि तथा त्वया कर्तव्यमिति। 'सार्थवाहपुत्रापकारकरणेन यन्महद् दुःखं तत्त्वमेव जानासि' इति भणित्वा भणितः कुरङ्गकः। अरे निवेदय भगवत्यै बलिम्। तेन 'यद्देव आज्ञापयति' इति भणित्वा

---

[1] हत्थिणो व्व मत्तस्स। क। [2] चिन्तिऊण ख।

खित्तो णेण केसेसु[1] कड्ढिऊण भयपरायत्तसव्वगत्तो दुग्गिलओ नाम लेहवाहओ । ढोइयं[2] रत्तचन्दणसणाहं भायणं । विगयपाणो विव चच्चिओ दुग्गिलओ । कालसेणेण कड्ढियं विज्जुछडाडोवभासुरं मण्डलग्गं, वाहियं ईसि नियभुयासिहरे । भणिओ य दुग्गिलओ । भद्द, सुदिट्ठं जीवलोयं करेहि । सग्गं तए गन्तव्वं, जीवियं मोत्तूण [3]किं वा ते संपाडियउ त्ति । तओ [4]भयाभिभूएण न जंपियं दुग्गिलएणं । पुणो वि भणिओ, पुणो वि न जंपियं ति । अणावूरियमणोरहो य न वावाइज्जइ त्ति विसण्णो कालसेणो । तं च दट्ठूण चिन्तियं धरणेणं । हन्त मए वि एवं मरियव्वं ति । ता वरं अपेच्छिऊण दीणसत्तघायं काऊण खणमेत्तपाणपरिरक्खणेण इमस्स उवयारं पढमं विवन्नो म्हि । वावडो य मे विणिवायकरणेसु कयन्तो, एसो वि निव्वुओ हवउ त्ति चिन्तिऊण भणिओ कुरङ्गओ । भद्द, निवेएहि एयस्स महापुरिसस्स, जहा 'भयविसण्णो खु एसो तवस्सी, ता किं एइणा; अणभिन्नो अहं पत्थणाए; तहावि भवओ पओयणं पसाहणीयं[5] चेव

क्षिप्तोऽनेन केशेषु कर्षित्वा भयपरावृत्तसर्वगात्रो दुर्गिलको नाम लेखवाहकः । ढौकितं रक्तचन्दनसनाथं भाजनम् । विगतप्राण इव चर्चितो दुर्गिलकः । कालसेनेन कृष्टं विद्युच्छटाटोपभासुरं मण्डलाग्रम्, वाहितमीषद् निजभुजाशिखरे । भणितश्च दुर्गिलकः । भद्र ! सुदृष्टं जीवलोकं कुरु । स्वर्गं त्वया गन्तव्यं, जीवितं मुक्त्वा किं वा ते संपाद्यतामिति । ततो भयाभिभूतेन न जल्पितं दुर्गिलकेन । पुनरपि भणितः पुनरपि न जल्पितमिति । अनापूरितमनोरथश्च न व्यापाद्यते इति विषण्णः कालसेनः । तं च दृष्ट्वा चिन्तितं धरणेन । हन्त मयाऽप्येवं मर्तव्यमिति । ततो वरमप्रेक्ष्य दीनसत्त्वघातं कृत्वा क्षणमात्रप्राणपरिरक्षणेनास्योपकारं प्रथमं विपन्नोऽस्मि । व्यापृतश्च मे विनिपातकरणेषु कृतान्तः, एषोऽपि निर्वृतो भवत्विति चिन्तयित्वा भणितः कुरङ्गकः । भद्र ! निवेदय एतस्मै महापुरुषाय, यथा 'भयविषण्णः खल्वेष तपस्वी, ततः किमेतेन, अनभिज्ञोऽहं प्रार्थनायाम्, तथापि भवतः प्रयोजनं प्रसाधनीयमेव प्रार्थये एकां प्रार्थनामिति । निवेदितं काल-

---

१ केसे क । २ ढोइऊण ख । ३ 'किं भण' इत्यधिकः कपुस्तके । ४ भयाहिहूएण क । ५ पसाहिणीयं क ।

पत्थेमि एगं पत्थणं' ति। निवेइयं कालसेणस्स। भणियं च णेण। जीवियं मोत्तूण पत्थेउ भद्दो त्ति। धरणेण भणियं। मोत्तूण एयं मं वावाएसु त्ति। तओ बाहजलभरियलोयणेण अहं[1] को उण एसो परोवयारतल्लिच्छयाए अप्पाणयं वावायणे समप्पेइ; सुमरावेइ[2] मे सत्थवाहपुत्तं' ति भणिऊण मुच्छिओ[3] कालसेणो, निवडिओ धरणिवट्ठे। वीजिओ किसोरएण। लद्धा चेयणा। भणियं णेण। भद्द किसोरय, निरूवेहि एयं, को उण एसो महाणुभावो सत्थवाहपुत्तस्स चेट्ठियं अणुकरेइ। निरूविऊण भणियं किसोरएण। भो इमाए अणन्नसरि[4]सीए आगिईए सो चेवं[5] मे पडिहायइ त्ति। ता सयमेव निरूवेउ पल्लीवई। तओ हरिसविसायगब्भिणं निरूविओ णेण पच्चभिन्नाओ य। छोडिया[6] से बन्धा। खग्गं मोत्तूण निवडिओ चलणेसु। भणियं च णेण। सत्थवाहपुत्त, खमियव्वो मह[7] एस अवराहो। धरणेण भणियं। भो महापुरिस[8], अहिप्पेयफलसाहणेण गुणो खु एसो, कहमवराहो त्ति। कालसेणेण चिन्तियं। नूणं न एस मं पच्चभिजाणइ[9] त्ति, तेण

सेनाय। भणितं च तेन–जीवितं मुक्त्वा प्रार्थयतां भद्र इति। धरणेन भणितम्–मुक्त्वा एतं मां व्यापादयेति। ततो बाष्पजलभृतलोचनेन 'अथ कः पुनरेष परोपकारतत्परतया आत्मानं व्यापादने समर्पयति, स्मरयति मे सार्थवाहपुत्रम्' इति भणित्वा मूर्च्छितः कालसेनः, निपतितो धरणीपृष्ठे। वीजितः किशोरकेन। लब्धा चेतना। भणितं च तेन–भद्र किशोरक! निरूपयैतम्, कः पुनरेष महानुभावः सार्थवाहपुत्रस्य चेष्टितमनुकरोति। निरूप्य भणितं किशोरकेन—भो अनयाऽनन्यसदृश्याऽऽकृत्या स एव मे प्रतिभातीति। ततः स्वयमेव निरूपयतु पल्लीपतिः। ततो हर्षविषादगर्भितं निरूपितस्तेन प्रत्यभिज्ञातश्च। छोटितास्तस्य बन्धाः। खड्गं मुक्त्वा निपतितश्चरणयोः। भणितं च तेन–सार्थवाहपुत्र! क्षन्तव्यो ममैषोऽपराधः। धरणेन भणितम्–भो महापुरुष! अभिप्रेतफलसाधनेन गुणः खल्वेषः, कथम-

---

१ अहो ख। २ सुमरेइ क। ३ संमुच्छिओ क। ४ –सरिसाए ख। ५ च्चेव क। ६ कालसेणेण लूणा से क। ७ मम क। ८ महासत्त क। ९ पच्चहियाणइ क।

एवं मन्तेइ; ता पयासेमि से अत्ताणयं। भणियं च णेण। सत्थवाहपुत्त, किं ते अहिप्पेयं फलं [1]साहियं ति। धरणेण भणियं। भद्द, पत्थुए वावायणे एयं उज्झिऊण ममेव मरणमणोरहावूरणं ति। कालसेणेण भणियं। सत्थवाहपुत्त, किं ते इमस्स निव्वेयाइसयस्स मरणववसायस्स कारणं। धरणेण भणियं। भो महापुरिस, अलमियाणिं एयाए कहाए। संपाडेउ भवं अत्तणो समीहियं ति। तओ 'अहो से महाणुभावय' त्ति चिन्तिऊण भणियं कालसेणेण। सत्थवाहपुत्त, न सुमरेसि मं सीहविणिवाइयं नागपोययं पिव अत्तणो विणासनिमित्तं अत्तणा चेव जीवाविऊण कयग्घसेहरयभूयं कालसेणं। जीवाविओ अहं तए। मए पुण कओ तुज्झ पच्चुवयारो; विओइओ तुमं सत्थाओ, पाविओ य अप्पत्तपुव्वं इमं ईइसिं अवत्थं ति। तओ सुमरिऊण पुव्ववुत्तन्तं पच्चहियाणिऊण य कालसेणं लज्जावणयवयणं जंपियं धरणेण। भो महापुरिस, को अहं जीवावियव्वस्स, तुह चेव पुण्णपरिणई एस त्ति। कहं च तुमं कयग्घो, जो दिट्ठमेत्त वि

पराध इति। कालसेनेन चिन्तितम्-नूनं नैष मां प्रत्यभिजानातीति तेनैवं मन्त्रयति. ततः प्रकाशयामि तस्मै आत्मानम्। भणितं च तेन-सार्थवाहपुत्र! किं तेऽभिप्रेतं फलं साधितमिति। धरणेन भणितम्-भद्र! प्रस्तुते व्यापादने एतमुज्झित्वा ममैव मरणमनोरथापूरणमिति। कालसेनेन भणितम्-सार्थवाहपुत्र! किं तेऽस्य निर्वेदातिशयस्य मरणव्यवसायस्य कारणम्। धरणेन भणितम्-भो महापुरुष! अलमिदानीमेतया कथया। संपादयतु भवानात्मनः समीहितमिति। ततः 'अहो तस्य महानुभावता' इति चिन्तयित्वा भणितं कालसेनेन। सार्थवाहपुत्र! न स्मरसि मां सिंहविनिपातितं नागपोतकमिवात्मनो विनाशनिमित्तमात्मनैव जीवयित्वा कृतघ्नशेखरभूतं कालसेनम्। जीवितोऽहं त्वया। मया पुनः कृतस्तव प्रत्युपकारः, वियोजितस्त्वं सार्थात्, प्रापितश्चाप्राप्तपूर्वामिमामीदृशीमवस्थामिति। ततः स्मृत्वा पूर्ववृत्तान्तं प्रत्यभिज्ञाय च कालसेनं लज्जावनतवदनं जल्पितं धरणेन। भो महापुरुष! कोऽहं जीवयितव्यस्य, तवैव पुण्यप

---

[1] किं वा पुरिसयारो भणीयइ क।

जणे अन्नाणओ किंपि काऊण एवं खिज्जसि त्ति। ता अलमेइणा। अह किं पुण इमं पत्थुयं ति। तओ लज्जापराहीणेण न जंपियं कालसेणेण। साहियं च निरवसेसमेव संगमदंसणाइयं नियपाणपरिच्चायववसायावसाणं चेट्ठियं ति किसोरएणं। तओ 'अहो से कयन्नुया, अहो थिरसिणेहया, अहो महाणुभावय' त्ति चिन्तिऊण जंपियं धरणेण। भो महापुरिस, जुत्तमेव गुरुदेवपूयणं पुप्फबलि[1]गन्धचन्दणेहिं, न उण पाणिघाएणं। अवि य

होज्जा जले वि[2] जलणो होज्जा खीरं पि गोविसाणाओ। अमयरसो वि[3] विसाओ न य हिंसाओ हवइ धम्मो॥
दाऊण य अहिओयं देवयजन्नाण जे खलु[4] अभव्वा। घायन्ति जियसयाइं पावेन्ति दुहाइ ते नरए॥

ता विरम एयाओ ववसायाओ त्ति। कालसेणेण भणियं। जं तुमं आणवेसि[5] त्ति। तओ गामदेस[6]लूडणे अन्नाभावे य भक्खणनिमित्त

णतिरेषेति। कथं च त्वं कृतघ्नः, यो दृष्टमात्रेऽपि जने अज्ञानतः किमपि कृत्वा एवं खिद्यसे इति। ततोऽलमेतेन। अथ किं पुनरिदं प्रस्तुतमिति। ततो लज्जापराधीनेन न जल्पितं कालसेनेन। कथितं च निरवशेषमेव संगमदर्शनादिकं निजप्राणपरित्यागव्यवसायावसानं चेष्टितमिति किशोरकेन। ततः 'अहो तस्य कृतज्ञता, अहो स्थिरस्नेहता, अहो महानुभावता' इति चिन्तयित्वा जल्पितं धरणेन। भो महापुरुष! युक्तमेव गुरुदेवपूजनं पुष्पबलिगन्धचन्दनैः; न पुनः प्राणिघातेन। अपि च—

भवेज्जलेऽपि ज्वलनो भवेत् क्षीरमपि गोविषाणात्। अमृतरसोऽपि विषाद् न च हिंसाया भवति धर्मः॥
दत्त्वा चाभियोगं देवतायज्ञेभ्यो ये खल्वभव्याः। घातयन्ति जीवशतानि प्राप्नुवन्ति दुःखानि ते नरके॥

ततो विरम एतस्माद् व्यवसायादिति। कालसेनेन भणितम्-यत्त्वमाज्ञापयसीति। ततो ग्रामदेशलुण्टने अन्नाभावे च भक्षणनिमित्तं च

---

[1] पुप्फफलगन्ध-क। [2] व क। [3] व्व क। [4] इहं पुरिसा क। [5] भणासि ख। [6] गामाइदेस-ख।

च मोत्तूण कओ अणेण कायम्बरिअडविपविट्ठस्स सत्थस्स पाणिघायणस्स जावज्जीविओ नियमो। फुल्लबलिगन्धचन्दणेहिं पूइया देवया। नीओ णेण सयलबन्दसंगओ नियगेहमेव धरणो। कओ [1]उंचिओ उवयारो।

भुत्तुत्तरकालंमि य उवणीयं से समत्थरित्थं [2]ति। सबराहिवेण तुरियं [3]गहियं जं सत्थभङ्गंमि ॥
करिकुम्भसमुत्थाणि य महल्लमुत्ताहलाइ पवराइं। दन्ता य गयवराणं चमराणि य जच्चचमरीणं ॥
घेत्तूण य तं रित्थं दाऊण य किंचि बन्दयाणं पि। विहरह जहासुहेणं भणिऊण विसज्जिया तेणं ॥

धरणो वि कालसेणपीईए तत्थेव कंचि कालं गमेऊण विसज्जिओ कालसेणेण, पयट्टो निययपुरिं, पत्तो य कालक्कमेणं। [[4]विन्नाओ अम्मापिईहिं नायरेहि य] परितुट्ठो से गुरुयणो। निग्गया नयरिमहन्तया। पच्चुवेक्खियं भण्डं संखियं च [5]मोल्लेणं जाव सवाया कोडि

मुक्त्वा कृताऽनेन कादम्बर्यटवीप्रविष्टस्य सार्थस्य प्राणिघातनस्य यावज्जीविको नियमः। पुष्पवलिगन्धचन्दनैः पूजिता देवता। नीतस्तेन सकलबन्दिसंगतो निजगेहमेव धरणः। कृत उचित उपकारः।

भुक्तोत्तरकाले चोपनीतं तस्मै समस्तरिक्थमिति। शवराधिपेन त्वरितं गृहीतं यत्सार्थभङ्गे ॥
करिकुम्भसमुत्थानि च महामुक्ताफलानि प्रवराणि। दन्ताश्च गजवराणां चामराणि च जात्यचमरीणाम् ॥
गृहीत्वा च तद् रिक्थं दत्त्वा च किंचिद् बन्दिनामपि। विहरत यथासुखं भणित्वा विसर्जितास्तेन (धरणेन) ॥

धरणोऽपि च कालसेनप्रीत्या तत्रैव कञ्चित्कालं गमयित्वा विसर्जितः कालसेनेन प्रवृत्तो निजपुरीम्, प्राप्तश्च कालक्रमेण। [विज्ञातो मातापितृभ्यां नागरकैश्च]। परितुष्टस्तस्य गुरुजनः। निर्गता नगरीमहान्तः। प्रत्यवेक्षितं भाण्डम्, संख्यातं, च मूल्येन

---

[1] उचि उव-क-ग। [2] तु क। [3] जं गहियं क। [4] अयं कोष्ठान्तर्गतः पाठो नास्ति कपुस्तके। [5] मुल्लेणं ख।

त्ति। इओ अइक्कन्ते अद्धमासे आगओ देवनन्दी। तस्स वि य निग्गया नयरिमहन्तया। पच्चुवेक्खियं भण्डं संखियं च 'मोल्लेणं जाव अद्धकोडि त्ति। तओ विलिओ देवनन्दी। समप्पियं पउरभण्डमोल्लं। सेसेण य परमणोरहसंपायणेण सफलं पुरिसभावमणुहवन्तस्स आगया मयणतेरसी। भणिओ य एसो नयरिमहन्तएहिं 'नीसरेहि रहवरं'। धरणेण भणियं। अलं बालक्कीडाए। पसंसिओ नयरिमहन्तएहिं ॥

अइक्कन्तो य से कोइ कालो परत्थसंपायणसुहमणुहवन्तस्स। निओइयपायं च णेण नियभुओवज्जियं दविणजायं। समुप्पन्ना य से चिन्ता। अवस्समेव पुरिसेण उत्तमकुलपसूएण तिवग्गो सेवियव्वो। तं जहा, धम्मो अत्थो कामो य। तत्थ अपरिचत्तसव्वसंगेण अत्थप्पहाणेण होयव्वं ति। तओ चेव तस्स दुवे संपज्जन्ति। तं जहा, धम्मो य कामो य। अन्नं च, एस अत्थो नाम महन्तं देवयारूवं।

यावत् सपादा कोटिरिति। इतोऽतिक्रान्तेऽर्धमासे आगतो देवनन्दी। तस्यापि च निर्गता नगरीमहान्तः। प्रत्यवेक्षितं भाण्डम्, संख्यातं च मूल्येन यावदर्धकोटिरिति। ततो व्यलीको (लज्जितो) देवनन्दी। समर्पितं पौरभाण्डमूल्यम्। शेषेण च परमनोरथसंपादनेन सफलं पुरुषभावमनुभवत आगता मदनत्रयोदशी। भणितश्चैष नगरीमहद्भिः 'निःसारय रथवरम्'। धरणेन भणितम्–अलं बालक्रीडया। प्रशंसितो नगरीमहद्भिः ॥

अतिक्रान्तश्च तस्य कोऽपि कालः परार्थसंपादनसुखमनुभवतः। नियोजितप्रायं च तेन निजभुजोपार्जितं द्रविणजातम्। समुत्पन्ना च तस्य चिन्ता। अवश्यमेव पुरुषेणोत्तमकुलप्रसूतेन त्रिवर्गः सेवितव्यः। तद् यथा–धर्मोऽर्थः कामश्च। तत्रापरित्यक्तसर्वसङ्गेन अर्थप्रधानेन भवितव्यमिति तत एव तस्य द्वौ संपद्येते। तद् यथा–धर्मश्च कामश्च। अन्यच्च–एषोऽर्थो नाम महद् देवतारूपम्। एष खलु पुरुषस्य

एसो खु पुरिसस्स बहुमाणं वड्ढावेइ[1], गोरवं जणेइ, महग्घयं उप्पाएइ, सोहग्गं करेइ, छायामावहइ, कुलं पयासेइ, रूवं पयासेइ, बुद्धिं पयासेइ । अत्थवन्तो हि पुरिसा अदेन्ता वि लोयाणं सलाहणिज्जा हवन्ति । जं चेव करेन्ति, तं चेव तेसिं असोहणं पि सोहणं वणिज्जए । अभग्गपणइपत्थणं च अणुहवन्ति परत्थसंपायणसुहं । ता जइ वि एस मह पुव्वपुरिसोवज्जिओ अइपभूओ अत्थि, तहावि अलं तेण गुरुपणइणिसमाणेण । ता अन्नं उवज्जिणेमि[2], गच्छामि दिसावणिज्जेणं ति । चिन्तिऊण विन्नत्ता जणणिजणया । अणुमन्निओ य णेहिं गओ महया सत्थेणं समहिलिओ पुव्वसमुद्दतडनिविट्ठं वेजयन्तिं नाम नयरिं । दिट्ठो नरवई । बहुमन्निओ य णेणं । निओइयं भण्डं, न समासाइओ इट्ठलाभो[3] । चिन्तियं च णेण । समागओ चेव जलनिहितडं । ता गच्छामि ताव परतीरं । तत्थ मे गयस्स कयाइ अहिलसियपओयणसिद्धी भविस्सइ त्ति । गहियं परतीरगामियं भण्डं । संजत्तियं पवहणं । पसत्थतिहिकरणजोगेण निग्गओ नयरीओ, गओ

बहुमानं वर्धयति, गौरवं जनयति, महार्घ्यतामुत्पादयति, सौभाग्यं करोति, छायामावहति, कुलं प्रकाशयति, रूपं प्रकाशयति, बुद्धिं प्रकाशयति । अर्थवन्तो हि पुरुषा अददतोऽपि लोकानां श्लाघनीया भवन्ति । यदेव कुर्वन्ति तदेव तेषामशोभनमपि शोभनं वर्ण्यते, अभग्नप्रणयिप्रार्थनं चानुभवन्ति परार्थसंपादनसुखमिति । ततो यद्यपि एष मम पूर्वपुरुषोपार्जितोऽतिप्रभूतोऽस्ति, तथापि अलं तेन गुरुप्रणयिनीसमानेन । ततोऽन्यमुपार्जयामि, गच्छामि दिग्वाणिज्येनेति चिन्तयित्वा विज्ञप्तौ जननीजनकौ । अनुमतश्च ताभ्यां गतो महता सार्थेन समहिलः पूर्वसमुद्रतटनिविष्टां वैजयन्तीं नाम नगरीम् । दृष्टो नरपतिः । बहुमानितश्च तेन । नियोजितं (विक्रीतं) भाण्डम् , न समासादित इष्टलाभः । चिन्तितं च तेन-समागत एव जलनिधितटम् , ततो गच्छामि तावत्परतीरम् । तत्र मे गतस्य कदाचिदभिलषितप्रयोजनसिद्धिर्भविष्यतीति । गृहीतं परतीरगामिकं भाण्डम् । संयात्रितं प्रवहणम् । प्रशस्ततिथिकरणयोगेन निर्गतो नगर्याः, गतः

---

१ वड्ढारेइ क । २ उवज्जिणामि क । ३ इट्ठलाहो क ।

समुद्दतीरं, पूइओ अत्थिजणो, अग्घिओ जलनिही । तओ वन्दिऊण गुरुदेवए उवारूढो जाणवत्तं । आगड्ढियाओ वेगहारिणीओ सिलाओ, पूरिओ सियवडो, विमुक्कं जाणवत्तं, गम्मए चीणदीवं ति ॥

अन्नया य अइक्कन्तेसु कइवयदिणेसु कुसलपुरिसविमुक्के विय नाराए वहन्ते जाणवत्ते गयणयलमज्झसंट्ठिए दिणयरंमि आगम्पयन्तो विय मेइणिं धुणन्तो विय समुद्दं उम्मूलन्तो विय कुलसेलजालाणि पयट्टो मारुओ। तओ एरावणो विय गुलुगुलेन्तो पडिसोत्तवाहिय[1]सरियामुहं खुहिओ महण्णवो, विसण्णा निज्जामगा । तओ समं गमणारम्भेण ओसारिओ सियवडो, जीवियासा विय विमुक्का नङ्गरसिला निज्जामएहिं । तहावि य [2]तत्थ कञ्चि वेलं गमेऊण विवन्नं जाणवत्तं । जीवियसेसयाए समासाइयं [3]फलगं, अहोरत्तेण लङ्घिऊण जलनिहिं सुवण्णदीवंमि लग्गो सत्थवाहपुत्तो । चिन्तियं च णेणं । अहो परिणई [4]दइव्वस्स । न याणामि अवत्थं पिययमाए परियणस्स

समुद्रतीरम् , पूजितोऽर्थिजनः, अर्घितो जलनिधिः । ततो वन्दित्वा गुरुदैवतान् उपारूढो यानपात्रम् । आकृष्टा वेगहारिण्यः शिलाः, पूरितः सितपटः, विमुक्तं यानपात्रम् , गम्यते चीनद्वीपमिति ।

अन्यदा चातिक्रान्तेषु कतिपयदिनेषु कुशलपुरुषविमुक्ते इव नाराचे वहति यानपात्रे गगनतलमध्यसंस्थिते दिनकरे आकम्पयन्निव मेदिनीं धूनयन्निव समुद्रम् उन्मूलयन्निव कुलशैलजालानि प्रवृत्तो मारुतः । तत ऐरावण इव गुलुगुलायमानः प्रतिस्रोतोवाहितसरिन्मुखं क्षुब्धो महार्णवः, विषण्णा निर्यामकाः । ततः समं गमनारम्भेणापसारितः सितपटः, जीविताशेव विमुक्ता नाङ्गरशिला निर्यामकैः ।

तथापि च तत्र काञ्चिद् वेलां गमयित्वा विपन्नं यानपात्रम् । जीवितशेषतया समासादितं फलकम् , अहोरात्रेण लङ्घित्वा जलनिधिं सुवर्णद्वीपे लग्नः सार्थवाहपुत्रः । चिन्तितं च तेन-अहो परिणतिर्दैवस्य, न जानाम्यवस्थां प्रियतमायाः परिजनस्य च । अथवा किं

---

[1] -सरिहा० ख । [2] 'पडिसुत्तवाहिणीए' इत्यधिकः क । [3] फलयं क । [4] देवस्स ख ।

य । अहवा किं विसाएणं । एसो चेव एत्थ पमाणं ति । तओ कयलफलेहिं संपाइया पाणवित्ती । अत्थमिओ सूरिओ । कओ णेण पल्लवसत्थरो, सीयावणयणत्थं[1] च अरणीपओएण पाडिओ जलणो । तप्पिऊण[2] कंचि कालं पणमिऊण गुरुदेवए य पसुत्तो एसो । अइक्कन्ता रयणी, विउद्धो य । उग्गओ अंसुमाली । दिट्ठं च णेण तं जलणच्छिक्कं सव्वमेव सुवण्णीहूयं धरणिखण्डं[3] । चिन्तियं च णेण । अहो एयं खु धाउखेत्तं; ता पाडेमि एत्थ सुवण्णयं ति । कयाओ ईट्टयाओ[4], अङ्कियाओ धरणनामएण, उल्लयाणं चेव संपाइया संपुडा, पक्का य सुवण्णमया[5] जाया । एवं च कया णेण दस ईट्टयसंपुडसहस्सा[6] । निवद्धो भिन्नपोयद्धओ ॥

इओ य चीणाओ चेव सुवयणसत्थवाहपुत्तसन्तियं असारभण्डभरियं अन्नदीवलग्गसंपावियलच्छिसहियं देवउरगामियं समागयं तमुद्देसं जाणवत्तं । दिट्ठो य भिन्नपोयद्धओ सत्थवाहेणं । लम्बिया य नङ्गरा सुवयणाएसेण । समागया निज्जामगा । दिट्ठो य णेहिं

विषादेन। एष एवात्र प्रमाणमिति। ततः कदलफलैः संपादिता प्राणवृत्तिः। अस्तमितः सूर्यः। कृतस्तेन पल्लवस्रस्तरः, शीतापनयनार्थं चारणिप्रयोगेण पातितो ज्वलनः। तप्त्वा कञ्चित्कालं प्रणम्य गुरुदैवतांश्च प्रसुप्त एषः। अतिक्रान्ता रजनी, विबुद्धश्च। उद्गतोऽंशुमाली। दृष्टं च तेन तद् ज्वलनस्पृष्टं सर्वमेव सुवर्णीभूतं धरणीखण्डम्। चिन्तितं च तेन-अहो एतत्खलु धातुक्षेत्रम्, ततः पातयाम्यत्र सुवर्णकमिति। कृता इष्टकाः, अङ्किता धरणनामकेन, आर्द्रकाणामेव संपादिताः संपुटाः, पक्वाश्च सुवर्णमया जाताः। एवं च कृतानि तेन दश इष्टकासंपुटसहस्राणि। निवद्धो भिन्नपोतध्वजः॥

इतश्च चीनादेव सुवदनसार्थवाहपुत्रसत्कमसारभाण्डभृतमन्यद्वीपलग्नसंप्राप्तलक्ष्मीसहितं देवपुरगामिकं समागतं तमुद्देशं यानपात्रम्। दृष्टश्च भिन्नपोतध्वजः सार्थवाहेन। लम्बिताश्च नाङ्गराः सुवदनादेशेन। समागता निर्यामकाः। दृष्टश्च तैर्धरणो भणितश्च। भो

१-वणयत्थं ख। २ वीसमिऊण ख। ३ धरणितलं क। ४ इट्टगाओ क, इड्डगाओ ख। ५ 'महया कट्ठसिणीए' इत्यधिकः क। ६ इट्टय० क।

धरणो भणिओ य। भो भो महापुरिस, एसो चीणवत्थव्वगो देवउरगामी जाणवत्तसंठिओ सुवयणो नाम सत्थवाहपुत्तो भणइ, जहा एहि; कूलं गच्छम्ह। धरणेण भणियं। भद्द, किंभण्डभरियं खु तं जाणवत्तं। [1]निज्जामएहिं भणियं। अज्ज, विहिवसेण परिवडिओ खु एसो सत्थवाहपुत्तो विहवेण, न उण पोरुसेणं। ता न सुट्ठु सारभण्डभरियं ति। धरणेण भणियं। जइ एवं, ता अणुवरोहेणं आगच्छउ [2]एत्तियं भूमिं सत्थवाहपुत्तो। निवेइयं सुवयणस्स। आगओ य एसो, भणिओ धरणेण। सत्थवाहपुत्त, न तए कुप्पियव्वं, पओयणं उद्दिसिऊण किंचि[3] पुच्छामि त्ति। सुवयणेण भणियं। भणाउ अज्जो। धरणेण भणियं। [4]केत्तियस्स ते दविणजायस्स जाणवत्तंमि रित्थं। सुवयणेण भणियं। अज्ज, देव्वस्स पडिकूलयाए वि[5]णट्ठो खु अहयं। तहावि 'पुरिसयारो न मोत्तव्वो' त्ति उच्छाहमेत्तभण्डमोल्लो सुवण्णसहस्समेत्तस्स घेत्तूण किंपि भण्डं देवउरं पयट्टो म्हि। धरणेण भणियं। जइ एवं, ता परिच्चय तं भण्डं, भरेहि मे सन्तियस्स सुवण्णस्स

भो महापुरुष! एष चीनवास्तव्यो देवपुरगामी यानपात्रसंस्थितः सुवदनो नाम सार्थवाहपुत्रो भणति, यथा एहि, कूलं गच्छामः। धरणेन भणितम्–भद्र! किंभाण्डभृतं खलु तद् यानयात्रम्। निर्यामकैर्भणितम्–आर्य! विधिवशेन परिपतितः खल्वेष सार्थवाहपुत्रो विभवेन, न पुनः पौरुषेण। ततो न सुष्ठु सारभाण्डभृतमिति। धरणेन भणितम्–यद्येवं ततोऽनुपरोधेनागच्छतु एतावतीं भूमिं सार्थवाहपुत्रः। निवेदितं सुवदनस्य। आगतश्चैषः, भणितो धरणेन। सार्थवाहपुत्र! न त्वया कुपितव्यम्, प्रयोजनमुद्दिश्य किंचित् पृच्छामीति। सुवदनेन भणितम्–भणत्वार्यः। धरणेन भणितम्–कियतस्ते द्रविजातस्य यानपात्रे रिक्थम्। सुवदनेन भणितम्–आर्य! दैवस्य प्रतिकूलतया विनष्टः खल्वहम्। तथापि 'पुरुषकारो न मोक्तव्यः' इति उत्साहमात्रभाण्डमूल्यः सुवर्णसहस्रमात्रस्य गृहीत्वा किमपि भाण्डं देवपुरं प्रवृत्तोऽस्मि। धरणेन भणितम्–यद्येवं ततः परित्यज भाण्डम्, विभृहि मे एतकस्य सुवर्णस्य यानपात्रम्, कूलप्राप्तस्य च भवतो

---

१ निज्जामएण क। २ इत्तियं क। ३ किंपि क। ४ कित्तियस्स क। ५ णट्ठो क।

जाणवत्तं; कूलपत्तस्स य भवओ पयच्छिस्सं सुवण्णलक्खं ति । सुवयणेण भणियं । किं सुवण्णलक्खेण, तुमं चेव बहुओ त्ति । उज्झियं पुव्वभण्डं । भरियं सुवण्णस्स । ठाविया संखा । उवारूढो धरणो । दिट्ठा य णेण लच्छी । परितुट्ठो एस हियएणं दूमिया य एसा । 'जाया महं एस' त्ति साहियं सुवयणस्स धरणेणं । आणन्दिओ एसो । पयट्टं जाणवत्तं । गयं पञ्चजोयणमेत्तं भूमिभागं ॥

एत्थन्तरंमि गयणयलचारिणी वेगागमणेणागम्पयन्ती समुद्दं अयालविज्जू विय असुहया लोयणाणं 'अरे रे दुट्ठसत्थवाहपुत्त, अकओवयारो अणणुजाणियं मए कहिं इमं मईयं दविणजायं गेण्हिऊण गच्छसि' त्ति भणमाणी सुवण्णदीवसामिणी समागया सुवण्णनामा वाणमंतरी । धरियं जाणवत्तं, भणियं च णाए । भो भो निज्जामया, अदाऊण पुरिसबलिं न एत्थ अत्थो घेप्पइ; ता पुरिसबलिं वा देह, अत्थं वा मुयह, वावाएमि वा अहयं ति ।[1] धरणेण चिन्तियं । अहो णु खलु मुयाविओ निययरित्थं सुवयणो, उवयारी य एसो

प्रदास्ये सुवर्णलक्षमिति । सुवदनेन भणितम्-किं सुवर्णलक्षेण, त्वमेव वहुक इति । उज्झितं पूर्वभाण्डम् । भृतं सुवर्णेन । स्थापिता संख्या । उपारुढो धरणः । दृष्टा च तेन लक्ष्मीः । परितुष्ट एष हृदयेन । दूना चैषा । 'जाया मम एषा' इति कथितं सुवदनस्य धरणेन । आनन्दित एषः । प्रवृत्तं यानपात्रम् । गतं पञ्चयोजनमात्रं भूमिभागम् ।

अत्रान्तरे गगनतलचारिणी वेगागमनेनाकम्पयन्ती समुद्रम्, अकालविद्युदिव असुखदा लोचनयोः 'अरेरे दुष्टसार्थवाहपुत्र ! अकृतोपचारोऽननुज्ञातं मया कुत्रेदं मदीयं द्रविणजातं गृहीत्वा गच्छसि' इति भणन्ती सुवर्णद्वीपस्वामिनी समागता सुवर्णानाम्नी वानव्यन्तरी । धृतं यानपात्रम्, भणितं चानया । भो भो निर्यामका ! अदत्त्वा पुरुषबलिं नात्र अर्थो गृह्यते, ततः पुरुषबलिं वा दत्त अर्थं वा मुञ्चत, व्यापादयामि वा अहमिति । [यद्येतेषामेकमपि न दत्त, ततोऽनर्थः, कृते च न तव भिनद्मि प्रवहणम्] धरणेन चिन्तितम्-अहो

---

[1] 'जइ एयाणं एक्कं पि न देह तओ अणत्थो, कए अ ण तुब्भ भिंदिमि वहणं' इत्यधिकः कपुस्तके, 'तुज्झ भिंदामि पवहणं' इति पाठस्तु गपुस्तके।

लच्छीसंपायणेण, एसा य एवं भणाइ । ता इमं एत्थ पत्तयालं, अहमेव पुरिसबली हवामि त्ति । चिन्तिऊण भणिया वाणमंतरी । भयवइ, अयाणमाणेण मए एवं ववसियं । ता पसीय । अहमेव एत्थ बलिपुरिसो; मं पडिच्छसु त्ति । तीए भणियं । जइ एवं, ता घत्तेहि अप्पाणयं समुद्दे, जेण ते वावाएमि त्ति । लच्छीए चिन्तियं । अणुग्गिहीया भयवईए । तओ धरणेण भणियं । [1]वयस्स सुवयण, पावियव्वा तए लच्छी मह गुरूणं ति । भणिऊण पवाहिओ अप्पा । विद्धो य णाए सूलेण, नीओ [2]सुवण्णदीवं । उवसन्ता वाणमंतरी । [3]पयट्टं जाणवत्तं देवउराहिमुहं ॥

एत्थन्तरंमि दिट्ठो य एसो कण्ठगयपाणो सुवेलाओ रयणदीवं पत्थिएणं हेमकुण्डलेणं, पच्चभिन्नाओ य णेण । पुव्वपरिचिया य सा हेमकुण्डलस्स वाणमंतरी । तओ 'हा किमेयमकज्जमणुचिट्ठियं' ति भणिऊण मोयाविओ वाणमंतरीओ । पुव्वभणिओसहिवलयवइयरेण

नु खलु मोचितो निजरिक्थं सुवदनः, उपकारी चैष लक्ष्मीसंपादनेन, एषा चैवं भणति । तत इदमत्र प्राप्तकालम्, अहमेव पुरुषबलिर्भवामि इति । चिन्तयित्वा भणिता वानव्यन्तरी । भगवति ! अजानता मयैवं व्यवसितम् । ततः प्रसीद । अहमेवात्र बलिपुरुषः, मां प्रतीच्छेति । तया भणितम्–यद्येवं ततः क्षिप आत्मानं समुद्रे, येन त्वां व्यापादयामीति । लक्ष्म्या चिन्तितम्–अनुगृहीता भगवत्या । ततो धरणेन भणितम्–वयस्य सुवदन ! प्रापयितव्या त्वया लक्ष्मीर्मम गुरूणामिति । भणित्वा प्रवाहित आत्मा । विद्धश्चानया शूलेन । नीतः सुवर्णद्वीपम् । उपशान्ता वानव्यन्तरी । प्रवृत्तं यानपात्रं देवपुराभिमुखम् ॥

अत्रान्तरे दृष्टश्चैष कण्ठगतप्राणः सुवेलाद् रत्नद्वीपं प्रस्थितेन हेमकुण्डलेन, प्रत्यभिज्ञातश्च तेन । पूर्वपरिचिता च सा हेमकुण्डलस्य वानव्यन्तरी । ततो 'हा किमेतदकार्यमनुष्ठितम्' इति भणित्वा मोचितो वानव्यन्तर्याः । पूर्वभणितौषधिवलयव्यतिकरेण कृतं तस्य व्रणकर्म ।

---

[1] वयंस क । [2] सुवण्णभूमिदीवं क । [3] मुक्कं जाणवत्तं, पयट्टं देवउराभिमुहं इति क ।

कयं से वणकम्मं। जीवियसेसेण य पन्नत्तो एसो पच्चभिन्नाओ य णेण हेमकुण्डलो। पुच्छिओ धरणेणं सिरिविजयवुत्तन्तो। साहिओ हेमकुण्डलेण, जहा जीविओ सो महाणुभावो त्ति। परितुट्ठो धरणो। हेमकुण्डलो य घेत्तूण धरणं पयट्टो रयणदीवं। पत्तो य [1]भुयङ्गगन्धव्वसुन्दरीजणारद्धमहुरगेयरवायड्ढियदिन्नावहाणनिच्चलट्ठियमयजूहं दरियवणकोलघोणाहिघायजज्जरियमहियलुच्छलियमुत्थाकसायसुरहिगन्धवासियदिसायक्कं [2]तीरतरुखुडियकुसुममयरन्दवासियासेसविमलजलदुल्ललियरायहंसाउलसरसहस्सक[3]लियं महल्लतरुसिहरावडियकुसुमनियरच्चियवित्थिण्ण[4]भूमिभागं उद्दामनागवल्लीनिवहसमालिङ्गियासेसपूगफलीसण्डं वियडघणसुरहिमन्दारमन्दिरारद्धविज्जाहरमिहुणरइसुहं दरियवणहत्थिपीवरकरायड्ढणभग्गसमुत्तुङ्गग[5]लन्तचन्दणवणं तीरासन्नट्ठियघणतमालतरुवीहिओहसियजलहिजलं तरुणतरुवियडमणहरालवालयजलसुहियविविहविहंगनियररवापूरिउद्देसं सिद्धविज्जाहरालमुत्तुङ्गरयणगिरिसणाहं दीवं नामेण रयणसारं ति।

१ काराविओ क। × तक्कुय (दे.) स्वजनः।

पिययमामाणकलिकेउभूयवियम्भियमलयाणिलो कुसुममहुमत्तभमिरभमरउलकयवमालो वियसियसहयाररेणुधूलिधूसरियनहयलो कुरुवयकुसुमामोयहरिसियमुद्धमहुयरिगणो सुइसुहसुव्वन्तचच्चरीतूरमहुरनिग्घोसो भवणङ्गणुब्बद्धविविहविडवहिण्डोलयाउलो, महुमहो व्व महुयररिञ्छोलिसामलच्छाओ लच्छिपडिवन्नवच्छो य, पसाहियवारविलयानिवहो व्व तिलउज्जलो जणियमयणपसरो य, मुणियपरमत्थजोइनाहो व्व अइमुत्तयालंकिओ दढमसोयचित्तो य, सुरासुरमहिज्जन्तदुद्धोयहि व्व वियम्भिय[1]सुरापरिमलो विइण्णभुवणलच्छी य ॥

अवि य

नलिणीए बद्धराओ त्ति जमि मुणिउं व दक्खिणदिसाए। विच्छुब्भइ दियसयरो मलयाणिलमुक्कनीसासं ॥

अन्यदा च समागतो वसन्तसमयः। स पुनरुद्दामकामिनीजनविजृम्भितमदनप्रसरो मधुरपरभृताशब्दवित्रासितपथिकजननिवहः प्रियतमामानकलिकेतुभूतविजृम्भितमलयानिलः कुसुममधुमत्तभ्रमद्भ्रमरकुलकृत+कलकलो विकसितसहकाररेणुधूलिधूसरितनभस्तलः कुरुबककुसुमामोदहृषितमुग्धमधुकरीगणः श्रुतिसुखश्रूयमाण*चर्चरीतूर्यमधुरनिर्घोषो भवनाङ्गणोद्बद्धविविधविटपहिन्दोलाकुलो मधुमथ इव मधुकरश्रेणि=श्यामलच्छायो लक्ष्मीप्रतिपन्नवक्षाश्च, प्रसाधितवारवनितानिवह इव तिलकोज्ज्वलो जनितमदनप्रसरश्च, ज्ञातपरमार्थयोगिनाथ इवातिमुक्तका(ता)लंकृतो दृढमशोकचित्र(त्त)श्च, सुरासुरमथ्यमानदुग्धोदधिरिव विजृम्भितसुरापरिमलो वितीर्णभुवनलक्ष्मीश्च ।

अपि च

नलिन्यां बद्धराग इति यस्मिन् ज्ञात्वेव दक्षिणदिशा। विक्षिप्यते दिवसकरो मलयानिलमुक्तनिःश्वासम् ॥

---

१ सुरहिपरि–क । + रोलो रावो वयलो हलवोलो कयलो वमालो य ॥ (पाइयलच्छी ४७) * चच्चरी (दे.) गाथकसमूहः। = ओली माला राई रिंछोली आवली पंती (पाइयलच्छी १०६)

वियसियपङ्कयनयणा जंमि य वोलेन्ति मन्थरं दियहा । उउसिरिदंसणसंभमपहरिसहीरन्तहियय व्व ॥
जंमि सहयारपरिमलखित्तो भरियावराहविणियत्तो । अन्दोलइ दोलासु व माणो गरुओ वि विलयाणं ॥
मुच्छानिमीलियच्छे जंमि य पहिए विसं[1]थुलोअल्लो । विसकुसुमाण व गन्धो पसरन्तो कुणइ बउलाणं ॥
[2]देट्ठुं नवमञ्जरिए चूए गुञ्जन्तभमरपरियरिए । जंमि अइमच्छरेण व धणियं फुट्टन्ति अङ्कोल्ला ॥
वज्जन्तभमरवंसं काइलकलसद्दबद्धसंगीयं । पवणधुयपल्लवकरं नच्चन्ति व जत्थ रण्णाइं ॥
जंमि य गयणविलग्गा सहन्ति पवियसियकुसुमपब्भारा । मयगयवइगहिओल्लोल्लसोल्लभारा इव पलासा ॥
जंमि य सहन्ति किंसुयकुसुमाइं [3]थलीण पवणपडियाइं । तक्खणसमागयाइं महुणा सह नहवयाइ व्व ॥

विकसितपङ्कजनयना यस्मिंश्च व्यतिक्रामन्ति मन्थरं(मन्दं दिवसाः । ऋतुश्रीदर्शनसंभ्रमप्रहर्षह्रियमाणहृदया इव ॥
यस्मिन् सहकारपरिमलक्षिप्तः +स्मृतापराधविनिवृत्तः । आन्दोलयति दोलास्विव मानो गुरुरपि वनितानाम् ॥
मूर्छानिमीलिताक्षान् यस्मिंश्च पथिकान् *विसंस्थुलपर्यस्तः । विषकुसुमानामिव गन्धः प्रसरन् करोति बकुलानाम् ॥
दृष्ट्वा नवमञ्जरीकान् चूतान् गुञ्जद्भ्रमरपरिकरितान् । यस्मिन्नतिमत्सरेणेव गाढं स्फुटन्ति अङ्कोठाः ॥
वाद्यमानभ्रमरवंशं कोकिलकलशब्दबद्धसंगीतम् । पवनधूतपल्लवकरं नृत्यन्तीव यत्रारण्यानि ॥
यस्मिंश्च गगनविलग्ना राजन्ते प्रविकसितकुसुमप्राग्भाराः । मृतगजपतिगृहीतार्द्रार्द्रमांसभारा इव पलाशाः ॥

---

[1] -थुलुव्विल्लो ख । [2] दट्ठूण व-क-ख । [3] थलीए क ।

+ भरियं लढियं सुमरिअं (पायलच्छी ५६४) * ओअल्ल (दे.) पर्यस्तः, विसंस्थुलो विषमः, पर्यस्तो क्षिप्तः ॥

जत्थ य पियन्ति तरुणा पवरमहुं कामिणीण अहरे[1] य। वट्टन्ति य खेड्डाइं सुरयाइं बहुवियारायाइं ॥

एवंगुणाहिरामे य पवत्ते वसन्तसमए सो सेणकुमारो कीलानिमित्तमेव विसेसुज्जलनेवच्छेण[2] संगओ परियणेणं पयट्टो अमरनन्दणं[3] उज्जाणं। दिट्ठो य पासायतलगएणं विसेणकुमारेणं निम्मलविचित्तदेवङ्गनिवसणो बहलहरियन्दणविलित्तदेहो विमलमाणिक्ककडयभूसियकरो पउमरायखचियकेऊरपडिवन्नबाहू भुवणसारकडिसुत्तउच्छइयकडियडो वच्छयलाभोयविरइयवररयणपालम्बो निम्मलकवोलघोलन्तसवणकुण्डलो विविहवररयणकलियमउडपसाहिउत्तिमङ्गो आरूढो धवलवारणं पवज्जमाणेणं वसन्तचच्चरीतूरेणं नच्चमाणेहिं किङ्करगणेहिं एरावणगओ विय तियसकुमारपरियरिओ देवराओ त्ति।

सन्तिमई वि य भूसियसहियणपरिवारिया विसालच्छी। पवरदुगुल्लनिवसणा चन्दणनिम्मज्जियसरीरा ॥

यस्मिंश्च राजन्ते किंशुककुसुमानि स्थलीनां पवनपतितानि। तत्क्षणसमागता मधुना सह नखव्रजा इव ॥

यत्र पिबन्ति तरुणाः प्रवरमधु कामिनीनामधरांश्च। वर्तंते खेलानि सुरतानि बहुविकाराणि ॥

एवंगुणाभिरामे च प्रवृत्ते वसन्तसमये स सेनकुमारः क्रीडानिमित्तमेव विशेषोज्ज्वलनेपथ्येन संगतः परिजनेन प्रवृत्तोऽमरनन्दनमुद्यानम्। दृष्टश्च प्रासादतलगतेन विषेणकुमारेण निर्मलविचित्रदेवाङ्गनिवसनो बहलहरिचन्दनविलिप्तदेहो विमलमाणिक्यकटकभूषितकरः पद्मरागखचितकेयूरप्रतिपन्नबाहुर्भुवनसारकटिसूत्रावच्छादितकटितटो वक्षःस्थलाभोगविरचितवररत्नप्रालम्बो निर्मलकपोल+भ्रमच्छ्रवणकुण्डलो विविधवररत्नकलितमुकुटप्रसाधितोत्तमाङ्ग आरूढो धवलवारणं प्रवाद्यमानेन वसन्तचर्चरीतूर्येण नृत्यद्भिः किंकरगणैरैरावणगत इव त्रिदशकुमारपरिकरितो देवराज इति।

---

१ अहरेण क। २ नेवत्थएण ख। ३ –नन्दणुज्जाणं क। + घोलिअढुंढुल्लियाइं भमिअत्थे (पायलच्छी ५२९).

नियकन्तिसच्छहेण य कुङ्कुमराएण पिञ्जरियदेहा । सुरहिबहुवण्णवण्णयकवोलकयपत्तलेहा य ॥
मणहररइयविसेसयविसेसभङ्गुरकयालयसणाहा । सविसेसपेच्छणिज्जा सोहियसंजमियधम्मेल्ला ॥
नेउररसणामणिवलयहारकुण्डलविभूसणेहिं च । पडिवन्नचलणतियहत्थकण्ठसवणा मियङ्कमुही ॥
धरियसिहिपिच्छविरइयकञ्चणमयदण्डसा[1]हुलिसमेया । बहुरयणभूसियं दन्तघडियजम्पाणमारूढा ॥

तओ तं दट्ठूण पुव्वकयकम्मगरुययाए समुप्पन्नो विसेणस्स मच्छरो, व[2]ड्ढियं अहमज्झाणं । चिन्तियं च णेणं । वावाएमि एयं दुरायारं । पउत्ता वावायगा । पत्तो य सेणकुमारो अमरणन्दणं उज्जाणं । तं पुण सुसिणिद्धपायवं उद्दाममाहवीलयालिङ्गियस[3]हयारं बउलतरुकुसुमसुरहिगन्धायड्ढियभमन्तभमरोलिमञ्जुगुञ्जियर[4]वावूरियदिसं महल्लपाडलाव[5]डियसुरहिकुसुमनियरपच्छाइयभूमिभागं, नवबहुवयणं

शान्तिमत्यपि च भूषितसखीजनपरिवृता विशालाक्षी । प्रवरदुकूलनिवसना चन्दननिर्मार्जित(उपलिप्त)शरीरा ॥
निजकान्तिसच्छायेन (सदृशेण) च कुंकुमरागेण पिञ्जरितदेहा । सुरभिबहुवर्णवर्णककपोलकृतपत्रलेखा च ॥
मनोहररचितविशेषकविशेषभङ्गुरकृतालकसनाथा । सविशेषप्रेक्षणीया शोभितसंयमितधम्मिला ॥
नूपुररसनामणिवलयहारकुण्डलविभूषणैश्च । प्रतिपन्नचरणत्रिकहस्तकण्ठश्रवणा मृगाङ्कमुखी ॥
धृतशिखिपिच्छविरचितकाञ्चनमयदण्ड*सखीसमेता । बहुरत्नभूषितं दन्तघटितजम्पानमारूढा ॥

ततस्तां दृष्ट्वा पूर्वकृतकर्मगुरुकतया समुत्पन्नो विषेणस्य मत्सरः, वृद्धमधमध्यानम् । चिन्तितं च तेन-व्यापादयाम्येतं दुराचारम् । प्रयुक्ता व्यापादकाः । प्राप्तश्च सेनकुमारोऽमरनन्दनमुद्यानम् । तत्पुनः सुस्निग्धपादपम्, उद्दाममाधवीलतालिङ्गितसहकारम्, बकुलतरु-

---

१–साहुल–क । २ वड्ढियं ख । ३–सहयारनियरं क । ४ -रवाऊरिय–ग । ५ –वड्ढिय-क । * साहुली (सखी.) ।

पिव तिलयउज्जलं असोयपल्लवकयावयंसयं च, माहवपणइणीसरीरं पिव दीहियाकमलोवसोहियं भमन्तमुहलालि[1]उलजालपरिगयं च, रिद्धिमन्तं पिव[2] सच्छायं सउणजणसेवियं च, नवजोव्वणं पिव उम्मायजणणं विलोहणिज्जं च, कामिणीपओहरजुयलं विय[3] परिमण्डलं चन्दणपण्डुरं च, वासहरं पिव[4] अणङ्गपणइणीए, संगमो विय उउलच्छीणं, कारणं पिव आणन्दभावस्स, सहोयरं पिव सुरलोयदेसाणं। तं च दट्ठूण [5]अब्भहियजायहरिसो ओइण्णो करिवराओ पविट्ठो अमरनन्दणं। पवत्तो [6]कीलिउं विचित्तकीलाहिं। परिणओ वासरो। पविट्ठो नयरिं। एवं च अइक्कन्ता कइवि दियहा।

अन्नया य नियभवणगयस्स चेव गयणयलमज्झसंठिए दिणयरंमि विरलीहूए परियणे नियनियनिओयवावडेसु निओयपुरिसेसु समागया तावसवेसधारिणो गहिय[7]नलियापओगखग्गा विसेणकुमारसन्तिया चत्तारि महाभुयङ्ग[8] त्ति। दिट्ठा सेणकुमारेण। भणियं च

कुसुमसुरभिगन्धाकृष्टभ्रमद्भ्रमरालिमञ्जुगुञ्जितरवापूरितदिशं महत्पाटलापतितसुरभिकुसुमनिकरप्रच्छादितभूमिभागम्, नववधूवदनमिव तिलकोज्ज्वलमशोकपल्लवकृतावतंसकं च, माधवप्रणयिनीशरीरमिव दीर्घिकाकमलोपशोभितं भ्रमन्मुखरालिकुलजालपरिगतं च, ऋद्धिमदिव सच्छायं शकुन(सगुण)जनसेवितं च, नवयौवनमिवोन्मादजननं विलोभनीयं च, कामिनीपयोधरयुगलमिव परिमण्डलं चन्दनपाण्डुरं च, वासगृहमिवानङ्गप्रणयिन्याः, संगम इव ऋतुलक्ष्मीनाम्, कारणमिवानन्दभावस्य, सहोदरमिव सुरलोकदेशानाम्। तच्च दृष्ट्वाऽभ्यधिकजातहर्षोऽवतीर्णः करिवरात् प्रविष्टोऽमरनन्दनम्। प्रवृत्तः क्रीडितुं विचित्रक्रीडाभिः। परिणतो वासरः। प्रविष्टो नगरीम्। एवं चातिक्रान्ताः कत्यपि दिवसाः।

अन्यदा च निजभवनगतस्यैव गगनतलमध्यसंस्थिते दिनकरे विरलीभूते परिजने निजनिजनियोगव्यापृतेषु नियोग(गि)पुरुषेषु समागताः

---

१ -लालिजाल-ख। २ विय ख। ३ पिव ग। ४ विय ख। ५ अहिय-क। ६ कीलिओ चित्तकीलाहिं क। ७ -णालिया-ख। ८ पडिहारिया पडिहारेण,

णेण ‘भो पविसह’ त्ति। पविट्ठा एए। सेणकुमारेण भणियं। भो किंनिमित्तमागया। तेहिं भणियं। अत्थि किंचि [1]गुरुनिदेसवत्तव्वं; ता विवित्तदेसम[2]हिट्ठह। तओ परत्थसंपायणसुद्धचित्तयाए ‘गुरुवच्छला तवस्सिणो, थेवो य न एत्थ दोसो’ त्ति चिन्तिऊण गओ भवणुज्जाणभूसणं एलालयावणं। तत्थ पुण तक्खणा चेव अवहडा से छुरिया, कड्ढियाइं [3]मण्डलग्गाइं, पहओ एगेण खन्धदेसे। तओ ‘हा किमेयं’ ति चिन्तिऊण आसुरुत्तो कुमारो वलिओ वामपासेण। तओ अचलिययाए सत्तस्स उक्कडयाए पुरिसयारस्स संखुद्धयाए वावायगाणं जेऊण ते गहियाइं मण्डलग्गाइं। दिट्ठं चिमं उज्जाणवालियाए। [4]घोसियं च णाए। ‘किमेयं’ ति उद्धाइओ कलयलो। समागया अट्ठ पाहरिया। कड्ढियाइं करवालाइं। उद्धाइया पहरिउं। निवारिया कुमारेण। हरे किमेएण मयमारणेणं। [5]खुद्दा खु एए तवस्सिया। वावन्नो य एएंमि पुरिसयारो। परिचत्ता एए सफलजीवियनिवासेणमहिमाणेणं। पडिवन्ना विसयभावं दयाए, अद्धासिया निरत्थयजी-

---

तापसवेषधारिणो गृहीतनलिकाप्रयोगखड्गा विषेणकुमारसत्काश्चत्वारो महाभुजङ्गा इति। दृष्टाः सेनकुमारेण। भणितं च तेन ‘भोः प्रविशत’ इति। प्रविष्टा पते। सेनकुमारेण भणितम्-भोः किंनिमित्तमागताः। तैर्भणितम्-अस्ति किञ्चिद् गुरुनिदेशवक्तव्यम्, ततो विविक्तदेशमधितिष्ठत। ततः परार्थसंपादनशुद्धचित्ततया ‘गुरुवत्सलाः तपस्विनः, स्तोकश्च नात्र दोषः’ इति चिन्तयित्वा गतो भवनोद्यानभूषणमेलालतावनम्। तत्र पुनः तत्क्षणादेवापहृता तस्य छुरिका, कृष्टानि मण्डलाग्राणि, प्रहत एकेन स्कन्धदेशे। ततो ‘हा किमेतद्’ इति चिन्तयित्वा आसुरुत्तो (अतिकुपितः) कुमारो वलितो वामपार्श्वेण। ततोऽचलिततया सत्त्वस्य उत्कटतया पुरुषकारस्य संक्षुब्धतया व्यापादकानां जित्वा तान् गृहीतानि मण्डलाग्राणि। दृष्टं चेदमुद्यानपालिकया। घोषितं चानया। ‘किमेतद्’ इति उद्धावितः (प्रसृतः) कलकलः। समागता अष्ट प्राहरिकाः। कृष्टानि करवालानि। उद्धाविताः प्रहर्तुम्। निवारिताः कुमारेण। अरे! किमेतेन मृतमारणेन।

पविट्ठा कुमाराणुन्नाया क। [1]–णिएस–क। [2] –महिट्ठाह ख। [3] नालियामंडलग्गाइं क। [4] भणियं क। [5] खुद्दा क।

यलोहेण। ता अलमेएसिं वावायणेणं। एत्थन्तरंमि इमं चेव वइयरमायण्णिऊण समागओ राया। बन्धाविया णेण वावायगा। भणिओ य कुमारसेणो 'वच्छ, किमेयं' ति। तेण भणियं 'ताय, न–याणामि'। पुच्छिया घायगा। हरे, किं पुण तुब्भेहिं एयं ववसियं ति। तेहिं भणियं। देव्वं पुच्छह त्ति। राइणा भणियं। केण देव्वो चोइओ। तेहिं भणियं। देव, न याणामो त्ति। राइणा भणियं। नाणिमित्तं वावायणं ति। ता किं पुण निमित्तं, कुओ वा तुब्भे, कस्स वा सन्तिय त्ति। तओ न जंपियमेएहिं। पुणो पुच्छिया, पुणो वि न जंपन्ति। कुविओ राया। अच्छोडाविया कसेहिं। तओ कायरयाए भावस्स दुव्विसहयाए कसप्पहाराणं[1] सावेक्खयाए जीवियस्स[2] कुविययाए नरिन्दस्स जंपियमणेहिं। देव, न किंचि एत्थ निमित्तं; अवि य एत्थेव अम्हे कुमारविसेणसन्तिया, तस्सेव सासणेणं इमं अम्हेहिं ववसियं। संपयं[3] देवो पमाणं ति। कहं कुमारविसेणसासणं ति कुविओ राया विसेणस्स। भणियं च सेणेण। ताय, न खलु

क्षुब्धाः(द्राः) खल्वेते तपस्विकाः। व्यापन्नश्चैतेषां पुरुषकारः। परित्यक्ता एते सफलजीवितनिवासेनाभिमानेन। प्रतिपन्ना विषयभावं दयायाः, अध्यासिता निरर्थकजीवितलोभेन। ततोऽलमेतेषां व्यापादनेन। अत्रान्तरे इमं चैव व्यतिकरमाकर्ण्य समागतो राजा। बन्धितास्तेन व्यापादकाः। भणितश्च कुमारसेनः 'वत्स! किमेतद्' इति। तेन भणितम्–'तात! न जानामि'। पृष्टा घातकाः-अरे! किं पुनर्युष्माभिरेतद् व्यवसितमिति। तैर्भणितम्–दैवं पृच्छतेति। राज्ञा भणितम्–केन दैवश्चोदितः। तैर्भणितम्–देव! न जानीम इति। राज्ञा भणितम्–नानिमित्तं व्यापादनमिति। ततः किं पुनर्निमित्तम्, कुतो वा यूयम्, कस्य वा सत्का इति। ततो न जल्पितमेतैः। पुनः पृष्टाः पुनरपि न जल्पन्ति। कुपितो राजा। आच्छोटिताः कषैः। ततः कातरतया भावस्य दुर्विषहतया कषप्रहाराणां सापेक्षतया जीवितस्य कुपिततया नरेन्द्रस्य जल्पितमेभिः। देव! न किञ्चिदत्र निमित्तम्, अपि चात्रैव वयं कुमारविषेणसत्काः, तस्यैव शासनेनेदमस्माभिर्व्यवसितम्,

---

१ कसाघायाणं क। २ जीवियाए ग। ३ संपइ क।

इमं एवं चेवावगन्तव्वं ति। कहं पुण सो महाणुभावो अमच्छरिओ सयणवग्गे दइओ साहुवाए लोलुओ निम्मलजसे अवच्चं तायस्स इमं ईइसं उभयलोयविरुद्धं मन्तइस्सइ। ता जहा कहंचि जीवियभीरुययाए इमं जंपियमिमेहिं। करेउ ताओ पसायं, मोयावेउ एए जीवियभीरुए त्ति। तओ 'कस्स सन्तिय' त्ति गवेसावियं राइणा। सुणियं पहाणपरियणाओ, जहा कुमारसन्तिय त्ति। तओ 'न अन्नहा एयं' ति कुविओ राया विसेणस्स। समाणत्तं च णेणं। हरे, निव्वासेह तं मम रज्जाओ कुलदूसणं विसेणं ति। वावाएह एए महासामिसालवच्छले सुभिच्चे। एत्थन्तरंमि चलणेसु निवडिऊण जंपियं सेणेण। ताय, मा साहसं मा साहसं ति। [1]कज्जमाणे य एयंमि पावेमि अहं नियमेणं तायसोगकारिणिं अवत्थं ति निवेइयं तायस्स। तओ 'अहो पुरिसाणमन्तरं' ति चिन्तिऊण जंपियं नरिन्देण। वच्छ, जइ एवं, ता तुमं चेव जाणसि; न [2]उण जुत्तमेयं ति। सेणेण भणियं। ताय, अणुग्गहिओ म्हि एएसिं अवावायणेण कुमार-

साम्प्रतं देवः प्रमाणमिति। 'कथं कुमारविषेणशासनम्' इति कुपितो राजा विषेणस्य। भणितं च सेनेन–तात! न खल्विदमेवमेवावगन्तव्यमिति। कथं पुनः स महानुभावोऽमत्सरिकः स्वजनवर्गे दयितः साधुवादे लोलुपो निर्मलयशसि अपत्यं तातस्येदमीदृशमुभयलोकविरुद्धं मन्त्रयिष्यति। ततो यथाकथंचिज्जीवितभीरुकतयेदं जल्पितमेभिः। करोतु तातः प्रसादम्, मोचयत्वेतान् जीवितभीरुकानिति। ततः 'कस्य सत्काः' इति गवेषितं राज्ञा। ज्ञातं प्रधानपरिजनाद् यथा कुमारसत्का इति। ततो 'नान्यथैतद्' इति कुपितो राजा विषेणस्य। समाज्ञप्तं च तेन–अरे निर्वासयत तं मम राज्यात् कुलदूषणं विषेणमिति। व्यापादयतैतान् महास्वामिसालवत्सलान् सुभृत्यान्। अत्रान्तरे चरणयोर्निपत्य जल्पितं सेनेन–तात! मा साहसं मा साहसमिति। क्रियमाणे चैतस्मिन् प्राप्नोम्यहं नियमेन तातशोककारिणीमवस्थामिति निवेदितं तातस्य। ततोऽहो पुरुषाणामन्तरमिति चिन्तयित्वा जल्पितं नरेन्द्रेण। वत्स! यद्येवं ततस्त्वमेव जानासि, न

---

१ किज्जमाणे क। २ वुण क-ख

संगहेण य। मोयाविया वावायगा[1] थेवावराह त्ति। पूइऊण पेसिया सेणेण। एत्थन्तरंमि वणसुत्थमाइसिऊण निग्गओ राया। जाओ लोयवाओ। अहो विसेणेण असोहणमणुचिट्ठियं। समागओ सेणकुमारकण्णविसयं। चिन्तियं च णेण। अहो निरवराहा वि नाम पाणिणो एवं अयसभायणं हवन्ति। अन्नहा कहं कुमारो, कहमीइसमसज्जणचरियं। असंभावणीयमेयं। निरङ्कुसो य लोओ, न जुत्ताजुत्तं वियारेइ। अहवा नत्थि दोसो जणस्स कुमारस्स चेव पुव्वकयकम्मपरिणई एस त्ति। निमित्तं चाहमेत्थं ति दूमिओ निययचित्तेणं।

अइक्कन्ता कइवि वासरा। पउणो वणो। ण्हाओ सोहणदिणे। कयं राइणा जहोचियं करणिज्जं। वायाविया चारयकालघण्टा। दवावियं महादाणं। पूइयाओ नयरि[2]देवयाओ। आहणाविया आणन्दभेरी। समागया[3] विसेसुज्जलनेवत्थ[4]धारिणो रायनायरा। तओ वज्जन्तमङ्गलतूररवावूरियदिसामण्डलं नच्चन्तरायनायरलोयं तूरियविइज्जमाणकडिसुत्तकण्ठयं विइण्णपडवासधूसरियनहयलं सयलनयरिजण-

पुनर्युक्तमेतदिति। सेनेन भणितम्–तात! अनुगृहीतोऽस्मि एतेषामव्यापादनेन कुमारसंग्रहेण च। मोचिता व्यापादकाः स्तोकापराधा इति। पूजयित्वा प्रेषिता सेनेन। अत्रान्तरे व्रणसुस्थमादिश्य निर्गतो राजा। जातो लोकवादः। अहो विषेणेनाशोभनमनुष्ठितम्। समागतः सेनकुमारकर्णविषयम्। चिन्तितं च तेन–अहो निरपराधा अपि नाम प्राणिन एवमयशोभाजनं भवन्ति। अन्यथा कथं कुमारः, कथमीदृशमसज्जनचरितम्। असम्भावनीयमेतद्। निरंकुशश्च लोकः, न युक्तायुक्तं विचारयति। अथवा नास्ति दोषो जनस्य, कुमारस्यैव पूर्वकृतकर्मपरिणतिरेषेति। निमित्तं चाहमत्रेति दूनो निजचित्तेन।

अतिक्रान्ताः कत्यपि वासराः। प्रगुणो व्रणः। स्नातः शोभनदिवसे। कृतं राज्ञा यथोचितं करणीयम्। वादिता चारककालघण्टा। दापितं महादानम्। पूजिता नगरीदेवताः। आघातिता आनन्दभेरी। समागता विशेषोज्ज्वलनेपथ्यधारिणो राजनागरकाः। ततो वाद्य-

---

[1] घायगा क–ख। [2] नयर–क। [3] आगया क। [4] नेवच्छ ख।

च्छेरयभूयं कयं वद्धावणयं ति ॥ इओ य सो विसेणकुमारो [1]तप्पभिइमेव 'हा न संपन्नमहिलसियं' ति अच्चन्तदुम्मणो अपेच्छमाणो नरवइं असंपाययन्तो उचियकरणिज्जं अणिग्गच्छमाणो निययगेहाओ अजंपमाणो सह परियणेणं ठिओ एत्तिए दिवसे, नागओ य वद्धावणए। सुणिओ एस वइयरो [2]धणगुणभण्डारियाओ सेणकुमारेण। चिन्तियं च णेण। जुत्तमेवं एयं कुमारस्स। दुस्सहो असन्ताभिओगो। मह सिणेहमोहिएण य दारुणमणुचिट्ठियं ताएणं, जमेत्तियं पि कालं कुमारदंसणं परिहरियं ति। ता विन्नवेमि तायं, जेण कुमारं इह आणेइ त्ति। कीइसो तेण विणा आणन्दो। तओ चलणेसु निवडिऊण विन्नत्तो नरवई। ताय, आणेह इह विसेण[3]कुमारं। तद्दंसणूसुओ अहं। कीइसो तेण विणा पमोओ। राइणा भणियं। वच्छ, अलं तेण कुलदूसणेणं। कुमारेण भणियं। ताय, परिच्चय इमं मिच्छावियप्पं। कहं कुमारो अकज्जमणु[4]चिट्ठिस्सइ त्ति। राइणा भणियं। सुद्धसहावो तुमं, न [5]उण सो एरिसो त्ति। कुमारेण भणियं। ताय, कहं

मानमङ्गलतूर्यरवापूरितदिग्मण्डलं नृत्यद्राजनागरलोकं त्वरितवितीर्यमाणकटिसूत्रकण्ठकं वितीर्णपटवासधूसरितनभस्तलं सकलनगरीजनाश्चर्यभूतं कृतं वर्धापनकमिति। इतश्च स विषेणकुमारस्तत्प्रभृत्येव 'हा न सम्पन्नमभिलषितम्' इत्यत्यन्तदुर्मना अप्रेक्षमाणो नरपतिमसम्पादयन् उचितकरणीयमनिर्गच्छन् निजगेहाद् अजल्पन् सह परिजनेन स्थित एतावतो दिवसान्, नागतश्च वर्धापनके। श्रुत एष व्यतिकरो धनगुणभाण्डागारिकात् सेनकुमारेण। चिन्तितं च तेन-युक्तमेवैतत्कुमारस्य। दुःसहोऽसदभियोगः। मम स्नेहमोहितेन च दारुणमनुष्ठितं तातेन यदेतावन्तमपि कालं कुमारदर्शनं परिहृतमिति। ततो विज्ञपयामि तातं येन कुमारमिहानयतीति। कीदृशस्तेन विनाऽऽनन्दः। ततश्चरणयोर्निपत्य विज्ञप्तो नरपतिः। तात ! आनयतेह विषेणकुमारम्। तद्दर्शनोत्सुकोऽहम्। कीदृशस्तेन विना प्रमोदः। राज्ञा भणितम्-वत्स ! अलं तेन कुलदूषणेन। कुमारेण भणितम्-तात ! परित्यजेमं मिथ्याविकल्पम्। कथं कुमारोऽकार्यमनुष्ठास्यतीति। राज्ञा

---

१ तयप्पभिइ-क, तप्पभूइ-ख। २ धणुगुण-क। ३ कुमारं ति क। ४-स्सं ति ख। ५ वुण क-ख।

न ईइसो जो इमीए वयणिज्जलज्जाए उज्झिऊण कुमारभावोचियं [1]चावल्लं अवलम्बिऊण गम्भीरयं अपसायमन्ते वि य [2]तुमंमि [3]असंपाययन्तो उचियकरणिज्जं अपरिच्चयन्तो कुलहरं एवं चिट्ठइ त्ति। राइणा भणियं। वच्छ, जइ एवं [4]तुज्झ निब्बन्धो, ता पेसेहि से आहव्वणनिमित्तं कंचि निययं ति। कुमारेण भणियं। ताय, अहमेव गच्छामि। राइणा भणियं। एवं करेहि त्ति। गओ सेणकुमारो। पविट्ठो विसेणमन्दिरं। [5]दिट्ठो तव्वइयरचिन्ताए चेव अच्चन्तदुब्बलो उज्झिएहिं आहरणएहिं परिमिलाणेणं वयणकमलेणं विमणपरियणसमेओ असुन्दरं सयणीयमुवगओ विसेणकुमारो त्ति। चिन्तियं च णेणं। अहो सच्चयमिणं।

सन्तगुणविप्पणासे असन्तदोसुब्भवे य जं दुक्खं। तं सोसेइ समुद्दं किं पुण हिययं मणुस्साणं॥

अन्नहा कहं कुमारस्स ईइसी अवत्थ त्ति। उवसप्पिऊण भणियं च णेणं। कुमार, किमेयं बालचेट्ठियं। तेण भणियं। पावपरिणइं

भणितम्–शुद्धस्वभावस्त्वम्, न पुनः स ईदृश इति। कुमारेण भणितम्–तात! कथं नेदृशो योऽनया वचनीयलज्जया उज्झित्वा कुमारभावोचितं चापलमवलम्ब्य गम्भीरतामप्रसादवत्यपि त्वयि असंपादयन् उचितकरणीयमपरित्यजन् कुलगृहमेवं तिष्ठतीति। राज्ञा भणितम्–वत्स! यद्येवं तव निर्बन्धस्ततः प्रेषय तस्याह्वाननिमित्तं कञ्चिद् निजकमिति। कुमारेण भणितम्–तात! अहमेव गच्छामि। राज्ञा भणितम्–एवं कुर्विति। गतः सेनकुमारः। प्रविष्टो विषेणमन्दिरम्। दृष्टस्तद्व्यतिकरचिन्तयैवात्यन्तदुर्बल उज्झितैराभरणैः परिम्लानेन वदनकमलेन विमनःपरिजनसमेतोऽसुन्दरं शयनीयमुपगतो विषेणकुमार इति। चिन्तितं च तेन–अहो सत्यमिदम्—

सद्गुणविप्रणाशे असद्दोषोद्भवे च यद् दुःखम्। तच्छोषयति समुद्रं किं पुनर्हृदयं मनुष्याणाम्॥

अन्यथा कथं कुमारस्येदृश्यवस्थेति। उपसर्प्य भणितं च तेन–कुमार! किमेतद् बालचेष्टितम्। तेन भणितम्–पापपरिणतिं मे पृच्छ।

---

१ चावलं क। २ तुमे त्ति क। ३ –यन्तुचिय क। ४ तुब्भ ख। ५ दिट्ठो य णेणं क।

मे पुच्छसु। सेणकुमारेण भणियं। अलं पावचिन्ताए। धन्नो तुमं, जेण तायस्स पुत्तो त्ति। ता करेहि रायकुमारोचियं किरियं, जेण तायसमीवं गच्छामो त्ति। तओ अणिच्छमाणो वि[1]भूसिओ सहत्थेण, विलित्तो मलयचन्दणरसेण, परिहाविओ खोमजुवलयं, गेण्हाविओ तम्बोलं नीओ नरवइसमीवं। पाडिओ चलणेसु। वोलियं वद्धावणयं। अइक्कन्तो कोइ कालो वीसम्भगब्भिणं परमसुहमणुहवन्तस्स सेणकुमारस्स, संकिलिट्ठचित्तस्स य अणभिन्नसुहसरूवस्स विसेणस्स।

अन्नया य पवत्ते कोमुइ[2]महूसवे उज्जाणगएसु नायरएसु निग्गए नरवइंमि भरमुवगए कीलापमोए अप्पतक्किओ चेव वियरिओ मत्तवारणो, तोडियाओ अन्दुयाओ, दलिओ आलाणखम्भो, भग्गा महापायवा, [3]गालिओ आहोरणो, धाविओ जणवयाभिमुहं, उद्धाइओ कलयलो, भिन्नाइं आवाणयाइं, पणट्ठाओ चच्चरीओ, 'हा कहमियं' ति विसण्णो नयरिलोओ। एत्थन्तरंमि [4]इमं चेवावगच्छिय

सेनकुमारेण भणितम्–अलं पापचिन्तया। धन्यस्त्वं येन तातस्य पुत्र इति। ततः कुरु राजकुमारोचितां क्रियाम्, येन तातसमीपं गच्छाव इति। ततोऽनिच्छन् विभूषितः स्वहस्तेन, विलिप्तो मलयचन्दनरसेन, परिधापितः क्षौमयुगलं, ग्राहितस्ताम्बूलं, नीतो नरपतिसमीपम्। पातितश्चरणयोः। व्यतिक्रान्तं वर्धापनकम्। अतिक्रान्तः कोऽपि कालो विश्रम्भगर्भितं परमसुखमनुभवतः सेनकुमारस्य, संक्लिष्टचित्तस्य च अनभिज्ञ(ज्ञात)सुखस्वरूपस्य विषेणस्य।

अन्यदा च प्रवृत्ते कौमुदीमहोत्सवे उद्यानगतेषु नागरकेषु निर्गते नरपतौ भरमुपगते क्रीडाप्रमोदे अप्रतर्कित एव विचरितो मत्तवारणः। त्रोटिता अन्दुकाः (शृङ्खलाः), दलित आलानस्तम्भः, भग्ना महापादपाः, गलित (पातितः) आधोरणः, धावितो जनव्रजाभिमुखम्, उद्धावितः [प्रसृतः] कलकलः, भिन्नान्यापणानि, पनष्टाश्चर्चर्यः, 'हा कथमिदम्' इति विषण्णो नगरीलोकः। अत्रान्तरे इदं चैवावगत्य

---

[1] विहूसिओ ख। [2] –महे। [3] गाहिओ आरोहणो क। [4] सयं इमं क।

जंपियं नरिन्देण। हरे गेण्हह लहु दुट्ठवारणं, कयत्थिओ णेणं लोओ त्ति। तओ गहणूसुओ वि नरवइ[1]अणाएसभीरू आएससमणन्तरमेव पुलोइज्जमाणो भयविब्भमाहियविभूसियाहिं पुरसुन्दरीहिं धाविओ सेणकुमारो। सीहकिसोरओ विय दिट्ठो मत्तवारणेणं। तं च दट्ठूण अचिन्तणीययाए पुरिससामत्थस्स वियलिओ से मओ। निरुद्धमणेण गमणं। चित्तगओ विय ठिओ पयइभावे। अहो कुमारस्स सामत्थं ति विम्हिया नायरया, हरिसियाओ पुरसुन्दरीओ, परितुट्ठो नरवई। एत्थन्तरंमि सिक्खाइसयकोविओ विज्जाहरकुमारओ विय नहगमणेणं समारूढो मत्तवारणं, निबद्धं आसणं, गहिओ वारुअङ्कुसो, अप्फालिओ कुम्भभाए, गुलुगुलियमणेणं। 'जयइ कुमारो' त्ति समुद्धाइओ कलयलो, आहयाइं तूराइं, नीओ आलाणखम्भं। [2]एयवइयरेण दूमिओ विसेणो। चिन्तियं च णेणं। न चएमि ईइसे इमस्स सन्तिए [3]अणक्खे सोउं ऽपि किमङ्ग पुण पेच्छिउं। ता जं होउ, तं होउ। [4]समारंभेमि महासाहसं। वावाएमि सयमेव एयं ति।

जल्पितं नरेन्द्रेण। अरे गृहाण लघु दुष्टवारणम्, कदर्थितस्तेन लोक इति। ततो ग्रहणोत्सुकोऽपि नरपत्यनादेशभीरुरादेशसमनन्तरमेव प्रलोक्यमानो भयविभ्रमाधिकविभूषिताभिः पुरसुन्दरीभिर्धावितः सेनकुमारः। सिंहकिशोरक इव दृष्टो मत्तवारणेन। तं च दृष्ट्वाऽचिन्तनीयतया पुरुषसामर्थ्यस्य विचलितस्तस्य मदः। निरुद्धमनेन गमनम्। चित्रगत इव स्थितः प्रकृतिभावे। अहो कुमारस्य सामर्थ्यमिति विस्मिता नागरकाः, हर्षिताः पुरसुन्दर्यः, परितुष्टो नरपतिः। अत्रान्तरे शिक्षातिशयकोविदो विद्याधरकुमार इव नभोगमनेन समारूढो मत्तवारणम्, निबद्धमासनम्, गृहीतः ×शीघ्राऽङ्कुशः, आस्फालितः कुम्भभागे, गुलुगुलितं [गर्जितं] अनेन। 'जयति कुमारः' इति समुद्धावितः कलकलः, आहतानि तूर्याणि. नीत आलानस्तम्भम। एतद्व्यतिकरेण दूनो विषेणः। चिन्तितं च तेन–न शक्नोमीदृशान् अस्य सत्कानि यशांसि (?) श्रोतुमपि, किमङ्ग पुनः प्रेक्षितुम्। ततो यद् भवतु तद् भवतु। समारभे महासाहसम्। व्यापादयामि

---

१ –आणासमणंतरमेव क। २ एवं वइ–क। ३ अणत्थे ग। ४ नास्ति पाठः ख। × वलवियवलमयवारुआ सिग्घे (देशी०व० ७ श्लो० ४८)

अन्नया य सन्तिमईसमेयंमि उज्जाणसंठिए कुमारे परिणयप्पाए वासरे [1]कसाओदएणमणालोचिऊण परिणइं अणवेक्खिऊण निययबलं अचिन्तिऊण कुमारसत्तिं कुमारवावायणनिमित्तमेव कइवयपुरिसपरिवारिओ गओ तमुज्जाणं। कुमारचित्तवित्तीए अपडिहारिओ चेव पविट्ठो चन्दणलयाहरयं। दिट्ठो य णेण केवलो चेव कुमारो सन्तिमई य। वीसत्थो त्ति कड्ढियं मण्डलग्गं। दिट्ठं सन्तिमईए भणियं च णाए। अज्जउत्त, परित्तायहि परित्तायहि। तओ 'किमेयं' ति उट्ठिओ कुमारो। दिट्ठो य णेण विसेणो। छूढं तेणोहरणं। सिक्खाइसएण वञ्चियं कुमारेणं, 'किमेयं' ति चिन्तासुन्नहियएणावि भुयं रुम्भिऊण अवहडं से खग्गं। भणिओ य एसो 'कुमार, किमेयं' ति। तओ निरुम्भमाणेण कड्ढिया छुरिया। दरविइण्णे पहारे बाहं वालिऊण अवहडा य णेणं। बाहवलणपीडाए निवडिओ विसेणो। उट्ठाविओ णेणं, निवेसिओ सयणिज्जे, पुच्छिओ संभमेणं 'कुमार किमेयं' ति। तओ अदाऊण उत्तरं निग्गओ चन्दणलया-

स्वयमेव एतमिति॥

अन्यदा च शान्तिमतीसमेते उद्यानसंस्थिते कुमारे परिणतप्राये वासरे कषायोदयेनानालोच्य परिणतिमनवेक्ष्य निजबलमचिन्तयित्वा कुमारशक्तिं कुमारव्यापादननिमित्तमेव कतिपयपुरुषपरिवृतो गतस्तमुद्यानम्। कुमारचित्रवेत्र्या(प्रतीहार्या) अप्रतिहारित (अनवरुद्धः) एव प्रविष्टश्चन्दनलतागृहम्। दृष्टश्च तेन केवल एव कुमारः शान्तिमती च। विश्वस्त इति कृष्टं मण्डलाग्रम्। दृष्टं शान्तिमत्या। भणितं च तया–आर्यपुत्र! परित्रायस्व, परित्रायस्व। ततः 'किमेतद्' इत्युत्थितः कुमारः। दृष्टस्तेन विषेणः। क्षिप्तं तेन [2]शस्त्रम्। शिक्षातिशयेन वञ्चितं कुमारेण। 'किमेतद्' इति चिन्ताशून्यहृदयेनापि भुजं रुद्ध्वाऽपहृतं तस्य खड्गम्। भणितश्चैषः 'कुमार! किमेतद्' इति। ततो निरुध्यमानेन कृष्टा छुरिका। दरवितीर्णे (ईषद्दत्ते) प्रहारे बाहुं वालयित्वा अपहृता च तेन। बाहुवलनपीडया निपतितो विषेणः।

---

१ कसाउदएण क। २ ओहरणं (दे.) शस्त्रम्।

हराओ ॥ भणियं च सन्तिमईए। अज्जउत्त, किमेयं ति। कुमारेण भणियं। सुन्दरि, अहं पि न मुणेमि। एत्तिएण पुण एत्थ होयव्वं रज्जमुद्दिसिऊण पयारिओ केणइ कुमारो त्ति। ता अलं मे इहत्थिएणं, जत्थ पहाणसयणस्स कुमारस्स वि ईइसो उव्वेवो। अवत्थाणे य अवस्समेव केणइ लिङ्गेण जाणइ कुमारचेट्ठियं ताओ। तओ य घेप्पइ उम्माहएणं, निव्वासइ य कुमारं, आवहइ सोयमम्बा 'लाघवं कुलहरस्स कुपुरिसो' त्ति। अन्नत्थ विलज्जियं जीवइ कुमारो। परत्थसंपायणाणुगयं च कुलवयणिज्जरक्खणामेत्तफलं सुपुरिसाण चेट्ठियं, एत्थ पुण उभयविवज्जओ त्ति। सन्तिमईए भणियं। अज्जउत्त, एवमेयं; किं तु कहं पुण गुरू अज्जउत्तं विसज्जिस्सन्ति। कुमारेण भणियं। अइपण्डिए, को गुरूणं कहेइ। अत्थि ईइसो नाओ 'वहुयरगुणे कज्जे नेहकायरयाए विग्घकारिणो गुरू अपुच्छिऊण वि पयट्टिज्जइ' त्ति। सन्तिमईए भणियं। अज्जउत्तो पमाणं। कुमारेण भणियं। सुन्दरि, जइ एवं, ता अकहिऊण परियणस्स इओ चेवा-

उत्थापितोऽनेन, निवेशितः शयनीये, पृष्ठः संभ्रमेण 'कुमार! किमेतद्' इति। ततोऽदत्त्वोत्तरं निर्गतश्चन्दनलतागृहात्। भणितं च शान्तिमत्या-आर्यपुत्र! किमेतदिति। कुमारेण भणितम्-सुन्दरि! अहमपि न जानामि। एतावता पुनरत्र भवितव्यम्, राज्यमुद्दिश्य प्रतारितः केनचित्कुमार इति। ततोऽलं मे इह स्थितेन, यत्र प्रधानस्वजनस्य कुमारस्यापीदृश उद्वेगः। अवस्थाने चावश्यमेव केनचिद् लिङ्गेन जानाति कुमारचेष्टितं तातः। ततश्च गृह्यते उन्माथकेन (विनाशकेन), निर्वासयति च कुमारम, आवहति शोकमम्बा 'लाघवं कुलगृहस्य कुपुरुषः' इति। अन्यत्र विलज्जितं जीवति कुमारः। परार्थसंपादनानुगतं च कुलवचनीयरक्षणमात्रफलं सुपुरुषाणां चेष्टितम्, अत्र पुनरुभयविपर्यय इति। शान्तिमत्या भणितम्-आर्यपुत्र! एवमेतद्, किन्तु कथं पुनर्गुरवः आर्यपुत्रं विसर्जयिष्यन्ति। कुमारेण भणितम्-अतिपण्डिते! को गुरून् कथयति। अस्तीदृशो न्यायः 'वहुतरगुणे कार्ये स्नेहकातरतया विघ्नकारिणो गुरूनपृष्ट्वाऽपि प्रवर्त्यते'

---

१ विउज्जयं क।

वक्कमामो। अलं कालहरणेणं। मा इमं चेव कुमारो संपाडइस्सइ; लज्जिओ खु सो वि इमिणा चेट्ठिएण। सन्तिमईए भणियं। अज्जउत्तो पमाणं।

एत्थन्तरंमि अत्थमिओ सूरिओ। कयं पओसावस्सयं। भणिओ य परियणो। अज्ज मए एत्थेव वसियव्वं ति। तओ सज्जियं उज्जाणवासभवणं। सीसं मे दुक्खइ त्ति भणिऊण लहुं चेव विसज्जिओ परियणो। अइक्कन्ता काइ वेला। तओ पसुत्ते परियणे अडयणाए विय अहिसरणगमणंमि कसणपडएण विय तिमिरनिवहेण [1]ओत्थयाए रयणीए उट्ठिओ कुमारो सन्तिमई य। भणियं च णेण। सुन्दरि, दीहाणि देसन्तराणि, विचित्ता कम्मपरिणई, आवयाभायणं च एत्थ पाणिणो। बाहेइ य मं कुमारनेहाणुबन्धो, उप्पेक्खामि य इह अवत्थाणंमि तस्स आवयं, अणिव्वुईए य चित्तस्स न सक्कुणोमि इह चिट्ठिउं, अणुचिया य तुमं किलेसायासस्स। ता न-या-

---

इति। शान्तिमत्या भणितम्-आर्यपुत्रः प्रमाणम्। कुमारेण भणितम्-सुन्दरि! यद्येवं ततोऽकथयित्वा परिजनस्य इतश्चैवापक्राम्यामः। अलं कालहरणेन। मा इदमेव कुमारः संपादयिष्यति, लज्जितः खलु सोऽप्यनेन चेष्टितेन। शान्तिमत्या भणितम्-आर्यपुत्रः प्रमाणम्।

अत्रान्तरे अस्तमितः सूर्यः। कृतं प्रदोषावश्यकम्। भणितश्च परिजनः। अद्य मयात्रैव वस्तव्यमिति। ततः सज्जितमुद्यानवासभवनम्। 'शीर्षं मे दुःखयति'इति भणित्वा लघ्वेव विसर्जितः परिजनः। अतिक्रान्ता काचिद्वेला। ततः प्रसुप्ते परिजने 'कुलटायामिवाभिसरणगमने कृष्णपटेनेव तिमिरनिवहेनावस्तृतायां रजन्यामुत्थितः कुमारः शान्तिमती च। भणितं च तेन-सुन्दरि! दीर्घाणि देशान्तराणि, विचित्रा कर्मपरिणतिः, आपद्भाजनं चात्र प्राणिनः। बाधते च मां कुमारस्नेहानुबन्धः, उत्प्रेक्षे चेहावस्थाने तस्यापदम्। अनिर्वृत्या

---

१ उच्छइया रयणी क। २ अडयणा (दे) कुलटा। अविणयवईए अडया तहा अहव्वा अडयणा य ॥ देशी० वर्ग १ श्लो. १८.

णामि, किमेत्थ जुत्तं ति। सन्तिमईए भणियं। अज्जउत्तचित्तनिव्वुइसंपायणं ति। को य मम अज्जउत्तसहियाए किलेसायासो त्ति। तओ भवियव्वयाए[1] निओएण सन्तिमईसमेओ घेत्तूण असिवरं अलक्खिओ परियणेण निग्गओ उज्जाणाओ। गओ रयणीए चेव चम्पावासयं सन्निवेसं।

एत्थन्तरंमि अइक्कन्ता रयणी, उग्गओ अंसुमाली। परिस्सन्ता सन्तिमइ त्ति ठिओ एगमि वणनिगुञ्जे। दिट्ठो य तत्थ तामलित्तिपत्थिएण रायउरनिवासिणा साणुदेवनामेण सत्थवाहपुत्तेण, पच्चभिन्नाओ य णेणं[2]। जाया य से चिन्ता। किं पुण एसो रइदुइओ विय मयरकेऊ रायधूयामेत्तपरियणो एवं वट्टइ। किं राइणा निव्वासिओ त्ति। अहवा न संभवइ एयं रायधूयापयाणाणुमाणमुणियसिणेहाइसयस्स राइणो हरिसेणस्स। गुणायरो य एसो, गुणेगन्तपक्खवाई य राया। अओ अपक्खो चेव एसो त्ति। न य अन्नो कोइ निव्वा-

---

च चित्तस्य न शक्नोमीह स्थातुम्, अनुचिता च त्वं क्लेशायासस्य। ततो न जानामि किमत्र युक्तमिति। शान्तिमत्या भणितम्– आ 'पुत्रचित्तनिर्वृतिसंपादनमिति। कश्च ममार्यपुत्रसहितायाः क्लेशायास इति। ततो भवितव्यताया नियोगेन शान्तिमतीसमेतो गृहीत्वाऽसिवरमलक्षितः परिजनेन निर्गत उद्यानात्। गतो रजन्यामेव चम्पावासं सन्निवेशम्।

अत्रान्तरे अतिक्रान्ता रजनी, उद्गतोंऽशुमाली। परिश्रान्ता शान्तिमतीति स्थित एकस्मिन् वननिकुञ्जे। दृष्टश्च तत्र तामलिप्तीप्रस्थितेन राजपुरनिवासिना सानुदेवनाम्ना सार्थवाहपुत्रेण, प्रत्यभिज्ञातश्च तेन। जाता च तस्य चिन्ता। किं पुनरेष रतिद्वितीय इव मकरकेतू राजदुहितृमात्रपरिजन एवं वर्तते। किं राज्ञा निर्वासित इति। अथवा न संभवत्येतद् राजदुहितृप्रदानानुमानज्ञातस्नेहातिशयस्य राज्ञो हरिषेणस्य। गुणाकरश्चैषः, गुणैकान्तपक्षपाती च राजा। अतोऽपक्ष एष इति। न चान्यः कोऽपि निर्वासनसमर्थः। अत्र एताव-

---

१ –यानिओ–क। २ तेण क–ख।

सणसमत्थो। एत्थ एद्दहमेत्तपरियणो य एसो। ता भवियव्वमणेणं नियनिव्वेयनिग्गएणं। विचित्ताणि य विहिणो विलसियाणि। ता इमं एत्थ पत्तयालं, पणमिऊण पुच्छामि एयं ति। चिन्तिऊण पणमिओ कुमारो सन्तिमई य। भणियं च णेणं। देव, अमुणियवुत्तन्तो त्ति विन्नविस्सं देवं। तओ न कायव्वो खेओ। कुमारेण भणियं। भद्द, को एत्थ अवसरो खेयस्स; ता भणाउ भद्दो। साणुदेवेण भणियं। देव, अहं खु रायउरवत्थव्वओ साणुदेवो नाम सत्थवाहपुत्तो, पयट्टो सत्थेण तामलित्तिं। आवासिओ य णे सत्थो एत्थ सन्निवेसे। आयमणनिमित्तं च समागओ इओ नाइदूरदेस[१]वत्तिणं सरं। उवलद्धं च एयं वणनिउञ्जं। तओ समुप्पन्नो मे पमोओ। आचिक्खियं विय हियएणं, जहा एत्थ कल्लाणं ते भविस्सइ त्ति। तओ भवियव्वयानिओएण समागओ इहइं। उवलद्धो य देवो सामिधूया य। रायउरोवलद्धसंगयाणुस्सरणगुणेण य समुप्पन्नं पच्चभिन्नाणं। तओ आणन्दियं पि विसण्णं विय मे चित्तं, 'कहिं देवो,

---

न्मात्रपरिजनश्चैषः। ततो भवितव्यमनेन निजनिर्वेदनिर्गतेन। विचित्राणि च विधेर्विलसितानि। तत इदमत्र प्राप्तकालम्, प्रणम्य पृच्छाम्येतमिति। चिन्तयित्वा प्रणतः कुमारः शान्तिमती च। भणितं च तेन-देव! अज्ञातवृत्तान्त इति विज्ञपयिष्ये देवम्, ततो न कर्तव्यः खेदः। कुमारेण भणितम्-भद्र! कोऽत्रावसरः खेदस्य, ततो भणतु भद्रः। सानुदेवेन भणितम्-अहं खलु राजपुरवास्तव्यः सानुदेवो नाम सार्थवाहपुत्रः प्रवृत्तः सार्थेन तामलिप्तीम्। आवासितश्चास्माभिः सार्थोऽत्र सन्निवेशे। आचमननिमित्तं च समागत इतो नातिदूरदेशवर्ति सरः। उपलब्धं चैतद् वननिकुञ्जम्। ततः समुत्पन्नो मे प्रमोदः। आख्यानमिव हृदयेन, यथाऽत्र कल्याणं ते भविष्यतीति। ततो भवितव्यतानियोगेन समागत इह। उपलब्धश्च देवः स्वामिदुहिता च। राजपुरोपलब्धसंगतानुस्मरणगुणेन च समुत्पन्नं प्रत्यभि-

---

१-वत्ति सरं क।

कहिं एद्दहमेत्तपरियणो' त्ति। ता आइसउ देवो, जइ अकहणीयं न हवइ। कुमारेण चिन्तियं। अहो वच्छलया सत्थवाहपुत्तस्स, अहो निब्भराणुराओ, अहो वयणकोसल्लं ति। चिन्तिऊण जंपियं च णेणं। सत्थवाहपुत्त, अत्थि एत्थ कारणं। किं तु अहं पि तामलित्तिं चेव पत्थिओ। ता पुणो साहइस्सं। साणुदेवेण भणियं। देव, पसाओ त्ति अणुग्गिहीओ देवेणं। तहावि सत्थगमणेण आणन्देउ मं देवो। कुमारेण भणियं। सत्थवाहपुत्त, अत्थि एयं। किं तु कयाइ तत्थ तायपेसिया अन्नेसयपुरिसा पेच्छन्ति। तओ न संपज्जइ मे समीहियं। साणुदेवेण भणियं। देव, जइ एवं, ता चिट्ठामि ताव एत्थ कइवि दियहे। वोलीणेसु पुरिसेसु पयत्तगोविएणं देवेणं सह पुणो गमिस्सं ति। कुमारेण भणियं। सत्थवाहपुत्त, अलं इमिणा निब्बन्धेण, गच्छ तुमं। साणुदेवेण भणियं। देव, मा एवमाणवेह। समुप्पज्जइ मे दुक्खं, निरत्थयं च मन्नेमि देवस्स दंसणं। कुमारेण भणियं। जइ ते निब्बन्धो, ता एवं हवउ त्ति। साणुदेवेण भणियं।

ज्ञानम्। तत आनन्दितमपि विषण्णमिव मे चित्तम्, कुत्र देवः, कुत्र एतावन्मात्रपरिजन इति। तत आदिशतु देवो यद्यकथनीयं न भवति। कुमारेण चिन्तितम्-अहो वत्सलता सार्थवाहपुत्रस्य, अहो निर्भरानुरागः, अहो वचनकौशल्यमिति चिन्तयित्वा जल्पितं च तेन। सार्थवाहपुत्र! अस्त्यत्र कारणम्, किन्त्वहमपि तामलिप्तीमेव प्रस्थितः, ततः पुनः कथयिष्ये। सानुदेवेन भणितम्-देव! प्रसाद इत्यनुगृहीतो देवेन, तथापि सार्थगमनेनानन्दयतु मां देवः। कुमारेण भणितम्-सार्थवाहपुत्र! अस्त्येतद्, किन्तु कदाचित् तत्र तातप्रेषिता अन्वेषकपुरुषाः प्रेक्षन्ते, ततो न संपद्यते मे समीहितम्। सानुदेवेन भणितम्-देव! यद्येवं ततस्तिष्ठामि तावदत्र कत्यपि दिवसान्। व्यतिक्रान्तेषु पुरुषेषु प्रयत्नगोपायितेन देवेन सह पुनर्गमिष्ये इति। कुमारेण भणितम्-सार्थवाहपुत्र! अलमनेन निर्वन्धेन, गच्छ त्वम्। सानुदेवेन भणितम्-देव! मैवमाज्ञापय। समुत्पद्यते मे दुःखम्, निरर्थकं च मन्ये देवस्य दर्शनम्। कुमारेण भणितम्-यदि ते निर्वन्धस्तत एवं भवत्विति। सानुदेवेन भणितम्-देव! प्रसादः। कुमारेण भणितम्-यद्येवं ततो गच्छ निजसार्थम्। न जल्पितव्य एष व्यतिकरः,

देव, पसाओ। कुमारेण भणियं। जइ एवं, ता गच्छ निययसत्थं। न जंपियव्वो एस वइयरो, नागन्तव्व[1]मिहइं। तओ 'जं देवो आणवेइ' त्ति जंपिऊण साणुदेवो गओ सत्थं॥ थेववेलाए य आगया आसवारा! पुच्छिया य णेहिं सत्थिया। भो नं[2] तुब्भेहिं एवंविहजायासमेओ एवंविहो पुरिसो [3]समुवलद्धो त्ति। तेहिं भणियं 'नोवलद्धो'। मिहो जंपियमणेहिं। हरे, भणियं मए 'अवदिसा खु एसा कुमारस्स'; ता एहि, रायउरवत्तिणीए लग्गामो त्ति। नियत्ता आसवारा। थेववेलाए य पच्चइयपुरिसहत्थंमि पेसिऊण भोयणं आगओ साणुदेवो। निवेइओ आसवारवुत्तन्तो। कराविओ पाणवित्तिं।

[4]अइक्कन्ते य वासरे अत्थमिए दिणयरंमि नक्खत्तमालापसाहियाए नहयलसिरीए आणिओ [5]सत्थनिवेसं। कओ उचिओवयारो। जामावसेसाए जामिणीए कुमाराएसेण विदिन्नं पयाणयं। समप्पियं पहाणजम्पाणं सन्तिमईए कुमारस्स य। गया कंचि भूमिभागं।

नागन्तव्यमिह। ततो 'यद्देव आज्ञापयति' इति जल्पित्वा सानुदेवो गतः सार्थम्। स्तोकवेलायामागता अश्ववाराः। पृष्टाश्च तैः सार्थिकाः-भो! न युष्माभिरेवंविधजायासमेत एवंविधपुरुषः समुपलब्ध इति। तैर्भणितम्-नोपलब्धः। मिथो जल्पितमेभिः-अरे भणितं मया अपदिक् खल्वेषा कुमारस्य, तत एहि राजपुरवर्तिन्यां लगाम इति। निवृत्ता अश्ववाराः। स्तोकवेलायां च प्रत्ययितपुरुषहस्ते प्रेषयित्वा भोजनमागतः सानुदेवः। निवेदितोऽश्ववारवृत्तान्तः। कारितः प्राणवृत्तिम्।

अतिक्रान्ते च वासरे अस्तमिते दिनकरे नक्षत्रमालाप्रसाधितायां नभस्तलश्रियामानीतः सार्थनिवेशम्। कृत उचितोपचारः। यामावशेषायां यामिन्यां कुमारादेशेन विदत्तं प्रयाणकम्। समर्पितं प्रधानजम्पानं शान्तिमत्याः कुमारस्य च। गताः कञ्चिद् भूमिभागम्।

---

[1] -व्वं केणइ इहइं क। [2] नास्ति क। [3] उवलद्धो क। [4] अइक्कंतो य वासरो क। [5] सत्थसंनिवेसं क।

आवासिओ सत्थो । निविट्ठं चेलहरयं । ठिया तत्थ सन्तिमई कुमारसेणो य । संपाडियं उचियकरणिज्जं ।

एवं च अणवरयपयाणएहिं वच्चमाणाणमइक्कन्ता कइवि वासरा । पत्ता दन्तरत्तियाभिहाणं महाडविं । आवासिओ सत्थो । 'भयाणया अडवि' त्ति निविट्ठाइं थाणयाइं । पहायसमए य विसंसरिएसुं थाणएसुं सत्थलद्दणवावडेसु कम्मयरेसु आवस्सयकरणुज्जएहिं आडियत्तिएहिं अप्पतक्किया चेव विमुक्कबाणवरिसा निवडिया सबरधाडी । वाइयाइं सिङ्गाइं, हण हण त्ति उद्धाइओ कलयलो, विसण्णा कम्मारया, वुण्णो इत्थियायणो । पइट्ठिया आडियत्तिया, पवत्तमाओहणं । 'सुन्दरि, धीरा होहि' त्ति परिसंठवेऊण सन्तिमइं धाविओ कुमारसेणो, कड्ढियं मण्डलग्गं । तओ केसरिकिसोरएण विय हरिणजूहं भग्गं सबरसेन्नं । अन्नदिसाए य भेल्लिओ सत्थो, विलुत्तं सारभण्डं, पाडिया आडियत्तिया नट्ठो इत्थियायणो । 'कहं इओ विणिज्जिओ त्ति वलिओ कुमारसेणो । पलाणा सबरपुरिसा । तओ

आवासितः सार्थः । निविष्टं चेलगृहम् । स्थिता तत्र शान्तिमती कुमारसेनश्च । संपादितमुचितकरणीयम् ।

एवं चानवरतप्रयाणकैर्व्रजतामतिक्रान्ताः कत्यपि वासराः । प्राप्ता दन्तरत्निकाभिधानां महाटवीम् । आवासितः सार्थः । 'भयानका अटवी' इति निविष्टानि [1]स्थानकानि । प्रभातसमये च विसंसृतेषु (अपगतेषु) स्थानकेषु सार्थ[2]भारारोपणव्यापृतेषु कर्मकरेषु आवश्यककरणोद्यतेषु [3]सुभटेषु अप्रतर्कितैव विमुक्तबाणवर्षा निपतिता शबरधाटी । वादितानि शृङ्गाणि, 'जहि जहि' इत्युद्धावितः कलकलः, विषण्णाः कर्मकारकाः, [4]भीतः स्त्रीजनः । प्रतिष्ठिताः सुभटाः । प्रवृत्तमायोधनम् । 'सुन्दरि ! धीरा भव' इति परिसंस्थाप्य शान्तिमतीं धावितः कुमारसेनः, कृष्टं मण्डलाग्रम् । ततः केसरिकिशोरकेनेव हरिणयूथं भग्नं शबरसैन्यम् । अन्यदिशि च भेदितः

---

१ थाणय (दे.) थाणुं चोकीपहेरो, इति भाषायाम् । २ लद्दण (दे) भारारोपणम्, लादवुं इति गूर्जरभाषायाम् । ३ आडियत्तिय (दे.) सुभटः । बुण्णो –भीतः बुण्णो भीओव्विग्गेसु (देशी० व ७ श्लो०९४)

एगागी अवेक्खिऊण कुमारसेणं [1]उवट्ठिओ पल्लीवई, मिलिओ य तस्स। छूढं च णेणोहरणं। वञ्चियं कुमारेणं, परिछूढं च तस्स। पाडिओ पल्लीवई, मुच्छिओ य एसो। वीजिओ कुमारेणं, जाव न चेयइ त्ति। तओ [2]आसन्नवत्तिसराओ घेत्तूण नलिणिपत्तेण दिन्नं से सलिलं। तओ चेइय[3]मणेणं। दिट्ठो कुमारो। चिन्तियं च णेणं। को पुण एसो महापुरिसो, सुकुमारदेहो वि दढप्पहारी, असहाओ वि ववसायजुत्तो, केसरी वि[4]य परक्कमेणं, मुणिकुमारो विय दयाए, कुसुमाउहो विय रूवेण, सत्तूण वि असत्तू[5]। ता आगिईओ चेवावगच्छामि, जहा परमेसरो खु एसो। ता न जुत्तमम्हेहिं ववसियं ति। एत्थन्तरंमि भणियं कुमारेणं। भद्द, वीसत्थो होहि। तेण भणियं। अज्ज, कीइसी [6]अम्हारिसाणं वीसत्थया। एत्थन्तरंमि कहियमेगेण [7]सबरेण सेणाए, जहा पल्लीवई पाडिओ त्ति। [8]अमरिसावेसेण 'हण

सार्थः, विलुप्तं सारभाण्डम्, पातिताः सुभटाः, नष्टः स्त्रीजनः। 'कथमितो विनिर्जितः' इति वलितः कुमारसेनः। पलायिताः शवरपुरुषाः। तत एकाकी अवेक्ष्य कुमारसेनमुपस्थितः पल्लीपतिः, मिलितश्च तस्य। क्षिप्तं च तेन शस्त्रम्। वञ्चितं कुमारेण, प्रतिक्षिप्तं च तस्य। पातितः पल्लीपतिः, मूर्च्छितश्चैषः। वीजितः कुमारेण, यावन्न चेतयते इति। तत आसन्नवर्तिसरसा गृहीत्वा नलिनीपत्रेण दत्तं तस्य सलिलम्। ततश्चेतितमनेन। दृष्टः कुमारः। चिन्तितं च नेन। कः पुनरेष महापुरुषः, सुकुमारदेहोऽपि दृढप्रहारी, असहायोऽपि व्यवसाययुक्तः, केसरीव पराक्रमेण, मुनिकुमार इव दयया, कुसुमायुध इव रूपेण, शत्रूणामप्यशत्रुः। तत आकृत्या एवावगच्छामि, यथा परमेश्वरः खल्वेषः। ततो न युक्तमस्माभिर्व्यवसितमिति। अत्रान्तरे भणितं कुमारेण-भद्र! विश्वस्तो भव। तेन भणितम्-आर्य! कीदृशी अस्मादृशानां विश्वस्तता। अत्रान्तरे कथितमेकेन शबरेण सेनायाः, यथा पल्लीपतिः पातित इति। अमर्षविशेण 'जहि

---

१ पइट्ठिओ क-ख। २ तओ आसन्नमेव घेत्तूण क। ३ -मणेणं। उम्मिलियं लोयणजुयलं क। ४ नास्ति क-ख। ५ सत्तूण कयंतो। ता आगिईओ यवगच्छामि भवियव्वमणेण परमेसरेण क। ६ अम्हाण क। ७ सबरसेणाए क। ८ अमरिसवसेण क।

हण' त्ति जंपमाणा धाविया सबरपुरिसा। 'विणिज्जिओ अहं, महापुरिसो य एसो, ता न पहरियव्वं तुब्भेहिं[1]' ति सन्नासंपायणत्थं[2] चेट्ठियं पल्लिणाहेणं। कयमणेण गोमाउवासियं। तओ तमवगच्छिऊण विमुक्कचावपरसू सिरकयञ्जलिउडा समागया सबरपुरिसा। भणियं च णेहिं। अज्ज, अभयं देहि त्ति। कुमारेण भणियं। अभयं[3] मुक्काउहाणं। एत्थन्तरंमि चलणेसु निवडिओ पल्लीवई। भणियं च णेण। अज्ज, खमियव्वो एस अवराहो। कुमारेण भणियं। भद्द, को एत्थ अवराहो। तेण भणियं। जं सत्थो लूडिओ त्ति। कुमारेण चिन्तियं। हन्त किमेयं ति। एत्थन्तरंमि जंपियं पल्लिणाहेणं। अरे करेह आघोसणं, निवारेह आओहणं। आणेह जं जेण गहियं; पुणोवलद्धे य न खमेमि अहयं ति। आएससमणन्तरं च संपाडियमणेहिं। भणियं च पल्लिवइणा। अज्ज, निरूवेहि एयं, किं एत्थ नत्थि त्ति। कुमारेण भणियं। भद्द, असामिओ अहं एयस्स; ता निरूविऊण सत्थवाहपुत्तं पुच्छसु त्ति। निरूवाविओ सत्थवाहपुत्तो, उवलद्धो वणनिउञ्जे,

जहि'इति जल्पन्तो धाविताः शबरपुरुषाः। 'विनिर्जितोऽहम्, महापुरुषश्चैषः, न प्रहर्तव्यं युष्माभिः'इति संज्ञासंपादनार्थं चेष्टितं पल्लीनाथेन। कृतमनेन गोमायुवाशितम्। ततस्तमवगत्य विमुक्तचापपरशवः शिरःकृताञ्जलिपुटाः समागताः शबरपुरुषाः। भणितं च तैः-आर्य! अभयं देहीति। कुमारेण भणितम्-अभयं मुक्तायुधानाम्। अत्रान्तरे चरणयोर्निपतितः पल्लीपतिः। भणितं च तेन-आर्य! क्षमितव्य एषोऽपराधः। कुमारेण भणितम्-भद्र! कोऽत्रापराधः। तेन भणितम्-यत्सार्थो लुण्टित इति। कुमारेण चिन्तितम्-हन्त किमेतदिति। अत्रान्तरे जल्पितं पल्लीनाथेन-अरे कुरुताघोषणाम्, निवारयतायोधनम्। आनयत यद् येन गृहीतम्, पुनरुपलब्धे च न क्षाम्याम्यहमिति। आदेशसमनन्तरं च संपादितमेभिः। भणितं च पल्लीपतिना-निरूपयैतत्, किमत्र नास्तीति। कुमारेण भणितम्-भद्र! अस्वाम्यहमेतस्य, ततो निरूप्य सार्थवाहपुत्रं पृच्छेति। निरूपितः सार्थवाहपुत्रः, उपलब्धो वननिकुञ्जे, आनीतश्च तैः। भणितः पल्लीपतिना।

---

[1] तुम्हेहिं क। [2] संवायणत्थं क-ख। [3] दिन्नमेव अभयं क।

आणीओ य णेहिं। भणिओ पल्लिवइणा। अज्ज, न विन्नायं अम्हेहिं, जहा एसो महापुरिसो इह गच्छइ त्ति। विणिज्जिया य णेण अम्हे। महाणुभावयाए पडिवन्नो य एस अम्हेहिं सामी। अओ संबन्धिओ तुमं ति। [1]अदोहया णे तुज्झ रि[2]त्थस्स। ता निरूवावेहि एय, किं एत्थ नत्थि त्ति। तओ 'अहो महाणुभावया कुमारस्स, एयाइणा विणिज्जिया सबरसेणा। भिच्चभाव[3]मुवगओ पल्लीवइ; अहवा थेवमियमिमस्स; किं करेन्ति हरिणया केसरिकिसोरयस्स' त्ति चिन्तिऊण जंपियं साणुदेवेण। भद्द, सामिसालंमि अज्जउत्ते तुमंमि य संबन्धिए [4]किं ममं नत्थि त्ति । तेण भणियं। तहावि निरूवावसु त्ति, न मे अन्नहा चित्तनिव्वुई होइ। तओ निरूवावियमणेणं, जाव 'पुज्जइ' त्ति साहियं पल्लिणाहस्स। परितुट्ठो य एसो। चिन्तियं कुमारेणं। अहो महाणुभावया एयस्स। एद्दहमेत्तेणावि एवं चिट्ठइ त्ति। अहवा सुगेज्झाणि सज्जणहिययाणि। भञ्जाविओ से पहारो, विइण्णं कडिसुत्तयं। महापसाओ त्ति भणिऊग गहियं

आर्य ! न विज्ञातमस्माभिः, यथैष महापुरुष इह गच्छतीति। विनिर्जिताश्च तेन वयम् । महानुभावतया प्रतिपन्नश्चैषोऽस्माभिः स्वामी। अतः संवन्धी त्वमिति। अद्रोहका वयं तव रिक्थस्य। ततो निरूपयैतत् किमत्र नास्तीति। ततः 'अहो महानुभावता कुमारस्य, एकाकिना विनिर्जिता शवरसेना, भृत्यभावमुपगतः पल्लीपतिः, अथवा स्तोकमिदमस्य, किं कुर्वन्ति हरिणकाः केसरिकिशोरकस्य' इति चिन्तयित्वा जल्पितं सानुदेवेन। भद्र ! स्वामिनि आर्यपुत्रे त्वयि च संबन्धिनि किं मम नास्तीति। तेन भणितम्–तथापि निरूपयेति, न मेऽन्यथा चित्तनिर्वृत्तिभवति। ततो निरूपितमनेन, यावत् 'पूर्यते' इति कथितं पल्लीनाथस्य। परितुष्टश्चैषः। चिन्तितं कुमारेण–अहो महानुभावतैतस्य। एतावन्मात्रेणापि एवं तिष्ठतीति। अथवा सुग्राह्याणि सज्जनहृदयानि। भञ्जितस्तस्य प्रहारः, वितीर्णं कटीसूत्रम्।

---

१ अदोहणया क। २ रित्थे क। ३–मुवणीओ क। ४ किमेयं क। ५ त्ति जं न संपज्जइ क।

पल्लिवइणा। निरूवाविया पडिहयपुरिसा। कयाइं वणपरिकम्माइं। भणियं च णेण। अज्ज, पच्चासन्ना चेव एत्थ अम्हाण पल्ली; ता तीए दंसणेण अणुग्गहेउ मं अज्जो त्ति। कुमारेण भणियं। सत्थवाहपुत्तो पमाणं। साणुदेवेण भणियं। भद्द, दिट्ठे तुमंमि दिट्ठा चेव पल्लि त्ति।

एत्थन्तरंमि बाहुप्फुल्ललोयणो समागओ साणुदेवसूयारो। भणियं च णेण। अज्ज, परित्तायाहि परित्तायाहि। पणट्ठं सव्वसारं, न दीसए रायधूय त्ति। तओ आउलीहूओ कुमारो। विसण्णो साणुदेवो। 'किमेयं' ति मूढो पल्लीवई। भणियं च णेण। अज्ज, का एसा रायधूय त्ति। साणुदेवेण भणियं। भद्द, रायउरसामिणो [1]सङ्खरायस्स धूया, कुमारं उद्दिसिऊण देवस्स घरिणी सन्तिमइ त्ति। तेण भणियं। कहं न दीसइ त्ति। सूवयारेण भणियं। सुण। पवत्ते आओहणे सबरसेणासम्मुहम्मि गए रायउत्त अन्नदिसाए य भेल्लिए सत्थे

'महाप्रसादः' इति भणित्वा गृहीतं पल्लिपतिना। निरूपिताः प्रतिहतपुरुषाः। कृतानि व्रणपरिकर्माणि। भणितं च तेन-आर्य! प्रत्यासन्नैवात्रास्माकं पल्ली, ततस्तस्या दर्शनेनानुगृह्णातु मामार्य इति। कुमारेण भणितम्-सार्थवाहपुत्रः प्रमाणम्। सानुदेवेन भणितम्-दृष्टे त्वयि दृष्टैव पल्लीति।

अत्रान्तरे बाष्पोत्फुल्ललोचनः समागतः सानुदेवसूपकारः। भणितं च तेन-आर्य! परित्रायस्व परित्रायस्व प्रनष्टं सर्वसारम्, न दृश्यते राजदुहितेति। तत आकुलीभूतः कुमारः विषण्णः सानुदेवः 'किमेतद्' इति मूढः पल्लीपतिः। भणितं च तेन-आर्य! का एषा राजदुहितेति। सानुदेवेन भणितम्-भद्र! राजपुरस्वामिनः शङ्खराजस्य दुहिता, कुमारमुद्दिश्य देवस्य गृहिणी शान्तिमतीति। तेन भणितम्-कथं न दृश्यते इति। सूपकारेण भणितम्-श्रृणु। प्रवृत्ते आयोधने शवरसेनासंमुखे गते राजपुत्रे अन्यदिशि च भेदिते सार्थे

---

[1] संखपालस्स क-ख।

विलुप्पमाणे सारभण्डे पाडिएहिं आडियत्तिएहिं 'हा अज्जउत्त हा अज्जउत्त' त्ति भणमाणी निग्गया चेलहराओ, पहाविया अडविहुत्तं। 'न मोत्तव्वा एस' त्ति सत्थवाहपुत्तस्स वयणमणुसरन्तो लग्गो अहं तीए मग्गओ। गओ थेवं भूमिभागं। आहओ लउडेण सबरजुवाणेण। निवडिओ धरणिवट्ठे। समागया मुच्छा। अइक्कन्ता काइ वेला। पडिलद्धा चेयणा। उट्ठिओ संभमेणं। पवत्तो गवेसिउं। तओ गुविलयाए रण्णस्स मूढयाए दिसाविभायाणं अन्नेसमाणेणावि न दिट्ठा रायधूया मए। संपयं तुब्भे पमाणं ति। तओ 'हा देवि' त्ति भणमाणो मुच्छिओ कुमारसेणो। समासासिओ पल्लिणाहेणं। भणियं च णेणं। देव, अलं विसाएणं। [2]केत्तियमियमरण्णं, थेवा य वेला सत्थविब्भमस्स, अणुचियधरणिपरिसक्कणा य देवी, [3]पवणवेगगमणा य मुणियसयलरण्णभावा य सबरपुरिसा। ता कहिं गमिस्सइ त्ति। गवेसिऊण संजोएमि देवं रायधूयाए। विसज्जिया णेण दिसो दिसिं निययपुरिसा। भणिओ य साणुदेवो। अज्ज, अइक्कन्तो ताव कालो

विलुप्यमाने सारभाण्डे पातितेषु सुभटेषु 'हा आर्यपुत्र! हा आर्यपुत्र!' इति भणन्ती निर्गता चेलगृहात्। प्रधाविता अटवीसन्मुखम्। 'न मोक्तव्या एषा' इति सार्थवाहपुत्रस्य वचनमनुस्मरन् लग्नोऽहं तस्या पृष्ठतः। गतः स्तोकं भूमिभागम्। आहतो लकुटेन शबरयूना। निपतितो धरणीपृष्ठे। समागता मूर्छा। अतिक्रान्ता काचिद् वेला। प्रतिलब्धा चेतना। उत्थितः संभ्रमेण। प्रवृत्तो गवेषयितुम्। ततो [1]गहनतयाऽरण्यस्य मूढतया दिग्विभागानामन्वेषमाणेनापि न दृष्टा राजदुहिता मया। साम्प्रतं यूयं प्रमाणमिति। ततो 'हा देवि'! इति भणन् मूर्च्छितः कुमारसेनः। समाश्वासितः पल्लीनाथेन। भणितं च तेन-देव! अलं विषादेन। कियदिदमरण्यम्, स्तोका च वेला सार्थविभ्रमस्य, अनुचितधरणीपरिष्वष्कणा (-परिचंक्रमणा) च देवी, पवनवेगगमनाश्च ज्ञातसकलारण्यभावाश्च शबरपुरुषाः। ततः कुत्र गमिष्यतीति। गवेषयित्वा संयोजयामि देवं राजदुहित्रा। विसर्जितास्तेन दिशि दिशि निजपुरुषाः। भणितश्च सानुदेवः। आर्य! अति-

---

१ गुविलं कलिलं वल्लरं गहणं। (पाइयलच्छी ३५३) २ केत्तिय-ख। ३ पवणवेगा य क।

पल्लीदंसणस्स। ता समासासेउ देवं अज्जो। अहं पुण देविं चेव अन्नेसामि त्ति। पडिस्सुयं साणुदेवेण। तओ कुमारसमीवंमि निरुविऊण कइवयनिययपुरिसे पयट्टो पल्लिणाहो। भणियं च णेणं। देव, परिच्चय विसायं, अवलम्बेहि उच्छाहं, गवेसामो देविं ति। पडिस्सुयं कुमारेणं। पयट्टो सबरपुरिससमेओ गवेसिउं।

इओ य रायधूया 'कहिं अज्जउत्त' त्ति गवेसमाणी निवडिया कन्तारमज्झे। मूढाओ दिसाओ। अपेच्छमाणी दइययं भमिया [1]महाडवीए। परिणयप्पाए वासरे समागया गिरिनइं। न दिट्ठो अज्जउत्तो त्ति विसण्णा हियएणं। चिन्तियं च णाए। अलं मे अज्जउत्तविरहियाए जीविएणं। ता एयंमि असोअपायवे उक्कलम्बेमि अत्ताणयं। निबद्धो वल्लीए पासओ। निमिया सिरोहरा। भणियं च णाए। भयवईओ वणदेवयाओ, न मए अज्जउत्तं मोत्तूण अन्नो मणसा वि चिन्तिओ। इमिणा सच्चेण जम्मन्तरंमि वि अज्जउत्तो चेव भत्ता हवेज्ज त्ति कयं नियाणं। पवाहिओ अप्पा, तुट्टो से पासओ, निवडिया धरणिवट्ठे, गया मुच्छं। दिट्ठा आसन्नतवोवणवासिणा संझोवा-

क्रान्तस्तावत्कालः पल्लीदर्शनस्य। ततः समाश्वासयतु देवमार्यः। अहं पुनर्देवीमेवान्वेष्ये इति। प्रतिश्रुतं सानुदेवेन। ततः कुमारसमीपे निरूप्य (नियोज्य) कतिपयनिजपुरुषान् प्रवृत्तः पल्लीनाथः। भणितं च तेन-देव! परित्यज विषादम्, अवलम्बस्वोत्साहम्, गवेषयामो देवीमिति। प्रतिश्रुतं कुमारेण। प्रवृत्तः शबरपुरुषसमेतो गवेषयितुम्।

इतश्च सा राजदुहिता 'कुत्र आर्यपुत्रः' इति गवेषयन्ती निपतिता कान्तारमध्ये। मूढा दिशः। अप्रेक्षमाणा दयितं भ्रान्ता महाटव्याम्। परिणतप्राये वासरे समागता गिरिनदीम्। न दृष्ट आर्यपुत्र इति विषण्णा हृदयेन। चिन्तितं च तया। अलं मे आर्यपुत्रविरहिताया जीवितेन। तत एतस्मिन्नशोकपादपे उल्लम्बे आत्मानमिति। निबद्धो वल्ल्या पाशः। न्यस्ता शिरोधरा। भणितं च तया-भगवत्यो वनदेवताः! न मयाऽऽर्यपुत्रं मुक्त्वाऽन्यो मनसाऽपि चिन्तितः। अनेन सत्येन जन्मान्तरेऽप्यार्यपुत्र एव भर्ता भवेदिति कृतं निदानम्।

सणनिमित्तमागएणं मुणिकुमारएणं। चिन्तियं च णेणं। हा का उण एसा वणदेवया विव इत्थिया निवडिया धरणिवट्ठे। अहवा किं मम इत्थियाए। अन्नओ गच्छामि। वारियं खु समए इत्थियादंसणं। भणियं च तत्थ। अवि य अञ्जियव्वाइं तत्तलोहसलायाए अच्छीणि, न दट्ठव्वा य अङ्गपच्चङ्गसंठाणेणं इत्थिया; अवि य भक्खियव्वं विसं, न सेवियव्वा विसया; छिन्दियव्वा जीहा, न जंपियव्वमलियं ति। ता किं मम इमीए, अणहियारो य एसो मुणिजणस्स। अहवा दीणजणअब्भुद्धरणं पि समसत्तुमित्तयाए पडिवाइयमेव। भणियं च तत्थ। अत्ताणनिव्विसेसं दट्ठव्वा सव्वपाणिणो, पवत्तियव्वं हिए जहासत्तीए, अब्भुद्धरेयव्वा दीणया; न खलु अहिंसाओ अन्नं धम्मसाहणं ति। दीणा य एसा। अन्नहा कहिं रण्णं, कहिं एगागिणी [1]इत्थिया। ता पेच्छामि ताव, का उण एसा; मा नाम विज्जाहरी पसुत्ता भवे। पुलइया मुणिकुमारेणं। दिट्ठो से पासओ। विसण्णो मुणिकुमारो। चिन्तियं च णेण। अहो एसा आगिई, एसो य

प्रवाहित (मुक्तः) आत्मा, त्रुटितस्तस्याः पाशः, निपतिता धरणीपृष्ठे, गता मूर्च्छाम्। दृष्टाऽऽसन्नतपोवनवासिना संध्योपासननिमित्तमागतेन मुनिकुमारकेन। चिन्तितं च तेन–हा का पुनरेषा वनदेवतेव स्त्री निपतिता धरणीपृष्ठे। अथवा किं मम स्त्रिया। अन्यतो गच्छामि। वारितं खलु समये स्त्रीदर्शनम्। भणितं च तत्र–अपि चाञ्जितव्यानि तप्तलोहशलाकयाऽक्षीणि, न द्रष्टव्या च अङ्गप्रत्यङ्गसंस्थानेन स्त्री, अपि च भक्षितव्यं विषम्, न सेवितव्या विषयाः, छेत्तव्या जिह्वा, न जल्पितव्यमलीकमिति। ततः किं ममानया, अनधिकारश्चैष मुनिजनस्य। अथवा दीनजनाभ्युद्धरणमपि समशत्रुमित्रतया प्रतिपादितमेव। भणितं च तत्र। आत्मनिर्विशेषं द्रष्टव्याः सर्वप्राणिनः, प्रवर्तितव्यं हिते यथाशक्ति, अभ्युद्धर्तव्या दीनाः, न खल्वहिंसातोऽन्यद् धर्मसाधनमिति। दीना चैषा। अन्यथा कुत्रारण्यम्, कुत्रैकाकिनी स्त्री। ततः प्रेक्षे तावत् का पुनरेषा, मा नाम विद्याधरी प्रसुप्ता भवेद्। दृष्टा मुनिकुमारेण। दृष्टस्तस्याः पाशः। विषण्णो मुनिकुमारः।

---

[1] सा क।

पासओ त्ति विरुद्धमेयं। अहवा नत्थि कम्मपरिणईए विरुद्धं ति। चिन्तिऊण अब्भुक्खिया कमण्डलुपाणिएणं। समागया चेयणा, ऊससियं मणागं, उम्मिल्लियाइं लोयणाइं, दिट्ठो मुणिकुमारओ। संतत्था य एसा। भणिया य णेणं[1]। वच्छे, अलं संतासेणं, मुणिक्कुमारओ अहं। तओ पणमिओ इमीए। 'अविहवा हवसु'त्ति भणिया अणेण। 'भयवं, कहिं तुमं एत्थं' ति पुच्छिओ[2] सन्तिमईए। भणियं च णेण। आसन्नं मे तवोवणं। पयट्टो संझोवासणनिमित्तं गिरिनइं,अन्तराले य दिट्ठा तुमं ति वलिओ वत्तिणीओ। ता साहेहि अज्जे, का तुमं, कहं वा एयाइणी, किं वा ते इमस्स ववसायस्स कारणं ति। तओ चिन्तियं सन्तिमईए। हद्धी मुणिकुमारओ खु एसो, न जुत्तं च अप्पणा अप्पाणयं कहेउं, एसो य एवं वाहरइ; ता किमेत्थ उचियं। अहवा माणणीया तवस्सिणो। वरं अत्तणो लहुत्तणं ति। साहेमि[3] भयवओ, न एत्थ अत्तणो वि लाघवं। आवया खु एसा, देवयाकप्पो य भयवं ति। चिन्तिऊण जंपियमिमीए। भयवं,

चिन्तितं च तेन–अहो एषाऽऽकृतिः, एष च पाश इति विरुद्धमेतद्। अथवा नास्ति कर्मपरिणत्या विरुद्धमिति। चिन्तयित्वा अभ्युक्षिता कमण्डलुपानीयेन। समागता चेतना, उच्छ्वसितं मनाक्, उन्मिलिते लोचने, दृष्टो मुनिकुमारकः। संत्रस्ता चैषा। भणिता च तेन–वत्से! अलं संत्रासेन, मुनिकुमारकोऽहम्। ततः प्रणतोऽनया। 'अविधवा भव' इति भणिताऽनेन। 'भगवन्! कुत्र(कुतः) त्वमत्र' इति पृष्टः शान्तिमत्या। भणितं च तेन–आसन्नं मे तपोवनम्। प्रवृत्तः सन्ध्योपासननिमित्तं गिरिनदीम्, अन्तराले च दृष्टा त्वमिति वलितो वर्तिनीतः। ततः कथय आर्ये! का त्वम्, कथं वा एकाकिनी, किं वा तेऽस्य व्यवसायस्स कारणमिति। ततश्चिन्तितं शान्तिमत्या। हा धक्, मुनिकुमारकः खल्वेषः, न युक्तं चात्मनाऽऽत्मानं कथयितुम्, एष चैवं व्याहरति, ततः किमत्रोचितम्। अथवा माननीयाः तपस्विनः, वरमात्मनो लघुत्वमिति। कथयामि भगवतः। नात्रात्मनोऽपि लाघवम्। आपद् खल्वेषा, देवताकल्पश्च भगवानिति।

---

१ एसा क। २ पुच्छियं क। ३ भगवओ साहिएण ग।

रायउरसामिणो सङ्खरायस्स धूया अहं, सत्थभङ्गविब्भमेण एगागिणी, अज्जउत्तो न दीसइ त्ति इमस्स ववसायस्स कारणं ति। भणिऊण रोविउं पयत्ता। भणिया य णेण। अज्जे, मा रुय। ईइसो एस संसारो, विचित्तयाए कम्मपरिणामस्स अणुगरेइ नडपेडयं। खणेण विओगो, तेणेव संगमो; खणेण सोगो, तेणेव पमोओ; खणेण आवया, तेणेव संपय त्ति। एवंविहे य एयंमि बुद्धिमन्तेण सत्तेण आवडिए वि विसमदसाविभाए न सेवियव्वो विसाओ, न कायव्वमणुचियं, न मोत्तव्वं सत्तं, न उज्झियव्वो उच्छाहो। एवं च वट्टमाणो [1]सत्तो पुरिसयारजेयं कम्मं खविऊणं लङ्घेइ आवयं। ता [2]अज्जे मुञ्च विसायं। पुणो वि य करुणापवन्नचित्तेण 'कालोचियमिणं'ति विसेसओ निरूविऊण भणियं मुणिकुमारएणं। अन्नं च। लक्खणओ [3]अवगच्छामि, न विवन्नो ते भत्ता, जओ सुहफलोदओ आभोगो, कणगावदाया देहच्छवी, परहुयालवियमणहरो सद्दो, सुपइट्ठिया चलणा, वियडं नियम्बफलयं, दाहिणावत्तसंगया नाही, अमिलाण-

चिन्तयित्वा जल्पितमनया। भगवन्! राजपुरस्वामिनः शङ्खराजस्य दुहिताऽहम्, सार्थभङ्गविभ्रमेणैकाकिनी, आर्यपुत्रो न दृश्यते इत्यस्य
व्यवसायस्य कारणमिति भणित्वा रोदितुं प्रवृत्ता। भणिता च तेन–आर्ये! मा रुदिहि। ईदृश एष संसारः, विचित्रतया कर्मपरिणाम-
स्यानुकरोति नटपेटकम्। क्षणेन वियोगः, तेनैव संगमः, क्षणेन शोकः, तेनैव प्रमोदः, क्षणेनापद्, तेनैव संपदिति। एवंविधे चैतस्मिन्
बुद्धिमता सत्त्वेन आपतितेऽपि विषमदशाविभागे न सेवितव्यो विषादः, न कर्तव्यमनुचितम्, न मोक्तव्यं सत्त्वम्, न उज्झितव्य
उत्साहः। एवं च वर्तमानः सत्त्वः पुरुषकारजेयं कर्म क्षपयित्वा लङ्घयत्यापदम्। तत आर्ये! मुञ्च विषादम्। पुनरपि च करुणाप्रपन्न-
चित्तेन 'कालोचितमिदम्' इति विशेषतो निरूप्य भणितं मुनिकुमारकेन। अन्यच्च, लक्षणतोऽवगच्छामि, न विपन्नस्ते भर्ता, यतः शुभ-
फलोदय आभोगः, कनकावदाता देहच्छविः, परभृतालपितमनोहरः शब्दः, सुप्रतिष्ठितौ चरणौ, विकटं नितम्बफलकम्, दक्षिणावर्तसंगता

---

[1] संतो क। [2] मुञ्च अज्जे ख। [3] वगच्छामि ख।

कन्तिसोहा करा, संपुण्णकला[1]मियंको व्व परिमण्डलं वयणकमलं, महुगुलियासरिसाइं लोयणाइं, सुपइट्ठियनिद्धतिलयभूसियं निडालं, सिहिणकिण्हकुडिला सिरोरुहा। ता एवंविहेहिं लक्खणेहि न नारी वेहव्वदुक्खमणुहवइ, पुत्तभाइणी य होइ त्ति। ता एहि वच्छे, कुलवइं वन्दसु त्ति। तओ 'जं भयवं आणवेइ'त्ति भणिऊण गया तवोवणं। वन्दिओ कुलवई, अहिणन्दिया य णेण। साहिओ वइयरो मुणिकुमारएणं। समासासिया कुलवइणा, भणिया य णेणं। वच्छे, न संतप्पियव्वं। नाणओ [2]अवगच्छामि, थेवदियहेहिं चेव एत्थं तवोवणे भविस्सइ ते समागमो पिययमेणं ति। तओ 'न अन्नहा रिसिवयणं'ति पडिस्सुयमिमीए। समप्पिया तावसीणं कुलवइणा[3]॥

इओ य अन्नेसमाणाणं सबरपुरिसपल्लिणाहकुमाराणं अइक्कन्तो वासरो। 'न दिट्ठा देवि'त्ति विसण्णा एए, मिलिया एगओ, समागया सत्थं। भणियं पल्लिणाहेणं। देव, न कायव्वो विसाओ, अवस्समेव जुज्जइ देवो देवीए। कस्स वा विसमदसाविभागो न होइ।

नाभिः, अम्लानकान्तिशोभौ करौ, संपूर्णकलामृगाङ्क इव परिमण्डलं वदनकमलम्, मधुगुलिकासदृशे लोचने, सुप्रतिष्ठितस्निग्धतिलकभूषितं ललाटम्, श्लक्ष्णकृष्णकुटिलाः शिरोरुहाः। तत एवंविधैर्लक्षणैर्न नारी वैधव्यदुःखमनुभवति, पुत्रभागिनी च भवतीति। तत एहि वत्से! कुलपतिं वन्दस्वेति। ततो 'यद् भगवान् आज्ञापयति' इति भणित्वा गता तपोवनम्। वन्दितः कुलपतिः, अभिनन्दिता च तेन। कथितो व्यतिकरो मुनिकुमारकेन। समाश्वासिता कुलपतिना, भणिता च तेन। वत्से! न संतप्तव्यम्। ज्ञानतोऽवगच्छामि, स्तोकदिवसैरेवात्र तपोवने भविष्यति ते समागमः प्रियतमेनेति। ततो 'नान्यथा ऋषिवचनम्' इति प्रतिश्रुतमनया। समर्पिता तापसीनां कुलपतिना॥

इतश्चान्वेषमाणानां शबरपुरुषपल्लीनाथकुमाराणामतिक्रान्तो वासरः। 'न दृष्टा देवी' इति विषण्णा एते, मिलिता एकतः, समागताः सार्थम्। भणितं पल्लीनाथेन। देव! न कर्तव्यो विषादः, अवश्यमेव युज्यते देवो देव्या। कस्य वा विषमदशाविभागो न भवति।

---

१ –मियंक व्व क। २ वगच्छामि ख। ३ पडिजागरणीया एसा। 'जं भयवं आणवेइ'त्ति भणिऊण णीया णिययमासमं–इत्यधिकः पाठः कपुस्तकप्रान्तभागे।

ता परिसंथवेउ देवो परियणं, 'कालसज्झं [1]चिमं पओयणं'ति करेउ सयलपरियणसाहारणं पाणवित्तिं। तओ 'जुत्तमेयं'ति चिन्तिऊण परियणाणुरोहेणं कया पाणवित्ती। अत्थुयं सयणिज्जं, णुवण्णो एसो, तओ नाइदूरंमि पल्लीवई य। तओ बहुवोलियाए रयणीए थाणयनिविट्ठा तुरियतुरियमागया सबरपुरिसा। भणिओ णेहिं पल्लीवई। सामि, परो [2]मरइ, परो [2]मरइ त्ति। तओ उट्ठिओ एसो, चडावियं [3]धणुवरं, नि[4]बद्धा नाहला। पुच्छिया य एए। हरे किमेयंति। तेहिं भणियं। सामि, न निस्संसयं वियाणामो। एत्तियं पुण तक्केमो, 'महन्तो सत्थो पविट्ठो'त्ति अवगच्छिय अवस्समेत्थ नी[5]सरइ द्रोणीओ पल्लीवइ त्ति संपहारिऊण वीसउरसामिणा धाडी पेसिय त्ति, [6]जओ समागयं साहणं। पल्लिणाहेण भणियं। अहो न साहियं सामिकज्जं ति। अविसाई वि विहुरेसु विसण्णं मे चित्तं। अहवा न एस कालो विसायस्स। एह तत्थेव गच्छामो; मा इह सामिसत्थपीडा भविस्सइ। साहिओ एस वइयरो साणुदेवस्स। भणिओ य एसो।

ततः परिसंस्थापयतु देवः परिजनम्, 'कालसाध्यं चेदं प्रयोजनम्' इति करोतु सकलपरिजनसाधारणां प्राणवृत्तिम्। ततो 'युक्तमेतद्' इति चिन्तयित्वा परिजनानुरोधेन कृता प्राणवृत्तिः। आस्तृतं शयनीयम्, निपन्न एषः, ततो नातिदूरे पल्लीपतिश्च। ततो बहुव्यतिक्रान्तायां रजन्यां स्थानकनिविष्टास्त्वरितत्वरितमागताः शबरपुरुषाः। भणितस्तैः पल्लीपतिः। स्वामिन्! परो म्रियते परो म्रियते इति। तत उत्थित एषः, आरोपितं धनुर्वरम्, निबद्धा नाहला (इषुधिः ?)। पृष्टाश्चैते-अरे किमेतदिति। तैर्भणितम्-स्वामिन्! न निःसंशयं विजानीमः। एतावत् पुनः तर्कयामः 'महान् सार्थः प्रविष्टः' इत्यवगत्यावश्यमत्र निःसरति [7]द्रोणीतः पल्लीपतिरिति संप्रधार्य विश्वपुरस्वामिना धाटिः प्रेषितेति, यतः समागतं साधनम्। पल्लीनाथेन भणितम्-अहो न साधितं स्वामिकार्यमिति। अविषाद्यपि विधुरेषु विषण्णं मे चित्तम्। अथवा नैष कालो विषादस्य। एत तत्रैव गच्छामः, मेह स्वामिसार्थपीडा भविष्यति। कथित एष व्यतिकरः

---

[1] इमं क। [2] सरइ ख। [3] धणुहं क। [4] निपुद्धा क, निविद्धा ख। [5] निंस्सरइ क। [6] तओ ग। [7] द्रोणी तु शैलयोः सन्धिः—अभि० का० ४-५४१।

कुमारे अप्पमत्तेण होयव्वं। कज्जगरुययाए पडिस्सुयमणेण। तओ दूरओ चेव पणमिऊण कुमारं पयट्टो पल्लीवई। सुओ एस वइयरो कुमारेण[1]। चिन्तियं च णेणं। अहो महाणुभावया पल्लिणाहस्स। पडिवन्नभिच्चभावो य एसो। ता जइवि अजुत्तयारी तहावि न जुत्तमेयंमि पयट्टे उयासीणयं भाविउंति। उट्ठिओ कुमारो, गहियं खग्गरयणं, करंमि घेत्तूण भणिओ साणुदेवो। सत्थवाहपुत्त, न मे पणयभङ्गो कायव्वो त्ति। पत्थेमि सत्थवाहपुत्तं। साणुदेवेण भणियं। आणवेउ देवो। कुमारेण भणियं। तए इहेव चिट्ठियव्वं कालं वा नाऊण पयाणयं दायव्वं। अहं पुण पेच्छामि ताव, किमेयस्स पल्लिवइणो संजायं ति। किंकायव्वमूढे य साणुदेवे अइन्न[2]पडिवयणे य ‘अलमन्नहा[3]वियप्पेणं’ति भणिऊण धाविओ कुमारसेणो। जाव आवडियमाओहणं सबरधाडीणं। ‘हण हण’ त्ति उद्धाइओ कलयलो। छाइयं [4]नहं सायएहिं। एत्थन्तरंमि मिलिओ कुमारो, दिट्ठो पल्लिवइणा, भणिओ य णेण। देव, किं बहुणा जंपिएण; कालोचियमियं

सानुदेवस्य। भणितश्चैषः—कुमारेऽप्रमत्तेन भवितव्यम्। कार्यगुरुकतया प्रतिश्रुतमनेन। ततो दूरत एव प्रणम्य कुमारं प्रवृत्तः पल्लीपतिः। श्रुत एष व्यतिकरः कुमारेण। चिन्तितं च तेन—अहो महानुभावता पल्लीनाथस्य। प्रतिपन्नभृत्यभावश्चैषः। ततो यद्यपि अयुक्तकारी, तथापि न युक्तमेतस्मिन् प्रवृत्ते उदासीनतां भावयितुमिति। उत्थितः कुमारः, गृहीतं खड्गरत्नम्। करे गृहीत्वा भणितः सानुदेवः। सार्थवाहपुत्र! न मे प्रणयभङ्गः कर्तव्य इति। प्रार्थये सार्थवाहपुत्रम्। सानुदेवेन भणितम्—आज्ञापयतु देवः। कुमारेण भणितम्—त्वया इहैव स्थातव्यम् कालं वा ज्ञात्वा प्रयाणकं दातव्यम्। अहं पुनः प्रेक्षे तावत् किमेतस्य पल्लीपतेः संजातमिति। किंकर्तव्यमूढे च सानुदेवेऽदत्तप्रतिवचने च ‘अलमन्यथा विकल्पेन’ इति भणित्वा धावितः कुमारसेनः। यावदापतितमायोधनं शबरधाटीनाम्। ‘जहि जहि’ इत्युद्धावितः कलकलः। छादितं नभः सायकैः। अत्रान्तरे मिलितः कुमारः, दृष्टः पल्लीपतिना, भणितश्च तेन। देव! किं बहुना जल्पि-

---

१ दरविउद्धेण—इत्यधिकः कपुस्तके। २ अदिन्न—क। ३ -वियप्पिएणं क। ४ नहंगणं क।

पेक्खउ देवो भिच्चावयवपरक्कमं ति। तओ कुमारेण कड्ढियं मण्डलग्गं। केसरिकिसोरओ विय अणवेक्खिऊण [1]रिउबलं पविट्ठो सबरमज्झे। अहो देवस्स परक्कमो त्ति हरिसिओ पल्लीवई। आवडियं पहाणजुज्झं, पाडिया कुलउत्तया, भग्गा धाडी, वाणरेहिं विय बुक्कारियं सबरेहिं। तओ अमरिसेण [2]नियत्ता ठक्कुरा। थेवा सबर त्ति वेढिया [3]अससाहणेणं। संपलग्गं जुज्झं। महया विमद्देण निज्जिया सबरा। पाडिया कुमारपल्लीवई, गहिया य णेहिं। कुमारचरिएण विम्हिया ठक्कुरा। को उण एसो त्ति चिन्तियमणेहिं। नीया वीसउरं, कुमारचरियसणाहं च निवेइया [4]सबरकेउणो, परक्कमवल्लहत्तणेण दिट्ठा य णेणं। कुमाररूवाइसएण विम्हिओ राया। चिन्तियं च णेण। अहो को उण एसो महाणुभावो। अहवा भवियव्वमणेण नरवइसुएणं। अन्नहा कहं ईइसा रूवपरक्कम त्ति। ता गवेसिस्सामि ताव एयं, इमं पुण तक्करं वावाएमि त्ति। आइट्ठं च णेणं। हरे वावाएह एयं दुरायारं तक्करं, इमं पुण महाणुभावं पडियग्गह त्ति। कुमारेण भणियं।

तेन, कालोचितमिदं प्रेक्षतां देवो भृत्यावयवपराक्रममिति। ततः कुमारेण कृष्टं मण्डलाग्रम्। केसरिकिशोरक इवानपेक्ष्य रिपुबलं प्रविष्टः शबरमध्ये। अहो देवस्य पराक्रम इति हर्षितः पल्लीपतिः। आपतितं प्रधानयुद्धम्, पातिताः कुलपुत्रकाः, भग्ना धाटी। वानरैरिव बूत्कारितं (शब्दितम्) शबरैः। ततोऽमर्षेण निवृत्ताः ठक्कुराः। स्तोकाः शबरा इति वेष्टिता अश्वसाधनेन। संप्रलग्नं युद्धम्। महता विमर्देन (विनाशेन) निर्जिताः शबराः। पातितौ कुमारपल्लीपती, गृहीतौ च तैः। कुमारचरितेन विस्मिताः ठक्कुराः। कः पुनरेष इति चिन्तितमेभिः। नीतौ विश्वपुरम्, कुमारचरितसनाथं च निवेदितौ शबरकेतोः, पराक्रमवल्लभत्वेन दृष्टौ च तेन। कुमाररूपातिशयेन विस्मितो राजा। चिन्तितं च तेन। अहो कः पुनरेष महानुभावः। अथवा भवितव्यमनेन नरपतिसुतेन। अन्यथा कथमीदृशौ रूपपराक्रमौ इति। ततो गवेषयामि तावदेतम्, इमं पुनः तस्करं व्यापादयामीति। आदिष्टं च तेन-अरे व्यापादयतैतं दुराचारं

---

१ रिवु-क। २ निउत्ता क। ३ 'दरिया' इत्यधिकः कपुस्तके। ४ समरकेउणो ख।

अहो मे महाणुभावया, जो एयंमि वावाइज्जमाणे पाणे रक्खेमि। ता किं इमिणा[1]; ममं चेव वावायसु त्ति। तओ 'अहो से धीरगरुओ आलावो; अहवा उचियमेव एयं इमाए आगिईए'त्ति चिन्तिऊण जंपियं नरिन्देणं। भो महाणुभाव, कं पुण भवन्तमवगच्छामि। तओ कुमारेण निरूवियाइं पासाइं। एत्थन्तरंमि मुणियकुमारवुत्तन्तो कइवयपुरिसेहिं[2] घेत्तूण दरिसणिज्जं कुमारवुत्तन्तसाहणत्थमेव राइणो समागओ साणुदेवो। पडिहारिओ पडिहारेणं। अणुमओ राइणा। पविट्ठो य एसो। दिट्ठो नरवई। समप्पियं दरिसणिज्जं। बहुमन्निओ राइणा। दवावियं आसणं। भणिओ य णेणं 'उवविससु'त्ति। सो य तहा अणेयपहारपीडियं पेच्छिऊण कुमारं गहिओ महासोएणं। निवडिओ धरणिवट्ठे। तओ राइणा 'हा किमेयं'ति सिञ्चाविओ उदएणं, वीयाविओ चेलकण्णेहिं। समागया से चेयणा। भणिओ य राइणा। भद्द, किमेयं ति। साणुदेवेण भणियं। देव, सच्चमेयं रिसिवयणं 'असारो संसारो, आवयाभायणं च एत्थ पाणिणो', जेण चम्पाहिवसु-

तस्करम्, इमं पुनर्महानुभावं प्रतिजागृतेति। कुमारेण भणितम्—अहो मे महानुभावता, य एतस्मिन् व्यापाद्यमाने प्राणान् रक्षामि। ततः किमनेन, मां चैव व्यापादयेति। ततो 'अहो तस्य धीरगुरुक आलापः, अथवोचितमेवैतदस्या आकृत्याः' इति चिन्तयित्वा जल्पितं नरेन्द्रेण। भो महानुभाव! कं पुनर्भवन्तमवगच्छामि। ततः कुमारेण निरूपितानि पार्श्वाणि। अत्रान्तरे ज्ञातकुमारवृत्तान्तः कतिपयपुरुषैर्गृहीत्वा दर्शनीयं कुमारवृत्तान्तकथनार्थमेव राज्ञः समागतः सानुदेवः। प्रतिहारितः (अवरुद्धः) प्रतीहारेण। अनुमतो राज्ञा। प्रविष्टश्चैषः। दृष्टो नरपतिः। समर्पितं दर्शनीयम्। बहुमानितो राज्ञा। दापितमासनम्। भणितश्च तेन 'उपविश' इति। स च तथाऽनेकप्रहारपीडितं प्रेक्ष्य कुमारं गृहीतो महाशोकेन, निपतितो धरणीपृष्ठे। ततो राज्ञा 'हा किमेतद्' इति सिञ्चित उदकेन, वीजितश्च चेलकर्णैः। समागता तस्य चेतना। भणितश्च राज्ञा—भद्र! किमेतदिति। सानुदेवेन भणितम्—देव! सत्यमेतद् ऋषिवचनम्, 'असारः

---

[1] एइणा क-ख। [2] 'परियरिओ' इत्यधिकः कपुस्तके।

यस्स कुमारसेणस्स वि ईइसी अवत्थ त्ति। तओ 'न अन्नहा मे वियप्पियं'ति चिन्तिऊण जंपियं नरिन्देणं। भद्द, कहं पुण एस एद्दहमेत्तपरियणो इमं अरण्णमुवगओ त्ति। साणुदेवेण भणियं। देव, न-याणामि परमत्थं; मए वि एस रायउराओ तामलित्तिं पत्थिएणं चम्पावासए सन्निवेसे कलत्तमेत्तपरिवारो वणनिउञ्जे[1] उवलद्धो त्ति। रायउरदंसणाणुसरणेण पच्चभिन्नाओ य एसो। जाया य मे चिन्ता। किं पुण एस रइदुइओ विय मयरकेऊ रायधूयामेत्तपरियणो एवं वट्टइ त्ति। एवमाई साहिओ पत्थणापज्जन्तो सयलवइयरो। तओ देव, आयण्णियं मए सवरपुरिसेहिंतो, जहा देवाएसागयाए धाडीए नीया कुमारपल्लीवइणो। एयं च सोऊण इमस्स चेव वइयरस्स विन्नवणनिमित्तं आगओ देवसमीवं। [2]संपयं देवो पमाणं ति। राइणा भणियं। भद्द, साहु कयं ति। जुत्तमेव एयं तएजारिसाणं महाणुभावाणं। समाणत्तो य परियणो। हरे एयाणं जत्तं करेहि[3] त्ति। तओ आएसाणन्तरमेव पेसिया कच्छन्तरं[4]। निमियाओ पवरसेज्जाओ। सद्दाविया वेज्जा।

संसारः, आपद्भाजनं चात्र प्राणिनः', येन चम्पाधिपसुतस्य कुमारसेनस्यापिदृश्यवस्थेति। ततो 'नान्यथा मे विकल्पितम्' इति चिन्तयित्वा जल्पितं नरेन्द्रेण। भद्र! कथं पुनरेष एतावन्मात्रपरिजन इदमरण्यमुपगत इति। सानुदेवेन भणितम्–देव! न जानामि परमार्थम्, मयाऽपि एष राजपुरात् तामलिप्तीं प्रस्थितेन चम्पावासके सन्निवेशे कलत्रमात्रपरिवारो वननिकुञ्जे उपलब्ध इति। राजपुरदर्शनानुस्मरणेन प्रत्यभिज्ञातश्चैषः। जाता च मे चिन्ता। किं पुनरेष रतिद्वितीय इव मकरकेतू राजदुहितृमात्रपरिजन एवं वर्तत इति। एवमादिः कथितः प्रार्थनापर्यन्तः सकलव्यतिकरः। ततो देव! आकर्णितं मया शबरपुरुषेभ्यः, यथा देवादेशादागतया धाट्या नीतौ कुमारपल्लीपती। एतच्च श्रुत्वा अस्य चैव व्यतिकरस्य विज्ञापननिमित्तमागतो देवसमीपम्। साम्प्रतं देवः प्रमाणमिति। राज्ञा भणितम्–भद्र साधु कृतमिति। युक्तमेवैतत् त्वादृशानां महानुभावानाम्। समाज्ञप्तश्च परिजनः–अरे एतयोर्यत्नं कुर्विति। तत आदेशानन्तरमेव

---

[1] –निगुंजे क। [2] संपइ क। [3] करेह क। [4] कच्छंतरंमि ख।

पत्थुयं वणकम्मं। पेसिया य रायधूयागवेसणनिमित्तं निययपुरिसा।

अइक्कन्तेसु य कइवयदिणेसु[1] 'विसमभूमिसंठिओ से सत्थो'त्ति अवगच्छिऊण सद्दाविओ साणुदेवो। भणिओ य राइणा। भद्द,विसमभूमिसंठिओ ते सत्थो। दूरं च गन्तव्वं, पच्चासन्नो य घणसमओ; थाणे य रायपुत्तो, ता गच्छ तुमं ति। साणुदेवेण भणियं। देव, रायपुत्तं वज्जिय न मे पाया वहन्ति। कुमारेण[2] भणियं। भद्द, अलं इमिणा अधीरपुरिसोचिएणं चेट्ठिएणं। कज्जपहाणा खु पुरिसा हवन्ति। ता कीरउ महारायवयणं। अकीरमाणे य एयंमि अहिया मे अणिव्वुई। साणुदेवेण भणियं। देव, जं तुमं आणवेसि त्ति। [ततो पणमिऊणं कुमारं] गओ साणुदेवो। अइक्कन्तो[3] घणसमओ। पउणा कुमारपल्लीवई। कयं वद्धावणयं। भणिओ राइणा कुमारो। वच्छ, किं ते पियं करेमि। पेसिया ताव मए तुह जायागवेसणनिमित्तं निययपुरिसा। तत्थ उण केइ आगया अवरे न व त्ति।

प्रेषितौ कक्षान्तरम्। निर्मिते प्रवरशय्ये। शब्दायिता वैद्याः। प्रस्तुतं व्रणकर्म। प्रेषिता राजदुहितृगवेषणनिमित्तं निजपुरुषाः।

अतिक्रान्तेषु च कतिपयदिनेषु 'विषमभूमिसंस्थितस्तस्य सार्थः' इत्यवगत्य शब्दायितः सानुदेवः। भणितश्च राज्ञा–भद्र! विषमभूमिसंस्थितस्ते सार्थः, दूरं च गन्तव्यम्, प्रत्यासन्नश्च घनसमयः, स्थाने च राजपुत्रः, ततो गच्छ त्वमिति। सानुदेवेन भणितम्–देव! राजपुत्रं वर्जित्वा न मे पादौ वहतः। कुमारेण भणितम्–भद्र! अलमनेनाधीरपुरुषोचितेन चेष्टितेन। कार्यप्रधानाः खलु पुरुषा भवन्ति। ततः क्रियतां महाराजवचनम्। अक्रियमाणे चैतस्मिन् अधिका मेऽनिर्वृतिः। सानुदेवेन भणितम्–देव! यत्त्वमाज्ञापयसीति। [ततः प्रणम्य कुमारं] गतः सानुदेवः। अतिक्रान्तो घनसमयः। प्रगुणौ कुमारपल्लीपती। कृतं वर्धापनकम्। भणितो राज्ञा कुमारः–वत्स! किं ते

---

१ दियहेसु ख। २ 'गओ साणुदेवो सेणकुमारसमीवं। साहियं से णरवइसासणं'इत्यधिकः पाठः खपुस्तके। ३ समागओ घणसमओ। ततो पूरिऊण कासयमणोरहे निप्फाइऊण सव्वसस्से–इत्यधिकः खपुस्तके।

एत्थन्तरंमि विइयकुमारवुत्तन्तेणेव भणियं सोमसूरेण। देव, सुमरियं मए कुमारस्स पिययमासंजोयकारणं ति। राइणा भणियं। कहेउ अज्जो, कीइसं। सोमसूरेण भणियं।

देव, अत्थि कायम्बरीए अडवीए पियमेलयं नाम तित्थं। तस्स किल एसा उट्ठाणपारियावणिया। इमीए चेव कायम्बरीएं[1] विसाहवद्धणं नाम नयरं अहेसि। अजियबलो राया, वसुंधरो सेट्ठी, पियमित्तो से सुओ। लद्धा य णेण तन्नयरवत्थव्वयस्स ईसरखन्दस्स धूया नीलुया[2] नाम कन्नया। अइक्कन्तो कोइ कालो। अवत्ते विवाहे पत्ताणि जोव्वणं। एत्थन्तरंमि विचित्तयाए कम्मपरिणामस्स, 'चञ्चला सिरि' त्ति सच्चयाए लोयपवायस्स[3] वसुंधरसेट्ठिणो वियलिओ विहवो। 'वुड्ढो चेव अहयं; ता अलं मे परमत्थसंपायणरहिएणं जीविएणं' ति चिन्तिऊण य[4] अहिमाणेक्करसिययाए परिचत्तमणेण जीवियं। पियमित्तो वि य 'अमाणणीया दरिद्द' त्ति परिभूओ परियणेणं 'करे-

---

प्रियं करोमि। प्रेषितास्तावन्मया तव जायागवेषणनिमित्तं निजपुरुषाः। तत्र पुनः केऽप्यागता अपरे नवेति।

अत्रान्तरे विदितकुमारवृत्तान्तेनैव भणितं सोमसूरेण। देव! स्मृतं मया कुमारस्य प्रियतमासंयोगकारणमिति। राज्ञा भणितम्—कथयत्वार्यः, कीदृशम्। सोमसूरेण भणितम्—देव! अस्ति कादम्बर्यामटव्यां प्रियमेलकं नाम तीर्थम्। तस्य किलैषा उत्थानपर्यापनिका। अस्यामेव कादम्बर्यां विशाखवर्धनं नाम नगरमासीद्। अजितबलो राजा, वसुन्धरः श्रेष्ठी, प्रियमित्रस्तस्य सुतः। लब्धा च तेन तन्नगरवास्तव्यस्येश्वरस्कन्दस्य दुहिता नीलुका नाम कन्यका। अतिक्रान्तः कोऽपि कालः। अवृत्ते विवाहे प्राप्तौ यौवनम्। अत्रान्तरे विचित्रतया कर्मपरिणामस्य 'चञ्चला श्रीः' इति सत्यतया लोकप्रवादस्य वसुन्धरश्रेष्ठिनो विचलितो विभवः। 'वृद्ध एवाहम्, ततोऽलं मे परमार्थसंपादनरहितेन जीवितेन' इति चिन्तयित्वा च अभिमानैकरसिकतया परित्यक्तमनेन जीवितम्। प्रियमित्रोऽपि च 'अमाननीया

---

[1] अडवीए—इत्यधिकः कपुस्तकप्रान्ते। [2] नीलया क। [3] लोयवायस्स क। [4] विय ख।

न्तस्स वि य अणुट्ठाणं विहलं संपज्जइ'त्ति गहिओ विसाएणं। तओ 'किमिह अत्तणा[1] विडम्बिएणं'ति असाहिऊण परियणस्स निग्गओ नयराओ। निव्वेयगरुययाए अचिन्तिऊण गन्तव्वं अवियारिऊण दिसिवहं पयट्टो उत्तराहिमुहं[2]। गओ थेवं भूमिभागं। दिट्ठो य णेण पियवयंसओ नागदेवो नाम पण्डरभिक्खू। वन्दिओ सविणयं। कहकहवि पच्चभिन्नाओ भिक्खुणा। भणिओ य णेण। वच्छ पियमित्त,कहं ते ईइसी अवत्था, कहिं वा तं एयाई पत्थिओ सि त्ति। पियमित्तेण भणियं। भयवं, परोप्परविरुद्धकारिणं देव्वं पुच्छसु त्ति, जेण तायपुत्तो करिय निरवराहो चेव ईइसं अवत्थं पाविओ म्हि। नागदेवेण भणियं। वच्छ, अवि कुसलं ते तायस्स। पियमित्तेण भणियं भयवं, परिवालियसप्पुरिसमग्गस्स सुरलोयमणुगयस्स वि कुसलं; अकुसलं पुण तायवंसविडम्बयस्स जन्तपुरिसाणुयारिणो[3] पियमित्तस्स, जस्स उभयलोयफलसाहणे असमत्था ईइसी अवत्थ त्ति। नागदेवेण भणियं। वच्छ, अवि अत्थमिओ सो बन्धवकुमुयायरससी। अहो दारुणया संसा-

---

दरिद्राः' इति परिभूतः परिजनेन कुर्वतोऽपि चानुष्ठानं विफलं संपद्यते' गृहीतो विषादेन। ततः 'किमिहात्मना विडम्बितेन' इत्यकथयित्वा परिजनस्य निर्गतो नगरात्। निर्वेदगुरुकतयाऽचिन्तयित्वा गन्तव्यमविचार्य दिक्पथं प्रवृत्त उत्तराभिमुखम्। गतः स्तोकं भूमिभागम्। दृष्टश्च तेन पितृवयस्यो नागदेवो नाम पाण्डरभिक्षुः। वन्दितः सविनयम्। कथं कथमपि प्रत्यभिज्ञातः भिक्षुणा। भणितश्च तेन–वत्स प्रियमित्र ! कथं ते ईदृश्यवस्था, कुत्र वा त्वमेकाकी प्रस्थितोऽसि इति। प्रियमित्रेण भणितम्–भगवन् ! परस्परविरुद्धकारिणं दैवं पृच्छेति येन तातपुत्रः कृत्वा निरपराध एव ईदृशीमवस्थां प्रापितोऽस्मि। नागदेवेन भणितम्–वत्स ! अपि कुशलं ते तातस्य। प्रियमित्रेण भणितम्-परिपालितसत्पुरुषमार्गस्य सुरलोकमनुगतस्यापि कुशलम्, अकुशलं पुनस्तातवंशविडम्बकस्य यन्त्रपुरुषानुकारिणः प्रियमित्रस्य, यस्योभयलोकफलसाधनेऽसमर्था ईदृश्यवस्थेति। नागदेवेन भणितम्–वत्स ! अपि अस्तमितः स वान्धवकुमुदाकर-

---

१ अप्पणा ख। २ उत्तरावहं क। ३ जहन्न-क।

रस्स, अहो निरवेक्खया मच्चुणो। अहवा सुरासुरसाहारणो अप्पडियारो खु एसो। ता किं एत्थ करीयउ। अणुवाओ खु एसो, उवाओ य धम्मो, जओ जेऊण धम्मेण मच्चुं अयरामरगइमुवगया [1]मुणओ त्ति। अन्नं च। वच्छ, कहं ते उभयलोयफलसाहणे असमत्था अवत्था; जओ पुरिसयारसज्झं फलं, विवेगउच्छाहमूलो य पुरिसयारो, उभयसंपन्नो य तुमं। पयइनिग्गुणे य संसारे परलोयफलसाहणं चेव सुन्दरं न उण इहलोइयं ति। जोग्गो य तुमं धम्मसाहणे; ता कहमसमत्थो त्ति। पियमित्तेण भणियं। भयवं, जइ जोग्गो, ता आइसउ किं मए कायव्वं ति। नागदेवेण भणियं। वच्छ, इमं चेव भिक्खुत्तणं। पडिस्सुयमणेण। साहिओ से गोरसपरिवज्जणाइओ नियकिरियाकलावो। परिणओ य एयस्स। अइक्कन्ता कइवि दियहा। दिन्ना य से [2]दिक्खा। करेइ विहियाणुट्ठाणं॥ इओ य सा नीलुया कुओ वि एयमवगच्छिऊण 'भत्तारदेवया नारि'त्ति धम्मपरा जाया विसयनिप्पिवासा वि तद्दंसणूसुया, विरहदुब्बलङ्गी दढं खिज्जइ त्ति। अइ-

शशी। अहो दारुणता संसारस्य, अहो निरपेक्षता मृत्योः। अथवा सुरासुरसाधारणोऽप्रतिकारः खल्वेषः। ततः किमत्र क्रियताम्। अनुपायः खल्वेषः, उपायश्च धर्मः, यतो जित्वा धर्मेण मृत्युमजरामरगतिमुपगता मुनय इति। अन्यच्च, वत्स! कथं ते उभयलोकफल साधनेऽसमर्थाऽवस्था, यतः पुरुषकारसाध्यं फलम्, विवेकोत्साहमूलश्च पुरुषकारः, उभयसंपन्नश्च त्वम्। प्रकृतिनिर्गुणे च संसारे परलोकफलसाधनमेव सुन्दरम्, न पुनरैहलौकिकमिति। योग्यश्च त्वं धर्मसाधने, ततः कथमसमर्थ इति। प्रियमित्रेण भणितम्–भगवन्! यदि योग्यस्तत आदिशतु किं मया कर्तव्यमिति। नागदेवेन भणितम्–वत्स! इदमेव भिक्षुत्वम्। प्रतिश्रुतमनेन। कथितस्तस्य गोरसपरिवर्जनादिको निजक्रियाकलापः। परिणतश्चैतस्य। अतिक्रान्ताः कत्यपि दिवसाः। दत्ता च तस्य दीक्षा। करोति विहितानुष्ठानम्। इतश्च सा नीलुका कुतोऽप्येतदवगत्य 'भर्तृदेवता नारी' इति धर्मपरा जाता विषयनिष्पिपासाऽपि तद्दर्शनोत्सुका विरहदुर्बलाङ्गी दृढं क्षीयते इति। अतिक्रान्तः

---

१ मुणिणो क। २ ससमयविहीए-इत्यधिकः ख।

कन्तो कोइ कालो। [1]विहरमाणो य समागओ से भत्ता तन्नयरपच्चासन्नं तवोवणं। सुओ नीलुयाए। तओ अणुन्नविय जणणिजणए गया वन्दणनिमित्तं। दिट्ठो य णाए झाणजोयमुवगओ पियमित्तो। समुप्पन्नं सज्झसं, वेवियाइं अङ्गाइं, विमूढा चेयणा, संभमाइसएण मुच्छिया एसा। 'परित्तायह परित्तायह' त्ति अक्कन्दियं परियणेणं। 'करुणापहाणा मुणि' त्ति परिच्चइय झाणजोयं उट्ठिओ पियमित्तो। 'किमेयं किमेयं' ति पुच्छियमणेणं। साहियं से सहियाहिं। एसा खु ईसरखन्दधूया नीलुया नाम कन्नया दे[2]वयागुरुविइन्नं भवन्तमेव भत्तारं एयावत्थमवलोइऊण मोहमुवगय त्ति। तओ सुमरियमणेणं। 'अहो मे पणइणीए दढाणुरागय' त्ति गहिओ सोएणं। वियलिओ झाणासओ, उल्लसिओ सिणेहो। 'समासस समासस' त्ति अब्भुक्खिया कमण्डलुपाणिएणं। लद्धा य णाए चेयणा। उम्मिलियं लोयणजुयं। दिट्ठो य एसो। सज्झसप[3]वेविरङ्गी उट्ठिया एसा। हरिसविसायगब्भिणं नीससियमिमीए, फुरियं बिम्बाहरेणं,

---

कोऽपि कालः। विहरंश्च समागतस्तस्य भर्त्ता तन्नगरप्रत्यासन्नं तपोवनम्। श्रुतो नीलुकया। ततोऽनुज्ञाप्य जननीजनकौ गता वन्दननिमित्तम्। दृष्टश्च तया ध्यानयोगमुपगतः प्रियमित्रः। समुत्पन्नं साध्वसम्, वेपितान्यङ्गानि, विमूढा चेतना, संभ्रमातिशयेन मूर्च्छितैषा। 'परित्रायध्वं परित्रायध्वम्' इत्याक्रन्दितं परिजनेन। 'करुणाप्रधाना मुनयः' इति परित्यज्य ध्यानयोगमुत्थितः प्रियमित्रः। 'किमेतत् किमेतद्' इति पृष्टमनेन। कथितं तस्याः सखीभिः। एषा खलु ईश्वरस्कन्ददुहिता नीलुका नाम कन्यका देवतागुरुवितीर्णं भवन्तमेव भर्तारमेतदवस्थमवलोक्य मोहमुपगतेति। ततः स्मृतमनेन। 'अहो मे प्रणयिन्या दृढानुरागता' इति गृहीतः शोकेन। विचलितो ध्यानाशयः, उल्लसितः स्नेहः। 'समाश्वसिहि समाश्वसिहि' इत्यभ्युक्षिता कमण्डलुपानीयेन। लब्धा च तया चेतना। उन्मिलितं लोचनयुगम्। दृष्टश्चैषः। साध्वसप्रवेपमानाङ्गी उत्थितैषा। हर्षविषादगर्भितं निःश्वसितमनया, स्फुरितं बिम्बाधरेण, पुलकितान्यङ्गानि, ईषद्वलिततारकं च प्रलो-

---

१ अन्नया—इत्यधिकः क। २ गुरुविइन्नं ख। ३ —वेविरंगी क।

पुलइयाइं अङ्गाइं, ईसिवलियतारयं च पुलोइउमारद्धा। एत्थन्तरंमि दुज्जययाए मयणस्स रम्मयाए विलासाणं विवित्तयाए काणणस्स आवज्जियं से चित्तं। चिन्तियं च णेण। हन्त किमेत्थ जुत्तं ति। एगओ गुरुवयणभङ्गो, अन्नओ अणुरत्तजणवज्जणं ति। उभयं पि गरुयं। अहवा सुयं मए भयवओ सयासे, जहा अखण्डियवयाणं जम्मन्तरिओ हिययइच्छियवत्थुलाभो [1]हवइ; हिययइच्छिओ य मे इमीए समागमो। ता अखण्डिऊण वयं परिच्चएमि जीवियं, जेण उभयं पि गरुयं अवियलं संपज्जइ त्ति। अहवा इमं चेव साहेमि एयाए। पेच्छामि ताव किमेसा जंपइ त्ति। चिन्तिऊण भणिया यणेण। सुन्दरि, अलं खिज्जिएणं। आवज्जियं मे हिययं तुह सिणेहेण। किं तु अणुचिओ [2]अङ्गीकयपरिच्चाओ, अजुत्तो गुरुवयणभङ्गो। सुयं च मए भयवओ सयासे, जहा अखण्डियवयाणं जम्मन्तरिओ हिययइच्छियवत्थुलाहो, हिययइच्छिओ मे इमिणा सब्भावसंभमेणं तुमए सह समागमो। ता आचिक्ख, किं मए कायव्वं ति। नीलुयाए

कितुमारब्धा। अत्रान्तरे दुर्जयतया मदनस्य रम्यतया विलासानां विविक्ततया काननस्यावर्जितं तस्य चित्तम्। चिन्तितं च तेन-हन्त किमत्र युक्तमिति। एकतो गुरुवचनभङ्गोऽन्यतोऽनुरक्तजनवर्जनमिति। उभयमपि गुरुकम्। अथवा श्रुतं मया भगवतः सकाशे, यथाऽखण्डितव्रतानां जन्मान्तरितो हृदयेप्सितवस्तुलाभो भवति, हृदयेप्सितश्च मेऽस्याः समागमः। ततोऽखण्डित्वा व्रतं परित्यजामि जीवितम्, येनोभयमपि गुरुकमविकलं संपद्यते इति। अथवेदमेव कथयाम्येतस्याः। प्रेक्षे तावत् किमेषा जल्पतीति। चिन्तयित्वा भणिता च तेन। सुन्दरि! अलं खेदितेन। आवर्जितं मे हृदयं तव स्नेहेन। किन्तु अनुचितोऽङ्गीकृतपरित्यागः, अयुक्तो गुरुवचनभङ्गः। श्रुतं च मया भगवतः सकाशे, यथाऽखण्डितव्रतानां जन्मान्तरितो हृदयेप्सितवस्तुलाभः, हृदयेप्सितश्च मेऽनेन सद्भावसंभ्रमेण त्वया सह समा-

---

१ नास्ति पाठः क-ख। २ –कयवयपरि–क।

भणियं। अज्जउत्त, जहा उभयं पि संपज्जइ आसन्नं च जम्मन्तरं अप्पवसयाणं बहुमओ य मे इमस्स किलेसायासहेउणो देहस्स चाओ, ता एवं ववत्थिए अज्जउत्तो पमाणं ति। पियमित्तेण भणियं। सुन्दरि, अभिन्नचित्ता मे तुमं। ता किं एत्थ अवरं भणीयइ। पडिवन्नं मए अणसणं। हिययइच्छिओ य मे जम्मन्तरंमि वि तुमए सह समागमो त्ति। नीलुयाए भणियं। अज्जउत्तो पमाणं। पुज्जन्तु ते मणोरहा। अन्नं च। अणुजाणेउ मं अज्जउत्तो हिययइच्छियमणोरहावूरणेण। अहवा भत्तारदेवया इत्थिया; जं सो करेइ, तं तीए अणुचिट्ठियव्वं। कयं चेयं तुमए, अओ अत्थओऽणुमयमेवं ति। आपुच्छियाओ [1]सहीओ, खामिया जणणिजणया। 'मा साहसं मा साहसं'ति वारिज्जमाणी सहीहिं पडिवन्ना अणसणं। जम्मन्तरंमि वि इमिणा चेव भत्तणा अविउत्ता हवेज्ज त्ति संपाडिओ पणिही। ठियाइं अइमुत्तलयालिङ्गियस्स असोयपायवस्स हेट्ठे॥ एत्थन्तरंमि सोऊण नीलुयासहियणकोलाहलं आगओ नागदेवो। दिट्ठो पियमित्तेणं। विलिओ

गमः। तत आचक्ष्व, किं मया कर्तव्यमिति। नीलुकया भणितम्-आर्यपुत्र! यथोभयमपि संपद्यते, आसन्नं च जन्मान्तरमात्मवशगानाम्, बहुमतश्च मेऽस्य क्लेशायासहेतोर्देहस्य त्यागः, तत एवं व्यवस्थिते आर्यपुत्रः प्रमाणमिति। प्रियमित्रेण भणितम्-सुन्दरि! अभिन्नचित्ता मे त्वम्। ततः किमत्रापरं भण्यते। प्रतिपन्नं मयाऽनशनम्। हृदयेप्सितश्च मे जन्मान्तरेऽपि त्वया सह समागम इति। नीलुकया भणितम्-आर्यपुत्रः प्रमाणम्। पूर्यन्तां ते मनोरथाः। अन्यच्च, अनुजानातु मामार्यपुत्रो हृदयेप्सितमथोरथापूरणेन। अथवा भर्तदेवता स्त्री, यत्स करोति तत् तयाऽनुष्ठातव्यम्। कृतं चेदं त्वया, अतोऽर्थतोऽनुमतमेवमिति। आपृष्टाः सख्यः, क्षामितौ जननीजनकौ। 'मा साहसं मा साहसम्' इति वार्यमाणा सखीभिः प्रतिपन्नाऽनशनम्। जन्मान्तरेऽप्यनेनैव भर्त्राऽवियुक्ता भवेयमिति संपादितः प्रणिधिः (संकल्पः)। स्थितावतिमुक्तलतालिङ्गितस्याशोकपादपस्याधः। अत्रान्तरे श्रुत्वा नीलुकासखीजनकोलाहलमागतो नागदेवः। दृष्टः प्रिय-

---

[1] तत्थट्ठियाए चेव-इत्यधिकः क।

य एसो। अब्भुट्ठिओ णेहिं, वन्दिओ य अईवविलिएहिं। 'अहिलसियं संपज्जउ' त्ति अहिणन्दियाइं नागदेवेण। चिन्तियं च णेणं। का उण एसा इत्थिया समाणरूवा उचियवया य पियमित्तस्स। वयणवियारेणं सिणेहनिब्भरा एयंमि लक्खिज्जए, विलिओ य एसो; ता किं पुण इमं ति। एत्थन्तरंमि सगग्गयक्खरं जंपियं सहीहिं। भयवं एसा खु ईसरखन्दधूया नीलुया नाम कन्नया, विइन्ना[1] पियमित्तस्स, पडिकूलयाए देव्वस्स न परिणीया य णेणं। 'पव्वइओ एसो' त्ति कुओ वि वियाणियमिमीए। तओ 'भत्तारदेवया नारि' त्ति धम्मपरा जाया विसयनिप्पिवासा वि य पिययमदंसणूसुया विरहपरिदुब्बलङ्गी दढं खिज्जइ त्ति। एवमाइ साहियमणसणावसाणं। चिन्तियं नागदेवेण। अहो दारुणया मयणवियारस्स, जेण पियमित्तेणावि एयं ववसियं ति। अहवा ईइसो एस मयणो मोहणं विवेयस्स तिमिरं दंसणस्स ओच्छायणं चरित्तस्स। एएणमभिभूया पाणिणो नत्थि तं जं न समायरन्ति[2] त्ति। तेण[3] अविसओ उवएसस्स। ता इमं एत्थ

मित्रेण। व्रीडितश्चैषः। अभ्युत्थित आभ्याम्, वन्दितश्चातीवव्रीडिताभ्याम्। 'अभिलषितं संपद्यताम्' इति अभिनन्दितौ नागदेवेन। चिन्तितं च तेन–का पुनरेषा स्त्री, समानरूपा उचितवयाश्च प्रियमित्रस्य। वदनविकारेण स्नेहनिर्भरा एतस्मिन् लक्ष्यते, व्रीडितश्चैषः, ततः किं पुनरिदमिति। अत्रान्तरे सगद्गदाक्षरं जल्पितं सखीभिः। भगवन्! एषा खलु ईश्वरस्कन्ददुहिता नीलुका नाम कन्यका, वितीर्णा, प्रियमित्रस्य, प्रतिकूलतया दैवस्य न परिणीता च तेन। 'प्रव्रजित एषः' इति कुतोऽपि विज्ञातमनया। ततो 'भर्तृदेवता नारी' इति धर्मपरा जाता विषयनिष्पिपासाऽपि च प्रियतमदर्शनोत्सुका विरहपरिदुर्बलाङ्गी दृढं खिद्यते इति। एवमादि कथितमनशनावसानम्। चिन्तितं नागदेवेन–अहो दारुणता मदनविकारस्य, येन प्रियमित्रेणाप्येतद् व्यवसितमिति। अथवेदृश एष मदनो मोहनं विवेकस्य तिमिरं दर्शनस्य अवच्छादनं चारित्रस्य। एतेनाभिभूताः प्राणिनो नास्ति तद् यन्न समाचरन्तीति। तेनाविषय उपदेशस्य। तत इदमत्र प्राप्तकालम्,

---

१ दिन्ना क। २ आयरंति क। ३ ते य ख।

पत्तयालं, जं किंचि भणिय अवक्कमामि इमाओ विभागाओ; अणभिप्पेयकारावओ माणणीओ वि दढमुव्वेयजणओ त्ति। चिन्तिऊण जंपियमणेणं। वच्छ पियमित्त, जाणामि अहमिणं, नत्थि दुक्करं सिणेहस्स, सब्भावगेज्झाणि य सज्जणहिययाणि। एयावत्थेण वि न कओ अङ्गी[1]कयपरिच्चाओ। ता कीस तुमं खिज्जसि त्ति। परिच्चय विसायं। ईइसो एस संसारो, किमेत्थ करीयउ। तहावि तत्तभावणा कायव्व त्ति भणिऊण गओ नागदेवो। इयरो वि पियमित्तो तप्पभूइमेव पूइज्जमाणो सयणवग्गेण अहिणन्दिज्जमाणो राइणा अपरिवडियतहाविहपरिणामो जीविऊण दुमासमेत्तं कालं चइऊण देहपञ्जरं सह नीलुयाए उववन्नो किन्नरेसु। पउत्तो ओही, विइओ पुव्ववुत्तन्तो, समागओ सह पिययमाए तमुज्जाणं। कया उज्जाणपूया। निम्मियं असोयपायवासन्नंमि देउलं। निविट्ठो [2]आणन्ददेवो निव्वुई य तस्स सहचरी देवया। गयाणि नन्दणवणं। दिट्ठा य तत्थ एगा विज्जाहरी पिययमविओयदुक्खेण अच्चन्तदुब्बला दीहदीहं नीससन्ती

यत्किञ्चिद् भणित्वाऽपक्रामामि अस्माद्विभागात्, अनभिप्रेतकारको माननीयोऽपि दृढमुद्वेगजनक इति। चिन्तयित्वा जल्पितमनेन। वत्स प्रियमित्र! जानाम्यहमिदम्, नास्ति दुष्करं स्नेहस्य, सद्भावग्राह्याणि च सज्जनहृदयानि। एतदवस्थेनापि न कृतोऽङ्गीकृतपरित्यागः। ततः कस्मात्त्वं खिद्यसे इति। परित्यज विषादम्। ईदृश एष संसारः, किमत्र क्रियताम्। तथापि तत्त्वभावना कर्तव्येति भणित्वा गतो नागदेवः। इतरोऽपि प्रियमित्रः तत्प्रभृत्येव पूज्यमानः स्वजनवर्गेण अभिनन्द्यमानो राज्ञा अपरिपतिततथाविधपरिणामो जीवित्वा द्विमासमात्रं कालं त्यक्त्वा देहपञ्जरं सहनीलुकयोपपन्नः किन्नरेषु। प्रयुक्तोऽवधिः, विदितः पूर्ववृत्तान्तः, समागतः सह प्रियतमया तमुद्यानम्। कृतोद्यानपूजा। निर्मितमशोकपादपासन्नं देवकुलम्। निविष्ट आनन्ददेवो निर्वृतिश्च तस्य सहचरी देवता। गतौ नन्दनवनम्।

---

१ –कयवयपरि–क। २ अणंग–ख।

इओ तओ परिब्भममाणि त्ति। पुच्छिया य पोहिं। सुन्दरि, का तुमं किंनिमित्तं वा एवमेयाइणी परिब्भमसि। तीए भणियं। मयणमञ्जुया नाम विज्जाहरी अहं। पिययमाणुरायनिब्भराए य खण्डिओ मए विज्जादेवओवयारो। अहिसत्ता य [1]णाए। आ दुरायारे, इमिणा अवज्जाविलसिएणं छम्मासिओ ते [2]भत्तुणा सह विओओ भविस्सइ। तंनिमित्तं विउत्ता पिययमेणं, समाउत्ता अरईए, गहिया रणरणएणं, अद्धमुक्का पाणेहिं [3]भमिसि(हिसि) त्ति। भणिऊण तुण्हिक्का ठिया भयवई। तओ मए भयसंभन्ताए चलणेसु निवडिऊण विन्नत्ता भयवई। देवि, कयं मए अपुण्णभायणाए [4]एयं, दिट्ठो य कोवो। ता करेउ पसायं भयवई अणुग्गहेणं ति। भणमाणी पुणो वि निवडिया चलणेसु। तओ अणुकम्पिया भयवईए। भणियं च णाए। वच्छे, आयइअपेच्छयाणि अणुराइहिययाणि हवन्ति। ता न सुन्दरमणुचिट्ठियं तए। तहावि एस ते[5] अणुग्गहो। गच्छ नन्दणवणं; तत्थ अमुगदेसंमि सिणिद्धमाहवीलयालिङ्गिओ धवलजमलकुसुमो पिय-

दृष्टा च तत्रैका विद्याधरी प्रियतमवियोगदुःखेनात्यन्तदुर्बला दीर्घदीर्घं निःश्वसती इतस्ततः परिभ्रमन्तीति। पृष्टा च ताभ्याम्-सुन्दरि! का त्वम्, किंनिमित्तं वा एवमेकाकिनी परिभ्रमसि। तया भणितम्-मदनमञ्जुला नाम विद्याधरी अहम्। प्रियतमानुरागनिर्भरया च खण्डितो मया विद्यादेवतोपचारः। अभिशप्ता च तया-आ दुराचारे! अनेनावद्यविलसितेन षाण्मासिकस्ते भर्त्रा सह वियोगो भविष्यति। तन्निमित्तं वियुक्ता प्रियतमेन, समायुक्ताऽरत्या, गृहीता रणरणकेन, अर्धमुक्ता प्राणैर्भ्रमिष्यसि इति। भणित्वा तूष्णिका स्थिता भगवती। ततो मया भयसंभ्रान्तया चरणयोर्निपत्य विज्ञप्ता भगवती। देवि! कृतं मयाऽपुण्यभाजनया एतद्, दृष्टश्च कोपः। ततः करोतु प्रसादं भगवत्यनुग्रहेणेति। भणन्ती पुनरपि निपतिता चरणयोः। ततोऽनुकम्पिता भगवत्या। भणितं च तया-वत्से! आयत्यप्रेक्षकाणि अनुरागिहृदयानि भवन्ति। ततो न सुन्दरमनुष्ठितं त्वया। तथाप्येष तेऽनुग्रहः। गच्छ नन्दनवनम्, तत्रामुकदेशे स्निग्धमाध-

---

१ अणाए क। २ भत्तुणा वि-क। ३ भमामि क। ४ सव्वमेयं क। ५ तुह क।

मेलओ नाम रुक्खो। तस्स अहोभायसंठियाए भविस्सइ ते पिययमेणं समागमो त्ति। तओ समागया नन्दणवणं तं च उद्देसयं। न पेच्छामि य तं रुक्खयं। अओ परिब्भमामि त्ति॥ किन्नरेण भणियं। सुन्दरि, धीरा होहि; अहं ते निरूवेमि। निरूविओ लद्धो य। साहिओ विज्ञाहरीए। समागया तस्स हेट्ठं। तओ तक्खणमेव[1] अचिन्तसामत्थयाए पायवस्स घडिया पिययमेणं। साहिओ [2]अणाए वुत्तन्तो पिययमस्स, बहुमन्निओ य तेणं। जाया विज्ञाहरकिन्नराणं पीई। अन्नोन्ननेहाणुबन्धेणं गमिऊण कंचि वेलं गयाइं विज्ञाहराइं। किन्नरीए य भणिओ पिययमो। अज्ञउत्त, दुव्विसहं पियविओयदुक्खं, परत्थसंपायणफलो य जीवाणं जम्मो पसंसीयइ। ता नेहि केणइ उवाएण एयं तत्थ पायवं, जत्थ मे अज्ञउत्तेण सह दंसणं संजायं[3] ति। निवेसेहि नियनिविट्ठदेवउलसमीवे। साहेहि य इमस्स माहप्पं जणाणं, जेण पियविउत्ता वि पाणिणो एयं समासाइऊण पणट्ठपियविरहदुक्खा सुहभाइणो हवन्ति। अणुचिट्ठियं च तं

वीलताऽऽलिङ्गितो धवलयमलकुसुमः प्रियमेलको नाम वृक्षः। तस्याधोभागसंस्थिताया भविष्यति ते प्रियतमेन समागम इति। ततः समागता नन्दनवनं तं चोद्देशम्। न प्रेक्षे च तं वृक्षम्। अतः परिभ्रमामीति। किन्नरेण भणितम्–सुन्दरि! धीरा भव, अहं ते निरूपयामि। निरूपितो लब्धश्च। कथितो विद्याधर्याः। समागता तस्याधः। ततस्तत्क्षणमेवाचिन्त्यसामर्थ्यतया पादपस्य घटिता प्रियतमेन। कथितोऽनया वृत्तान्तः प्रियतमस्य, बहुमानितश्च तेन। जाता विद्याधरकिन्नरयोः प्रीतिः। अन्योन्यस्नेहानुबन्धेन गमयित्वा काञ्चिद् वेलां गतौ विद्याधरौ। किन्नर्या च भणितः प्रियतमः–आर्यपुत्र! दुर्विषहं प्रियवियोगदुःखम्, परार्थसंपादनफलं च जीवानां जन्म प्रशस्यते, ततो नय केनचिदुपायेनैतं तत्र पादपम्, यत्र मे आर्यपुत्रेण सह दर्शनं संजातमिति। निवेशय निजनिविष्टदेवकुलसमीपे। कथय चास्य माहात्म्यं जनानाम्, येन प्रियवियुक्ता अपि प्राणिन एतं समासाद्य प्रनष्टप्रियविरहदुःखाः सुखभागिनो भवन्ति। अनुष्ठितं च तत्

---

१ तक्खणामेव क। २ णाए क। ३ जायं ख।

किन्नरेणं। निविट्ठो नियदेवउलसमीवे पायवो। साहिओ जणवयाणं। विन्नासिओ णेगेहिं जाव तहेव त्ति। जाया य से पसिद्धी, अहो पियमेलओ त्ति। समुप्पन्नं तित्थं, कयं च से नामं पियमेलयं ति॥

अओ अवगच्छामि, तहिं गयस्स अचिन्तसामत्थयाए कप्पपायवाणं नियमेण पिययमासंजोओ जायइ त्ति। ता इमं एत्थ कारणं। संपइ देवो पमाणं ति। एयं सोऊण हरिसिओ राया कुमारसेणो य। चिन्तियं च राइणा। एयमेयं, [1]न एत्थ संदेहो। अचिन्तसामत्था कप्पपायवा। ता इमं एत्थ पत्तयालं, पेसेमि विइन्ननियपुरिसपरिवारं तहिं कुमारं। अवि नाम पुज्जन्तु से मणोरह त्ति। समालोचिओ पल्लिणाहो। भणियं च णेण। देव, सुयपुव्वं मए, वियाणामि य अहयं तवोवणासन्नं तमुद्देसं। संपयं देवो पमाणं ति॥ तओ पेसिओ महया चडयरेणं कुमारो। हत्थे गहिऊण भणिओ राइणा। वच्छ, संपाविऊण पत्तिं अवस्समिहेवागन्तव्वं ति। पडिस्सुयं कुमारेणं॥

किन्नरेण। निविष्टो निजदेवकुलसमीपे पादपः। कथितो जनव्रजानाम्। विन्यासितोऽ(परीक्षितो)नेकैर्यावत्तथैवेति। जाता च तस्य प्रसिद्धिः, अहो प्रियमेलक इति। समुत्पन्नं तीर्थम्, कृतं च तस्य नाम प्रियमेलकमिति।

अतोऽवगच्छामि, तत्र गतस्याचिन्त्यसामर्थ्यतया कल्पपादपानां नियमेन प्रियतमासंयोगो जायते इति। तत इदमत्र कारणम्। सम्प्रति देवः प्रमाणमिति। पतच्छ्रुत्वा हृष्टो राजा कुमारसेनश्च। चिन्तितं च राज्ञा-एवमेतद् नात्र संदेहः। अचिन्त्यसामर्थ्याः कल्पपादपाः। तत इदमत्र प्राप्तकालम्, प्रेषयामि वितीर्णनिजपुरुषपरिवारं तत्र कुमारम्। अपि नाम पूर्यन्तां तस्य मनोरथा इति। समालोचितः पल्लीनाथः। भणितं च तेन-देव! श्रुतपूर्वं मया, विजानामि चाहं तपोवनासन्नं तमुद्देशम्। साम्प्रतं देवः प्रमाणमिति। ततः प्रेषितो महता चटकरेण (आडम्बरेण) कुमारः। हस्ते गृहीत्वा भणितो राज्ञा। वत्स! संप्राप्य पत्नीमवश्यमिहैवागन्तव्यमिति। प्रतिश्रुतं कुमारेण।

---

[1] नत्थि क।

तओ [1]पणमिय रायाणं अणवरयपयाणेहिं पत्तो कइवयदिणेहिं तवोवणं। तावसजणोवरोहभीरुयाए य थेवपुरिसपरिवारिओ चेव पविट्ठो एसो। वन्दिया तावसा। अणुसासिओ णेहिं। नीओ य पल्लिणाहेण अणेयतरुसंकुलं तमुद्देसं। दिट्ठं जिण्णदेवउलं। भणिओ कुमारो। देव, एसो खु सो उद्देसो, न-याणामि य विसेसओ कप्पपायवं ति। तओ विसण्णो कुमारो। सुमरियं सन्तिमईए। सा [2]उण तावसिसमेया विणिग्गया कुसुमसामिधेयस्स। गेण्हिऊण य तं समागच्छमाणी तवोवणं विचित्तयाए कम्मपरिणामस्स भवियव्वयाए निओएण उवविट्ठा पियमेलयसमीवे। दिट्ठो य णाए नागवल्लीलयालिङ्गिओ असोओ। सुमरियं कुमारस्स, उक्कण्ठियं से चित्तं, फुरियं वामलोयणेणं। तओ हिययनिग्गओ विय परिब्भमन्तो दिट्ठो इमीए कुमारो। तओ सा 'अज्जउत्तो' त्ति हरिसिया, 'चिराओ दिट्ठो' त्ति उक्कण्ठिया, 'परिक्खामो' त्ति उव्विग्गा, 'विरहंमि जीविय' त्ति लज्जिया, 'कुओ वा एत्थ अज्जउत्तो' त्ति सवियक्का, 'सिविणो हवेज्ज'

ततः प्रणम्य राजानमनवरतप्रयाणैः प्राप्तः कतिपयदिवसैः तपोवनम्। तापसजनोपरोधभीरुतया च स्तोकपुरुषपरिवृत एव प्रविष्ट एषः। वन्दिताः तापसाः। अनुशिष्टस्तैः। नीतश्च पल्लीनाथेनानेकतरुसंकुलं तमुद्देशम्। दृष्टं जीर्णं देवकुलम्। भणितः कुमारः, देव! एष खलु स उद्देशः, न जानामि च विशेषतः कल्पपादपमिति। ततो विषण्णः कुमारः। स्मृतं शान्तिमत्याः। सा पुनः तापसीसमेता विनिर्गता ×कुसुमसामिधेयाय। गृहीत्वा च तं समागच्छन्ती तपोवनं विचित्रतया कर्मपरिणामस्य भवितव्यताया नियोगेनोपविष्टा प्रियमेलकसमीपे। दृष्टश्च तया नागवल्लीलताऽऽलिङ्गितोऽशोकः। स्मृतं कुमारस्य, उत्कण्ठितं तस्याश्चित्तम्, स्फुरितं वामलोचनेन। ततो हृदयनिर्गत इव परिभ्रमन् दृष्टोऽनया कुमारः। ततः सा 'आर्यपुत्रः' इति हृष्टा, 'चिराद् दृष्टः' इत्युत्कण्ठिता, 'परीक्षे' इत्युद्विग्ना, 'विरहे जीविता' इति लज्जिता, कुतो वाऽत्रार्यपुत्र इति सवितर्का, 'स्वप्नो भवेद्' इति विषण्णा, 'स्थिरः प्रत्ययः' इति समाश्वस्ता

---

१ पणमिऊण रायं क। २ वुण क-ख। × कुसुमानां समिधां-काष्ठानां च समूहाय, कुसुमानि काष्ठानि चाहर्तुमित्यर्थः।

त्ति विसण्णा, 'थिरो पच्चओ' त्ति समासत्था संकिण्णरसनिब्भरं अङ्गमुव्वहन्ती अविभावियपरमत्था नेहनिब्भरयाए मोहमुवगय त्ति। तओ 'हा किमेयं' ति विसण्णाओ तावसीओ। समासासिया य णाहिं, जाव न जंपइ त्ति। तओ [1]वप्फपज्जाउललोयणाहिं परिसित्ता कमण्डलुपाणिएणं, तहावि न चेयइ त्ति। तओ अक्कन्दिय[2]मिमीहिं। तं च अइकलुणमक्कन्दियरवं सोऊण 'न भाइयव्वं न भाइयव्वं' ति भणमाणो धाविओ कुमारो। दिट्ठाओ तावसीओ, न दिट्ठं भयकारणं। पुच्छियाओ णेण। कुओ भयं भयवईणं। ताहिं भणियं। महासत्त, संसाराओ। कुमारेण भणियं। ता किं इमं अक्कन्दियं। तावसीए भणियं। एसा खु तवस्सिणी रायउरसामिणो सङ्खरायस्स धूया सन्तिमई नाम। एसा य देव्वनिओएण विउत्तभत्तारा पाणपरिच्चायं ववसमाणी [3]कहंचि मुणिकुमारएणं धरिऊण कुलवइणो निवेइया। अणुसासिया य णेणं। समाइट्ठो य से एत्थेव तवोवणंमि भत्तारेण समागमो। जाव एसा कुलवइसमाएसेणेव कुसुमसामिधेयस्स गया,

संकीर्णरसनिर्भरमङ्गमुद्वहन्ती अविभावितपरमार्था स्नेहनिर्भरतया मोहमुपगतेति। ततो 'हा किमेतद्' इति विषण्णाः तापस्यः। समाश्वस्ता च ताभिः, यावन्न जल्पतीति। ततो बाष्पपर्याकुललोचनाभिः परिषिक्ता कमण्डलुपानीयेन, तथापि न चेतयते इति। तत आक्रन्दितमाभिः। तं चातिकरुणमाक्रन्दितरवं श्रुत्वा 'न भेतव्यं न भेतव्यम्' इति भणन् धावितः कुमारः। दृष्टाः तापस्यः, न दृष्टं भयकारणम्। पृष्टास्तेन-कुतो भयं भगवतीनाम्। ताभिर्भणितम्-महासत्त्व! संसारात्। कुमारेण भणितम्-ततः किमिदमाक्रन्दितम्। तापस्या भणितम्-एषा खलु तपस्विनी राजपुरस्वामिनः शङ्खराजस्य दुहिता शान्तिमती नाम। एषा च दैवनियोगेन वियुक्तभर्तृका प्राणपरित्यागं व्यवस्यन्ती कथंचिद् मुनिकुमारकेन धृत्वा कुलपतये निवेदिता। अनुशिष्टा च तेन। समादिष्टश्च तस्या अत्रैव तपोवने भर्त्रा समागमः। यावदेषा कुलपतिसमादेशेनैव कुसुमसामिधेयाय गता, तद् गृहीत्वा व्रजन्ती तपोवनं विश्रमणनिमित्त-

---

१ -वाह-क। २ -मिमाहिं ख। ३ कह वि क।

तं गेण्हिऊण वच्चमाणी तवोवणं वीसमणनिमित्तं एत्थ उवविट्ठा, न-याणामो कारणं, अयण्डंमि चेव मोहमुवगय त्ति। तओ अक्कन्दियं अम्हेहिं। एयं सोऊण हरिसविसायगब्भिणं अवत्थमणुहवन्तेणं पुलोइया कुमारेणं। वीइया तावसीहिं। कमण्डलुजलसिञ्चणेण समासत्था एसा। दिट्ठो य णाए पच्चासन्नो कुमारो। संभन्ता एसा, भणिया णेण। सुन्दरि, अलं संभमेण; न अन्नहा कुलवइसमाएसो, अमोहवयणा खु तवस्सिणो हवन्ति। कुसलोदएण संपन्नं तं भयवओ वयणं। ता एहिं, गच्छामो तवोवणं, निवेएहि एयं कुलवइस्स, जेण सो वि अकारणवच्छलो एयं मुणिऊण णिव्वुओ होइ। तावसीहिं चिन्तियं। नूणमेसो चेव से भत्ता; कहमन्नहा एवं जंपइ त्ति। कल्लाणागिई य एसो। अहो णु खलु जुत्तयारी विही, सरिसमेयं जुवलयं ति। एत्थन्तरंमि आणन्दबाहजलभरियलोयणा अणाचिक्खणीयं अवत्थन्तरमणुहवन्ती पयडपुलया उट्ठिया सन्तिमई। निरूविया पल्लिणाहेण। हरिसिओ एसो। विम्हयाखित्तहियएण चिन्तियं च णेण। अहो देवस्स घरिणीए रूवसंपया। अहवा ईइसस्स पुरिसरयणस्स ईइसेणं चेव कलत्तेण होयव्वं ति। सयलसुन्दरसंगया चेव

मत्रोपविष्टा, न जानीमो कारणम्, अकाण्डे एव मोहमुपगतेति। तत आक्रन्दितमस्माभिः। एतच्छ्रुत्वा हर्षविषादगर्भितामवस्थामनुभवता प्रलोकिता कुमारेण। वीजिता तापसीभिः। कमण्डलुजलसेचनेन समाश्वस्तैषा। दृष्टश्च तया प्रत्यासन्नः कुमारः। संभ्रान्तैषा, भणिता तेन। सुन्दरि ! अलं संभ्रमेण, नान्यथा कुलपतिसमादेशः, अमोघवचनाः खलु तपस्विनो भवन्ति। कुशलोदयेन संपन्नं तद् भगवतो वचनम्। तत एहि, गच्छामः तपोवनम्। निवेदयैतत् कुलपतये, येन सोऽप्यकारणवत्सल एतज्ज्ञात्वा निर्वृतो भवति। तापसीभिश्चिन्तितम्-नूनमेष एव तस्या भर्ता, कथमन्यथैवं जल्पतीति। कल्याणाकृतिश्चैषः। अहो नु खलु युक्तकारी विधिः, सदृशमेतद् युगलकमिति। अत्रान्तरे आनन्दबाष्पजलभृतलोचनाऽनाख्यानीयमवस्थान्तरमनुभवन्ती प्रकटपुलकोत्थिता शान्तिमती। निरूपिता पल्लीनाथेन। दृष्ट एषः। विस्मयाक्षिप्तहृदयेन चिन्तितं च तेन-अहो देवस्य गृहिण्या रूपसंपद्। अथवेदृशस्य पुरुषरत्नस्येदृशेणैव कलत्रेण भवितव्य-

महापुरिसा हवन्ति। ता किमेत्थ अच्छरियं; न वञ्चिज्जइ सूरो दिवसलच्छीए त्ति। अओ मेइणिं पिव सयलरज्जसुहहेउभूयं देवस्स पंणमामि[1] एयं ति। तओ सविणओत्तिमङ्गेण जंपियमणेणं। सामिणि, अघेत्तव्वनामो देवस्स भिच्चावयवो ते पणमइ। तओ तीए 'सामिसालाणुरूवे पसाए पावसु' त्ति भणिऊण पुलोइयं कुमारवयणं। भणियं च णेण। सुन्दरि, नत्थि एयस्स संभमाणुरूवो पसायविसओ त्ति। तओ लज्जिओ पल्लिणाहो[2]॥ एत्थन्तरंमि 'अह किंनिमित्तं पुण एसा अणब्भा वुट्ठि' त्ति निरूविओ कुमारेण पायवो, जाव अच्चन्तसुन्दरो अदिट्ठपुव्वो य। तओ हरिसिएण पुच्छिओ पल्लिणाहो। भद्द, किंनामधेओ खु एसो पायवो। तेण भणियं। देव, न-याणामि, अदिट्ठपुव्वो य एसो। तओ पुच्छियाओ तावसीओ। ताहि वि इमं चेव संलत्तं ति। कुमारेण भणियं। कहं तवोवणासन्नो वि न दिट्ठो भयवईहिं। तावसीहिं भणियं। कुमार, नाइबहुकालागया अम्हे, जम्मापुव्वो य एसो पएसो त्ति। कुमारेण चिन्तियं। नूणमेसो खु सो

मिति। सकलसुन्दरसंगता एव महापुरुषा भवन्ति। ततः किमत्राश्चर्यम्, न वञ्च्यते सूरो दिवसलक्ष्म्येति। अतो मेदिनोमिव सकलराज्यसुखहेतुभूतां देवस्य प्रणमाम्येतामिति। ततः सविनतोत्तमाङ्गेन जल्पितमनेन। स्वामिनि! अग्रहीतव्यनामा देवस्य भृत्यावयवस्ते प्रणमति। ततस्तया 'स्वामिशालानुरूपान् प्रसादान् प्राप्नुहि' इति भणित्वा प्रलोकितं कुमारवदनम्। भणितं च तेन-सुन्दरि! नास्त्येतस्य संभ्रमानुरूपः प्रसादविषय इति। ततो लज्जितः पल्लीनाथः॥

अत्रान्तरे 'अथ किंनिमित्तं पुनरेषाऽनभ्रा वृष्टिः' इति निरूपितः कुमारेण पादपः, यावदत्यन्तसुन्दरोऽदृष्टपूर्वश्च। ततो हर्षितेन पृष्टः पल्लीनाथः। भद्र! किंनामधेयः खल्वेष पादपः। तेन भणितम्-देव! न जानामि, अदृष्टपूर्वश्चैषः। ततः पृष्टाः तापस्यः। ताभिरपीदमेव संलपितमिति। कुमारेण भणितम्-कथं तपोवनासन्नोऽपि न दृष्टो भगवतीभिः। तापसीभिर्भणितम्-कुमार! नातिबहुकालागता वयम्,

---

[1] पणइणिं प-कप्रान्ते। [2] ठिओ अहोमुहेणं-इत्यधिकः कप्रान्ते।

पियमेलओ; कहमन्नहा एवमेयं हवइ। निरूवियाइं कुसुमाइं; दिट्ठाणि य घणपत्तसाहाविवरन्तरेणं, जाव धवलाइं जमलाणि य। दंसियाइं पल्लिणाहस्स। तेण भणियं। देव, सो चेव एसो जहाइट्ठकुसुमो। कुमारेण भणियं। ता पूएमि एयं कप्पपायवं ति। समाइट्ठो भिल्लणाहो। भद्द, उवणेहि मे पूओवगरणं, पूएमि एयं अचिन्तसामत्थं कप्पपायवं। तओ तेण समाहूओ परियणो, उवणीयं फुल्लचन्दणाइयं पूओवगरणं। कुमारेण विसुद्धचित्तयाए पसत्थझाणमणुहवन्तेण पूइओ कप्पपायवो। महापुरिसगुणावज्जियाए य अहासन्निहियाए पायडरूवाए चेव होऊण जंपियं खेत्तदेवयाए। वच्छ, परितुट्ठा ते अहं इमाए सुद्धचित्तयाए पूइओ देवाणुप्पिएणं पियमेलओ। आवज्जियं मे चित्तं, अमोहदंसणाणि य देवयाणि हवन्ति। ता भण, किं ते पियं करीयउ। कुमारेण भणियं। भयवइ, तुह दंसणाओ वि किं अवरं पियं ति। देवयाए चिन्तियं। अहिमाणधणो खु एसो, कहं किंपि पत्थेइ। ता सयमेव उवणेमि एयं सव्वरोगविसनिग्घायणसमत्थं

जन्मापूर्वश्चैष प्रदेश इति। कुमारेण चिन्तितम्-नूनमेष खलु स प्रियमेलकः, कथमन्यथैवमेतद् भवति। निरूपितानि कुसुमानि, दृष्टानि च घनपत्रशाखाविवरान्तरेण, यावद्धवलानि यमलानि च। दर्शितानि पल्लीनाथस्य। तेन भणितम्-देव ! स एवैष यथादिष्टकुसुमः। कुमारेण भणितम्-ततः पूजयाम्येतं कल्पपादपमिति। समादिष्टो भिल्लनाथः। भद्र ! उपनय मे पूजोपकरणम्, पूजयाम्येतमचिन्त्यसामर्थ्यं कल्पपादपम्। ततस्तेन समाहूतः परिजनः, उपनीतं पुष्पचन्दनादिकं पूजोपकरणम्। कुमारेण विशुद्धचित्ततया प्रशस्तध्यानमनुभवता पूजितः कल्पपादपः। महामहापुरुषगुणावर्जितया च यथासन्निहितया प्रकटरूपयैव भूत्वा जल्पितं क्षेत्रदेवतया। वत्स ! परितुष्टा तेऽहमनया शुद्धचित्ततया। पूजितो देवानुप्रियेण प्रियमेलकः। आवर्जितं मे चित्तम्, अमोघदर्शनानि च दैवतानि भवन्ति। ततो भण, किं ते प्रियं क्रियताम्। कुमारेण भणितम्-भगवति ! तव दर्शनादपि किमपरं प्रियमिति। देवतया चिन्तितम्-अभिमानधनः खल्वेषः, कथं किमपि प्राथयते। ततः स्वयमेवोपनयाम्येतत् सर्वरोगविषनिर्घातनसमर्थमारोग्यमणिरत्नमिति। चिन्तयित्वा भणितः कुमारः।

आरोग्गमणिरयणं ति। चिन्तिऊण भणिओ कुमारो। वच्छ, अणुरूवो ते विवेगो अलुद्धया य, तहावि परोवयारनिमित्तं मज्झ बहुमाणेण गेण्हाहि एयं आरोग्गमणिरयणं ति। तओ 'माणणी[1]याओ देवयाओ' त्ति चिन्तिऊण 'जं भयवई आणवेइ'त्ति भणिऊण सबहुमाणमेव पडिच्छियं आरोग्गमणिरयणं कुमारेण। वन्दिया देवया। 'चिरं जीवसु'त्ति भणिऊण तिरोहिया एसा। तावसीहिं चिन्तियं। अहो कुमारस्स पहावो, जेण देवयाओ वि एवं बहु मन्नन्ति त्ति। भणियं च णाहिं। कुमार, अइक्कमइ णो[2] मज्झण्हसमयविहिवेला; ता गच्छामो त्ति। कुमारेण भणियं। मए वि भयवं कुलवई वन्दियव्वो त्ति; ता समगमेव गच्छम्ह। तओ परियणसमेओ गओ कुलवइसमीवं। वन्दिओ य णेण भयवं कुलवई। तेण वि विइन्ना ससमयपसिद्धा आसीसा। दवावियं आसणं। उवविट्ठो कुमारो सह परियणेण। निवेइओ से[3] कुमारवुत्तन्तो तावसीहिं। त[4]ओ दत्तावहाणो कुमारं निरूविऊण परितुट्ठो कुलवई। सबहुमाणं समप्पिया से भारिया। भणिओ

वत्स! अनुरूपस्ते विवेकोऽलुब्धता च, तथापि परोपकारनिमित्तं मम वहुमानेन गृहाणैतद् आरोग्यमणिरत्नमिति। ततो 'माननीया देवताः'इति चिन्तयित्वा 'यद् भगवत्याज्ञापयति' इति भणित्वा सवहुमानमेव प्रतोष्टमारोग्यमणिरत्नं कुमारेण। वन्दिता देवता। 'चिरं जोव'इति भणित्वा तिरोहितैषा। तापसोभिश्चिन्तितम्–अहो कुमारस्य प्रभावः. येन देवना अपि एवं बहु मन्यन्ते इति। भणितं च ताभिः-कुमार! अतिक्रामत्यस्माकं मध्याह्नसमयविधिवेला, ततो गच्छाम इति। कुमारेण भणितम्–मयाऽपि भगवान् कुलपतिर्वन्दितव्य इति, ततः समकमेव गच्छामः। ततः परिजनसमेतो गतः कुलपतिसमीपम्। वन्दितश्च तेन भगवान् कुलपतिः। तेनापि वितीर्णा स्वसमयप्रसिद्धाऽऽशीः। दापितमासनम्। उपविष्टः कुमारः सह परिजनेन। निवेदितस्तस्य कुमारवृत्तान्तस्तापसीभिः। ततो दत्तावधानः कुमारं निरूप्य परितुष्टः कुलपतिः। सवहुमानं समर्पिता तस्य भार्या। भणितः कुलपतिना–कुमार! किमपरं भण्यते। एषा खलु मे धर्मसुता,

---

१ –या देव-क। २ णो क। ३ से वुत्तंतो क। ४ 'तओ दत्तावहाणो' पाठो नास्ति क।

कुलवइणा। कुमार, किमवरं भणीयइ। एसा खु मे धम्मसुया[1], परिच्छिन्नसंसारस्स वि य गुणपक्खवाएण महन्तो मम इमीए पडिबन्धो; ता अणुरूवं दट्ठव्व त्ति। कुमारेण भणियं। जं भयवं आणवेइ॥ एत्थन्तरंमि 'कहमियाणिं न दट्ठव्वो भयवं' ति मन्नुसिया सन्तिमई। परिसंथविया कुलवइणा, भणिया य णेण। वच्छे, अलं उव्वेवेणं, परिच्चय विसायं। धम्मनिरया तुमं; ता निच्चसन्निहिओ ते अहं। उवएसपडिवत्ती दंसणं मुणियणस्स; सा य अवियला तुज्झं ति। तओ पणमिओ इमीए कुलवई, आउच्छियाओ तावसीओ, समागया कुमारसमीवं। सो वि पूइऊण सपरिवारं[2] कुलवइं समं सन्तिमईए निग्गओ तवोवणाओ। कइवयदिणेहिं च समागओ वीसउरं[3]। निवेइओ सन्तिमइलाहो राइणो। परितुट्ठो राया। कारावियं वद्धावणयं। कयसम्माणो विसज्जिओ भिल्लणाहो[4]। कुमारस्स वि पेइए विय रज्जे समं सन्तिमईए विसयसुहमणुहवन्तस्स अइक्कन्ता कइ वि वासरा॥ अन्नया य विचित्तयाए कम्मपरिणामस्स असारयाए संसारस्स

परिच्छिन्नसंसारस्यापि च गुणपक्षपातेन महान् ममास्यां प्रतिबन्धः, ततोऽनुरूपं द्रष्टव्येति। कुमारेण भणितम्-यद् भगवान् आज्ञापयति। अत्रान्तरे 'कथमिदानीं न द्रष्टव्यो भगवान्' इति मन्युश्रिता शान्तिमती। परिसंस्थापिता कुलपतिना, भणिता च तेन। वत्से! अलमुद्वेगेन, परित्यज विषादम्। धर्मनिरता त्वम्, ततो नित्यसंनिहितस्तेऽहम्। उपदेशप्रतिपत्तिर्दर्शनं मुनिजनस्य, सा चाविकला तवेति। ततः प्रणतोऽनया कुलपतिः, आपृष्टास्तापस्यः, समागता कुमारसमीपम्। सोऽपि पूजयित्वा सपरिवारं कुलपतिं समं शान्तिमत्या निर्गतस्तपोवनात्। कतिपयदिनैश्च समागतो विश्वपुरम्। निवेदितः शान्तिमतीलाभो राज्ञः। परितुष्टो राजा। कारितं वर्धापनकम्। कृतसन्मानो विसर्जितो भिल्लनाथः। कुमारस्यापि पतृके इव राज्ये समं शान्तिमत्या विषयसुखमनुभवतोऽतिक्रान्ताः कत्यपि वासराः।

---

१ धम्मओ सुया क। २ तावसजणोचिएण दाणाइणा सपरिवारं ख। ३ वीसुउरं क। ४ पल्लिणाहो क।

महारायसमरकेउणो कयन्तो विव आवडिओ सज्जघाई [1]आमओ; उम्मूलयन्तं विय अन्ते समुद्धाइयं सूलं, उक्खणन्ती विय लोयणाइं जाया सीसवेयणा; [2]आयम्पियाओ सन्धीओ, पयलिया दन्ता, समुद्धाइओ सासो, भग्गाइं लोयणाइं, निरुद्धा वाणी। समागया वेज्जा, पउत्ताइं नाणाविहाइं ओसहाइं, न जाओ य से विसेसो। तओ विसण्णं वेज्जमण्डलं, [3]परुइयाओ अन्तेउरियाओ। निवेइओ एस वुत्तन्तो पडिहारेणं कुमारस्स। सो वुण 'मए जीवन्तयंमि परमोवयारिणो दुहियसत्तवच्छलस्स महारायस्स ईइसी अवत्था; असमत्थो य अहयं पडिविहाणे; ता धिरत्थु मे जीविएणं' ति चिन्तिऊण मोहमुवगओ त्ति। वीइओ [4]वायचीराए, समासासिओ सन्तिमईए। भणियं च णाए। अज्जउत्त, न सुमरेसि तं देवयाविइन्नं आरोग्गमणिरयणं। ता तस्स एस कालो, परिच्चय विसायं, उवणेहि तं महारायस्स। तओ 'सुन्दरि, साहु सुमरियं' ति हरिसिओ कुमारो। गहियं आरोग्गमणिरयणं। निग्गच्छन्तस्स भवणाओ केणइ संलत्तं 'निए

अन्यदा च विचित्रतया कर्मपरिणामस्य असारतया संसारस्य महाराजसमरकेतोः कृतान्त इव आपतितः सद्योघात्यामयः। उन्मूलयदिवान्त्राणि समुद्धावितं शूलम्, उत्क्षण्वतीव लोचने जाता शीर्षवेदना, आकम्पिताः सन्धयः, प्रचलिता दन्ताः, समुद्धावितः श्वासः, भग्ने लोचने, निरुद्धा वाणी। समागता वैद्याः, प्रयुक्तानि नानाविधान्यौषधानि, न जातश्च तस्य विशेषः। ततो विषण्णं वैद्यमण्डलम्, प्ररुदिता अन्तःपुरिकाः। निवेदित एष वृत्तान्तः प्रतीहारेण कुमारस्य। स पुनः 'मयि जीवति परमोपकारिणो दुःखितसत्त्ववत्सलस्य महाराजस्येदृश्यवस्था, असमर्थश्चाहं प्रतिविधाने, ततो धिगस्तु मे जीवितेन' इति चिन्तयित्वा मोहमुपगत इति। वीजितो वातचीरेण, समाश्वस्तः शान्तिमत्या। भणितं च तया-आर्यपुत्र! न स्मरसि तद् देवतावितीर्णमारोग्यमणिरत्नम्। ततस्तस्यैष कालः, परित्यज विषादम्, उपनय तद् महाराजस्य। ततः 'सुन्दरि! साधु स्मृतम्' इति हर्षितः कुमारः। गृहीतमारोग्यमणिरत्नम्। निर्गच्छतो भवनात्

---

१ आयंको ख। २ आयवियाओ क। ३ पहवियाओ क। ४ चंदणरसासित्तवाय-क।

अत्थे चिरं जीवसु' त्ति। तओ 'अणुकूलसंउणो'[1] त्ति हरिसिओ लहु चेव गओ नरिन्दभवणं, पविट्ठो नरवइसमीवं। तओ सोचिऊण हत्थपाए आरोग्गमणिरयणेण ओमज्जिओ राया। अचिन्तसामत्थयाए मणिरयणस्स उवसन्तं सूलं, पणट्ठा सीसवेयणा, घडियाओ सन्धीओ, थिरीहूया[2] दन्ता, उवसन्तो सासो, उम्मिल्लियाइं लोयणाइं, 'अहो किमेयं' ति पयट्टा वाणी। थेववेलाए य पुव्वसामत्थओ वि अहिययरसामत्थजुत्तो उट्ठिओ राया। 'अहो कुमारस्स पहावो' त्ति जंपियं वेज्जेहिं। हरिसिया मन्तिणो। पणच्चियाओ[3] देवीओ। राइणा भणियं। भो पणट्ठसरणा मे अवत्था अहेसि; ता न विन्नायं मए, किमेत्थ संजायं ति। साहेह तुब्भे। साहियं[4] जीवाणन्देण। हरिसिओ राया। भणियं च णेण। कहं णु खलु अमयभूए कुमारे पहवन्तंमि मच्चुणो अवयासो त्ति। लज्जिओ कुमारो। भणियं च णेण। देवयागुरुपसाओ एसो त्ति। राइणा भणियं। वच्छ, तुह सन्तिया इमे पाणा; ता जहिच्छं जोएयव्व त्ति। कुमारेण भणियं।

केनचित् संलपितं 'निजेऽर्थे चिरं जीव' इति। ततोऽनुकूलशकुनः' इति हृष्टो लघ्वेव गतो नरेन्द्रभवनम्, प्रविष्टो नरपतिसमीपम्। ततः शोचित्वा (क्षालयित्वा) हस्तपादान् आरोग्यमणिरत्नेनावमार्जितो राजा। अचिन्त्यसामर्थ्यतया मणिरत्नस्योपशान्तं शूलम्, प्रनष्टा शीर्षवेदना, घटिताः सन्धयः, स्थिरीभूता दन्ताः, उपशान्तः श्वासः, उन्मिलिते लोचने, 'अहो किमेतद्' इति प्रवृत्ता वाणी। स्तोकवेलायां च पूर्वसामर्थ्यादप्यधिकतरसामर्थ्ययुक्त उत्थितो राजा। 'अहो कुमारस्य प्रभावः' इति जल्पितं वैद्यैः। हर्षिता मन्त्रिणः। प्रनर्तिता देव्यः। राज्ञा भणितम्–भोः प्रनष्टस्मरणा मेऽवस्थाऽऽसीदिति, ततो न विज्ञातं मया, किमत्र संजातमिति। कथयत यूयम्। कथितं जीवानन्देन। हृष्टो राजा। भणितं च तेन–कथं नु खल्वमृतभूते कुमारे प्रभवति मृत्योरवकाश इति। लज्जितः कुमार इति। भणितं च तेन-देवतागुरुप्रसाद एष इति। राज्ञा भणितम्–वत्स! तव सत्का इमे प्राणाः, ततो यथेच्छं द्रष्टव्या इति। कुमारेण भणितम्–गुरवो

---

१ –सउणहरिसिओ क। २–भूया क। ३ आइद्धं बद्धावणयं मतीहिं। पण–क। ४ विउजमंडलपहाणविज्जेण साहियं क।

गुरू तुब्भे। राइणा भणियं। कुमार, अलङ्घणीयवयणा गुरू; ता मज्झ बहुमाणेण अणुचिट्ठियव्वमेयं देवाणुप्पिएणं। कुमारेण भणियं। आणवेउ ताओ। राइणा भणियं। न मोत्तव्वो अहं ति। कुमारेण भणियं। जं तुब्भे आणवेह। राइणा भणियं। वच्छ, गुरुबहुमाणाणुरूवं फलं पावसु त्ति। 'निययावासे होहि' त्ति भणिऊण विसज्जिओ कुमारो। सद्दाविऊण भणिओ से [1]निउत्तपरियणो। न तुब्भेहिं मम अणिवेइऊण समागओ वि कुमारसन्तिओ [2]को वि कुमारस्स पेसियव्वो त्ति। तेण भणियं। जं देवो आणवेइ।

अइक्कन्तो कोइ कालो। अन्नया य [3]कहिंचि वियाणिऊणमेयं वुत्तन्तं समागओ पहाणामच्चपुत्तो अमर[4]गुरू। निवेइओ [5]राइणो। सद्दाविऊण पूइओ णेण, भणिओ य नेहसारं। भद्द, किं बहुणा जंपिएणं; जीवियाओ वि अहिओ मे कुमारो। पडिवन्नं च एएण, जहा मए तुमं न मोत्तव्वो। ता तहाणुचिट्ठियव्वं, जहा दो वि अम्हे सुहं चिट्ठामो त्ति। मन्तिपुत्तेण भणियं। देव, धन्नो कुमारो, जस्स

यूयम्। राज्ञा भणितम्–कुमार! अलङ्घनीयवचना गुरवः, ततो मम बहुमानेनानुष्ठातव्यमेतद् देवानुप्रियेण। कुमारेण भणितम्–आज्ञापयतु तातः। राज्ञा भणितम्–न मोक्तव्योऽहमिति। कुमारेण भणितम्·यद् यूयमाज्ञापयत। राज्ञा भणितम्–'वत्स! गुरुबहुमानानुरूपं फलं प्राप्नुहीति। नियतावासो भव' इति भणित्वा विसर्जितः कुमारः। शब्दयित्वा भणितस्तस्य नियुक्तपरिजनः। न युष्माभिर्ममानिवेद्य समागतोऽपि कुमारसत्कः कोऽपि कुमारस्य प्रेषयितव्य इति। तेन भणितम्–यद्देव आज्ञापयति।

अतिक्रान्तः कोऽपि कालः। अन्यदा च कुत्रचिद् विज्ञायैतं वृत्तान्तं समागतः प्रधानामात्यपुत्रोऽमरगुरुः। निवेदितो राज्ञः। शब्दाययित्वा पूजितस्तेन, भणितश्च स्नेहसारम्। भद्र! किं बहुना जल्पितेन, जीवितादप्यधिको मे कुमारः। प्रतिपन्नं चैतेन, यथा मया त्वं न मोक्तव्यः। ततस्तथाऽनुष्ठातव्यं यथा द्वावप्यावां सुखं तिष्ठाव इति। मन्त्रिपुत्रेण भणितम्–देव! धन्यः कुमारः, यस्य देवोऽप्येवं

---

१ निउत्तो परि-क। २ कोइ ख। ३ कहं चि ख। ४ -गुरुनामा क। ५ राइणो समरकेउस्स क।

देवो वि एवं [1]मन्तेइ। ता जमाणत्तं देवेण; एत्थ भयवं विही विय उवउत्तो अहं। राइणा भणियं। वद्धावेह कुमारं एयस्स [2]समागमणेण। गया वद्धावया। भणिओ य एसो। भद्द, कुमारं पेच्छसु त्ति। निग्गओ मन्तिपुत्तो, चिन्तियं च णेण। इमं चेव एत्थ पत्तयालं, जमेस राया न परिच्चईयइ त्ति। जओ वसीकयं रज्जं विसेणेण, साणुक्कोसो य कुमारो। तमन्तरेण पवज्जमाणेण य पव्वज्जं भणिओ अहं ताएण। 'हारविस्सइ विसेणो रज्जं, पणट्ठं च एयं सेणो उद्धरिस्सइ' त्ति नेमित्तियाएसो। पारद्धं च तं विसेणेण, जओ अवमाणिया सामन्ता, पीडियाओ पयाओ, लङ्घिओ उचियायारो, बहुमन्निओ लोहो। ता इहेव अवत्थाणं सोहणं ति॥ एत्थन्तरंमि निवेइयं कुमारस्स, जहा देव, अमच्चपुत्तो अमरगुरू [3]आगओ; संपइ देवो पमाणं ति। कुमारेण वद्धावयस्स दाउं जहोचियं भणियं। लहुं पवेसेह। हरिसवसेण उट्ठिओ कुमारो, पविट्ठो अमरगुरू, समाइच्छिओ णेण, पुच्छिओ सबहुमाणं 'अज्ज, कुसलं तायकुमाराणं'। तेण

मन्त्रयते। ततो यदाज्ञप्तं देवेन, अत्र भगवान् विधिरिव उपयुक्तोऽहम्। राज्ञा भणितम्—वर्धापयत कुमारमेतस्य समागमनेन। गता वर्धापकाः। भणितश्चैषः—भद्र! कुमारं प्रेक्षस्वेति। निर्गतो मन्त्रिपुत्रः। चिन्तितं च तेन—इदमेवात्र प्राप्तकालम्, यदेष राजा न परित्यज्यते इति। यतो वशीकृतं राज्यं विषेणेन, सानुक्रोशश्च कुमारः। तमन्तरेण प्रपद्यमानेन च प्रव्रज्यां भणितोऽहं तातेन। हारयिष्यति विषेणो राज्यम्. प्रनष्टं चैतत् सेन उद्धरिष्यति' इति नैमित्तिकादेशः। प्रारब्धं तद् विषेणेन, यतोऽवमानिताः सामन्ताः, पीडिताः प्रजाः, लङ्घित उचिताचारः, बहुमतो लोभः। तत इहैवावस्थानं शोभनमिति॥ अत्रान्तरे निवेदितं कुमारस्य, यथा देव! अमात्यपुत्रोऽमरगुरुरागतः, सम्प्रति देवः प्रमाणमिति। कुमारेण वर्धापकाय दत्त्वा यथोचितं भणितम्—लघु प्रवेशय। हर्षवशेनोत्थितः कुमारः, प्रविष्टोऽमरगुरुः, समा-

---

१ मन्नइ क। २ समागमेण क। ३ आगओ इह पेइरज्जाओ मतिपुत्तो संपयं क।

भणियं। देव, कुसलं। अन्नं च। देव, 'तुमं न दिट्ठो' त्ति संजायनिव्वेओ विसेणस्स रज्जं दाऊण तायप्पमुहप्पहाणपरियणसमेओ पव्वइओ महाराओ। तओ 'अहो ममोवरि सिणेहाणुबन्धो तायस्स' त्ति चिन्तिऊण जंपियं कुमारेण। अज्ज, बहुमया विय मे तायपव्वज्जा कुमाररज्जपयाणेण। अन्नं च। कुलट्ठिई एसा अम्हाणं, जं रज्जभरधुरक्खमे जुवरायंमि पव्वज्जापवज्जणं ति। अमच्चपुत्तेण भणियं। जं देवो आणवेइ। कुमारेण भणियं। अवि सुन्दरो पयाणं कुमारो। अमच्चपुत्तेण भणियं। देव, सुन्दरो; किं तु देवनिग्गमणेणं महारायपव्वज्जाए य पीडियाओ पयाओ असामिसालं चिय अत्ताणयं मन्नन्ति। कुमारेण भणियं। कहं विसेणकुमारे जीवमाणंमि असामिसालाओ। एत्थन्तरंमि छिक्कियं पडिहारेण। 'देवो जीवउ' त्ति भणियं अमरगुरुणा। फुरियं च वामलोयणेणं कुमारस्स। तओ चिन्तियमणेणं। हा किमेयमनिमित्तं ति। अहवा अलमनिमित्तासङ्काए; देवयाओ सिवं करिस्सन्ति। भणिया सन्तिमई। सुन्दरि, संपाडेहि कालोचियं अज्जस्स। तीए भणियं। जं अज्जउत्तो आणवेइ। काराविया सरीरट्ठिई। समप्पिओ निययाहियारो। पडिच्छिओ

गतः (आगतः) नेन, पृष्टः सबहुमानम् , 'आर्य ! कुशलं तातकुमारयोः। तेन भणितम्-देव ! कुशलम्। अन्यच्च, देव ! 'त्वं न दृष्टः' इति संजातनिर्वेदो विषेणस्य राज्यं दत्त्वा तातप्रमुखप्रधानपरिजनसमेतः प्रव्रजितो महाराजः। ततोऽहो ममोपरि स्नेहानुबन्धस्तातस्य' इति चिन्तयित्वा जल्पितं कुमारेण। आर्य ! बहुमतेव मे तातप्रव्रज्या कुमारराज्यप्रदानेन। अन्यच्च, कुलस्थितिरेषाऽस्माकम्, यद् राज्यभरधूःक्षमे युवराजे प्रव्रज्याप्रपदनमिति। अमात्यपुत्रेण भणितम्-यद् देव आज्ञापयति। कुमारेण भणितम्-अपि सुन्दरः प्रजानां कुमारः। अमात्यपुत्रेण भणितम्-देव ! सुन्दरः, किन्तु देवनिर्गमनेन महाराजप्रव्रज्यया च पीडिताः प्रजा अस्वामिशालमिवात्मानं मन्यन्ते। कुमारेण भणितम्-कथं विषेणकुमारे जीवति अस्वामिशालाः [प्रजाः]। अत्रान्तरे क्षुतं प्रतीहारेण। 'देवो जीवतु' इति भणितममरगुरुणा। स्फुरितं च वामलोचनेन कुमारस्य। ततश्चिन्तितमनेन-'हा किमेतदनिमित्तमिति। अथवाऽलमनिमित्ताशङ्कया, देवताः शिवं करिष्यन्ति।

णेण। पउत्ता विसेणरज्जंमि पणिही। पइदिणं च नियपरियणेण [1]पवड्ढमाणस्स कुमारस्स अइक्कन्तो कोइ कालो।

इओ य सन्तिमई अणेयसउणगणनिसेवियं कलयंठिवोलेण सवण[2]सुहयं छप्पयकुलबद्धसंगीयं पुप्फफलनिमियसयसाहं तमालघणभमरञ्जणसरिसं वण्णेण [3]पत्तयपयरेण निव्विवरं–किं बहुणा वायाडम्बरेण तेलोक्कस्स वि नयणमणाणन्दयारिणं गयणयलमणुलिहन्तं चिन्तामणिकप्पं कप्पपायवं [4]वयणेणमुयरं पविसमाणं सुमिणयंमि पासिऊण पडिबुद्धा। हरिस[5]वसपुलइयङ्गीए सिट्ठो दइयस्स सुमिणओ। तेण वि य पफुल्लवयणकमलेण भणियं। सुन्दरि, [6]सयलतइलोक्कपिहणीओ ते पुत्तो भविस्सइ त्ति। पडिस्सुणे[7]ऊण अहिययरं तिवग्गसंपायणरयाए अइक्कन्तो कोइ कालो। तओ सोहणे तिहिमुहुत्त[8]नक्खत्तकरणजोए कमेण पसूया सन्तिमई। जाओ से दारओ। कयं उचिय-

भणिता शान्तिमती। सुन्दरि! संपादय कालोचितमार्यस्य। तया भणितम्–यदार्यपुत्र आज्ञापयति। कारिता शरीरस्थितिः। समर्पितो निजाधिकारः। प्रतीष्टस्तेन। प्रयुक्ता विषेणराज्ये प्रणिधयः। प्रतिदिनं निजपरिजनेन प्रवर्धमानस्य कुमारस्यातिक्रान्तः कोऽपि कालः।

इतश्च शान्तिमती अनेकशकुनगणनिषेवितं कलकंठी×कोलाहलेन श्रवणसुखदं षट्पदकुलबद्धसंगीतं पुष्पफलन्यस्तशतशाखं तमालघनभ्रमराञ्जनसदृशं वर्णेन पत्रप्रकरेण निर्विवरम्, किं बहुना वाताडम्बरेण त्रैलोक्यस्यापि नयनमनआनन्दकारिणं गगनतलमनुलिहन्तं चिन्तामणिकल्पं कल्पपादपं वदनेनोदरं प्रविशन्तं स्वप्ने दृष्ट्वा प्रतिबुद्धा। हर्षवशपुलकिताङ्ग्या शिष्टो दयितस्य स्वप्नः। तेनापि च प्रफुल्लवदनकमलेन भणितम्–सुन्दरि! सकलत्रैलोक्यस्पृहणीयस्ते पुत्रो भविष्यति इति। प्रतिश्रुत्याधिकतरं त्रिवर्गसंपादनरताया अतिक्रान्तः कोऽपि कालः। ततःशोभने तिथिमुहूर्तनक्षत्रकरणयोगे क्रमेण प्रसूता शान्तिमती। जातस्तस्या दारकः। कृतमुचितकरणीयं

---

अहो अणज्जत्तणं, अहो विवेयसुन्नया, जो एवं वासीचन्दणकप्पस्स भयवओ वि एवं ववससि। ता गच्छ, अदट्ठव्वो तुमं ति। भणिय [1]उत्थम्भिओ सदयं देवयाए। तिव्वकसाओदएणं च अवगणिऊण [2]देवयाए वयणं पयट्टो पुणो वि घाइउं भयवन्तं। तलप्पहारिओ देवयाए, विणिन्तरुहिरुग्गारं निवडिओ धरणिवट्ठे, मुच्छिओ वियणाए। 'भयवओ उग्गहो' त्ति संखुद्धा देवया। आसासिओ सकरुणं, अवणीओ उग्गहाओ, मुक्को नेऊण [3]वणनिउञ्जे। तिरोहिया देवया। चिन्तियं च णेणं। अहो मे पावपरिणई। कहं पुण न एस वावाइओ त्ति। गहिओ अमरिसेण। भावियं रोद्दज्झाणं। बद्धं नरयाउयं, पोसियं अहिणिवेसेण। अइक्कन्तो कोइ कालो। अन्नया विउत्ते परियणे वाहिज्जमाणो छुहाए एगाई चेव वच्चमाणो [4]वोप्पिलाडवीए मज्झभागंमि गिद्धावयरणनिमित्तं पिच्छसंपायणुज्जएहि

मनेन मण्डलाग्रं भगवतः, अपहृतं क्षेत्रदेवतया। स्तम्भित एषः, भणितश्च तया। अहो ते पापकर्मता, अहो संक्लेशः, अहो अनार्यत्वम्, अहो विवेकशून्यता, य एवं वासीचन्दनकल्पस्य भगवतोऽपि एवं व्यवस्यसि। ततो गच्छ, अद्रष्टव्यस्त्वमिति। भणित्वोत्तम्भितः सदयं देवतया। तीव्रकषायोदयेन चावगणय्य देवताया वचनं प्रवृत्तः पुनरपि घातयितुं भगवन्तम्। तलप्रहारितो देवतया, विनिर्यद्रुधिरोद्गारं निपतितो धरणीपृष्ठे, मूर्छितो वेदनया। 'भगवतोऽवग्रहः' इति संक्षुब्धा देवता। आश्वासितः सकरुणम्। अपनीतोऽवग्रहात्, मुक्तो नीत्वा वननिकुञ्जे। तिरोहिता देवता। चिन्तितं च तेन। अहो मे पापपरिणतिः। कथं पुनर्नैष व्यापादित इति। गृहीतोऽमर्षेण। भावितं रौद्रध्यानम्। बद्धं नरकायुः, पोषितमभिनिवेशेन। अतिक्रान्तः कोऽपि कालः। अन्यदा वियुक्ते परिजने बाध्यमानो क्षुधा एकाक्येव व्रजन् वोप्पिलाटव्या मध्य भागे गृध्रावतरणनिमित्तं पिच्छसंपादनोद्यतैः शबरैः प्रजल्पन् दीनविस्वरं व्यापादितो विषेणः। समुत्पन्नस्त-

---

१ उत्थंभिओ एसो देवयाए सदयं पा. ज्ञा. उत्थंभिओ सदयं डे. ज्ञा.। २ देवयावयणं पा. ज्ञा. अवमन्निऊण देवयं डे. ज्ञा. ३ वणनिगुंजे पा. ज्ञा.। ४ गुविला-पा. ज्ञा.।

सवरेहिं पयम्पमाणो दीणविस्सरं वावाइओ विसेणो। समुप्पन्नो तमाभिहाणाए नरयपुढवीए बावीससागरोवमाऊ नारगो त्ति ॥

भयवं पि सेणाणगारो विहरिऊण संजमुज्जोएण भाविऊण उवसमसुहं काऊण संलेहणं वन्दिऊण वीयराए पडिवज्जिऊणमणसणं काऊण [1]लगंडसाइत्तं आराहिऊण भावणाओ चइऊण देहपञ्जरं समुप्पन्नो नवमगेवेज्जए तीससागरोवमाऊ देवो त्ति ॥

॥ समत्तो सत्तमो भवो ॥

मोऽभिधानायां नरकपृथिव्यां द्वाविंशतिसागरोपमायुर्नारक इति।

भगवानपि सेनानगारो विहृत्य संयमोद्योगेन भावयित्वोपशमसुखं कृत्वा संलेखनां वन्दित्वा वीतरागान् प्रतिपद्यानशनं कृत्वा लगण्डशायित्वं (वक्रकाष्ठमिव शयनं कृत्वा) आराध्य भावनास्त्यक्त्वा देहपञ्जरं समुत्पन्नो नवमग्रैवेयके त्रिंशत्सागरोपमायुर्देव इति।

समाप्तं सप्तमभवग्रहणम्।

---

[1] लगंडं-दुसंस्थितं (वक्रं) काष्टं तद्वच्छिरःपार्ष्णीनां भूलग्नेन शेरते ये ते लगंडशायिनः, तेषां भावो लगंडशायित्वम् (प्रश्नव्याकरणटीका प० १०७)

अट्ठमो भवो।

वक्खायं जं भणियं सेणविसेणा उ पित्तियसुय त्ति। गुणचन्दवाणमन्तर एत्तो [1]एयं पवक्खामि ॥

अत्थि इहेव जम्बुद्दीवे दीवे भारहे वासे महामहल्लुत्तुङ्गभवणसिहरुप्पङ्कनिरुद्धरविरहमग्गा देवउलविहारारामसंगया निच्चुस्सवाणन्दपमुइयमहाजणा निवासो तिहुयणसिरीए निदरिसणं देवनयरीए विस्सकम्मविणिम्मिया [2]अओज्झा नाम नयरी। जीए उप्पत्ती विव लायण्णस्स आगरो विव विलासाणं कोसल्ल[3]पंगरिसो विव पयावइस्स जम्मभूमी विव विम्हयाणं विसुद्धसीलसमायारो इत्थियाजणो। जीए य गुणेगन्तपक्खवाई अच्चुयारचरिओ निवासो परमलच्छीए पियंवओ पणइवग्गस्स संपाडओ समीहियाणं पुरिसवग्गो त्ति। तीए य अइसइयपुव्वपत्थिवचरिओ पयावसरिसपसायवसीकयसयलसत्तू, रायसिरीए विय अविउत्तो कित्तीए, नीईए विय अविरहिओ

व्याख्यातं यद् भणितं सेनविषेणौ पितृव्यसुताविति। गुणचन्द्रवानव्यन्तरौ इत एतत् प्रवक्ष्यामि ॥

अस्तीहैव जम्बूद्वीपे द्वीपे भारते वर्षे महामहोत्तुङ्गभवनशिखरोत्पङ्क[4]निरुद्धरविरथमार्गा देवकुलविहारारामसंगता नित्योत्सवानन्दप्रमुदितमहाजना निवासस्त्रिभुवनश्रियो निदर्शनं देवनगर्या विश्वकर्मविनिर्मिता अयोध्या नाम नगरी। यस्यां मुत्पत्तिरिव लावण्यस्य आकर इव विलासानां कौशल्यप्रकर्ष इव प्रजापतेः जन्मभूमिरिव विस्मयानां विशुद्धशीलसमाचारः स्त्रीजनः। यस्यां च गुणैकान्तपक्षपाती अत्युदारचरितो निवासः परमलक्ष्म्याः प्रियंवदः प्रणयिवर्गस्य सम्पादकः समीहितानां पुरुषवर्ग इति। तस्यां चातिशयितपूर्वपार्थिवचरितः

---

१ एवं पा. ज्ञा.। २ अउज्झा डे. ज्ञा., पा. ज्ञा.। ३ -पयरिसो डे. ज्ञा., पा. ज्ञा.। ४ उप्पंको ओप्पीलो उक्केरो पहयरो गणो पयरो ॥ (पायल० १८)

दयाए, अच्चन्तपयाहियपीई मेत्तीबलो नाम राया। तस्स सयलन्तेउरप्पहाणा पउमावई नाम देवी। स (सो)इमीए सह विसयसुहमणुविंसु त्ति॥ इओ य सो नवमगेवेज्जयनिवासी देवो अहाउयं पालिऊण चुओ समाणो समुप्पन्नो पउमावईए कुच्छिंसि। दिट्ठं च णाए सुमिणयंमि तीए चेव रयणीए पहायसमयंमि विमलमहासलिलपडिहत्थं समद्धासियं नलिणिसण्डेणं विरायमाणं विउद्धकमलायरसिरीए हंसकारण्डवचक्कवाओवसोहियं रुणरुणन्तेणं भमरजालेणं समन्नियं कप्पपायवराईए समासन्नदिव्वोववणसोहियं पणच्चमाणं पिव कल्लोललीलाकरेहिं महन्तं सरवरं वयणेणमुयरं पविसमाणं ति। पासिऊण य तं सुहविउद्धा एसा। साहिओ य तीए जहाविहिं दइयस्स। पडिहरिसवसग्घवियपुलएणं भणिया य तेणं। सुन्दरि, सयलमेइणीसरनरिन्दकमलायरभोयलालसो महारायहंसो ते पुत्तो भविस्सइ। पडिस्सुयं तीए। अहिययरं परितुट्ठा एसा। तओ सविसेसं तिवग्गसंपायणरयाए पत्तो पसूइसमओ। तओ पसत्थतिहिकरणमुहुत्तजोए सुहं-

प्रतापसदृशप्रसादवशीकृतसकलशत्रुः, राजश्रियेवावियुक्तः कीर्त्या, नीत्येवाविरहितो दयया, अत्यन्तप्रजाहितप्रीतिर्मैत्रीबलो नाम राजा। तस्य सकलान्तःपुरप्रधाना पद्मावती नाम देवी। सोऽनया सह विषयसुखमन्वभूदिति। इतश्च स नवमग्रैवेयकनिवासी देवो यथायुष्कं पालयित्वा च्युतः सन् समुत्पन्नः पद्मावत्याः कुक्षौ। दृष्टं च तया स्वप्ने तस्यामेव रजन्यां प्रभातसमये विमलमहासलिल[2]परिपूर्णं समध्यासितं नलिनीषण्डेन विराजमानं विबुद्धकमलाकरश्रिया हंसकारण्डवचक्रवाकोपशोभितं रुणरुणायमानेन भ्रमरजालेन समन्वितं कल्पपादपराज्या समासन्नदिव्योपवनशोभितं प्रनृत्यदिव कल्लोललीलाकरैर्महत् सरोवरं वदनेनोदरं प्रविशदिति। दृष्ट्वा च तत् सुखविबुद्धैषा। कथितश्च तया यथाविधि दयितस्य। हर्षवश[3]पूर्णपुलकेन भणिता च तेन। सुन्दरि! सकलमेदिनीश्वरनरेन्द्रकमलाकरभोगलालसो महाराजहंसस्ते पुत्रो भविष्यति! प्रतिश्रुतं तया। अधिकतरं परितुष्टैषा। ततः सविशेषं त्रिवर्गसंपादनरतायाः प्राप्तः प्रसूतिसमयः।

---

[1] झणझणंतेण घ। [2] पडिहत्थं उद्धुमायं अहिरेमइअं च अप्फुण्णं। (पायल० १४२) [3] पूरेराघाड–अग्घव–उद्धुम–अंगुम–अहिरेमाः॥ (८–४–२६७)

सुहेणं पसूया एसा। दसदिसि उज्जोयन्तो सुकुमालपाणिपाओ जाओ से दारओ। निवेइओ राइणो मेत्तीबलस्स पमोयमञ्जूसाभिहाणाए चेडियाए, जहा 'महाराय, देवी पउमावई दारयं पसूय' त्ति। परितुट्ठो राया। दिन्नं तीए पारिओसियं। करावियं बन्धणमोयणाइयं उचियकरणिज्जं। हरिसिओ नयरिजणवओ। ऊसियाओ भवणेसु आणन्दधयवडायाओ। कयाओ आययणेसु मणहरविसेसपूयाओ, पउत्ताइं च पइभवणेसु वज्जन्तेणं परमपमोयतूरेणं गिज्जन्तेणं जम्ममङ्गलगेएणं नच्चन्तीहिं तरुणरामाहिं पेच्छन्तीहिं सहरिसं वुड्ढाहिं पिज्जमाणपवरासवाइं वड्ढमाणहल्लप्फलयाइं उल्लासन्तेणं [1]तूरियसंघाएणं [2]फलं पावेन्तेणं वेयालियसमूहेणं अच्चुदारविच्छड्डाइं महापमोयपिसुणयाइं वद्धावणयाइं ति। उचियवेलाए य सव्वभवणेहिंतो निग्गया नयरिजणवया, पयट्टा य रायभवणसंमुहं। ते य तहा पेच्छिऊण हरिसवसपयट्टपुलओ संभमाइसएण सहरिसनच्चन्तवारविलयासमेओ नयरिजणाभिमुहमेव निग्गओ राया। वद्धाविओ पुत्तज-

ततः प्रशस्ततिथिकरणमुहूर्तयोगे सुखसुखेन प्रसूतैषा। दश दिश उद्द्योतयन् सुकुमारपाणिपादो जातस्तस्या दारकः। निवेदितो राज्ञो मैत्रीबलस्य प्रमोदमञ्जूषाभिधानया चेटिकया, यथा 'महाराज! देवी पद्मावती दारकं प्रसूता' इति। परितुष्टो राजा। दत्तं तस्यै पारितोषिकम्। कारितं बन्धनमोचनादिकमुचितकरणीयम्। हर्षितो नगरीजनव्रजः। उत्सिता (उद्बद्धा) भवनेषु आनन्दध्वजपताकाः। कृता आयतनेषु मनोहरविशेषपूजाः, प्रयुक्तानि च प्रतिभवनं वाद्यमानेन परमप्रमोदतूर्येण गीयमानेन जन्ममङ्गलगेयेन नृत्यन्तीभिस्तरुणरामाभिः प्रेक्षमाणाभिः सहर्षं वृद्धाभिः पीयमानप्रवरासवानि [3]वर्धमानत्वराणि उल्लसता तूर्यसंघातेन (पुष्पाण्युत्कोरता) फलं प्राप्नुवता वैतालिकसमूहेन अत्युदार विच्छर्दानि[4] (-विभवानि) महाप्रमोदपिशुनकानि वर्धापनकानीति। उचितवेलायां च सर्वभवनेभ्यो निर्गता नगरीजनव्रजाः, प्रवृत्ताश्च राजसंमुखम्। तांश्च तथा प्रेक्ष्य हर्षवशप्रवृत्तपुलकः संभ्रमातिशयेन सहर्षनृत्यद्वारवनितासमेतो

---

१ तूरसंघाएणं डे. ज्ञा. । २ पुप्फावंतेणं पा. ज्ञा. । ३ हल्लप्फलय (दे)त्वरा, औत्सुक्यम्। ४ विच्छड्डो सामिद्धी रिद्धी विहवो सिरी य संपत्ती। (पायल०१०३)

म्मब्भुदएणं नयरिजणवएहिं। भणिया य राइणा। तुम्हाणं चेव एसा वुड्ढि त्ति। अहिणन्दिऊण सबहुमाणं पेच्छिऊण तेसिं विच्छड्डं सम्माणिऊण जहोचियं पविट्ठो सभवणंमि। एवं च पइदिणं महन्तमाणन्दसोक्खमणुहवन्तस्स समइच्छिओ पढममासो। पइट्ठावियं नामं दारयस्स 'उचिओ एस एयस्स' कलिऊण पियामहसन्तियं गुणचन्दो त्ति। सो य विसिट्ठपुण्णफलमणुहवन्तो पत्तो कुमारभावं। अच्चन्ताइसएण गहियाओ कलाओ। तं जहा। लेहं गणियं आलेक्खं नट्टं गीयं वाइयं सरगयं पुक्खरगयं समतालं जूयं जणवायं होरा कव्वं दगमट्टियं अट्ठावयं अन्नविही पाणविही सयणविही अज्जा पहेलिया मागहिया गाहा गीइया सिलोगो महुसित्थं गन्धजुत्ती आहरणविही तरुणीपडिकम्मं इत्थीलक्खणं पुरिसलक्खणं हयलक्खणं गयलक्खणं गोणलक्खणं कुक्कुडलक्खणं मेण्ढयलक्खणं चक्कलक्खणं छत्तलक्खणं [1]दण्डलक्खणं असिलक्खणं मणिलक्खणं [2]कागणिलक्खणं चम्मलक्खणं चन्दचरियं सूरचरियं राहुचरियं गहचरियं सूयाकारं

नगरीजनाभिमुखमेव निर्गतो राजा। वर्धापितः (वर्धितः) पुत्रजन्माभ्युदयेन नगरीजनव्रजैः। भणिताश्च राज्ञा–युष्माकमेव एषा वृद्धिरिति। अभिनन्द्य सबहुमानं प्रेक्ष्य तेषां विच्छर्दं (वैभवं) सन्मान्य यथोचितं प्रविष्टः स्वभवनम्। एवं च प्रतिदिनं महद् आनन्दसौख्यमनुभवतः समतिक्रान्तः प्रथममासः। प्रतिष्ठापितं नाम दारकस्य 'उचित एष एतस्य' इति कलयित्वा पितामहसत्कं गुणचन्द्र इति। स च विशिष्टपुण्यफलमनुभवन् प्राप्तः कुमारभावम्। अत्यन्तातिशयेन गृहीताः कलाः। तद्यथा–लेखम्, गणितम्, आलेख्यम्, नाट्यम्, गीतम्, वादितम्, स्वरगतम्, पुष्करगतम्, समतालम्, द्यूतम्, जनवादम्, होरा, काव्यम्, दकमार्तिकम्, अष्टापदम्, अन्नविधिः, पानविधिः, शयनविधिः, आर्या, प्रहेलिका, मागधिका, गाथा, गीतिः, श्लोकः, मधुसिक्थम्, गन्धयुक्तिः, आभरणविधिः, तरुणीप्रतिकर्म, स्त्रीलक्षणम्, पुरुषलक्षणम्, हयलक्षणम्, गजलक्षणम्, गोलक्षणम्, कुर्कुटलक्षणम्, मेषलक्षणम्, चक्रलक्षणम्, छत्रलक्षणम्, दण्ड-

---

१ डंडय– डे. ज्ञा. । २ कागिणि डे. ज्ञा. ।

दूयाकारं विज्ञागयं मन्तगयं हस्सगयं संभवं चारं पडिचारं वूहं पडिवूहं खन्धावारमाणं नगरमाणं वत्थुमाणं खन्धावारनिवेसं नगरनिवेसं वत्थुनिवेसं ईसत्थं तत्तप्पवायं आससिक्खं हत्थिसिक्खं मणिसिक्खं धणुव्वेयं हिरण्णवायं सुवण्णवायं मणिवायं धाउवायं बाहुजुद्धं दण्डजुद्धं मुट्ठिजुद्धं अट्ठिजुद्धं जुद्धं निजुद्धं [1]जुद्धनिजुद्धं सुत्तखेड्डं वट्टखेड्डं वज्झखेड्डं नालियाखेड्डं पत्तच्छेज्जं कडयच्छेज्जं पयरच्छेज्जं सज्जीवं निज्जीवं सउणरुयं चेति। सो य संपत्तविसयपसङ्गसमओ वि आसन्नयाए सिद्धिभावस्स उवसन्तयाए किलिट्ठकम्मुणो अब्भासपरयाए कलाकलावंमि अदंसणयाए कन्नगारूवपगरिसस्स विसयपसङ्गविमुहो तीए चेव नयरीए ओहसियनन्दणवणेसु उज्जाणेसु कलाकलावब्भासतल्लिच्छो आणन्दयन्तो गुरुपयाहियियाइं पूरयन्तो पणइमणोरहे संवद्धयन्तो भिच्चयणसंघायं अणुहवन्तो विसिट्ठपुण्णफलाइं सुहंसुहेण अहिवसइ ।।

लक्षणम्, असिलक्षणम्, मणिलक्षणम्. काकिनीलक्षणम्, चर्मलक्षणम्, चन्द्रचरितम्. सूरचरितम्, राहुचरितम्, ग्रहचरितम्, सूचाकारम्, दूताकारम्, विद्यागतम्, मन्त्रगतम्, रहस्यगतम्, संभवम्, चारम्, प्रतिचारम्, व्यूहम्, प्रतिव्यूहम्, स्कन्धावारमानम्, नगरमानम्, वास्तुमानम्, स्कन्धावारनिवेशम्, नगरनिवेशम्, वास्तुनिवेशम्, इष्वस्त्रम्, तत्त्वप्रवादम्, अश्वशिक्षाम्, हस्तिशिक्षाम्, मणिशिक्षाम्, धनुर्वेदम्, हिरण्यवादम्, सुवर्णवादम्, मणिवादम्, धातुवादम्, बाहुयुद्धम्, दण्डयुद्धम्, मुष्टियुद्धम्, अस्थियुद्धम्, युद्धम्, नियुद्धम्, युद्धनियुद्धम्, सूत्रक्रीडाम्, वर्तक्रीडाम्, वाह्यक्रीडाम्, नालिकाक्रीडाम्, पत्रछेद्यम्, कटकछेद्यम्, प्रतरछेद्यम्, सजीवम्, निर्जीवम्, शकुनरुतं चेति। स च संप्राप्तविषयप्रसङ्गसमयोऽपि आसन्नतया सिद्धिभावस्य उपशान्ततया क्लिष्टकर्मणोऽभ्यासपरतया कलाकलापेऽदर्शनतया कन्यकारूपप्रकर्षस्य विषयप्रसङ्गविमुखस्तस्यामेव नगर्यामपहसितनन्दनवनेषूद्यानेषु कलाकलापाभ्यासतत्पर[2] आनन्दयन्

---

१ जुद्धातिजुद्धं पा. ज्ञा.। २ तग्गयमण-तप्परा य तल्लिच्छा ॥ (पायल० ४०६)

इओ य सो विसेणजीवनारओ तओ नरयाओ उव्वट्टिऊण पुणो संसारमाहिण्डिय अणन्तरभवे तहाविहं किंपि अणुट्ठाणं काऊण समुप्पन्नो वेयड्ढपव्वए रहनेउरचक्कवालउरे नयरे विज्जाहरत्ताए त्ति। कयं से नामं वाणमन्तरो त्ति। अइक्कन्तो कोइ कालो। अन्नया समागओ अओज्झातिलयभूयं मयणनन्दणं नाम उज्जाणं। दिट्ठो य णेण तंमि चेव उज्जाणे आलेक्खविणोयमणुहवन्तो कुमारगुणचन्दो त्ति। तं च दट्ठूण उदिण्णपावकम्मो अब्भाससामत्थेणं अकुसलजोयस्स गहिओ परमारईए। चिन्तियं च णेणं। को उण एसो मह दुक्खहेऊ। अहवा किमणेण जाणिएणं; वावाएमि एयं दुरायारं ति। कसायकलुसियमई गओ तस्स समीवं। जाव न चएति तस्सोग्गहं अइक्कमिउं, तओ चिन्तियमणेणं। इहट्ठिओ चेव अदिस्समाणो विज्जासत्तीए भेसेमि भीसणसद्देणं। तओ सयमेव जीवियं परिच्चइस्सइ। कओ णेण वज्जप्पहारफुट्टन्तगिरिसद्दभीसणो महाभेरवसद्दो। न संखुद्धो कुमारो। ईसि संखुद्धा वि विहसिऊण धीरविया वयं-

---

गुरुप्रजाहृदयानि पूरयन् प्रणयिमनोरथान् संवर्धयन् भृत्यजनसंघातमनुभवन् विशिष्टपुण्यफलानि सुखसुखेनाधिवसति।

इतश्च स विषेणजीवनारकस्ततो नरकादुद्वृत्य पुनः संसारमाहिण्डयानन्तरभवे तथाविधं किमप्यनुष्ठानं कृत्वा समुत्पन्नो वैताढ्यपर्वते रथनूपुरचक्रवालपुरे नगरे विद्याधरतयेति। कृतं तस्य नाम वानमन्तर इति। अतिक्रान्तः कोऽपि कालः। अन्यदा समागतोऽयोध्यातिलकभूतं मदननन्दनं नामोद्यानम्। दृष्टश्च तेन तस्मिन्नेवोद्याने आलेख्यविनोदमनुभवन् कुमारगुणचन्द्र इति। तं च दृष्ट्वोदीर्णपापकर्माऽभ्याससामर्थ्येनाकुशलयोगस्य गृहीतः परमारत्या। चिन्तितं च तेन-कः पुनरेष मम दुःखहेतुः। अथवा किमनेन ज्ञातेन, व्यापादयाम्येतं दुराचारमिति। कषायकलुषितमतिर्गतस्तस्य समीपम्, यावन्न शक्नोति तस्यावग्रहमतिक्रमितुम्। ततश्चिन्तितमनेन-इहस्थित पवादृश्यमानो विद्याशक्त्या भीषये (भापये) भीषणशब्देन। ततः स्वयमेव जीवितं परित्यक्ष्यति। कृतस्तेन वज्रप्रहारस्फुटद्गिरिशब्दभीषणो महाभैरवशब्दः। न संक्षुब्धः कुमारः। ईषत् संक्षुब्धा अपि धीरिता वयस्याः। अधिकतरं कुपिता वानमन्तरः।

सया। अहिययरं कुविओ वाणमन्तरो। चिन्तियं च णेणं। अहो से दुरायारस्स धीरया, अहो अवज्ञा ममोवरिं। ता दंसेमि से अत्तणो परक्कमं, निवाडेमि एयं महल्लं कञ्चणपायवं। तओ णेण संचुण्णियङ्गुवङ्गो नीसंसयं चेव न हविस्सइ त्ति। सयराहमेव पाडिओ कञ्चणपायवो। कुमारपुण्णप्पहावेण निवडिओ अन्नत्थ। न छिक्को वि सपरिवारो कुमारो। दूमिओ वाणमन्तरो। चिन्तियं च णेणं। अहो से महापावस्स सामत्थं ति। अहिययरं संकिलिट्ठो चित्तेणं। एत्थन्तरंमि कुओइ समागओ गमणरई नाम खेत्तवालवाणमन्तरो। तं च दट्ठूण थेवयाए सत्तस्स अप्पयाए विज्जाबलस्स पलाणो विज्जाहरवाणमन्तरो। कुमारो वि उचियसमए पविट्ठो नयरिं॥

इओ य उत्तरावहे विसए सङ्खउरे पट्टणे सङ्खायणो नाम राया। कन्तिमई से भारिया। धूया य से रयणवई नाम। सा य रूवाइसएण मुणीण वि मणहारिणी कलावियक्खणत्तेण असरिसी अन्नकन्नयाण। तओ विसण्णा से जणणी। न इमीए तिहुयणे वि उचियपुरिसरयणं तक्केमि। अहवा बहुरयणभरिया भयवई मेइणी। ता निरूवावेमि ताव नियनिउणपुरिसेहिं, को उण इमीए रूवविन्नाणेहिं

चिन्तितं च तेन-अहो तस्य दुराचारस्य धीरता, अहो अवज्ञा ममोपरि। ततो दर्शयाम्यात्मनः पराक्रमम्, निपातयाम्येतं महान्तं काञ्चनपादपम्। ततस्तेन संचूर्णिताङ्गोपाङ्गो निःसंशयमेव न भविष्यतीति। शीघ्रमेव पातितः काञ्चनपादपः। कुमारपुण्यप्रभावेण च निपतितोऽन्यत्र। न स्पृष्टोऽपि सपरिवारः कुमारः। दूनो वानमन्तरः। चिन्तितं च तेन-अहो तस्य महापापस्य सामर्थ्यमिति। अधिकतरं संक्लिष्टश्चित्तेन। अत्रान्तरे कुतश्चित्समागतो गमनरतिर्नाम क्षेत्रपालवानमन्तरः। तं च दृष्ट्वा स्तोकतया सत्त्वस्याल्पतया विद्याबलस्य पलायितो विद्याधरवानमन्तरः। कुमारोऽप्युचितसमये प्रविष्टो नगरीम्॥

इतश्चोत्तरापथे विषये शङ्खपुरे पत्तने शाङ्खायनो नाम राजा। कान्तिमती तस्य भार्या। दुहिता च तस्या रत्नवती नाम। सा च रूपातिशयेन मुनीनामपि मनोहारिणी कलाविचक्षणत्वेनासदृशी अन्यकन्यकानाम्। ततो विषण्णा तस्या जननी। नास्यास्त्रिभुवनेऽप्युचित-

उचिओ, जओ आसन्नो से विवाहसमओ त्ति। चिन्तिऊण पेसिया दिसोदिसं रायउत्तरूवविन्नाणपरियाणणनिमित्तं वियड्ढा नियपुरिसा। भणिया य एए। आणेयव्वा तुब्भेहि रयणवईरूवजोग्गा [1]रायउत्तपडिच्छन्दया कलाकोसल्लपिसुणयं च किंचि [2]अच्चब्भुयं ति। [जं देवी आणवेइ त्ति] गया दिसोदिसं। दिट्ठा य णेहिं बहवे रायउत्ता, न उण रयणवईरूवजोग्ग त्ति। तहावि जे मणागं सुन्दरयरा, ते आलिहिया तेहिं। गहियं च कल:कोसल्लपिसुणयं [3]पत्तच्छेज्जाइ। समागया अन्ने अओज्झाउरिं। दिट्ठो य तेहिं राहावेहेण धणुव्वेयमब्भसन्तो गुणचन्दो। विम्हिया चित्तेण। पविट्ठो नयरिं कुमारो। चिन्तियं च णेहिं। अहो से रूवं, अहो कलापगरिसो। सव्वहा अणुरूवो एस रायधूयाए। किं तु न तीरए एयस्स संपुण्णपडिच्छन्दयालिहणं, विसेसओ सइदंसणंमि। जंपियं चित्तमइणा। अरे भूसणय, दिट्ठं तए अच्छरियं। तेण भणियं। सुट्ठु दिट्ठं, किं तु विसण्णो अहं। चित्तमइणा भणियं। अरे केण कज्जेण। भूसणेण भणियं।

पुरुषरत्नं तर्कये। अथवा बहुरत्नभृता भगवती मेदिनी। ततो निरूपयामि तावन्निजनिपुणपुरुषैः, कः पुनस्या रूपविज्ञानैरुचितः, यत आसन्नस्तस्या विवाहसमय इति। चिन्तयित्वा प्रेषिता दिशि दिशि राजपुत्ररूपविज्ञानपरिज्ञाननिमित्तं विदग्धा निजपुरुषाः। भणिताश्चैते–आनेतव्या युष्माभी रत्नवतीरूपयोग्या राजपुत्रप्रतिच्छन्दकाः कलाकौशल्यपिशुनकं च किञ्चिदत्यद्भुतमिति। (यद् देव्याज्ञापयतीति) गता दिशि दिशि। दृष्टाश्च तैर्बहवो राजपुत्राः, न पुना रत्नवतीरूपयोग्या इति। तथापि ये मनाक् सुन्दरतरास्ते आलिखितास्तैः। गृहीतं च कलाकौशल्यपिशुनकं पत्रच्छेद्यादि। समागता अन्येऽयोध्यापुरीम्। दृष्टस्तैः राधावेधेन धनुर्वेदमभ्यस्यन् गुणचन्द्रः। विस्मिताश्चित्तेन। प्रविष्टो नगरीं कुमारः। चिन्तितं च तैः। अहो तस्य रूपम्, अहो कलाप्रकर्षः। सर्वथाऽनुरूप एष राजदुहितुः। किन्तु न शक्यते एतस्य संपूर्णप्रतिच्छन्दकालेखनम्, विशेषतः सकृद्दर्शने। जल्पितं चित्रमतिना–अरे भूषणक! दृष्टं त्वयाऽऽश्चर्यम्।

---

१ पडंसु लिहिऊण रायउत्त–पा. ज्ञा.। २ अच्चभूयपत्तच्छेयाइयं डे. ज्ञा.। ३ पत्तच्छेयाइ घ।

असमत्थो जेण देवीसंदेसयं संपाडेउं। चित्तमइणा भणियं 'कहं विय'। भूसणेण भणियं। अरे कहमम्हेहिं एयस्स घडिच्छन्दओ लिहिउं तीरइ त्ति। चित्तमइणा भणियं। अरे सव्वसाहारणो एस विसाओ, अन्नेणावि एस न तीरए चेव। भूसणेण भणियं। किं अम्हाण सेसचिन्ताए, निउत्ता एत्थ अम्हे। चित्तमइणा भणियं। अरे उवसप्पम्ह ताव एयं। तओ अणवरयदंसणेण रायधूयपडिच्छन्दयं पिव किंचिसाहम्मेण लिहिस्सामो एयपडिच्छन्दयं ति। भूसणेण भणियं। जुत्तमेयं, ता कहं पुण एस दट्ठव्वो त्ति। चित्तमइणा भणियं। अरे रयणवइरूवमभिलिहिय चित्तयरदारयववएसेण पेच्छामु एयं ति। भूसणेण भणियं। अरे साहु साहु, सोहणो एस उवाओ। एवं च कए समाणे 'रायधूयाए उवरि केरिसो एसो' त्ति एयं पि विन्नायं भविस्सइ त्ति। मन्तिऊण पविट्ठा नयरिं। आलिहिओ अहिमयपडो। घेत्तूण तं गया कुमारभवणं। भणिओ य पडिहारो। भो महापुरिस, चित्तयरदारया अम्हे अत्थिणो कुमारदंसणस्स। पडिहारेण

तेन भणितम्–सुष्ठु दृष्टम्, किन्तु विषण्णाऽहम्। चित्रमतिना भणितम्–अरे केन कार्येण। भूषणेन भणितम्–असमर्थौ येन देवीसंदेशं संपादयितुम्। चित्रमतिना भणितम्–'कथमिव'। भूषणेन भणितम्–अरे कथमावाभ्यामेतस्य प्रतिच्छन्दको लिखितुं शक्यते इति। चित्रमतिना भणितम्–अरे सर्वसाधारण एष विषादः, अन्येनाप्येष न शक्यते एव। भूषणेन भणितम्–किमावयोः शेषचिन्तया, नियुक्तावत्रावाम्। चित्रमतिना भणितम्–अरे उपसर्पावस्तावदेतम्। ततोऽनवरतदर्शनेन राजदुहितृप्रतिच्छन्दकमिव किंचित्साधर्म्येण लिखिष्याव एतत्प्रतिच्छन्दकमिति। भूषणेन भणितम्–युक्तमेतत्, ततः कथं पुनरेष द्रष्टव्य इति। चित्रमतिना भणितम्–अरे रत्नवतीरूपमभिलिख्य चित्रकरदारकव्यपदेशेन प्रेक्षावहे एतमिति। भूषणेन भणितम्–अरे साधु साधु, शोभन एष उपायः। एवं च कृते सति 'राजदुहितुरुपरि कीदृश एषः' इत्येतदपि विज्ञातं भविष्यतीति। मन्त्रयित्वा प्रविष्टौ नगरीम्। आलिखितोऽभिमतपटः। गृहीत्वा तं गतौ कुमारभवनम्। भणितश्च प्रतीहारः–भो महापुरुष! चित्रकरदारकावावामर्थिनौ कुमारदर्शनस्य। प्रतीहारेण भणितम्–तिष्ठतं तावद्

भणियं । चिट्ठह ताव तुब्भे[1], निवेएमि कुमारस्स । निवेइयं पडिहारेण । समाइट्ठं च णेण, जहा पविसन्तु त्ति । पविट्ठा चित्तमइभूसणा । पणमिओ कुमारो । 'उवविसह' त्ति भणियमणेण । 'पसाओ' त्ति भणिऊण उवविट्ठा एए ।

उवणीओ य अह पडो हरिसियवयणेहि तेहि सपणामं । भणियं च देव अम्हे सङ्खउराओ इहं[2] आया ॥
देवं गुणाण निलयं पणईयणवच्छलं च मुणिऊण[3] । ता अम्हे कयउण्णा जेहि तुमं अज्ज दिट्ठो सि ॥
सयलपुहईए नाहो तं नरवर तहवि भणिमो एवं । अम्हाण तुमं नाहो निब्भरभत्तीपहावेणं ॥
ता देज्जह आणत्तिं चित्तकलाए स[4]गुणलवं अम्हे । जाणामो परमेसर इय भणिउं लज्जिया जाया ॥
अह तं दट्ठूण पडं पीइभरिज्जन्तलोयणजुएण । भणियं गुणचन्देणं अहो कलालवगुणो तुब्भं ॥

युवाम्, निवेदयामि कुमारस्य । निवेदितं प्रतीहारेण । समादिष्टं च तेन–यथा प्रविशतमिति । प्रविष्टौ चित्रमतिभूषणौ । प्रणतः कुमारः । 'उपविशतम्' इति भणितमनेन । 'प्रसादः' इति भणित्वोपविष्टावेतौ ।

उपनीतश्चाथ पटो हर्षितवदनाभ्यां ताभ्यां सप्रणामम् । भणितं च देव ! आवां शङ्खपुरादिहायातौ ॥
देवं गुणानां निलयं प्रणयिजनवत्सलं च ज्ञात्वा । तत आवां कृतपुण्यौ याभ्यां त्वमद्य दृष्टोऽसि ॥
सकलपृथिव्या नाथस्त्वं नरवर ! तथापि भणाव एवम् । आवयोस्त्वं नाथो निर्भरभक्तिप्रभावेण ॥
ततो दत्ताज्ञप्तिं चित्रकलायां स्वगुणलवमावाम् । जानीवः परमेश्वर ! इति भणित्वा लज्जितौ जातौ ॥
अथ तं दृष्ट्वा पटं प्रीतिभ्रियमाणलोचनयुगेन । भणितं गुणचन्द्रेण अहो कलालवगुणो युवयोः ॥

---

१ तुम्हे घ । २ इहायाया पा. ज्ञा. । ३ सुणेऊण पा. ज्ञा. । ४ सलवगुणं डे. ज्ञा. ।

जइ एस कलाए लवो ता संपुण्णा उ केरिसी होइ। सुन्दरअसंभवो च्चिय [1]अओ वरं चित्तयम्मस्स ॥
[2]अम्हेहि अदिट्ठउव्वो अन्नेहि वि नूणमेत्थ लोएहिं। एवंविहो सुरूवो [3]रेहानासो न दिट्ठो त्ति ॥
जइ वि य रेहानासो पत्तेयं होइ सुन्दरो कहवि। तहवि समुदायसोहा न एरिसी होइ अन्नस्स ॥
एसा विसालनयणा दाहिणकरधरियरम्मसयवत्ता। रूवि व्व मयणघरिणी चित्तगया हरइ चित्ताइं ॥
जइ पुण मणुयसुरासुरलोएसु हविज्ज एरिसी कावि। विग्गहवई सुरूवा निज्जिय[4]रइलच्छिलावण्णा ॥
ता [5]नसिऊण इमीए मयणो नियकज्जभारमुद्दामं। हेलाविणिज्जियजओ भुवणंमि सुवेज्ज वीसत्थो ॥
ता अइसयकोसल्लं तुम्हाण इमं दढं महं चित्तं। अवहरइ अहियउव्वं निउणगुणा कं च न हरन्ति ॥

यद्येष कलाया लवस्ततः संपूर्णा तु कीदृशी भवति। सौन्दर्यासंभव एव अतः परं चित्रकर्मणः ॥
अस्माभिरदृष्टपूर्वोऽन्यैरपि नूनमत्र लोकैः। एवंविधः सुरूपो रेखान्यासो न दृष्ट इति ॥
यद्यपि च रेखान्यासः प्रत्येकमपि सुन्दरः कथमपि। तथापि समुदायशोभा नेदृशी भवत्यन्यस्य ॥
एषा विशालनयना दक्षिणकरधृतरम्यशतपत्रा। रूपिणीव मदनगृहिणी चित्रगता हरति चित्तानि ॥
यदि पुनर्मनुजसुरासुरलोकेषु भवेदीदृशी काऽपि। विग्रहवती सुरूपा निर्जितरतिलक्ष्मीलावण्या ॥
ततो न्यस्यास्यां मदनो निजकार्यभारमुद्दामम्। हेलाविनिर्जितजगद् भुवने स्वप्याद् विश्वस्तः ॥
ततोऽतिशयकौशल्यं युवयोरिदं दृढं मम चित्तम्। अपहरत्यधिकापूर्वं निपुणगुणाः कं च न हरन्ति ॥

---

१ अओ परं पा. ज्ञा.। २ अम्हेहदिट्ठ-डे. ज्ञा.। ३ लेहानासो डे. ज्ञा.। ४ -जयलच्छि-पा. ज्ञा.। ५ निसिऊण डे. ज्ञा. पा. ज्ञा.

एवं पयंपिरम्मि गुणचन्दे तेहि निउणपुरिसेहिं । भणियं न एत्थ अम्हं अइसयनिउणत्तणं नाह ॥
अइसयनिउणत्तं पुण एत्थं सुण भयवओ पयावइणो । जेण जयसुन्दरमिणं लडहं रूवं विणिम्मवियं ॥
अम्हेहि लिहियमेत्तं नरवर ! दट्ठूण किमिह निउणत्तं । अम्हाण रूवसोहं संपुण्णमणालिहन्ताणं ॥
इय तव्वयणं सोउं हरिसियवयणेण तो कुमारेणं । भणियं तुब्भेहि कहिं एयं आलोइयं रूवं ॥
संसारसारभूयं नयणमणाणन्दयारयं परमं । तिहुयणविम्हयजणणं विहिणो वि अउव्वनिम्माणं ॥
भणियं च तेहि नरवर ! सुण सङ्खउरंमि गुणनिहाणंमि । दरियारिमद्दणरई राया सङ्खायणो नाम ॥
तस्सेसा गुणखाणी ओहामियतियससुन्दरिविलासा । धूया पाणब्भहिया रयणवई नाम नामेण ॥

एवं प्रजल्पति गुणचन्द्रे ताभ्यां निपुणपुरुषाभ्याम् । भणितं नात्रावयोरतिशयनिपुणत्वं नाथ ! ॥
अतिशयनिपुणत्वं पुनरत्र श्रृणु भगवतः प्रजापतेः । येन जगत्सुन्दरमिदं रम्यं रूपं विनिर्मितम् ॥
आवाभ्यां लिखितमात्रं नरवर ! दृष्ट्वा किमिह निपुणत्वम् । आवयो रूपशोभां संपूर्णामनालिखतोः ॥
इति तद्वचनं श्रुत्वा हर्षितवदनेन ततः कुमारेण । भणितं युष्माभ्यां कुत्रैतदालोकितं रूपम् ॥
संसारसारभूतं नयनमनआनन्दकारकं परमम् । त्रिभुवनविस्मयजननं विधेरपि अपूर्वनिर्माणम् ॥
भणितं च ताभ्यां नरवर ! श्रृणु शङ्खपुरे गुणनिधाने । दृप्तारिमर्दनरती राजा शङ्खायनो नाम ॥
तस्यैषा गुणखानि[1]र्लघूकृतत्रिदशसुन्दरीविलासा । दुहिता प्राणाभ्यधिका रत्नवती नाम नाम्ना ॥

---

१ लहुइअं ओहामियं तुलियं । (पायल० ५३९)

अम्हेहि वम्महमहे दिट्ठा एस त्ति कन्नया नाह। नयराओ निक्खमन्ती दिव्वं जम्पाणमारूढा ।।
धरियधवलायवत्ता सहियणपरिवारिया विसालच्छी। उज्जाणं गन्तुमणा दाहिणकरनिमियसयवत्ता ।।
अम्हेहि तओ हुलियं गेहं गन्तूणमह पडं घेत्तुं। लिहिया मुद्धमयच्छी दंसणमणुसम्भरन्तेहिं ।।
।।७४३।। न य तीए सुन्दरत्तं रूवस्साराहियं इहम्हेहिं। मन्ने न विस्सयम्मो वि अवितहं तं खमो लिहिउं ।। ।।७४३।।
दट्ठुं पि जं न नज्जइ अबुहेहिं साहिउं च वायाए। दिट्ठं पि चित्तयम्मे तं आराहिज्जए कह णु ।।
सोऊण इमं वयणं गुणचन्दो मयणगोयरं पत्तो। रायाणुभावओ च्चिय आलम्बणपगरिसाओ य ।।
गूहन्तेण तहावि य नियमागारमह जंपियं तेण। भण भो वित्थुयबुद्धी अन्नं पसिणोत्तरं किंचि ।।
जं आणवेइ देवो भणिउं परिओसवियसियच्छेण। अणुसरिऊणमिणं तो पढियं पसिणोत्तरं तेण ।।

आवाभ्यां मन्मथमहे दृष्टैषेति कन्यका नाथ!। नगराद् निष्क्रामन्ती दिव्यं जम्पानमारूढा ।।
धृतधवलातपत्रा सखीजनपरिवृता विशालाक्षी। उद्यानं गन्तुमना दक्षिणकरन्यस्तशतपत्रा ।।
आवाभ्यां ततः शीघ्रं गेहं गत्वाऽथ पटं गृहीत्वा। लिखिता मुग्धमृगाक्षी दर्शनमनुस्मरद्भ्याम् ।।
न तस्याः सुन्दरत्वं रूपस्याराधितमिहावाभ्याम्। मन्ये न विश्वकर्माऽप्यवितथं तत् क्षमो लिखितुम् ।।
दृष्टाऽपि यन्न ज्ञायतेऽबुधैः कथयितुं च वाचा। दृष्टमपि चित्रकर्मणि तदाराध्यते कथं नु ।।
श्रुत्वेदं वचनं गुणचन्द्रो मदनगोचरं प्राप्तः। राजानुभावत पव आलम्बनप्रकर्षाच्च ।।
गूहता तथापि च निजमाकारमथ जल्पितं तेन। भण भो विस्तृतबुद्धे! अन्यत् प्रश्नोत्तरं किञ्चित् ।।

किं देन्ति कामिणीओ ? के हरपणया ? कुणन्ति किं भुयगा ?। कं च मऊहेहि ससी धवलेइ ? सिग्घमेवोवलहिऊण भणियं कुमारेणं 'नहंगणाभोयं'। चित्तमइणा भणियं। अहो देवस्स लहणवेगो। कुमारेण भणियं। पढसु किंपि अन्नं ति। विसालबुद्धिणा पढियं।

किं होइ रहस्स वरं ? बुद्धिपसाएण को जणो जियइ ?। किं च कुणन्ती बाला नेउरसद्दं पयासेइ ?॥

ईसि विहसिऊण भणियं कुमारेण 'चक्कमन्ती'। 'अहो अइसओ' त्ति जंपियं भूसणेण। भणियं च णेण। देव, मए वि किंचि पसिणोत्तरं चिन्तियमासि, तं सुणाउ देवो। कुमारेण भणियं 'पढसु' त्ति। पढियं भूसणेण।

किं पियह ? किं च गेण्हह पढमं कमलस्स ? देह किं रिवुणो ?। नववहुरमियं भण किं ? उवहसरं केरिसं वक्कं ?॥

यदाज्ञापयति देवो भणित्वा परितोषविकसिताक्षेण। अनुस्मृत्येदं ततः पठितं प्रश्नोत्तरं तेन॥

किं ददति कामिन्यः, के हरप्रणताः, कुर्वन्ति किं भुजगाः। कं च मयूखैः शशी धवलयति ? शीघ्रमेवोपलभ्य भणितं कुमारेण—"नहंगणाभोयं"। नखम्, गणाः, भोगम्, (फणाम्), नभोङ्गणाभोगम्—नभोङ्गणविस्तारम्। चित्रमतिना भणितम्—अहो ! देवस्य लभनवेगः (लब्धिवेगः)। कुमारेण भणितम्—पठ किमप्यन्यदिति। विशालबुद्धिना पठितम्—

किं भवति रथस्य वरं, बुद्धिप्रसादेन को जनो जीवति। किं च कुर्वती बाला नूपुरशब्दं प्रकाशयति॥

ईषद् विहस्य भणितं कुमारेण—"चक्कमंती"। (चक्रम्, मन्त्री, चङ्क्रममाणा॥ 'अहो अतिशयः' इति जल्पितं भूषणेन। भणितं च तेन। देव ! मयाऽपि किञ्चित् प्रश्नोत्तरं चिन्तितमासीत्, तच्छृणोतु देवः। कुमारेण भणितं 'पठ' इति। पठितं भूषणेन—

किं पिबत, किं च गृह्णीत प्रथमं कमलस्य, दत्त किं रिपोः। नववधूरतं भण किं, उपधास्वरं कीदृशं वक्रम्॥

दमइमही (?) का दिज्जइ परलोए ? का दड्ढा वाणरेण ? कं जाइ वहू ? अमियमहणंमि नट्ठा सुरासुरा केरिसे व्व दसदिसिहुत्ता ? किं इच्छइ सयलं चिय तेलोक्कं ? केरिसं च जुवईहि सया दाविज्जइ नियवयणं ? ॥

कुमारेण भणियं 'पुणो पढसु' त्ति। पढियं भूसणेण। अणन्तरमेव लहिऊण भणियं कुमारेण। 'कण्णालंकारमणहरं सविसेसं। चित्तमइणा भणियं। अहो देवस्स बुद्धिपगरिसो, जमेयं लद्धं ति। देव, महन्तो एयस्स एत्थ अहिमाणो आसि, न लद्धं च एयमन्नेणं। भूसणेण भणियं। अरे, तुज्झं पि अज्ज अहिमाणो अवेइ। कुमारेण भणियं 'कहं विय'। भूसणेण भणियं। देव, एएण वि एवंविहं चेव चिन्तियं। कुमारेण भणियं 'पढसु' त्ति। पढियं चित्तमइणा। के कढिणा नरिन्द ? का कसणा ? तेओ कासु सासओ ?। उच्छू केरिस व्व ? के य अरहिया ? का उयहिगामिणी ?। के धणुपरसुनहरमायाविसवसविसयप्पहाणया जाणसु ॥

दमइमही (?) का दीयते परलोके, का दग्धा वानरेण, कं याति वधूः। अमृतमथने नष्टाः सुरासुरा कीदृशे इव दशदिगभिमुखाः ॥ किमिच्छति सकलमेव त्रैलोक्यं, कीदृशं च युवतिभिः। सदा दर्श्यते निजवदनम् ॥

कुमारेण भणितं 'पुनः पठ' इति। पठितं भूषणेन। अनन्तरमेव लब्ध्वा भणितं कुमारेण–'कन्नालंकारमणहरं सविसेसं'। कं (जलं) नालं, कार–(तिरस्कारः) मनोहरं, सविशेषम्। कन्या–लङ्का–रमणगृहं सविषे [अमृतमथने], शं (सुखं), अलंकारमनोहरं सविशेषम्।

चित्रमतिना भणितम्–अहो देवस्य बुद्धिप्रकर्षः, यदेतल्लब्धमिति। देव! महानेतस्यात्राभिमान आसीद्, न लब्धं चैतदन्येन। भूषणेन भणितम्–अरे तवाप्यद्याभिमानोऽपैति। कुमारेण भणितम्–'कथमिव'। भूषणेन भणितम्–देव! एतेनाप्येवंविधमेव चिन्तितम्। कुमारेण भणितं 'पठ' इति। पठितं चित्रमतिना–के कठिना नरेन्द्र!, का कृष्णा, तेजः कासु शाश्वतम्, इक्षुः कीदृशीव, के च अर्हाः का उदधिगामिनी। कान् धनुः–परशु–नखर–माया-विष-वसा–विषयप्रधानान् जानीहि।

कुमारेण भणियं 'पुणो पढसु' त्ति। पढियं चित्तमइणा। अणन्तरमेव लहिऊण भणियं कुमारेण। 'पत्थरामसीहासुरसप्पवराहलावया'। भूसणेण भणियं। अहो अच्छरीयं, नज्जइ देवेण चेव कियं ति। विम्हिया चित्तमइभूसणा। भणिओ कुमारेण धणदेवाहिहाणो भण्डारिओ। भो धणदेव, देहि एयाण दीणारलक्खं ति। धणदेवेण भणियं। जं देवो आणवेइ। चिन्तियं च णेण। अहो मुद्धया कुमारस्स। अलक्खं दाणमेव नत्थि। नूणं न याणइ एसो, किंपमाणो लक्खो। ता इमं एत्थ पत्तयालं। संपाडेमि एयमेएसिं कुमारपुरओ चेव, जेण विन्नायलक्खमहापमाणो न पुणो वि थेवकज्जे एवमाणवेइ त्ति। चिन्तिऊण आणाविओ तेण तत्थेव दीणारलक्खो, पुञ्जिओ कुमारपुरओ। भणियं कुमारेण। भो धणदेव, किमेयं ति। धणदेवेण भणियं। देव, एसो सो दीणारलक्खो, जो पसाईकओ देवेण एएसिं चित्तयरदारयाणं। कुमारेण चिन्तियं। हन्त किमेयं अज्ज संपयादंसणं। नूणं पभूओ खु एस एयस्स पडिहायइ, ता मं

कुमारेण भणितं 'पुनः पठ' इति। पठितं चित्रमतिना। अनन्तरमेव लब्ध्वा भणितं कुमारेण-'पत्थरामसीहासुरसप्पवराहलावया'। [प्रस्तराः-मषी-ईहा-सुरसप्रवरा-हला-आपगा। 'पत्थ'-पार्थः (अर्जुनः), रामः-परशुरामः, 'सीह' सिंहः, (माया प्रधानः) असुरः, 'सप्प' सर्पः विषप्रधानः, 'वराह' वराहः वसाप्रधानः, 'लावया' विषयप्रधाना लावकपक्षिणः। भूषणेन भणितम्-अहो आश्चर्यम्, ज्ञायते देवेनैव कियदिति। विस्मितौ चित्रमतिभूषणौ। भणितः कुमारेण धनदेवाभिधानो भाण्डागारिकः। भो धनदेव! देहि एताभ्यां दीनारलक्षमिति। धनदेवेन भणितम्-यद् देव आज्ञापयति। चिन्तितं च तेन-अहो मुग्धता कुमारस्य, अलक्षं दानमेव नास्ति। नूनं न जानात्येषः, किंप्रमाणं लक्षम्। तत इदमत्र प्राप्तकालम्। संपादयाम्येतदेताभ्यां कुमारपुरत एव, येन विज्ञातलक्षमहाप्रमाणो न पुनरपि स्तोककार्ये एवमाज्ञापयतीति। चिन्तयित्वा आनायितं तेन तत्रैव दीनारलक्षम्, पुञ्जितं कुमारपुरतः। भणितं कुमारेण। भो धनदेव! किमेतदिति। धनदेवेन भणितम्-देव! एतद् तद् दीनारलक्षम्, यत् प्रसादीकृतं देवेनैतयोश्चित्रकरदारकयोः। कुमारेण चिन्ति-

सुहित्तणेण किल पडिबोहिऊण एयप्पयंसणेण नियत्तेइ इमाओ सपरिगप्पियमहादाणाओ, नेच्छइ य मज्झ संपयापरिब्भंसं ति। अहो मूढया धणदेवस्स, जस्स एगन्तबज्झे अणाणुगामिए सह जीवेणं साहारणे अग्गितक्कराईणं पयाणमेत्तफले परमत्थओ अवयारकारए पयारन्तरेण अत्थे वि पडिबन्धो त्ति। केत्तिओ वा एस लक्खो। न खलु एएण एत्थं पि जम्मे एए वि चित्तयरदारया परिमिएण वि वएण एयनिमित्तं पि असंकिलेसभाइणो होन्ति। न य असंपयाणेणं अपरिब्भंसो संपयाए, अवि य पुण्णसंभारेण। खीणे य पुण्णसंभारे अदिज्जमाणा वि अन्नेसिं अपरिभुञ्जमाणा वि अत्तणा गोविज्जमाणा वि पच्छन्ने रक्खिज्जमाणा वि महापयत्तेणं असंसयं न जायइ। किं वा दाणपरिभोगरहियाए अणुवयारिणीए उभयलोएसु ओहसणिज्जाए पण्डियजणाणं अवित्तीकम्मारयमेत्ताए तत्तचिन्तासु केवलाणत्थफलाए सव्वहा सन्नासकप्पाए त्ति। ता पडिबोहइस्सं अहमिणं पत्थावेणं। इमं पुण एत्थ पत्तयालं, जमन्नमवि लक्खं एएसिं दवावेमि; एसो वि एयस्स पडिबोहणोवाओ चेव त्ति। चिन्तिऊण भणियं च णेणं। अज्जधणदेव, किमेसो लक्खो त्ति। धणदेवेण

तम्-हन्त किमेतदद्य संपद्दर्शनम्। नूनं प्रभूतं खल्वेतद् एतस्य प्रतिभाति, ततो मां सुहृत्त्वेन प्रतिबोध्य एतत्प्रदर्शनेन निवर्तयत्यस्मात् स्वपरिकल्पितमहादानात्, नेच्छति च मम संपत्परिभ्रंशमिति। अहो मूढता धनदेवस्य, यस्यैकान्तबाह्येऽनानुगामिके सह जीवेन साधारणेऽग्नितस्करादीनां प्रदानमात्रफले परमार्थतोऽपकारकारके प्रकारान्तरेण अर्थेऽपि प्रतिबन्ध इति। कीयाद् वैतद् लक्षम्। न खल्वेतेन अत्रापि जन्मनि एतावपि चित्रकरदारकौ परिमितेनापि व्ययेन एतन्निमित्तमप्यसंक्लेशभाजौ भवतः। न चासंप्रदानेनापरिभ्रंशः संपदः, अपि च पुण्यसंभारेण। क्षीणे च पुण्यसंभारे अदीयमाना अप्यन्येषामपरिभुज्यमाना अप्यात्मना गोप्यमाना अपि प्रच्छन्ने रक्ष्यमाणा अपि महाप्रयत्नेनासंशयं न जायते। किंवा दानपरिभोगरहितयाऽनुपकारिण्योभयलोकेषूपहसनीयया पण्डितजनानामवृत्तिकर्मकारकमात्रया तत्त्वचिन्तासु केवलानर्थफलया सर्वथा संन्यासकल्पयेति। ततः प्रतिबोधयिष्याम्यहमिदं प्रस्तावेन। इदं पुनरत्र पाप्तकालम्, यदन्यदपि

भणियं। देव, एसो त्ति। कुमारेण भणियं। अलं दोण्हमेयमेत्तेणं; ता अन्नं पि देहि त्ति। धणदेवेण भणियं। जं देवो आणवेइ। विम्हिया चित्तमइभूसणा, चिन्तियं च णेहिं 'अहो उदारया आसयस्स'। निवडिऊण चलणेसु नेयाविंयं नियमावासं॥

एत्थन्तरंमि समागओ मज्झण्हसमओ। पढियं कालनिवेयएण।

मज्झत्थो च्चिय पुरिसो होइ दढं उवरि सव्वलोयस्स। एवं कहयन्तो विय सूरो नहमज्झमारूढो॥
वारविलासिणिसत्थो तुरियं देवस्स मज्जणनिमित्तं। हक्खुत्तकणयकलसो मज्जणभूमिं समालियइ॥

एवं सोऊण उट्ठिओ कुमारो, गओ मज्जणभूमिं। मज्जिओ अणेगेहिं गन्धोदएहिं। कयं करणिज्जसेसं। रयणवइसाहिलासो य

लक्षमेतयोर्दापयामि, एषोऽप्येतस्य प्रतिबोधनोपाय एवेति। चिन्तयित्वा भणितं च तेन–आर्यधनदेव! किमेतद् लक्षमिति। धनदेवेन भणितम्–देव! एतदिति। कुमारेण भणितम्। अलं द्वयोरेतन्मात्रेण, ततोऽन्यदपि देहीति। धनदेवेन भणितम्–यद् देव आज्ञापयति। विस्मितौ चित्रमतिभूषणौ। चिन्तितं च ताभ्याम्–अहो उदारताऽऽशयस्य। निपत्य चरणयोर्नायितं निजमावासम्।

अत्रान्तरे समागतो मध्याह्नसमयः। पठितं कालनिवेदकेन–

मध्यस्थ इव पुरुषो भवति दृढमुपरि सर्वलोकस्य। एवं कथयन्निव सूरो नभोमध्यमारूढः॥
वारविलासिनीसार्थस्त्वरितं देवस्य मज्जननिमित्तम्। [1]उत्क्षिप्तकनककलशो मज्जनभूमिं समालियते॥

एवं श्रुत्वोत्थितः कुमारः, गतो मज्जनभूमिम्। मज्जितोऽनेकैर्गन्धोदकैः। कृतं करणीयशेषम्। रत्नवतीसाभिलाषश्च स्थितो विचित्र-

---

[1] हक्खुत्त (दे.) उत्क्षिप्तः, उत्पाटितः॥

ठिओ विचित्तसयणिज्जे। चिन्तियं च णेणं। अहो से रूवं सङ्खायणनरिन्दधूयाए। कन्नया य एसा। ता अविरुद्धो संपओओ इमीए त्ति। चिन्तयन्तस्स समागया अत्थाइयावेला। ठिओ अत्थाइयाए। समागया विसालबुद्धिप्पमुहा वयंसया। पत्थुओ चित्तयम्मविणोओ। आलिहिओ कुमारेण सुविहत्तुज्जलेणं वण्णयकम्मेण अलक्खिज्जमाणेहिं गुलियावएहिं अणुरूवाए सुहुमरेहाए पयडदंसणेण निन्नुन्नयविभाएणं विसुद्धाए वट्टणाए उचिएणं भूसणकलावेणं अहिणवनेहूसुयत्तणेणं परोप्परं हासुप्फुल्लबद्धदिट्ठी आरूढपेम्मत्तणेणं लक्खिओचियनिवेसो विज्जाहरसंघाडओ त्ति। एत्थन्तरंमि समागया चित्तमइभूसणा। दिट्ठो य णेहिं गुलियावावडग्गहत्थो तं चेव विज्जाहरसंघाडयं पुलोएमाणो कुमारो त्ति। पणमिऊण सहरिसं भणियं च णेहिं। देव, किमेयं ति। तओ ईसि विहसियसणाहं 'निरूवेह तुब्भे सयमेव'त्ति भणिऊण समप्पिया चित्तवट्टिया। निरूविया चित्तमइभूसणेहिं। विम्हिया एए। भणियं च णेहिं। अहो देवस्स सव्वत्थ अप्पडिहयं परमेसरत्तणं। देव, अउव्वा एसा चित्तयम्मविच्छित्ती साहेइ विय नियभावं फुडवयणेहिं। चित्तयम्मे देव, दुक्करं

शयनीये। चिन्तितं च तेन–अहो तस्या रूपं शाङ्खायननरेन्द्रदुहितुः। कन्यका चैषा, ततोऽविरुद्धः संप्रयोगोऽनयेति। चिन्तयतः समागताऽऽस्थानिकावेला। स्थित आस्थानिकायाम्। समागता विशालबुद्धिप्रमुखा वयस्याः। प्रस्तुतश्चित्रकर्मविनोदः। आलिखितः कुमारेण सुविभक्तोज्ज्वलेन वर्णककर्मणाऽलक्ष्यमाणैर्गुलिकाव्रजैरनुरूपया सूक्ष्मरेखया प्रकटदर्शनेन निम्नोन्नतविभागेन विशुद्धया वर्तनया उचितेन भूषणकलापेन अभिनवस्नेहोत्सुकत्वेन परस्परं हास्योत्फुल्लबद्धदृष्टिरारूढप्रेमत्वेन लक्षितोचितनिवेशो विद्याधरसंघाटक इति। अत्रान्तरे समागतौ चित्रमतिभूषणौ। दृष्टश्च ताभ्यां गुलिकाव्यापृताग्रहस्तस्तमेव विद्याधरसंघाटकं प्रलोकयन् कुमार इति। प्रणम्य सहर्षं भणितं च ताभ्याम्। देव ! किमेतदिति। तत ईषद्विहसितसनाथं 'निरूपयतं युवां स्वयमेव'इति भणित्वा समर्पिता चित्रपट्टिका। निरूपिता चित्रमतिभूषणाभ्याम्। विस्मितावेतौ। भणितं च ताभ्याम्–अहो देवस्य सर्वत्राप्रतिहतं परमेश्वरत्वम्। देव ! अपूर्वैषा चित्रकर्मवि-

भावाराहणं। पसंसन्ति य इणमेव एत्थ आयरिया। अहिणवनेहूसुयत्तणेण वि य परोप्परं हासुप्फुल्लबद्धदिट्ठित्तणं तहा आरूढपेम्मत्तणेण वि य लङ्घिओचियनिवेसयं च एत्थ असाहियं पि देव जाणन्ति बालया वि, किमङ्ग पुण इयरे जणा। एवं च देव चित्तसत्थे पढिज्जइ। जहा विणा चरियाइणा अहियारेण जहा कहंचि किल जारिसयभावजुत्तं चित्तयम्मं निप्फज्जइ, तारिसयभावसंपत्ती नियमेण चित्तयारिणो। ता देव, आसन्नो देवस्स पियदंसणेणं ईइसो भावो त्ति निवेइयं देवस्स। ईसि विहसियं कुमारेण॥

एत्थन्तरंमि समागओ संझासमओ। पढियं कालनिवेयएण।

संझाए बद्धराओ व्व दिणयरो तुरियमत्थसिहरंमि। संकेयगठाणं पिव सुरगिरिगुञ्जं समल्लियइ॥
वित्थरइ कुसुमगन्धो अणहं दिज्जन्ति मङ्गलपईवा। पूइज्जइ रइणाहो रामाहिं रमणभवणेसु॥

च्छित्तिः कथयतीव निजभावं स्फुटवचनैः। चित्रकर्मणि देव! दुष्करं भावाराधनम्। प्रशंसन्ति चेदमेवात्राचार्याः। अभिनवस्नेहोत्सुकत्वेनापि च परस्परं हास्योत्फुल्लबद्धदृष्टित्वं तथाऽऽरूढप्रेमत्वेनापि च लङ्घितोचितनिवेशकं चात्राकथितमपि देव! जानन्ति बालका अपि, किमङ्ग पुनरितरे जनाः। एवं च देव! चित्रशास्त्रे पठ्यते, यथा विना चरितादिना अधिकारेण यथाकथंचित् किल यादृशभावयुक्तं चित्रकर्म निष्पद्यते तादृशभावसंपत्तिर्नियमेन चित्रकारिणः। ततो देव! आसन्नो देवस्य पियदर्शनेन ईदृशो भाव इति निवेदितं देवस्य। ईषद् विहसितं कुमारेण।

अत्रान्तरे समागतः सन्ध्यासमयः। पठितं कालनिवेदकेन।

सन्ध्यायां बद्धराग इव दिनकरस्त्वरितमस्तशिखरे। संकेतस्थानमिव सुरगिरिकुञ्जं समालीयते॥
विस्तीर्यते कुसुमगन्धोऽनघं दीयन्ते मङ्गलप्रदीपाः। पूज्यते रतिनाथो रामाभी रमणभवनेषु॥

एयमायण्णिऊण 'गुरुचलणवन्दणासमओ' त्ति उट्ठिओ कुमारो, गओ जणणिजणयाण सयासं। वन्दिया तेसिं चलणा। बहुमन्निओ णेहि। ठिओ कंचि कालं गुरुसमीवे। उचियसमएणं च गओ वासगेहं। अणुसरन्तस्स रयणवईरूवं वोलिए उचियसमए समागया निद्दा। पहायसमए य दिट्ठो णेण सुमिणओ। जहा किल उवणीया केणावि सोमरूवेण दिव्वकुसुममाला। भणियं च णेण। अहिमया एसा कुमारस्स; ता गिण्हउ इमं कुमारो। गहिया य णेण, घेत्तूण निहिया कण्ठदेसे।

एत्थन्तरंमि पहयाइं पाहाउयतूराइं। विउद्धो कुमारो। पढियं कालनिवेयएणं।

अह निण्णासियतिमिरो विओयविहुराण चक्कवायाण। संगमकरणेक्करसो वियम्भिओ अरुणकिरणोहो॥
पवियसियकमलवयणा महुयरगुञ्जन्तबद्धसंगीया। पवणधुय[1]पत्तहत्था जाया सुहदंसणा नलिणी॥

एवमाकर्ण्य 'गुरुचरणवन्दनासमयः' इत्युत्थितः कुमारः, गतो जननीजनकयोः सकाशम्। वन्दितौ तयोश्चरणौ। बहुमतस्ताभ्याम्। स्थितः कञ्चित् कालं गुरुसमीपे। उचितसमयेन च गतो वासगेहम्। अनुस्मरतो रत्नवतीरूपं व्यतिक्रान्ते उचितसमये समागता निद्रा। प्रभातसमये च दृष्टस्तेन स्वप्नः। यथा किलोपनीता केनापि सौम्यरूपेण दिव्यकुसुममाला। भणितं च तेन। अभिमतैषा कुमारस्य, ततो गृह्णात्विमां कुमारः। गृहीता चानेन, गृहीत्वा निहिता कण्ठदेशे।

अत्रान्तरे प्रहतानि प्राभातिकतूर्याणि। विबुद्धः कुमारः। पठितं कालनिवेदकेन

अथ निर्णाशिततिमिरो वियोगविधुराणां चक्रवाकानाम्। संगमकरणैकरसो विजृम्भितोऽरुणकिरणौघः॥
प्रविकसितकमलवदना मधुकरगुञ्जद्बद्धसंगीता। पवनधूतपत्रहस्ता जाता शुभदर्शना नलिनी॥

---

[1] -धुयपल्लवकरा पा. ज्ञा.

एयं सोउण हरिसिओ चित्तेण। चिन्तियं च णेण। भवियव्वं रयणवईलाहेण। न एस सुमिणओ अन्नहा परिणमइ, उववूहिओ पाहाउयतूरेणं, नियमिओ मङ्गलसद्देहिं, पहाए य दिट्ठो। ता आसन्नफलेण इमिणा होयव्वं ति। चिन्तिऊण उट्ठिओ सयणीयाओ, कयं गुरुचलणवन्दणाइआवस्सयं। ठिओ अत्थाइयाए। समागया विसालबुद्धिप्पमुहा वयंसया। समारद्धा गूढचउत्थयगोट्ठी। पढियं विसालबुद्धिणा।

सुरयमणस्स रइहरे नियम्बभमिरं वहू धुयकरग्गा। तक्खणवुत्तविवाहा। कुमारेण भणियं पुणो पढसु त्ति। पढियं विसालबुद्धिणा। तओ कुमारेण ईसि विहसिऊण भणियं। वरयस्स करं निवारेइ॥

विसालबुद्धिणा भणियं। अहो देवेण लद्धं ति। चित्तमइणा पढियं। भावियरइसाररसा समाणिउं मुक्कबहलसिक्कारा। न तरइ विवरीयरयं। कुमारेण भणियं पुणो पढसु त्ति। पढियं चित्तमइणा। लद्धं कुमारेण। भणियं च णेण 'णियंबभारालसा सामा'॥

एवं श्रुत्वा हर्षितश्चित्तेन। चिन्तितं च तेन-भवितव्यं रत्नवतीलाभेन। नैष स्वप्नोऽन्यथा परिणमति, उपबृंहितः प्राभातिकतूर्येण, नियमितो मङ्गलशब्दैः, प्रभाते च दृष्टः। तत आसन्नफलेनानेन भवितव्यमिति। चिन्तयित्वोत्थितः शयनीयात्, कृतं गुरुचरणवन्दनाद्यावश्यकम्। स्थित आस्थानिकायाम्। समागता विशालबुद्धिप्रमुखा वयस्याः। समारब्धा गूढचतुर्थकगोष्ठी। पठितं विशालबुद्धिना।

सुरतमनसो रतिगृहे नितम्बभ्रमन्तं वधू धूतकराग्रा। तत्क्षणवृत्तविवाहा। कुमारेण भणितं-पुनः पठेति। पठितं विशालबुद्धिना। ततः कुमारेण ईषद् विहस्य भणितम्-'वरस्य करं निवारयति'।

विशालबुद्धिना भणितम्-अहो देवेन लब्धमिति। चित्रमतिना पठितम्-भावितरतिसाररसा भुक्त्वा मुक्तबहलसीत्कारा। न शक्नोति विपरीतरतम्। कुमारेण भणितम्-पुनः पठेति। पठितं चित्रमतिना। लब्धं कुमारेण। भणितं च तेन-'नितम्बभारालसा श्यामा'। भूषणेन

भूसंणेण पढियं। विउलंमि मउलियच्छी घणवीसम्भस्स सामली सुइरं। विवरीयसुरयसुहिया। कुमारेण भणियं। पुणो पढसु त्ति। पढिय भूसणेण। लद्धं कुमारेणं। भणियं च णेण। वीसमइ उरंमि रमणस्स॥

एवं च जाव कंचि वेलं चिट्ठन्ति, तावागन्तूण निवेइयं पडिहारेण। कुमार, आसपरिवाहणनिमित्तं वाहयालिं पउट्टो देवो कुमारं सद्दावेइ त्ति। कुमारेण भणियं। जं ताओ आणवेइ त्ति। उट्ठिऊण परियणसमेओ निग्गओ भवणाओ। आरूढो जच्चवोल्लाहं; मिलिओ रायमग्गे नरवइस्स, गओ वाहयालिं। वाहिया बहवे वल्हीयतुरुक्कवज्जराइया आसा। उचियसमएण पविट्ठो नयरिं। कयं करणिज्जसेसं। एवं च विसिट्ठविणोएण सह चित्तमइभूसणेहिं अइच्छिया कइवि दियहा। अन्नया य काऊण रयणवईरूवगुणकित्तणं निब्भरुक्कण्ठापराहीणयाए अच्चन्तलालसेणं तीए दंसणंमि 'एवं पि ताव पेच्छामि' त्ति समत्थिऊण निययहियएणं समालिहिया चित्तवट्टियाए

पठितम्–विपुले मुकुलिताक्षिर्घनविश्रम्भस्य श्यामा सुचिरम्। विपरीतसुरतसुखिता। कुमारेण भणितम्–पुनः पठेति। पठितं भूषणेन। लब्धं कुमारेण। भणितं च तेन–'[2]विश्राम्यत्युरसि रमणस्य'।

एवं च यावत् काञ्चिद् वेलां तिष्ठन्ति तावदागत्य निवेदितं प्रतीहारेण। कुमार! अश्वपरिवाहननिमित्तं वाह्यालिं प्रवृत्तो देवः कुमारं शब्दाययति इति। कुमारेण भणितम्–यत तात आज्ञापयतीति। उत्थाय परिजनसमेतो निर्गतो भवनात्। आरूढो जात्यवोल्लाहम्। मिलितो राजमार्गे नरपतेः, गतो वाह्यालिम्। वाहिता बहवो वाल्हीकतुरुष्कवज्जरादिका अश्वाः। उचितसमयेन प्रविष्टो नगरीम्। कृतं करणीयशेषम्। एवं च विशिष्टविनोदेन सह चित्रमतिभूषणाभ्यां [3]गताः कत्यपि दिवसाः। अन्यदा च कृत्वा रत्नवतीरूपगुणकीर्तनं

---

१ सामिणि डे. ज्ञा.। २ विपरीतसुरतसुखिता मुकुलिताक्षिः श्यामा घनविश्रम्भस्य रमणस्य विपुले उरसि सुचिरं विश्राम्यति॥ ३ गमेरइच्छ–णी–णीण–वोल– (सिद्धहेम. ८–४–१६२) इति गमेरइच्छादेशाद् अइच्छियागताः।

रयणवई। पुलोइया सिणेहसारं अणिमिसलोयणेण, लिहिया य हिट्ठे गाहा।

हियए वि ठियं बालं पेच्छह दिट्ठं पि चित्तयम्मम्मि। इच्छइ तहावि दट्ठुं समूसुओ अन्तरप्पा मे ॥

एत्थन्तरंमि समागया चित्तमइभूसणा। 'कुमारवल्लह' त्ति न धरिया पडिहारेण। पविट्ठा कुमारसमीवं। दिट्ठा चित्तवट्टिया। 'देव, किमेयं' ति जंपियमणेहिं। ईसि हसिऊण भणियं कुमारेण। तुब्भं वयपडिच्छन्दयालिहणं ति। तेहिं भणियं देव, महापसाओ त्ति। तओ घेत्तूण निरूविया चित्तवट्टिया। विम्हिया एए। वाचिया गाहा। चिन्तियं च णेहिं। धन्ना खु सा रायधूया, जा कुमारेणावि एवं बहु मन्निज्जइ। अहवा किमेत्थ अच्छरियं, विसओ खु सा एवंविहाए बहुमाणणाए। ता इमं एत्थ पत्तयालं, जं सिग्घमेव एयं देवीए निवेइज्जइ त्ति चिन्तिऊण भणियं चित्तमइणा। देव, अउव्वो एस पडिच्छन्दओ। अहो इयमेत्थ अच्छरियं, जमदिट्ठं पि

निर्भरोत्कण्ठापराधीनतया अत्यन्तलालसेन तस्या दर्शने 'एवमपि तावत्प्रेक्षे' इति समर्थ्य निजहृदयेन समालिखिता चित्रपट्टिकायां रत्नवती। प्रलोकिता स्नेहसारमनिमिषलोचनेन। लिखिता चाधो गाथा।

हृदयेऽपि स्थितां बालां पश्यत दृष्टामपि चित्रकर्मणि। इच्छति तथापि द्रष्टुं समुत्सुकोऽन्तरात्मा मे ॥

अत्रान्तरे समागतौ चित्रमतिभूषणौ। 'कुमारवल्लभौ' इति न धृतौ प्रतीहारेण। प्रविष्टौ कुमारसमीपम्। दृष्टा चित्रपट्टिका। 'देव! किमेतद्' इति जल्पितमाभ्याम्। ईषद् हसित्वा भणितं कुमारेण–युवयोर्वृतप्रतिच्छन्दालेखनमिति। तैर्भणितम्–देव! महाप्रसाद इति। ततो गृहीत्वा निरूपिता चित्रपट्टिका। विस्मितावेतौ। वाचिता गाथा। चिन्तितं च ताभ्याम्। धन्या खलु सा राजदुहिता, या कुमारेणाप्येवं बहु मन्यते। अथवा किमत्राश्चर्यम्, विषयः खलु सा एवंविधबहुमाननायाः। तत इदमत्र प्राप्तकालम्, यच्छीघ्रमेवैतद् देव्यै निवेद्यते इति चिन्तयित्वा भणितं चित्रमतिना। देव! अपूर्व एष प्रतिच्छन्दकः। अहो इदमत्राश्चर्यम्, यददृष्टमपि नाम एवमाराध्यते। भूषणेन

नाम एवमाराहिज्जइ। भूसणेण भणियं देव, एरिसा चेव सा रायधूया, न किंचि अन्नारिसं। धन्ना य सा,जा देवेण एवं बहु मन्निज्जइ।

एत्थन्तरंमि पविट्ठो पडिहारो। भणियं च णेण। कुमार, समागओ देवसन्तिओ विस्सभूई नाम गन्धव्विओ कुमारदंसणसुहमणुहविउमिच्छइ। कुमारेण भणियं 'पविसउ त्ति। गओ पडिहारो। पविट्ठो विस्सभूई। पणमिऊण कुमारं भणियं च णेण। देवो आणवेइ। "अत्थि अम्हाणं पत्थुए गन्धव्ववियारे सरे विब्भमो त्ति; तमागन्तूणमवणेउ कुमारो"। तओ ईसि विहसिऊण जंपियं कुमारेण। अहो तायस्स अवच्चंमि बहुमाणो। विस्सभूइणा भणियं। कुमार, गुणा एत्थ बहुमाणहेयवो, न अवच्चमेत्तं। चित्तमइभूसणेहिं भणियं। एवमेयं, सयलगुणपगरिसो कुमारो त्ति। तओ 'जं ताओ आणवेइ' त्ति भणिऊण उट्ठिओ कुमारो, गओ नरिन्दभवणं।

इयरे वि चित्तमइभूसणा विम्हिया कुमारविन्नाणाइसएण गया सभवणं। भणिओ य चित्तमई भूसणेण। अरे चित्तमइ, संपन्नमम्हाण समीहियं। ता इमं एत्थ पत्तयालं। आलिहिऊण जहाविन्नाणविहवेण कुमाररूवं असंसिऊण कुमारस्स दुयं गच्छम्ह, जेण

भणितम्-देव! ईदृश्येव सा राजदुहिता, न किञ्चिदन्यादृशम्। धन्या च सा, या देवेनैवं बहु मन्यते।

अत्रान्तरे प्रविष्टः प्रतीहारः। भणितं च तेन-कुमार! समागतो देवसत्को विश्वभूतिर्नाम गान्धर्विकः कुमारदर्शनसुखमनुभवितुमिच्छति। कुमारेण भणितम्-'प्रविशतु' इति। गतः प्रतीहारः। प्रविष्टो विश्वभूतिः। प्रणम्य कुमारं भणितं च तेन। देव आज्ञापयति, 'अस्त्यस्माकं प्रस्तुते गान्धर्वविचारे स्वरे विभ्रम इति, तमागत्यापनयतु कुमारः"। तत ईषद् विहस्य जल्पितं कुमारेण-अहो तातस्यापत्ये बहुमानः। विश्वभूतिना भणितम्-कुमार! गुणा अत्र बहुमानहेतवः, नापत्यमात्रम्। चित्रमतिभूषणाभ्यां भणितम्-एवमेतद्, सकलगुणप्रकर्षः कुमार इति। ततो 'यत् तात आज्ञापयति' इति भणित्वोत्थितः कुमारः, गतो नरेन्द्रभवनम्।

इतरावपि चित्रमतिभूषणौ विस्मितौ कुमारविज्ञानातिशयेन गतौ स्वभवनम्। भणितश्च चित्रमतिर्भूषणेन। अरे चित्रमते! संप-

दट्ठूण कुमाररूवाइसयं चिय इमस्स विन्नाणाइसयं च देवी लहुं संजोएइ रायधूयं कुमारेण सह। एवं च कए समाणे सा चेव रायधूया सयलगुणसंजुया महादेवी संजायइ त्ति। चित्तमइणा भणियं। अरे भूसणय, संसिऊण कुमारस्स गच्छन्ताणं को दोसो त्ति। भूसणेण भणियं। अरे पत्थुयविघाओ, जओ न पेसेइ लहुं अम्हे कुमारो त्ति। चित्तमइणा भणियं। अरे अत्थि एयं, ता एवं करेम्ह। आलिहिओ कुमारो। तओ घेत्तूण तं कुमारालिहियचित्तवट्टियादुयं च घेत्तूण निग्गया अओज्झाओ। गया कालक्कमेण सङ्खउरं। पविट्ठा निययभवणेसु। वीयदियहे य गया देवीभवणं। दिट्ठा णेहिं देवी। साहिओ धणुव्वेयगुणणाइओ गन्धव्वसरसंसयावणोयणपज्जवसाणो कुमारसन्तिओ सयलवुत्तन्तो। दंसिओ से कुमारो कुमारालिहियचित्तवट्टियादुयं च। तओ सपरिओसं निरूविऊण कुमाररूवं कलाकोसल्लं च परितुट्ठा एसा। दवावियं चित्तमइभूसणाण पारिओसियं। पुणो वि निरूविओ कुमारो देवीए। चिन्तियं

न्नमावयोः समीहितम्। तत इदमत्र प्राप्तकालम्। आलिख्य यथाविज्ञानविभवं कुमाररूपमशंसित्वा कुमारस्य द्रुतं गच्छावः, येन दृष्ट्वा कुमाररूपातिशयमेवास्य विज्ञानातिशयं च देवी लघु संयोजयति राजदुहितरं कुमारेण सह। एवं च कृते सति सैव राजदुहिता सकलगुणसंयुता महादेवी संजायते इति। चित्रमतिना भणितम्–अरे भूषणक! शंसित्वा कुमारं गच्छतोः को दोष इति। भूषणेन भणितम्–अरे! प्रस्तुतविघातः, यतो न प्रेषयति लघु आवां कुमार इति। चित्रमतिना भणितम्–अरे अस्त्येतद्, तत एवं कुर्वः। आलिखितः कुमारः। ततो गृहीत्वा तं कुमारालिखितचित्रपट्टिकाद्विकं च गृहीत्वा निर्गतावयोध्यायाः। गतौ कालक्रमेण शङ्खपुरम्। प्रविष्टौ निजभवनेषु। द्वितीयदिवसे च गतौ देवीभवनम्। दृष्टा ताभ्यां देवी। कथितो धनुर्वेदगुणनादिको गान्धर्वस्वरसंशयापनोदनपर्यवसानः कुमारसत्कः सकलवृत्तान्तः। दर्शितस्तस्याः कुमारः कुमारालिखितचित्रपट्टिकाद्विकं च। ततः सपरितोषं निरूप्य कुमाररूपं कलाकौशल्यं च परितुष्टैषा। दापितं चित्रमतिभूषणाभ्यां पारितोषिकम्। पुनरपि निरूपितः कुमारो देव्या। चिन्तितं च तया–अहो तस्य रूपसंपद्, अहो

च णाए। अहो से रूवसंपया, अहो अवत्थाणगरुओ संठाणविसेसो। तओ अइसयकोउएण [1]अजायसंतोसाए कुमारदंसणस्स निरूवियाओ अन्नाओ वि चित्तवट्टियाओ। 'अहो से रूवपगरिसाणुरूवो विन्नाणपगरिसो' त्ति विम्हिया देवी। वाचिया य णाए सा [2]धूयापडिच्छन्दयहेट्ठओ कुमारलिहिया गाहा। हरिसिया चित्तेण। चिन्तियं च तीए। धन्ना खु मे धूया, जा कुमारेण [3]एवमहिलसीयइ। पेसिओ य णाए मयणमञ्जुयाहत्थंमि कुमारपडिच्छन्दओ रयणवईए। भणिया य एसा। हला, भणाहि मे जायं, जहा लहुं एयं सिक्खेहि। गया मयणमञ्जुया। दिट्ठा रयणवई। उवणीया चित्तवट्टिया। भणियं रयणवईए। हञ्जे किमेयं ति। तीए भणियं। भट्टिदारिए, पेसिओ खु एस पडिच्छन्दओ देवीए, आणत्तं च तीए, जहा लहुं सिक्खाहि एयं ति। रयणवईए भणियं हला, को उण एस आलिहिओ। मयण[4]मञ्जुयाए भणियं। न-याणामि निस्संसयं। एत्तियं पुण तक्केमि, एस भयवं पुरन्दरो। रयणवईए भणियं। हला, सहस्सलोयणदूसिओ खु एसो सुणीयइ। मयणमञ्जुयाए भणियं। जइ एवं, ता नारायणो। रयणवईए भणियं।

नगुरुकः संस्थानविशेषः। ततोऽतिशयकौतुकेनाजातसंतोषया कुमारदर्शनस्य निरूपितेऽन्येऽपि चित्रपट्टिके। 'अहो तस्य रूपप्रकर्षानुरूपो विज्ञानप्रकर्षः' इति विस्मिता देवी। वाचिता च तया सा दुहितृप्रतिच्छन्दकाधः कुमारलिखिता गाथा। हर्षिता चित्तेन। चिन्तितं च तया-धन्या खलु मे दुहिता, या कुमारेणैवमभिलष्यते। प्रेषितश्च तया मदनमञ्जुलाहस्ते कुमारप्रतिच्छन्दको रत्नवत्याः। भणिता चैषा, सखि! भण मे जाताम्, यथा लघ्वेतं शिक्षस्व। गता मदनमञ्जुला। दृष्टा रत्नवती। उपनीता चित्रपट्टिका। भणितं रत्नवत्या-सखि! किमेतदिति। तया भणितम्-भर्तृदारिके! प्रेषितः खल्वेषः प्रतिच्छन्दको देव्या, आज्ञप्तं च तया, यथा लघु शिक्षस्वैतमिति। रत्नवत्या भणितम्-सखि! कः पुनरेष आलिखितः। मदनमञ्जुलया भणितम्-न जानामि निःसंशयम्। एतावत् पुनः तर्कयामि, एष भगवान्

---

१ संजायसंतोसाए डे. ज्ञा. । २ धूयपडि-ग. । ३ -मभिलसियइ त्ति डे. ज्ञा. । ४ मञ्जूसाए इति सर्वत्र, क्वचिच्च-मञ्जुयाए इति पा. ज्ञा. ।

हला, सो वि न एवं कणयावयायच्छवी। मयणमञ्जुयाए भणियं। जइ एवं, ता सव्वजणमणाणन्द[1]यारी चन्दो। रयणवईए भणियं। हला, न सो वि एवं निक्कलङ्को। मयणमञ्जुयाए भणियं। ता कामदेवो भविस्सइ। रयणवईए भणियं। हला, कुओ तस्स वि हु हरहुंकारहुयवहसिहापयं गयस्स ईइसो लायण्णसोहावयारो। मयणमञ्जुयाए भणियं। जइ एवं, ता सयमेव निरूवेउ भट्टिदारिया। तओ चिरं निज्झाइओ रयणवईए। भणियं च णाए। हला, तक्केमि न एस अमाणुसो। जओ पवड्ढमाणवयविसेसस्स पुव्वरूवं पिव इमं लक्खीयइ, अवट्ठियवयविसेसा य अमाणुसा। तहा निमेसोचियं इमस्स निद्धं लोयणजुयलं, अणिमिसं च एयममाणुसाणं। मयणमञ्जुयाए भणियं। सुट्ठु जाणियं भट्टिदारियाए। एवमेयं, न संदेहो त्ति। अहं पुण तक्केमि, भट्टिदारियाए चेव एसो वरो भविस्सइ॥ एत्थन्तरंमि नियकज्जसंगयं जंपियं सिद्धाएसपुरोहिएण। को एत्थ संदेहो, असंसयं भविस्सइ। एयं सोऊण हरिसिया रयणवई। भणियं

पुरन्दरः। रत्नवत्या भणितम्-सखि! सहस्रलोचनदूषितः खल्वेष श्रूयते। मदनमञ्जुलया भणितम्-यद्येवं ततो नारायणः। रत्नवत्या भणितम्-सखि! सोऽपि नैवं कनकावदातच्छविः। मदनमञ्जुलया भणितम्-यद्येवं ततः सर्वजनमनआनन्दकारी चन्द्रः। रत्नवत्या भणितम्-सखि! न सोऽप्येवं निष्कलङ्कः। मदनमञ्जुलया भणितम्-ततः कामदेवो भविष्यति। रत्नवत्या भणितम्-सखि! कुतस्तस्यापि खलु हरहुंकारहुतवहशिखापदं गतस्येदृशो लावण्यशोभावतारः। मदनमञ्जुलया भणितम्-यद्येवं ततः स्वयमेव निरूपयतु भर्तृदारिका। ततश्चिरं निध्यातो (अवलोकितः) रत्नवत्या। भणितं च तया-सखि! तर्कयामि नैषोऽमानुषः। यतो प्रवर्धमानवयोविशेषस्य पूर्वरूपमिवेदं लक्ष्यते, अवस्थितवयोविशेषाश्चामानुषाः। तथा निमेषोचितमस्य स्निग्धं लोचनयुगलम्, अनिमिषं चेतदमानुषाणाम्। मदनमञ्जुलया भणितम्-सुष्ठु ज्ञातं भर्तृदारिकया, एवमेतद् न संदेह इति। अह पुनः तर्कयामि, भर्तृदारिकाया एवैष वरो भविष्यति॥

---

[1] दायी ग।

मयणमञ्जुयाए भट्टिदारियाए सुयं सिद्धाएसवयणं। तओ हरिसपराहीणयाए ईसि [१]विहसिएण बहु मन्निऊण तीए वयणं समारद्धा पुलोइउं। भणिया य चित्तसुन्दरी। हला, उवणेहि मे चित्तवट्टियं वट्टियासमुग्गयं च, जेण संपाडेमि अम्बाए सासणं ति। 'जं भट्टिदारिया आणवेइ' त्ति जंपिऊण संपाडियमिणं चित्तसुन्दरीए। समारद्धा एसा समालिहिउं। तओ महया अहिणिवेसेण निरूविउं पुणो पुणो तहारूवो चेवालिहिओ तीए पडिच्छन्दओ। भणिया य मयणमञ्जुया। हला, उवणेहि एयमम्बाए, भणाहि य अम्बं 'किमेस आराहिओ न व' त्ति। मयणमञ्जुयाए भणियं। जं भट्टिदारिया आणवेइ। गया मयणमञ्जुया। विन्नत्ता य णाए देवी। भट्टिणि, भट्टिदारिया रयणवई विन्नवेइ 'निरूवेह एयं चित्तपडिच्छन्दयं, किमेस आराहिओ न व' त्ति। समप्पिया चित्तवट्टिया, गहिया देवीए। निरूविऊण चिन्तियमिमीए। अहो मे धूयाए चित्तयम्मचउरत्तणं। सोहणयरो खु एसो पडिच्छन्दयाओ। आणाविया य णाए कुमा-

अत्रान्तरे निजकार्यसंगतं जल्पितं सिद्धादेशपुरोहितेन। कोऽत्र संदेहः, असंशयं भविष्यति। एतच्छ्रुत्वा हर्षिता रत्नवती। भणितं मदनमञ्जुलया भर्तृदारिकया श्रुतं सिद्धादेशवचनम्?। ततो हर्षपराधीनतया ईषद् विहसितेन बहु मत्वा तस्या वचनं समारब्धा प्रलोकितुम्। भणिता च चित्रसुन्दरी-सखि! उपनय मे चित्रपट्टिकां वर्तिकासमुद्गकं च, येन संपादयाम्यम्बायाः शासनमिति। 'यद् भर्तृदारिकाऽऽज्ञापयति' इति जल्पित्वा संपादितमिदं चित्रसुन्दर्या। समारब्धैषा समालिखितुम्। ततो महताऽभिनिवेशेन निरूप्य पुनः पुनस्तथारूप एवालिखितस्तया प्रतिच्छन्दकः। भणिता च मदनमञ्जुला, सखि! उपनयैतमम्बायाः, भण चाम्बां 'किमेष आराधितो नवा' इति। मदनमञ्जुलया भणितम्-यद् भर्तृदारिकाऽऽज्ञापयति। गता मदनमञ्जुला। विज्ञप्ता च तया देवी-भट्टिनि! भर्तृदारिका रत्नवती विज्ञपयति 'निरूपयैतं चित्रप्रतिच्छन्दकं 'किमेष आराधितो नवा' इति। समर्पिता चित्रपट्टिका, गृहीता देव्या। निरूप्य चिन्तितमनया-अहो

---

[१] विहसिएण वयणकमलेण डे. ज्ञा.।

रलिहिया रयणवइचित्तवट्टिया, आसन्नीकया कुमारपडिच्छन्दयस्स, जाव 'अच्चन्ताणुरूवं मिहुणयं'ति हरिसिया देवी। भणियं च णाए। हला मयणमञ्जुए, भणाहि मे जायं, जहा सुट्ठु आराहिओ; अन्नं च, सव्वकालमेव तुमं एयाराहणपरा हवेज्जसु त्ति; एयं च ते पारिओसियं, तुमं पि एएण एवं चेवाराहिय त्ति; निरूवेहि एयस्स चित्तकोसल्लं ति। भणिऊण समप्पियं से चित्तवट्टियादुयं। 'जं मए वियप्पियं, तं तह' त्ति हरिसिया मयणमञ्जुया। गया रयणवईसमीवं। भणियं च णाए। भट्टिदारिए, परितुट्ठा ते देवी; भणियं च णाए, जहा सुट्ठु आराहिओ त्ति। पेसियं च ते पारिओसियं। तं पुण न अन्नपारिओसियप्पयाणमन्तरेण समप्पिउं जुज्जइ। रयणवईए भणियं। हला, देस्सामि ते पारिओसियं। पेच्छामि ताव, किं पुण अम्बाए पेसियं पारिओसियं। मयणमञ्जुयाए भणियं जं भट्टिदारिया आणवेइ। उवणीया से कुमारलिहिया चित्तवट्टिया। दिट्ठा [1]रयणवईए। चिन्तियं च णाए। हन्त अहं पिव एत्थ आलिहिय त्ति।

मे दुहितुश्चित्रकर्मचतुरत्वम्। शोभनतरः खल्वेष प्रतिच्छन्दकात्। आनायिता च तया कुमारलिखिता रत्नवतीचित्रपट्टिका, आसन्नीकृता कुमारप्रतिच्छन्दकस्य, यावद् 'अत्यन्तानुरूपं मिथुनकम्' इति हर्षिता देवी। भणितं च तया–सखि मदनमञ्जुले! भण मे जाताम्, यथा सुष्ठु आराधितः। अन्यच्च सर्वकालमेव त्वमेतदाराधनपरा भवेरिति, एतच्च ते पारितोषिकम्। त्वमपि एतेनैवमेवाराधितेति, निरूपयैतस्य चित्रकौशल्यमिति। भणित्वा समर्पितं तस्याश्चित्रपट्टिकाद्विकम्। 'यन्मया विकल्पितं तत्तथा' इति हर्षिता मदनमञ्जुला। गता रत्नवतीसमीपम्। भणितं च तया–भर्तृदारिके! परितुष्टा ते देवी, भणितं च तया, यथा सुष्ठु आराधित इति। प्रेषितं च ते पारितोषिकम्। तत्पुनर्नान्यपारितोषिकप्रदानमन्तरेण समर्पितुं युज्यते। रत्नवत्या भणितम्–सखि! दास्यामि ते पारितोषिकम्। प्रेक्षे तावत् किं पुनरम्बया प्रेषितं पारितोषिकम्। मदनमञ्जुलया भणितम्–यद् भर्तृदारिकाऽऽज्ञापयति। उपनीता तस्याः कुमारलिखिता चित्रपट्टिका।

---

[1] रयणवईए निरूविया य। दिट्ठं उप्फुल्ललोयणाए चित्तवट्टियादुयं। चिंतियं डे. ज्ञा.

न तु केवलो जीवस्तेन विमुक्तस्य वेदनाभावे। न च स एव तत्खलु लोकादिविरोधभावात् ॥
एवमेव देहवधे उपकारे वाऽपि पुण्यपापे। इतरथा घटादिभङ्गादिज्ञातत नैव युज्येते ॥
तदभिन्ने च नियमात् तन्नाशे तस्य प्राप्नोति नाशः। इहपरलोकाभावात् बन्धादीनामभावात् ॥
देहेन देहे चोपघातानुग्रहादिबन्धादयः। न पुनरमूर्त्तो मूर्तस्यात्मनः करोति किञ्चिदपि ॥

---

[1] पाणिवहा–डे. ज्ञा.

अकरेन्तो य न बज्झइ अइप्पसङ्गा सदेव भावाओ। तम्हा भेयाभेए जीवसरीराण बन्धाई ॥
मोक्खो वि य बद्धुस्सा[1] तयभावे स कह कीस वा न सया। किं वा हेऊंहि तहा कहं व सो होइ पुरिसत्थो ॥
तम्हा बद्धुस्स तओ बन्धो वि अणाइमं पवाहेण। इहरा तदभावम्मी पुव्वं चिय मोक्खसंसिद्धी ॥
अणुभूयवत्तमाणो बन्धो कयगत्तणाइमं कह नु। जह उ अईओ कालो तहाविहो तह पवाहेण ॥
दीसइ कम्मोवचओ संभवई तेण तस्स विगमो वि। कणगमलस्स य तेण उ मुक्को मुक्को त्ति नायव्वो ॥
एमाइभाववाओ जत्थ तओ होइ तावसुद्धो त्ति। एस उवाएओ खलु बुद्धिमया धीरपुरिसेण ॥
एयस्स उवायाणं काउं आसेविऊण भावेण। पत्ता अणन्तजीवा सासयसोक्खं लहुं मोक्खं ॥

अकुर्वंश्च न वध्यतेऽतिप्रसङ्गात् सदैव भावात्। तस्माद् भेदाभेदे जीवशरीरयोर्बन्धादिः ॥
मोक्षोऽपि च वद्धस्य तदभावे स कथं कस्माद्वा न सदा। किं वा हेतुभिस्तथा कथं वा स भवति पुरुषार्थः ॥
तस्माद् वद्धस्य ततो वन्धोप्यनादिमान् प्रवाहेण। इतरथा तदभावे पूर्वमेव मोक्षसंसिद्धिः ॥
अनुभूतवर्तमानो वन्धः कृतकत्वानादिमान् कथं नु। यथा त्वतीतः कालस्तथाविधस्तथा प्रवाहेण ॥
दृश्यते कर्मोपचयः संभवति तेन तस्य विगमोऽपि। कनकमलस्य च तेन तु मुक्तो मुक्त इति ज्ञातव्यः ॥
एवमादिभाववादो यत्र ततो भवति तापशुद्ध इति। एष उपादेयः खलु बुद्धिमता धीरपुरुषेण ॥
एतस्योपादानं कर्तुमासेव्य भावेन। प्राप्ता अनन्ता जीवा शाश्वतसौख्यं लघु मोक्षम् ॥

---

[1] बन्धस्सा पा. ज्ञा.

।।७९७।।

ता पडिवज्जह सम्मं धम्ममिणं भावओ मए भणियं । अच्चन्तदुल्लहं खलु करेह सफलं मणुयजम्मं ॥
इय भणिऊण जाए तुण्हिक्के तक्खणं जिणवरंमि । परिसा कयञ्जलिउडा धणियं परिओसमावन्ना ॥
धरणिनमिउत्तिमङ्गा इच्छामो सासणं ति जंपन्ती । उन्नामियमुहकमला पुणो वि ठाणं गया निययं ॥
तत्थ य केइ पवन्ना सम्मत्तं देसविरइवयमन्ने । अन्ने उ चत्तसङ्गा जाया समणा समियपावा ॥
एत्थन्तरंमि य मए दिट्ठा देवी तहिं समोसरणे । जाया य मज्झ चिन्ता हन्त कुओ एत्थ देवि त्ति ॥
सरियं च मन्तसिद्धस्स तं मए पुव्वमन्तियं वयणं । परिचिन्तियं च एत्थं पुच्छामि जिणं नियाणं ति ॥
किं पुण मए कयं परभवंमि जस्सीइसो विवागो त्ति । देवीविरहंमि दढं अणुहूयं दारुणं दुक्खं ॥
परिपुच्छिओ य एयं नमिऊण मए जिणो निरवसेसं । पुव्वकयकम्मदोसं तओ वि इय कहिउमाढत्तो ॥

ततः प्रतिपद्यध्वं सम्यग् धर्ममिमं भावतो मया भणितम् । अत्यन्तदुर्लभं खलु कुरुत सफलं मनुजजन्म ॥
इति भणित्वा जाते तूष्णिके तत्क्षणं जिनवरे । परिषत् कृताञ्जलिपुटा गाढं परितोषमापन्ना ॥
धरणीनतोत्तमाङ्गा इच्छामः शासनमिति जल्पन्ती । उन्नामितमुखकमला पुनरपि स्थानं गता निजकम् ॥
तत्र च केऽपि प्रपन्नाः सम्यक्त्वं देशविरतिव्रतमन्ये । अन्ये तु त्यक्तसङ्गा जाताः श्रमणाः शमितपापाः ॥
अत्रान्तरे च मया दृष्टा देवी तत्र समवसरणे । जाता च मम चिन्ता हन्त कुतोऽत्र देवीति ॥
स्मृतं च मन्त्रसिद्धस्य तन्मया पूर्वमन्त्रितं वचनम् । परिचिन्तितं चात्र पृच्छामि जिनं निदानमिति ॥
किं पुनर्मया कृतं परभवे यस्येदृशो विपाक इति । देवीविरहे दृढमनुभूतं दारुणं दुःखम् ॥

।।७९७।।

अत्थि इहेव गिरिवरो जम्बुद्दीवंमि भारहे वासे। विंझो[1] त्ति सिहरसञ्चयपज्जलियमहोसहिसणाहो ॥
दरियगयदलियपरिणयहरियन्दणसुरहिपसरियामोओ। फलपुट्ठतरुवरट्ठियविहङ्गगणविरुयसद्दालो ॥
नामेण सिहरसेणो तत्थ तुमं आसि सवरराओ त्ति। बहुसत्तघायणरओ अच्चन्तविसयगिद्धो य ॥
तत्थ अणेगाणि तुमे वराहवसपसयहरिणजुयलाइं। रण्णे विओइयाइं भीयाइ सुहाभिलासीणि।
देवी वि य ते एसा तुह जाया आसि सिरिमई नाम। वक्कलदुगुल्लवसणा गुञ्जाफलमालियाहरणा ॥ ॥७९८॥
स तुमं इमीए सद्धिं सच्छन्दं गिरिनिउञ्जदेसेसु। विसयसुहमणुहवन्तो चिट्ठसि काले निदाहंमि ॥
एत्थन्तरंमि एक्को गच्छो साहूण पहपरिब्भट्ठो। परिखीणो हिण्डन्तो तं देसं आगओ नवरं ॥

परिपृष्टश्चैतद् नत्वा मया जिनो निरवशेषम्। पूर्वकृतकर्मदोषं ततोऽपीति कथयितुमारब्धः ॥
अस्तीहैव गिरिवरो जम्बूद्वीपे भारते वर्षे। विन्ध्य इति शिखरसंचयप्रज्वलितमहौषधिसनाथः ॥
दृप्तगजदलितपरिणतहरिचन्दनसुरभिप्रसृतामोदः। फलपुष्टतरुवरस्थितविहङ्गगणविरुतशब्दवान् ॥
नाम्ना शिखरसेनस्तत्र त्वमासीः शवरराज इति। बहुसत्त्वघातनरतोऽत्यन्तविषयगृद्धश्च ॥
तत्रानेकानि त्वया वराहवृषपसयहरिणयुगलानि। अरण्ये वियोजितानि भीतानि सुखाभिलाषीणि ॥
देव्यपि च ते एषा तव जायाऽऽसीत् श्रीमती नाम। वल्कलदुकूलवसना गुञ्जाफलमालिकाभरणा ॥
स त्वमनया सार्धं स्वच्छन्दं गिरिनिकुञ्जदेशेषु। विषयसुखमनुभवन् तिष्ठसि काले निदाघे ॥

---

[1] पिञ्झो त्ति डे. ज्ञा. पा. ज्ञा.

दट्ठूण साहुगच्छं अणुगम्पा तुह मणंमि उप्पन्ना। हा किं भमन्ति एए अइविसमे विञ्झकन्तारे ॥
गन्तूण पुच्छिया ते किं हिण्डह एत्थ विञ्झरण्णंमि। साहूहि तओ भणियं सावय पन्थाउ पब्भट्ठा ॥
भणिओ य सिरिमईए तं सामि महातवस्सिणो एए। उत्तारेहि सपुण्णे भीमाओ विञ्झरण्णाओ ॥
पीणेहि य फलमूलाइएहि अइविसमतवपरिक्खीणे। नूणं निहाणलम्भो एस तुह पणामिओ विहिणा ॥
इय भणिएण ससंभमहरिसवसपयट्टपयडपुलएणं। उवणीयाइ सविणयं [1]पेसलफलमूलकन्दाइं ॥
साहूहि तओ भणियं सावय नेयाणि कप्पणिज्जाणि। अम्हाण जिणवरेहिं जम्हा समए निसिद्धाणि ॥
भणियं तुमए तह वि य तुब्भेहि अणुग्गहो उ कायव्वो। अन्नहकएण गाढं निव्वेओ होइ अम्हाणं ॥

अत्रान्तरे एको गच्छः साधूनां पथपरिभ्रष्टः। परिक्षीणो हिण्डमानस्तं देशमागतो नवरम् ॥
दृष्ट्वा साधुगच्छमनुकम्पा तव मनस्युत्पन्ना। हा किं भ्रमन्त्येते अतिविषमे विन्ध्यकान्तारे ॥
गत्वा पृष्टास्ते किं हिण्डध्वमत्र विन्ध्यारण्ये। साधुभिस्ततो भणितं श्रावक! पथः प्रभ्रष्टाः ॥
भणितश्च श्रीमत्या त्वं स्वामिन्! महातपस्विन एतान्। उत्तारय सपुण्यान् भीमाद् विन्ध्यारण्याद् ॥
प्रीणय च फलमूलादिभिरतिविषमतपःपरिक्षीणान्। नूनं निधानलाभ एष तवार्पितो विधिना ॥
इति भणितेन ससंभ्रमहर्षवशप्रवृत्तप्रकटपुलकेन। उपनीतानि सविनयं पेशलफलमूलकन्दानि ॥
साधुभिस्ततो भणितं श्रावक! नैतानि कल्पनीयानि। अस्माकं जिनवरैर्यस्मात्समये निषिद्धानि ॥

---

[1] पसल–डे. ज्ञा. पा. ज्ञा.

परियाणिऊण भावं नवरं सद्धालुयाण गुणजुत्तं । तेहिं अणुग्गहत्थं कज्जं हिययंमि काऊणं ॥
साहूहि तओ भणियं जइ एवं विगयवण्णगन्धाइं । ता अम्ह देह नवरं फलाइ चिरकालगहियाइं ॥
इय भणिएणं तुमए सिग्घं गिरिकन्दराउ घेत्तूण । पडिलाहिया तवस्सी परिणयफलमूलकन्देहिं ॥
पन्थंमि पाडिया तह जायासहिएण सुद्धभावेण । मन्नन्तेण कयत्थं अप्पाणं जीवलोगंमि ॥
तेहि वि य तुज्झ धम्मो कहिओ जिणदेसिओ सुसाहूहिं । पडिवन्ना इय तुब्भे कम्मोवसमेण तं धम्मं ॥
दिन्नो य नमोक्कारो सासयसिवसोक्खकारणब्भूओ । भत्तिभरोणयवयणेहि सो य तुब्भेहि गहिओ त्ति ॥
मुणिऊण तह य तुब्भं जम्मं कम्माणुहावचरियं च । साहूहि समाइट्ठं कायव्वमिणं ति तुब्भेहिं ॥

भणितं त्वया तथापि च युष्माभिरनुग्रहस्तु कर्तव्यः । अन्यथाकृतेन गाढं निर्वेदो भवति अस्माकम् ॥
परिज्ञाय भावं नवरं श्रद्धालुकानां गुणयुक्तम् । तैरनुग्रहार्थं कार्यं हृदये कृत्वा ॥
साधुभिस्ततो भणितं यद्येवं विगतवर्णगन्धानि । ततोऽस्माकं दत्त नवरं फलानि चिरकालगृहीतानि ॥
इति भणितेन त्वया शीघ्रं गिरिकन्दराद् गृहीत्वा । प्रतिलाभिताः तपस्विनः परिणतफलमूलकन्दैः ॥
पथि पातितास्तथा जायासहितेन शुद्धभावेन । मन्यमानेन कृतार्थमात्मानं जीवलोके ॥
तैरपि च तव धर्मः कथितो जिनदेशितः सुसाधुभिः । प्रतिपन्नाविति युवां कर्मोपशमेन तं धर्मम् ॥
दत्तश्च नमस्कारः शाश्वतशिवसौख्यकारणभूतः । भक्तिभरावनतवदनाभ्यां स च युवाभ्यां गृहीत इति ॥
ज्ञात्वा तथा च युवयोर्जन्म कर्मानुभावचरितं च । साधुभिः समादिष्टं कर्तव्यमिदमिति युवाभ्याम् ॥

~~॥७९४~~। ॥८०१॥

पक्खस्सेगदिणंमी आरम्भं वज्जिऊण सावज्जं । पइरिक्कसंठिएहिं अणुसरियव्वो नमोक्कारो ॥
तंमि य दिणंमि तुब्भं जइ वि सरीरविणिवायणं कोइ । चिन्तेज्ज तह करेज्ज व तहावि तुब्भेहि खमियव्वं ॥
एवं सेवन्ताणं तुब्भं जिणभासियं इमं धम्मं । अचिरेण होहिइ धुवं मणहरसुरसोक्खसंपत्ती ॥
तुब्भेहि वि भत्तीए सोऊणमिणं सुसाहुवयणं ति । एवं ति अब्भुवगयं गएहि साहूहि चिण्णं च ॥
तह चेव कंचि कालं अन्नोन्नवड्ढमाणसड्ढेहिं[1] । अह अन्नया य तुब्भं पोसहपडिमं पवन्नाणं ॥
तुङ्गंमि विञ्झसिहरे गयकुम्भत्थलवियारणेक्करसो । धुयपिङ्गकेसरसढो दरियमइन्दो समल्लीणो ॥
तं दट्ठूणं तुमए तब्भीयं सिरिमइं निएऊण । वामकरगोयरत्थं गहियं कोदण्डमुद्दामं ॥

पक्षस्यैकदिने आरम्भं वर्जयित्वा सावद्यम् । प्रतिरिक्तसंस्थिताभ्यामनुस्मर्तव्यो नमस्कारः ॥
तस्मिंश्च दिने युवयोर्यद्यपि शरीरविनिपातनं कोऽपि । चिन्तयेत् तथा कुर्याद्वा तथापि युष्माभ्यां क्षन्तव्यम् ॥
एवं सेवमानयोर्युवयोर्जिनभाषितमिमं धर्मम् । अचिरेण भविष्यति ध्रुवं मनोहरसुरसौख्यसंपत्तिः ॥
युवाभ्यामपि भक्त्या श्रुत्वेदं सुसाधुवचनमिति । एवमित्यभ्युपगतं गतेषु साधुषु चीर्णं च ॥
तथैव कञ्चित् कालमन्योन्यवर्धमानश्रद्धाभ्याम् । अथान्यदा च युवयोः पोषधप्रतिमां प्रपन्नयोः ।
तुङ्गे विन्ध्यशिखरे गजकुम्भस्थलविदारणैकरसः । धुतपिङ्गकेसरसटो दृप्तमृगेन्द्रः समालीनः ॥
तं दृष्ट्वा त्वया तद्भीतां श्रीमतीं दृष्ट्वा । वामकरगोचरस्थं गृहीतं कोदण्डमुद्दामम् ॥

~~॥७९४~~ ॥८०१॥

---

[1] –वड्ढमाणसड्ढेहिं डे. ज्ञा. पा. ज्ञा.

भणियं च भीरु मा भायसु त्ति एयस्स मं समल्लीणा। एसो हु पसवराया ममेक्कसरवायसज्झो त्ति ॥
तो सिरिमईए भणियं एवं एयं ति [1]कोऽत्थ संदेहो। किं तु गुरुवयणमेयं [2]पमुक्कं होइ अम्हेहिं ॥
जम्हा गुरूहि भणियं सरीरविणिवायणं पि तुब्भाण। जइ कोइ तंमि दियहे करेज्ज तुब्भेहि खमियव्वं ॥
ता कह गुरूण वयणं सुमरन्तेहि गुणभूसियं नाह। परलोयबन्धुभूयं कीरइ विवरीयमम्हेहिं ॥
अह मोत्तूण धणुवरं तुमए तो सिरिमई इमं भणिया। सच्चं गुरूण वयणं कह कीरइ अन्नहा सुयणु ॥
तुह ने[3]हमोहिएणं मए वि एयमिह ववसियं आसि। ता अलमेएण पिए गुरुवयणे आयरं कुणसु ॥
एत्थन्तरंमि [4]रुञ्जियसद्देण नहङ्गणं स पूरेन्तो। महिदिन्नतलपहारो उवट्ठिओ तुज्झ सीहो त्ति ॥

भणितं च भीरु! मा विभीहीति एतस्माद् मां समालीना। एष खलु मृगराजो ममैकशरपातसाध्य इति ॥
ततः श्रीमत्या भणितं एवमेतदिति कोऽत्र संदेहः। किन्तु गुरुवचनमेतत् प्रमुक्तं भवत्यावाभ्याम् ॥
यस्माद् गुरुभिर्भणितं शरीरविनिपातनमपि युवयोः। यदि कोऽपि तस्मिन् दिवसे कुर्याद् युवाभ्यां क्षन्तव्यम् ॥
ततः कथं गुरूणां वचनं स्मरद्भ्यां गुणभूषितं नाथ!। परलोकबन्धुभूतं क्रियते विपरीतमावाभ्याम् ॥
अथ मुक्त्वा धनुर्वरं त्वया ततः श्रीमतीदं भणिता। सत्यं गुरूणां वचनं कथं क्रियतेऽन्यथा सुतनु! ॥
तव स्नेहमोहितेन मयाऽप्येतदिह व्यवसितमासीद्। ततोऽलमेतेन प्रिये! गुरुवचने आदरं कुरु ॥
अत्रान्तरे रुञ्जितशब्देन नभोङ्गणं स पूरयन्। महीदत्ततलप्रहार उपस्थितस्तव सिंह इति ॥

---

[1] को एत्थ डे. ज्ञा. पा. ज्ञा. [2] पमुक्कं डे. ज्ञा. पा. ज्ञा. [3] मोह–डे. ज्ञा. [4] गुंजिय–डे. ज्ञा. पा. ज्ञा.

परिचिन्तियं च तुमए गुरूवएसपरिवालणानिहसो। उवयारि च्चिय एसो अम्हाणं पसवनाहो त्ति॥
इय चिन्तिन्तो य तुमं नहरेहि वियारिओ सुतिक्खेहिं। कुविएण अकुवियमणो जायासहिओ मइन्देण॥
अहियासिओ य तुमए जायासहिएण सो उवसग्गो। जो कुपुरिसाण सावय अच्चत्थं दुरहियासो त्ति॥
चइऊण तओ देहं विसुद्धचित्ताइ दो वि समकालं। सोहम्मे उववन्नाइ इड्ढिमन्ताइ सयराहं॥
पलिओवमाउयाइं तत्थ य भोए जहिच्छिए भोत्तुं। खीणाउयाइ तत्तो चइऊण इहेव दीवंमि॥
जायाइ जत्थ जह वा संजोयं सुन्दरं च पत्ताइं। जह पाविओ य दुक्खं विरसं तह संपयं सुणसु॥
अवरविदेहे खेत्ते चक्कउरं नाम पुरवरं रम्मं। उत्तुङ्गधवलपायारमण्डियं तियसनयरं व॥
तत्थासि पत्थिवो वासवो व्व चरपुरिसलोयणसहस्सो। सइ वड्ढियविसयसुहो नामेणं कुरुमियङ्को त्ति॥

परिचिन्तितं च त्वया गुरूपदेशपरिपालनानिकषः। उपकार्येव एष आवयोः मृगनाथ इति॥
इति चिन्तयँश्च त्वं नखरैर्विदारितः सुतीक्ष्णैः। कुपितेनाकुपितमना जायासहितो मृगेन्द्रेण॥
अध्यासितश्च (सोढश्च) त्वया जायासहितेन स उपसर्गः। यः कापुरुषाणां श्रावक! अत्यर्थं दुरध्यास इति॥
त्यक्त्वा ततो देहं विशुद्धचित्तौ द्वावपि समकालम्। सौधर्मे उपपन्नौ ऋद्धिमन्तौ शीघ्रम्॥
पल्योपमायुष्कौ तत्र च भोगान् यथेप्सितान् भुक्त्वा। क्षीणायुष्कौ ततश्च्युत्वा इहैव द्वीपे॥
जातौ यत्र यथा वा संयोगं सुन्दरं च प्राप्तौ। यथा प्राप्तश्च दुःखं विरसं तथा साम्प्रतं शृणु॥
अपरविदेहे क्षेत्रे चक्रपुरं नाम पुरवरं रम्यम्। उत्तुङ्गधवलप्राकारमण्डितं त्रिदशनगरमिव॥

तस्सासि अग्गमहिसी देवी नामेण बालचन्द त्ति। तीसे गब्भंमि तुमं चइऊण सुहंमि उववन्नो ॥
देवी वि य ते रन्नो सालस्स सुभूसणस्स गेहंमि। उववन्ना कयउण्णा कुरुमइदेवीए कुच्छिंसि ॥
ताण बहुएहि दोण्ह वि मणोरहसएहि [१]दिंणे पसत्थंमि। जायाइ तया तुब्भे रूवाइगुणेहि कलियाइं ॥
तत्थ य समरमियङ्को नामं तुह ठावियं गुरुयणेण। देवीए वि य नामं असोयदेवि त्ति संगीयं ॥
कालेण दोण्णि वि तओ सयलकलागहणदुव्वियड्ढाइं। कुसुमाउहवरभवणं जोव्वणमह तत्थ पत्ताइं ॥
दिन्ना असोयदेवी तइया तुज्झं सुभूसणनिवेण। परिणीया य तए वि य सुपसत्थविवाहजोएण ॥
भुञ्जन्ताण पयामं विसयसुहं नवर वच्चए कालो। तुम्हाण सपरिओसं अन्नोन्नं बद्धरायाणं ॥

तत्रासीत् पार्थिवो वासव इव चरपुरुषलोचनसहस्रः। सदा वर्धितविषयसुखो नाम्ना कुरुमृगाङ्क इति ॥
तस्यासीदग्रमहिषी देवी नाम्ना बालचन्द्रेति। तस्या गर्भे त्वं श्च्युत्वा सुखेनोपपन्नः ॥
देव्यपि च ते राज्ञः सालस्य सुभूषणस्य गेहे। उपपन्ना कृतपुण्या कुरुमतीदेव्याः कुक्षौ ॥
तयोर्बहुभिर्द्वयोरपि मनोरथशतैः दिने प्रशस्ते। जातौ तदा युवां रूपादिगुणैः कलितौ ॥
तत्र च समरमृगाङ्को नाम तव स्थापितं गुरुजनेन। देव्या अपि च नाम अशोकदेवीति संगीतम् ॥
कालेन द्वावपि ततः सकलकलाग्रहणदुर्विदग्धौ। कुसुमायुधवरभवनं यौवनमथ तत्र प्राप्तौ ॥
दत्ता अशोकदेवी तदा तव सुभूषणनृपेण। परिणीता च त्वयाऽपि च सुप्रशस्तविवाहयोगेन ॥

---

[१] दियहे पसत्थंमि डे. ज्ञा. पा. ज्ञा.

अह अन्नया पिया ते पलियं दट्ठूण जायसंवेओ। दाऊण तुज्झ रज्जं देवीए समं स पव्वइओ॥
जाओ य तुमं राया निज्जियनियमण्डलो सरज्जंमि। चिट्ठसि विसयपसत्तो भुञ्जन्तो मणहरे भोए॥
अह तिरिय[1]विसंजोयणनिद्दयतग्घायजणियकम्मस्स। एत्थन्तरंमि विरसो सावय जाओ विवाओ त्ति॥
आसि तहिं चिय [2]विजए [3]भम्भानयरंमि सिरिवलो राया। तेण सह तुज्झ जाओ अणिमित्तो विग्गहो कहवि॥
तुह जे पहाणजोहा ते सव्वे सिरिबलं समल्लीणा। अब्भुवगओ तुमाए तेण समं तह वि संगामो॥
[4]जाए य तंमि तइया महाविमद्देण सिरिबलेण तुमं। वावाइओ सि सावय विणिहयनियसेन्नसेसेण॥
मरिऊण य उववन्नो रोद्दज्झाणेण नवर निरयंमि। सत्तरससागराऊ नेरइओ कम्मदोसेण॥

भुञ्जतोः प्रकामं विषयसुखं नवरं व्रजति कालः। युवयोः सपरितोषमन्योन्यं वद्धरागयोः॥
अथान्यदा पिता ते पलितं दृष्ट्वा जातसंवेगः। दत्त्वा तव राज्यं देव्या समं स प्रव्रजितः॥
जातश्च त्वं राजा निर्जितनिजमण्डलः स्वराज्ये। तिष्ठसि विषयप्रसक्तो भुञ्जन् मनोहरान् भोगान्॥
अथ तिर्यग्विसंयोजननिर्दयतद्घातजनितकर्मणः। अत्रान्तरे विरसः श्रावक! जातो विपाक इति॥
आसीत्तत्रैव विजये भंभानगरे श्रीवलो राजा। तेन सह तव जातोऽनिमित्तो विग्रहः कथमपि॥
तव ये प्रधानयोधास्ते सर्वे श्रीवलं समालीनाः। अभ्युपगतस्त्वया तेन समं तथापि संग्रामः॥
जाते च तस्मिन् तदा महाविमर्देन श्रीवलेन त्वम्। व्यापादितोऽसि श्रावक! विनिहतनिजसैन्यशेषेण॥

---

१ -विजोयण-डे. ज्ञा. २ चियवि समल्लीए गंगानयरंमि डे. ज्ञा. ३ बम्भा-मु. पु. ४ जोए य डे. ज्ञा.

सोऊण तुज्झ मरणं असोयदेवी वि उवगया मोहं। हित्थेण[१] परियणेणं नवरं आसासिया सन्ती॥
रोद्दज्झाणोवगया काऊणं धम्मविग्घमच्चत्थं। तुह नेहमोहियमई नियाणमेयं महापावं॥
राया समरमियङ्को उप्पन्नो नवर जत्थ ठाणंमि। तत्थेव मन्दभग्गा जाएज्ज अहं पि नियमेण॥
तो हुयवहं पविट्ठा किलिट्ठचित्ता य नवर मरिऊण। जत्थेव तुमं नरए इमी वि तत्थेव उववन्ना॥
सत्तरससागराऊ गमिओ दुक्खेण कहवि तुब्भेहिं। तत्थ अहाउयकालो निच्चुव्विग्गेहि भीएहिं॥
उव्वट्टिऊण य तुमं निरयाओ पुक्खरद्धभरहंमि। जाओ सि गहवइसुओ वेण्णाए[२] दरिद्दगेहंमि॥
एसा वि तुज्झ जाया तत्थेव य भारहंमि वासंमि। जाया दरिद्दधूया नवरं तुज्झं सजाईए॥

मृत्वा चोपपन्नो रौद्रध्यानेन नवरं निरये। सप्तदशसागरायूर्नैरयिकः कर्मदोषेण॥
श्रुत्वा तव मरणमशोकदेव्यपि उपगता मोहम्। त्रस्तेन परिजनेन नवरमाश्वासिता सती॥
रौद्रध्यानोपगता कृत्वा धर्मविघ्नमत्यर्थम्। तव स्नेहमोहितमतिर्निदानमेवं महापापम्॥
राजा समरमृगाङ्क उत्पन्नो नवरं यत्र स्थाने। तत्रैव मन्दभाग्या जायेयाहमपि नियमेन॥
ततो हुतवहं प्रविष्टा क्लिष्टचित्ता च नवरं मृत्वा। यत्रैव त्वं नरके इयमपि तत्रैवोपपन्ना॥
सप्तदशसागरायुर्गमितो दुःखेन कथमपि युवाभ्याम्। तत्र यथायुःकालो नित्योद्विग्नाभ्यां भीताभ्याम्॥
उद्वर्त्य च त्वं निरयात् पुष्करार्धभरते। जातोऽसि गृहपतिसुतो वेण्णायां दरिद्रगेहे॥

---

[१] दित्थेण डे. ज्ञा. [२] चित्ताए पा. ज्ञा.

कालेण दोण्णि वि तओ तुब्भे अह जोव्वणं उवगयाइं। जाओ य कहवि नवरं तत्थ वि तुम्हाण वीवाहो ॥
नेहवसेण य तुब्भे तत्थ वि दारिद्ददुक्खविमुहाइं। चिट्ठह जहासुहेणं अन्नोन्नं बद्धरायाइं ॥
अह अन्नहा य दिट्ठा नियए गेहंमि अच्छमाणेहिं। तुब्भेहि साहुणीओ समुयाणकए पविट्ठाओ ॥
दट्ठूण तओ ताओ सद्धासंवेगपयडपुलएहिं। पडिलाहियाउ फासुयभिक्खादाणेण विहिपुव्वं ॥
कत्थ ट्ठियाउ तुब्भे इय पुट्ठाओ य ताहि वि य सिट्ठं। वसुसेट्ठिघरसमीवे पडिस्सए नयरमज्झंमि ॥
घेत्तूण फुल्लनियरं वासरविरमंमि तो पयट्टाइं। पुव्वकहियं सहरिसं पडिस्सयं भत्तिजुत्ताइं ॥
पत्ताइं च कमेणं पइसमयं [१]वड्ढमाणसद्धाइं। दिट्ठा य तत्थ गणिणी सुपसन्ता सुव्वया नाम ॥

एषापि तव जाया तत्रैव च भारते वर्षे। जाता दरिद्रदुहिता नवरं तव सजात्या ॥
कालेन द्वावपि ततो युवामथ यौवनमुपगतौ। जातश्च कथमपि नवरं तत्रापि युवयोर्विवाहः ॥
स्नेहवशेन च युवां तत्रापि दारिद्र्यदुःखविमुखौ। तिष्ठथो यथासुखेनान्योन्यं बद्धरागौ ॥
अथान्यदा च दृष्टा निजे गेहे आसीनाभ्याम्। युवाभ्यां साध्व्यः समुदानकृते प्रविष्टाः ॥
दृष्ट्वा ततस्ताः श्रद्धासंवेगप्रकटपुलकाभ्याम्। प्रतिलाभिताः प्रासुकभिक्षादानेन विधिपूर्वम् ॥
कुत्र स्थिता यूयमिति पृष्टाश्च ताभिरपि शिष्टम्। वसुश्रेष्ठिगृहसमीपे प्रतिश्रये नगरमध्ये ॥
गृहीत्वा पुष्पनिकरं वासरविरमे ततः प्रवृत्तौ। पूर्वकथितं सहर्षं प्रतिश्रयं भक्तियुक्तौ ॥

---

[१] वद्धमाण-डे. ज्ञा.

पुरओ संठियपोत्थयनिविट्ठदिट्ठी नमन्ततणुणाला । लोयणभमरभरोणयसुवयणकमला कमलिणि व्व ॥
वित्थिण्णमहत्थाइं ठियाइ एक्कारसं पि अङ्गाइं । कमलदलकोमलंमि वि जीए जीहाए अग्गंमि ॥
सा वन्दिया य नवरं गणिणी तुब्भेहि विम्हियमणेहिं । करयलकयञ्जलिउडं हरिसवसुब्भिन्नपुलएहिं ॥
तीए वि धवलपडन्तरविणिग्गउत्ताणिएक्ककरकमलं । अद्धुन्नामियवयणाए भणियं धम्मलाहो त्ति ॥
भणियाणि य [1]जिणयन्दे वन्दह काऊण कुसुमवु[2]ड्ढिं ति । पुरओ जिणाण जेणं मुच्चह संसारवासाओ ॥
काऊण कुसुमवुड्ढिं गन्धड्ढं कुट्टिमंमि जिणयन्दे । अह वन्दिऊण य तओ गणिणीसमीवे निसण्णाइं ॥
गणिणीए तओ भणियं निम्मलपरिणिन्तदसणकिरणोहं । परिवसह कत्थ तुब्भे इहेव इय जंपमाणेहिं ॥

प्राप्तौ च क्रमेण प्रतिसमयं वर्धमानश्रद्धौ । दृष्टा च तत्र गणिनी सुप्रशान्ता सुव्रता नाम ॥
पुरतः संस्थितपुस्तकनिविष्टदृष्टिर्नमत्तनुनाला । लोचनभ्रमरभरावनतसुवदनकमला कमलिनीव ॥
विस्तीर्णमहार्थानि स्थितानि एकादशापि अङ्गानि । कमलदलकोमलेऽपि यस्या जिह्वाया अग्रे ॥
सा वन्दिता च नवरं गणिनी युवाभ्यां विस्मितमनोभ्याम् । करतलकृताञ्जलिपुटं हर्षवशोद्भिन्नपुलकाभ्याम् ॥
तयाऽपि धवलपटान्तरविनिर्गतोत्तानितैककरकमलम् । अर्धोन्नामितवदनया भणितं धर्मलाभ इति ॥
भणितौ च जिनचन्द्रान् वन्देथां कृत्वा कुसुमवृष्टिमिति । पुरतो जिनानां येन मुच्येयाथां संसारवासाद् ॥
कृत्वा कुसुमवृष्टिं गन्धाढ्यां कुट्टिमे जिनचन्द्रान् । अथ वन्दित्वा च ततो गणिनीसमीपे निषण्णौ ॥

---

[1] जिणचंदे डे. ज्ञा. [2] –वुड्ढित्ति डे. ज्ञा.

तुब्भेहि साहुणीए जीए दिट्ठाइ गोयरगयाए। भणियं अज्जेवम्हे वसहिं पुट्ठाउ एएहि॥
गोयरगयाउ धणियं सद्धावन्ताइ तह य एयाइं। तित्थयरवन्दणत्थं भत्तीए इहागयाइं ति॥
गणिणीए तओ भणियं साहु कयं धम्मनिहियचित्ताइं। जं एत्थ आगयाइं किच्चमिणं नवर भवियाण॥
जम्हा जयंमि सरणं धम्मं मोत्तूण नत्थि जीवाणं। सारीरमाणसेहिं दुक्खेहि अहिद्दुयाणं ति॥
न य सो तीरइ काउं जहट्ठिओ वज्जिऊण मणुयत्तं। तं पुण चलं असारं सुविणयमाइन्दजालसमं॥
लद्धूण माणुसत्तं धम्मं न करेइ जो विसयलुद्धो। दहिऊण चन्दणं सो करेइ अङ्गारवाणिज्जं॥
धम्मेण सयलभावा सुहावहा होन्ति जीवलोयंमि। धम्मेण सासयसुहं लब्भइ अचिरेण परमपयं॥

गणिन्या ततो भणितं निर्मलपरिगच्छद्दशनकिरणौघम्। परिवसथः कुत्र युवामिहैवेति जल्पतोः॥
युवयोः (सतोः) साध्व्या यया दृष्टौ गोचरगतया। भणितमद्यैव वयं वसतिं पृष्टा पताभ्याम्॥
गोचरगता गाढं श्रद्धावन्तौ तथा चैतौ। तीर्थंकरवन्दनार्थं भक्त्या इहागताविति॥
गणिन्या ततो भणितं साधु कृतं धर्मनिहितचित्तौ। यदत्रागतौ कृत्यमिदं नवरं भविकानाम्॥
यस्माद् जगति शरणं धर्मं मुक्त्वा नास्ति जीवानाम्। शारीरमानसैर्दुःखैरभिद्रुतानामिति॥
न च स शक्यते कर्तुं यथास्थितो वर्जित्वा मनुजत्वम्। तत्पुनश्चलमसारं स्वप्नमृगेन्द्रजालसमम्॥
लब्ध्वा मानुषत्वं धर्मं न करोति यो विषयलुब्धः। दग्ध्वा चन्दनं स करोत्यङ्गारवाणिज्यम्॥
धर्मेण सकलभावाः सुखावहा भवन्ति जीवलोके। धर्मेण शाश्वतसुखं लभ्यतेऽचिरेण परमपदम्॥

सो उण वियलियराएहि भावओ जिणवरिन्दचन्देहिं। होइ परिचिन्तिएहि वि अलाहि किं ता पुलइएहिं॥
ता सुट्ठु कयं एयं जं दट्ठुं आगयाइ जिणयन्दे। जिणसाहुदंसणाइं हंदि वियारेन्ति दुरियाइं॥
कहिओ य तीए धम्मो तुब्भेहि वि नवर सुद्धचित्तेहिं। पडिवन्नो जिणभणिओ कया य महुमंसविरंई य॥
गमिऊण कंचि कालं नमिऊण जिणे सुसाहुणीओ य। गेहमह पत्थियाइं भणियाणि य नवर गणिणीए॥
एज्जह इह पइदियहं एवं चिय तह सुणेज्जह य धम्मं। दुक्खविरेयणभूयं पन्नत्तं वीयरागेहिं॥
पडिवज्जिऊण य तओ गणिणीवयणं गयाणि नियगेहं। हिट्ठहिययाइ धणियं धम्मंमि कयाणुरायाइं॥
कइवयदिणेसु य तहा जायाइं परमभत्तिजुत्ताइं। उक्किट्ठसावयाइं विसयसुहनियत्तचित्ताइं॥

स पुनर्विगलितरागैर्भावतो जिनवरेन्द्रचन्द्रैः। भवति परिचिन्तितैरपि अलं किं तावत् प्रलोकितैः॥
ततः सुष्ठु कृतमेतद् यद् द्रष्टुमागतौ जिनचन्द्रान्। जिनसाधुदर्शनानि किल विदारयन्ति दुरितानि॥
कथितश्च तया धर्मो युवाभ्यामपि नवरं शुद्धचित्ताभ्याम्। प्रतिपन्नो जिनभणितः कृता च मधुमांसविरतिश्च॥
गमयित्वा कंचित्कालं नत्वा जिनान् सुसाध्वीश्च। गेहमथ प्रस्थितौ भणितौ नवरं गणिन्या॥
एतमिह प्रतिदिवसमेवमेव तथा शृणुतं च धर्मम्। दुःखविरेचनभूतं प्रज्ञप्तं वीतरागैः॥
प्रतिपद्य च ततो गणिनीवचनं गतौ निजगेहम्। हृष्टहृदयौ गाढं धर्मे कृतानुरागौ॥
कतिपयदिनेषु च तथा जातौ परमभक्तियुतौ। उत्कृष्टश्रावकौ विषयसुखनिवृत्तचित्तौ॥

---

१ दंसणाहिं हंदि वियारेहि डरियाइं पा॰ ज्ञा. २ –विरइत्ति पा॰ ज्ञा.

अणुवालिऊण पवरं सावयधम्मं अहाउयं जाव। मरिऊण बम्भलोए कप्पंमि तओऽववन्नाइं ॥
आउं च तत्थ तुब्भं अहेसि सत्ताहियाइ अयराइं। तत्तो चइऊण इहं नरवइगेहेसु जायाइं ॥
तिव्वं च सवरजम्मे कम्मं तुमए कयं इमीए वि। अणुमोइयं ति तस्स उ परिणामो निरयवासंमि ॥
अणुहूओ च्चिय तुब्भेहिं तह य भरहंमि खुद्दमणुयभवे। तक्कम्मसेसयाए अणुहूयमिणं तए दुक्खं ॥
ता मुणिऊण विवायं एवंविहमेत्थ पावकम्माणं। तह जयह जहा पावह एण्हिं पि पुणो न दुक्खाइं ॥
इय कहियंमि नियाणे सवित्थरे तत्थ लोयनाहेण। पडिरुद्धमोहपसरं जाओ मे परमसंवेगो ॥
भणिओ य तिहुयणगुरू भयवं सिवसोक्खकारणं परमं। गेण्हामि तुह समीवे पव्वज्जं तुम्ह वयणेण ॥
देवीए परियणेण य एवं बहु मन्निऊण मे वयणं। विन्नत्तो इणमेव उ नियकज्जकएण भुवणगुरू ॥

अनुपाल्य प्रवरं श्रावकधर्मं यथायुर्यावत्। मृत्वा ब्रह्मलोके कल्पे तत उपपन्नौ ॥
आयुश्च तत्र युवयोरासीत् सप्ताधिकान्यतराणि। ततश्च्युत्वा इह नरपतिगृहयोर्जातौ ॥
तीव्रं च शबरजन्मनि कर्म त्वया कृतमनयाऽपि। अनुमोदितमिति तस्य तु परिणामो निरयवासे ॥
अनुभूत एव युवाभ्यां तथा च भरते क्षुद्रमनुजभवे। तत्कर्मशेषतयाऽनुभूतमिदं त्वया दुःखम् ॥
ततो ज्ञात्वा विपाकमेवंविधमत्र पापकर्मणाम्। तथा यतेथां यथा प्राप्नुतमिदानीमपि पुनर्न दुःखानि ॥
इति कथिते निदाने सविस्तरे तत्र लोकनाथेन। प्रतिरुद्धमोहप्रसरं जातो मे परमसंवेगः ॥
भणितश्च त्रिभुवनगुरुर्भगवन्! शिवसौख्यकारणं परमम्। गृह्णामि तव समीपे प्रव्रज्यां युष्माकं वचनेन ॥

भणियं च भुवणगुरुणा अहासुहं मा करेह पडिबन्धं। भवगहणंमि असारे किच्चमिणं नवर भवियाण॥
सोऊण इमं वयणं भावेण पवज्जिऊण सयराहं। काऊण लोयमग्गं पडिवन्नं दव्वओ ताहे॥
एसो मे वुत्तन्तो कणयउरे साहिओ मए रन्नो। मग्गपडिवत्तिमादी इहभवपज्जायपज्जन्तो॥

एयं सोऊण समुप्पन्नो सव्वेसिं संवेओ। चिन्तियं च णेहिं। एवं विवागदारुणं मोहचेट्ठियं, अक्खयं च जाणवत्तं भवसमुद्दे गुरुवयणनिच्छओ त्ति। वन्दिओ भयवं, 'अणुग्गहिया अम्हे भयवया नियवुत्तन्तकहणेणं' अहिणन्दिओ सबहुमाणं, करयलकयञ्जलिउडं विन्नत्तो गुणचन्देण। [1]भयवं, जाणिओ मए भयवओ पहावेण जहट्ठिओ धम्मो, पणट्ठा मिच्छावियप्पा, संजाया भयवन्तचलणाराहणिच्छा, ता देहि ताव मे गिहिधम्मोचिया वयाइं। विग्गहेण भणियं। भयवं, ममावि। दिन्नाइं भयवया सावयवयाइं।

देव्या परिजनेन चवं बहु मत्वा मे वचनम्। विज्ञप्त इदमेव तु निजकार्यकृते भुवनगुरुः॥
भणितं भुवनगुरुणा यथासुखं मा कुरुत प्रतिबन्धम्। भवगहनेऽसारे कृत्यमिदं नवरं भविकानाम्॥
श्रुत्वेदं वचनं भावेन प्रव्रज्य शीघ्रम्। कृत्वा लोकमार्गं प्रतिपन्नं द्रव्यतस्तदा॥
एष मे वृत्तान्तः कनकपुरे कथितो मया राज्ञः। मार्गप्रतिपत्त्यादिरिहभवपर्यायपर्यन्तः॥

एतच्छ्रुत्वा समुत्पन्नः सर्वेषां संवेगः। चिन्तितं च तैः, एवं विपाकदारुणं मोहचेष्टितम्, अक्षतं च यानपात्रं भवसमुद्रे गुरुवचननिश्चय इति। वन्दितो भगवान्, 'अनुगृहीता वयं भगवता निजवृत्तान्तकथनेन' अभिनन्दितः सबहुमानम्, करतलकृताञ्जलिपुटं विज्ञप्तो गुणचन्द्रेण। भगवन्! ज्ञातो मया भगवतः प्रभावेण यथास्थितो धर्मः, प्रनष्टा मिथ्याविकल्पाः, संजाता भगवच्चरणाराधनेच्छा, ततो देहि

---

१ भणियं च मु. पु.

गहियाइं जहाविहीए। जाया भावसावया। भत्तिबहुमाणेहिं वन्दिओ भयवं, धम्मलाहिऊण भणिया य णेणं। कुमार, वियाणिऊण भवओ पडिबोहसमयं [1]रायउराओ अहं एत्थ आगओ, [2]संपन्नं च मे जहाहिलसियं। ता तहिं चेव गच्छामि। चिट्ठन्ति तत्थ मह दंसणूसुया बहवे साहुणो। पुणो अजोज्झाए मज्झ [3]भवया(विया) दंसणं। सव्वहा दढव्वएण होयव्वं। कुमारेण भणियं। जं भयवं आणवेइ। आगासगमणेण समं सेससाहूहिं पयट्टो गुरू। वन्दिओ कुमारविग्गहेहिं पुलइओ य भत्तिनिब्भरेहिं। अदंसणीहूए य वन्दिऊण परमभत्तीए पयट्टा अओज्झाउरिं॥

इओ य तद्दियहमेव गओ अओज्झं वाणन्तरो। कया णेण कुमारपरियणासन्ने कवडवत्ता, जहा 'विग्गहेण वावाइओ कुमारो' त्ति। समागया एसा सवणपरम्पराए मेत्तीबलकण्णगोयरं, न सद्दहिया य णेण, सुया रयणवईए। मुच्छिया एसा, समासासिया परियणेण।

तावन्मे गृहिधर्मोचितानि व्रतानि। विग्रहेण भणितम्-भगवन्! ममापि। दत्तानि भगवता श्रावकव्रतानि। गृहीतानि यथाविधि। जाता भावश्रावकाः। भक्तिबहुमानाभ्यां वन्दितो भगवान्। धर्मलाभयित्वा भणिताश्च तेन। कुमार! विज्ञाय भवतः प्रतिबोधसमयं राजपुरादहमत्रागतः। संपन्नं च मे यथाऽभिलषितम्। ततस्तत्रैव गच्छामि। तिष्ठन्ति तत्र मम दर्शनोत्सुका बहवः साधवः। पुनरयोध्यायां मम भविता दर्शनम्। सर्वथा द्रढव्रतेन भवितव्यम्! कुमारेण भणितम्-यद् भगवान् आज्ञापयति। आकाशगमनेन समं शेषसाधुभिः प्रवृत्तो गुरुः। वन्दितः कुमारविग्रहाभ्यां प्रलोकितश्च भक्तिनिर्भराभ्याम्। अदर्शनीभूते च वन्दित्वा परमभक्त्या प्रवृत्तौ अयोध्यापुरीम्।

इतश्च तद्दिवस एव गतोऽयोध्यां वानमन्तरः। कृताऽनेन कुमारपरिजनासन्ने कपटवार्ता, यथा 'विग्रहेण व्यापादितः कुमारः' इति। समागतैषा श्रवणपरम्परया मैत्रीबलकर्णगोचरम्, न श्रद्धिता च तेन। श्रुता रत्नवत्या। मूर्च्छितैषा, समाश्वासिता परिजनेन। निवेदितं

---

[1] रयणउराओ मु. पु.। [2] समुप्पन्नं मु. पु.। [3] भयवयो पा. ज्ञा.

निवेइयं च रन्नो। समागओ राया, बाहोल्ललोयणं चलणेसु निवडिऊण विन्नत्तो रयणवईए। ताय, अणुजाणाहि मं मन्दभाइणिं, पविसामि जलणं, परिच्चएमि एए अज्जउत्ताकुसलसवणे वि संठिए निल्लज्जपाणे, पावेमि लहुं सुरलोयसंठियं अज्जउत्तं। राइणा भणियं। अविहवे, अलमिमिणा सोएण। असद्दहणीयमेयं। न खलु केसरी गोमाउणा वावाइज्जइ। समाइट्ठो कुमारस्स सिद्धाएसेण तुह पुत्तजम्मो; अवितहाएसो य सिद्धाएसो। अणाउलं च मे हिययं। दिट्ठो य मए कुसलसुविणओ। कुमारमन्तरेण न जाया उप्पाया। अविवन्ना य तुह अविहवासिरी। ता न एयममङ्गलं एवं हवइ। जम्मन्तरवेरिएण केणावि एसा कवडवत्ता कया भविस्सइ। ता परिच्चय तुमं इणमसव्ववसायं। अहावि कहंचि अचिन्तसामत्थयाए देव्वस्स इयमेवं चेव, तओ सव्वेसिं चेव अम्हाणमियं पत्तकालं। कीस तुमं आउला। पेसिओ य मए अज्ज पवणगइनामो लेहवाहओ। सो अवस्सं पञ्चदियहब्भन्तरे आगच्छइ। तओ समागए तस्सिं जहाजुत्तं करेस्सामो। न ताव अन्तरे सन्तापियव्वं ति। रयणवईए भणियं। जं ताओ आणवेइ। तहावि विन्नवेमि तायं। तायाएसेण करेमि अहं

च राज्ञः। समागतो राजा, वाष्पार्द्रलोचनं चरणयोर्निपत्य विज्ञप्तो रत्नवत्या। तात ! अनुजानीहि मां मन्दभागिनीम्, प्रविशामि ज्वलनम् , परित्यजाम्येतानार्यपुत्राकुशलश्रवणेऽपि संस्थितान् निर्लज्जप्राणान्, प्राप्नोमि लघु सुरलोकसंस्थितमार्यपुत्रम्। राज्ञा भणितम्–अविधवे ! अलमनेन शोकेन, अश्रद्धानीयमेतद्। न खलु केसरी गोमायुना व्यापाद्यते। समादिष्टः कुमारस्य सिद्धादेशेन तव पुत्रजन्म, अवितथादेशश्च सिद्धादेशः। अनाकुलं च मे हृदयम्। दृष्टश्च मया कुशलस्वप्नः। कुमारमन्तरेण न जाता उत्पाताः। अविपन्ना च तवाविधवाश्रीः। ततो नैतदमङ्गलमेवं भवति। जन्मान्तरवैरिकेन केनापि एषा कपटवार्ता कृता भविष्यति। ततः परित्यज त्वमिममसद्व्यवसायम्। अथापि कथंचिदचिन्त्यसामर्थ्यतया दैवस्येदमेवमेव, ततः सर्वेषामेवास्माकमिदं प्राप्तकालम्। कस्मात् त्वमाकुला। प्रेषितश्च मयाऽद्य पवनगतिनामा लेखवाहकः। सोऽवश्यं पञ्चदिवसाभ्यन्तरे आगच्छति। ततः समागते तस्मिन् यथायुक्तं करिष्यामः। न तावदन्तरे संतप-

सन्तियम्मं, देमि महादाणं, पूएमि देवयाओ, परिच्चएमि अज्जउत्तकुसलपउत्तिकालादारओ आहारगहणं ति । राइणा भणियं । करेहि वच्छे, न एत्थ दोसो त्ति । रयणवईए भणियं । ताय, महापसाओ । तओ 'अविहवा हवसु' त्ति भणिऊण गओ मेत्तीबलो । पारद्धं च णाए जहोचियं सन्तियम्मं । दिट्ठा य [1]सव्वसम्पया सम्पूयणगयाए वियार[2]भूमिपडिणियत्ता अइकल्लणाए आगिईए परिचत्ता वियारेहिं संगया नाणजोएण समद्धासिया तवसिरीए गहिया उवसमेण परिणया भावणाए परियरिया साहुणीहिं विग्गहवई विय चरणसंपया सेयवियाहिवस्स धूया कोसलाहिवस्स पत्ती गिहत्थपरियाएण सुसंगया नाम गणिणी । तं च दट्ठूण पणट्ठो विय रयणवईए सोओ, आणन्दिया चित्तेण, उल्लसियं अत्तवीरियं, वियम्भिओ धम्मववसाओ । चिन्तियं च णाए । अहो भयवईए रूवसंपया, अहो विसयविराओ, अहो परिच्छेयकुसलया, अहो कयत्थत्तणं ति । ता धन्ना अहं, जीए मए अच्चन्तं अउव्वदंसणा संपिण्डिया विय गुणसमिद्धी विग्गहवई

व्यमिति । रत्नवत्या भणितम्-यत् तात आज्ञापयति, तथापि विज्ञपयामि तातम् । तातादेशेन करोम्यहं शान्तिकर्म, ददामि महादानम्, पूजयामि देवताः, परित्यजाम्यार्यपुत्रकुशलप्रवृत्तिकालादारत आहारग्रहणमिति । राज्ञा भणितम्-कुरु वत्से ! नात्र दोष इति । रत्नवत्या भणितम्-तात ! महाप्रसादः । ततः 'अविधवा भव' इति भणित्वा गतो मैत्रीबलः । प्रारब्धं च तया यथोचितं शान्तिकर्म । दृष्टा च सर्वसंपदा संपूजनगतया विचारभूमिप्रतिनिवृत्ता अतिकल्याण्याऽऽकृत्या परित्यक्ता विकारैः संगता ज्ञानयोगेन समध्यासिता तपःश्रिया गृहीता उपशमेन परिणता भावनया परिकरिता साध्वीभिर्विग्रहवतीव चरणसंपद् श्वेतविकाधिपस्य दुहिता कोशलाधिपस्य पत्नी गृहस्थपर्यायेण सुसंगता नाम गणिनी । तां च दृष्ट्वा प्रनष्ट इव रत्नवत्याः शोकः, आनन्दिता चित्तेन, उल्लसितमात्मवीर्यम्, विजृम्भितो धर्मव्यवसायः । चिन्तितं च तया । अहो भगवत्या रूपसंपद्, अहो विषयविरागः, अहो परिच्छेदकुशलता, अहो कृतार्थत्वमिति । ततो

---

१ –संपयायणसं--डे. ज्ञा. । २ वियारभूमी –स्थण्डिलभूमी ।

विय सव्वसंपया दंसणमेत्तेणावि पावनासणी भयवई दिट्ठ त्ति । पवड्ढमाणसुहज्झाणसंगयाए य गन्तूण सविणयं गणिणीसमीवं वन्दिया गणिणी । धम्मलाहिया य णाए । पुणो य सायरं वन्दिऊण जंपियं रयणवईए । भयवइ, 'दुहियसत्तवच्छला तुमं' ति विन्नवेमि भयवइं । जइ न कोइ विरोहो, ता करेहि मे पसायं गेहागमणेणं ति । अच्चन्तदुक्खिया अहं, जाओ य मे ईसिं[1] दुक्खोवसमो तुह दंसणेणं, वियम्भिओ पमोओ, विइयधम्मसत्था[2] य भयवई । ता इच्छामि तुह समीवे किंचि सोउं ति । गणिणीए भणियं । धम्मसीले, धम्मदेसणानिमित्तं नत्थि विरोहो, किं तु रक्खियव्वं सेसजणापत्तियाइ । रयणवईए भणियं । भयवइ, धम्मसद्धापरो मे गुरुयणो, न तत्थ अप्पत्तियाइ संभवइ । गणिणीए भणियं । जइ एवं, ता तुमं पमाणं ति । रयणवईए भणियं । भयवइ, महापसाओ । ता एहि, गच्छम्ह । गया सह रयणवईए गणिणी, पविट्ठा रयणवइगेहं । कओ य णाए संभमाइसएणमुचिओवयारो । उवविट्ठा गणिणी, पुरओ य से

धन्याऽहम्, यया मयाऽत्यन्तमपूर्वदर्शना संपिण्डितेव गुणसमृद्धिः, विग्रहवतीव सर्वसंपद्, दर्शनमात्रेणापि पापनाशनी भगवती दृष्टेति । प्रवर्धमानशुभध्यानसंगतया च गत्वा सविनयं गणिनीसमीपं वन्दिता गणिनी । धर्मलाभिता च तया । पुनश्च सादरं वन्दित्वा जल्पितं रत्नवत्या । भगवति ! दुःखितसत्त्ववत्सला त्वम्' इति विज्ञपयामि भगवतीम् । यदि न कोऽपि विरोधः, ततः कुरु मे प्रसादं गृहागमनेनेति । अत्यन्तदुःखिताऽहम्, जातश्च मे ईषद् दुःखोपशमस्तव दर्शनेन, विजृम्भितः प्रमोदः, विदितधर्मशास्त्राश्च भगवती । तत इच्छामि तव समीपे किञ्चित् श्रोतुमिति । गणिन्या भणितम्–धर्मशीले ! धर्मदेशनानिमित्तं नास्ति विरोधः, किन्तु रक्षितव्यं शेषजनाप्रीत्यादि । रत्नवत्या भणितम्–भगवति ! धर्मश्रद्धापरो मे गुरुजनः, न तत्राप्रीत्यादि संभवति । गणिन्या भणितम्–यद्येवं ततस्त्वं प्रमाणमिति । रत्नवत्या भणितम्–भगवति ! महाप्रसादः । तत एहि, गच्छावः । गता सह रत्नवत्या गणिनी, प्रविष्टा रत्नवतीगृहम् ।

---

१ इमिणा डे. ज्ञा. । २ –सत्ता य डे. ज्ञा. ।

सपरियणा रयणवइ त्ति ।

गणिणीए भणियं । वच्छे, संसारसमावन्ना खु पाणिणो सव्वे दुक्खतरुवीयजम्मसंगया अहिहवीयन्ति अणुसमयं जराए, उत्थारिज्जन्ति मोहतिमिरेण, वाहिज्जन्ति विसयतण्हाए, कयत्थिज्जन्ति इन्दिएहिं, पच्चन्ति कोहग्गिणा, अवट्ठब्भन्ति माणपव्वएणं, मोहिज्जन्ति मायाजालियाए, पलाविज्जन्ति लोहसायरेण, खण्डिज्जन्ति इट्ठविओएहिं, भमाडिज्जन्ति कालपरिणईए, कवलिज्जन्ति मच्चुण त्ति । परमत्थओ न केइ सुहिया मोत्तूण तप्पडिवक्खुज्जए महाणुभावे । ते उण, जहा केइ महावाहिगहिया पीडिज्जमाणा महावेयणाए समावन्ननिव्वेया गवेसिऊण कुसलवेज्जं निवेइऊण अप्पाणयं तस्स वयणेण पडिवन्ना जहुत्तकिरियं वाहिज्जमाणा वि तंव्वेयणाए विमुच्चमाणा वाहिणा अन्तो—आरोग्गलाहधिईए अगणेमाणा तं बज्झदुक्खं ईसि अविमुक्का वि वाहिणा संजायविमोक्खनिच्छयमई आरोग्ग-

कृतश्च तया संभ्रमातिशयेनोचितोपचारः । उपविष्टा गणिनी, पुरतश्च तस्याः सपरिजना रत्नवती ति ॥ गणिन्या भणितम्—वत्से ! संसारसमापन्नाः खलु प्राणिनः सर्वे दुःखतरुबीजजन्मसंगता अभिभूयन्तेऽनुसमयं जरया, [2]आक्रम्यन्ते मोहतिमिरेण, बाध्यन्ते विषयतृष्णया, कदर्थ्यन्ते इन्द्रियः, पच्यन्ते क्रोधाग्निना, अवष्टभ्यन्ते मानपर्वतेन, मुह्यन्ते मायाजालिकया, प्लाव्यन्ते लोभसागरेण, खण्डयन्ते इष्टवियोगैः, भ्राम्यन्ते कालपरिणत्या, कवल्यन्ते मृत्युनेति । परमार्थतो न केऽपि सुखिता मुक्त्वा तत्प्रतिपक्षोद्यतान् महानुभावान् । ते पुनर्यथा केऽपि महाव्याधिगृहीता पीड्यमाना महावेदनया समापन्ननिर्वेदा गवेषयित्वा कुशलवैद्यं निवेद्यात्मानं तस्य वचनेन प्रतिपन्ना यथोक्तक्रियां वाध्यमाना अपि तद्वेदनया विमुच्यमाना व्याधिना अन्त आरोग्यलाभधृत्याऽगणयन्तो तद् बाह्यदुःखमीषदविमुक्ता अपि व्याधिना संजातविमोक्षनिश्चयमतिरारोग्यसमेता इव न खलु न सुखिता व्यवहारेण, तथा ये इमे

---

१ तिव्ववेयणाए पा. ज्ञा. २ आक्रमेरोहावो–त्थार–छुन्दाः ॥ (८–४–१६०) इति आक्रमेरुत्थारादेशः ।

समेया विय न खलु नो सुहिया ववहारेण; तहा जे इमे भयवन्तो मुणिवरा ते संसारमहावाहिगहिय त्ति पीडिज्जमाणा जम्माइमहावेयणाए समावन्ननिव्वेया गवेसिऊण भावओ कुसलवेज्जं भयवन्तं वीयरायं तदुवएससमुट्ठियं वा गुरुं निवेइऊणमप्पाणयं तस्स वयणेण पडिवन्ना सव्वदुक्खनिवारणिं संजमकिरियं वाहिज्जमाणा वि परीसहोवसग्गवेयणाए विमुच्चमाणा महामोहवाहिणा अन्तो–पसमारोग्गलाभधिईए अगणेमाणा तं परीसहादिबज्झदुक्खं ईसि अविमुक्का वि संकिलेसवाहिणा परमगुरुवीयरागाणासेवणाए संजायविमोक्खनिच्छमई सयलाबाहाखयसमुब्भूयपरमपणिहाणभावारोग्गसमेया वीयराया विय न खलु नो सुहिया निच्छएण। जओ पणट्ठं तेसिं मोहतिमिरं, आविब्भूयं सम्मनाणं, नियत्तो असग्गहो, परिणयं संतोसामयं, अवगया असकिरिया, तुट्टपाया भववल्ली, थिरीहूयं झाणरयणं, आसन्नं परमसिवसुहं। ता एवं परमत्थचिन्ताए थेवा एत्थ सुहिया बहवे उण दुक्खिय त्ति। लोयदिट्ठीए उ वच्छे अन्नारिसे सुहदुक्खे। लोएहि जम्मजरामरणघत्था वि पाणिणो आहाराइसंपत्तिमेत्तेण कूरवाहसरगोयरगया विय हरिणया जवसाइसंपत्तीए चेव सुहिय त्ति

भगवन्तो मुनिवरास्ते संसारमहाव्याधिगृहीता इति पीड्यमाना जन्मादिमहावेदनया समापन्ननिर्वेदा गवेषयित्वा भावतः कुशलवैद्यं भगवन्तं वीतरागं तदुपदेशसमुत्थितं वा गुरुं निवेद्यात्मानं तस्य वचनेन प्रतिपन्नाः सर्वदुःखनिवारणीं संयमक्रियां बाध्यमाना अपि परिषहोपसर्गवेदनया विमुच्यमाना महामोहव्याधिना अन्त उपशमारोग्यलाभधृत्याऽगणयन्तस्तं परिषहादिबाह्यदुःखमीषदविमुक्ता अपि संक्लेशव्याधिना परमगुरुवीतरागाज्ञासेवनया संजातविमोक्षनिश्चयमतिः सकलाबाधाक्षयसमुद्भूतपरमप्रणिधानभावारोग्यसमेता वीतरागा इव न खलु नो सुखिता निश्चयेन। यतः प्रनष्टं तेषां मोहतिमिरम्, आविर्भूतं सम्यग् ज्ञानम्, निवृत्तोऽसद्ग्रहः, परिणतं संतोषामृतम्, अपगताऽसत्क्रिया, त्रुटितप्राया भववल्ली, स्थिरीभूतं ध्यानरत्नम्, आसन्नं परमशिवसुखम्। तत एवं परमार्थचिन्तायां स्तोका अत्र सुखिता बहवः पुनर्दुःखिता इति। लोकदृष्ट्या तु वत्से ! अन्यादृशे सुखदुःखे, लोकैर्जन्मजरामरणग्रस्ता अपि

वुच्चन्ति, अन्नहा दुक्खिया। ण य इमं दिट्ठि[1]महिगिच्च तुह दुक्खियत्ते कारणमवगच्छामि। साहेहि वा, जइ अकहणीयं न होइ। [2]गुणचन्दपडिबद्धं साहियं रयणवईए। भणियं च णाए। भयवइ, जहा तए समाइट्ठं, तहेव परमत्थो। तहावि अज्जउत्ताकुसल[3]सुमरणमवि पीडेइ मं मन्दभाइणिं। गणिणीए भणियं। वच्छे, न तस्स संपयमकुसलं ति, धीरा होहि। रयणवईए भणियं। कहं भयवई वियाणइ। गणिणीए भणियं। तुह सरविसेसाओ। रयणवईए भणियं। कीइसो मज्झ सरविसेसो। गणिणीए भणियं। जारिसो अविहवाए परमाणन्दजोए भत्तुणो हवइ। रयणवईए भणियं। भयवइ, न तए कुप्पियव्वं, भणामि किंचि अहमाउलयाए। गणिणीए भणियं। वच्छे, अकोवणो चेव तस्सिजणो होइ, किमेत्थमब्भत्थणाए। रयणवईए भणियं। भयवइ, जइ एवं ता को एत्थ पच्चओ, जं भयवईए आइट्ठं ति। गणिणीए भणियं। वच्छे, अलमेत्थ पच्चएण। न य वीयरागवयणमन्नहा होइ। वीयरागवयणं च सरमण्डलं। तदाएसेण य

प्राणिन आहारादिसंप्राप्तिमात्रेण क्रूरव्याधशरगोचरगता इव हरिणका यवसादिसंप्राप्त्यैव सुखिता इत्युच्यन्ते, अन्यथा दुःखिताः। न चेमां दृष्टिमधिकृत्य तव दुःखितत्वे कारणमवगच्छामि। कथय वा यद्यकथनीयं न भवति। [रत्नवत्या भणितं–किं भगवत्या अप्यकथनीयं वस्त्वस्ति इति] गुणचन्द्रप्रतिबद्धं कथितं रत्नवत्या। भणितं च तया–भगवति! यथा त्वया समादिष्टं तथैव परमार्थः, तथाप्यार्यपुत्राकुशलस्मरणमपि पीडयति मां मन्दभागिनीम्। गणिन्या भणितम्–वत्से! न तस्य साम्प्रतमकुशलमिति, धीरा भव। रत्नवत्या भणितम्–कथं भगवती विजानाति। गणिन्या भणितम्–तव स्वरविशेषात्। रत्नवत्या भणितम्–कीदृशो मम स्वरविशेषः। गणिन्या भणितम्–यादृशोऽविधवायाः परमानन्दयोगे भर्तुर्भवति। रत्नवत्या भणितम्–भगवति! न त्वया कुपितव्यम्, भणामि किञ्चिदहमाकुलतया। गणिन्या भणितम्-वत्से! अकोपन एव तपस्विजनो भवति, किमत्राभ्यर्थनया। रत्नवत्या भणितम्–भगवति! यद्येवं ततः कोऽत्र

---

१ –मगिहिव्व डे. ज्ञा. २ रयणवईए भणियं किं भयवतीए वि अकहणीयं वत्थुमत्थि मु. पु. पा. ३ –सुमरणाओ डे. ज्ञा.

जंपियमिणं, न उण अन्नहा; तहावि एसो एत्थ पच्चओ त्ति सिग्घं तुहावगमणनिमिंत्तं भणामि किंचि अहयं। न तए खिज्जियव्वं। रयणवईए भणियं। आणवेउ भयवई। गणिणीए भणियं। सुण, एवं विहसरवईए नारीए गुज्झपएसे मसो हवइ त्ति सरमण्डले पढियं। एत्थ य तुमं पमाणं ति। रयणवईए भणियं। एवमेयं; किं तु मरिसेउ भयवई, जं मए आउलाए वियप्पियं। गणिणीए भणियं। न एत्थ दोसो, नेहाउला हि पाणिणो एवंविहा चेव हवन्ति। किं तु तए वि मरिसियव्वं, जं मए तुह सिग्घपडिवत्तिनिमित्तमेवं जंपियं ति। रयणवईए भणियं। भयवइ, अणुग्गहे का मरिसावणा। अवणीओ मम महासोओ भयवईए इमिणा जंपिएण। किं तु पुच्छामि भगवइं, कस्स उण कम्मस्स ईइसो महारोद्दो विवाओ त्ति। गणिणीए भणियं। वच्छे, थेवस्स अन्नाणचेट्ठियस्स। कीइसी वा इमस्स रोद्दया। सुण, थेवेण कम्मुणा जं मए पावियं ति। रयणवईए भणियं। भयवइ, महन्तो मे अणुग्गहो; दढमवहिय म्हि। गणिणीए

प्रत्ययः, यद् भगवत्याऽऽदिष्टमिति। गणिन्या भणितम्–वत्से! अलमत्र प्रत्ययेन। न च वीतरागवचनमन्यथा भवति। वीतरागवचनं स्वरमण्डलम्, तदादेशेन च जल्पितमिदम्, न पुनरन्यथा, तथाप्येषोऽत्र प्रत्यय इति शीघ्रं तवावगमननिमित्तं भणामि किञ्चिदहम्, न त्वया खेत्तव्यम्। रत्नवत्या भणितम्–आज्ञापयतु भगवती। गणिन्या भणितम्–श्रृणु, एवंविधस्वरवत्या नार्या गुह्यप्रदेशे मषो भवतीति स्वरमण्डले पठितम्। अत्र च त्वं प्रमाणमिति। रत्नवत्या भणितम्–एवमेतद्, किन्तु मर्षयतु भगवती, यन्मयाऽऽकुलया विकल्पितम्। गणिन्या भणितम्–नात्र दोषः, स्नेहाकुला हि प्राणिन एवंविधा एव भवन्ति। किंतु त्वयापि मर्षयितव्यम्, यन्मया तव शीघ्रप्रतिपत्तिनिमित्तमेवं जल्पितमिति। रत्नवत्या भणितम्–भगवति! अनुग्रहे का मर्षणा। अपनीतो मम महाशोको भगवत्याऽनेन जल्पितेन। किन्तु पृच्छामि भगवतीम्, कस्य पुनः कर्मण ईदृशो महारौद्रो विपाक इति। गणिन्या भणितम्–वत्से! स्तोकस्याज्ञानचेष्टितस्य। कीदृशी वाऽऽस्य रौद्रता। श्रृणु, स्तोकेन कर्मणा यन्मया प्राप्तमिति। रत्नवत्या भणितम्–भगवति! महान्मेऽनुग्रहः, दृढमवहिताऽस्मि। गणिन्या

णजोओ। पउत्तो विहिणा। अचिन्तसामत्थयाए [1]ओसहीणं विचित्तयाए कम्मपरिणामस्स विरत्तो तीए सेट्ठी। परिचत्ता मइरावई, गहिया सोएण। एयनिमित्तं च वद्धं तए किलिट्ठकम्मं॥ परिवालिऊण अहाउयं मया समाणी तक्कम्मदोसेणेव समुप्पन्ना करेणुयत्ताए अप्पिया जूहाहिवस्स; गहिया वारिमज्झे। तओ तत्थ महन्तं किलेसमणुहविय मया समाणी तक्कम्मदोसेणेव समुप्पन्ना वाणरित्ताए त्ति। तत्थ वि य अच्चन्तमप्पिया जूहाहिवस्स। विच्छूढा जूहाओ गहिया जरठक्कुरेण, निवद्धा लोहसङ्कलाए। महादुक्खपीडिया अहाउयं पालिऊण मया समाणी तक्कम्मदोसेणेव समुप्पन्ना कुक्कुरित्ताए। तत्थ वि [2]यं रिउकाले वि अणहिमया सव्वकुक्कुराणं कीडानियर-[3]खयविणट्ठदेहा महन्तं किलेसमणुहविय मया समाणी तक्कम्मदोसेणेव समुप्पन्ना मज्जारिगत्ताए त्ति। तत्थ वि य अमणोरमा सव्वमज्जाराणं गेहाणलदड्ढदेहा अहाउयक्खए मरिऊण तक्कम्मदोसेणेव समुप्पन्ना चक्कवाइयत्ताए त्ति। तत्थ वि सया पिययमपरिवज्जिया किले-

---

श्रेष्ठिनः मदिरावतीं प्रति विद्वेषणयोगः, प्रयुक्तो विधिना। अचिन्त्यसामर्थ्यतयौषधीनां विचित्रतया कर्मपरिणामस्य विरक्तस्तस्यां श्रेष्ठी। परित्यक्ता मदिरावती, गृहीता शोकेन। एतन्निमित्तं च वद्धं त्वया क्लिष्टकर्म। परिपाल्य यथायुष्कं मृता सती तत्कर्मदोषेणैव समुत्पन्ना करेणुतया अप्रिया यूथाधिपस्य, गृहीता [4]वारिमध्ये। ततस्तत्र महान्तं क्लेशमनुभूय मृता सती तत्कर्मदोषेणैव समुत्पन्ना वानरीतयेति। तत्रापि चात्यन्तमप्रिया यूथाधिपस्य। विक्षिप्ता यूथाद् गृहीता जरत्ठक्कुरेण, निवद्धा लोहशृङ्खलया। महादुःखपिडिता यथाऽऽयुः पालयित्वा मृता सती तत्कर्मदोषेणैव समुत्पन्ना कुर्कुरीतया। तत्रापि च ऋतुकालेऽपि अनभिमता सर्वकुर्कुराणां कीटनिकरक्षतविनष्टदेहा महान्तं क्लेशमनुभूय मृता सती तत्कर्मदोषेणैव समुत्पन्ना मार्जारीतयेति। तत्रापि चामनोरमा सर्वमार्जाराणां गेहानलदग्धदेहा

---

१ ओसहाणं पा. ज्ञा.। २ य णाहिमया डे. ज्ञा.। ३ -खइय-पा. ज्ञा. डे. ज्ञा.। ४ वारिस्तु गजवन्धभूः (अभि० कां. ४ श्लो. २९५) गजानां वन्धाय-ग्रहणाय भूर्गर्ता गजवन्धभूः॥

ससंपाइयवित्ती महन्तं दुक्खमणुहविय मया समाणी तक्कम्मदोसेणेव समुप्पन्ना चण्डालइत्थिगत्ताए त्ति। तत्थ वि य दढं अमणोरमा पिययमस्स मयणदुक्खपीडिया अहाउयक्खएण मरिऊण तक्कम्मदोसेणेव समुप्पन्ना सबरइत्थिगत्ताए। तत्थ वि य अमणोरमा सव्वसबराणं विच्छूढा णेहिं पल्लीओ परिब्भमन्ती य विसमसज्झकन्तारे किलेससंपाइयसरीरठिई परिक्खीणकाया अद्धाणपडिवन्नपहपरिभट्ठेहिं दिट्ठा तुमं साहूहिं, ते वि य तुमाए त्ति। ते य दट्ठूण समुप्पन्नो ते पमोओ। पुच्छिया य णेहिं। धम्मसीले, को उण इमो पएसो केदूरे वा इओ वत्तणि[1] त्ति। तए सबहुमाणमाइक्खियं। सज्झकन्तारमेयं, इओ नाइदूरे वत्तणी। साहूहिं भणियं। धम्मसीले, कयरीए दिसीए वत्तणी। तए भणियं। अवरमग्गेण इओ वोलिऊण इमं तरुलयागहणं। अहवा एह, अहं चेव दंसेमि त्ति। दंसिया वत्तणी। चिन्तियं च सुद्धचित्ताए। अहो इमे अमच्छरिया पियभासिणो पसन्तरूवा अभिगमणीया; धन्नाणमेवंविहेहि सह संगमो भवइ। एवं

यथायुष्कक्षये मृत्वा तत्कर्मदोषेणैव समुत्पन्ना चक्रवाकीतयेति। तत्रापि सदा प्रियतमपरिवर्जिता क्लेशसंपादितवृत्तिर्महान्तं दुःखमनुभूय मृता सती तत्कर्मदोषेणैव समुत्पन्ना चण्डालस्त्रीकतयेति। तत्रापि च दृढममनोरमा प्रियतमस्य मदनदुःखपीडिता यथाऽऽयुःक्षयेण मृत्वा तत्कर्मदोषेणैव समुत्पन्ना शवरस्त्रीकतयेति। तत्रापि चामनोरमा सर्वशवराणां विक्षिप्ता तैस्पल्लीतः परिभ्रमन्ती च विषमसह्यकान्तारे क्लेशसंपादितशरीरस्थितिः परिक्षीणकायाऽध्वप्रतिपन्नपथपरिभ्रष्टैर्दृष्टा त्वं साधुभिः, तेऽपि च त्वयेति। ताँश्च दृष्ट्वा समुत्पन्नस्ते प्रमोदः। पृष्टा च तैः। धर्मशीले! कः पुनरयं प्रदेशः कियद्दूरे वा इतो वर्तनीति। त्वया सबहुमानमाख्यातम्–सह्यकान्तारमेतद्, इतो नातिदूरे वर्तनी। साधुभिः भणितम्–धर्मशीले! कतरस्यां दिशि वर्तनी। त्वया भणितम्। अपरमार्गेण इतो व्यतिक्रम्येदं तरुलतागहनम्। अथवा एत, अहमेव दर्शयामीति। दर्शिता वर्तनी। चिन्तितं च शुद्धचित्तया। अहो इमेऽमात्सर्याः प्रियभाषिणः प्रशान्तरूपा अभिगमनीयाः,

---

[1] वत्तिणि पा. ज्ञा.

विसुद्धचिन्तणेण[1] खविओ कम्मसंघाओ आसगलियं बोधिबीयं। एत्थन्तरंमि धम्मलाहिया साहूहिं सुहयरपरिणामा य पडिया तेसिं चलणेसुं। एत्थन्तरंमि अप्पारम्भपरिग्गहत्तणेण सहावमद्दवज्जवयाए साहुसन्निहिसामत्थओ सुद्धभावयाए य बद्धं सुमाणुसाउयं। गया भयवन्तो साहुणो। गएसु वि य न तुट्टो ते तयणुसरणसंगओ सुहभावाणुबन्धो। अहाउयपरिक्खएणं च मया समाणी तक्कम्मदोससेससंगया चेव समुप्पन्ना सेयवियाहिवस्स धूय त्ति। पत्तवया य परिणीया कोसलाहिवेण; तक्कम्मसेसयाए य जक्खिणीरूवविप्पलद्धेण कयत्थाविया णेणं। ता एवं वच्छे दुट्ठपरिव्वाइयाहवणकम्मविवागसेसमेयं ति॥

एयमायण्णिऊण अवगयं चिय मे मोहतिमिरं, जाओ भवविराओ, उप्पन्नं जाइसरणं, वड्ढिओ संवेगो। वन्दिऊण भणिओ भयवं गुरू। भयवं, एवमेयं; अह कया उण तक्कम्मविवाओ नीसेसीभविस्सइ। भयवया भणियं। वच्छे, इमिणा अहोरत्तेण। मए भणियं।

धन्यानामेवंविधैः सह संगमो भवति। एवं विशुद्धचिन्तनेन क्षपितः कर्मसंघातः, प्रादुर्भूतं बोधिबीजम्। अत्रान्तरे धर्मलाभिता साधुभिः शुभतरपरिणामा च पतिता तेषां चरणेषु। अत्रान्तरे अल्पारम्भपरिग्रहत्वेन स्वभावमार्दवार्जवतया साधुसन्निधिसामर्थ्यतः शुद्धभावतया च बद्धं सुमानुषायुष्कम्। गता भगवन्तः साधवः। गतेष्वपि च न त्रुटितस्तव तदनुस्मरणसंगतः शुभभावानुबन्धः। यथाऽऽयुःपरिक्षयेण च मृता सती तत्कर्मदोषशेषसंगतैव समुत्पन्ना श्वेतविकाधिपस्य दुहितेति। प्राप्तवयाश्च परिणीता कोशलाधिपेन। तत्कर्मशेषतया च यक्षिणीरूपविप्रलब्धेन कदर्थितास्तेन। तत एवं वत्से! दुष्टपरिव्राजिकाह्वनकर्मविपाकशेषमेतदिति।

एतदाकर्ण्य अपगतमिव मे मोहतिमिरम्, जातो भवविरागः, उत्पन्नं जातिस्मरणम्, वर्द्धितः संवेगः। वन्दित्वा भणितो भगवान् गुरुः। भगवन्! एवमेतद्। अथ कदा पुनः तत्कर्मविपाको निःशेषीभविष्यति। भगवता भणितम्-वत्से! अनेनाहोरात्रेण। मया भणितम्-

---

१ विसुद्धचित्तत्तणेण पा. ज्ञा.। २ आसगलियं (दे) प्रादुर्भूतम्।

भयवं, कया कहं वा तं जक्खिणिं वियाणिस्सइ अज्जउत्तो । भयवया भणियं । वच्छे, अज्जेव रयणीए तुह सहावासरिसयाए समुप्पन्नासङ्को निवेइऊण मन्तिणो तक्कयवीयरायपडिमालङ्घणपओएण नीसंसयं वियाणिऊण, जहा न एसा देवि त्ति; तओ 'हण हण'त्ति भणमाणो खग्गं गहेऊण उट्ठिओ राया, जाव तक्खणं अदंसणा जाय त्ति । मए भणियं । भयवं, न तीए किंचि अकुसलं करिस्सइ अज्जउत्तो । भयवया भणियं । वच्छे, न हि, किं तु कयत्थिया तुमं ति अहियं संतप्पिस्सइ । मए भणियं । भयवं को एत्थ दोसो अज्जउत्तस्स, कम्मपरिणई एस त्ति । भयवया भणियं । वच्छे, एवमेयं; तहावि मोहदोसेण दढं संतप्पिस्सइ महाराओ । सुए आगमिस्सइ इहइं, पेक्खिस्सइ तुमं । तओ सह तए अच्चंतसुहिओ हविस्सइ त्ति वियाणिऊण न तए संतप्पियव्वं । मए भणियं । भयवं, अवगओ मे संतावो तुह दंसणेण, विरत्तं च मे चित्तं भवचारगाओ । ता किं महारायागमणेण । पुणो वि विओगावसाणा संगमा । कीइसं च

भगवन् ! कदा कथं वा तां यक्षिणीं विज्ञास्यत्यार्यपुत्रः । भगवता भणितम्–वत्से ! अद्यैव रजन्यां तव स्वभावासदृशतया समुत्पन्नाशङ्को निवेद्य मन्त्रिणस्तत्कृतवीतरागप्रतिमालङ्घनप्रयोगेण निःसंशयं विज्ञाय 'यथा न एषा देवी' इति । ततो 'जहि जहि' इति भणन् खड्गं गृहीत्वा उत्थितो राजा, यावत् तत्क्षणमदर्शना जातेति । मया भणितम्–भगवन् ! न तस्याः किञ्चिदकुशलं करिष्यति आर्यपुत्रः । भगवता भणितम्–वत्से ! नहि, किन्तु कदर्थिता त्वमित्यधिकं संतप्स्यति । मया भणितम्–भगवन् ! कोऽत्र दोष आर्यपुत्रस्य, कमपरिणतिरेषेति । भगवता भणितम्–वत्से ! एवमेतद् , तथापि मोहदोषेण दृढं संतप्स्यति महाराजः । श्व आगमिष्यतीह, प्रेक्षिष्यते त्वाम् । ततः सह त्वयाऽत्यन्तसुखितो भविष्यति इति विज्ञाय न त्वया संतप्तव्यम् । मया भणितम्-भगवन् ! अपगतो मे संतापस्तव दर्शनेन । विरक्तं च मे चित्तं भवचारकात् । ततः किं महाराजागमनेन । पुनरपि वियोगावसानाः संगमाः । कीदृशं च जरामरणपीडितानां सुखितत्वम् । भगवता

जरामरणपीडियाणं सुहियत्तणं। भयवया भणियं। वच्छे, एवमेयं, किं तु सह तए अच्चन्तसुहिओ हविस्सइ त्ति[1]। भणियं मए। अच्चन्तसुहिओ जीवो न वीयरायवयणाणुट्ठाणमन्तरेण हवइ। ता[2] भयवया भणियं। सह तए जराइदोसनिग्घायणसमत्थं दुक्करं काउरिसाण वीयरागवयणाणुट्ठाणं करइस्सइ। एएण कारणेण अच्चन्तसुहिओ होहि त्ति। भणिऊण तुण्हिक्को ठिओ भयवं। एयमायण्णिऊण 'अहो धन्नो महाराओ' त्ति हरिसिया अहं। हिययत्थं वियाणिऊण भणिया य भयवया। वच्छे, तुमं पि गेण्हाहि ताव सव्वमन्तपरममन्तं अइदुल्लहं जीवलोए विणासणं भयाणं साहणं परमपयस्स पूयणिज्जं सयाणं[3] अचिन्तसत्तिजुत्तं गाहगं सयलगुणाणं उवमाईयकल्लाणकारणं भयवया वीयरागेण पणीयं पञ्चनमोक्कारं ति। मए भणियं। भयवं, अणुग्गिहीय म्हि। भयवया भणियं। ठायसु मे वामपासे पुव्वाहिमुह त्ति। ठिया ईसि अवणया, वन्दिओ भयवं। कयं भयवया परमगुरुसरणं। तओ उवउत्तेण अक्खलियाइगुणसमेओ दिन्नो

भणितम्-वत्से! एवमेतद्, किन्तु सह त्वयाऽत्यन्तसुखितो भविष्यतीति। भणितं मया। अत्यन्तसुखितो जीवो न वीतरागवचनानुष्ठानमन्तरेण भवति। ततो भगवता भणितम्-सह त्वया जरादिदोषनिर्घातनसमर्थं दुष्करं कापुरुषाणां वीतरागवचनानुष्ठानं करिष्यति। एतेन कारणेनात्यन्तसुखितो भविष्यति इति। भणित्वा तूष्णिकः स्थितो भगवान्। एतदाकर्ण्य 'अहो धन्यो महाराजः' इति हृष्टाऽहम्। हृदयस्थं विज्ञाय भणिता च भगवता-वत्से! त्वमपि गृहाण तावत् सर्वमन्त्रपरममन्त्रमतिदुर्लभं जीवलोके विनाशनं भयानां साधनं परमपदस्य पूजनीयं सतामचिन्त्यशक्तियुक्तं ग्राहकं सकलगुणानामुपमातीतकल्याणकारणं भगवता वीतरागेण प्रणीतं पञ्चनमस्कारमिति। मया भणितम्। भगवन्! अनुगृहीताऽस्मि। भगवता भणितम्। तिष्ठ मे वामपार्श्वे पूर्वाभिमुखेति। स्थिता ईषदवनता। वन्दितो भगवान्। कृतं भगवता परमगुरुस्मरणम्। तत उपयुक्तेनास्खलितादिगुणसमेतो दत्तो नमस्कारः। प्रतीप्सितो मया शुद्धभावातिशयेन। तदनन्तरं च

---

[1] त्ति भणियं मए न तुहाणुवित्तिनिमित्तं लोगणीइए, अवि य तत्तदिट्ठीए भणियं च मए पा. ज्ञा. [2] ता सह तए पा. ज्ञा.। [3] सया जणेणं पा. ज्ञा.।

नमोक्कारो, पडिच्छिओ मए सुद्धभावाइसएण। तयणन्तरं च पणट्ठमिव भवभयं, समागयं विय मुत्तिसुहं ति। भयवया भणियं। वच्छे, इणमेव अणुसरन्तीए गमेयव्वा तए इमाए एगपासट्ठियाए गिरिगुहाए रयणी, न बीहियव्वं च। संपयं गच्छामि अहयं, सुए पुणो अम्हाणं दंसणं ति। मए भणियं। भयवं, अणुग्गिहीय म्हि। गओ भयवं॥

नमोक्कारपराए य परमपमोयसंगयाए थेववेला विय अइक्कन्ता रयणी। पहायसमए य आससाहणेण अन्नेसणत्थं समागओ राया। पत्ता य णे[1] समीवे कइवि आसवारा। दिट्ठा य णेहिं, हरिसनिब्भरेहिं साहिया राइणो। आगओ मे समीवं राया। बाहोल्ललोयणेणं भणियं च णेणं। देवि, न मे कुप्पियव्वं, अन्नाणमेत्थमवरज्झइ। मए भणियं। अज्जउत्त, को एत्थ अवसरो कोवस्स; नियदुच्चरियविवागसेसमेयं। राइणा भणियं। देवि, अहमेत्थ निमित्तं। मए भणियं। अज्जउत्त, जम्मन्तरे विओयपडिबद्धनियदुच्चरियसामत्थेण

प्रनष्टमिव भवभयम्, समागतमिव मुक्तिसुखमिति। भगवता भणितम्। वत्से! इममेवानुस्मरन्त्या गमयितव्या त्वयाऽस्यामेकपार्श्वस्थितया गिरिगुहायां रजनी, न भेतव्यं च। साम्प्रतं गच्छाम्यहम्, श्वः पुनरस्माकं दर्शनमिति। मया भणितम्। भगवन्! अनुगृहीताऽस्मि। गतो भगवान्।

नमस्कारपरायाश्च परमप्रमोदसंगतायाः स्तोकवेलेवातिक्रान्ता रजनी। प्रभातसमये चाश्वसाधनेनान्वेषणार्थं समागतो राजा। प्राप्ताश्च मे समीपे कत्यप्यश्ववाराः। दृष्टाश्च तैः, हर्षनिर्भरैः कथिता राज्ञः। आगतो मे समीपं राजा। वाष्पार्द्रलोचनेन भणितं च तेन। देवि! न मे कुपितव्यम्, अज्ञानमत्रापराध्यति। मया भणितम्। आर्यपुत्र! कोऽत्रावसरः कोपस्य, निजदुश्चरितविपाकशेषमेतद्। राज्ञा भणितम्। देवि! अहमत्र निमित्तम्। मया भणितम् आर्यपुत्र! जन्मान्तरे वियोगप्रतिबद्धनिजदुश्चरितसामर्थ्येन प्रभूततरमनुभूतम्, तत्र किं

---

[1] मे समीवं पा. ज्ञा.

पहूययरमणुभूयं, तत्थ किं तुमं निमित्तं ति। सव्वहा मए कओ एस दोसो त्ति। राइणा भणियं। देवि, सामन्नेण वियाणामि अहमिणं, जमणादी संसारो कम्मवसगा य पाणिणो। देवी उण विसेसपरिन्नाणसंगया विय मन्तेइ। मए भणियं। अज्जउत्त, एवं। राइणा भणियं। देवि, कहं विय। साहिओ मए मरणववसायगुरुदंसणाइओ नमोक्कारलाहपज्जवसाणो परिकहियवुत्तन्तो। 'अहो भयवओ नाणाइसओ' त्ति विम्हिओ राया। 'अहो असारया संसारस्स, एद्दहमेत्तस्स वि दुक्कडस्स ईइसो विवाओ' त्ति संविग्गो राया। भणियं च णेण। देवि, केदूरे इओ भयवं गुरु त्ति। मए भणियं। अज्जउत्त, इओ थोवन्तरे। राइणा भणियं। ता एहि, गच्छम्ह भयवन्तदंसणवडियाए। मए भणियं। अज्जउत्त, जुत्तमेयं ति। गओ मं घेत्तूण सह परियणेण राया। दिट्ठो भयवं, वन्दिओ हरिसियमणेण, धम्मलाहिओ भयवया। भणियं च णेण। भयवं, साहिओ ममं भयवन्तदंसणाइओ सयलवुत्तन्तो चेव देवीए। जाओ य मे संतासो, 'अहो एद्दहमेत्तस्स वि दुक्कडस्स ईइसो विवाओ' त्ति। अणेयदुक्कडसमन्निओ य अहयं। ता न-याणामो, किमेत्थ कायव्वं ति। भय-

त्वं निमित्तमिति। सर्वथा मया कृत एष दोष इति। राज्ञा भणितम्। देवि! सामान्येन विजानाम्यहमिदम्, यदनादिः संसारः कर्मवशगाश्च प्राणिनः। देवी पुनर्विशेषपरिज्ञानसंगतेव मन्त्रयति। मया भणितम्। आर्यपुत्र! एवम्। राज्ञा भणितम्। देवी कथमिव। कथितो मया मरणव्यवसायगुरुदर्शनादिको नमस्कारलाभपर्यवसानः परिकथितवृत्तान्तः। 'अहो भगवतो ज्ञानातिशयः' इति विस्मितो राजा। 'अहो असारता संसारस्य, एतावन्मात्रस्यापि दुष्कृतस्येदृशो विपाकः' इति संविग्नो राजा। भणितं च तेन। देवि! कियद्दूरे भगवान् गुरुरिति। मया भणितम्। आर्यपुत्र! इतः स्तोकान्तरे। राज्ञा भणितम्। तत एहि, गच्छावो भगवद्दर्शननिमित्तम्। मया भणितम्। आर्यपुत्र! युक्तमेतदिति। गतो मां गृहीत्वा सह परिजनेन राजा। दृष्टो भगवान्, वन्दितः हर्षितमनसा, धर्मलाभितो भगवता। भणितं च तेन। भगवन्! कथितो मम भगवद्दर्शनादिकः सकलवृत्तान्त एव देव्या। जातश्च मे संत्रासः, 'अहो

वया भणियं। महाराय सुण, जमेत्थ कायव्वं। राइणा भणियं। आणवेउ भयवं। भयवया भणियं। सुप्पणिहाणं वट्टमाणसयलसावज्जजोयविरमणं संविग्गयाए अईयपडिक्कमणं अच्चन्तमणियाणमणागयपच्चक्खाणं ति। एवं च कए समाणे महन्तकुसलासयभावेण महामेहवुट्ठिहयाणि विय खुद्दजलणुद्दित्तयाइं पसमन्ति दुक्कडाइं। तओ वित्थरइ कुसलासओ, उल्लसइ जीववीरियं, विसुज्झए अन्तरप्पा, परिणमइ अप्पमाओ, नियत्तए मिच्छावियप्पणं, अवेइ कम्माणुबन्धो, खिज्जइ भवसंतती, पाविज्जइ परमपयं। तत्थ उण सव्वकालं न होन्ति दुक्कडजोया, अच्चन्तियं च निरुवमसुहं। ता इमं कायव्वं। राइणा भणियं। भयवं, एवमेयं, अणुग्गिहीओ अहं भयवया, कुसलजोएण करेमि भयवओ आणं ति। भणिऊण पुलइया अहं भणिया य। देवि, दुल्लहो भयवन्ततुल्लो धम्मसारही। उवाएओ य सव्वहा धम्मो, सव्वमन्नं संकिलेसकारणं। न होइ धम्मो गुरुमन्तरेण, ता संपाडेमि भयवओ आणं ति। मए भणियं। अज्जउत्त, जुत्तमेयं।

एतावन्मात्रस्यापि दुष्कृतस्येदृशो विपाक इति। अनेकदुष्कृतसमन्वितश्चाहम्। ततो न जानीमः किमत्र कर्तव्यमिति। भगवता भणितम्। महाराज! शृणु, यदत्र कर्तव्यम्। राज्ञा भणितम्। आज्ञापयतु भगवान्। भगवता भणितम्। सुप्रणिधानं वर्तमानसकलसावद्ययोगविरमणं संविग्नतयाऽतीतप्रतिक्रमणमत्यन्तमनिदानमनागतप्रत्याख्यानमिति। एवं च कृते सति महाकुशलाशयभावेन महामेघवृष्टिहतानीव क्षुद्रज्वलनोद्दीप्तानि प्रशाम्यन्ति दुष्कृतानि। ततो विस्तीर्यते कुशलाशयः, उल्लसति जीववीर्यम्, विशुद्ध्यत्यन्तरात्मा, परिणमत्यप्रमादः, निवर्तते मिथ्याविकल्पनम्, अपैति कर्मानुबन्धः, क्षीयते भवसन्ततिः, प्राप्यते परमपदम्। तत्र पुनः सर्वकालं न भवन्ति दुष्कृतयोगाः, आत्यन्तिकं च निरुपमसुखम्। तत इदं कर्तव्यम्। राज्ञा भणितम्। भगवन्! एवमेतद्, अनुगृहीतोऽस्म्यहं भगवता, कुशलयोगेन करोमि भगवत आज्ञामिति। भणित्वा दृष्टाऽहं भणिता च। देवि! दुर्लभो भगवत्तुल्यो धर्मसारथिः। उपादेयश्च सर्वथा धर्मः, सर्वमन्यत् संक्लेशकारणम्। न भवति धर्मो गुरुमन्तरेण, ततः संपादयामि भगवत आज्ञामिति। मया भणितम्। आर्यपुत्र! युक्त-

साहए सुद्धधम्मस्स चञ्चले पयईए संसारवद्धणेसु निव्वाणवेरिएसु बालवहुमएसु वुहयणगरहिएसु सज्जन्ति कामेसु; अओ न मुणन्ति हियाहियाइं। जओ य असन्तेसु वि इमेसु कामसंपाडणनिमित्तं निप्फलं उभयलोएसु कुणन्ति चित्तचेट्ठियं, खमन्ति अक्खमाए, किलिस्सन्ति अकिंलिसियव्वं थुणन्ति अथोयव्वाइं, झायन्ति अज्झाइयव्वाइं; अओ न वियारेन्ति कज्जं। जओ य उवहसन्ति सच्चं, कुणन्ति कन्दप्पं, निन्दन्ति गुरुयणं, चयन्ति कुसलमग्गं, हवन्ति ओहसणिज्जा, पावन्ति उम्मायं, निन्दिज्जन्ति लोएणं, गच्छन्ति नरएसु; अओ न पेच्छन्ति आयइं। अन्नं च। इहलोए चेव कामा कारणं वहबन्धणाण, कुलहरं इस्साए, निवासो अणुवसमस्स, खेत्तं विसायभयाण, अओ चेव निन्दिया धम्मसत्थेसु। एवंवट्ठिए समाणे निरूवेह मज्झत्थभावेण, कह णु कामसत्थं अविगलतिवग्गसाहणपरं ति। जं च भणियं 'कामसत्थभणियपओयन्नुणो हि पुरिसस्स सयारचित्ताराहणसंरक्खणेण सुद्धसुयभावओ विसुद्धदाणाइ-

केषु वालवहुमतेषु बुधजनगर्हितेषु सज्जन्ति कामेषु, अतो न जानन्ति हिताहिते। यतश्चासत्स्वपि एषु कामसंपादननिमित्तं निष्फलमुभयलोकेषु कुर्वन्ति चित्रचेष्टितम्, क्षमन्ते ऽक्षमया, क्लिश्यन्त्यक्लेशितव्यम्, स्तुवन्त्यस्तोतव्यानि, ध्यायन्त्यध्यातव्यानि, अतो न विचारयन्ति कार्यम्। यतश्चोपहसन्ति सत्यम्, कुर्वन्ति कन्दर्पम्, निन्दन्ति गुरुजनम्, त्यजन्ति कुशलमार्गम्, भवन्त्युपहसनीयाः, प्राप्नुवन्त्युन्मादम्, निन्द्यन्ते लोकेन, गच्छन्ति नरकेषु, अतो न प्रेक्षन्ते आयतिम्। अन्यच्च, इहलोके एव कामाः कारणं वधबन्धनानाम्, कुलगृहमीर्ष्यायाः, निवासोऽनुपशमस्य, क्षेत्रं विषादभयानाम्; अत एव निन्दिता धर्मशास्त्रेषु। एवमवस्थिते सति निरूपयत मध्यस्थभावेन, कथं नु कामशास्त्रमविकलत्रिवर्गसाधनपरमिति। यच्च भणितं 'कामशास्त्रभणितप्रयोगज्ञस्य हि पुरुषस्य स्वदारचित्ताराधनसंरक्षणेन शुद्धसुतभावतो विशुद्धदानादिक्रियाप्रसिद्धया च महान् धर्म' इति। एतदपि न युक्तिसंगतम्। यतो न कामशास्त्रभणितप्रयोग-

---

१ अतवं मु. पु.

किरियापसिद्धीए य महन्तो धम्मो त्ति, एयं पि न जुत्तिसंगयं। जओ न कामसत्थभणियपओयन्नू वि पुरिसो नियमेण सदारचित्ताराहणं करेति। दीसन्ति खलु इमेसिं पि वहिचरन्ता दारा। नयासम्मपओयजणिओ तओ वहिचारो त्ति जुत्तमासङ्किउं, न जओ एत्थ निच्छए पमाणं। दीसइ य तप्पओयन्नू एगदारचित्ताराहणपरो वि अन्नस्स तमणाराहयन्तो, अपओयन्नू वि याराहयन्तो त्ति। तम्हा जं किंचि एयं। जं पि वेज्जगोदाहरणेण एत्थ जाइजुत्तिं भणन्ति, सा वि य पयइनिग्गुणत्तणेण कामाण जीवियत्थिणो खग्गसिरच्छेयकिरियाविहाणजुत्तितुल्ल त्ति न बहुमया बुहाणं। एवं सुद्धसुयभावो विसुद्धदाणाइकिरियापसिद्धी य वभिचारिणी दीसन्ति। कामसत्थपराणं पि सुया अकुलउत्तया पयईए भुयङ्गपाया चेट्ठिएण। अणुरत्तदाराइं पि य निरवेक्खाणि दाणाइकिरियासु, तुच्छयाणि पयईए, अहियं विवज्जयकारीणि। अओ जं पि जंपियं 'अणुरत्तदारासुद्धसुएहिंतो य तयणुवद्धफलसारा संपज्जन्ति अत्थकाम' त्ति, तं पि य असमञ्जसमेव। एवं च ठिए समाणे जं पि भणियं 'विवज्जए उण तिण्हं पि विवज्जओ' त्ति इच्चेवमाइ, तं पि परिहरियमेव,

---

ज्ञोऽपि पुरुषो नियमेन स्वदारचित्ताराधनं करोति। दृश्यन्ते खल्वेषामपि व्यभिचरन्तो दाराः। न चासम्यक्प्रयोगजनितस्ततो व्यभिचार इति युक्तमाशङ्कितुम्, न यतोऽत्र निश्चये प्रमाणम्। दृश्यते च तत्प्रयोगज्ञ एकदारचित्ताराधनपरोऽपि अन्यः स तमनाराधयन्, अप्रयोगज्ञोऽपि चाराधयन्निति। तस्माद् यत्किञ्चिदेतत्। यदपि वैद्यकोदाहरणेनात्र जातियुक्तिं भणन्ति, साऽपि च प्रकृतिनिर्गुणत्वेन कामानां जीवितार्थिनः खड्गशिरश्छेदक्रियाविधानयुक्तितुल्येति न बहुमता बुधानाम्। एवं शुद्धसुतभावो विशुद्धदानादिक्रियाप्रसिद्धिश्च व्यभिचारिणी दृश्येते। कामशास्त्रपराणामपि सुता अकुलपुत्रकाः प्रकृत्या भुजङ्गप्रायाश्चेष्टितेन। अनुरक्तदारा अपि च निरपेक्षा दानादिक्रियासु, तुच्छाः प्रकृत्या, अधिक विपर्ययकारीणः। अतो यदपि जल्पितम् 'अनुरक्तदारशुद्धसुताभ्यां च तदनुबद्धफलसारौ संपद्येतेऽर्थकामौ' इति, तदपि चासमञ्जसमेव। एवं च स्थिते सति यदपि भणितं 'विपर्यये पुनस्त्रयाणामपि विपर्यय इति' इत्येवमादि, तदपि

वभिचारदोसेण समाणो खु एसो। इहइं न हि न कामसत्थभणियपओयन्नुणो वि एसो न होइ। अओ न तव्विवज्जयनिमित्तो खलु एसो, अवि य अकुसलाणुबन्धिकम्मोदयनिमित्तो, विवज्जओ वि अकुसलाणुबन्धिकम्मोदयनिमित्तो त्ति निरत्थयं कामसत्थं। तहा जं च भणियं 'एयं तु सोहणयरं, धम्मत्थाण साफल्लयानिदरिसणपरं कामसत्थं ति, न जओ कामाभावे धम्मत्थाणमन्नं फलं, न य निप्फलत्ते तेसिं पुरिसत्थया, न य मोक्खफलसाहगत्तेण सफला इमे, जओ अलोइओ मोक्खो समाहिभावणाझाणपगरिसफलो य' त्ति, एयं पुण असोहणयरं। जओ पामागहियकण्डुयणपाया कामा विरसयरा अवसाणे भावन्धयारकारिणो असुहकम्मफलभूया कहं धम्मत्थाण फलं ति, कहं वा तहाविहाणं धम्मत्थाण पुरिसत्थया, जे जणेन्ति कामे नासेन्ति उवसमं कुणन्ति अमित्तसंगमाणि अवणेन्ति सव्ववसायं संपाडयन्ति अणायइं अवपूरन्ति सोयं विहेन्ति लाघवाइं ठावेन्ति अप्पच्चयं हरन्ति अप्पमायपाणे कारेन्ति अणुवाएयं ति। जं पि य 'सरीरट्ठिइहेउभावेण आहारसधम्माणो कामा परिहरियव्वा य एत्थ दोस' त्ति मोहदोसेण भणन्ति मन्दबुद्धिणो, तं

परिहृतमेव, व्यभिचारदोषेण समानः खल्वेषः। इह नहि न कामशास्त्रभणितप्रयोगज्ञस्यापि एष न भवति। अतो न तद्विपर्ययनिमित्तः खल्वेषः, अपि चाकुशलानुबन्धिकर्मोदयनिमित्तः, विपर्ययोऽपि अकुशलानुबन्धिकर्मोदयनिमित्त इति निरर्थकं कामशास्त्रम्। तथा यच्च भणितम् 'एतत्तु शोभनतरम्, धमार्थयोः साफल्यतानिदर्शनपरं कामशास्त्रमिति, न यतः कामाभावे धमार्थयोरन्यत् फलम्, न च निष्फलत्वे तयोः पुरुषार्थता, न च मोक्षफलसाधकत्वेन सफलाविमौ, यतोऽलौकिको मोक्षः समाधिभावनाध्यानप्रकर्षफलश्च' इति, एतत् पुनरशोभनतरम्। यतः पामागृहीतकण्डुयनप्रायाः कामा विरसतरा अवसाने भावान्धकारकारिणोऽशुभकर्मफलभूताः कथं धमार्थयोः फलमिति, कथं वा तथाविधयोः धमार्थयोः पुरुषार्थता, यौ जनयतः कामान्, नाशयत उपशमम्, कुरुतोऽमित्रसंगमान्, अपनयतः सद्व्यवसायम्, संपादयतोऽनायतिम्, अवपूरयतः शोकम्, विधत्तो लाघवानि, स्थापयतोऽप्रत्ययम्, हरतोऽप्रमादप्राणान्, कारयतो-

पि न हु बुहजणमणोहरं। जओ विणा वि एएहिं मुणियतत्ताणं पेच्छमाणाण जहाभावमेव बोंदिविरत्ताण तीए सुद्धज्झाणाण रिसीण दीसइ सरीरठिई; सेवमाणाण वि य ते तज्जणियपावमोहेण अच्चन्तसेवणपराणं खयादिरोगभावओ विणासो त्ति। ता कहं ते सरीरट्ठिइहेयवो, कहं वा आहारसधम्माणो त्ति। न य एयसंगया दोसा अपरिच्चत्तेहिं एएहिं अभिन्ननिबन्धणत्तेण तीरन्ति परिहरिउं। न खलु मोत्तूण मोहं कामाणमणुवसमाईण य अन्नं निमित्तं ति चिन्तेह चित्तेण। एवंवट्ठिए समाणे 'न हि हरिणा विज्जन्ति त्ति जवा न पइरिज्जन्ति' एवमादि पहसणप्पायं कामसत्थवयणं। तम्हा न कामफलाण धम्मत्थाण पुरिसत्थया, अवि य मोक्खफलाणमेव। न य अलोइओ मोक्खो; जओ विसिट्ठमुणिलोयलोइओ, रहिओ जम्माइएहिं, वज्जिओ आवाहाए, समत्ती सव्वकज्जाणं, पगरिसो सुहस्स। समाहिभावणाझाणादओ वि न हि न धम्मसरूवा, अवि य ते चेव भावधम्मो। इयरो वि निरीहस्स तप्फलो चेव हवइ, अन्नहा

ऽनुपादेयमिति। यदपि च 'शरीरस्थितिहेतुभावेनाहारसधर्माणः कामाः परिहर्तव्याश्चात्र दोषः' इति मोहदोषेण भणन्ति मन्दवुद्धयः, तदपि न खलु वुधजनमनोहरम्। यतो विनाप्येतैर्ज्ञाततत्त्वानां पश्यतां यथाभावमेव वोन्दिविरक्तानां, तया शुद्धध्यानानामृषीणां दृश्यते शरीरस्थितिः, सेवमानानामपि च तान् तज्जनितपापमोहेनात्यन्तसेवनपराणां क्षयादिरोगभावतो विनाश इति। ततः कथं ते शरीरस्थितिहेतवः, कथं वाऽऽहारसधर्माण इति। न चैतत्संगता दोषा अपरित्यक्तैरेतैरभिन्ननिबन्धनत्वेन शक्यन्ते परिहर्तुम्। न खलु मुक्त्वा मोहं कामानामनुपशमादीनां चान्यन्निमित्तमिति चिन्तयत चित्तेन। एवमवस्थिते सति 'नहि हरिणा विद्यन्ते इति यवा न प्रतिरियन्ते' एवमादि प्रहसनप्रायं कामशास्त्रवचनम्। तस्मान्न कामफलयोर्धर्मार्थयोः पुरुषार्थता, अपि च मोक्षफलयोरेव। न चालौकिको मोक्षः, यतो विशिष्टमुनिलोकलोकितो रहितो जन्मादिभिः, वर्जित आबाधया, समाप्तिः सर्वकार्याणाम्, प्रकर्षः सुखस्य। समाधिभावनाध्यानादयोऽपि न हि न धर्मस्वरूपाः, अपि च त एव भावधर्मः। इतरोऽपि निरीहस्य तत्फल एव भवति, अन्यथा 'गर्हिते इष्टापूर्ते' इति भावयि-

‘गरहियाणि इट्ठापूयाणि’ त्ति भावियव्वं सत्थवयणं। न य कामा अणिन्दिया, पयट्टन्ति पयईए पसिद्धा तिरियाणं पि मङ्गुला सरूवेणं। ता किमेएसिं सत्थेण। जं पि भणियं ‘बालासंपओओ पराहीणो त्ति उवायं अवेक्खइ, उवायपडिवत्ती य कामसत्थाओ, तिरियाणं तु [1]अणावरिया इत्थिजाई रिउकाले य नियमिया पवित्ती अबुद्धिपुव्वा य’ त्ति, एयं पि मोहपिसुणयं; जओ उवाएया चेव न हवन्ति कामा असुन्दरा पयईए विडम्बणा जणाण विसोवमा परिभोए वच्छला कुचेट्ठियस्स त्ति दंसियं मए। अओ अदत्तादाणगहणविसयसत्थकप्पं खु एयं ति। करेन्तसुणेन्तयाणमन्नाणपयासणपरं कामसत्थं। भणियं च सुद्धचित्तेहिं।

तं नाम होइ सत्थं जं हियमत्थं जणस्स दंसेइ। जं पुण अहियं ति सया तं नणु कत्तोच्चयं सत्थं॥
अहिया तओ पवित्ती होइ अकज्जंमि मन्दबुद्धीणं। असुहोवएसरूवं जत्तेण तयं पयहियव्वं॥

तव्यं शास्त्रवचनम्। न च कामा अनिन्दिताः, प्रवर्तन्ते प्रकृत्या प्रसिद्धाः तिरश्चामपि मङ्गुलाः (अशुभाः) स्वरूपेण। ततः किमेतेषां शास्त्रेण। यदपि भणितं ‘बालासंप्रयोगः पराधीन इत्युपायमपेक्षते, उपायप्रतिपत्तिश्च कामशास्त्राद्, तिरश्चां तु अनावृता स्त्रीजाति ऋतुकाले च नियमिता प्रवृत्तिरबुद्धिपूर्वा च’ इति, एतदपि मोहपिशुनकम्, यत उपादेया एव न भवन्ति कामा असुन्दराः प्रकृत्या विडम्बना जनानां विषोपमाः परिभोगे वत्सलाः कुचेष्टितस्येति दर्शितं मया। अतोऽदत्तादानग्रहणविषयशास्त्रकल्पं खल्वेतदिति। कुर्वच्छृण्वतामज्ञानप्रकाशनपरं कामशास्त्रम्। भणितं च शुद्धचित्तैः।

तन्नाम भवति शास्त्रं यद् हितमर्थं जनस्य दर्शयति। यत् पुनरहितमिति सदा तन्ननु कुतस्त्यं शास्त्रम्॥
अहिता ततः प्रवृत्तिर्भवत्यकार्ये मन्दबुद्धीनाम्। अशुभोपदेशरूपं यत्नेन तत् प्रहातव्यम्॥

---

[1] अणिवारिया पा. ज्ञा.

इहरा पज्जलइ[1] च्चिय वम्महजलणो जणस्स हिययंमि। किं पुण अणत्थपण्डियकुकव्वहविहोमिओ सन्तो ॥
ता जं कामुद्दीरणसमत्थमेत्थं न तं बुहजणेण। सुमिणे[2] वि जंपियव्वं पसंसियव्वं च दुव्वयणं ॥
पसमाइभावजणयं हियमेगन्तेण सव्वसत्ताण। निउणेण जंपियव्वं पसंसियव्वं च सुविसुद्धं ॥

एवं[3] च ठिए समाणे अलं दुव्वयणसंगयाए कामसत्थचिन्ताए त्ति।

एयं सोऊण विम्हिया असोयादी। चिन्तियं च णेहिं। अहो विवेगो कुमारस्स, अहो भावणा, अहो भवविराओ, अहो कयन्नुया। सव्वहा न ईइसो मुणिजणस्स वि परिणामो होइ, किं तु फुडं पि जंपमाणो दूमेइ एस अम्हे त्ति। चिन्तिऊण जंपियं असोएण। कुमार, एवमेयं, किं तु सव्वमेव लोयमग्गाईयं जंपियं कुमारेण। ता अलमिमीए अइपरमत्थचिन्ताए। न अणासेविए लोयमग्गे इमीए वि

इतरथा प्रज्वलत्येव मन्मथज्वलनो जनस्य हृदये। किं पुनरनर्थपण्डितकुकाव्यहविर्हुतः सन् ॥
ततो यत् कामोदीरणसमर्थमत्र न तद् बुधजनेन। स्वप्नेऽपि जल्पितव्यं प्रशंसितव्यं च दुर्वचनम् ॥
प्रशमादिभावजनकं हितमेकान्तेन सर्वसत्त्वानान्। निपुणेन जल्पितव्यं प्रशंसितव्यं च सुविशुद्धम् ॥

एवं च स्थिते सत्यलं दुर्वचनसंगतया कामशास्त्रचिन्तयेति।

एतत् श्रुत्वा विस्मिता अशोकादयः। चिन्तितं च तैः। अहो विवेकः कुमारस्य, अहो भावनाः, अहो भवविरागः, अहो कृतज्ञता। सर्वथा नेदृशो मुनिजनस्यापि परिणामो भवति, किन्तु स्पष्टमपि जल्पन् दुनोत्येषोऽस्मानिति। चिन्तयित्वा जल्पितमशोकेन। कुमार! एवमेतद्, किन्तु सर्वमेव लोकमार्गातीतं जल्पितं कुमारेण। ततोऽलमनयाऽतिपरमार्थचिन्तया। नानासेविते लोकमार्गे अस्या अप्यधिकार

---

[1] पज्जलिओ व्व मु. पु. [2] सिमिणे वि डे. ज्ञा. सुविणे वि पा. ज्ञा. [3] एवंवट्ठिए पा. ज्ञा. डे. ज्ञा.

अहिगारो त्ति। ता लोयमग्गं पडुच्च किंपरं पुण कामसत्थं ति साहेउ कुमारो। कामङ्कुरेण भणियं। सोहणं भणियं असोएण। ललियङ्गएण भणियं। न असोओ असोहणं भणिउं जाणइ। कुमारेण भणियं। भद्द, अपरमत्थपिच्छो पाएण लोओ भिन्नरुई य। ता न तंमग्गेण इमस्स अहं किंपि परयं अवेमि। सव्वहा कन्दप्पियाण बालाणमविणोयविणोयपायं एयं, जओ कामसुहाइं पि कम्मपरिणामनिबन्धणाइं जीवाणं, विउणे य तंमि न परमत्थेण इमिणा पओयणं ति। उत्तरपयाणासामत्थेण 'एवमेयं'ति अब्भुवगयं असोआईहिं।

अइक्कन्ता कइइ दियहा। आलोचियमणेहिं। तवस्सिप्पाओ कुमारो, कहं अम्हारिसेहिं विसएसु पयट्टाविउं तीरइ। तहावि अत्थि एक्को उवाओ। उवरोहसीलो खु एसो, पडिवन्ना य अम्हे इमेण मित्ता। ता अब्भत्थेम्ह एयं कलत्तसंगहमन्तरेण, कयाइ संपाडेइ अम्हाणं समीहियं ति। ठाविऊण सिद्धन्तं समागए अवसरे भणियं असोएण। भो कुमार, पुच्छामि अहं भवन्तं, किमेत्थ जीवलोए

इति। ततो लोकमार्गं प्रतीत्य किंपरं पुनः कामशास्त्रमिति कथयतु कुमारः। कामाङ्कुरेण भणितम्। शोभनं भणितमशोकेन। ललिताङ्गेन भणितम्। नाशोकोऽशोभन भणितुं जानाति। कुमारेण भणितम्। भद्र! अपरमार्थप्रेक्षः प्रायेण लोको भिन्नरुचिश्च। ततो न तन्मार्गेणास्याह किमपि परतां (तात्पर्यम्) अवैमि। सर्वथा कान्दर्पिकानां बालानामविनोदविनोदप्रायमेतद्, यतः कामसुखान्यपि कर्मपरिणामनिबन्धनानि जीवानाम्, विगुणे च तस्मिन् न परमार्थेनानेन प्रयोजनमिति। उत्तरप्रदानासामर्थ्येन 'एवमेतद्' इत्यभ्युपगतमशोकादिभिः।

अतिक्रान्ताः कतिचिद् दिवसाः। आलोचितमेभिः। तपस्विप्रायः कुमारः, कथमस्मादृशैर्विषयेषु प्रवर्तयितु शक्यते। तथाऽप्यस्त्येक उपायः। उपरोधशीलः खल्वेषः, प्रतिपन्नानि च वयमनेन मित्राणि। ततोऽभ्यर्थयामहे एतं कलत्रसंग्रहमन्तरेण, कदाचित् संपादयत्यस्माकं समीहितमिति। स्थापयित्वा सिद्धान्तं समागतेऽवसरे भणितमशोकेन। भोः कुमार! पृच्छाम्यहं भवन्तम्, किमत्र जीवलोके सुपुरुषेण

सुपुरिसेण मित्तवच्छलेण होयव्वं किं वा नहि। कुमारेण भणियं। भो साहु पुच्छियं, साहेमि भवओ। एत्थ खलु तिविहो मित्तो हवइ। तं जहा। अहमो मज्झिमो उत्तिमो त्ति। जो खलु[1] संजोइओ अप्पणा दिस्समाणो अत्ताहियं अणुयत्तिज्जमाणो पयईए सेविज्जमाणो अणुसमपइदिणं लालिज्जमाणो जत्तेण विलोट्टए विहुरंमि, नावेक्खइ सुकयाइं, न रक्खइ वयणिज्जं, परिच्चयइ खणेण; एस एयारिसो अणुसमयसेवियपरिच्चाई नाम जहन्नमित्तो। जो उण जहाकहंचि संगओ दिस्समाणो अत्तबुद्धीए अणुयत्तिज्जमाणो अजत्तेण सेविज्जमाणो विभाए लालिज्जमाणो ऊसवाइएसु तक्खणं न विसंवयइ, विहुरे अवेक्खइ ईसि सुकयाइं, रक्खइ मणागं वयणिज्जं, परिच्चयइ विलावपुव्वयं विलम्बेण; एस एयारिसो छणसेवियपरिच्चाई नाम मज्झिममित्तो। जो उण अजत्तेण दिट्ठाभट्ठो बहु मन्नए सुकयं, उवागच्छए मेत्तिं, जो[2]पयट्टए उवयारे, मोयावए दुहाओ, जणेइ गोरवं, वड्ढेइ माणं, करेइ संपयं, विहेइ सोक्खं, न परिच्चयइ आवयाए; एस एयारिसो

मित्रवत्सलेन भवितव्यं किं वा नहि। कुमारेणं भणितम्। भोः साधु पृष्टम्, कथयामि भवतः। अत्र खलु त्रिविधं मित्रं भवति। तद्यथा, अधमं मध्यमं उत्तममिति। यः खलु संयोजित आत्मना दृश्यमान आत्माधिकमनुवृत्यमानः प्रकृत्या सेव्यमानः प्रतिदिवसं लाल्यमानो यत्नेन विलुठ्यति (परावर्तते) विधुरे, नापेक्षते सुकृतानि, न रक्षति वचनीयम्, परित्यजति क्षणेन, एष एतादृशोऽनुसमयसेवितपरित्यागी नाम जघन्यमित्रम्। यः पुनर्यथाकथंचित् संगतो दृश्यमान आत्मबुद्धयाऽनुवृत्यमानोऽयत्नेन सेव्यमानो विभागे लाल्यमान उत्सवादिषु तत्क्षणं न विसंवदति, विधुरे अपेक्षते ईषत् सुकृतानि, रक्षति मनाग् वचनीयम्, परित्यजति विलापपूर्वकं विलम्बेन; एष एतादृशः क्षणसेवितपरित्यागी नाम मध्यममित्रम्। यः पुनरयत्नेन दृष्टापृष्टो बहु मन्यते सुकृतम्, उपागच्छति मैत्रीम्, प्रवर्तते उपकारे, मोचयति दुःखात्, जनयति गौरवम्, वर्धयति मानम्, करोति संपदम्, विदधाति सौख्यम्, न परित्यजत्यापदि, एष एतादृशो

---

[1] खु डे. ज्ञा. [2] जोसक्कार-मु. पु.

क्कारमेत्तेणं सेवियापरिच्चाई नाम उत्तिममित्तो त्ति। एवंवट्ठिए समाणे सुपुरिसेणालोचिऊण नियमईए सव्वहा उत्तिममित्तवच्छलेण होयव्वं ति। कामङ्कुरेण भणियं। भो को उण इहाहिप्पाओ। पसिद्धमेवेयं, जं जहन्नमज्झिमे चइऊण उत्तिमो सेविज्जेइ[2]। कुमारेण भणियं। नणु एवमेव एत्थाहिप्पाओ, जं जहन्नमज्झिमे चइऊण उत्तिमो सेविज्जइ त्ति। ललियङ्गएण भणियं। भो न [3]एयमुज्जुयं, गम्भीरं खु एयं न विसेसओ अविवरियं जाणीयइ। ता विवरेहि संपयं, के उण इमे तिण्णि मित्ता। कुमारेण भणियं। भो जइ नावगयं तुम्हाणं, ता सुणह संपयं। एत्थ खलु परमत्थमित्ते पडुच्च पसिणो उत्तरं च जुज्जइ त्ति जंपियं मए। पसिद्धं तु लोइयं, को वा सचेयणो तयत्थं न याणइ। ता इमे मित्ता देहसयणधम्मा। तत्थ जहन्नमित्तो देहो, मज्झिमो सयणो, उत्तमो धम्मो त्ति। जेण देहो तहा तहोवचरिज्जमाणो वि अणुसमयमेव दंसेइ वियारे, अहियपक्खसंगयं अणुयत्तइ जरं, चरिमावयाए य उज्झइ निरालम्बं ति; एस जहन्नमित्तो। सयणो

जयकारमात्रेण सेवितापरित्यागी नामोत्तममित्रमिति। एवमवस्थिते सति सुपुरुषेणालोच्य निजमत्या सर्वथोत्तममित्रवत्सलेन भवितव्यमिति। कामाङ्कुरेण भणितम्। भोः कः पुनरिहाभिप्रायः। प्रसिद्धमेवैतत्, यद् जघन्यमध्यमौ त्यक्त्वोत्तमः सेव्यते। कुमारेण भणितम्। नन्वेवमेवात्राभिप्रायः, यद् जघन्यमध्यमौ त्यक्त्वोत्तमः सेव्यते इति। ललिताङ्गेन भणितम्। भो! नैतद् ऋजुकम्, गम्भीरं खल्वेतद्, न विशेषतोऽविवृतं ज्ञायते। ततो विवृणु साम्प्रतम्, कानि पुनरिमानि त्रीणि मित्राणि। कुमारेण भणितम्। भो! यदि नावगतं युष्माकम्, ततः शृणुत साम्प्रतम्। अत्र खलु परमार्थमित्राणि प्रतीत्य प्रश्न उत्तरं च युज्यते इति जल्पितं मया। प्रसिद्धं तु लौकिकम्, को वा सचेतनस्तदर्थं न जानाति। तत इमानि मित्राणि देहस्वजनधर्माः। तत्र जघन्यमित्रं देहः, मध्यमं स्वजनः, उत्तमं (मित्रं) धर्म इति। येन देहस्तथा तथोपचर्यमाणोऽपि अनुसमयमेव दर्शयति विकारान्, अधिकपक्षसंगतमनुवर्तते जराम्, चरमापदि चोज्झति निरा-

---

१ –णावि पा. ज्ञा. २ सेविज्जइ त्ति पा. ज्ञा. ३ एयं पसज्झं पा. ज्ञा.

उण ममत्ताणुरूवं करेइ पडिममत्तं, किलिस्सइ गिलाणाइकज्जे, परिच्चयइ गयजीयसारं, सुमरइ य पत्थावेसु, एस मज्झिममित्तो त्ति। धम्मो उण संगओ जहाकहंचि वच्छलो एगन्तेण अविसाई भएसु निव्वाहए मित्तयं ति; एस उत्तमो। एवं च नाऊण अधुवे विसयसोक्खे असारे पयईए मोहणे परमत्थस्स दारुणे विवाए[1] अवहीरिए धीरेहिं, पाविए माणुसत्ते उत्तमे भवाण दुल्लहे भवाडवीए सुखेत्ते गुणधणाण साहए[2] निव्वाणस्स उज्झिऊण मोहं चिन्तिऊणायइं अचिन्तचिन्तामणिसन्निहे वीयरायप्पणीए उवादेए नियमेण होह वच्छला सप्पुरिससेविए उत्तममित्ते धम्मे त्ति॥ एयं सुणमाणाण तहाभव्वयाए असोयाईण विचित्तयाए कम्मपरिणामस्स कुमारसन्निहाणसामत्थेण विसुद्धयाए जोयाण उक्कडयाए वीरियस्स वियम्भिओ कुसलपरिणामो, वियलिओ किलिट्ठकम्मरासी, अवगया मोहवासणा, तुट्टा असुहाणुबन्धा, जाओ कम्मगण्ठिभेओ, खओवसममुवगयं मिच्छत्तं, आविहूओ सम्मत्तपरिणामो। तओ समुप्पन्नसंवेगेण जंपियं असो-

लम्बमिति, एतद् जघन्यमित्रम्। स्वजनः पुनर्ममत्वानुरूपं करोति प्रतिममत्वम्, क्लिश्यति ग्लानादिकार्ये, परित्यजति गतजीवितसारम्, स्मरति च प्रस्तावेषु, एतद् मध्यममित्रमिति। धर्मः पुनः संगतो यथाकथंचिद् वत्सल एकान्तेनाविषादी भयेषु निर्वाहयति मित्रतामिति, एतद् उत्तमम्। एवं च ज्ञात्वाऽध्रुवाणि विषयसौख्यान्यसाराणि प्रकृत्या मोहनानि परमार्थस्य दारुणानि विपाकेऽवधीरितानि धीरैः, प्राप्ते मानुषत्वे उत्तमे भवानां दुर्लभे भवाटव्यां सुक्षेत्रे गुणधान्यानां साधके निर्वाणस्य उज्झित्वा मोहं चिन्तयित्वाऽऽयतिमचिन्त्यचिन्तामणिसन्निभे वीतरागप्रणीते उपादेये नियमेन भवत वत्सलाः सत्पुरुषसेविते उत्तममित्रे धर्मे इति। एतच्छृण्वतां तथाभव्यतयाऽशोकादीनां विचित्रतया कर्मपरिणामस्य कुमारसन्निधानसामर्थ्येन विशुद्धतया योगानामुत्कटतया वीर्यस्य विजृम्भितः कुशलपरिणामः, विचलितः क्लिष्टकर्मराशिः, अपगता मोहवासना, त्रुटिता अशुभानुबन्धाः, जातः कर्मग्रन्थिभेदः, क्षयोपशममुपगतं मिथ्यात्वम्, आविर्भूतः सम्य-

---

[1] विवायकलिए पा. ज्ञा. [2] चउवण्णाभित्तरत्त साहए पा. ज्ञा.

एण। कुमार, एवमेयं, न एत्थ संदेहो, सोहणं समाइट्ठं कुमारेणं। कामङ्कुरेण भणियं। सोहणाओ वि सोहणं। अहवा इयमेव एक्कं सोहणं, नत्थि अन्नं सोहणं ति। ललियङ्गएण भणियं। किं बहुणा, अन्नाणनिद्दापसुत्ता पडिबोहिया अम्हे कुमारेण, दंसियाइं हेओवादेयाइं। ता पयट्टम्ह सहिए, संपाडेमो कुमारसासणं। असोएण भणियं। कुमार, साहु जंपियं ललियङ्गएण; ता समाइसउ कुमारो, जमम्हेहि कायव्वं ति। कुमारेण भणियं। भो संखेवओ ताव एयं। उज्झियव्वो विसयराओ, चिन्तियव्वं भवसरूवं, वज्जियव्वा कुसंसग्गी, सेवियव्वा साहुणो; तओ जहासत्तीए दाणसीलतवभावणापहाणेहिं होयव्वं ति। असोयाईहिं भणियं। साहु कुमार साहु, पडिवन्नमिणमम्हेहिं। कुमारेण भणियं। भो धन्ना खु तुब्भे; पावियं तुम्हेहिं फलं मणुयजम्मस्स। तेहिं भणियं। कुमार साहु, एवमेयं; धन्ना खु अम्हे, न खलु अहन्नाण कुमारदंसणं संपज्जइ। एवं चाहिणन्दिऊण कुमारं संपूइया विसेसेण कुमारेण उचियाए वेलाए गया सट्ठाणाइं

क्त्वपरिणामः। ततः समुत्पन्नसंवेगेन जल्पितमशोकेन। कुमार! एवमेतद्, नात्र संदेहः, शोभनं समादिष्टं कुमारेण। कामाङ्कुरेण भणितम्। शोभनादपि शोभनम्। अथवेदमेवैकं शोभनम्, नास्त्यन्यत् शोभनमिति। ललिताङ्गेन भणितम्। किं बहुना, अज्ञाननिद्राप्रसुप्ताः प्रतिबोधिता वयं कुमारेण, दर्शितानि हेयोपादेयानि। ततः प्रवर्तामहे स्वहिते, संपादयामः कुमारशासनम्। अशोकेन भणितम्। कुमार! साधु जल्पितं ललिताङ्गेन, ततः समादिशतु कुमारो यदस्माभिः कर्तव्यमिति। कुमारेण भणितम्। भोः संक्षेपतस्तावदेतद्। उज्झितव्यो विषयरागः, चिन्तयितव्यं भवस्वरूपम्, वर्जयितव्यः कुसंसर्गः, सेवितव्याः साधवः, ततो यथाशक्ति दानशीलतपोभावनाप्रधानैर्भवितव्यमिति। अशोकादिभिर्भणितम्। साधु कुमार! साधु, प्रतिपन्नमिदमस्माभिः। कुमारेण भणितम्। भो धन्याः खलु यूयम्, प्राप्तं युष्माभिः फलं मनुजजन्मनः। तैर्भणितम्। कुमार! साधु, एवमेतद्, धन्याः खलु वयम्, न खल्वधन्यानां कुमारदर्शनं संपद्यते। एवं चाभिनन्द्य कुमारं संपूजिता विशेषेणोचितायां वेलायां गताः स्वस्थानान्यशोकादयः। प्रारब्धं यथोचितमनुष्ठानमेतैः। अतिक्रान्ताः

असोयाई। पारद्धं जहोचियमणुट्ठाणमेएहिं। अइक्कन्ता कइइ दियहा।

एत्थन्तरंमि समागओ महुसमओ, वियम्भिया वणसिरी, मञ्जरिओ चूयनियरो, कुसुमिया तिलयाई, उल्लसिया अइमुत्तया, पवत्तो मलयाणिलो, मुइयं भमरजालं, पसरिओ परहुयारवो; जहिं च मम मित्तरज्जमिमं ति उत्तुणो कयत्थेइ बालवुड्ढं पि मयणो, सिसिरसत्तुविगमेण विय वियसियकमलवयणा कमलिणी, महुसमागमसुहेण विय पणट्ठतमाओ जन्ति जामिणीओ, उउलच्छिदंसणपसत्ता विय तहा परिमन्थरगमणा वासरा; जहिं च अग्घए नवरङ्गयं, बहुमया पसन्ना, [1]वहन्ति डोलाओ, सेविज्जन्ति काणणाइं, मणहरो चन्दो, अहिमओ गेयविही, वट्टन्ति पेरणाइं, पियाओ कामिणीओ; जहिं च विसेसुज्जलनेवच्छाइं कीलन्ति तरुणवन्द्राइं, भमन्ति महाविभूईए देवयाणं पि रहवरा, मयणवाहभएण विय सरणाइं अल्लियन्ति पिययमेसु पियाओ॥ एवंविहे य महुसमए राइणो पुरिससी-

कतिचिद् दिवसाः॥

अत्रान्तरे समागतः मधुसमयः, विजृम्भिता वनश्रीः, मञ्जरितश्चूतनिकरः, कुसुमिताः तिलकादयः, उल्लसिता अतिमुक्ताः, प्रवृत्तो मलयानिलः, मुदितं भ्रमरजालम्, प्रसृतः परभृतारवः, यत्र च मम मित्रराज्यमिदमिति [2]दृप्तः कदर्थयति बालवृद्धमपि मदनः, शिशिरशत्रुविगमेनेव विकसितकमलवदना कमलिनी, मधुसमागमसुखेनेव प्रनष्टतमसो यान्ति यामिन्यः, ऋतुलक्ष्मीदर्शनप्रसक्ता इव तथा परिमन्थरगमना वासराः; यत्र च राजते नवरङ्गकम्, बहुमता प्रसन्ना, वहन्ति दोलाः, सेव्यन्ते काननानि, मनोहरश्चन्द्रः, अभिमतो गेयविधिः, वर्तन्ते प्रेक्षणकानि, प्रियाः कामिन्यः, यत्र च विशेषोज्ज्वलनेपथ्यानि क्रीडन्ति तरुणवन्द्राणि, भ्रमन्ति महाविभूत्या देवतानामपि रथवराः. मदनव्याधभयेनेव शरणान्यालीयन्ते प्रियतमेषु प्रियाः।

---

[1] हवन्ति पा. ज्ञा. [2] उत्तुणो दृप्तः "दरिए उत्तुण–उम्मुह–उच्चुंचु–च्छुच्छु–उत्तुरिद्धीओ" (देशी० १–९९)

हस्स नयरिच्छणदंसणनिमित्तं समागया नयरिमहन्तया। विन्नत्तो णेहिं राया। देव, देवे नरवइंमि निच्चच्छणो नयरीए; तहावि समागओ महुसमओ त्ति विविहचच्चरीदंसणेण देवपसायलालियाणं पयाणं छणाओ वि गरुयं छणन्तरं करेउ देवो नायरयाणं ति । राइणा चिन्तियं। अहो सोहणमुवत्थियं, मयणमित्तो खु महुसमओ। ता कुमारं एत्थ निउञ्जामि, जेण तहा विचित्तसंसारवियारदंसणेण संजायरसन्तरो संपाडेइ मे परियणस्स य समीहियाहियं सोक्खं ति। चिन्तिऊण भणिया महन्तया। भो संपाडिया मम तुब्भेहिं बहुसो नियविभूइदंसणेण निव्वुई, अहं पुण तुम्हाण कुमारदंसणेण अहियं संपाडेमि। अन्नं च, संपयं कुमारो एत्थ कारणपुरिसो; ता तंमि चेव बहुमाणो कायव्वो त्ति । महन्तएहिं भणियं । जं देवो आणवेइ। अन्नं च, देवपसायाओ वि एस महापसाओ जहिं कुमारदंसणं ति। निग्गया महन्तया। राइणा वि सद्दाविओ कुमारो, भणिओ य सबहुमाणं। वच्छ, ठिई एसा इमीए नयरीए, जं मयणमहूसवे दट्ठव्वाओ नयरिचच्चरीओ राइणा, दिट्ठाओ य मए अणेगसो। संपयं पुण अणुगन्तव्वो गुरुसमणुगओ मग्गो त्ति तेणेव विहिणा तुमं

एवंविधे च मधुसमये राज्ञः पुरुषसिंहस्य नगरीक्षणदर्शननिमित्तं समागता नगरीमहान्तः। विज्ञप्तस्तै राजा। देव ! देवे नरपतौ नित्यक्षणो नगर्याः, तथापि समागतो मधुसमय इति विविधचर्चरीदर्शनेन देवप्रसादलालितानां प्रजानां क्षणादपि गुरुकं क्षणान्तरं करोतु देवो नागरकानामिति। राज्ञा चिन्तितम्। अहो शोभनमुपस्थितम्, मदनमित्रः खलु मधुसमयः। ततः कुमारमत्र नियुञ्जे, येन तथा विचित्रसंसारविकारदर्शनेन संजातरसान्तरः संपादयति मे परिजनस्य च समीहिताधिकं सौख्यमिति। चिन्तयित्वा भणिता महान्तः। भोः संपादिता मम युष्माभिर्बहुशो निजविभूतिदर्शनेन निर्वृतिः, अहं पुनर्युष्माकं कुमारदर्शनेनाधिकं संपादयामि। अन्यच्च, साम्प्रतं कुमारोऽत्र कारणपुरुषः, ततस्तस्मिन्नेव बहुमानः कर्तव्य इति। महद्भिर्भणितम्। यद्देव आज्ञापयति। अन्यच्च, देवप्रसादादप्येष महाप्रसादो, यत्र कुमारदर्शनमिति। निर्गता महान्तः। राज्ञाऽपि शब्दायितः कुमारः, भणितश्च सबहुमानम्। वत्स ! स्थितिरेषा अस्या नगर्याः, यद् मदन-

पि पेच्छाहि। एव च कए समाणे ममं परियणस्स नायरयाण य महन्तो पमोओ हवइ। कुमारेण भणियं। जं ताओ आणवेइ। तओ हरिसिओ राया, दिन्ना समाणत्ती पडिहाराणं। हरे भणह मम वयणाओ नाणगब्भपमुहे पहाणसचिवे, जहा 'नयरिच्छणचच्चरीदंसणसुहं संजत्तेह रहवराइयं कुमारस्स, मम वयणाओ नायरयाइपरिओसनिमित्तं रायपयवत्तिणा गन्तव्वमज्ज[1] णेणं[2] छणचच्चरीदंसणनिमित्तं ति। 'जं देवो आणवेइ त्ति' भणिऊण 'कुमारो अज्ज छणचच्चरीओ पेक्खिस्सइ, भवियव्वमम्हाणं पि कल्लाणेणं' ति हरिसियमणेहिं तुरियतुरियं निवेइया समाणत्ती पडिहारेहिं। 'अहो भवियव्वमेत्थ परमाणन्देणं' ति आणन्दिया सचिवा। भणियं च णेहिं। जं देवो आणवेइ। तयणन्तरं च सज्जिओ रहवरो, कया जन्तजोयाँ[3], निवेसियं आयवत्तं, दिन्नाओ वेजयन्तीओ, निबद्धं किङ्किणीजालं, निविट्ठाइं रयणदामाइं, ओलम्बिया मुत्ताहारा, विरइयाओ मणितारयाओ, उवगप्पियं आसणं, लम्बिया चामरोऊला॥ एत्थ-

महोत्सवे द्रष्टव्या नगरचर्चर्यो राज्ञा, दृष्टाश्च मयाऽनेकशः। साम्प्रतं पुनरनुगन्तव्यो गुरुसमनुगतो मार्ग इति नेनैव विधिना त्वमपि प्रेक्षस्व। एवं च कृते सति मम परिजनस्य नागरकानां च महान् प्रमोदो भवति। कुमारेण भणितम्। यत् तात आज्ञापयति। ततो हर्षितो राजा, दत्ता समाज्ञप्तिः प्रतीहाराणाम्। अरे भणत मम वचनाद् ज्ञानगर्भप्रमुखान् प्रधानसचिवान्, यथा 'नगरीक्षणचर्चरीदर्शनसुखं संयात्रयत रथवरादिकं कुमारस्य, मम वचनाद् नागरिकादिपरितोषनिमित्तं राजपदवर्तिना गन्तव्यमद्यानेन क्षणचर्चरीदर्शननिमित्तम्' इति। 'यद् देव आज्ञापयति' इति भणित्वा 'कुमारोऽद्य क्षणचर्चरीः प्रक्षिष्यते, भवितव्यमस्माकमपि कल्याणेन' इति हर्षितमनोभिः त्वरितत्वरितं निवेदिता समाज्ञप्तिः प्रतीहारैः। 'अहो भवितव्यमत्र परमानन्देन' इत्यानन्दिताः सचिवाः। भणितं च तैः। यद् देव आज्ञापयति। तदनन्तरं च सज्जितो रथवरः, कृता यन्त्रयोगाः, निवेशितमातपत्रम्, दत्ता वैजयन्त्यः, निबद्धं किङ्किणीजालम्, निविष्टानि रत्नदामानि,

---

१ –मुच्छा(ज्जा)णे छण–पा. ज्ञा. २ जणेण पा. ज्ञा. ३–जोहा डे. ज्ञा.

न्तरंमि इमं वइयरमवयच्छिऊण विसेसुज्जलनेवच्छाइं सहरिसं समागयाइं पायमूलाइं, कुङ्कुमखोयभरिएहिं कच्चोलेहिं वसन्तनेवच्छधारी मण्डयन्तो विय छणं मिलिओ भुयङ्गलोओ, विचित्तजाणारूढा संगएणं परियणेणं पमोयवियसन्तलोयणं कुमारदंसणूसुयत्तेण उवत्थिया रायउत्ता, धवलहरनिज्जूहएहिं छणाइसयदंसणत्थं ओहसियथलनलिणिसोहाइं विणिग्गयवयणकमलं ठियाइं अन्तेउराइं। एत्थन्तरंमि पवत्तो नयरीए ऊसवो। निवेइयं राइणो सचिवेहिं। देव, संपाडियं कुमारमन्तरेण देवसासणं; संपयं देवो पमाणं ति। हरिसिओ राया। भणिओ य णेण कुमारो। वच्छ, करेहि महापुरिसकरणिज्जं वड्ढेहि ऊसवं नायरयाणं। कुमारेण भणियं। जं ताओ आणवेइ। पणमिऊण सह [१]असोयाइएहिं पयट्टो रहाहिमुहं अहिणन्दिज्जमाणो अन्तेउरेहिं पणमिज्जमाणो रायउत्तेहिं थुव्वमाणो भुयङ्गलोएण पुलइज्जमाणो पायमूलेहिं पत्तो रहसमीवं, आरूढो रहवरे, उवविट्ठो पहाणासणंमि। निवेसिया असोयाई [२]जंहाजोग्गजाणेसु। भणियं च णेण। अज्ज

अवलम्बिता मुक्ताहाराः, विरचिता मणितारकाः, उपकल्पितमासनम्, लम्बिताश्चामरावचूलाः॥ अत्रान्तरे इमं व्यतिकरमवगम्य विशेषोज्ज्वलनेपथ्यानि सहर्षं समागतानि पात्रमूलानि, कुङ्कुमक्षोदभृतैः कच्चोलैर्वसन्तनेपथ्यधारी मण्डयन्निव क्षणं मिलितो भुजङ्गलोकः, विचित्रयानारूढाः संगतेन परिजनेन प्रमोदविकसद्लोचनं कुमारदर्शनोत्सुकत्वेनोपस्थिता राजपुत्राः, धवलगृहनिर्यूहकेषु क्षणातिशयदर्शनार्थमुपहसितस्थलनलिनीशोभानि विनिर्गतवदनकमलं स्थितान्यतःपुराणि। अत्रान्तरे प्रवृत्तो नगर्यामुत्सवः। निवेदितं राज्ञः सचिवैः। देव! संपादितं कुमारमन्तरेण देवशासनम्, साम्प्रतं देवः प्रमाणमिति। हर्षितो राजा। भणितश्च तेन कुमारः। वत्स! कुरु महापुरुषकरणीयम्, वर्धस्योत्सवं नागरकानाम्। कुमारेण भणितम्। यत् तात आज्ञापयति। प्रणम्य सहाशोकादिभिः प्रवृत्तो रथाभिमुखमभिनन्द्यमानोऽन्तःपुरैः प्रणम्यमानो राजपुत्रैः स्तूयमानो भुजङ्गलोकेन प्रलोक्यमानः प्रात्रमूलैः प्राप्तो रथसमीपम्, आरूढो रथवरम्, उपविष्टः प्रधाना-

---

[१] असोयाईहिं पा. ज्ञा. डे. ज्ञा. [२] अयं पाठो नास्ति डे. ज्ञा. तहाजोगजाणेहिं पा. ज्ञा.

सारहि, चोएहि अहिमयदेसगमणं पइ तुरङ्गमे । 'जं देवो आणवेइ'त्ति भणिऊण चोइया तुरङ्गमा । एत्थन्तरंमि समुद्धाइओ जयजयारवो, पहयं गमणतूरं, चलिया रायउत्ता, पणच्चियाइं पायमूलाइं, उल्लसिया भुयङ्गा, खुहिओ पेच्छयजणो, पवत्ता केली, वियम्भिओ कुङ्कुमरओ । एवं च महया विमद्देण पेच्छमाणो सव्वमेयं संवेगभावियमई समोइण्णो रायमग्गं कुमारो । पवत्तो पेच्छिउं चच्चरीओ नाणाविहाओ रिद्धिविसेससोहियाओ जुत्ता वियड्ढविब्भमेहिं तियसचच्चरीसमाओ संगयाओ हरिसेण वज्जन्तेहिं विविहतूरेहिं मणहराओ लोयस्स संवेगजणणीओ बुहाण । पेच्छमाणो 'अहो मोहसामत्थं, अहो अकज्जधीरया, अहो पमायचेट्ठियं, अहो अदीहदरिसिया, अहो अणालोयगत्तं, अहो असुहभावणा, अहो अमित्तजोओ, अहो संसारविलसियं' ति चिन्तयन्तो पवड्ढमाणेण संवेएण वियारयन्तो कम्माइं, भावयन्तो कुसलजोए विसुज्झमाणेण नाणेण पुलइज्जमाणो चच्चरीहिं जणिन्तो तासिं तोसं निरूवयन्तो पेरणाइं 'देव पेच्छ एयं' ति भणिज्जमाणो सारहिणा अइगओ कंचि भूमिभागं ॥

सने । निवेशिता अशोकादयो यथायोग्ययानेषु । भणितं च तेन । आय सारथे ! चोदयाभिमतदेशगमनं प्रति तुरङ्गमान् । 'यद् देव आज्ञापयति' इति भणित्वा चोदितास्तुरङ्गमाः । अत्रान्तरे समुद्धावितो जयजयारवः, प्रहतं गमनतूर्यम् , चलिता राजपुत्राः, प्रनर्तितानि पात्रमूलानि, उल्लसिता भुजङ्गाः, क्षुब्धः प्रेक्षकजनः, प्रवृत्ता केलिः, विजृम्भितं कुङ्कुमरजः । एवं च महता विमर्देन प्रेक्षमाणः सर्वमेतत् संवेगभावितमतिः समवतीर्णो राजमार्गं कुमारः । प्रवृत्तः प्रेक्षितुं चर्चरीर्नानाविधा ऋद्धिविशेषशोभिता युक्ता विदग्धविभ्रमैस्त्रिदशचर्चरीसमाः संगता हर्षेण वाद्यमानैर्विविधतूर्यैर्मनोहरा लोकस्य संवेगजननीर्बुधानाम् । पश्यन् 'अहो मोहसामर्थ्यम् , अहो अकार्यधीरता, अहो प्रमादचेष्टितम् , अहो अदीर्घदर्शिता, अहो अनालोचकत्वम् , अहो अशुभभावनाः, अहो अमित्रयोगः, अहो संसारविलसितम्' इति चिन्तयन् प्रवर्धमानेन संवेगेन विचारयन् कर्माणि, भावयन् कुशलयोगान् विशुद्धयमानेन ज्ञानेन दृश्यमानश्चर्चरीभिर्जनयन् तासां

दिट्ठो य णेण देवउलपीढियाए अइबीहच्छदंसणो असुइणा देहेण गलन्तभासुरवयणो संकुचिएहिं हत्थेहिं उस्सूणचलणजुयलो पणट्ठाए नासियाए विणिग्गयतम्बनयणो परिगओ मच्छियाहिं महावाहिगहिओ कोइ पुरिसो त्ति। तं च दट्ठूण 'अहो कम्मपरिणइ'त्ति करुणापवन्नहियएण पडिबोहणनिमित्तं जणसमूहस्स भणिओ सारही। अज्ज सारहि, अह किं पुण इमं पेरणं ति। तेण भणियं। देव, न खलु एयं पेरणं, एसो खु वाहिगहिओ पुरिसो त्ति। कुमारेण भणियं। अज्ज, अह को उण इमो [1]वाही। सारहिणा भणियं। देव, जो सुन्दरं पि सरीरं अयालेण एवं विणासेइ। कुमारेण भणियं। अज्ज, दुट्ठो खु एसो अहिओ लोयस्स; ता कीस ताओ [2]एयं विसहइ। सारहिणा भणियं। कुमार, अवज्झो एस तायस्स। कुमारेण भणियं। आ कहमवज्झो नाम। लोयपडिबोहणत्थं च मग्गियं खग्गं। 'अरे रे

तोषं निरूपयन् प्रेरणानि (प्रेक्षणकानि) 'देव! पश्यैतत्' इति भण्यमानः सारथिनाऽतिगतः कञ्चिद् भूमिभागम्॥

दृष्टश्च तेन देवकुलपीठिकायामतिबीभत्सदर्शनोऽशुचिना देहेन गलद्भासुरवदनः संकुचिताभ्यां हस्ताभ्यामुच्छूनचरणयुगलः प्रनष्टया नासिकया विनिर्गतताम्रनयनः परिगतो मक्षिकाभिर्महाव्याधिगृहितः कोऽपि पुरुष इति। तं च दृष्ट्वा 'अहो कर्मपरिणतिः' इति करुणाप्रपन्नहृदयेन प्रतिबोधननिमित्तं जनसमूहस्य भणितः सारथिः। आर्य सारथे! अथ किं पुनरिदं प्रेक्षणकमिति। तेन भणितम्। देव! न खल्वेतत् प्रेक्षणकम्, एष खलु व्याधिगृहीतः पुरुष इति। कुमारेण भणितम्। आर्य! अथ कः पुनरयं व्याधिः। सारथिना भणितम्। देव! यः सुन्दरमपि शरीरमकालेनैवं विनाशयति। कुमारेण भणितम्। आर्य! दुष्टः खल्वेषोऽहितो लोकस्य, ततः कस्मात् तात एतं विषहते। सारथिना भणितम्। कुमार! अवध्य एष तातस्य। कुमारेण भणितम्। आः कथमवध्यो नाम। लोकप्रतिबोधनार्थं च मार्गितं

---

[1] वाही नाम **पा. ज्ञा.** [2] एवं उविक्ख विसहइ **पा. ज्ञा.**

दुट्ठवाहि, मुञ्च मुञ्च एयं, [1]ठाहि वा जुज्झसज्जो' त्ति भणमाणो उट्ठिओ रहवराओ, पयट्टो तस्स संमुहं। 'हा किमेयं' ति उवसन्ताओ चच्चरीओ, मिलिया [2]नायरया। पयंपिओ सारही। देव, न खलु वाही नाम कोइ दुट्ठपुरिसो निग्गहारिहो नरवईण, अवि य जीवाणमेव सकम्मपरिणामजणिओ संकिलेसविसेसो। ता [3]अप्पहू एयस्स राइणो, साहारणो खु एसो सव्वजीवाण। कुमारेण भणियं। भो नायरया, किमेवमेयं। नायरएहिं भणियं। देव, [4]एवमेयं। कुमारेण भणियं। अज्ज सारहि, एएण गहिओ वि एसो चइऊण नियबलं अमणोरमाए एयमवत्थाए कीस एवं चिट्ठइ। सारहिणा भणियं। देव, ईइसो चेव [5]एसो वाही; जेण एएण गहियस्स पणस्सइ बलं, असोहणा अवत्था, दुक्खफलं चेट्ठियं ति। कुमारेण भणियं। अज्ज सारहि, कस्स उण एसो न पहवइ। सारहिणा भणियं। देव, परमत्थेण धम्मपच्छसेविणो अहम्मापच्छविरयस्स कस्सइ महाभागस्स। कुमारेण भणियं। अज्ज सारहि, जइ एवं, ता को उण इह उवाओ। सारहिणा

खड्गम्। 'अरेरे दुष्टव्याधे! मुञ्च मुञ्चैतम्, तिष्ठ वा युद्धसज्जः' इति भणन् उत्थितो रथवरात्, प्रवृत्तस्तस्य संमुखम्। 'हा किमेतद्' इति उपशान्ताश्चर्चर्यः, मिलिता नागरकाः। प्रजल्पितः सारथिः। देव! न खलु व्याधिर्नाम कोऽपि दुष्टपुरुषो निग्रहार्हो नरपतीनाम्, अपि च जीवानामेव स्वकर्मपरिणामजनितः संक्लेशविशेषः। ततोऽप्रभव एतस्य राजानः, साधारणः खल्वेष सर्वजीवानाम्। कुमारेण भणितम्। भो नागरकाः! किमेवमेतत्। नागरकैर्भणितम्। देव! एवमेतत्। कुमारेण भणितम्। आर्य सारथे! एतेन गृहीतोऽपि एष त्यक्त्वा निजबलमनोरमायामेतदवस्थायां कस्मादेवं तिष्ठति। सारथिना भणितम्। देव! ईदृश एवैष व्याधिः, येनैतेन गृहीतस्य प्रणश्यति बलम्, अशोभनाऽवस्था, दुःखफलं चेष्टितमिति। कुमारेण भणितम्। आर्य सारथे! कस्य पुनरेष न प्रभवति। सारथिना भणितम्। देव! परमार्थेन धर्मपथ्यसेविनोऽधर्मापथ्यविरतस्य कस्यचिद् महाभागस्य। कुमारेण भणितम्। आर्य सारथे! यद्येवं ततः कः पुनरिहोपायः।

---

१. थाहि पा. ज्ञा.डे. ज्ञा.। २ नायरा पा. ज्ञा.। ३ अप्पभू पा. ज्ञा.। ४ एवं डे. ज्ञा.। ५ सो डे. ज्ञा.।

भणियं। देव, खेत्तं वाहिणो पाणिणो, परमत्थेण नत्थि उवाओ मोत्तूणं धम्मतिगिच्छं। कुमारेण भणियं। भो नायरया, किमेवमेयं। नायरएहिं भणियं। देव, [1]एवमेयं। कुमारेण भणियं। भो जइ एवं, ता सव्वसाहारणे एयंमि असोहणे पयईए अवयारए एगन्तेण विज्जमाणोवाए अचिन्तिऊण एयं अलमिमिणा नच्चिएण, उवाए चेव खलु [2]जुत्तो जत्तो त्ति। नायरएहिं भणियं। देव, एवमेयं, तहावि लोयट्ठिई एसा; ता न जुत्तं देवस्स सयलनायरयाण पवत्ते महूसवे अत्थाणे रसभङ्गकरणं। सारहिणा भणियं। देव, जुत्तं भणियमेएहिं; ता विविहपेरणाइं ताव पेक्खउ देवो त्ति। कुमारेण भणियं। अज्ज, [3]एवं। तओ पवत्ताओ चच्चरीओ, पेच्छमाणो य कुमारो गओ कंचि भूमिभागं॥

दिट्ठं च णेण नियघरोवरिट्ठियं निसण्णं सव्वङ्गएसु अच्चन्तसिढिलगत्तं पणट्ठेहिं सिरोरुहेहिं पगलन्तलोयणं कम्पमाणेण देहेण वज्जियं दसणावलीए संगयं काससासेहिं परिहूयं परियणेण जरापरिणयं सेट्ठिमिहुणयं ति। तं च दट्ठूण 'अहो असारया संसारस्स' त्ति

सारथिना भणितम्। देव! क्षेत्रं व्याधेः प्राणिनः, परमार्थेन नास्त्युपायो मुक्त्वा धर्मचिकित्साम्। कुमारेण भणितम्। भो नागरकाः! किमेवमेतद्। नागरकैर्भणितम्। देव! एवमेतद्। कुमारेण भणितम्। भो यद्येवं ततः सर्वसाधारणे एतस्मिन् अशोभने प्रकृत्याऽपकारके एकान्तेन विद्यमानोपाये अचिन्तयित्वा एतमलमनेन नर्तितेन, उपाये एव खलु युक्तो यत्न इति। नागरकैर्भणितम्। देव! एवमेतद्, तथापि लोकस्थितिरेषा, ततो न युक्तं देवस्य सकलनागरकाणां प्रवृत्ते महोत्सवेऽस्थाने रसभङ्गकरणम्। सारथिना भणितम्। देव! युक्तं भणितमेतैः, ततो विविधप्रेक्षणानि तावत् पश्यतु देव इति। कुमारेण भणितम्। आर्य! एवम्। ततः प्रवृत्ताश्चर्चर्यः। प्रेक्षमाणश्च कुमारो गतो कंचिद् भूमिभागम्॥

दृष्टं च तेन निजगृहोपरिस्थितं निसन्नं (क्रान्तं)सर्वाङ्गकेषु अत्यन्तशिथिलगात्रं प्रनष्टैः शिरोरुहैः प्रगलल्लोचनं कम्पमानेन देहेन, वर्जितं

---

[1] एवं डे. ज्ञा.। [2] एस जुत्तो डे. ज्ञा. पा. ज्ञा.। [3] एवं हवउ, जइ तुब्भमणुवंधो पा. ज्ञा.

पवड्ढमाणसंवेएण पडिबोहणनिमित्तमेव भणिओ सारही। अज्ज सारहि, अह किं पुण इमं पेरणं ति। तेण भणियं। देव, न खलु एयं पेरणं, एयं खु जरापीडियं सेट्ठिमिहुणयं ति। कुमारेण भणियं। अज्ज, अह का उण एसा जरा भण्णइ। सारहिणा भणियं। देव, जा अजिण्णं पि सरीरं कालेण एवं करेइ। कुमारेण भणियं। अज्ज, दुट्ठा खु एसा अहिया लोयस्स; ता कीस ताओ एयं उवेक्खइ। सारहिणा भणियं। कुमार, अणायत्ता खु एसा तायस्स। कुमारेण भणियं। आ कहमणायत्ता नाम। जणपडिबोहणत्थं च मग्गिऊण खग्गं 'आ पावे दुट्ठजरे, मुञ्च मुञ्च एयं सेट्ठिमिहुणयं, इत्थिया तुमं, किमवरं भणियसि'त्ति भणमाणो समुट्ठिओ रहवराओ, पयट्टो तयभिमुहं। 'हा किमेयमवरं' ति उवसन्ताओ चच्चरीओ, मिलिया [1]पुणो जणा। पभणिओ सारहिणा। देव, न हि जरा नाम काइ विग्गहवई इत्थिया, जा एवमुवलम्भारिहा देवस्स, किं तु सत्ताणमेवोरालिय[2]सरीरिणं [3]कालवसेण परिणई एसा। अओ न उवलम्भारिहा

दशनावल्या, संगतं कासश्वासैः, परिभूतं परिजनेन, जरापरिणतं श्रेष्ठिमिथुनकमिति। तच्च दृष्ट्वा 'अहो असारता संसारस्य' इति प्रवर्धमानसंवेगेन प्रतिबोधननिमित्तमेव भणितः सारथिः। आर्य सारथे! अथ किं पुनरिदं प्रेक्षणकमिति। तेन भणितम्। देव! न खल्वेतत् प्रेक्षणकम्, एतत् खलु जरापीडितं श्रेष्ठिमिथुनकमिति। कुमारेण भणितम्। आर्य! अथ का पुनरेषा जरा भण्यते। सारथिना भणितम्। देव! याऽजीर्णमपि शरीरं कालेनैवं करोति। कुमारेण भणितम्। आर्य! दुष्टा खल्वेषाऽहिता लोकस्य, ततः कस्मात् तात एतामुपेक्षते। सारथिना भणितम्। कुमार! अनायत्ता खल्वेषा तातस्य। कुमारेण भणितम्। आः कथमनायत्ता नाम। जनप्रतिबोधनार्थं च मार्गयित्वा खड्गं आः पापे दुष्टजरे! मुञ्च मुञ्चैतत् श्रेष्ठिमिथुनकम्, स्त्री त्वम्, किमपरं भण्यसे' इति भणन् समुत्थितो रथवरात्, प्रवृत्तस्तदभिमुखम्। 'हा किमेतदपरम्' इत्युपशान्ताश्चर्चर्यः, मिलिताः पुनर्जनाः। प्रभणितः सारथिना। देव! नहि जरा नाम काऽपि

---

१ पुणो वि जणवया पा. ज्ञा.। २–सरीराणं घ। ३ कालविसेससरीरपरिणई पा. ज्ञा.।

देवस्स, साहारणा य एसा एएसिं देहीणं। कुमारेण भणियं। भो भो नयरिजणा, किमेवमेयं ति। तेहिं भणियं। देव, न[1] संदेहो। कुमारेण भणियं। अज्ज सारहि, अओ परं अवगओ मए इमीए भावत्थो अभवणविही य, ता भणामि अज्जं नयरिजणं च। न कायव्वो खेओ, किं जुत्तमेयाए पणासणीए पोरुसस्स अवयारिणीए धम्मत्थकामाण जणणीए परिहवस्स संवद्धणीए[2] ओहसणिज्जभावाण पहवन्तीए वि मोत्तूण धम्मरसायणं इयमेवंविहं असमञ्जसं चेट्ठियं ति। एयं च सोऊण 'अहो कुमारस्स विवेओ, अहो परमत्थदरिसिया; न एत्थ किंचि अन्नारिसं, केवलं पहवइ महामोहो'त्ति चिन्तिऊण समं नयरि[3]जणवएण संविग्गो सारही। भणियं च णेण। देव, साहु जंपियं देवेण। तहावि अणादिभवब्भत्था मोहवासणा न तीरए चइउं ति। कुमारेण भणियं। अज्ज, एवं ववत्थिए अलं मोहवासणाए। दारुणविवाओ वाही रोद्दा य पावा जरा हवन्ति कि[4]ऊपायाओ नियमेण पाणिणो; भणियमज्जेण, 'अत्थि य पडिवक्खो एयासि धम्म-

विग्रहवती स्त्री, या एवमुपलम्भार्हा देवस्य, किन्तु सत्त्वानामेवौदारिकशरीरिणां कालवशेन परिणतिरेषा, अतो नोपलम्भार्हा देवस्य, साधारणा चैषा एतेषां देहिनाम्। कुमारेण भणितम्। भो भो नगरीजनाः! किमेवमेतदिति। तैर्भणितम्। देव! न संदेहः। कुमारेण भणितम्। आर्य सारथे! अतः परमवगतो मयाऽस्या भावार्थोऽभवनविधिश्च। ततो भणाम्यार्यं नगरीजनं च। न कर्तव्यः खेदः, किं युक्तमेतस्यां प्रणाशन्यां पौरुषस्य अपकारिण्यां धर्मार्थकामानां जनन्यां परिभवस्य संवर्धिन्यामुपहसनीयभावानां प्रभवन्त्यामपि मुक्त्वा धर्मरसायनमिदमेवंविधमसमञ्जसं चेष्टितमिति। एतच्च श्रुत्वा 'अहो कुमारस्य विवेकः, अहो परमार्थदर्शिता, नात्र किञ्चिदन्यादृशम्, केवलं प्रभवति महामोहः' इति चिन्तयित्वा सम नगरीजनव्रजेन संविग्नः सारथिः। भणितं च तेन। देव! साधु जल्पितं देवेन। तथाप्यनादिभवाभ्यस्ता मोहवासना न शक्यते त्यक्तुमिति। कुमारेण भणितम्। आर्य! एवं व्यवस्थितेऽलं मोहवासनया। दारुणविपाको

---

१ न एत्थ पा. ज्ञा.। २ संवद्धणीए कुगइमग्गस्स पा. ज्ञा.। ३ –जाणवएण डे. ज्ञा.। ४ किलेसाओ डे. ज्ञा. पा. ज्ञा.।

चरणं' ति। तो दिट्ठविवायाण वि न तंमि जत्तो त्ति अउव्वा मोहवासणा ॥

एत्थन्तरंमि दिट्ठो कुमारेण नाइदूरेण नीयमाणो समारोविओ जरखट्टाए समोत्थओ जुण्णवत्थेण उक्खित्तो दीणपुरिसेहिं सदुक्खकइवयबन्धुसंगओ रुयमाणेण इत्थियाजणेण अ[1]क्कन्दमाणाए पत्तीए पुलोइज्जमाणो जणेण पञ्चत्तमुवगओ दरिद्दपुरिसो त्ति। तं च दट्ठूण [2]जंपियमणेण। अज्ज सारहि, अलं ताव मोहवासणाचिन्ताए; साहेहि मज्झ, किं पुण इमं पेरणं ति। सारहिणा चिन्तियं। अहो निव्वेयकारणपरंपरा, अहो असारया संसारस्स। ता किमेत्थ साहेमि। न य न-याणइ इमं पवञ्चमेसो। अणभिन्नस्स कहमीइसी वाणी। अम्हारिसजणविबोहणत्थं तु तक्केमि एस एवं चेट्ठइ। ता इमं एत्थ पत्तयालं, साहेमि एयं जहट्ठियं ति। चिन्तिऊण जंपियं सारहिणा। देव, न खलु एयं पेरणं, एसो खु मच्चुघत्थो पुरिसो त्ति। कुमारेण भणियं। [3]अज्ज, अह को उण इमो मच्चू। सारहिणा भणियं।

व्याधिः, रौद्रा च पापा जरा भवन्ति क्लेशप्राया नियमेन प्राणिनः; भणितमार्येण, 'अस्ति च प्रतिपक्ष एतासां धर्मचरणम्' इति। ततो दृष्टविपाकानामपि न तस्मिन् यत्न इत्यपूर्वा मोहवासना ॥

अत्रान्तरे दृष्टः कुमारेण नातिदूरेण नीयमानः समारोपितो जरत्खट्वायां समवस्तृतो जीर्णवस्त्रेणोत्क्षिप्तो दीनपुरुषैः सदुःखकतिपयबन्धुसंगतो रुदता स्त्रीजनेन आक्रन्दन्त्या पत्न्या प्रलोक्यमानो जनेन पञ्चत्वमुपगतो दरिद्रपुरुष इति। तं च दृष्ट्वा जल्पितमनेन। आर्य सारथे! अलं तावन्मोहवासनाचिन्तया, कथय मह्यं, किं पुनरिदं प्रेक्षणकमिति। सारथिना चिन्तितम्। अहो निर्वेदकारणपरम्परा, अहो असारता संसारस्य। ततः किमत्र कथयामि। न च न जानातीमं प्रपञ्चमेषः। अनभिज्ञस्य कथमीदृशी वाणी। अस्मादृशजनविबोधनार्थं तु तर्कये एष एवं चेष्टते। तत इदमत्र प्राप्तकालम्, कथयाम्येतद् यथास्थितमिति। चिन्तयित्वा जल्पितं सारथिना। देव! न खल्वेतत्

---

[1] अहियथरअक्क-पा. ज्ञा.। [2] जंपियं कुमारेण पा. ज्ञा.। [3] अज्ज, को वुण पा. ज्ञा. डे. ज्ञा.।

देव, जेण घत्थो पुरिसो बन्धवेहिं पि एवं परिच्चइयइ। कुमारेण भणियं। अज्ज, दुट्ठो खु एसो अहिओ लोयस्स; ता कीस ताओ एयं न वहेइ। सारहिणा भणियं। कुमार, अवज्झो एस तायस्स। कुमारेण भणियं। आ कहमवज्झो नाम तायस्स। लोयपडिबोहणत्थं च मग्गियं खग्गं। 'अरे रे दुट्ठमच्चु, मुञ्च मुञ्च एयं, ठाहि वा जुज्झसज्जो' त्ति भणमाणो उट्ठिओ रहवराओ, पयट्टो तस्स संमुहं। भणिओ य सारहिणा। देव, न खलु मच्चू नाम कोइ दुट्ठपुरिसो निग्गहारिहो राईण, अवि य जीवाणमेव सकम्मपरिणामजणिओ देहपरिच्चायधम्मो। ता अप्पहू एयस्स रायाणो, साहारणो खु एसो सव्वजीवाण। कुमारेण भणियं। भो नायरया, किमेवमेयं। नायरएहिं भणियं। देव, एवं। कुमारेण भणियं। अज्ज सारहिं, एएण घत्थं पि कीस एए बन्धवा एयं परिच्चयन्ति। सारहिणा भणियं। देव, किमेइणा संपयं, गओ खु एसो एत्थ कारणभूओ। कडेवरमिणं केवलं चिट्ठमाण[2]मवगाराए। कुमारेण भणियं। अज्ज सारहि, जइ एवं,

प्रेक्षणकम्, एष खलु मृत्युग्रस्तः पुरुष इति। कुमारेण भणितम्। आर्य! अथ कः पुनरयं मृत्युः। सारथिना भणितम्। देव! येन ग्रस्तः पुरुषो बान्धवैरप्येवं परित्यज्यते। कुमारेण भणितम्। आर्य! दुष्टः खल्वेषोऽहितो लोकस्य; ततः कस्मात् तात एतं न घातयति। सारथिना भणितम्। कुमार! अवध्य एष तातस्य। कुमारेण भणितम्। आः कथमवध्यो नाम तातस्य। लोकप्रतिबोधनार्थं च मार्गितं खड्गम्। 'अरेरे दुष्टमृत्यो! मुञ्च मुञ्चैतम्, तिष्ठ वा युद्धसज्जः' इति भणन् उत्थितो रथवरात्, प्रवृत्तस्तस्य संमुखम्। भणितश्च सारथिना। देव! न खलु मृत्युर्नाम कोऽपि दुष्टपुरुषो निग्रहार्हो राज्ञाम्, अपि च जीवानामेव स्वकर्मपरिणामजनितो देहपरित्यागधर्मः। ततोऽप्रभव एतस्य राजानः, साधारणः खल्वेष सर्वजीवानाम्। कुमारेण भणितम्। भो नागरकाः! किमेवमेतद्। नागरकैर्भणितम्। देव! एवम्। कुमारेण भणितम्। आर्य सारथे! एतेन ग्रस्तमपि कस्माद् एते बान्धवा एतं परित्यजन्ति। सारथिना भणितम्। देव! किमेतेन साम्प्रतम्,

---

१ कारणपुरिसो पा. ज्ञा.। २-मवगाराय पा. ज्ञा. डे. ज्ञा.।

ता कीस एए बन्धवा विलवन्ति। सारहिणा भणियं। कुमार, पिओ खु एसो एएसिं गओ दीहजत्ताए. अदंसणमियाणिं। एएण सरिऊण सुकयाइं सोयभरपीडिया अचयन्ता निरुम्भिउं अविज्जमाणोवायन्तरा य एवं विलवन्ति। कुमारेण भणियं। अज्ज सारहि, जइ पिओ, कीस इमं नाणुगच्छन्ति। सारहिणा भणियं। देव, असक्कमेयं; न कहेइ गच्छन्तो, नावेक्खए सिणेहं, न दीसइ अप्पणा, न नज्जए थामं, विचित्ता कम्मपरिणई, अणवट्ठिया संजोया, न ईइसो अणुबन्धो; अओ नाणुगच्छन्ति। कुमारेण भणियं। अज्ज सारहि, जइ एवं, ता निरत्थया तंमि पिई। सारहिणा भणियं। देव, परमत्थओ एवं। कुमारेण भणियं। अज्ज सारहि, जइ एवं, ता को उण इहोवाओ। सारहिणा भणियं। देव, जोगिगम्मो उवाओ, न अम्हारिसेहिं नज्जइ। कुमारेण भणियं। भो नायरया, किमेवमेयं। नायरएहिं भणियं। देव, एवं। कुमारेण भणियं। भो जइ एवं, ता सव्वसाहारणे एयंमि असोहणे पयईए अवयारए एगन्तेण विज्जमाणो-

गतः खल्वेषोऽत्र कारणभूतः। कलेवरमिदं केवलं तिष्ठदपकाराय। कुमारेण भणितम्। आर्य सारथे! यद्येवं ततः कस्मादेते बान्धवा विलपन्ति। सारथिना भणितम्। कुमार! प्रियः खल्वेष एतेषां गतो दीर्घयात्रया, अदर्शनमिदानीम्। एतेन स्मृत्वा सुकृतानि शोकभरपीडिता अशक्नुवन्तो निरोद्धुमविद्यमानोपायान्तराश्चैवं विलपन्ति। कुमारेण भणितम्। आर्य सारथे! यदि प्रियः, कस्मादिमं नानुगच्छन्ति। सारथिना भणितम्। देव! अशक्यमेतद्, न कथयति गच्छन्, नापेक्षते स्नेहम्, न दृश्यते आत्मना, न ज्ञायते स्थानम्, विचित्रा कर्मपरिणतिः, अनवस्थिताः संयोगाः, नेदृशोऽनुबन्धः, अतो नानुगच्छन्ति। कुमारेण भणितम्। आर्य सारथे! यद्येवं ततो निरर्थका तस्मिन् प्रीतिः। सारथिना भणितम्। देव, परमार्थत एवम्। कुमारेण भणितम्। आर्य सारथे! यद्येवं ततः किं पुनरिहोपायः। सारथिना भणितम्। देव! योगिगम्य उपायः, नास्मादृशैर्ज्ञायते। कुमारेण भणितम्। भो नागरकाः! किमेवमेतद्। नागरकैर्भणितम्। देव! एवम्। कुमारेण भणितम्। भो यद्येवम्, ततः सर्वसाधारणे एतस्मिन्नशोभने प्रकृत्याऽपकारके एकान्तेन विद्यमानोपायेऽचिन्तयित्वै-

वाए अचिन्तिऊण एयं अलमिमिणा नच्चिएण; एओवाए चेव खलु एस जुत्तो जत्तो त्ति। एयमायण्णिऊण संविग्गा नायरया, पवन्ना केइ मग्गं, निबद्धाइं बोहिबीयाइं। अवेक्खिऊण कुमारस्स महाणुभावयं विम्हिया चित्तेण पडिबद्धा कुमारे, उवरया नच्चियव्वाओ, वावडा [1]साहुवाए, पयट्टा [2]जहोचियं करणिज्जं ॥

एत्थन्तरंमि देवसेणमाहणाओ इमं वइयरमायण्णिऊण अहिययरभीएण राइणा कुमाराहवणनिमित्तं पेसिओ पडिहारो। समागओ एसो, भणियं च णेण। कुमार, महाराओ आणवेइ, जहा कुमारेण सिग्घमागन्तव्वं ति। कुमारेण भणियं। जं गुरू आणवेइ। भणिओ य सारही। अज्ज सारहि, नियत्तेहि रहवरं। 'जं कुमारो आणवेइ' त्ति नियत्तिओ सारहिणा रहवरो। गओ नरवइसमीवं। पणमिओ णेण राया। उवविट्ठो तयन्तिए, भणिओ य णेण। कुमार, भणिस्सामि किंचि अहं कुमारं; ता अवस्समेव तं कायव्वं कुमारेण। कुमारेण

तमलमनेन नर्तितेन, एतदुपाये एव खल्वेष युक्तो यत्न इति। एवमाकर्ण्य संविग्ना नागरकाः, प्रपन्नाः केऽपि मार्गम्, निबद्धानि बोधिबीजानि। अवेक्ष्य कुमारस्य महानुभावतां विस्मिताश्चित्तेन प्रतिबद्धाः कुमारे, उपरता नर्तितव्याद्, व्यापृताः साधुवादे, प्रवृत्ता यथोचितं करणीयम् ॥

अत्रान्तरे देवसेनब्राह्मणादिमं व्यतिकरमाकर्ण्याधिकतरभीतेन राज्ञा कुमाराह्वाननिमित्तं प्रेषितः प्रतीहारः। समागत एषः, भणितं च तेन। कुमार! महाराज आज्ञापयति, यथा कुमारेण शीघ्रमागन्तव्यमिति। कुमारेण भणितम्। यद् गुरुराज्ञापयति। भणितश्च सारथिः। आर्य सारथे! निवर्तय रथवरम्। 'यत् कुमार आज्ञापयति' इति निवर्तितः सारथिना रथवरः। गतो नरपतिसमीपम्। पणतस्तेन राजा। उपविष्टस्तदन्तिके, भणितश्च तेन। कुमार! भणिष्यामि किञ्चिदहं कुमारम्, ततोऽवश्यमेव तत् कर्तव्यमेव कुमारेण। कुमारेण भणि-

---

[1] कुमारं पइ साहुवाए पा. ज्ञा.। [2] जहोचिए करणिज्जे पा. ज्ञा. जहोचियं डे. ज्ञा.।

भणियं। ताय, अलङ्घणीयवयणा गुरवो, न एवं सन्ततभा[1]रारोवणे कारणमवगच्छामि। अहवा किं ममेइणा, अमीमंसा गुरू; सव्वहा जं तुब्भे आणवेह। राइणा भणियं। वच्छ, एरिसो चेव तुमं ति, केवलं मम नेहो अवरज्झइ। ता भणिस्सं अवसरेण; संपयं करेहि उचियं करणिज्जं। कुमारेण भणियं। जं गुरू आणवेइ त्ति। पणमिऊण सविणयं निग्गओ कुमारो, गओ निययगेहं, कयं उचियकरणिज्जं। अइक्कन्ता कइइ दियहा॥

अन्नया समं अ[2]सोयाईहिं धम्मकहावावडस्स नियभवणसेविणो विसुद्धभावस्स समागओ पडिहारो। भणियं च णेण। कुमार, महाराओ आणवेइ, जहा 'आगया एत्थ तुह माउलसयासाओ केणावि पओयणेण अ[3]ब्भहिया महन्तया; ता कुमारेण सिग्घमागन्तव्वं'ति। 'जं गुरू आणवेइ' त्ति भणिऊण उट्ठिओ कुमारो, गओ सह असोयाईहिं रायसमीवं। दिट्ठो राया। पणमिऊण उवविट्ठो

तम्। तात! अलङ्घनीयवचना गुरवः, न एवं सन्ततभारारोपणे कारणमवगच्छामि। अथवा किं ममैतेन, अमीमांस्या गुरवः, सर्वथा यद् यूयमाज्ञापयत। राज्ञा भणितम्। वत्स! ईदृश एव त्वमिति, केवलं मम स्नेहोऽपराध्यति। ततो भणिष्याम्यवसरेण, साम्प्रतं कुरूचितं करणीयम्। कुमारेण भणितम्। यद् गुरुराज्ञापयतीति। प्रणम्य सविनयं निर्गतः कुमारः, गतो निजगेहम्, कृतमुचितकरणीयम्। अतिक्रान्ताः कतिचिद् दिवसाः।

अन्यदा सममशोकादिभिर्धर्मकथाव्यापृतस्य निजभवनसेविनो विशुद्धभावस्य समागतः प्रतिहारः। भणितं च तेन। कुमार! महाराज आज्ञापयति, यथा 'आगता अत्र तव मातुलसकाशात् केनापि प्रयोजनेनाभ्यधिका महान्तः, ततः कुमारेण शीघ्रमागन्तव्यम्'इति। 'यद् गुरुराज्ञापयति' इति भणित्वोत्थितः कुमारः। गतः सहाशोकादिभी राजसमीपम्। दृष्टो राजा। प्रणम्योपविष्टस्तदन्तिके। भणितश्च

---

[1] –भावारोहणे डे. ज्ञा.। [2] असोआईएहिं डे. ज्ञा.। [3] अब्भइया पा. ज्ञा.।

तयन्तिए । भणिओ[1] य राइणा । वच्छ, पेसियाओ तुह मामएणं महारायखग्गसेणेणं सबहुमाणं आसत्तवेणि[2](य)विसुद्धाओ नियसुयाओ विब्भमवइकामलयाहिहाणाओ जीवियाओ वि इट्ठयराओ[3] सयंवराओ दुवे कन्नयाओ । एयाओ य बहुमाणेण तस्स राइणो अणुवत्तमाणेण विसिट्ठलोयमग्गं अणुराएण कन्नयाणं आणाए गुरुयणस्स अवस्सं कुमारेण इट्ठत्थसंपत्तीए[4] आणन्दियव्वाओ । एवं च कए समाणे तस्स राइणो विसिट्ठलोयस्स कन्नयाणं गुरुसयणस्स य नियमेण निव्वुई संजायइ । एयमायण्णिऊण[5] चिन्तियं कुमारेण । अहो न सोहणमिणं । दुक्खहेयवो संजोया, निओयवयणं च एयं, अब्भत्थिओ य पुव्विं, तं पि मन्ने इमं चेव । अलङ्घणीया गुरवो, 'इट्ठत्थसंपत्तीए नियमेण निव्वुइ' त्ति सोहणा य वाणी, न यावि भावओ गुरुआणापराण[6] संजायए असोहणं । एवमभिचिन्तयन्तो सासङ्केण विय भणिओ महाराएण । वच्छ, अलमेत्थ चिन्ताए, सुमरेहि मम पत्थणं । ता सा चेव एसा । न एत्थ भवओ कल्लाणपरंपरं मोत्तूण अन्नारिसो

राज्ञा । वत्स ! प्रेषिते तव मामकेन महाराजखड्गसेनेन सबहुमानमासक्तवचनीयविशुद्धे[7] निजसुते विभ्रमवतीकामलताभिधाने जीवितादपीष्टतरे स्वयंवरे द्वे कन्यके । एते च बहुमानेन तस्य राज्ञोऽनुवर्तमानेन विशिष्टलोकमार्गमनुरागेण कन्ययोराज्ञया गुरुजनस्यावश्यं कुमारेणेष्टार्थसंपत्त्याऽऽनन्दयितव्ये । एवं च कृते सति तस्य राज्ञो विशिष्टलोकस्य कन्ययोर्गुरुजनस्य च नियमेन निर्वृतिः संजायते । एवमाकर्ण्य चिन्तितं कुमारेण । अहो न शोभनमिदम् । दुःखहेतवः संयोगाः, नियोगवचनं चैतद् , अभ्यर्थितश्च पूवम् , तदपि मन्ये इदमेव । अलङ्घनीया गुरवः, 'इष्टार्थसंपत्त्या नियमेन निर्वृतिः' इति शोभना च वाणी, न चापि भावतो गुर्वाज्ञापराणां संजायतेऽशोभनम् । एवमभिचिन्तयन् साशङ्केनेव भणितो महाराजेन । वत्स ! अलमत्र चिन्तया, स्मर मम प्रार्थनाम् । ततः सैवैषा । नात्र भवतः कल्याण-

---

१ भणियं च पा. ज्ञा. । २ आसत्तव्वेणि–डे. ज्ञा. आसत्तवेणिसु–पा. ज्ञा. । ३ इट्ठयरीओ ठिइ त्ति काउण पा. ज्ञा. । ४ अहिलसियत्थ– । ५ –मायन्निय पा. ज्ञा. । ६ गुरुवयणपरायणस्स । ७ वेणियं (दे) वचनीयम् । "वयणिज्जे वेणियवेसणा य" देशी. (व.२श्लो. ७५) लग्नलोकापवादविशुद्धे इत्यर्थः ।

परिणामो। अओ अवस्समेव कायव्वं एयं कुमारेण। तओ एयमायण्णिय 'अहो सोहणयरा वाणि' त्ति हरिसियमणेण जंपियं कुमारेण। ताय, जं तुब्भे आणवेह। एयं सोऊण हरिसिओ राया। भणियं च णेण। साहु वच्छ साहु, उचिओ ते विवेओ, सोहणा गुरुभत्ती, भायणं तुमं कल्लाणाणं। अन्नं च, जाणामि अहं भवओ विसुद्धधम्मपक्खवायं, जुत्तो य एसो [1]सयाण। असारो संसारो, नियाणं निव्वेयस्स; तहावि कुसलेण अणुयत्तियव्वो लोयधम्मो, कायव्वा कुसलसंतती, जइयव्वं परोवयारे, अणुयत्तियव्वो कुलक्कमो। एवं च अब्भत्थे लोयधम्मे परिणए एगन्तेण निप्फन्ने पोरुसे पइट्ठिए वंसंमि जाणिए लोयसारे परिणए वयंमि अवगएहिं उवद्दवेहिं गुणभायणीकए अप्पाणे जुत्तं विसुद्धधम्मासेवणं। ता सोहणमणुचिट्ठियं कुमारेण। एवमेव भवओ परिणामसुन्दरं भविस्सइ॥ एत्थन्तरंमि कच्छन्तरगएण हरिसविसेसओ महया सद्देण जंपियं सिद्धत्थपुरोहिएण। भो अलं संदेहेण, अवस्समेव भविस्सइ। अणन्तरं च विय-

परम्परां मुक्त्वाऽन्यादृशः परिणामः। अतोऽवश्यमेव कर्तव्यमेतत् कुमारेण। तत एतदाकर्ण्य 'अहो शोभनतरा वाणी' इति हर्षितमनसा जल्पितं कुमारेण। तात! यद् यूयमाज्ञापयत। एवं श्रुत्वा हर्षितो राजा। भणितं च तेन। साधु वत्स! साधु, उचितस्ते विवेकः, शोभना गुरुभक्तिः, भाजनं त्वं कल्याणानाम्। अन्यच्च, जानाम्यहं भवतो विशुद्धधर्मपक्षपातम्, युक्तश्चैष सताम्। असारः संसारः, निदानं निर्वेदस्य, तथापि कुशलेनानुवर्तितव्यो लोकधर्मः, कर्तव्या कुशलसन्ततिः, यतितव्यं परोपकारे, अनुवर्तितव्यः कुलक्रमः। एवं चाभ्यस्ते लोकधर्मे परिणते एकान्तेन निष्पन्ने पौरुषे प्रतिष्ठिते वंशे ज्ञाते लोकसारे परिणते वयसि अपगतैरुपद्रवैर्गुणभाजनीकृते आत्मनि युक्तं विशुद्धधर्मासेवनम्। ततः शोभनमनुष्ठितं कुमारेण। एवमेव भवतः परिणामसुन्दरं भविष्यति। अत्रान्तरे कक्षान्तरगतेन हर्षविशेषतो महता शब्देन जल्पितं सिद्धार्थपुरोहितेन। भो अलं संदेहेन, अवश्यमेव भविष्यति। अनन्तरं च विजृम्भितो मङ्गलतूर्यशब्दः, गुलुगुलितं मत्तहस्तिना

---

[1] सयणाण पा. ज्ञा.।

म्भिओ मङ्गलतूरसद्दो, गुलुगुलियं मत्तहत्थिणा, उग्घुट्ठो जयजयारवो बन्दिलोएण। 'अणुगूलो सउणसंघाओ' त्ति हरिसिओ राया। भणियं च णेण। कुमार, अवस्समेव एयं एवं हविस्सइ, अणुगूलो सउणसंघाओ। अन्नं च, विसुद्धधम्मो विय कारणं चेव तुमं परमसुन्दराण। गहियसउणत्थो हरिसिओ कुमारो। भणियं च णेण। नत्थि तायासीसाणमसज्झं। एत्थन्तरंमि पढियं कालनिवेयएण।

निण्णासिऊण तिमिरं मोहं च जणस्स संपयं सूरो। नहमज्झत्थो चेट्ठाए[१] धम्मकिरियं पवत्तेइ ॥
मज्जन्ति जणा केई देवाण करेन्ति केइ पूयाओ। दाणाइ देन्ति केई गुरुसुस्सूसापरा केई ॥
मोत्तूण झाणजोयं मुणओ वि जणस्सऽणुग्गहट्ठाए। पिण्डगहणत्थमन्नं जोयन्तरमो पवज्जन्ति ॥
इय नयरीए नराहिव जणसमुदाओ विसुद्धकिरियाए। तुह मणुयजम्मसारं परमं सूएइ कल्लाणं ॥

उद्घुष्टो जयजयारवो बन्दिलोकेन। 'अनुकूलः शकुनसंघातः' इति हर्षितो राजा। भणितं च तेन। कुमार! अवश्यमेवैतद् एवं भविष्यति, अनुकूलः शकुनसंघातः। अन्यच्च, विशुद्धधर्म इव कारणमेव त्वं परमसुन्दराणाम्। गृहीतशकुनार्थो हर्षितः कुमारः। भणितं च तेन। नास्ति तातशिषामसाध्यम्। अत्रान्तरे पठितं कालनिवेदकेन।

निर्नाश्य तिमिरं मोहं च जनस्य साम्प्रतं सूरः। नभोमध्यस्थश्चेष्टया धर्मक्रियां प्रवर्तयति ॥
मज्जन्ति जनाः केऽपि देवानां कुर्वन्ति केऽपि पूजाः। दानादि ददति केऽपि गुरुशुश्रूषापराः केऽपि ॥
मुक्त्वा ध्यानयोगं मुनयोऽपि जनस्यानुग्रहार्थम्। पिण्डग्रहणार्थमन्यद् योगान्तरं प्रपद्यन्ते ॥
इति नगर्यां नराधिप! जनसमुदायो विशुद्धक्रियया। तव मनुजजन्मसारं परमं सूचयति कल्याणम् ॥

---

[१] चेट्ठइ डे. ज्ञा.।

तओ एय[1]मायण्णिय 'अए कहं मज्झण्हसमओ'त्ति जंपियं राइणा। कुमार, संपाडेहि उचियकरणिज्जं। 'जं ताओ आणवेइ' त्ति पणमिऊण निग्गओ कुमारो। भणियं च राइणा। भो भो अमच्चा, करावेह तुब्भे समन्तओ कुमार[2]विद्धिसरिसं [3]वद्धावणाइ। अमच्चेहिं भणियं। जं देवो आणवेइ। पारद्धं च णेहिं, दवावियं महादाणं, कराविया नयरिसोहा, पूइयाओ देवयाओ, निवेइयं पउराण, सद्दावियाइं पायमूलाइं, दवाविया आणन्दभेरी, पूराविया हरिससङ्खा, विन्नत्तमन्तेउराण, समाहूया राइणो, निउत्ताइं पेच्छणयाइं। तओ थेववेलाए चेव पहट्ठपउरकलयलरवं पणच्चन्तेहिं पायमूलेहिं वज्जन्तपुण्णाहतूरं गम्भीरबन्दिमङ्गलरवेण पवत्तपिट्ठाययरयं सोहियं सिन्दूरधूलीए आउलं अन्तेउरेहिं मिलन्तरायलोयं महया विमद्देण विसेसियतियसलोयं जायं महावद्धावणयं। परिउट्ठो राया। गणाविओ वारेज्जदियहो। साहिओ जोइसिएहिं। देव, अज्जेव [4]पञ्चमीए सोहणो त्ति। राइणा भणियं। सुट्ठु [5]सोहणो। समाइट्ठा अमच्चा। करेह

तत एवमाकर्ण्य 'अरे कथं मध्याह्नसमयः' इति जल्पित राज्ञा। कुमार, संपादय उचितकरणीयम्। 'यत् तात आज्ञापयति' इति प्रणम्य निर्गतः कुमारः। भणितं च राज्ञा। भो भो अमात्याः! कारयत यूयं समन्ततः कुमारवृद्धिसदृशं वर्द्धापनादि। अमात्यैर्भणितम्। यद् देव आज्ञापयति। प्रारब्धं च तैः, दापितं महादानम्, कारिता नगरीशोभा, पूजिता देवताः, निवेदितं पौराणाम्, शब्दायितानि पात्रमूलानि, दापिताऽऽनन्दभेरी, पूरिता हर्षशङ्खाः, विज्ञप्तमन्तःपुराणाम्। समाहूता राजानः, नियुक्तानि प्रेक्षणकानि। ततः स्तोकवेलायामेव प्रहृष्टपौरकलकलरवं प्रनृत्यद्भिः पात्रमूलैर्वाद्यमानपुण्याहतूर्यं गम्भीरबन्दिमङ्गलरवेण प्रवृत्तपिष्टातकरजः शोभितं सिन्दूरधूल्याऽऽकुलमन्तःपुरैर्मिलद्राजलोकं महता विमर्देन विशेषितत्रिदशलोकं जातं महावर्धापनकम्। परितुष्टो राजा। गणितो विवाहदिवसः। कथितो ज्योतिषिकैः। देव, अद्यैव पञ्चम्यां शोभन इति। राज्ञा भणितम्। सुष्ठु शोभनः। समादिष्टा अमात्याः। कुरुत विवाहसंयात्रां कुमारस्य।

१-मायन्निउण जाओ कहं पा. ज्ञा.। २-रिद्धि-पा. ज्ञा.। ३ वद्धावणाइयं उचियकरणिज्जं पा. ज्ञा.। ४ पंचमी सोहणा डे. ज्ञा.। ५ सोहणा डे. ज्ञा.।

विवाहसंजत्तिं कुमारस्स। तेहिं भणियं। देव, धन्नो कुमारो, कया चेव संजत्ती। किमेत्थमवरं कायव्वं। तहावि जं देवो आणवेइ। आइट्ठो णेहिं भण्डारिओ। भद्द, रयणायर, निरूवेहि पहाण[1]मुहपन्तीओ, समप्पेहि देवीण, नीणेहि [2]नाणाहरणं, निउञ्जेहि दायए। तेण भणियं। जं अमच्चा आणवेन्ति, न एत्थ मे विलम्बो। भणिओ चेलभण्डारिओ। भद्द देवङ्गनिहि, [3]पयडेहि देवङ्गाइं, संपाडेहि परियणस्स, संजत्तेहि रायदेवीण जोग्गाइं, कारावेहि उल्लोयं। तेण भणियं। जं अमच्चा आणवेंति, सव्वं [4]सज्जमेयं। भणिओ महाउहवई। भद्द महामायलि, निरूवेहि महापहाणाउहाइं, समप्पेहि [5]नरकेसरीणं, नीणेहि रहवरे, निउञ्जेहि विविहसोहाए। तेण भणियं। जं अमच्चा आणवेन्ति, संपन्नमेवेयं। भणिओ महापीलुवई। भद्द गयचिन्तामणि, [6]पयडेहि वेयण्डे, संपाडेहि परियणस्स, संजत्तेहि वारुयाओ,करावेहि सव्वमुचियं। तेण भणियं।

तैर्भणितम्। देव! धन्यः कुमारः, कृतैव संयात्रा। किमत्रापरं कर्तव्यम्। तथापि यद् देव आज्ञापयति। आदिष्टस्तैर्भाण्डागारिकः। भद्र रत्नाकर! निरूपय प्रधानमुखपंक्तीः (प्रधानशुभसामग्रीः ?), समर्पय देवीनाम्, नय (निष्कासय) नानाभरणम्, नियुङ्क्ष्व दायकान्, तेन भणितम्। यदमात्या आज्ञापयन्ति, नात्र मे विलम्बः। भणितश्चेलभाण्डागारिकः। भद्र! देवाङ्गनिधे! प्रकटय देवदूष्यानि, संपादय परिजनस्य, संयात्रय राजदेवीनां योग्यानि, कारयोल्लोचम्। तेन भणितम्। यदमात्या आज्ञापयन्ति; सर्वं सज्जमेतत् भणितो महायुधपतिः। भद्र महामातले! निरूपय महाप्रधानायुधानि, समर्पय नरकेसरिणाम्, नय (निष्कासय) रथवरान्, नियुङ्क्ष्व विविधशोभया(सुभटानाम् ?)। तेन भणितम्। यदमात्या आज्ञापयन्ति, संपन्नमेवैतद्। भणितो महापिलुपतिः (महाहस्तिपकः)। भद्र गजचिन्तामणे! प्रकटय गजान्, संपादय परिजनस्य, संयात्रय वारुकाः (हस्तीनीः), कारय सर्वमुचितम्। तेन भणितम्। यदमात्या आज्ञापयन्ति, नात्र विक्षेपः

---

१ –सुहयत्तीओ पा. ज्ञा.। २ नाणाहरणाइं पा. ज्ञा.। ३ संजत्तेहि पा. ज्ञा.। ४ न एत्थ पमाओ अम्हाण पा. ज्ञा.। ५ णरकेसरिपमुहाण तलवग्गियाणं पा. ज्ञा. ६ कयलिया सज्जीकरिऊण पयट्टेहि पा. ज्ञा.।

जं अमच्चा आणवेन्ति, न एत्थ विक्खेवो। भणिओ महासवई। भद्द केकाणधूलि, [1]गच्छ निरूवेहि वन्दुराओ, भूसेहि [2]तुरए, पेसेहि उचियाण, ठावेहि [3]नरिन्दगोयरे। तेण भणियं। जं अमच्चा आणवेन्ति, सिद्धमेवेयं॥ एवं च आएससमणन्तरं जाव एयं संपज्जइ, ताव अवरेहि महया रिद्धिसमुदएण वहुयाजन्नावासे संपाडियं उचियकरणिज्जं, निव्वत्तिओ महाउल्लोवो, ऊसियाइं मणितोरणाइं, निबद्धा कञ्चणधया, ठविया कणयवेई, कया कञ्चणमङ्गलकलसा, संजोइयं ण्हवणयं, पउत्तो कुलविही, ण्हावियाओ वहुयाओ, पूयावियाओ मयणं, करावियाओ [4]रतिं, भूसावियाओ मणहरं॥ एत्थन्तरंमि 'आसन्नं पसत्थं लग्गं'ति पहाणजोइसियवयणाओ संपाडियसयलकुलविही पूजिऊण कुलदेवयाओ वन्दिऊण गुरुयणं संमाणिऊण मित्ते पेच्छिऊण मङ्गलाणि विवाहगमणनिमित्तं समं असोयाईहिं समारूढो रहवरं कुमारो। उट्ठिओ आणन्दकलयलो, पहयाइं मङ्गलतूराइं, पणच्चियाओ वारविलासिणीओ, पगाइयाइं मङ्गलमन्तेउराइं, चलिया

(विलम्बः,)। भणितो महाश्वपतिः, भद्र केकाणधूले! (अश्वचूडामणे ?) गच्छ, निरूपय मन्दुराः (वाजिशालाः) भूषय तुरगान्, प्रेषयोचितानाम्, स्थापय नरेन्द्रगोचरान्। तेन भणितम्। यदमात्या आज्ञापयन्ति, सिद्धमेवैतद्। एवं चादेशसमनन्तरं यावदेतत् संपद्यते, तावदपरैर्महता ऋद्धिसमुदयेन वधुकाजन्यावासे संपादितमुचितकरणीयम्। निर्वर्त्तितो महोल्लोचः, उत्सितानि(बद्धानि) मणितोरणानि, निबद्धाः काञ्चनध्वजाः, स्थापिता कनकवेदिः, कृताः काञ्चनमङ्गलकलशाः, संयोजितं स्नपनकम्, प्रयुक्तः कुलविधिः, स्नपिते वधुके, पूजिते मदनम्, कारिते रतिम्, भूषिते मनोहरम्॥ अत्रान्तरे 'आसन्नं प्रशस्तं लग्नम्'इति प्रधानज्योतिषिकवचनाद् संपादितसकलकुलविधिः पूजयित्वा कुलदेवता वन्दित्वा गुरुजनं सन्मान्य मित्राणि प्रेक्ष्य मङ्गलानि विवाहगमननिमित्तं सममशोकादिभिः समारूढो रथवरं कुमारः। उत्थित आनन्दकलकलः, प्रहतानि मङ्गलतूर्याणि, प्रनर्त्तिता वारविलासिन्यः. प्रगीतानि मङ्गलमन्तःपुराणि, चलिता महाराजाः, प्रविजृम्भितो भुजङ्गलोकः,

---

[1] गच्छाहि पा. ज्ञा.। [2] पहाणतुरयसाहणं पा. ज्ञा. [3] नरिन्दगोयरभूमिए पा. ज्ञा.। [4] तस्स संनिहियरइं पा. ज्ञा.

महारायाणो, पवियम्भिओ भुयङ्गलोओ, आणन्दिया नयरी, हरिसिओ राया। तओ महया विमद्देण संवेगभावियमई चिन्तयन्तो भवसरूवं थुव्वमाणो बन्दीहिं पसंसिज्जमाणो लोएण पत्तो विवाहभवणं, [1]ओइण्णो रहवराओ, संपाडिओ से विही, कयमणेणोचियं। दिट्ठाओ वहूओ अइसुन्दराओ रूवेण। तत्थ बिब्भमवई कणयावदाया, कामलया उण सामला, सिणिद्धदंसणाओ य दो वि नियवण्णेहिं। विब्भमवई गयदन्तमई विय धीउल्लिया कुङ्कुमकयङ्गराया अच्चन्तं विरायए, कामलया उण धोइन्दणीलमणिमई विय सरसहरियन्दणविलेवण त्ति। ताओ य दट्ठूण चिन्तियं कुमारेण। अहो एयासिं कल्लाणा आगिई, पसत्थाइं अङ्गाइं, निक्कलङ्कं लायण्णं, विसुद्धो आभोओ, उवसन्ता मुत्ती, सुन्दराइं लक्खणाइं, अणहा धीरया, उचिओ विणयमग्गो; अओ भवियव्वमेयाहिं पत्तभूयाहिं॥ एत्थन्तरंमि वत्तो हत्थग्गहो, जालिओ अग्गी, कयं जहोचियं, भमियाइं मण्डलाइं, संपाडिया जणोवयारा, दिन्नं महादाणं, घोसिया वरवरिया, वत्तो

आनन्दिता नगरी, हर्षितो राजा। ततो महता विमर्देन संवेगभावितमतिश्चिन्तयन् भवस्वरूपं स्तूयमानो बन्दिभिः प्रशस्यमानो लोकेन प्राप्तो विवाहभवनम्, अवतीर्णो रथवरात्. संपादितस्तस्य विधिः, कृतमनेनोचितम्। दृष्टे वध्वौ अतिसुन्दरे रूपेण। तत्र विभ्रमवती कनकावदाता, कामलता पुनः श्यामला, स्निग्धदर्शने च द्वे अपि निजवर्णैः। विभ्रमवती गजदन्तमयीव [2]पुत्रिका कुङ्कुमकृताङ्गरागाऽत्यन्तं विराजते, कामलता पुनर्धौतेन्द्रनीलमणिमयीव सरसहरिचन्दनविलेपनेति। ते च दृष्ट्वा चिन्तितं कुमारेण। अहो एतयोः कल्याणाऽऽकृतिः, प्रशस्तान्यङ्गानि, निष्कलङ्कं लावण्यम्, विशुद्ध आभोगः, उपशान्ता मूर्तिः, सुन्दराणि लक्षणानि, अनघा धीरता, उचितो विनयमार्गः, अतो भवितव्यमेताभ्यां पात्रभूताभ्याम्॥ अत्रान्तरे वृत्तो हस्तग्रहः, ज्वालितोऽग्निः, कृतं यथोचितम्, भ्रान्तानि मण्डलानि, संपादिता जनोपचाराः, दत्तं महादानम्, घोषिता वरवरिका, वृत्तो विवाहयज्ञ., संपादिता शरीरस्थितिः। परिणतो वासरः, शीतलीभूतं रविबिम्बम्,

---

१ उइन्नो पा. ज्ञा. । २ धीउल्लिया (दे.) पुत्तलिका ।

विवाहजन्नो, संपाडिया सरीरट्ठिई। परिणओ वासरो, सीयलीहूयं रविबिम्बं, संहरिओ किरणनियरो, समागया संझा, कणयरसरञ्जिय पिव जायं नहङ्गणं, वियम्भिया पुव्वदिसा; समुग्गओ चन्दो, उल्लसिया नहसिरी, [1]उवारूढो पओसो ॥

एत्थन्तरंमि समं असोयाईहिं विरायन्तमणिपदीवं संगयं कुसुमोवयारेण सेवियं भमरावलीए पलम्बमाणचम्पयदामं वासियं पडवासेहिं संगयं पवर[2]सयणीएण वियम्भमाणसुरहिधूवं वि[3]हूसियं सपरिवाराहिं वहूहिं वासभवण[4]मइयओ कुमारो। ससंभमाहिं अब्भुट्ठिओ वहूहिं। निसण्णो सयणीए। जहारुहं च निसण्णा असोयाई वयंसया। उवविट्ठा [5]ससयपोट्टसन्निहे चित्तावडिमसूरयंमि विब्भमवई कामलया य। कुन्दलयामाणिणीपमुहो तेसिं [6]सहियणो जहारुहं। नवरं विब्भमवईए कुन्दलया कामलयाए य माणिणी सन्निहाणे उवविट्ठाओ। इङ्गियागारकुसलाहिं मुणियकालकायव्वयाहिं उवणीयमेयाहिं कुमारस्स तम्बोलं, समप्पिया य कुन्दलयाए वउल[7]कुसुममाला।

संहृतः किरणनिकरः, समागता सन्ध्या, कनकरसरञ्जितमिव जातं नभोङ्गणम्, विजृम्भिता पूर्वदिक्, समुद्गतश्चन्द्रः, उल्लसिता नभःश्रीः, उपारूढः प्रदोषः ॥

अत्रान्तरे सममशोकादिभिर्विराजद्मणिप्रदीपं संगतं कुसुमोपचारेण सेवितं भ्रमरावल्या, प्रलम्बमानचम्पकदाम वासितं पटवासैः संगतं प्रवरशयनीयेन विजृम्भमाणसुरभिधूपं विभूषितं सपरिवाराभ्यां वधूभ्यां वासभवनं गतः कुमारः। ससंभ्रमाभ्यामभ्युत्थितो वधूभ्याम्। निषण्णः शयनीये। यथार्हं च निषण्णा अशोकादयो वयस्याः। उपविष्टा शशकोदरसन्निभे चित्रपटीमसूरके विभ्रमवती कामलता च। कुन्दलतामानिनीप्रमुखस्तयोः सखीजनो यथार्हम्। नवरं विभ्रमवत्याः कुन्दलता कामलतायाश्च मानिनी सन्निधाने उपविष्टे। इङ्गिताकारकुशलाभ्यां

---

[1] उदयमारूढो पा. ज्ञा.। [2]-सयणीएहिं डे. ज्ञा.। [3] विहुसिअं डे. ज्ञा.। [4]-मइगओ पा. ज्ञा.। [5] सयपोट्ट-डे. ज्ञा.। [6] सहियणो पा. ज्ञा.। [7]-कुसुम(मा)ण मुंडमाला पा. ज्ञा.।

भणियं च णाए। कुमार, अच्चन्ताणुरायओ सहत्थगुत्था खु एसा तुह पिययमाए त्ति। भणिऊण समप्पिया कुमारस्स। पडिच्छिया य तेणं। माणिणीए वि उवणीयं माहवीकुसुमदामं। भणियं च णाए। कुमार, एयं पि एवं चेव; ता निहेउ एयाइं जहाजोयं कुमारो, करेउ एयासिं सफलमणुरायं ति। कुमारेण भणियं। भोईओ, ममोवरि एयासिमणुराओ त्ति चिन्तियव्वं। कुन्दलयाए भणियं। चिन्तियमिणं ति। [1]सुणेउ कुमारो। [2]जयप्पभीइमेव बन्दिणा समुग्घोसिज्जमाणं सुयं कुमारनामयं रायधूयाहिं, [3]तयप्पभीइमेव गहियाओ पमोएण विसाएण य थुणन्ति रायकन्नयाजम्मं निन्दन्ति य, अब्भसन्ति कलाकलावं [4]चयन्ति य, कुणन्ति कुमारसं[5]कहं न कुणन्ति य[6], झिज्जन्ति देहेण, व[7]ड्ढन्ति विब्भमेहिं, मुच्चन्ति लज्जाए, घेप्पन्ति उव्वेवएण। एयं च पेच्छिऊण 'किमेयं' ति विसण्णो राया। निउण-

ज्ञातकालकर्तव्याभ्यामुपनीतमेताभ्यां कुमारस्य ताम्बूलम्, समर्पिता च कुन्दलतया वकुलकुसुममाला। भणितं च तया। कुमार! अत्यन्तानुरागतः स्वहस्तग्रथिता खल्वेषा तव प्रियतमयेति। भणित्वा समर्पिता कुमारस्य। प्रतीप्सिता च तेन। मानिन्याऽपि उपनीतं माधवीकुसुमदाम। भणितं च तया। कुमार! एतदप्येवमेव, ततो निदधातु एते यथायोगं कुमारः, करोत्वेतयोः सफलमनुरागमिति। कुमारेण भणितम्। भवत्यौ! ममोपर्येतयोरनुराग इति चिन्तयितव्यम्। कुन्दलतया भणितम्। चिन्तितमिदमिति। शृणोतु कुमारः। यत्प्रभृत्येव बन्दिना समुद्घोष्यमाणं श्रुतं कुमारनामकं राजदुहितृभ्यां तत्प्रभृत्येव गृहीते प्रमोदेन विषादेन च स्तुतो राजकन्यकाजन्म निन्दतश्च, अभ्यस्यतः कलाकलापं त्यजतश्च, कुरुतः कुमारसंकथां न कुरुतश्च, क्षीयेते देहेन, वर्धेते विभ्रमैः, मुच्येते लज्जया, गृह्येते उद्वेगेन। एतच्च प्रेक्ष्य 'किमेतद्' इति विषण्णो राजा। निपुणसखीजनाच्च निश्रुत एष व्यतिकरः। ततः 'स्थानेऽभिलाषः' इति हर्षनिर्भरेण प्रेषिते

---

१ सुणाउ पा. ज्ञा.। २ जयप्पहुइ–पा. ज्ञा. जयप्पहूइ–डे. ज्ञा.। ३ तप्पहूइ–डे. ज्ञा. तप्पभुइ– पा. ज्ञा.। ४ चयंति अन्नाओ संकहाओ पा. ज्ञा.। ५ –संकहं अणवरायं पा. ज्ञा.। ६ कुमारकहं सहियणमज्झे लज्जाइसएण य पा. ज्ञा.। ७ वट्टंति डे. ज्ञा.।

सहियायणाओ य निसुओ एस वइयरो। तओ ‘थाणे अहिलासो’ त्ति हरिसनिब्भरेण पेसियाओ इहं। आगच्छमाणीओ य ‘संपन्नमम्हाण समीहियब्भहियं’ ति मयण[1]गोयरादीयवियारसुहसमेयाओ पवड्ढमाणेण सुहाइसएण इह संपत्ताओ त्ति। चिन्तियं च एयासिमणुरायमन्तरेण। कुमारेण चिन्तियं। हन्त अत्थि एयासिं ममोवरिमणुराओ, अणुरत्ता य पाणिणो आयइं न गणेन्ति, आयण्णन्ति [2]वेयणं, गेण्हन्ति निव्वियप्पं, पयट्टन्ति भावेण, संपाडेन्ति किरियाए। ता इमं एत्थ पत्तयालं। करेमि एयासिं धम्मदेसणं ति। चिन्तिऊण जंपियं कुमारेण। भोईओ, किमेवमेयं, अत्थि तुम्हाण ममोवरि अणुराओ त्ति। एयमायण्णिऊण हरिसविसायसारं ‘हन्त किमेयमतिगम्भीरं मन्तियं’ति चिन्तिऊण वामचलणङ्गुट्ठयालिहियमणिकोट्टिमं सविसेसबन्धुराहिं न जंपियमिमीहिं। कुन्दलयाए भणियं। कुमार, अभणमाणीहिं पि वायाए साहियमिमीहिं कुमारस्स अहिप्पेयमिमिणा संभमेण; दिव्वबुद्धीए अवहारेउ कुमारो। कुमारेण भणियं।

इह। आगच्छन्त्यौ च ‘संपन्नमावयोः समीहिताभ्यधिकम्’ इति मदनगोचरादिकविकारसुखसमेते प्रवर्धमानेन सुखातिशयेनेह संप्राप्ते इति। चिन्तितं चैतयोरनुरागस्यान्तरेण। कुमारेण चिन्तितम्। हन्त अस्त्येतयोर्ममोपर्यनुरागः, अनुरक्ताश्च प्राणिन आयतिं न गणयन्ति, आकर्णयन्ति वचनम्, गृह्णन्ति निर्विकल्पम्, प्रवर्तन्ते भावेन, संपादयन्ति क्रियया। तत इदमत्र प्राप्तकालम्। करोम्येतयोर्धर्मदेशनामिति। चिन्तयित्वा जल्पितं कुमारेण। भवत्यौ! किमेवमेतद्, अस्ति युवयोर्ममोपर्यनुराग इति। एतदाकर्ण्य हर्षविषादसारं ‘हन्त किमेतदतिगम्भीरं मन्त्रितम्’ इति चिन्तयित्वा वामचरणाङ्गुष्ठलिखितमणिकुट्टिमं सविशेषबन्धुराभ्यां न जल्पितमाभ्याम्। कुन्दलतया भणितम्। कुमार! अभणन्तीभ्यामपि वाचा कथितमाभ्यां कुमारस्याभिप्रेतमनेन संभ्रमेण, दिव्यबुद्ध्याऽवधारयतु कुमारः। कुमारेण भणितम्।

---

१ –गोयरिगयाओ पा. ज्ञा.। २ नो वयणं डे. ज्ञा.

भोईओ, जइ एवं, ता सुणेह। जस्स जं पइ अहियपवत्तणिच्छा, तस्स तं पइ कीइसो अणुराओ त्ति। माणिणीए भणियं। कुमार, कहमियमहियं ति नावगच्छामि। कुमारेण भणियं। भोइ, सुण एत्थ नायं।

अत्थि कामरूवविसए मयणउरं नाम नयरं। तत्थ [1]पज्जुन्नाहिहाणो रायां। रई नाम से भारिया। ताणं च विसयसुहमणुहवन्ताण अइक्कन्तो कोइ कालो। अन्नया य गओ राया आसवाहणियाए। रईए य [2]विइत्तनिज्जूहट्ठियाए दिसावलोयणसमयंमि दिट्ठो रायमग्गवत्ती देवयाय[3]यणपत्थिओ विमलमइसत्थवाहपुत्तो सुहंकरो नाम सेट्ठी[4] जुवाणओ त्ति। तं च दट्ठूण अविवेयसामत्थओ अब्भत्थयाए गामधम्माण समुप्पन्नो तीए तस्सोवरि अहिलासो। पुलइओ सविब्भमं। एसा वि य समागया तस्स दिट्ठिगोयरं, मोहदोसेण निरूविया, अज्झोववन्नो तीए। अहो चित्तन्नुओ त्ति परिउट्ठा रई। ठिओ सो एगदेसे मोहदोसेण, दुन्निवारणीओ मयणपसरो त्ति। 'हला,

भवत्यौ! यद्येवं ततः श्रृणुतम्। यस्य यं प्रत्यहितप्रवर्तनेच्छा तस्य तं प्रति कीदृशोऽनुराग इति। मानिन्या भणितम्। कुमार! कथमिदमहितमिति नावगच्छामि। कुमारेण भणितम्। भवति! श्रृण्वत्र ज्ञातम्।

अस्ति कामरूपविषये मदनपुरं नाम नगरम्। तत्र प्रद्युम्नाभिधानो राजा। रतिर्नाम तस्य भार्या। तयोश्च विषयसुखमनुभवतोरतिक्रान्तः कोऽपि कालः। अन्यदा च गतो राजाऽश्ववाहनिकया। रत्या च विचित्रनिर्यूहस्थितया दिगवलोकनसमये दृष्टो राजमार्गवर्ती देवतायतनप्रस्थितो विमलमतिसार्थवाहपुत्रः शुभंकरो नाम श्रेष्ठी युवेति। तं च दृष्ट्वाऽविवेकसामर्थ्यतोऽभ्यस्ततया ग्राम्यधर्माणां समुत्पन्नस्तस्यास्तस्योपर्यभिलाषः। दृष्टः सविभ्रमम्। एषाऽपि च समागता तस्य दृष्टिगोचरम्। मोहदोषेण निरूपिता, अध्युपपन्नस्तस्याम्। 'अहो चित्तज्ञः' इति परितुष्टा रतिः। स्थितः स एकदेशे मोहदोषेण, दुर्निवारणीयो मदनप्रसर इति। 'हला (सखि!) आनयैतं युवतिजनमनः-

---

[1] पज्जुन्नो नाम पा. ज्ञा.। [2] विचित्त निज्जूहय-पा. ज्ञा.। [3] -यतण पा. ज्ञा.। [4] सेट्ठिजुवा-

आणेहि एयं [1]जुवइजणमणसुहं जुवाणयं’ति भणिऊण पेसिया रईए [2]अभिन्नरहस्सा जालिणी नाम चेडी। ‘सुबुज्झाव(वि)याणि एत्थ वइयरे कामिहिययाइं’ ति पयारिऊणमाणिओ य णाए, पेसिओ [3]वासहरे, उववि‌ट्ठो पल्लङ्के। पणामियं से रईए तम्बोलं, अद्धगहियमणेण। एत्थन्तरंमि सुओ बन्दिकलयलो। ‘समागओ राय’ त्ति भीया रई। ‘न एत्थ अन्नो उवाओ’ त्ति पेसिओ वच्चहरए। पविट्ठो राया, उवविट्ठो पल्लङ्के, ठिओ कंचि वेलं। भणियं च णेण। अरे सद्दावेह [5]वारियं, पविसामो [6]पावक्खालयं ति। [7]सद्दिओ वारिओ। सुयमिणं सुहंकरेण। ‘नियमओ वावाइज्जामि’ त्ति अच्चन्तभीएण जीवियाभिलासिणा अगाहे वच्चकूवे [8]निच्चन्धयारंमि अच्चन्तदुरहिगन्धे निवासे किमिउलाण पवाहिओ अप्पा। निवडिओ वच्चहरयाओ [9]कण्ठए, भरिओ असुइएण, [10]विंधिओ किमीहिं, निरुद्धो दिट्ठिपसरो, [11]संकोडियं

सुखं युवानम्’ इति भणित्वा प्रेषिता रत्याऽभिन्नरहस्या जालिनी नाम चेटी। ‘सुबोधितानि अत्र व्यतिकरे कामिहृदयानि’इति प्रतार्यानीतश्चानया, प्रेषितो वासगृहे, उपविष्टः पल्यङ्के। अर्पितं तस्य रत्या ताम्बूलम्, अर्धगृहीतमनेन। अत्रान्तरे श्रुतो बन्दिकलकलः। ‘समागतो राजा’ इति भीता रतिः। ‘नात्रान्य उपायः’ इति प्रेषितो वर्चोगृहे। प्रविष्टो राजा, उपविष्टः पल्यङ्के, स्थितः काञ्चिद् वेलाम्। भणितं चानेन। अरे शब्दाययत नापितम्। प्रविशामः पायुक्षालकमिति। शब्दायितो नापितः। श्रुतमिदं शुभंकरेण। ‘नियमतो व्यापाद्ये’ इति अत्यन्तभीतेन जीविताभिलाषिणा अगाधे वर्चःकूपे नित्यान्धकारेऽत्यन्तदुरभिगन्धे निवासे कृमिकुलानां प्रवाहित आत्मा। निपतितो वर्चोगृहात् कण्ठके, भृतोऽशुचिना, विद्धः कृमिभिः; निरुद्धो दृष्टिप्रसरः, संकोटितमङ्गम्, उदीर्णा वेदना, आकुलीभूतो दृढम्, गृहीतः

---

[1] जुवइजणमणणिरिक्खणं पा. ज्ञा.। [2] भिन्न–डे. ज्ञा. पा. ज्ञा.। [3] वासहरं डे. ज्ञा.। [4] हरे पा. ज्ञा.। [5] वारियंमियं डे. ज्ञा.। [6] सरीरठिइएत्ति पा. ज्ञा.। [7] सद्दाविओ पा. ज्ञा.। [8] निरंधयारंमि डे. ज्ञा. निरयसमंधयारंमि पा. ज्ञा.। [9] केणुए पा. ज्ञा. [10] धाविओ पा. ज्ञा. पाविओ मु. [11] संकडिअं डे. ज्ञा.।

अङ्गं, उइण्णा वेयणा, आउलीहूओ दढं, गहिओ संमोहेण। इओ य सो राया पच्चुवेक्खियं अङ्गरक्खेहिं पविट्ठो वच्चहरयं। कया सरीरट्ठिई। निग्गओ वच्चहराओ, ठिओ रईए सह चिंत्तविणोएण। अइक्कन्तो वासरो। ठिओ अत्थाइयाए। एत्थन्तरंमि निरूवाविओ सुहंकरो रईए। [2]न दिट्ठो य तहियं। भणियं च णाए। हला जालिणि, [3]कहं पुण सो भविस्सइ। तीए भणियं। देवि, भयाहिहूओ नूणं पवाहिऊण अप्पाणयं वच्चकूवे मओ भविस्सइ। रईए भणियं। एवमेयं, कहमन्नहा अदंसणं ति। अवगया तच्चिन्ता। इओ य सो सुहंकरो तंमि वच्चकूवे तहादुक्खपीडिओ भवियव्वयानिओएण विइत्तकम्मवसवत्ती असुचिरसपाणभोयणो गमिऊण कंचि कालं विसोहणनिमित्तं फोडिए वच्चहरए असुइनिग्गमणमग्गेण वावन्नदेहच्छवी पणट्ठनहरोमो निग्गओ रयणीए। पक्खालिओ कहंचि अप्पा। महया परिकिलेसेणं गओ निययभवणं। 'को एसो अमाणुसो' त्ति भीओ से परियणो। भणियं सुहंकरेण। मा बीहेह, सुहंकरो अहं। विमल-

संमोहेन। इतश्च स राजा प्रत्युपेक्षितं (शोधितं) अङ्गरक्षकैः प्रविष्टो वर्चोगृहम्। कृता शरीरस्थितिः। निर्गतो वर्चोगृहात्, स्थितो रत्या सह चित्रविनोदेन। अतिक्रान्तो वासरः। स्थित आस्थानिकायाम्। अत्रान्तरे निरूपितः शुभंकरो रत्या। न दृष्टश्च तत्र। भणितं च तया। हला जालिनि! कथं पुनः स भविष्यति। तया भणितम्। देवि! भयाभिभूतो नूनं प्रवाह्यात्मानं वर्चःकूपे मृतो भविष्यति। रत्या भणितम्। एवमेतत्, कथमन्यथाऽदर्शनमिति। अपगता तच्चिन्ता। इतश्च स शुभंकरस्तस्मिन् वर्चःकूपे तथादुःखपीडितो भवितव्यतानियोगेन विचित्रकर्मवशवर्ती अशुचिरसपानभोजनो गमयित्वा कंचित् कालं विशोधननिमित्तं स्फोटिते वर्चोगृहेऽशुचिनिर्गमनमार्गेण व्यापन्नदेहच्छविः प्रनष्टनखरोमा निर्गतो रजन्याम्। प्रक्षालितः कथंचिदात्मा। महता परिक्लेशेन गतो निजभवनम्। 'क एषोऽमानुषः' इति भीतस्तस्य परिजनः। भणितं शुभंकरेण। मा विभीत, शुभंकरोऽहम्। विमलमतिना भणितम्। पुत्र! किं त्वया कृतम्, येनेदृशो

---

१ विचित्त डे. ज्ञा. २ न वि डे. ज्ञा. ३ कहिं डे. ज्ञा. पा. ज्ञा.

मइणा भणियं। पुत्त, किं तए कयं, जेण ईइसो जाओ; किं वा तुज्झ विमोक्खणं कीरउ। सुहंकरेण भणियं। ताय, अलं मज्झ मरणासङ्काए। सो च्चेव अहं। तं च कयं, जेण ईइसो जाओ म्हि; तं साहेमि मन्दभग्गो तायस्स। किं तु विवित्तमाइसउ ताओ। अवगओ परियणो। 'न एत्थ अन्नो उवाओ, जहट्ठियमेव साहेमि'त्ति चिन्तिऊण साहियमणेण ([1]पवेसाइनिग्गमणपज्जवसाणं निययवुत्तन्तं)। 'अहो अकज्जासेवणसंकप्पफलं' ति संविग्गो से पिया। पेसिओ णेण गेहं। कओ निवायथामे, संतप्पिओ सहस्सपागाईहिं, कालपरियाएण समागओ पुव्वावत्थं। उचियसमएण पयट्टो देवयाययणं, ओइण्णो रायमग्गे, दिट्ठो रईए। तहेव सामपुव्वयं पेसिया से जालिणी। मोहदोसेण समागओ सुहंकरो। आगयमेत्ते य समागओ राया। तहेव जायाइं वच्चकूवे पडणनिग्गमणाइं। पुणो पउणो पुणो दिट्ठो, पुणो पेसिया पुणो वि हम्मिओ। एवं पुणो बहुसो त्ति ॥

जातः, किं वा तव विमोक्षणं क्रियताम्। शुभंकरेण भणितम्। तात! अलं मम मरणाशङ्कया। स एवाहम्। तच्च कृतं येनेदृशो जातोऽस्मि, तत् कथयामि मन्दभाग्यस्तातस्य, किन्तु विविक्तमादिशतु तातः। अपगतः परिजनः। 'नात्रान्य उपायः, यथास्थितमेव कथयामि' इति चिन्तयित्वा कथितोऽनेन (प्रवेशादिनिर्गमनपर्यवसानो निजवृत्तान्तः)। 'अहो अकार्यासेवनसंकल्पफलम्' इति संविग्नस्तस्य पिता। प्रेषितस्तेन गेहम्। कृतो निवातस्थाने, संतर्पितः सहस्रपाकादिभिः, कालपर्यायेण समागतः पूर्वावस्थाम्। उचितसमयेन प्रवृत्तो देवतायतनम्, अवतीर्णो राजमार्गे, दृष्टो रत्या। तथैव सामपूर्वकं प्रेषिता तस्य जालिनी। मोहदोषेण समागतः शुभंकरः। आगतमात्रे च समागतो राजा। तथैव जातानि वर्चःकूपे पतननिर्गमनानि। पुनः प्रगुणः पुनः दृष्टः, पुनः प्रेषिता, पुनरपि गतः। एवं पुनर्बहुश इति।

---

१ अयं कोष्ठान्तर्गतः पाठो नास्ति पा. ज्ञा.।

तओ पुच्छामि तुब्भे, किं तीए रईए तंमि सुहंकरे अणुराओ अत्थि किं वा नत्थि त्ति । माणिणीए भणियं। कुमार, परमत्थओ नत्थि । बुद्धिरहिया य सा रई; जेण न निरूवेइ वत्थुं, न निहालए नियभावं, न पेच्छए सपरतन्तयं, न चिन्तेइ तस्सायइं ति । कुमारेण भणियं । भोइ, जइ एवं, ता ममंमि वि नत्थि एयासिमणुराओ, बुद्धिरहियाओ य एयाओ । जेण असुंदरे पयईए निवन्धणे इस्साईणं चञ्चले सरूवेण इच्छन्ति तुच्छभोए त्ति; अओ न निरूवेन्ति वत्थुं । तहा सव्वुत्तमं माणुसत्तं दुल्लहं भवसमुद्दे पसाहणं नेव्वाणस्स न निउञ्जेन्ति धम्मे त्ति; अओ न निहालेन्ति नियभावं । तहा भुवणडामरो मच्चू अइकूरो पयईए, गोयरे तस्स एयाओ न चिन्तयन्ति अत्तयं[१] ति; अओ न पेच्छन्ति सपरतन्तयं। तहाऽसुन्दरं विसयविसं अइमोहणं जीवाणं हेऊ गब्भनिरयस्स, निउञ्जन्ति मं तत्थ त्ति; अओ न चिन्तेन्ति मज्झायइं । ता एवं ववत्थिए अहियपवत्तणेण भण कहं एयासिं परमत्थओ ममोवरि अणुराओ त्ति । एयमा-

ततः पृच्छामि युवाम्, किं तस्या रत्यास्तस्मिन् शुभंकरेऽनुरागोऽस्ति किं वा नास्तीति । मानिन्या भणितम्। कुमार ! परमार्थतो नास्ति । बुद्धिरहिता च सा रतिः, येन न निरूपयति वस्तु, न निभालयति निजभावम्, न प्रेक्षते स्वपरतन्त्रताम्, न चिन्तयति तस्यायतिमिति । कुमारेण भणितम् । भवति ! यद्येवम्, ततो मय्यपि नास्त्येतयोरनुरागः, बुद्धिरहिते चैते । येनासुन्दरान् प्रकृत्या निवन्धनानीर्ष्यादीनां चञ्चलान् स्वरूपेणेच्छतस्तुच्छभोगानिति, अतो न निरूपयतो वस्तु । तथा सर्वोत्तमं मानुषत्वं दुर्लभं भवसमुद्रे प्रसाधनं निर्वाणस्य न नियोजयतो धर्मे इति, अतो न निभालयतो निजभावम् । तथा भुवनडमरो(–भयंकरो) मृत्युरतिक्रूरः प्रकृत्या, गोचरे तस्यैते न चिन्तयत आत्मानमिति, अतो न पश्यति स्वपरतन्त्रताम् । तथाऽसुन्दरं विषयविषमतिमोहनं जीवानां हेतुर्गर्भनिरयस्य, नियोजयतो मां तत्रेति, अतो न चिन्तयतो ममायतिम् । तत एवं व्यवस्थिते अहितप्रवर्तनेन भण कथमेतयोः परमार्थतो ममोपर्यनुराग इति । एतदाकर्ण्य संविग्ने

---

[१] तयं तिं डे. ज्ञा. ।

यण्णिऊण संविग्गाओ वहूओ, जाया विसुद्धभावणा, खविओ कम्मरासी, पावियं देसचरणं। तओ सद्धाइसएण सवहुमाणं पणमिऊण कुमारचलणजुयलं जंपियमिमीहिं। अज्जउत्त, एवमेयं, न एत्थ किंचि अन्नारिसं। विब्भमवईए भणियं। अज्जउत्त, मम [1]उण इमं सोऊण अवगओ विय मोहो, समुप्पन्नमिव सम्मं नाणं, नियत्तो विय विसयराओ, संजायमिव भवभयं ति। कामलयाए भणियं। अज्जउत्त, ममावि सव्वमेयं तुल्लं। ता एवं ववत्थिए अङ्गीकयजणोचियं सरिसं नियाणुरायस्स आणवेउ अज्जउत्तो, जमम्हेहिं कायव्वं ति। कुमारेण भणियं। साहु भोईओ साहु, उचिओ विवेओ, सुलद्धं तुम्हाण मणुयत्तं, जेण ईइसी कुसलबुद्धि त्ति। ता इमं एत्थ जुत्तं। एए खु विसया मोहजणिया मोहहेयवो मोहसरूवा मोहाणुवन्धा, संकिलेसजणिया संकिलेसहेयवो संकिलेसरूवा संकिलेसाणुवन्ध त्ति परिच्चयह जावज्जीवं, छड्डेह मोहचेट्ठियाइं, अङ्गीकरेह पसमं, भावेह कुसलबुद्धिं, निरूवेह भववियारे, आलोचेह [2]चिंत्तेण, संतप्पेह गुरूणं, उज्जमेह

वध्वौ, जाता विशुद्धभावना, क्षपितः कर्मराशिः, प्राप्तं देशचरणम्। ततः श्रद्धातिशयेन सवहुमानं प्रणम्य कुमारचरणयुगलं जल्पितमाभ्याम्। आर्यपुत्र! एवमेतद्, नात्र किञ्चिदन्यादृशम्। विभ्रमवत्या भणितम्। आर्यपुत्र! मम पुनरिदं श्रुत्वाऽपगत इव मोहः, समुत्पन्नमिव सम्यग् ज्ञानम्, निवृत्त इव विषयरागः, संजातमिव भवभयमिति। कामलतया भणितम्। आर्यपुत्र! ममापि सर्वमेतत् तुल्यम्। तत एवं व्यवस्थितेऽङ्गीकृतजनोचितं सदृशं निजानुरागस्याज्ञापयत्वार्यपुत्रः, यदावाभ्यां कर्तव्यमिति। कुमारेण भणितम्। साधु भवत्यौ! साधु, उचितो विवेकः, सुलब्धं युवयोर्मनुजत्वम्, येनेदृशी कुशलबुद्धिरिति। तत इदमत्र युक्तम्। एते खलु विषया मोहजनिता मोहहेतवो मोहस्वरूपा मोहानुवन्धाः संक्लेशजनिताः संक्लेशहेतवः संक्लेशस्वरूपाः संक्लेशानुवन्धा इति परित्यजतं यावज्जीवम्, मुञ्चतं मोहचेष्टितानि, अङ्गीकुरुतं प्रशमम्, भावयतं कुशलवुद्धिम्, निरूपयतं भवविकारान्, आलोचयतं चित्तेन, संतर्पतयतं गुरून्, उद्यच्छ-

---

१ पुण डे. ज्ञा.। २ चित्तेण विसयसुहपरमत्थं पा. ज्ञा.।

धम्मे त्ति । एयमायण्णिऊण विसुद्धयरपरिणामाहिं निव्वडियभावसारं जंपियमिमीहिं । ज अज्जउत्तो आणवेइ । परिचत्ता जावज्जीवमेव अम्हेहिं अज्जउत्त तुम्हाणुमईए विसया, सेसे[1] उ सत्ती[2] पमाणं । एयमायण्णिऊण हरिसिओ कुमारो । चिन्तियं च णेण । अहो एयासिं धन्नया, अहो सुधीरत्तणं, अहो निरवेक्खया इहलोयं पइ, अहो समुयायारो, अहो हलुयकम्मया, अहो उवसमो, अहो परमत्थन्नुया, अहो वयणविन्नासो, अहो महत्थत्तणं अहो गम्भीरय त्ति । चिन्तिऊण जंपियमणेण । साहु भोईओ साहु, कयत्था खु तुब्भे, अणुमयं ममेयं तुब्भ कुसलाणुट्ठाणं । [3]परिचत्ता मए वि जावज्जीवं विसया, अङ्गीकयं बम्भचेरं । 'अहो सोहणं अहो सोहणं' ति जंपियं असोयाईहिं । वड्ढिओ[4] कुसलपरिणामो । अहासन्निहियदेवयाए[5] निओएण निवडिया कुसुमवुट्ठी । आणन्दिया सव्वे । एत्थन्तरंमि 'अहो धन्नया एयासिं, अहो ममोवरि सुहित्तणं' ति पवड्ढमाणसुहपरिणामस्स तयावरणकम्मखओवसमओ वड्ढमाणयं समुप्पन्नमोहिनाणं कुमारस्स ।

तं धर्मे इति । एतदाकर्ण्य विशुद्धतरपरिणामाभ्यां निर्वृत्तभावसारं जल्पितमाभ्याम् । यदार्यपुत्र आज्ञापयति । परित्यक्ता यावज्जीवमेवावाभ्यां आर्यपुत्र ! युष्माकमनुमत्या विषयाः, शेषे तु शक्तिः प्रमाणम् । एतदाकर्ण्य हर्षितः कुमारः । चिन्तितं च तेन । अहो एतयोर्धन्यता, अहो सुधीरत्वम् , अहो निरपेक्षतेहलोकं प्रति, अहो समुदाचारः, अहो लघुकर्मता, अहो उपशमः, अहो परमार्थज्ञता, अहो वचनविन्यासः, अहो महार्थत्वम् , अहो गम्भीरतेति । चिन्तयित्वा जल्पितमनेन । साधु भवत्यौ ! साधु, कृतार्थे खलु युवाम् , अनुमतं ममैतद् युवयोः कुशलानुष्ठानम् । परित्यक्ता मयाऽपि यावज्जीवं विषयाः, अङ्गीकृतं ब्रह्मचर्यम् । अहो 'शोभनमहो शोभनम्' इति जल्पितमशोकादिभिः । वर्धितः कुशलपरिणामः । यथासन्निहितदेवताया नियोगेन निपतिता कुसुमवृष्टिः । आनन्दिताः सर्वे । अत्रान्तरे 'अहो धन्यतै तयोः, अहो ममोपरि सुहृत्त्वम्' इति प्रवर्धमानशुभपरिणामस्य तदावरणकर्मक्षयोपशमतो वर्धमानकं समुत्पन्नमवधिज्ञानं कुमारस्य ।

---

[1] सेसेसु उ डे. ज्ञा. । [2] जहासत्ती पा. ज्ञा. । [3] परिचत्ता य डे. ज्ञा. । [4] वड्ढिओ तेसिं पि पा. ज्ञा. । [5] –देवयाए निवाडिया पा. ज्ञा. ।

पविक्खिओ तीयाइभावो। संविग्गो अइसएण। सुओ एस वइयरो आणन्दपडिहाराओ राइणा देवीए य। विसण्णो राया। भणियं च णेण। हा हा अजुत्तमणुचिट्ठियं कुमारेण। देवीए भणियं। हा जाय, परिचत्तं भवसुहं[1] ॥

एत्थन्तरंमि गहियखग्गरयणा दिप्पमाणेण मउडेणं कुण्डलालयविहूसियमुही [2]एकावलीविराइयसिरोहरा हारलयासंगएणं [3]थणजुएणं मणिकडयजुत्तबाहुलया रोमावलीसणाहेणं मज्झेण रसणादामसं[4]गयनियम्बा परिहिएणं देवदूसेणं मणिनेउरसणाहचलणा चच्चिया हरियन्दणेण सुरतरुकुसुमधारिणी महया आभोएण परिहवन्ती मणिपदीवे अच्चन्तसोमदंसणा समागया तत्थ देवया। 'अहो किमेयमच्छरीयं' ति विम्हियमणेहिं हरिसविसायगब्भिणं पणमिया एएहिं। भणियं च णाए। महाराय, अलमलं विसाएण। जुत्तमणुचिट्ठियं कुमारेण। परिचत्तं विसं, गहियममयं; उज्झिया किलीवया, [5]पयडियं पोरुसं; अवहत्थिया खुद्[6]दया, अङ्गीकयमुयारत्तं; छिन्नो भवो, संधिओ

प्रवीक्षितोऽतीतादिभावः। संविग्नोऽतिशयेन। श्रुत एष व्यतिकर आनन्दप्रतीहाराद् राज्ञा देव्या च। विषण्णो राजा। भणितं च तेन। हा हा अयुक्तमनुष्ठितं कुमारेण। देव्या भणितम्। हा जात! परित्यक्तं भवसुखम् ॥

अत्रान्तरे गृहीतखड्गरत्ना दीप्यमानेन मुकुटेन कुण्डलालकविभूषितमुखी एकावलीविराजितशिरोधरा हारलतासंगतेन स्तनयुगेन मणिकटकयुक्तबाहुलता रोमावलिसनाथेन मध्येन रसनादामसंगतनितम्बा परिहितेन देवदूष्येन मणिनुपूरसनाथचरणा चर्चिता हरिचन्दनेन सुरतरुकुसुमधारिणी महताऽऽभोगेन परिभवन्ती मणिप्रदीपान् अत्यन्तसौम्यदर्शना समागता तत्र देवता। 'अहो किमेतदाश्चर्यम्' इति विस्मितमनोभ्यां हर्षविषादगर्भितं प्रणता एताभ्याम्। भणितं च तया। महाराज! अलमलं विषादेन। युक्तमनुष्ठितं कुमारेण। परित्यक्तं

---

[1] ता कीस जाएण अइदुक्करं ववसियं पा. ज्ञा.। [2] मुत्तावलि- पा. ज्ञा.। [3] थणजुयलेण पा. ज्ञा.। [4] संगएण नितंबेण पा. ज्ञा.। [5] पायडियं पा. ज्ञा.। [6] खुड्डया मु.

मोक्खो त्ति। ता कयत्थो कुमारो। देवि! तुमं पि छड्डेहि सोयं, असोयणिज्जो कुमारो, परिचत्तमणेण भवदुक्खं, अङ्गीकयं सासयसुहं। तुमं पि धन्ना, जीए ईइसो सुओ समुप्पन्नो। निबन्धणं एस बहुयाण[1] निव्वुईए। ता परिच्चय विसायं, आलोचेहि कज्जं ति। राइणा भणियं। भयवइ, का तुमं। देवयाए भणियं। महाराय, ·खग्गपहरणोवलक्खिया सुंदरिसणा[2] नाम देवया अहं, तुह पुत्तगुणाणुराइणी इहं भवणे परिवसामि। राइणा चिन्तियं। अहो पुत्तस्स गुणा, जेण देवयाओ वि[3] अणुरायं करेन्ति। हरिसिया देवी। भणियं च णाए। महाराय, ईइसो कुमारस्स पहावो, जेण देवयाओ वि एवं मन्तेन्ति। ता एहि, गच्छम्ह तस्स अन्तियं, पेच्छामो धम्मपिण्डं, करेमो तयणुचिट्ठियं, सव्वहा जुत्तमेयं ति। राइणा भणियं। एहि, एवं करेम्ह। तओ पणमिऊण देवयं विसुज्झमाणपरिणामाइं गयाइं कुमारसमीवं। मुणियं कुमारेण, अब्भुट्ठियाइं सहरिसं, पणमियाइं विणएण, निविट्ठाइं आसणाइं, कओ आसणपरिग्गहो। पणमिऊण जंपियं

विषम्, गृहीतममृतम्, उज्झिता क्लीबता, प्रकटितं पौरुषम्, अपहस्तिता क्षुद्रता, अङ्गीकृतमुदारत्वम्, छिन्नो भवः, सन्धितो मोक्ष इति। ततः कृतार्थः कुमारः। देवि! त्वमपि मुञ्च शोकम्, अशोचनीयः कुमारः, परित्यक्तमनेन भवदुःखम्, अङ्गीकृतं शाश्वतसुखम्। त्वमपि धन्या, यस्या ईदृशः सुतः समुत्पन्नः। निबन्धनमेष बहूनां निवृतेः। ततः परित्यज विषादम्, आलोचय कार्यमिति। राज्ञा भणितम्। भगवति! का त्वम्। देवतया भणितम्। महाराज! खड्गप्रहरणोपलक्षिता सुदर्शना नाम देवताऽहम्, तव पुत्रगुणानुरागिणीह भवने परिवसामि। राज्ञा चिन्तितम्। अहो पुत्रस्य गुणाः, येन देवता अप्यनुरागं कुर्वन्ति। हर्षिता देवी। भणितं च तया। महाराज! ईदृशः कुमारस्य प्रभावः, येन देवता अप्येवं मन्त्रयन्ति। तत एहि, गच्छावस्तस्यान्तिकम्, पश्यावो धर्मपिण्डम्, कुर्वस्तदनुष्ठितम्, सर्वथा युक्तमेतदिति। राज्ञा भणितम्। एहि, एवं कुर्वः। ततः प्रणम्य देवतां विशुध्यमानपरिणामौ गतौ कुमारसमीपम्। ज्ञातं कुमारेण, अभ्युत्थितौ

---

[1] बहुमाण(णं) डे. ज्ञा. पा. ज्ञा.। [2] सुदंसणा पा. ज्ञा.। [3] वि एवं डे. ज्ञा.

कुमारेण। ताय, किमेयमणुचियमिवाणुचिट्ठियं, [१]अम्बाए वि, कीस न सद्दाविओ अहं। राइणा भणियं। कुमार, नेयमणुचियं। साहिओ देवयावुत्तन्तो। देवीए भणियं। कुमार, गुणपगरिसो तुमं, अणरुहो आएसस्स। कुमारेण भणियं। अम्ब, मा एवं भण। गुरवो खु तुब्भे, गुरुआएससंपाडणमेव कारणं गुणपगरिसस्स। राइणा भणियं। कुमार, अइदुक्करं कयं तए। कुमारेण भणियं। ताय, किमिह दुक्करं। [२]सुणाउ ताओ।

अत्थि खलु केइ चत्तारि पुरिसा। ताणं दुवे अच्चन्तमत्थगिद्धा अवरे विसयलोलुया। पवन्ना एगमद्धाणं। दिट्ठा य णेहिं कहिंचि उद्देसे मणिरयणसुवण्णपुण्णा दुवे महानिही तियससुन्दरिसमाओ य दो चेव इत्थियाओ। पावियं जं पावियव्वं ति पहट्ठा चित्तेण, धाविया अहिमुहं। सुओ य णेहिं कुओइ सद्दो। भो भो पुरिसा, मा साहसं मा साहसं ति। निरूवेह [३]उवरिहुत्तं, निवडइ तुम्हाण उवरि महा-

सहर्षम्। प्रणतौ विनयेन, निविष्टे आसने, कृत आसनपरिग्रहः। प्रणम्य जल्पितं कुमारेण। तात! किमेतदनुचितमिवानुष्ठितम्, अम्बयाऽपि, कस्मान्न शब्दायितोऽहम्। राज्ञा भणितम्। कुमार! नेदमनुचितम्। कथितो देवतावृत्तान्तः। देव्या भणितम्। कुमार! गुणप्रकर्षस्त्वमनर्हं आदेशस्य। कुमारेण भणितम्। अम्ब! मैवं भण। गुरवः खलु यूयम्, गुर्वादेशसंपादनमेव कारणं गुणप्रकर्षस्य। राज्ञा भणितम्। कुमार! अतिदुष्करं कृतं त्वया। कुमारेण भणितम्। तात! किमिह दुष्करम्। शृणोतु तातः।

सन्ति खलु केऽपि चत्वारः पुरुषाः। तेषां द्वावत्यन्तमर्थगृद्धौ अपरौ विषयलोलुपौ। प्रपन्ना एकमध्वानम्। दृष्टाश्च तैः कथंचिदुद्देशे मणिरत्नस्वर्णपूर्णौ द्वौ महानिधी त्रिदशसुन्दरीसमे च द्वे एव स्त्रियौ। प्राप्तं यत् प्राप्तव्यमिति प्रहर्षिताश्चित्तेन। धाविता अभिमुखम्। श्रुतश्च तैः कुतश्चित् शब्दः। भो भोः पुरुषा! मा साहसं मा साहसमिति। निरूपयतोपरिसंमुखम्, निपतति युष्माकमुपरि महापर्वतः,

---

[१] अम्व कीस पा. ज्ञा. अम्बाए डे. ज्ञा.। [२] सुणउ पा. ज्ञा.। [३] उवरिहुत्ता डे. ज्ञा.।

पव्वओ, एयगोयरगयाणं च अलमेइणा चेट्ठिएण। तओ निरूवियमणेहिं। दिट्ठो य नाइदूरे समद्धासियनहङ्गणो रोद्दो दंसणेण अक्कमन्तो जहासन्नजीवे अणिवारणिज्जो सुराणं पि सामत्थेण दुयं निवडमाणो पव्वओ त्ति। तओ जंपियमणेहिं। भो एवं ववत्थिए को उण इह उवाओ। आयण्णियं कुओइ। न खलु संपयं उवाओ। किं तु इच्छन्ति जे अत्थविसए, ते संपत्तेहिं असंपत्तेहिं वा जहासन्नयाए अवट्ठम्भन्ति एएण; तहा अवट्ठद्धा य पावेन्ति पुणो पुणो एवमेवावट्ठहणं[1] ति। जे उण निरीहा अत्थविसएसु भावेन्ति तयसारयं, ते वि जहासन्नयाए अवट्ठम्भन्ति एएण; तहा अवट्ठद्धा य न पावेन्ति पुणो पुणो एवमेवावट्ठहणं ति, अवि य मुच्चन्ति कालेण इमाओ उवद्दवाओ। तओ एगेहिं चिन्तियं। किमम्हाणमिमीए दीहचिन्ताए। सव्वहा पयट्टम्ह अत्थविसएसु, जं होउ तं होउ त्ति। संपहारिऊण पयट्टा सहरिसं। अन्ने उ 'हा हा एवं परिपन्थिए एयंमि नियमनस्सरेहिं असुन्दरेहिं विवाए किमेत्थ[2] अत्थविसएहिं' ति चिन्तिऊण

एतद्गोचरगतानां चालमेतेन चेष्टितेन। ततो निरूपितमेभिः। दृष्टश्च नातिदूरे समध्यासितनभोङ्गणो रौद्रो दर्शनेनाक्रामन् यथाऽऽसन्नजीवान् अनिवारणीयः सुराणामपि सामर्थ्येन द्रुतं निपतन् पर्वत इति। ततो जल्पितमेभिः। भो! एवं व्यवस्थिते कः पुनरिहोपायः। आकर्णितं कुतश्चित्। न खलु साम्प्रतमुपायः। किन्तु इच्छन्ति येऽर्थविषयान् ते संप्राप्तैरसंप्राप्तैर्वा यथासन्नतयाऽवष्टभ्यन्ते एतेन, तथाऽवष्टब्धाश्च प्राप्नुवन्ति पुनः पुनरेवमेवाष्टम्भनमिति। ये पुनर्निरीहा अर्थविषयेषु भावयन्ति तदसारताम्,तेऽपि यथासन्नतयाऽवष्टभ्यन्ते एतेन, तथाऽवष्टब्धाश्च न प्राप्नुवन्ति पुनः पुनरेवमेवावष्टम्भनमिति, अपि च मुच्यन्ते कालेनास्मादुपद्रवात। तत एकैश्चिन्तितम्। किमस्माकमनया दीर्घचिन्तया। सर्वथा प्रवर्तामहेऽर्थविषयेषु, यद् भवतु तद् भवत्विति। संप्रधार्य प्रवृत्ताः सहर्षम्। अन्ये तु 'हा हा एवं परिपन्थिनि एतस्मिन् नियमनश्वरैरसुन्दरैर्विपाके किमत्र अर्थविषयैः' इति चिन्तयित्वा निवृत्ता अर्थविषयाभ्याम्, भावयन्ति तदसारताम्,

---

१–वट्ठंभणं ति पा. ज्ञा.। २ किमत्थविसएहिं डे. ज्ञा.।

नियत्ता अत्थविसयाहिं, भावेन्ति तयसारयं, जुज्जन्ति नियनियफलेहिं।

ता एवं ववत्थिए निरूवेउ ताओ, के एत्थ दुक्करकारया के वा नहि। राइणा चिन्तिय। जे पयट्टन्ति अत्थविसएसु, ते दुक्करकारया; जओ तहा परिपन्थिए पव्वए नियमणस्सरेहिं असुन्दरेहिं विवाए किमत्थविसएहिं; कीइसी वा तहाभए पवत्ती? अणालोचयत्तमेगन्तेण; किं वा तीए तहादिट्ठपज्जन्ताए उवहासट्ठाणयाए[1] अत्थविसय[2]पत्थणाए? परमत्थेण निव्वेयकारणमेयं सयाणं ति। चिन्तिऊण जंपियं राइणा। कुमार, जे पयट्टन्ति, ते दुक्करकारया; अपवत्तणं तु [3]जुत्तिजुत्तमेव, किमेत्थ दुक्करं ति। कुमारेण भणियं। ताय, जइ एवं, ता पडन्ते मच्चुपव्वए वावायए तिहुयणस्स अइभीसणे पयईए दुज्जए पयारन्तरेण अविभाविज्जमाणसरूवे विओजए इट्ठभावाण सयापडणसंगए कारए असमञ्जसाण किलेसायासकारगा अत्थविसया विसविवायसरिसा य; विसयचासो य अव्वावाहो पयईए कारणं अम-

युज्यन्ते निजनिजफलैः॥ तत एवं व्यवस्थिते निरूपयतु तातः, केऽत्र दुष्करकारकाः के वा नहि। राज्ञा चिन्तितम्। ये प्रवर्ततन्तेऽर्थविषयेषु ते दुष्करकारकाः, यतस्तथा परिपन्थिनि पर्वते नियमनश्वरैरसुन्दरैर्विपाके किमर्थविषयैः, कीदृशी वा तथाभये प्रवृत्तिः। अनालोचकत्वमेकान्तेन, किं वा तया तथादृष्टपर्यन्तया उपहासस्थानयाऽर्थविषयप्रार्थनया, परमार्थेन निर्वेदकारणमेतत् सतामिति। चिन्तयित्वा जल्पितं राज्ञा। कुमार! ये प्रवर्तन्ते ते दुष्करकारकाः, अप्रवर्तनं तु युक्तियुक्तमेव, किमत्र दुष्करमिति। कुमारेण भणितम्। तात! यद्येवं ततः पतति मृत्युपर्वते व्यापादके त्रिभुवनस्यातिभीषणे प्रकृत्या दुर्जये प्रकारान्तरेणाविभाव्यमानस्वरूपे वियोजके इष्टभावानां सदापतनसंगते कारकेऽसमञ्जसानां क्लेशायासकारकौ अर्थविषयौ विषविपाकसदृशौ च, विषयत्यागश्चाव्याबाधः प्रकृत्या कारणममृतभावस्य श्लाघ-

---

[1] -ट्ठाणचिन्ताए डे. ज्ञा.। [2] -विसयइच्छाए मु.। [3] जुत्तमेव पा. ज्ञा.।

यभावस्स सलाहणिज्जो सयाण अकिलेससेवणिज्जो सेविज्जइ त्ति किमेत्थ दुक्करं। कहं वा एवंविहे जीवलोए न दुक्करं अत्थविसयाणुवत्तणं ति। राइणा भणियं। वच्छ, एवमेयं, जया सम्मालोइज्जइ। कुमारेण भणियं। ताय, असम्मालोचणं पुण न होइ आलोचणं। राइणा भणियं। वच्छ, एवमेयं, किं तु दुरन्तो महामोहो त्ति। कुमारेण भणियं। ताय, ईइसो एस[1] दुरन्तो, जेण एयसामत्थेण पाणिणो एवंविहे जीवलोए पहवन्ते वि उद्दाममच्चुंमि पेच्छमाणा वि एयसामत्थं गोयरगया वि एयस्स घेप्पमाणा वि जराए विउज्जमाणा वि इट्ठेहिं परिगलन्ते वि वीरिए चोइज्जमाणा वि धीरेहिं 'न अम्हाण वि एवसेयं परिणमइ, अन्नो[2] व अम्ह चिन्तओ, जं किञ्चि वा एयं, अचिन्तणीयं च धीराणं, अत्थि वा आयत्त[3]मुवायन्तरं, मोहववसायसज्झं वा इमं, अवहीरणा वा उवाओ, अच्चन्तिया वा अत्थविसय' त्ति अगणिऊण जराइदोसजालं सव्वावत्थासु बाला काऊण गयनिमीलियं परिचइय सव्वमन्नं कुसलपक्खचेट्ठियं महया पयत्तेण निव्वडिय-

नीयः सतामक्लेशसेवनीयः सेव्यते इति किमत्र दुष्करम्। कथं वैवंविधे जीवलोके न दुष्करमर्थविषयानुवर्तनमिति। राज्ञा भणितम्। वत्स! एवमेतद्, यदा सम्यगालोच्यते। कुमारेण भणितम्। तात! असम्यगालोचनं पुनर्न भवत्यालोचनम्। राज्ञा भणितम्। वत्स! एवमेतत्, किन्तु दुरन्तो महामोह इति। कुमारेण भणितम्। तात! ईदृश एष दुरन्तः, येनैतत्सामर्थ्येन प्राणिन एवंविधे जीवलोके प्रभवत्यपि उद्दाममृत्यौ प्रेक्षमाणा अपि एतत्सामर्थ्यं गोचरगता अप्येतस्य गृह्यमाणा अपि जरया वियुज्यमाना अपीष्टः परिगलत्यपि वीर्ये चोद्यमाना अपि धीरैः 'नास्माकमप्येवमेतत् परिणमति, अन्यो वाऽस्माकं चिन्तकः, यत् किंचिद् वैतद्, अचिन्तनीयं च धीराणाम्, अस्ति वाऽऽयत्तमुपायान्तरम्, मोहव्यवसायसाध्यं वेदम्, अवधीरणा वोपायः, आत्यन्तिका वाऽर्थविषयाः' इत्यगणयित्वा जरादिदोष-

---

[1] चेव पा. ज्ञा.। [2] न अम्ह चिंतओ वा अन्नो विज्जइ जो एयं चिंतिऊण अवणेइ अम्हं किलसाओ। अहवा जं किंचि पा. ज्ञा.। [3] -मुवायंतरं सव्वन्नुपणीयं सव्वविरईसव्वसंगपरिच्चायमाइयं जेण मोह-पा. ज्ञा.।

भावसारं पयट्टन्ति अत्थविसएसु, न पयट्टन्ति जराइदोसनिग्घायणसमत्थे हिए सव्वजीवाण अचिन्तचिन्तामणिसन्निहे [1]सोहए नेव्वाणस्स वीयरागदेसिए धम्मे त्ति। एयमायण्णिऊण संजायसुहयरपरिणामेण जंपियं राइणा। वच्छ, एवमेयं, न एत्थ किंचि अन्नह त्ति। देवीए भणियं। वच्छ, सव्वमेवमेयं मोहनिद्दाविगमेण परिणयप्पायमम्हाणं। किं तु न संपन्नं बालाणं[2] अहिलसियं ति [3]उव्विग्गा विय म्हि। कुमारेण भणियं। अम्ब, अल[4]मुव्वेएण; संपन्नपायमेयासिं अहिलसियं। धन्नाओ इमाओ, सफलं माणुसत्तणमेयाणं, संगयाओ मोक्खबीएण। तओ देवीए पुलोइयं तासिं वयणं। पणमिऊण [5]गुरुयणं जंपियमिमीहिं। अम्ब, नेहमेत्तनिमित्तो खु उव्वेवो अम्बाए। अन्नहा जहा उवइट्ठमज्जउत्तेण, तहेव एयं; सफलं माणुसत्तमम्हाण, पाविओ अज्जउत्तघरिणिसद्दो गुरुयणाणुहावेण तयणुरूवं च सेसं पि। ता संपन्नमम्हाण अहिलसियाहियं ति, परिच्चयउ उव्वेवमम्बा। तओ देवीए चिन्तियं। अहो एयासिं रूवं, अहो उवसमो, अहो पर-

---

जालं सर्वावस्थासु बालाः कृत्वा गजनिमीलिकां परित्यज्य सर्वमन्यत् कुशलपक्षचेष्टितं महता प्रयत्नेन निष्पन्नभावसारं प्रवर्तन्तेऽर्थविषयेषु, न प्रवर्तन्ते जरादिदोषनिर्घातनसमर्थे हिते सर्वजीवानां अचिन्त्यचिन्तामणिसन्निभे साधके निर्वाणस्य वीतरागदेशिते धर्मे इति। एतदाकर्ण्य संजातशुभतरपरिणामेन जल्पितं राज्ञा। वत्स! एवमेतद्, नात्र किञ्चिदन्यथेति। देव्या भणितम्। वत्स! सर्वमेवमेतद् मोहनिद्राविगमेन परिणतप्रायमस्माकम्। किन्तु न संपन्नं बालयोरभिलषितमित्युद्विग्नेवास्मि। कुमारेण भणितम्। अम्ब! अलमुद्वेगेन, संपन्नप्रायमेतयोरभिलषितम्। धन्ये इमे, सफलं मानुषत्वमेतयोः, संगते मोक्षबीजेन। ततो देव्या प्रलोकितं तयोर्वदनम्। प्रणम्य गुरुजनं जल्पितमाभ्याम्। अम्ब! स्नेहमात्रनिमितः खल्वुद्वेगोऽम्बायाः। अन्यथा यथोपदिष्टमार्यपुत्रेण, तथैवैतत्, सफलं मानुषत्वमावयोः, प्राप्त आर्यपुत्रगृहिणीशब्दो गुरुजनानुभावेन तदनुरूपं च शेषमपि। ततः संपन्नमावयोरभिलषिताधिकमिति, परित्यजतूद्वेगमम्बा। ततो देव्या

---

१ सासए साहए पा. ज्ञा.। २-णमभिलसियं पा. ज्ञा.। ३ एएण कारणेणं उ-पा. ज्ञा.। ४ -मुव्वेवएण डे. ज्ञा.। ५ गुरुवयणाभिसुंह पा. ज्ञा.

मत्थन्नुया, अहो वयणविन्नासो, अहो गुरुभत्ती, अहो महत्थत्तणं, अहो गम्भीरया, अहो समुयायारो त्ति । चिन्तिऊण जंपियमिमीए। उचियमेयं खग्गसेणधूयाण, जमेवं गुरुयणो [1]अणुवत्तीयइ ॥

एत्थन्तरंमि [2]नाइदूरे पुरन्दरभट्टगेहंमि समुद्धाइओ अक्कन्दो पवित्थरिओ भरेण। 'हा किमेयं ति' संभन्तो राया। भणियं च णेण। [3]अरे वियाणह, किमेयं ति। कुमारेण भणियं। ताय, अलं कस्सइ गमणखेएण, वियाणियमिणं। राइणा भणियं। वच्छ, किमेयं ति। कुमारेण भणियं। ताय, संसारविलसियं। राइणा भणियं। वच्छ, न विसेसओऽवगच्छामि। कुमारेण भणियं। सुणाउ ताओ। अद्धुउवरओ पुरन्दरभट्टो त्ति तन्निमित्तं पवत्तो तस्स गेहे अक्कन्दो। राइणा भणियं। वच्छ, सो अज्जेव दिट्ठो मए। कुमारेण भणियं। ताय, अकारणमिणं [4]मरणधम्मीणं। राइणा भणियं। वच्छ, न कोइ एयस्स वाही अहेसि; ता कहं पुण एस उवरओ। कुमारेण भणियं। ताय,

चिन्तितम् । अहो एतयो रूपम्, अहो उपशमः, अहो परमार्थज्ञता, अहो वचनविन्यासः, अहो गुरुभक्तिः, अहो महार्थत्वम् , अहो गम्भीरता, अहो समुदाचार इति । चिन्तयित्वा जल्पितमनया । उचितमेतत् खड्गसेनदुहित्रोः, यदेवं गुरुजनोऽनुवर्त्यते ।

अत्रान्तरे नातिदूरे पुरन्दरभट्टगेहे समुद्धावित आक्रन्दः प्रविस्तृतो भरेण । 'हा किमेतद्'इति संभ्रान्तो राजा। भणितं च तेन। अरे विजानीत, किमेतदिति। कुमारेण भणितम्। तात ! अलं कस्यचिद् गमनखेदेन, विज्ञातमिदम्। राज्ञा भणितम् । वत्स ! किमेतदिति। कुमारेण भणितम्। तात ! संसारविलसितम्। राज्ञा भणितम्। वत्स ! न विशेषतोऽवगच्छामि। कुमारेण भणितम्। शृणोतु तातः। अर्द्धोपरतः पुरन्दरभट्ट इति तन्निमित्तं प्रवृत्तस्तस्य गेहे आक्रन्दः। राज्ञा भणितम्। वत्स ! सोऽद्यैव दृष्टो मया। कुमारेण भणितम्। तात ! अकारणमिदं मरणधर्माणाम्। राज्ञा भणितम्। वत्स ! न कोऽप्येतस्य व्याधिरासीत् , ततः कथं पुनरेष उपरतः। कुमारेण भणि-

---

१ अणुवत्तीयति डे ज्ञा. । २ नाइदूरेण पा. ज्ञा.। ३ हरे पा. ज्ञा.। ४ मरणधम्माणं डे. ज्ञा.।

अवत्तव्वो एस वइयरो गरहिओ एगन्तेणं[1]। राइणा भणियं। वच्छ, ईइसो एस संसारो, किमेत्थ अगरहियं नाम। महन्तं च मे कोउयं ति साहेउ वच्छो। न य एत्थ कोइ असज्जणो। सज्जणकहियं च [2]गरहियं न वित्थरइ पाएण; संपयं वच्छो पमाणं ति। कुमारेण भणियं। ताय, मा एवमाणवेह; जइ एवं निब्बन्धो, ता सुणाउ ताओ। अद्धवावाइओ [3]एस नियमहिलियाए नम्मयाभिहाणाए विसप्पओएण। ता पेसेहि ताव तत्थ विसनिग्घायणसमत्थे वेज्जे, जीवइ तओ [4]ओसहपओएण। अन्नं च। तग्गेहपओलिदक्खिणावरदिसाभाए इमिणा चेव विसप्पओएण तीए दरघाइओ कुक्कुरो। तस्स वि इमो चेव ओसहविही पउञ्जियव्वो; [5]जीविस्सइ सो वि इमिणा। राइणा चिन्तियं। अहो नाणाइसओ कुमारस्स। जहाभणियमाइसिऊण पेसिया वेज्जा, भणियं च राइणा। कुमार, किं पुण तीए इमस्स असव्ववसायस्स निमित्तं। कुमारेण भणियं। ताय, अविवेओ निमित्तं; तहवि पुण विसेसओ इमं॥

तम्। तात! अवक्तव्य एष व्यतिकरो गर्हित एकान्तेन। राज्ञा भणितम्। वत्स! ईदृश एष संसारः, किमत्रागर्हितं नाम। महच्च मे कौतुकमिति कथयतु वत्सः। न चात्र कोऽप्यसज्जनः। सज्जनकथितं च गर्हितं न विस्तीर्यते प्रायेण, साम्प्रतं वत्सः प्रमाणमिति। कुमारेण भणितम्। तात! मैवमाज्ञापयत; यद्येवं निर्बन्धः, ततः शृणोतु तातः। अर्धव्यापादित एष निजमहिलया नर्मदाभिधानया विषप्रयोगेण। ततः प्रेषय तावत् तत्र विषनिर्घातनसमर्थान् वैद्यान्, जीवति तत औषधप्रयोगेण। अन्यच्च, तद्गेहप्रतोलिदक्षिणापरदिग्भागेऽनेनैव विषप्रयोगेण तया दरघातित कुर्कुरः। तस्याप्ययमेवौषधविधिः प्रयोक्तव्यः, जीविष्यति सोऽप्यनेन। राज्ञा चिन्तितम्। अहो ज्ञानातिशयः कुमारस्य। यथाभणितमादिश्य प्रेषिता वैद्याः, भणितं च राज्ञा। कुमार! किं पुनस्तस्या अस्यासद्व्यवसायस्य निमित्तम्। कुमारेण भणितम्। तात! अविवेको निमित्तम्; तथापि पुनर्विशेषत इदम्॥

---

१ इहपरलोए य पा. ज्ञा. २ गरहियं वि पा. ज्ञा.। ३ एस पुरंदरभट्टो पा. ज्ञा.। ४ ओसहि-मु.। ५ जो पुरंदरभट्टस्स। जीविस्सइ पा. ज्ञा.।

वल्लहा सा पुरन्दरस्स मोहदोसेण पसत्ता अज्जुणाभिहाणे नियदासे। सुयमणेण सवणपरंपराए, न सद्दहियं सिणेहओ। अइक्कन्तो कोइ कालो। अन्नया य 'मा संताणविणासो हवउ' त्ति साहियं से जणणीए। पुत्त, न सुन्दरा ते महिलिया; ता मा उवेक्खसु त्ति। चिन्तियं पुरन्दरेण। न खलु एयमेवं भवइ। अभिन्नचित्ता मे पिययमा, अम्बा य एवं वाहरइ। निबद्धवेराओ य पायं सासुयावहूओ। अमच्छरिणी य अम्बा,[1] पिययमा उण पगरिसो गुणाण। चवलाओ य इत्थियाओ त्ति रिसिवयणं, न य अन्नहा हवइ। विसमा य मयणवाणा। ता परिक्खामि ताव एयं ति। चिन्तिऊण पइरिक्कंमि भणिया नम्मया। सुन्दरि, रायाएसेणं गन्तव्वं मए माहेसरं, आगन्तव्वं च सिग्घमेव। ता सुन्दरीए कइवि दियहे सम्ममासियव्वं ति। नम्मयाए भणियं। अज्जउत्त, अहं पि गच्छामि; कीइसं [2]मम तए विणा सम्मं ति भणमाणी परुइया एसा। भणिया य पुरन्दरेण। सुन्दरि, अलं सिणेहकायरयाए, न मम तत्थ खेवो त्ति। नम्मयाए

वल्लभा सा पुरन्दरस्य मोहदोषेण प्रसक्ताऽर्जुनाभिधाने निजदासे। श्रुतमनेन श्रवणपरम्परया, न श्रद्धितं स्नेहतः। अतिक्रान्तः कोऽपि कालः। अन्यदा च 'मा सन्तानविनाशो भवतु' इति कथितं तस्य जनन्या। पुत्र! न सुन्दरा ते महिला, ततो मोपेक्षस्वेति। चिन्तितं पुरन्दरेण। न खल्वेतदेवं भवति। अभिन्नचित्ता मे प्रियतमा, अम्बा चैवं व्याहरति। निबद्धवैरे च प्रायः श्वश्रूवध्वौ। अमत्सरिणी चाम्बा, प्रियतमा पुनः प्रकर्षो गुणानाम्, चपलाश्च स्त्रिय इति ऋषिवचनम्, न चान्यथा भवति। विषमाश्च मदनवाणाः। ततः परीक्षे तावदेतामिति। चिन्तयित्वा प्रतिरिक्ते भणिता नर्मदा। सुन्दरि! राजादेशेन गन्तव्यं मया माहेश्वरम्, आगन्तव्यं च शीघ्रमेव। ततः सुन्दर्या कत्यपि दिवसान् सम्यगासितव्यमिति। नर्मदया भणितम्। आर्यपुत्र! अहमपि गच्छामि, कीदृशं मम त्वया विना सम्यगिति भणन्ती प्ररुदितैषा। भणिता च पुरन्दरेण। सुन्दरि! अलं स्नेहकातरतया, न मम तत्र क्षेप (विलम्ब) इति। नर्मदया भणितम्। आर्यपुत्रः प्रमाण-

---

१ सव्वसत्तेसु, ण एत्तियं कालं सासुयसुण्हाण वइयरो लक्खिओ (क.) पा. ज्ञा.। २ मे डे. ज्ञा. पा. ज्ञा.।

भणियं। अज्जउत्तो पमाणं ति। बिइयदियहे य निग्गओ पुरन्दरो, गओ मायापओएण। अइवाहिऊण कहिंचि वासरं पविट्ठो रयणीए। गओ अद्धरत्तसमए नियय भवणं, पविट्ठो वासगेहं। दिट्ठा य णेण सुरयायासखेयसुहपसुत्ता समं अज्जुणएण नम्मया। कुविओ खु एसो, पणट्ठा विवेयवासणा। चिन्तियं च णेण। सुहाहारतुल्लाओ इत्थियाओ; जत्तेण एतासिं भोओ पालणं च। दुट्ठो य दुरायारो अज्जुणओ, जो मे कलत्तं अहिलसइ; ता एयं वावाएमि त्ति। चिन्तिऊण सुहपसुत्तो वावाइओ णेण अज्जुणओ। वावाइऊण य निग्गओ वासगेहाओ। चिन्तियं च णेण। पेच्छामि, किं मे पिययमा करेइ त्ति। ठिओ एगदेसे। तहाविहरुहिरफंसेण विउद्धा नम्मया। दिट्ठो य णाए दीहनिद्दापसुत्तो अज्जुणओ। चिन्तियं च णाए। हा हा विवन्नो मे पिययमो, हा हय म्हि मन्दभाइणी। अह केण उण एवं ववसियं; कूरो खु[१] सो पावो। कीस वा अहं न वावाइया, किं वा ममं जीवइ(जीविएण) अवणीयं हिययबन्धणं। नियत्ता रइसुहकहा। सव्वहा

मिति। द्वितीयदिवसे च निर्गतः पुरन्दरः, गतो मायाप्रयोगेण। अतिवाह्य कुत्रचिद् वासरं प्रविष्टो रजन्याम्। गतोऽर्धरात्रसमये निजभवनम्, प्रविष्टो वासगेहम्। दृष्टा च तेन सुरतायासखेदसुखप्रसुप्ता सममर्जुनेन नर्मदा। कुपितः खल्वेषः, प्रनष्टा विवेकवासना। चिन्तितं च तेन। सुधाहारतुल्याः स्त्रियः, यत्नेनैतासां भोगः पालनं च। दुष्टश्च दुराचारोऽर्जुनः, यो मे कलत्रमभिलषति, तत एतं व्यापादयामीति। चिन्तयित्वा सुखप्रसुप्तो व्यापादितस्तेनार्जुनः। व्यापाद्य च निर्गतो वासगेहात्। चिन्तितं च तेन। पश्यामि, किं मे प्रियतमा करोतीति। स्थित एकदेशे। तथाविधरुधिरस्पर्शेन विबुद्धा नर्मदा। दृष्टश्च तया दीर्घनिद्राप्रसुप्तोऽर्जुनः। चिन्तितं च तया। हा हा विपन्नो मे प्रियतमः, हा हताऽस्मि मन्दभागिनी। अथ केन पुनरेवं व्यवसितम्, क्रूरः खलु स पापः। कस्माद् वाऽहं न व्यापादिता, किं वा मम जीवितेन, अपनीतं हृदयबन्धम्। निवृत्ता रतिसुखकथा। सर्वथेदृश एष संसार इति। चिन्तयित्वा वासगेहभित्तिमूले

---

[१] खलु कोइ एस पावो पा. ज्ञा.।

इइसो एस संसारो त्ति। चिन्तिऊण वासगेहभित्तिमूले खया दीहखड्डा, निहओ तहिं अज्जुणओ। एयमवलोइऊण अवक्कन्तो [1]पुरन्दरो, गओ अहिमयपएसं। कया य [2]णाए तहिं पएसे थलहिया, कप्पिया [3]तस्स बोन्दी, पूएइ [4]पइदिणं, करेइ [5]बलिविहिं, निहेइ नेहदीवं, आलिङ्गइ सिणेहमोहेण। उचियसमएणं च आगओ पुरन्दरो। न दंसिओ तेण वियारो, न लक्खिओ नम्मयाए। अइक्कन्ता कइइ दियहा। दिट्ठा [6]पुरन्दरेण थलहियासुस्सूसा। चिन्तियं च णेण। अहो से मूढया, अहो [7]अणुराओ। अहवा [8]अणहीयसत्थो ईइसो चेव [9]इत्थियायणो होइ। किं ममेइणा। सुहाहारतुल्लाओ इत्थियाओ त्ति रिसिवयणं। ता करेउ एसा जं से पडिहायइ। पुव्विं व तीए सह विसयसुहमणुहवन्तस्स अइक्कन्ता दुवालससंवच्छरा। इओ य अईयपञ्चमदिणे पत्थुयाए [10]पक्खाइयाए उवगप्पिए विविहदियभोयणे अभुत्तेसुं दिएसुं समासन्नाए भोयणवेलाए दिट्ठा पुरन्दरेण तीए थलहियाए पिण्डविहाणमुवगप्पयन्ती नम्मया। तओ ईसि विहसिऊण जंपि-

खाता दीर्घगर्ता, निखातस्तत्रार्जुनः। एवमवलोक्यापक्रान्तः पुरन्दरः, गतोऽभिमतप्रदेशम्। कृता च तया तत्र प्रदेशे स्थलिका, कल्पिता च तस्य बोन्दिः, पूजयति प्रतिदिनम्, करोति बलिविधिम्, निदधाति स्नेहदीपम्, आलिङ्गति स्नेहमोहेन। उचितसमयेन चागतः पुरन्दरः। न दर्शितस्तेन विकारः, न लक्षितो नर्मदया। अतिक्रान्ताः कत्यपि दिवसाः। दृष्टा पुरन्दरेण स्थलिकाशुश्रूषा। चिन्तितं च तेन। अहो तस्या मूढता, अहो अनुरागः। अथवाऽनधीतशास्त्र ईदृश एव स्त्रीजनो भवति। किं ममैतेन। सुधाहारतुल्या स्त्रिय इति ऋषिवचनम्। ततः करोत्वेषा, यत् तस्याः प्रतिभाति। पूर्वमिव तया सह विषयसुखमनुभवतोऽतिक्रान्ता द्वादश संवत्सराः। इतश्चातीतपञ्चमदिने प्रस्तुतायां पक्षादिकायामुपकल्पिते विविधद्विजभोजनेऽभुक्तेषु द्विजेषु समासन्नायां भोजनवेलायां दृष्टा पुरन्दरेण तस्यां स्थलि-

---

[1] पुरंदरभट्टो **पा. ज्ञा.**। [2] नम्मयाए **पा. ज्ञा.**। [3] अज्जुणयस्य **पा. ज्ञा.**। [4] अग्गउराइहिं। [5] विविहपयारेहिं बलिविहाणं **पा. ज्ञा.**। [6] पुरंदरभट्टेण अज्जुणयनिहियपदेसे थलहिया कीरमाणी य तीए सुस्सूसा **पा. ज्ञा.**। [7] से अणुराओ **पा. ज्ञा.**। [8] न एत्थ अच्छरीअं **पा. ज्ञा.**। [9] इत्थियाण नेहो **पा. ज्ञा.**। [10] पवणिरुयइयाण **डे. ज्ञा.**

यमणेण। हला, किमणेण अज्जावि। एयमायण्णिय भिन्नमिमीए हिययं। चिन्तियं च णाए[1]। हन्त एएण मे पिययमो वावाइओ, अन्नहा कहं एस एवं जंपइ। अहो से कूरहिययया। ता इमं एत्थ पत्तयालं; वावाएमि एयं हिययनन्दणसत्तुं, करेमि वेरनिज्जायणं। एसो य एत्थुवाओ, देमि से विसभोयणं ति। चिन्तिऊण आणावियं विसं। अवसरो त्ति कयमज्ज विसभोयणं पउत्तं च णाए। एस एत्थ वइयरो। राइणा भणियं। वच्छ, कुक्कुरवइयरो कहं ति। कुमारेण भणियं। ताय, तस्स वि इमीए चेवं[2] थलहिगासंणिविट्ठपिययमोवद्दवगारी इमो त्ति तं चेव विसभोयणं पउत्तं। अवि[3] य।

तन्नेहमोहियाए तस्सोवद्दवनिमित्तमेयाए। सो चेव सत्त वारे एस हओ अज्जुणो ताय ॥

कायां पिण्डविधानमुपकल्पयन्ती नर्मदा। तत ईषद् विहस्य जल्पितमनेन। हला! किमनेनाद्यापि। एतदाकर्ण्य भिन्नमस्या हृदयम्। चिन्तितं च तया। हन्त एतेन मे प्रियतमो व्यापादितः, अन्यथा कथमेष एवं जल्पति। अहो तस्य क्रूरहृदयता। तत इदमत्र प्राप्तकालम्, व्यापादयाम्येतं हृदयनन्दनशत्रुम्, करोमि वैरनिर्यातनम्। एष चात्रोपायः, ददामि तस्य विषभोजनमिति। चिन्तयित्वाऽऽनायितं विषम्। अवसर इति कृतमद्य विषभोजनम्, प्रयुक्तं च तया। एषोऽत्र व्यतिकरः। राज्ञा भणितम्। वत्स! कुर्कुरव्यतिकरः कथमिति। कुमारेण भणितम्। तात! तस्याप्यनयैव स्थलिकासंनिविष्टप्रियतमोद्रवकारी अयमिति तदेव विषभोजनं प्रयुक्तम्। अपि च।

तत्स्नेहमोहितया तस्योपद्रवनिमित्तमेतया। स एव सप्त वारान् एष हतोऽर्जुनस्तात! ॥

---

[1] णाए छलेण **पा. ज्ञा.**। थलहियाए निवसइ एस साणो, तं निवसमाणं दट्ठूण पिय–**पा. ज्ञा.**। [2] सो उण अज्जुणओ य तक्कम्मदोसेण एत्थेव गेहे अज्जुणयजम्मवड्ढियाए कोइलाभिहाणाए किण्हसुणहीए कुच्छिंसि उवज्जमाणो अहेसि, ताव जाव इह जम्मपज्जवसाणो। अवि य एयाए चेव नम्मयाए अन्नाणदोसेण इमिणा चेव पओएण जम्मे तन्नेहमोहियमईए तस्सोद्दवकारित्ति एयाए सो चेव सत्त वारे सुणहजाईए दुव्वतीए हओ अज्जुणओ **पा. ज्ञा.**।

[1]जं सो मरिऊण तहा अचिन्तसामत्थकम्मदोसेण । एत्थेव सत्त वारे उववन्नो हीणजम्मेसु ॥
किमिगिहकोइलमूसयभेगालससप्पसाणभावेण । नियमरणथामपडिबन्धदोसओ पाविओ मरणं ॥
धी संसारो जहियं जुवाणओ परमरूवगव्वियओ । मरिऊण जायइ किमी तत्थेव [2]कलेवरे नियए ॥
घाइज्जइ मूढेणं मूढो तन्नेहमोहियमणेण । जहियं तहिं चेव रई [3]एयं पि हु मोहसामत्थं ॥

ता एस कुक्कुरवइयरो त्ति । एयमायण्णिऊण संविग्गो राया । चिन्तियं च णेण । अहो दारुणया संसारस्स, अहो विचित्तया कम्मपरिणईए, अहो विसयलोलुयत्तं जीवाणं, अहो अपरमत्थन्नुया; सव्वहा महागहणमेयं ति ॥

यत् स मृत्वा तथाऽचिन्त्यसामर्थ्यकर्मदोषेण । अत्रैव सप्त वारान् उपपन्नो हीनजन्मसु ॥ ॥
कृमिगृहकोकिलमूषकभेकालससर्पश्वानभावेन । निजमरणस्थानप्रतिबन्धदोषतः प्राप्तो मरणम् ॥
धिक् संसारं यत्र युवा परमरूपगर्वितः । मृत्वा जायते कृमिस्तत्रैव कलेवरे निजके ॥
घात्यते मूढेन मूढस्तत्स्नेहमोहितमनसा । यत्र तत्रैव रतिरेतदपि खलु मोहसामर्थ्यम् ॥

तत एष कुर्कुरव्यतिकर इति । एतदाकर्ण्य संविग्नो राजा । चिन्तितं च तेन । अहो दारुणता संसारस्य, अहो विचित्रता कर्मपरिणतेः, अहो विषयलोलुपत्वं जीवानाम् , अहो अपरमार्थज्ञता, सर्वथा महागहनमेतदिति ।

---

१ एयं मरिऊण तहा अचिंतसामत्थकम्मदोसेण । एत्थेव सत्तवारे उववन्नो णह(हीण)कुच्छीए ॥ एवं (सु)णहजम्मे सुकुमारियो णम्मयाए सो दइओ । छज्जम्मे उण य जह मओ तहा निसामेहि । २ कडेवरे पा. ज्ञा. ३ एयं अइमोहसामत्थं पा. ज्ञा. ।

एत्थन्तरंमि समागया वेज्जा। भणियं च णेहिं। देव, देवपसाएण जीवाविओ पुरन्दरभट्टो कुक्कुरो य। एयमायण्णिय हरिसिओ राया। भणियं च णेण। कहं जीवाविओ त्ति। वेज्जेहिं भणियं। [1]देव, दाऊण छड्डावणाइं छड्डाविओ विसं, तओ जीवाविओ त्ति॥

